SHRI RAJASTHAN SANSKRIT COLLEGE GRANTHAMALA-14-KUSUM.

(In memory of Pandit Snehiramji Shastri, and Shivanaramji Shastri.)

LAGHU
SHABDENDU SHEKHAR

OF

M. M. NAGESH BHATT

WITH

Rare Commentaries.

(1) Abhinava Chandrika, (2) Chidasthimala,
(3) Sadashiva Bhatti, (4) Visamapadvivriti,
(5) Jyotsna, (6) Vijaya, (7) Varavarn

Explanatory Note

BY

Pt. GURU PRASAD SHASTRI

VYAKARNACHARYA, NYAYACHARYA, DARSHANACHARYA,
PRINCIPAL RAJASTHAN SANSKRIT COLLEGE,
MIRGHAT, BENARES CITY.

EDITED BY

Pt. Nandkishore Shastri, Ayurvedacharya.
[PROFESSOR RAJASTHAN SANSKRIT COLLEGE, KASHI.]

PUBLISHED BY

BHARGAVA PUSTAKALAYA,
GAIGHAT, BENARES CITY.

First Library Edition] 1936. Rs. 8/-

॥ श्रीः ॥

अस्मत्पितामहश्रीचरणानां—पण्डितराजश्री १०८स्नेहिरामजिशास्त्रिणाम्,

अस्मत्पितृचरणानाम्—न्यायाचार्यपण्डितश्री १०८शिवनारायणशास्त्रिणाञ्च स्मारकम्।

श्रीराजस्थान-संस्कृत-कालेज-ग्रन्थमालायाः।

चतुर्दशकुसुमम्

महामहोपाध्यायनागेशभट्टविरचितः—

लघुशब्देन्दुशेखरः

श्रीविश्वनाथदण्डिभट्टविरचितयाऽभिनवचन्द्रिकाटीकया, श्रीवैद्यनाथपायगुण्डे-विरचितया चिदस्थिमालाटीकया, श्रीसदाशिवभट्टविरचितेन तिलकेन, श्रीमद्भट्टोदयङ्करपाठकविरचितया ज्योत्स्नाटीकया, श्रीराघवेन्द्राचार्य-कृतया विषमपदविवृत्या, कारकप्रकरणे—श्रीशिवनारायणशास्त्रि-विरचितया विजयाटीकया श्रीगुरुप्रसादशास्त्रिविरचितया न्यासपरिष्कारपूर्णया वरवर्णिन्या, किञ्च—टिप्पण्या च विराजितः।

तस्य

(अव्ययीभावान्तो भागः)

समलङ्कर्ता—श्रीगुरुप्रसादशास्त्री,

व्याकरणाचार्यः, न्यायाचार्यः, दर्शनाचार्यः,

[प्रिन्सिपल—श्रीराजस्थान-संस्कृत-कालेज, मीरघाट, काशी।]

सम्पादकः—पं० नन्दकिशोरशास्त्री, आयुर्वेदाचार्यः,

[प्रोफेसर—श्रीराजस्थान-संस्कृत-कालेज, मीरघाट, काशी।]

प्रकाशकः—भार्गव-पुस्तकालयः, गायघाट, काशी।

प्रथमं राजसंस्करणम्]   १९९२ वसन्तपञ्चमी   [मूल्यं अष्टौ रूप्यकाणि ८)

मुद्रक—
बाबू कैलासनाथ भार्गव,
भार्गव भूषण प्रेस, त्रिलोचन, काशी ।

॥ श्रीः ॥

प्रास्ताविकङ्किञ्चित् ।

अथ परिप्रथितयशोराशिधवलिताखण्डभूमण्डलानामनितरसाधारणपाण्डित्यप्रकर्षनिघृष्टवादिमत्तमतङ्गजानां, महामहोपाध्यायपण्डितप्रकाण्ड-श्रीनागेशभट्टानां जगदावर्जनप्रभविष्णु निस्तन्द्रं पदं लम्भयन्तीषु नैकासु कृतिषु मूर्धाभिषिक्तं वरेण्यं धाम दधानो लघुरपि महतोऽपि लघयन्नन्वर्थनामा लघुशब्देन्दुशेखरो विद्वद्वैरेयैर्**भट्टोजिदीक्षित**चरणैराविष्कृतायाः **सिद्धान्तकौमुद्या** व्याख्यानव्यपदेशेन निखिलवैयाकरणसिद्धान्तानां कामं प्रकाशकः कैर्नाम न श्रद्धाऽवनतोत्तमाङ्गैः सादरमभिनन्द्यते ? ।

अनुगङ्गमङ्ग ! वाराणस्यामस्याङ्कस्य न सचेतसो हृदयावर्जनाय प्रभवति प्रतिप्रतोलि प्रत्यङ्गणं वाऽनुरणन्मसृणमसृणो ध्वनिर्वटूनां शेखरस्यास्य फक्किकाः समभ्यस्यताङ्कलगलविवरान्मन्द्रोऽतन्द्रशोभः समुत्तिष्ठन्प्रसरतोऽध्वनीनस्यापि ? ।

के नाम नास्य ग्रन्थरत्नस्यानन्यदुर्लभेन सौभाग्यसौरभेण परिस्पर्द्धमाना हृदि कमप्यनिवचनीयं भावमुद्बिभ्रति सुकृतिनोऽपि ? । निगूढतमतत्त्वस्य तस्यास्य प्रथितमहसो ग्रन्थरत्नस्य विद्वन्मौलिमण्डनस्य शेखरस्य—तदनुरूपाभिर्नैकविधेन पथा गूढतमन्तत्त्वं प्रकटयन्तीभिर**भिनवचन्द्रिका**दिभिष्टीकाभिरलमलङ्कृतस्येदम्प्रथमं राजसंस्करणं प्रकल्पयन्त्याः काशीस्थ—'श्रीराजस्थान-संस्कृत-कालेज-ग्रन्थमालायाः' सौभाग्यातिशयङ्किल परामृशन्तो भृशं निभृततमम्प्रमोदामहे ।

(१) चिदस्थिमाला ।

तत्र—तत्रभवन्नागेशभट्टप्रधानशिष्यश्री**वैद्यनाथपायगुण्डे**—विरचिता चिदस्थिमाला टीका शेखरपङ्क्तिलापने, 'कुतः केन वा का किल शङ्का कौमुदीमधिकृत्य कृता ? यामपहस्तयितुममुष्याः शेखरपङ्क्तेरवतारः' इत्याद्यवश्यज्ञातव्यविषयप्रकटने च सर्वाष्टीका अप्यतिशेते ।

क्वचन प्रतिपङ्क्ति प्रतिपदञ्च क्वचन दुर्विगाहविषम-तमाऽशुद्धि-दुरुक्ति-द्विरुक्ति-पङ्क्ति-

विपर्यास-प्रसङ्गभङ्गादिदूषणगणैराकुलीकृताया अस्याः शोधनं नाम नवीनटीकानिर्माणादपि गरिष्ठमतिमात्रं मनोव्यथमापादयदपि श्रीचिन्तामणिगुरुचरणकृपयैव निर्व्यूढमिति वस्तुस्थितिरेवैषा । अस्याः कर्णेहत्य रसमास्वादयन्तो रसिकाः प्रकामं नाम प्रमोदं धास्यन्ति । अस्याश्च काप्यभिनवैव वर्णनशैलीति द्रष्टॄणां स्पष्टमेतद्भवेदेवाभिरूपपुङ्गवानाम् ।

अस्मदुपलब्धेषु चतुर्ष्वपि पुस्तकेषु प्रत्यक्षरं दुर्विगाहा अशुद्धयो ग्रन्थरत्नं दूषयन्त्य इत्रोपलभ्यन्ते । ता निरस्य प्रकाशनं नामासिधाराऽवलेहनमेव । अथ तत्कियदिव निर्व्यूढमस्माभिरित्यत्र तु विद्वांसः प्रमाणम् । इयं कारकान्तैवोपलभ्यते ।

(२) अभिनव-चन्द्रिका ।

शारदावताराणां **श्रीबालशास्त्रि**परमगुरुचरणानां शिष्यैर्दण्डिभट्टैर्विरचिता परिष्कारपथावलम्बिनी जगद्विदिताऽभिनवचन्द्रिकाऽद्यापि पठने पाठने चोपयुज्यते, नितरामभिनन्द्यते च परिष्कारप्रियैः पण्डितवृन्दैरन्तेवासिसार्थैश्च । परीक्षादिषु बाढमुपकारिणीयमविकलं प्रकाशभावं भजमाना भूयोऽपि विदुषस्तोषयेदिति,–बहुशः स्खलनं दधत्या पङ्क्तिभ्रंश–विषयप्रमोष–ग्रन्थासङ्गति–प्रसङ्गभङ्गादि–निगूढदूषणगणैः पदे–पदे समाक्रान्ताया अस्याः स्वशेमुषीं, गुरूक्ति-परम्परा-स्वसम्प्रदायादिकञ्च प्रमाणीकृत्य शोधनं नाम नोद्वेजयिष्यति सहृदयानिति च सुदृढोऽस्माकं प्रत्ययोन्मेषः । हन्त ! इयं हलन्तपर्यन्तमेवोपलब्धा । अग्रे तु अस्मत्तातपादैर्न्यायाचार्यश्री**शिवनारायणशास्त्रि**भिर्विरचिता नवीनशैलीसुललिता विजयैव विजयते, अस्मत्सङ्कलिता–**वरवर्णिनी** च ।

अस्याश्च नवपुस्तकानि शोधनायोपयुक्तान्यस्माभिः, तत्र प्रायः समाना एवाऽशुद्धयो दरीदृश्यन्ते । लेखकैरियं मन्ये एवं कदर्थिता–यत्–यद्यस्यामुपात्तो विषयः सम्प्रदायप्रसिद्धो न स्यात्तर्ह्यस्याः संशोध्य प्रकाशनमप्यसम्भाव्यमेव स्यात् । इदानीं पठन-पाठनयोरुपयुज्यमानो विषयोऽस्यां निबद्ध इत्येतावतैवाऽस्या भूयान् समादरो दरीदृश्यते ।

(३) सदाशिवभट्टीयं तिलकं [भट्टी]

१८७३ सम्वति विद्यमानैः सिद्धसारस्वतैः प्रचण्डपाण्डित्यशोभिभिः काशिकासिपरिसरमलङ्कुर्वाणैः **श्रीसदाशिवभट्टै**र्विरचिता प्रक्रियांशव्याख्यानमूर्धन्यतमा टीकेयमतीव

मनोहारिणी विदुषां समवाये नितान्तं प्रथते च । परन्दौभाग्यभरेणान्तेवासिनामस्या न शुद्धं संस्करणमिति दूयमानमानसानां मनीषिणां कृतेऽस्माभिरत्यन्तं क्लेशमुरीकृत्यापि किञ्चिदिव शोधितेयं हर्षतरलितस्वान्तांस्तानतान्तान्विधास्यति पण्डितेन्द्रानिति वयं विदन्तः प्रमोदामहे। इदम्प्रथममर ः किञ्चिदिव शुद्धं संस्करणमिति ब्रुवन्तो हर्षातिरेकम्भजामहे च।

(४) ज्योत्स्ना ।

श्रीसदाशिवभट्टादिभिराद्रियमाणा विवेचनेयं कामपि तां शोभां धत्ते इति विद्वच्चेतांसि प्रमाणम् । इयं १८५० वत्सरे वैक्रमेऽधिकाशि प्रकटितेति सप्रमाणमुपरिष्टान्निवदयिष्यामः। अस्याः शोधने परैस्तर्कयितुमप्यशक्यः श्रमः खेदश्चास्मान्व्याकुलीचकार।

(५) विषमा [विषमपदविवृतिः]

श्रीराघवेन्द्राचार्यैः सदाशिवभट्टाभ्यर्णङ्कालं स्पृशद्भिः स्वनिर्मितां चन्द्रिकां सङ्क्षिप्येयं निर्मिता। प्रक्रियांशं विवृण्वती चेयं म०म० श्रीराजारामशास्त्रिचरणैः, तदन्तेवासिभिः शिवावतारैः श्री**बालशास्त्रि**चरणैश्च तत्र-तत्र शेखरव्याख्यानावसरे स्मर्यमाणा विशिष्टं स्थानं विद्वत्समवाये धत्ते इति विदन्त्येव विद्वांसः ।

(६) विजया

कारकाव्ययीभावप्रकरणेऽस्मत्पितृचरणैः श्रीश्री**शिवनारायणशास्त्रि**भिराविष्कृता नितरां प्रौढाऽपि सरला विजयाऽभिधाना शखरटीकाऽपि निवेशिता । अस्या अतितमां मधुरां वर्णनशैलीं दृष्ट्वा परीक्षार्थिसार्थः सर्वथैव प्रमोदमाधास्यति।

(७) वरवर्णिनी

श्रीविश्वनाथावतार**श्रीबालशास्त्रिचरणै**रभ्यूहितस्य, तदन्तेवासिभिरस्मत्पितामहश्रीचरणैः श्री**स्नेहिरामशास्त्रि**भिराविष्कृतस्य शब्देन्दुशेखर-**बृहज्जटाजूट**-शब्देन्दुशेखर-**भूति**—शब्देन्दुशेखर—**त्रिपुरसुन्दरी**त्यादिनामभिः प्रसिद्धस्य व्याख्यानिकुरम्बस्य, किञ्च स्त्रीप्रत्ययादावुमानाथीयदीपिकायाः, गुरुवर--पण्डितैकशेष—शेषावतार—श्री १०८ श्री**हरनारायणत्रिपाठि**पादानाञ्चालम्बनेन मया सङ्कलितेयं वरवर्णिनी यदि विदुषस्तोषयेन्ननु सफलश्रमोऽहं कृतकृत्यमात्मानं मन्ये ।

अत्र स्वसम्प्रदायमनुरुद्ध्यैव सर्वे परिष्कारा, न्यासाश्च, विशिष्टाः शङ्काः, समाधयश्च निवेशिताः—इति क्वचित्पुनरुक्तिदोषोऽपि मर्षणीय एव ।

यथामति शोधितेप्यत्र शेखरे नूनं मदज्ञानविलसिता मुद्रणयन्त्रसङ्घर्षजाश्च मात्राभङ्गादिनैकरूपास्त्रुटयो भवेयुस्ता विद्वद्भिः समीकरणीया एव ।

ननु—विद्वन्निवहैरेवैकपदे संहत्य कर्त्तुमर्हं, नितान्तं गुरु कार्यमेतच्छेखरप्रकाशनात्मकं त्रिचतुराक्षरलवलघीयसा चेतसा चिकीर्षन्नहं कथं नाम न वचनीयोऽस्म्यभिरूपाणाम्? ।

अथापि—अप्रकाशितग्रन्थप्रकाशनादिकौतुकङ्कथङ्कथमपि संवरीतुमसमर्थेन मया किमप्यदभ्रेण साहसेन यदिदमनुष्ठितं, तत्र—

'पदे त्वर्वाचीने पतति न मनः कस्य ? न वचः ?'

—इति प्रामाणिकोक्तिरेव प्रमाणभूता ।


किञ्च—दुर्लभतमग्रन्थप्रदानैरतिवेलमस्माननुगृह्णतां परममान्यानां महामहोपाध्याय-राजकीयविद्यालयाधिपति—**श्रीगोपीनाथकविराज**पूज्यपादानां न केवलमयमेव जनः—सर्वोपि सुरभारतीप्रणयिसार्थ एवाधमर्णभावं भजते इति न चटुलचाटुवाद एषः ।

एवं मान्यवर—**श्रीगणपतिशास्त्रि**मुकाटे—**श्रीगङ्गाधरशास्त्रि**भारद्वाज,—सुहृद्धरीण—**श्रीनृसिंह**शास्त्रित्रिपाठि—**श्रीगोपालशास्त्रि**नेने—**श्रीनारायणशास्त्रि**खिस्ते—व्याकरणाचार्य—सुहृन्मूर्धन्य—स्वर्गीय**भास्कर**शर्मपर्वतीयप्रभृतयोऽस्मान्नैकविधाभिर्वीथीभिरुत्साहयन्तो मान्या न विस्मरणीयाश्च ।


ईदृशमहत्तमग्रन्थरत्नस्य मुद्रणेन संस्कृतस्नेहिलोकमुपकुर्वन्तः **श्रीजगन्नाथप्रसाद**भार्गवमहोदयाः, तदनु श्री**कैलासनाथ**भार्गवमहाभागाश्च नितरां धन्यवादार्हाः । इति ।

श्रीराजस्थान-संस्कृत-कालेज,
मीरघाट, काशी ।
वसन्तपञ्चमी १९९२.—२८।१।३६

विधेयतमस्य—
श्रीगुरुप्रसादशास्त्रिणः ।




शब्देन्दुशेखर त्रिपुरसुन्दरीव्याख्याकाराः, अस्मत्पितामहाः—
पण्डितराज-श्रीस्नेहिरामशास्त्रिणः,
जन्मसंवत् १९०५-] चिड़ावा राजपूताना [कैलासवास-संवत् १९८०



शब्देन्दुशेखरविजयाव्याख्याकारा अस्मत्तातपादाः—
श्रीशिवनारायणशास्त्रिणो न्यायाचार्याः ।
जन्म सं० १९३६ वै०—काशीवास सं० १९९१ वै०

टीकाषट्कोपेतः—

लघुशब्देन्दुशेखरः ।



पण्डितराज श्रीस्नेहिरामशास्त्रिणां पौत्रः, न्यायाचार्यश्रीशिवनारायणशास्त्रिणां पुत्रः,

श्रीगुरुप्रसादशास्त्री, व्याकरणाचार्यः, न्यायाचार्यः,

दर्शनाचार्यः, आयुर्वेदाचार्यः, (काशी) ।

['शब्देन्दुशेखराभिनवराजलक्ष्मी' 'वरवर्णिन्यादि' व्याख्याकारः]

परमगुरुवराणां—श्री १०८ श्रीविश्वनाथबालशास्त्रिचरणानां—

अस्मत्पितामहानां—पण्डितराज श्री १०८ **स्नेहिरामशास्त्रिचरणानां**—

अस्मत्तातपादानां—श्री१०८ **शिवनारायणशास्त्रि**—न्यायाचार्याणाञ्च स्मारकः—

श्रीराजस्थान-संस्कृत-कालेज-ग्रन्थमालायाः—

वाङ्मय एष—

श्रद्धाप्रसूनाञ्जलिः-

परमपावन-महनीयकीर्त्तिपरिमलोल्लासितजगतीतल-

निलयनिखिललोकमानसमरन्दानां—

योगविभूतिततिसमधिगतसमस्ततत्त्वसाक्षात्काराणां—

सुरभारती-विभ्रमभरैक-निकेतनानां,—

प्राच्य-पाश्चात्य-विद्यामहार्णवानां—

'महामहोपाध्याय'—

श्रीश्रीगोपीनाथकविराज-पण्डितराजमहोदयानां—

विद्वन्निवहैरहमहमिकया चिरायाऽर्चितयोश्चरण-

—पादुकयोरादरादाधीयते—

सप्रश्रयं—

—श्रीगुरुप्रसादशास्त्रिणा ।

विपर्यास-प्रसङ्गभङ्गादिदूषणगणैराकुलीकृताया अस्याः शोधनं नाम नवीनटीकानिर्माणादपि गरिष्ठमतिमात्रं मनोव्यथामापादयदपि श्रीचिन्तामणिगुरुचरणकृपयैव निर्व्यूढमिति वस्तुस्थितिरेवैषा । अस्याः कणेहत्य रसमास्वादयन्तो रसिकाः प्रकामं नाम प्रमोदं धास्यन्ति । अस्याश्च काप्यभिनवैव वर्णनशैलीति द्रष्टृणां स्पष्टमेतद्भवेदेवाभिरूपपुङ्गवानाम् ।

अस्मदुपलब्धेषु चतुर्ष्वपि पुस्तकेषु प्रत्यक्षरं दुर्विगाहा अशुद्धयो ग्रन्थरत्नं दूषयन्त्य इत्रोपलभ्यन्ते । ता निरस्य प्रकाशनं नामासिधाराऽवलेहनमेव । अथ तत्कियदिव निर्व्यूढमस्माभिरित्यत्र तु विद्वांसः प्रमाणम् । इयं कारकान्तैवोपलभ्यते ।

(२) अभिनव-चन्द्रिका ।

शारदावताराणां **श्रीबालशास्त्रि**परमगुरुचरणानां शिष्यैर्दण्डिभट्टैर्विरचिता परिष्कारपथावलम्बिनी जगद्विदिताऽभिनवचन्द्रिकाऽद्यापि पठने पाठने चोपयुज्यते, नितरामभिनन्द्यते च परिष्कारप्रियैः पण्डितवृन्दैरन्तेवासिसार्थैश्च । परीक्षादिषु बाढमुपकारिणीयमविकलं प्रकाशभावं भजमाना भूयोऽपि विदुषस्तोषयेदिति,–बहुशः स्खलनं दधत्या पङ्क्तिभ्रंश–विषयप्रमोष–ग्रन्थासङ्गति–प्रसङ्गभङ्गादि–निगूढदूषणगणैः पदे–पदे समाक्रान्ताया अस्याः स्वशेमुषीं, गुरूक्ति-परम्परा-स्वसम्प्रदायादिकञ्च प्रमाणीकृत्य शोधनं नाम नोद्वेजयिष्यति सहृदयानिति च सुदृढोऽस्माकं प्रत्ययोन्मेषः । हन्त ! इयं हलन्तपर्यन्तमेवोपलब्धा । अग्रे तु अस्मत्तातपादैर्न्यायाचार्यश्री**शिवनारायणशास्त्रि**भिर्विरचिता नवीनशैलीसुललिता विजयैव विजयते, अस्मत्सङ्कलिता–**वरवर्णिनी** च ।

अस्याश्च नवपुस्तकानि शोधनायोपयुक्तान्यस्माभिः, तत्र प्रायः समाना एवाऽशुद्धयो दरीदृश्यन्ते । लेखकैरियं मन्ये एवं कदर्थिता–यत्–यद्यस्यामुपात्तो विषयः सम्प्रदायप्रसिद्धो न स्यात्तर्ह्यस्याः संशोद्ध्य प्रकाशनमप्यसम्भाव्यमेव स्यात् । इदानीं पठन-पाठनयोरुपयुज्यमानो विषयोऽस्यां निबद्ध इत्येतावतैवाऽस्या भूयान् समादरो दरीदृश्यते ।

(३) सदाशिवभट्टीयं तिलकं [भट्टी]

१८७३ सम्वति विद्यमानैः सिद्धसारस्वतैः प्रचण्डपाण्डित्यशोभिभिः काशिकासिपरिसरमलङ्कुर्वाणैः **श्रीसदाशिवभट्टै**र्विरचिता प्रक्रियांशव्याख्यानमूर्धन्यतमा टीकेयमतीव

मनोहारिणी विदुषां समवाये नितान्तं प्रथते च । परन्दौर्भाग्यभरेणान्तेवासिनामस्या न शुद्धं संस्करणमिति दूयमानमानसानां मनीषिणां कृतेऽस्माभिरत्यन्तं क्लेशमुरीकृत्यापि किञ्चिदिव शोधितेयं हर्षतरलितस्वान्तांस्तानतान्ताान्विधास्यति पण्डितेन्द्रानिति वयं विदन्तः प्रमोदामहे। इदम्प्रथममरु ।ः किञ्चिदिव शुद्धं संस्करणमिति ब्रुवन्तो हर्षातिरेकम्भजामहे च।

(४) ज्योत्स्ना ।

श्रीसदाशिवभट्टादिभिराद्रियमाणा विवेचनेयं कामपि तां शोभां धत्ते इति विद्वच्चेतांसि प्रमाणम् । इयं १८५० वत्सरे वैक्रमेऽधिकाशि प्रकटितेति सप्रमाणमुपरिष्टान्निवदयिष्यामः। अस्याः शोधने परैस्तर्कयितुमप्यशक्यः श्रमः खेदश्चास्मान्व्याकुलीचकार।

(५) विषमा [विषमपदविवृतिः]

श्रीराघवेन्द्राचार्यैः सदाशिवभट्टाभ्यर्णङ्कालं स्पृशद्भिः स्वनिर्मितां चन्द्रिकां सङ्क्षिप्येयं निर्मिता। प्रक्रियांशं विवृण्वती चेयं म०म० श्रीराजारामशास्त्रिचरणैः, तदन्तेवासिभिः शिवावतारैः श्री**बालशास्त्रि**चरणैश्च तत्र-तत्र शेखरव्याख्यानावसरे स्मर्यमाणा विशिष्टं स्थानं विद्वत्समवाये धत्ते इति विदन्त्येव विद्वांसः ।

(६) विजया

कारकाव्ययीभावप्रकरणेऽस्मत्पितृचरणैः श्रीश्री**शिवनारायणशास्त्रि**भिराविष्कृता नितरां प्रौढाऽपि सरला विजयाऽभिधाना शखरटीकाऽपि निवेशिता । अस्या अतितमां मधुरां वर्णनशैलीं दृष्ट्वा परीक्षार्थिसार्थः सर्वथैव प्रमोदमाधास्यति ।

(७) वरवर्णिनी

श्रीविश्वनाथावतार**श्रीबालशास्त्रिचरणै**रभ्यूहितस्य, तदन्तेवासिभिरस्मत्पितामहश्रीचरणैः श्री**स्नेहिरामशास्त्रि**भिराविष्कृतस्य शब्देन्दुशेखर-**बृहज्जटाजूट**-शब्देन्दुशेखर-**भूति**—शब्देन्दुशेखर—**त्रिपुरसुन्दरी**त्यादिनामभिः प्रसिद्धस्य व्याख्यानिकुरम्बस्य, किञ्च स्त्रीप्रत्ययादावुमानाथीयदीपिकायाः, गुरुवर--पण्डितैकशेष—शेषावतार—श्री १०८ श्री**हरनारायणत्रिपाठि**पादानाञ्चालम्बनेन मया सङ्कलितेयं वरवर्णिनी यदि विदुषस्तोषयेन्ननु सफलश्रमोऽहं कृतकृत्यमात्मानं मन्ये ।

अत्र स्वसम्प्रदायमनुरुद्ध्यैव सर्वे परिष्कारा, न्यासाश्च, विशिष्टाः शङ्काः, समाधयश्च निवेशिताः—इति क्वचित्पुनरुक्तिदोषोऽपि मर्षणीय एव ।

यथामति शोधितेप्यत्र शेखरे नूनं मदज्ञानविलसिता मुद्रणयन्त्रसङ्घर्षजाश्च मात्राभङ्गादिनैकरूपास्त्रुटयो भवेयुस्ता विद्वद्भिः समीकरणीया एव ।

ननु—विद्वन्निवहैरेवैकपदे संहत्य कर्त्तुमर्हं, नितान्तं गुरु कार्यमेतच्छेखरप्रकाशनात्मकं त्रिचतुराक्षरलवलघीयसा चेतसा चिकीर्षन्नहं कथं नाम न वचनीयोऽस्म्यभिरूपाणाम्?।

अथापि—अप्रकाशितग्रन्थप्रकाशनादिकौतुकङ्कथङ्कथमपि संवरीतुमसमर्थेन मया किमप्यदभ्रेण साहसेन यदिदमनुष्ठितं, तत्र—

'पदे त्वर्वाचीने पतति न मनः कस्य ? न वचः ?'

—इति प्रामाणिकोक्तिरेव प्रमाणभूता ।


किञ्च—दुर्लभतमग्रन्थप्रदानैरतिवेलमस्माननुगृह्णतां परममान्यानां महामहोपाध्याय-राजकीयविद्यालयाधिपति—**श्रीगोपीनाथकविराज**पूज्यपादानां न केवलमयमेव जनः—सर्वोपि सुरभारतीप्रणयिसार्थ एवाधमर्णभावं भजते इति न चटुलचाटुवाद एषः ।

एवं मान्यवर—**श्रीगणपतिशास्त्रि**मुकाटे—**श्रीगङ्गाधरशास्त्रि**भारद्वाज,—सुहृद्वरीण—**श्रीनृसिंह**शास्त्रित्रिपाठि—**श्रीगोपालशास्त्रि**नेने—**श्रीनारायणशास्त्रि**खिस्ते—व्याकरणाचार्य—सुहृन्मूर्धन्य—स्वर्गीय**भास्कर**शर्मपर्वतीयप्रभृतयोऽस्मान्नैकविधाभिर्वीथीभिरुत्साहयन्तो मान्या न विस्मरणीयाश्च ।


ईदृशमहत्तमग्रन्थरत्नस्य मुद्रणेन संस्कृतस्नेहिलोकमुपकुर्वन्तः **श्रीजगन्नाथप्रसाद**भार्गव-महोदयाः, तदनु **श्रीकैलासनाथ**भार्गवमहाभागाश्च नितरां धन्यवादार्हाः । इति ।

श्रीराजस्थान-संस्कृत-कालेज,
मीरघाट, काशी ।
वसन्तपञ्चमी १९९२.—२८।१।३६

विधेयतमस्य—
श्रीगुरुप्रसादशास्त्रिणः ।



शब्देन्दुशेखर त्रिपुरसुन्दरीव्याख्याकाराः, अस्मत्पितामहाः—
पण्डितराज-श्रीस्नेहिरामशास्त्रिणः,
जन्मसंवत् १९०५–] चिड़ावा राजपूताना [कैलासवास-संवत् १९८०



शब्देन्दुशेखरविजयाव्याख्याकारा अस्मत्तातपादाः—
श्रीशिवनारायणशास्त्रिणो न्यायाचार्याः ।
जन्म सं० १९३६ वै०—काशीवास सं० १९९१ वै०

पण्डितप्रकाण्ड–महामहोपाध्याय—

श्रीगोपीनाथकविराज–महोदयानां

सम्मतिः—

I congratulate Pandit Guru Prasad Shastri on the excellent edition of Shabdendu Shekhara with Several rare Commentaries which he has brought out in the Rajasthana Sanskrit College Granthamala. These commentaries, some of which are by distinguished scholars of the past, include an original work compiled by the editor himself to meet the requirements of modern students. The paper, typography and get-up of the edition leave nothing to be desired. The manuscripts of some of the commentaries being extremely errupt it reflects great credit on the editor that he has been able, through with great difficulty, to present these rare books to the world of Sanskrit scholarship in a correct and intelligible form. Students of Sanskrit-grammar will remain ever indebted to Pandit Guru Prasad Shastri and to the enthusiastic Publishers for this noble enterprise.

GOVT. SANSKRIT COLLEGE
BENARES.
4-5-1936.

GOPINATH KAVIRAJ M. A.,
MAHAMAHOPADHYAY
PRINCIPAL-
GOVERNMENT SANSKRIT COLLEGE, BENARES.

* श्रीर्जयति *

पूज्यपाद-पाणिनि-पतञ्जलि-लीलावतार-पण्डितप्रकाण्डैकशेष-जगन्मान्य-श्री १०८श्रीहरनारायणत्रिपाठिगुरुवरचरणानामाशीर्वादः—

ब्रह्मभूयङ्गतानां जगद्विदितपण्डितप्रवरश्री**स्नेहिरामशास्त्रिणां** पौत्रेण, श्री**शिवनारायणशास्त्रि**णान्तनुजनुषाऽऽयुष्मता श्री**गुरुप्रसादशास्त्रिणा** सङ्गृहीतया पण्डित-परीक्षार्थिसार्थोपकाराय सविशदं प्रदर्शितैः साम्प्रदायिकैर्निगूढैरपि प्रथितैः परिष्कारै-र्न्यासैश्च समन्वितया विद्वन्मनोहारिण्या **वरवर्णिन्या** समन्वितो **लघुशब्देन्दुशेखर-**ष्टीकाषट्केनोपेतोऽस्माभिर्निरीक्षितो बहुत्र परीक्षितश्च ।

अत्र सङ्कलिताः सर्वा अपि दुर्लभतमाष्टीका विद्वन्निवहस्य परीक्षार्थिलोकस्य च नितरामानन्दञ्जनयन्ति । किञ्च तत्रापि-अभिनवचन्द्रिकायां विशेषतश्च **वरवर्णिन्यां** सङ्कलिताः सम्प्रदायप्रसिद्धाः समन्वयपुरस्सरं मञ्जुलयाऽपि प्रौढया चमत्कारकारिण्या सरण्या प्रदर्शिताः परिष्कारा अतितरां प्रहर्षयन्ति ।

तत्रापि पत्राणां स्निग्धता,मुद्रणसौष्ठवं, बहिरङ्गभूषासमारम्भोऽन्तरङ्गसंस्काराश्चानुरूपा एवास्य सकललोकमहनीयस्य ग्रन्थरत्नस्येति परं प्रमोदस्थानम् । अनेन सर्वोपकारगुरुणा शुभोदर्केण कर्मणा सन्तुष्टाः शुभाशीर्भरेनं श्रीगुरुप्रसादशास्त्रिणं योजयन्तो ग्रन्थस्यास्य निर्बाधं प्रचारं कामयामहे—इति ।

गवर्न्मेंट-संस्कृत-कालेज, काशी । } **श्रीदेवनारायणत्रिपाठिनः ।**

व्याकरणाचार्य—पण्डितप्रवर—**रामदत्तमिश्र**शास्त्रिगौडानां सम्मतिः—

(श्रीगुरुर्जयति)

बहवः पण्डिता भूमौ सन्ति विद्योपजीविनः ।
ग्रन्थग्रन्थिभिदादक्षस्त्वेको राजानति क्वचित् ॥

य एष सकलशाब्दिकविद्वज्जनानन्ददायी लघुशब्देन्दुशेखरष्टीकाषट्कविभूषितो मुद्रितो मूलादासमाप्ति मया सम्यङ्निरीक्षितः । लुप्तप्रायाणामासां जीर्णानां टीकानामुद्धारे परं प्रयतमानैर्गौडवंशमणिभिरभिरतिदवीयसीरपि न्याय-व्याकरणाद्याचार्यपदवीरुद्वहद्भिर्जग-द्विदितैः श्री**गुरुप्रसादशास्त्रि**महोदयैः शाब्दिकजगति परमुपकृतम् ।

निजनिर्मितायां पुन**र्वरवर्णिन्यान्तु** परमदुर्लभा अत्यन्तगोप्यत्वेन स्निग्धशिष्येषु निगूढ-रहस्यमिव गुरुभिरुपदिष्टा अपि विषयाः सन्निवेशिताः । नवनवाश्चापि परिष्काराः स्थले-स्थले सहृदयहृदयारुन्तुदशङ्कापिशाचीरपि समूलघातं घ्नन्तो व्यक्तमुद्भाविताः ।

गुरुर्गुरुप्रसादोत्था कृतिरेषा महोज्ज्वला ।
पाणिनीयमहासिन्धुतलस्पर्शं करोति हि ॥ १ ॥

इतिसम्मन्वते— **रामदत्तमिश्रगौडाः, विद्यारत्नं, व्याकरणाचार्य्याः,**
[काशीस्थ—गणेशपाठशालाप्रधानाध्यापकाः]

(श्रीविश्वेश्वरो विजयते)

विड़लामहाविद्यालयाध्यक्षाणां—

व्याकरणाचार्य

पण्डितप्रकाण्ड-श्रीसभापतिशर्मशास्त्रिणां सम्मतिः—

अद्य महान्प्रमोदावसरो यदपारशब्दजालाऽकूपारपारमवजिगमिषुभिर्मनोज्ञशेमुषीधनैर्मञ्जिमदृढबन्धगम्भीरविचारपरिपूर्णं 'शब्देन्दुशेखर'बृहत्पोतमवरूढैर्विपश्चित्कदम्बैः स्वस्वान्तविनोदाय, धिषणावैभवसम्पादनाय च शब्दशास्त्रतत्त्वरत्नाकरविहरणशीलानां प्राक्तनानां भूरिसूरिप्रकाण्डानां या व्याख्यानरत्नस्रजो १ ज्योत्स्ना—२ विषमी—३ चिदस्थिमाला—४ (अ)भिनवचन्द्रिका—५ सदाशिवभट्टी-प्रभृतयोऽवश्यमेव दृक्पथयितुमभिलष्यमाणा अपि नातः पूर्वं सख्य इव सहचरीभूय विद्वत्कदम्बनयनकुमुदानि चन्द्रिका इव प्रोल्लासयितुं प्रबभूवुः ।

ता महोत्साहशालिभिर्न्याय-व्याकरणाद्याचार्यपदालङ्कृतैः श्रीमद्भिर्गुरुप्रसादशास्त्रिमहोदयैर्गुरुतरप्रयत्नेनैकत्र सङ्गृह्य-कियद्वारं मुद्रणेऽपि दुश्शकशोधना अशुद्धयः प्रायो निराकृताः । स्वयं 'वरवर्णिनी' नामकं व्याख्यानान्तरं निर्माय च पण्डिततल्लजानामन्तेवास्युद्धानाञ्च मनःप्रमोदाय पुर उपस्थाप्याऽतीवोपकृता मनीषिणः ।

पुस्तकान्तरापेक्षयाऽत्रेदमपि वैशिष्ट्यं—यदत्र महामहोपाध्याय-सर्वतन्त्रस्वतन्त्रजगद्विश्रुतोतथ्यानुजप्रतियोगिकसादृश्यानुयोगिगुरुवर-श्रीशिवकुमारशर्ममिश्र-श्रीश्रीदामोदरशास्त्रि-श्रीतात्याशास्त्रि—श्रीदेवनारायणत्रिपाठिप्रभृतयो ये महाविद्वांसस्तेषामपि बहवः साधारणजनदुर्लभा व्याख्यानप्रणाल्यः परिष्काराश्च विशदीकृत्य प्रदर्शिता विद्योतन्ते ।

'वर्णात्कार'इत्यत्र,'अचः परस्मिन्'इत्यस्य-'अच एव आदेशः'इत्यर्थविचारे, 'यरोऽनुनासिके' इत्यस्य विषम्यां, 'कृत्तद्धितसमासाश्च' इति सूत्रे-'शब्दानुगमस्य' इत्यस्य व्यवच्छेद्यानानुगमेऽपि' इत्यस्य च प्रतीके, 'नामि'इत्यस्य **वरवर्णिन्याम्**,'प्ररि'शब्दे सन्निपातविषयकविवरणे, 'शूद्रा चामहत्पूर्वा जातिः' इत्यस्य **वरवर्णिन्याम्**, 'प्रातिपदिकार्थ'सूत्रव्याख्याने च दृष्टिप्रक्षेपपूर्वकमन्यत्रानुपलभ्यमानविषयविवेचनपरव्याख्यानोपलब्ध्या सम्भाव्यते उपकारसम्भारबाहुल्यमेव सङ्ख्यावतां सङ्ख्यामनुसरेदिति ।

अस्य मुद्रणप्रकारसौष्ठवादिना दर्शकानां सपदि हृदयङ्गमतासम्पादकत्वसम्पादका भार्गवमहोदया अपि धन्यवादार्हाः ।

ता० १-२-३६

इति निवेदयन्ते—

सभापतिशर्म्मोपाध्यायाः,

[प्रिन्सिपल-बिरला-संस्कृत-कालेज-काशी] ।

गवर्न्मेन्ट-संस्कृत-कालेज-सरस्वती-भवनोपाध्यक्ष-विद्वद्वर-साहित्याचार्य-श्रीनारायणशास्त्रिखिस्ते-महोदयानां सम्मतिः—

श्रीमद्भिर्व्याकरणन्यायदर्शनाद्याचार्यैरनेकग्रन्थनिर्माणविख्यातकीर्तिभिरस्मन्मित्रवरैः श्रीगुरुप्रसादशास्त्रिमहोदयैर्दुर्लभटीकाषट्केन, स्वकृतविशदटिप्पन्या **वरवर्णिन्या** च सह प्रकाशितं शब्देन्दुशेखरं वीक्ष्य नितान्तं हृष्टचेता अहं तथाविधाऽन्तर्बहिःसुन्दरशेखराभिनवसंस्करणसम्पादकान् शास्त्रिमहोदयान् परःशतैर्धन्यवादैरभिनन्दामि, आशासे च,—यदिदमेकमेव संस्करणमादाय विद्यार्थिनोऽध्यापकाश्च शेखरटीकान्तरसंस्करणसङ्ग्रहणे निरपेक्षा एव भवेयुः।

परिष्कार-प्रक्रिया-न्यासाख्यत्रिविधसम्प्रदायसङ्कलनात्रिवेणीतीर्थमाहात्म्यमधिगतमिदं संस्करणमत्र मिमङ्क्षूणां विदुषां विद्यार्थिनाञ्च कृते शब्दशास्त्ररहस्यावबोध-लोकातिग-प्रतिष्ठालाभात्मकं पीयूषं सुलभं करिष्यतीति सुदृढो मे विश्वासः। शब्दशास्त्ररसिकैरिदं संस्करणमवश्यमुपादेयमिति शिवम्।

सरस्वती-भवनम् गवर्न्मन्ट-संस्कृत-कालेज काशी ८।२।२६	नारायणशास्त्री खिस्ते।

॥ श्रीः ॥

श्रीराजस्थान-संस्कृत-कालेज-काशी-व्याकरणप्रधानाध्यापकानां-व्याकरणाचार्य-श्रीश्रीदत्तशास्त्रिगौडानां सम्मतिः—

स्वतःप्रमाणसमाम्नाय-प्रधानाङ्गव्याकरणशास्त्र-मूर्धाभिषिक्तं, वरवर्णिन्यादिटीकासङ्कलयितृ-श्रीगुरुप्रसादशास्त्रिमहोदयानामधिकाशि प्रख्यातप्रकाण्डपण्डितरत्नेष्वाध्यात्मिकपराचिन्त्य-वैदुष्यं प्रकटयन्तं, व्याख्यातृश्रोतॄणां सयुक्ति सहस्रशो विषमस्थलसंलापनवेपथुं निरस्य कल्पलतयेव शतशः परिष्कारं द्योतयन्त्या **वरवर्णिन्या** दाम्पत्यमनुमोदमानं, लसन्तम्, अलौकिकसार्वभौमानन्दथुं सरोमहर्षं जनयन्तं, स्वसङ्ग्राह्यतां विशदयन्तं, टीकाषट्कोपेतं लघुशब्देन्दुशेखरममुम्—

वर्तुलाक्षरसंयुक्तं दृढपत्रैः परिष्कृतम्।
ग्रन्थरत्नं समालोच्य गुरुप्रसादभूषितम् ॥ १ ॥
गौडव्याकरणाचार्यभूषणेन मया मुदा।
श्रीदत्तशर्ममिश्रेण सम्मतिश्चात्र दीयते ॥ २ ॥

* श्रीः *

विदितमेव विदुषां यद्वेदाङ्गप्रधानव्याकरणप्रधानं दुरूहं पाणिनीयतन्त्रम् । तद्व्याख्यानभूता महाभाष्यकैयटादयश्चातीव सूक्ष्मबुद्धिवेद्यास्तद्रहस्यप्रकाशकश्च शब्देन्दुशेखरादिग्रन्थः काश्यां विद्वद्वर्यैः परिष्कृत्य परिष्कृत्य सूक्ष्मतमतां नीतः । तेषां विद्वद्वराणां सरणिमवलम्ब्य केचिदेव विद्वांसोऽध्यापयन्ति सम्प्रदायप्राप्तं परिष्कृतं शास्त्रं,यदि गुरुवराणां वाक्यं सङ्कलय्य-सङ्गृहीतं न भवेद्विलुप्तमिदं न चिराद्भविष्यतीति मनसि निधाय तत्प्रकाशने प्रवृत्ताः काशीस्थ-श्रीराजस्थान-संस्कृत-कालेजप्रधानाध्यक्षमहोदयाः श्रीमन्तो न्याय-व्याकरणाचार्याः परिशीलितशास्त्रजाताः श्रीगुरुप्रसादलब्धशुद्धशेमुषीकाः **श्रीगुरुप्रसादशास्त्रिणो** मुक्तकण्ठं नैकशो धन्यवादार्हाः ।

रक्षितारश्च ते शास्त्रजातस्य प्रकाशना-ऽध्यापन-पाठशालानिर्मिति-विद्वद्वररक्षण-च्छात्रवृत्ति-दानादिभिरिति मात्सर्य्यमुत्सार्य्य विद्वद्भिर्नितरामिमे समादरणीयाः ।

सम्भावये यदहमिव चान्येऽपि—एनान्महानुभावानादरिष्यन्ते ।

इति—मन्यते—

नारायणदत्तत्रिपाठी [व्याकरणाचार्यः]

प्रधानाध्यापकः—मारवाड़ी—संस्कृत-कालेज, मीरघाट, काशी ।

पण्डितप्रवर-व्याकरणाचार्य-श्रीगोपालशास्त्रिनेने-महोदयानां सम्मतिः ।

(श्रीगुरुः शरणम्)

महान् प्रमोदोऽयमद्य यन्मयेयं लेखनी तत्र सम्मतिदानाय प्रचार्यते यदर्थमेतावन्तं कालं सर्वे वैयाकरणविद्वांसः साभिलाषाः सोत्कण्ठाश्च आसन् ! मन्ये लघुशब्देन्दुशेखरस्य कृते न तादृगन्यद्व्याख्यानं यथावदुपकारकं यथा 'चिदस्थिमाला'भिधं, यतो हि तद्ग्रन्थकर्तुर्महामहोपाध्यायस्य श्रीनागोजीभट्टस्य साक्षादन्तेवासिना पायगुण्डे वैद्यनाथमहाशयेन रचितं वर्तते ।—सेयं महती न्यूनता संस्करणेनैतेन पूरितेति ।

किञ्च शब्देन्दुशेखरसदृशस्य व्याकरणमहाग्रन्थस्य कृते यावन्ति व्याख्यानानि प्रकाशितानि भवेयुस्तानि सर्वाण्यपि तत्तद्व्याख्यातृविभिन्नविभिन्नकल्पनाप्रकाशकराणीति वैयाकरणैरभिलष्यन्ते, तत्राप्यांशिकी पूर्तिरन्यासां टीकानामभिनवचन्द्रिकादीनां समावेशनेन सम्पादितेति—सम्पादकप्रकाशकयोरत्र रुचिरोऽयं सुप्रयत्नो वर्तते ।

तदेवं टीकापञ्चकोपेतमिदं राजसंस्करणं बहिरन्तश्च सर्वाङ्गसुन्दरं वैयाकरणानामवश्यमुपादेयतां भजते-इति मदीयो विश्वासः ।

गवर्न्मेंट संस्कृत-कालेज, बनारस ।
८-२-३६ } **गोपालशास्त्रीनेने ।**

॥ श्रीः ॥

दुर्लभानेकटीकाभिः सह यत्नात्परिष्कृतम् ।
शब्देन्दुशेखरं दृष्ट्वा वयं मोदामहेतमाम् ॥ १ ॥
एतत्सम्पादकं नैकपदवीपरिभूषितम् ।
गुरुप्रसादाधिगतसुयशोमानगौरवम् ॥ २ ॥
गुरुप्रसादं विद्वांसं मार्कण्डेयोपमायुषम् ।
शुभाशीराशिभिर्भव्यैरभिनन्दाम आदरात् ॥ ३ ॥

गवर्न्मेंन्ट-संस्कृत-कालेज काशी } इति--
६।२।३६ } न्यायाचार्यश्रीशिवदत्तशास्त्रिगौडानाम् ।

श्रीविश्वेश्वरः शरणम् ।

राजकीय-संस्कृत-कालेज-न्यायव्याकरणाध्यापक-न्याय-व्याकरणाचार्य-मीमांसक-शिरोमणि–पण्डितवर–श्रीसूर्यनारायणशुक्लानां सम्मतिः—

वाराणसेयश्रीराजस्थानसंस्कृतमहाविद्यालयाध्यक्षैर्व्याकरणन्यायाचार्यादिपदवीविभूषितैः श्रीमद्भिर्गुरुप्रसादशास्त्रिमहोदयैष्टीकाषट्केनालङ्कृत्य लघुशब्देन्दुशेखरः संपाद्य सम्मत्यर्थं मह्यं समर्पितः ।

तदनु निरीक्षितेऽस्मिन्ग्रन्थरत्ने—संपादनशैली, अक्षराणां सौष्ठवं, पत्राणां ससृणता चेत्येवं सर्वगुणसाहित्यमतितरां चेतश्चमत्करोति ।

काश्यादिनगरेषु यादृशी पाठनप्रणाली तया अनुमोदिता एवेमा वरवर्णिन्यादयष्टीका इत्ययमपि सुवर्णसौरभयोग एव ।

अनेन च व्यापारेण संस्कृतसाहित्यस्य महानुपकारः समजनीति वस्तुस्थितिकथनमात्रमिति मन्यते ।—

गवर्न्मेंन्ट-संस्कृत-कालेज काशी । } श्रीसूर्यनारायणशर्मशुक्लः
६।२।२६ }

॥ श्रीः ॥

नागेशभट्टरचितो लघुशब्देन्दुशेखरः ।
वैयाकरणसिद्धान्तरत्नरत्नाकरो महान् ॥ १ ॥
गुरुप्रसादगौडेन शास्त्रिवर्येण धीमता
टीकाषट्कोपयोगेन सेतुस्तत्र विनिर्मितः ॥ २ ॥
शब्दशास्त्रपरीक्ष्याणां छात्राणां विदुषामपि ।
शास्त्रेष्वभ्याससरणिः सञ्जाता सुगमाऽधुना ॥ ३ ॥
दृष्ट्वा मुद्रणसौन्दय सुन्दराक्षरयोजनम्
चेतः सम्मोदमाधत्ते ग्रन्थस्याऽस्य प्रकाशनात् ॥ ४ ॥

गवर्न्मेन्ट-संस्कृत-कालेज, काशी । } गङ्गाधरशास्त्री-भारद्वाजः
१०।८।३५ } व्याकरण-साहित्याचार्यः ।

॥ श्रीः ॥

शब्देन्दुशेखरानुक्रमणिका—

❀ इति विषयानुक्रमणिका ❀

॥ श्रीः ॥

(१) कारकप्रकरणानुक्रमणिका ।

(२) अव्ययीभावसमासप्रकरणम् ।

❀ इत्यव्ययीभावसमासप्रकरणम् ❀

❀ श्रीः ❀

वाङ्मयं प्राभृतकम्

कल्याणगुणगणाऽऽस्थाननिभृततमैकनिकेतनाय—

विद्याऽनिर्बन्धप्रबन्धरक्षणगृहीतदीक्षाय—,

विद्वज्जनोज्जीवनजीवातवे,—

सुरभारतीप्रणयप्रवणाय—

वाराणसीपरिसरलसदन्तेवसदावलिलीलाकुमुदवीरुदुल्लासजैवातृकाय—

जैवातृकाय—

श्रेष्ठिवर-'श्रीगौरीशङ्करगोयनका' महाभागाय-

विद्योन्नतायाऽपि विनयावनताय—

सप्रणयमुपनयत्येतत्—

श्रीराजस्थान-संस्कृत कालेज,
मीरघाट, काशी।
अक्षयतृतीया १९९३

श्रीगुरुप्रसादशास्त्री।

॥ श्रीगणेशाय नमः ॥ श्रीसरस्वत्यै नमः ॥

टीकापञ्चकोपेतः, टिप्पणीविराजितः—

लघुशब्देन्दुशेखरः ।

❁ श्री 'विश्वनाथ' दण्डिभट्टकृताऽभिनवचन्द्रिका ❁

'सत्यव्रता'च 'विजयनगरा'धिपसत्तमात् । 'पूसाटि'वंशसम्भूतादानन्दाल्लब्धवृत्तिना ॥ १ ॥
श्री'दण्डिभट्ट'कुलज 'वीरराघव'सूनुना । बालशास्त्रि'पदाम्भोजध्यानसंलब्धबुद्धिना ॥ २ ॥
'सुब्बम्म'देव्याः पुत्रेण श्वश्रूपूजारतेः सदा । सान्नपूर्णाधर्मपत्नि'विश्वनाथे'न वै मुदा ॥ ३ ॥
वाराणसीपुरीवासिश्रीविश्वेश्वरतुष्टये । आबाहुपुरुषाकारं शङ्खचक्रासिधारिणम् ॥ ४ ॥
सहस्रशिरसं नत्वा पतञ्जलिमहामुनिम् । क्रियते कौमुदीव्याख्या—लघुशब्दन्दु—चन्द्रिका ॥ ५ ॥

❁ श्री 'बालम्भट्ट' कृता चिदस्थिमाला ❁

निराधाराऽऽधारं निखिलजगतां, पारमुदधेर्भवस्य, प्राकारं विमलसुखलक्ष्म्याः सुरुचिरम् ।
चिरन्धारन्धारं मनसि गुरुगीर्वाणकृपया परन्देवं वन्दे हरिहरमहं श्रीकरवरम् ॥ १ ॥
नत्वा गुरुं वैद्यनाथः पायगुण्डाख्यको वृतिम् ।
चिदस्थिमालान्तनुते लघुशब्देन्दुशेखरे ॥ ३ ॥

❁ उदयङ्करपाठककृता ज्योत्स्ना ❁

वाग्देवीं मानसे कृत्वा गङ्गामाध्यानमङ्गलाम् ॥ शब्देन्दुशेखरज्यौत्स्नीमातनोत्युदयङ्करः ॥ १ ॥

❁ सदाशिवभट्टीयम् ❁

प्राणनाथपदाम्भोजनखचन्द्रमरीचयः ॥
व्याकोचयन्तु सततं मम मानसकैरवम् ॥ १ ॥

❁ श्री 'राघवेन्द्राचार्य' कृता विषमपदविवृतिः ❁

ब्रह्मेशाद्यैः सुरवरगणैः स्तूयमानोऽप्यपारो व्यक्ताव्यक्ते सृजति भरति प्रापयत्युच्चभावम् ।
यद्भ्रूभङ्गात्सृजति भुवनं ब्रह्मरुद्रादि सा श्रीर्वक्षःश्लिष्टा जयति स विभुः श्रीनिवासो वृषाद्रौ ॥ १ ॥

❁ श्रीगुरुप्रसादशास्त्रिकृता 'वरवर्णिनी' टिप्पणी ❁

सेवा-हेवाक-वन्नाकि-निकुरम्ब-करम्बितम् ॥
ढुण्ढिराजपदाम्भोद-चिन्तामणिमुपास्महे ॥ १ ॥

वन्देऽनवद्य—सद्धृद्य-विद्योद्योतित-दिङ्मुखान् ॥
मरुमण्डल-मार्त्तण्ड-स्नेहिरामाभिधान् गुरून् ॥ २ ॥

पातञ्जले महाभाष्ये कृतभूरिपरिश्रमः ॥

❀ अभिनव-चन्द्रिका ❀

चिकीर्षितग्रन्थनिर्विघ्नपरिसमाप्तये कृतं मङ्गलं शिष्यशिक्षायै ग्रन्थतो निबध्नाति—**पातञ्जल**—इत्यादिना । पतञ्जलिना निर्मितं—पातञ्जलं, तस्मिन् ; 'शेषे' इति लक्षणसूत्रेणाणप्रत्ययः ।

ननु सर्वभाष्येष्वस्यैव भाष्यस्य महत्त्वान्महाभाष्यपदेनैव पातञ्जलभाष्यलाभे—'पातञ्जले' इति विशेषणोपादानं व्यर्थमिति चेन्न, महात्मनां नामोच्चारणमपि मङ्गलाय भवतीति तदुपादानात् । केचित्तु—"चेनविनाऽपि समुच्चय इति—पातञ्जले=योगशास्त्रे, महाभाष्ये=व्याकरणभाष्ये च—कृतभूरिपरिश्रम इत्यर्थः—"इत्याहुः । कृतो भूरिपरिश्रमो येन सः,—कृतमहापरिश्रम इति यावत् ।

यत्तु "—भूरिपरिश्रमः सन् महाभाष्यरूपे-जले-पातमकृतेत्यर्थ—" इति, तन्न, एवं ह्यश्लील-प्रतीत्या काव्यस्य दुष्टत्वापत्तेः ।

❀ चिदस्थिमाला ❀

ग्रन्थसमाप्त्यादिप्रतिबन्धकदुरितशमनाय समुचितस्वेष्टदेवतानत्यात्मकं मङ्गलमाचरन् शिष्यशिक्षायै व्याख्यातृश्रोतॄणामनुषङ्गतो मङ्गलाय च निबध्नाति—**पातञ्जल इति** । तत्त्वस्य चरकादिसाधारण्यादाह—**महेति** । वैयधिकरण्यान्वयाभावाय महत्त्वं विशेषणमिति कश्चित् । स्वरूपकीर्त्तनपरं तदित्यन्ये । विशिष्टमेव तन्नामेति तदित्यपरे । वस्तुतः—पातञ्जले=योगसूत्रादौ, (महाभाष्ये=) महाभाष्ये चेत्यर्थः, 'गामश्व'मितिवद्विनाऽपि चं समुच्चयश्च । एतेन 'महाभाष्ये' इत्येव सिद्धे 'पातञ्जले' इति व्यर्थमित्यपास्तं, तत्स्मरणरूपमङ्गलार्थत्वाच्च । आद्योक्त्या स्वस्मिन् तत्त्वज्ञत्वसूचनद्वाराऽत्रत्यस्वोक्तीनां तात्त्विकत्वं सूचितमिति बोध्यम् ।

तत्र कृतपरिश्रमत्वस्यातिप्रसक्तत्वादाह—**भूरीति** । तथा च तत्सिद्धान्तार्थ-ज्ञातृत्वसूचनद्वारा स्वस्मिन् , स्वीये—

❀ ज्योत्स्ना ❀

पातञ्जल इति । अत्र'महाभाष्य'इत्येतावदुक्तौ—शारीरकसूत्रभाष्यादावतिव्याप्तिरतः—'पातञ्जल' इति । 'पातञ्जले भाष्ये'इत्युक्तावपि पातञ्जलसूत्राणां भाष्ये—वेदव्यासकृतेऽतिव्याप्तिरतो 'महत्' पदम् । '**कृतभूरिपरिश्रम**'**इति** । 'भूरि'पदोपादानं तन्त्रान्तरपरिश्रमासद्भावाभावसूचनार्थम् ।

❀ सदाशिवभट्टीयम् ❀

शेषं तदीशं च विनत्य लक्ष्मीमीशस्य प्रीत्या ह्यचलोपि योऽभवत् ॥
लिखामि ग्रन्थं निजबुद्धिपुष्ट्यै शिष्टार्थकं विवृतिसङ्ग्रहन्त्विमम् ॥ २ ॥

❀ विषमपदविवृतिः ❀

आत्रेयवंशविधुना सकलकलापारदृश्वना सुधिया। श्रीराघवेन्द्रगुरुणा क्रियते शब्देन्दुशेखरव्याख्या ॥
नवयुक्तिगुम्फिततया प्रौढां तां चन्द्रिकां तु सङ्क्षिप्य । विषमपदवाक्यविवृतिं कुर्वेऽहं बालबोधाय ॥

'पातञ्जल' इत्यादि श्लोकत्रयमेकान्वयम् । सतीं दीव्यतीति विग्रहः । कक्षः=शुष्ककाननम् ।

❀ वरवर्णिनी ❀

'**त्रिपाठि**'चरणाम्भोजसौरभोल्लासिमानसः ॥
नत्वा साम्बशिवं हृद्यां टिप्पणीं कुरुते नवाम् ॥ ३ ॥

'पातञ्जलं महाभाष्य'मिति समुदितमेव नाम, खण्डशः प्रयोगस्तु प्रामाणिकानां भीमः' '**सत्ये**'तिवन्नामैकदेशन्यायादिति पदद्वयोपादानोपपादनाय क्लिश्यन्तो **नागेशोक्तिप्रकाशकृतो दण्डिभट्टादयश्च** समाहिताः । 'पातञ्जले=योगशास्त्रे, महाभाष्ये चे'ति व्याख्यानमपि सहृदयोद्वेजकमेव, समुचितमहाभाष्यकीर्त्तनमुपेक्ष्यादौ स्वीययोगशास्त्रप्रावीण्यख्यापनस्यात्यन्तमनुचितत्वात् , तदेवं 'मार्त्तण्ड इत्यादौ शब्दज्ञानानुपाती'त्यादिना स्वोक्तिं समर्थयमाना **मैथिलाः** पराकृताः ।

शिवभट्टसुतो धीमान् सतीदेव्यास्तु गर्भजः ॥ १ ॥
याचकानां कल्पतरोररिकक्षहुताशनात् ॥

❀ अभिनव-चन्द्रिका ❀

ननु 'भाष्ये कृतभूरिपरिश्रम' इत्युक्त्या स्वस्य बुद्धिः, प्रतिभा च नास्तीति प्रतीयतेऽत आह—**धीमानिति** । ननु बुद्धिमत्त्वेऽपि, भाष्ये कृतभूरिपरिश्रमत्वेऽपि च—मातापित्रोर्दुष्टत्वे तद्दोषस्य पुत्रेऽपि सङ्क्रमेण बुद्धिमोहः स्यादित्यत आह—**शिवभट्ट इत्यादि** । **सतीदेव्या इति** । तथा च पिता साक्षाच्छिवसदृशो, माता च सतीसदृशीति गम्यते,—इति सत्कुलप्रसूतत्वं गम्यते । न च ''सती-देव्या'—इत्यत्र कर्मधारये पुंवद्भावापत्तिरिति वाच्यं, 'सतीं' दीव्यति—पातिव्रत्येन जेतुमिच्छती'तियोगरूढिस्वीकारेणाऽदोषात् ॥ १ ॥

❀ चिदस्थिमाला ❀

तदनुरोधित्वं, समूलत्वञ्चात्र प्रतिपादितमिति बोध्यम् । पित्रादिकीर्त्तये आह—**शिवेति** । ननु तत्र तत्त्वेपि सूक्ष्ममतेरभावात्कथं तत्सूक्ष्मार्थाकलनमत आह—**धीमानिति** । ऊहापोहकुशल इत्यर्थः । **सती देव्या** इत्यत्र सञ्ज्ञात्वेनाभाषितपुंस्कत्वान्न पुंवत्त्वं, न च 'सञ्ज्ञापूरण्योश्चे'ति निषेधसामर्थ्यात्तत्त्वेपि तत्त्वमस्तीति वाच्यं, तत्र—तत्सामर्थ्यात्तेन योगरूढस्य ग्रहणमिति तत्र योगार्थतावच्छेदकमादाय भाषितपुंस्कत्वेऽपि, रूढ्यर्थतावच्छेद-कारोपेण सञ्ज्ञात्वेन,—अत्र तत्त्वस्य दुर्वचत्वात्, अत एव 'दत्ताभार्य' इत्यादि तत्रोदाहृतमाकरे । एवञ्च क्रिया-प्रवृत्तिनिमित्तकदेवदत्तादिसञ्ज्ञानामेव तत्र ग्रहणमिति बोध्यम् । 'तेन निषेधेनाऽभाषितपुंस्कत्वमेव बोध्यते, सिद्धानुवादे लाघवा'दिति **केचित्**। 'दान्तं नाम स्त्रीणा'मित्युक्तेर्**देवी**त्युक्तं,यद्यपि 'दाया'इत्युक्तेपि तत्त्वसिद्धिस्त-थापि अस्य फलमनुपदमेव स्फुटीभविष्यति । **तुः** पादपूरणे, सर्वविशेषणसमुच्चायकत्वेन चार्थे वा, तदनु-क्तिस्तु—अनयोरेव मिथःसमुच्चयो न सर्वेषामिति भ्रमनिरासाय । वस्तुतस्तु—मनुष्यसुतत्वेपि देवीगर्भजत्वमिति वैलक्षण्यसूचनद्वारा, तस्या अत्यन्ततद्धर्मवत्त्वसूचनद्वारा स्वस्मिन् वास्तवभूदेवत्वसूचकस्तुरिति बोध्यम् ॥१॥

ननु सदा प्रतिग्रह—परान्नभोजनादिना मतिनाशात्कथं धीमत्त्वमत आह—**याचकानामिति** । यद्वा—'अन्नदाता भयत्राता पञ्चैते पितरः स्मृता' इत्युक्तेस्तमपि कीर्त्तयति—**याचेति** । अभेदरूपकद्वयमिदं, तत्राद्येन—याचकवाञ्छितदातृत्वसूचनद्वारा सर्वोत्कर्षः सूचितः । अरय एव कक्षाः=तृणानि, तेषामग्निः। अनेन

❀ ज्योत्स्ना ❀

सतीं दीव्यति=पातिव्रत्येन जिगीषतीति सतीदेवी, कर्मण्यण्। यथाश्रुते तु पुंवद्भावप्रसङ्गः, न च सञ्ज्ञात्वान्निषेधः, कर्मधारये तत्प्रतिप्रसवात् । **अरिकक्षहुताशनादिति** । अरिषु कक्षत्वारोपणमूलको राज्ञि हुताशनत्वारोप इति **परम्परितरूपकमलङ्कारः**,—'नियतारोपणोपायः स्यादारोपः परस्य यः', इति तल्लक्षणत्वात् । 'कक्षस्तु दोर्मूले शुष्ककानने'इति त्रिकाण्डशेषः ।

❀ वरवर्णिनी ❀

धीमानिति । आशुग्रहण-सरणानुसन्धान-विवेचनोहापोहादिगुणगणप्रगुणितधिषण इति तु तदर्थः । **बालम्भट्टा**नान्तथोक्तिस्तु-उपलक्षणतयोपपादनीया, अन्यथो'हापोहमात्रसारः प्रक्रियांशशून्यो दुस्त-र्ककर्कश' इति उपेक्षणीयोपहसनीयतामापन्नः स्यात्, तदेवं गतानुगतिकः **प्रकाश**कृदुपेक्षणीय एवेति **गौडाः**।

'सतीदेवी'ति रूढन्तस्या नामेति—तत्र मुधा पुंवद्भाव—ह्रस्वादिप्राप्तिशङ्कासमाधिडम्बरेणच्छात्रा-न्विडम्बयन्तो महान्तो महान्त एव । 'अरय एव कक्षाः-गहनानि भीरुभीकराणि अरण्यानि, तेषु हुताशनः= समिद्धतमो दारुणोऽनल'- इति तदर्थः। 'कक्षोऽरण्ये च दुर्गमे' इति **केशव**नानार्थकोशात् । एतेन 'कक्षः=

श्रृङ्गवेरपुराधीशाद्रामतो लब्धजीविकः ॥ २ ॥
नत्वा फणीशं नागेशस्तनुतेऽर्थप्रकाशकम् ॥
मनोरमोमार्द्धदेहं लघु-शब्देन्दु-शेखरम् ॥ ३ ॥

❀ अभिनव-चन्द्रिका ❀

ननु भाष्ये कृतभूरिपरिश्रमत्वेऽपि, बुद्धिमत्त्वेऽपि, सत्कुलप्रसूतत्वेऽपि वृत्तेरभावेन ग्रन्थकरणं सम्यङ् न स्यादित आह—**रामतो लब्धजीविक इति**। नन्वस्याल्पधनत्वे स्थिरा वृत्तिर्न स्यादत आह—**श्रृङ्गवेरपुराधीशादिति**। नन्वस्य शत्रुभिः पराजये पुनरपि वृत्तिभङ्गः स्यादित्यत आह—**अरिकक्षहुताशनादिति**। कक्षः—शुष्कतृणपुञ्जः, अरय एव कक्षः, तस्य-हुताशनात्=अग्निसदृशादित्यर्थः। नन्वसौ कृपणश्चेद्वृत्तिप्रतिबन्धं कुर्यादत आह—**याचकानां कल्पतरोरिति**॥२॥

नागेश इति। न चा'त्मनामे'ति निषेधात्स्वनामोपादानमनुचितमिति वाच्यम्, 'आत्मनामे'ति स्मृतौ—'न गृह्णीया'दित्यत्र—नोच्चरयेदित्यर्थेन लेखने दोषाऽभावात्, अत एव सर्वो व्यवहारकाण्डः सङ्गच्छते।

यत्तु "—'कूपखनन'न्यायेन स्वनामोच्चारणजं दुरितं नश्यति—" इति,तन्न, नान्तरीयकपापनाशस्यैव तन्न्यायविषयत्वात्, आत्मनामोच्चारणस्य ग्रन्थकरणनान्तरीयकत्वाभावात्।

यदपि "—नत्वा फणीश'मिति मङ्गलाचरणेन स्वनामोच्चारणजं पापं नश्यति—" इति, तदपि न, पुण्य-पापयोः शब्दैकसमधिगम्यत्वेन 'समाप्तिकामो मङ्गलमाचरे'दिति शिष्टाचारानुमितश्रुत्या अन्यफलकत्वकल्पनायाः कर्त्तुमशक्यत्वात्, सम्भवति दृष्टफलकत्वेऽदृष्टकल्पनाया अन्याय्यत्वात्। यदपि "—'नागेश' इति न नाम, किन्तु—'नागः=पतञ्जलिः, ईशः=प्रवर्त्तकोऽन्तर्यामितये'ति यौगिक इति; तदपि न, अन्यनाम्नोऽप्रसिद्ध्या एतादृशार्थकल्पने मानाभावात्।

मनोरमोमार्द्धदेहमिति। ग्रन्थपक्षे—मनोरमैव-उमा-सैवार्धदेहो यस्ये'ति बहुव्रीहिः,

❀ चिदस्थिमाला ❀

विजातीयशूरत्वं, रणे यं प्राप्य अरयो नश्यन्त्येवेति यावदिति सूचितम्। **रामतः**=रामसिंहाख्यात्, नामैकदेशे नामग्रहणं, तत्फलं—तत्र तत्त्वसूचनद्वारा पुण्यशीलत्वसूचनद्वारा तत्रोपादेयत्वसूचनम्। क्रियाकारकयोर्नित्यसाकाङ्क्षत्वेनैकदेशान्वयः। **लब्धजीविक**—इत्यनेन-तत्पर्याप्तस्यैव आवश्यकस्यैव धनस्य तदन्यथाऽनुपपत्त्या स्वीकारो, न लोभादिनाऽधिकस्येति सूचितं, तत्र 'लब्धे'त्यनेन-तादृशप्रतिग्रहाभावः, आयासाभावः, स्वेच्छा-भावश्च सूचितः॥ २॥

फणीशं=पतञ्जलिम्। **तेर्थेऽति**। तत्त्वार्थप्रकाशकं, प्रकृतग्रन्थसिद्धान्तार्थप्रकाशकञ्चेत्यर्थः। ननु मनोरमा

❀ ज्योत्स्ना ❀

अर्थप्रकाशकमिति। अर्थाः=सिद्धान्तकौमुदीविषयभूता वैयाकरणसिद्धान्ताः, तेषां प्रकाशकमित्यर्थः। **मनोरमोमार्द्धदेहमिति**। मनोरमारूपाया उमाया अर्द्धदेह,' इति समासः। अनेन

❀ वरवर्णिनी ❀

शुष्कतृणं, तथा च 'कक्षेषु हुताशन' इत्येव विग्रहीतव्यम्, 'अरय एव कक्षा' इति विग्रहे तु-राशि दुर्बलत्वप्रतीतिः स्यादित्यादिना **भट्ट-भैरवमिश्रादी**नधिक्षिपन्तो **नागेशोक्तिप्रकाश**कृतोमान्या एवेति **गौडाः**।

परे तु—'फणी ईश'मिति पदे छित्वा-फणी=साक्षात्पतञ्जलिरेव, नागेशः, ईशं=शिवं नत्वा शेखरन्तनुत इति व्याचक्षते,—**गौडाः**। शिवपक्षेऽपि श्लोको योजनीयः,—तत्र—अर्थप्रकाशकं=ज्ञानमित्येवमूहनीयम्।

ग्रन्थसमाप्ति—ग्रन्थप्रचाराऽऽदिप्रतिबन्धकदुरितप्रशमाय समुचितऋषित्रयनमस्काररूपं मङ्गलमाचरञ्शिष्यशिक्षायै व्याख्यातृ-श्रोतॄणामनुषङ्गतो मङ्गलाय च

❀ अभिनव-चन्द्रिका ❀

अथ वा—'मनोरमोमाया अर्धं यति=खण्डयतीति—मनोरमोमार्धदा, 'आतोनुपसर्गे' इति 'क'प्रत्ययः, तादृशी—ईहा—चेष्टा यस्येत्यर्थः। एतेन—मनोरमा-शेखरयोः परस्परमगतार्थत्वं, मनोरमोक्ताऽसम्मतार्थानां खण्डनञ्च सूचितं; स्वस्त्र्युक्तानां सम्मतानां ग्रहणस्यासम्मतानां खण्डनस्य च लोके दर्शनात्। ईश्वरपक्षे च—मनोरमा—मनोहरा—या उमा, सैवाऽर्धदेहो यस्येत्यर्थः।

लघुशब्देन्दुशेखरमिति—ग्रन्थपक्षे लघवो ये शब्दास्त एव य इन्दुः, तस्य शेखरः—प्राधान्येन कथनमत्रेत्यर्थः। ईश्वरपक्षे च,—लघुशब्दा इवेन्दुः—शेखरः=शिरोभूषणं यस्येत्यर्थः। अर्थप्रकाशकत्वं समानो धर्मः, एतेन "—अस्मिन् ग्रन्थेऽर्थबाहुल्यमेव न शब्दबाहुल्यम्—" इति सूचितम्॥ ३॥

व्याख्यातृ-श्रोतॄणामिति। नचाऽत्रा'नङ् ऋत' इत्यानङा भवितव्यमिति वाच्यं, पूर्वोत्तरपदयोर्विद्यायोनिसम्बन्धवाचिनोरेव तत्र ग्रहणेन 'श्रोतृ' शब्दस्य तद्वाचकत्वाभावात्तदप्राप्तेः। **समुचितेति**। "यद्यद्विभूतिमत्सत्त्वं श्रीमदूर्जितमेव वा। तत्तदेवावगच्छ त्वं मम तेजोंऽशसम्भवम्" —इति 'गीता' वचनेन मुनित्रयस्य व्याकरणकर्तृत्वेनेश्वरांशत्वादिति भावः।

❀ चिदस्थिमाला ❀

ग्रन्थादेवैतदर्थप्रकाशे सिद्धे किमर्थमयमत आह—**मनोरमोमेति**। मनोरमैवोमा—मनोरमोमा, सा अर्द्धदेहो यस्य तमित्यर्थः। एतेन तत्रानुक्तमत्रोच्यत इति तया न गतार्थतेति सूचितम्। लघुः=कलात्मकः,—शब्द इव इन्दुः—शेखरे यस्य शिवस्य तम्। शब्दरूप इन्दुः,—इन्दुरिव शब्दो वा-शेखरो=मस्तकं, मुख्यो यस्य—प्रतिपाद्यप्रतिपादकभावसम्बन्धेन—स ग्रन्थो लघुत्वविशिष्टस्तमित्यर्थः। यद्वा—लघवः शब्दा यस्मिन् स लघुशब्दः, लघुश्चासौ शब्दश्च लघुशब्दो वा, तद्रूपमिन्दुशेखरमित्यर्थः॥ ३॥

'समाप्त्यादी'त्यादिना—स्थितिपरिग्रहः। **समुचितेति**। योग्येत्यर्थः, एतच्छास्त्रप्रवर्त्तकत्वात्तथासामर्थ्यवत्त्वाच्चेति भावः। अनुषङ्गतः=प्रसङ्गतः। ननु 'नमस्कुर्मो नृसिंहाये'ति वत्-'नमः स्वस्ती'ति चतुर्थी स्यादत

❀ ज्योत्स्ना ❀

मनोरमाव्याख्यातभागस्याव्याख्यानमूलको न्यूनतादोषः परिहृतः। मनोरमायामुमात्वारोपात्तस्याश्च वामार्द्धत्वेन निरूपणादप्राधान्यसूचनात्क्वचिद्व्याख्यातभागस्यानुपादेयता, स्वव्याख्यानयोग्यता च सूचिता। **शब्देन्दुशेखरमिति**। शब्दो—व्याकरणव्यङ्ग्यः,—स एव इन्दुर्दोषरहितत्वात्—शेखरः=शिरोभूषणं यस्य सः। अत्रापि शब्दे इन्दुत्वारोपणमूलकं ग्रन्थे शिवत्वारोपणमिति पूर्ववत्परम्परित रूपकं बोध्यम्। ग्रन्थप्रचारादी'त्यादिपदात् ग्रन्थस्य परैरनुपहसनीयत्वं ग्राह्यम्। ऋषित्रयनमस्कारस्य समुचितत्वं—शास्त्रप्रणेतृसम्बन्धित्वात्। अन्यार्थं प्रकृतस्य नान्तरीयकफलान्तरजनकत्वमनुषङ्गः।

❀ विषमपदविवृतिः ❀

'कक्षस्तु दोर्मूले शुष्ककानने' इत्यभिधानम्। **मनोरमोमार्द्धदेहमिति**। तेन मनोरमोक्तार्थाप्रकाशनं मनोरमायाः क्वचिद्गुणत्वं सूचितं भवति। **समुचितेति**। तत्त्वं-चैतच्छास्त्रप्रवर्तकसम्बन्धित्वात्।

❀ वरवर्णिनी ❀

मूले—अर्थप्रकाशकं=सिद्धान्ततत्त्वप्रकाशकम्, एतेन 'मनोरमापेक्षयाधिकाऽर्थे'त्यादिरीत्याऽन्यथा मुधैव व्याचक्षणा **मैथिलाः** समाहिता इति—**गौडाः**।

निबध्नाति–**मुनित्रयमिति** । कारकविभक्तेर्बलवत्त्वाद्द्वितीया ।

❀ अभिनव-चन्द्रिका ❀

बलवत्त्वादिति । न च 'विभक्ति' शब्दस्य स्त्रीलिङ्गत्वेन तत्सामानाधिकरण्याद् 'बलवतीत्वा' दित्यपेक्षितमिति वाच्यं, 'कृत्तद्धितसमासैः सम्बन्धाऽभिधानं भावप्रत्ययेने'ति सिद्धान्तेन बल-सम्बन्धस्यैव प्रतीत्या, तस्य च स्त्रीपुरुषसाधारण्येन बलवच्छब्दात्त्वप्रत्ययेऽपि दोषाभावात्, अत एव 'पृथिव्या गन्धवत्त्वं लक्षण'मित्यादिप्रयोगाः सङ्गच्छन्ते ।

अन्ये तु—'कुक्कुटाण्ड'वत्स्त्रीत्वाऽविवक्षायां बलवच्छब्दात्त्वप्रत्यये साध्विदम्—" इत्याहुः । न च कृधात्वर्थफलेऽन्वयविवक्षायां द्वितीयैव प्राप्नोति, नमःपदार्थेऽन्वयविवक्षायां चतुर्थ्येव प्राप्नोतीति युगपदुभयोः प्राप्त्यभावेन 'कारकविभक्तेर्बलवत्वाद्द्वितीये'त्यसङ्गतमिति वाच्यं, नमःशब्दस्य निपातत्वेन द्योतकतया द्योतकवाचकस्थले विनिगमनाविरहेण विषयतायामुभयप्रयोज्यत्वमिति सिद्धान्तेन 'नमःस्वस्ती'त्यस्य नमःपदप्रयोज्यविषयता निरूपितविषयताप्रयोजकत्वतात्पर्यविषयी-भूताचतुर्थी'त्यर्थेन कृधात्वर्थफलेऽन्वयविवक्षायामुभयोः प्राप्त्याऽसङ्गत्यभावात् ।

न च स्वावधिकोत्कर्षप्रकारकज्ञानानुकूलव्यापारस्य नमःपदार्थत्वे–यत्र चैत्रो विष्णुमित्रं नमस्क-रोति, न यज्ञदत्तं, तत्र चैत्रीयकरपुटसंवलनादिव्यापारेण चैत्रावधिकोत्कर्षप्रकारकज्ञानमुदासीनयज्ञदत्त-स्यापि जातमिति-'यज्ञदत्तं नमस्करोती'ति प्रयोगापत्तिरिति वाच्यम्, उत्कर्षविशिष्टज्ञानानुकूलव्यापारस्य

❀ चिदस्थिमाला ❀

आह–**कारकेति** । कृधातूपस्थाप्यक्रियानिरूपितकर्मत्वात् । 'कर्तृकर्मणो'रिति षष्ठी तु न, 'न लोके'ति निषेधात् । दृष्टान्ते तु 'क्रियार्थोपपदस्ये'ति चतुर्थी, तथार्थावगमात् । 'नमः स्वस्ती'ति चतुर्थी तु शुद्धनमःशब्दयोगे चरितार्थेति भावः । एतेन—'जहत्स्वार्थावृत्तिपक्षे नमःशब्दस्यानर्थक्याद‍र्थवद्ग्रहणपरिभाषया चतुर्थी ने'ति दण्ड्युक्तमपास्तं, 'देवान् नमस्करोती'त्यादावुक्तयुक्तेरसम्भवात्, तस्यार्थान्तरत्वात्, प्रक्रियादशायां तदनङ्गीकाराच्च ।

❀ ज्योत्स्ना ❀

कारकविभक्तेर्बलवत्त्वादिति । 'उपपदविभक्तेः कारकविभक्तिर्बलीयसी'ति न्यायादित्यर्थः, स च न्यायोऽन्तरङ्गन्यायमूलकोऽतिरिक्तो वेत्यन्यदेतत् । न च 'नमस्स्वस्ती'त्यत्र स्वस्त्यादिसाहचर्यात् स्वरादिपठितस्यैव नमःशब्दस्य ग्रहणात्साक्षात्प्रभृत्यूर्याद्यन्यतरगणपठितस्य योगे द्वितीयैव भवति, गतिसञ्ज्ञकस्य हि नमःशब्दस्योपसर्गवद् द्योतकतया कृञ एव प्रणत्यर्थकत्वेन 'कर्मणि द्वितीये'त्यस्य

❀ सदाशिवभट्टीयम् ❀

कारकविभक्तेर्बलवत्त्वाद् द्वितीयेति । कुक्कुटाण्डसमासवत् स्त्रीप्रत्ययोत्पत्तेः पूर्वन्तद्धितः, ततस्तु न सः, एकार्थीभावात्, 'शरदः कृतार्थते'तिवत्सामान्ये नपुंसकं वा । एतेन तद्धितान्तत्वेन गुणवचनत्वाभावा-'त्त्वतलो'रित्यस्याप्राप्त्या पुंवत्त्वासङ्गतिरित्यपास्तम् । न च स्वस्त्यादिसाहचर्यादि'त्यादि**माधवोक्त**युक्त्यापि निर्वाह इति वाच्यं, 'रावणाय नमस्कुर्या'दिति **भट्टि**प्रयोगे द्वितीयाप्रसङ्गात् । न चासत्वार्थकस्य स्वरादिपठि-तस्य स प्रयोगः, 'नमस्पुरसो'रिति सत्वानापत्तेः, तत्र **जयमङ्गलानु**रोधेन सविसर्गपाठकल्पनेपि 'स्वयंभुवे नमस्कृत्ये'त्यादौ समासानापत्तिर्दुष्परिहरा । वस्तुतस्तु कर्मत्वमिह न विवक्ष्यते इति **'जयमङ्गला'**शयः । 'अनुकूलयितु'मित्यस्याध्याहारपरग्रन्थास्तूपायान्तरपरा इति बोध्यम्; एतेन–'फलाभावात्साहचर्यमिह न व्यवस्थापक'मित्यपास्तम्, 'देवान् नमस्करोती'त्यस्य फलस्य सत्त्वादिति बोध्यम्। फलाभावा'दुपपदविभक्ते' रित्येव न प्रवर्त्तत इत्यस्य वक्तुं शक्यत्वाच्च ।

१. **दण्डी**=सिद्धान्तकौमुदीतत्त्वबोधिनीकर्त्ता—ज्ञानेन्द्रसरस्वती ।

परिभाव्येति । तच्छब्दस्य बुद्धिस्थपरामर्शकत्वात्प्राचामुक्तीरितिरस्कृत्येत्यर्थः,

❀ अभिनव-चन्द्रिका ❀

नमःपदार्थत्वेनाऽदोषात्', उत्कर्षवैशिष्ट्यञ्च—'स्वप्रकारकज्ञानविशेष्यसमवेतत्व' 'स्वप्रकारकत्वे'-तदुभयसम्बन्धेन, प्रकृते च—उदासीनयज्ञदत्तज्ञाने स्वप्रकारकज्ञानविशेष्यसमवेतत्वाभावान्न दोषः ।

यत्तु''—'स्वाश्रयसमवेतत्व,' 'स्वप्रकारकत्वे'तदुभयसन्बन्धेन ज्ञाने उत्कर्षवैशिष्ट्य'मिति'' तन्न,—यत्रोत्कर्षाश्रयत्वं बाधितं तत्र 'नमस्करोती'ति प्रयोगानुपपत्तेः, यत्रोदासीनो वस्तुत उत्कृष्टस्तत्र 'नमस्करोती'ति प्रयोगापत्तेश्च । न च 'स्थाणुं नमस्करोती'ति प्रयोगानुपपत्तिः, स्थाणोरचेतनत्वेन स्वप्रकारकज्ञानसमवेतत्वस्याभावादिति वाच्यं, तत्र चेतनत्वभ्रमेण, तदारोपेण, देवतात्वारोपेणं वा तादृशप्रयोगोपपत्तेः ।

❀ चिदस्थिमाला ❀

'**प्राचा**'मित्युक्त्या बहुवचनान्तसमासः सूचितः, तेन सर्वतिरस्कारसिद्धिः, तस्य प्रक्रान्तपरामर्शकत्वादाह—**मुनीति** । 'मुनित्रये'त्युक्त्या एकवचनान्तसमासः सूचितः । यद्यपि समुदायोक्तमेकं न किमपीति मुन्युक्तिष्वेव पर्यवसानमिति प्राग्वत्सुवचं, तथापि सति सम्भवे सर्वनाम्नां प्रक्रान्तप्रधानपरामर्शित्वादेवमुक्तं, प्रायः सिद्धान्तस्यैक्येन समूहोक्तस्यैकस्य तस्य सम्भवाच्च । एतेन तथा **दण्डयुक्तमपास्तम्** ।

❀ ज्योत्स्ना ❀

प्रवृत्तेः''—इति **माधवोक्तिर्युक्ते**ति वाच्यं, 'रावणाय नमस्कुर्या'दिति भट्टिप्रयोगे द्वितीयाप्रसङ्गात् ।

न च सत्त्वार्थकस्य स्वरादिपठितस्यायं प्रयोगः, 'नमस्पुरसो'रिति सत्वाभावापत्तेः। तत्र 'नमःस्वती'-त्यनेन चतुर्थीति **जयमङ्गला**नुरोधात् सविसर्गपाठकल्पनेऽपि 'स्वयम्भुवे नमस्कृत्ये'त्यादौ समासाना-

❀ सदाशिवभट्टीयम् ❀

केचित्तु''–साहचर्यं नात्र नियामकम्, अन्यथा विनिगमनाविरहेणाऽजन्तत्वेनाऽऽक्षरसमाम्नायिकान्तत्वेन वा सादृश्यग्रहे'देवेभ्यो नमोऽत्रे'त्यादावेव तदापत्त्या 'देवेभ्यो नम' इत्यत्रानापत्त्या भाष्यायाकरग्रन्थासङ्गतिरेव स्यात् ।

किञ्च 'नमोवरिव' इति सूत्रे भाष्ये 'नमस्यति देवा'नित्यत्र चतुर्थीमाशङ्क्योपपदविभक्तेरिति न्यायेन समाहितं, साहचर्येण द्योतकनमःशब्दयोगे चतुर्थ्यप्रवृत्तौ क्यचः पूजार्थकत्वेन नमसो द्योतकत्वेन तदप्राप्त्योभयमप्यसङ्गतं स्यादि–''त्याहुः ।

तिरस्कृत्येत्यर्थ इति । फलितार्थप्रदर्शनमिदमिति **पाठकाः** । एवञ्च तिरस्कारार्थस्य परिभवतेरेव विचारार्थकत्वमिति नासङ्गतिरिति भावः । इदमेव युक्तम् । **केचित्तु** वैयधिकरण्येनान्वये तत्सम्बन्धिधातोरित्यर्थः, तदर्थप्रकृतिकण्यन्तधातोरिति यावत् । यद्वा कोशात्तिरस्कारार्थस्य परिभवतेर्धातोर्विचारार्थकत्वे=विषयत्वापत्त्यर्थकत्वे, तदुत्तरणिचा तदनुकूलकृत्यभिधानाद्विषयत्वापादनरूपविचारार्थकत्वं परिभावयतेरित्यर्थः। **एतेन**–यस्य कोशात्तिरस्कारार्थकत्वं परिभवतेर्न यस्य विचारार्थकत्वं, यस्य भावयतेस्तत्त्वं, न तस्य कोशात्तत्त्वमित्युभयमसङ्गतमित्यपास्तम्। ''यत्तु'परिभवतेस्तिरोभवनं ण्यन्तस्य तिरस्करणमर्थ' इति, भू प्राप्तावित्यस्य चौरादिकस्येदं रूपमिति वा-परिभाव्येत्यस्य तिरस्कृत्येति विवरणं सम्यगेवेति, तन्न । घञन्तनामार्थानुशासकवक्ष्यमाणकोशसञ्चारस्यासङ्गतिप्रसङ्गात्। मम तु परिभाव्येत्यादेरयमर्थः–''कोशात्तिरस्कारार्थस्य =परिभावशब्दस्य धातोः''=परिभाव्ये यत्र णिलोपे धातुत्ववतः,। एतदुक्तिस्तु अनेकार्थत्वे साधकस्य धातुत्वरूपस्य सम्पत्तिसूचनाय'' इत्यन्ये । ''**वस्तुतः**–तिरस्कारार्थस्य परिभावशब्दस्यावयवो यो धातुस्तस्येति वैयधिकरण्येन व्याख्येयम्, अन्यथा तु न सम्भवः ।

१ **ज्योत्स्ना**कृत **उदयङ्कर**पाठकाः । शेखरटीकाविशेषकृतो **लक्ष्मण**पाठकाश्च ।

मुनित्रयोक्तीर्विचार्येत्यर्थो वा; 'परिभावस्तिरस्क्रिये'ति कोशात्तिरस्कारार्थकस्य धातोर्विचारार्थकत्वेऽपि न बाधकं, धातूनामनेकार्थत्वात्, अत एव 'परौ भुवोऽवज्ञाने' इति सङ्गच्छते। एतेन स्वग्रन्थस्य प्राचीनग्रन्थैरगतार्थता, समूलत्वञ्च ध्वनितम्। भाविनोऽपि बुद्ध्याः विषयीकरणादियमिति निर्देशः।

सिद्धान्तप्रकाशकत्वेन, अतिदुरूहग्रन्थान्तरेभ्यः सिद्धान्तज्ञाने जायमानस्य क्लेशरूपसन्तापस्य शामकत्वेन च-कौमुदीसादृश्यम्।

❀ अभिनव-चन्द्रिका ❀

धातूनामनेकार्थत्वादिति—न च परिपूर्वकभूधातोरेव तिरस्कारार्थत्वेनेदमसङ्गतमिति वाच्यं, नामलिङ्गानुशासने 'ऽनादरः परिभवः'—इत्यत्र 'परिभवः परीभाव' इत्युभयोपादानवैयर्थ्यापत्तेः, धात्वर्थकथनाऽसङ्गत्यापत्तेश्च। **शामकत्वेनेति**। न च 'नोदात्तोपदेशस्ये'ति वृद्धिनिषेधा'च्छमकत्वेने'त्यपेक्षितमिति वाच्यं, 'शमक एव शामक' इति स्वार्थिकाणन्तत्वस्वीकारेणादोषात्, क्वचित्तु—'शमकत्वेने'त्येव पाठः।

ननु प्रवृत्तिमात्रं प्राति बलवदनिष्टाननुबन्धीष्टसाधनत्वप्रकारकज्ञानस्य, कृतिसाध्यत्वप्रकारकज्ञानस्य च करणत्वेन तदुत्पत्त्यर्थं ग्रन्थादाववश्यं यत्नः कर्त्तव्यः, निरुक्तज्ञानद्वयञ्चानुबन्धज्ञानेन जायते, अनुबन्धाश्च विषय-प्रयोजन-सम्बन्धा-ऽधिकारिभेदेन चतुर्विधाः। ग्रन्थाध्ययनविषयकप्रवृत्तिप्रयोजकज्ञानविषयत्वञ्चानुबन्धसामान्यलक्षणं। तत्र विषयज्ञानादिष्टसाधनत्वप्रकारकं,

❀ चिदस्थिमाला ❀

नन्वत्र पक्षे कोशविरोधोऽत आह—**परीति**। **धातोरिति**। एतेन 'घञन्तस्यैव तद्बोधकत्वमुक्तकोशा'दित्यपास्तं, 'परिभवती'त्यादितोऽपि तत्प्रतीतेः। ननु धातूनामनेकार्थत्वं गमकसत्त्वे एवात आह-**अत एवेति**। तेषामनेकार्थत्वादेवेत्यर्थः। **इतीति**। इत्यत्रावज्ञाने इति विशेषणमित्यर्थः। 'मनसा परिभाव्ये'ति श्रीहर्षप्रयोगादप्रयुक्तत्वदोषशङ्का नेति भावः। उक्तार्थद्वयस्य क्रमेण फलमाह—**एतेनेति**। उक्तार्थद्वयार्थकद्वितीयल्यबन्तान्त-

❀ ज्योत्स्ना ❀

पत्तिर्दुःपरिहरेत्याद्यस्मत्कृतपरिभाषाप्रदीपार्चिषि विस्तरेण निरूपितम्। प्रसिद्धप्रक्रान्तानुभूतार्थकतच्छब्दस्य यच्छब्दानाकाङ्क्षतोक्तेरर्थविशेषपरत्वेन व्याख्यानमाह—**तच्छब्दस्येति**। 'बुद्धिस्थपरामर्शकत्वा'दित्यनेनानुभूतार्थकत्वं, 'मुनित्रयोक्तीर्विचार्ये'त्यनेन तु प्रक्रान्तार्थकत्वमुक्तमिति ज्ञेयम्।

तिरस्कृत्येत्यर्थ इति। यद्यपि परिसमभिव्याहारे भूधातोरेव तिरस्कारार्थत्वं तदुत्तरणिचा तु प्रयोजकव्यापारोऽभिहित इति तिरस्कार्येति वक्तुमुचितं, तथापि घञन्तपरिभावशब्दात्तत्करोतीति णिचि, क्त्वो ल्यपि, 'तिरस्कारं कृत्वे'त्यस्य फलितार्थप्रदर्शनमिदम्।

इत्यर्थो वेति। अत्र पक्षे सर्वतोभावार्थद्योतकेन परिणा विषयत्वापादनस्वरूपो ण्यन्तार्थो विशेष्यते। **तिरस्कारार्थस्य धातोर्विचारार्थत्वेऽपीति**। इदञ्च 'णिज्द्योतक'इति पक्षाभिप्रायेण।

❀ सदाशिवभट्टीयम् ❀

उपसर्गसमानाकारत्वेन परेः पृथक्करणाद्विशिष्टस्य धातुत्वाभावात्, **अत एव** =धातोरनेकार्थत्वादेव, परिभवतेस्तिरस्कारातिरिक्तार्थकत्वादेव। **सङ्गच्छते**-तन्मात्रार्थकत्वे तु व्यावर्त्याभावेना'ऽवज्ञाने'इति विफलमेव स्यादिति न सङ्गच्छेत''इति **केचित्**। **तिरस्कारार्थस्य धातोर्विचारार्थत्वेपीति**। इदं च 'णिच् द्योतक' इति पक्षाभिप्रायेणेति **पाठकः**,—'हेतुमती'ति सूत्रस्थोत्तरग्रन्थविरोधात् द्योतकत्वपक्षरूपकुत्सितयष्टिं व्यवष्टभ्य समर्थनं तु न

---

१. 'परिभाव्ये'त्यस्योपादानेनेत्यर्थः।

अनेन वैयाकरणसिद्धान्ता विषयाः, तज्ज्ञानं प्रयोजनं, तज्जिज्ञासुरधिकारी---त्यादि सूचितम् ।

❀ अभिनव-चन्द्रिका ❀

कृतिसाध्यत्वप्रकारकश्चेति ज्ञानद्वयं जायते, विशिष्टबुद्धौ विशेष्यतावच्छेदकधर्मप्रकारकनिश्चयस्य कारणत्वात् । अधिकारिज्ञानेन च कृतिसाध्यत्वप्रकारकं ज्ञानं जायते, प्रयोजनज्ञानेन चेष्टसाधनत्वप्रकारकं ज्ञानं जायते, सम्बन्धज्ञानेन चोभयज्ञानं जायते इत्यनुबन्धचतुष्टयनिरूपणमवश्यं कर्त्तव्यमित्याह—**अनेनेति । वैयाकरणसिद्धान्ता विषया इति ।** चिन्त्यमिदं, प्रवृत्तौ सिद्धान्तज्ञानस्योद्देश्यत्वेन—प्रवृत्त्युद्देश्यस्यैव च विषयरूपानुबन्धत्वौचित्येन 'वैयाकरणसिद्धान्तज्ञानं विषय'इति लेखनस्योचितत्वात् । **तज्ज्ञानं प्रयोजनमिति । इदमपि चिन्त्यम्**—, अन्यस्य प्रयोजनज्ञानेऽन्यत्र प्रवृत्तेरसम्भवात्, वैयाकरणसिद्धान्तज्ञानस्य कौमुदीकरणप्रयोजनत्वेन वैयाकरणसिद्धान्तज्ञानरूपविषयस्य प्रयोजनज्ञानमन्तराऽध्येतृप्रवृत्त्यसम्भवात्, अनुबन्धचतुष्टयज्ञानस्यैवाध्ययनप्रवृत्तिप्रयोजनकत्वाच्च, तस्माद्'क्षोहागमे'त्यादिभाष्योक्तप्रयोजनमेव वक्तव्यम् । **तज्जिज्ञासुरधिकारीति । इदमपि**

❀ चिदस्थिमाला ❀

कथनेनेत्यर्थः । 'तेने'ति पाठेप्येवम् । स्वग्रन्थस्य=कौमुदीरूपस्य । **ध्वनितमिति** । 'अगतार्थते'त्यत्र लिङ्गविपरिणामेनान्वयः । **भाविनोपीति** । 'ग्रन्थस्ये'ति शेषः । नचैवम्–'अय'मित्युचितमिति वाच्यं, कौमुदीगतलिङ्गारोपेण तथोक्तेः । आरोपफलन्तु–उपमाया लिङ्गभेदजदुष्टत्वनिरासः । यद्वा–भाविनोप्यर्थस्य बुद्ध्या विषयीकरणस्यान्यत्र दृष्टत्वात् भाविसूत्रविवृतेरियमित्यनेन बुद्धिस्थत्वात्परामर्श इत्यर्थः । **सिद्धान्तेति** । वैयाकरणसिद्धान्तस्यान्धकारे घटपटादिसंशये तत्सिद्धान्तस्येव प्रकाशिकेत्यर्थः । ननु वैयाकरणसिद्धान्तभूतस्फोटस्यात्राऽनिरूपणात्तदप्रकाशत्वात्कथं तेन सादृश्यमत आह–**अतिदुरूहेति** । महाभाष्यादिभ्य इत्यर्थः। सिद्धान्तपदेन प्रक्रियासिद्धान्तोऽत्र, मूले च विवक्षित इति भावः । **सिद्धान्तज्ञाने**–'सम्पादनीये सती'ति शेषः । **सादृश्यमिति** । तद्विशिष्टे कौमुदीपदं लाक्षणिकं, तथा चोपमालङ्कारो व्यङ्ग्य इति भावः ।

अनेन=सिद्धान्तकौमुदी'त्यनेन । **आदिना**—प्रतिपाद्य-प्रतिपादकभावसम्बन्धपरिग्रहः ।

❀ ज्योत्स्ना ❀

परौ भुवोऽवज्ञान इति । 'अकर्तरि च कारके सञ्ज्ञायां' 'भावे'इत्यनुवृत्तौ घञ्विधायकं सूत्रम् ।

सङ्गच्छत इति । एवञ्च घञन्तस्यैव नियमेनावज्ञानार्थत्वमित्यन्यत्र विचारार्थत्वमुपपद्यते, यथा परिभवत्यर्थयोगे तिरस्कारं गमयत्येवं भावयत्यर्थयोगे विचारार्थत्वम्, 'अध्ययनभावनाभ्या'मित्यादौ भावयतेर्विषयत्वापादनार्थत्वस्य दृष्टत्वादिति भावः । उक्तमर्थद्वयमपि प्रकृते विवक्षितमिति तदुपयोगमाह—**तेनेति** । सन्निकृष्टार्थविषयेदंशब्दस्य प्रयोगानुपपत्तिमाशङ्क्याह—**भाविनोऽपीति** ।

बुद्ध्या विषयीकरणादिति । बुद्धिसत्तासमाविष्टस्यैव शक्तिग्रहशाब्दबोधविषयत्वं, न बाह्यस्य, ज्ञानादीनामन्तःकरणनिष्ठत्वेन तन्निष्ठविषयस्यैव सामानाधिकरण्येन तत्कारणत्वौचित्यात्, प्रत्यक्षादिना बुद्धावकृतस्य बाह्यस्य शक्तिग्रहविषयत्वासम्भवाच्चेति भावः ।

"सञ्ज्ञा च परिभाषा च विधिर्नियम एव च । अतिदेशोऽधिकारश्च षड्विधं सूत्रमुच्यते ॥"

❀ सदाशिवभट्टीयम् ❀

रोचतेऽस्माकमिति **मन्यते । भाविनोपीति** । अत्र'ग्रन्थस्ये'ति शेषः । **'इय'**मित्युक्तिः–कौमुदीगतउपमाया लिङ्गभेदजदुष्टत्वनिरासायारोपः । **यद्वा**—भाविनोप्यर्थस्यान्यत्र बुद्ध्या विषयीकरणस्य दृष्टत्वाद्भाविसूत्रविवृते**रिय**मित्यनेन परामर्शः ।

अइउण् । एषां क्रमबोधकत्वेऽप्यादिरन्त्येनेत्यनेनैकवाक्यतया वृत्तिपरिच्छेदकत्वेन –सञ्ज्ञासूत्रत्वं, क्रमस्य सञ्ज्ञाद्वारैवोपयोगात् । एकवाक्यता च "–आदिरकारादि-

❀ अभिनव-चन्द्रिका ❀

चिन्त्यं, तज्जिज्ञासायाश्चाण्डालादेरपि सम्भवेन तस्याप्यधिकारित्वापत्तेः, तस्मा'दधीतकाव्यकोशादि-र्द्विजातिरधिकारी'ति वक्तव्यम् ।

ननु—"सञ्ज्ञा च परिभाषा च विधिर्नियम एव च । अतिदेशोऽधिकारश्च षड्विधं सूत्र-लक्षणम्" इत्यभियुक्तोक्तषड्विधसूत्रेषु 'अइउ'णित्यादि किं सूत्रमित्यत आह—**एषामित्यादि** ।

क्रमबोधकत्वेऽपीति । चिन्त्यमिदम्, एषां वर्णानां–प्रत्यक्षं प्रति विषयस्य करणत्वेन–क्रमेण श्रावणप्रत्यक्षजनकत्वेऽपि क्रमे शक्त्यभावेन तद्बोधकत्वाऽसम्भवात् । न च क्रमबोधजनकत्वं—क्रमेणोपस्थितिजनकत्वं, क्रमेण शक्तिज्ञानजनकत्वं वेति—नासङ्गतिरिति वाच्यं, पूर्वोच्चरितवर्णेषु शक्तिज्ञानाद्यभावदशायां परोच्चरितवर्णेषु शक्तिज्ञानोपस्थित्योः सम्भवेन पश्चात्पूर्वोच्चरितवर्णेषु शक्तिग्रहे वृत्ते उपस्थितिसम्भवेन व्यभिचारात्, क्रमेण शक्तिज्ञानजनत्वकस्योपस्थितिजनकत्वस्य वक्तुमशक्यत्वात्, न च 'क्रमबोधजनकत्वेऽपी'त्यस्य—क्रमेण श्रावणप्रत्यक्षजनकत्वेऽपीत्यर्थ इति नाऽसङ्गतिरिति वाच्यम्, उक्तार्थकरणस्य कयाऽपि विधया प्रयोजनासम्भवेन 'क्रमबोध-कत्वेऽपी'ति लेखनवैयर्थ्यापत्तेः । **वृत्तिपरिच्छेदकत्वेनेति** । शक्तिनियामकत्वेनेत्यर्थः ।

आदिरकारादिरिति । तत्सदृश इत्यर्थः । सादृश्यमूलकाध्यवसाये तु यथाश्रुतमेव

❀ चिदस्थिमाला ❀

अइउणिति । ननु कान्येतानि सूत्राणि, नच सञ्ज्ञासूत्राणि, क्रमविधायकत्वात्, अत एव 'यमां यमी' त्यादौ यथासङ्ख्यनिर्वाहोऽत आह–**एषामिति** । **वृत्तीति** । शक्तिग्राहकत्वेनेत्यर्थः । ननु कथमेकस्मादुभयमत आह–**क्रमस्येति** । 'शास्त्रे सर्वत्रे'ति शेषः। एवञ्च नान्तरीयकत्वेन तत्त्वसिद्धिरिति भावः । चस्त्वर्थे । **सदृशेने-**त्यस्य–**तदित्यादिः** । इदन्त्यसदृशेनेति तदर्थः । एतदुपयोगः स्फुटीभविष्यति । **आद्यन्तेति** । अवयवत्त्वेन

❀ ज्योत्स्ना ❀

इति प्राचीनपरिभाषितसूत्रलक्षणाक्रान्तत्वादाह—**एषामिति** । **क्रमबोधकत्वेऽपीति** । अन्यथेणा-दिप्रत्याहारे उकारादीनामग्रहणमकारादीनाञ्च ग्रहणं प्रसज्येतेति भावः । **वृत्तिपरिच्छेदकत्वेनेति** । नियमरूपतया वृत्तिसङ्कोचकत्वेन, प्रकरणरूपतया वृत्तिग्राहकत्वेनेति वार्थः । नन्वन्त्यस्येत्सञ्ज्ञा-लोपाभ्यामपहारात्तेन प्रत्याहारानुपपत्तिरत आह–**इता सदृशेनेति** । अयं भावः,–वर्णोपदेशानन्तरं

❀ सदाशिवभट्टीयम् ❀

वृत्तिपरिच्छेदकत्वेनेति । सञ्ज्ञाशब्दनिष्ठवृत्तिपरिच्छेदकत्वेनेत्यर्थः, अत'स्तस्यापत्यं"कर्तरि कृ'दित्या-दीनां न सञ्ज्ञासूत्रत्वम्,'अणा'दीनां जातिशब्दत्वात् । एतेन-तत्र सञ्ज्ञासूत्रत्वातिव्याप्तिनिरासाय सञ्ज्ञास्वरूप-

❀ विषमपदविवृतिः ❀

तिरस्कृत्येत्यर्थ इति । निवृत्तप्रेषणाद्धातोर्हेतुमण्णिजिति भावः । **वृत्तिपरिच्छेदकत्वेनेति** । शक्ति-ग्राहकत्वेनेत्यर्थः । "-स्वरसन्धिस्तु न प्रवर्त्तते,वर्णोपदेशकालेऽजादिसञ्ज्ञानामनिष्पादा'दिति कैयटोक्तं तु न युक्तं,तदुपदेशकालेऽजादिसञ्ज्ञानामनिष्पादेपि सवर्णसञ्ज्ञादिफलस्य दीर्घादेस्तुल्यास्यसूत्रादाविव स्वरसन्धेरत्र प्रवृत्तौ बाधकाभावात्–" इति'**दीक्षितोक्तदूषणमुद्दिधीर्षुणा'रत्नकोश'**कारेण–उक्तकैयट-

१. सूत्रलक्षणस्य षड्विधत्वाभावाच्चिन्त्यमिदं,'सूत्रमुच्यते' इत्येव तु साम्प्रदायिकः पाठः । स्वरूपपरो वा लक्षणशब्द इत्यस्मद्गुरुचरणाः । २. रत्नकोशः=सिद्धान्तरत्नाकरः–कौमुदीटीका ।

रन्त्येनेता तत्सदृशेन-णकारादिना सहोच्चार्यमाण आद्यन्ताक्षिप्तानां सञ्ज्ञा-"इति। 'स्वौज' सित्यादीनामप्येतदेकवाक्यतया सुबादिसञ्ज्ञासूत्रत्वं, स्वादिविधायकत्वञ्चेति बोद्धयम्।

❀ अभिनव-चन्द्रिका ❀

साध्विति न लक्षणोपयोगः। **स्वादिविधायकत्वञ्चेति**। नन्वेवं षड्विधं सूत्रलक्षण' मित्यस्यासङ्गतिः, स्वसमभिव्याहृतपदार्थतावच्छेदकव्याप्यमिथोविरुद्धयावद्धर्मबोधनस्य 'विधा'पदार्थत्वेन 'स्वौजस्मौ' ङित्यादौ विधिसूत्रत्व-सञ्ज्ञासूत्रत्वोभयसत्त्वेन परस्परविरुद्धत्वाभावेन विधापदार्थत्वानुपपत्तेरिति चेन्मैवं, सञ्ज्ञासूत्रत्वत्व—विधिसूत्रत्वत्वादीनां परस्परविरुद्धत्वेन स्वसमभिव्याहृतपदार्थतावच्छेदक-सूत्रत्व-व्याप्यत्वेन च विधापदार्थत्वोपपत्तेः, स्पष्टञ्चेदं हेत्वाभासशिरोमणौ,-'उपधेयसङ्करेऽप्युपाधीनामसाङ्कर्या' दित्यादिना। परे तु—'अइउण्' इत्यादीना'मत्वावच्छिन्नः साधु' रित्यादिरीत्या—वर्णसाधुत्वविधायकत्वेन विधिसूत्रत्वमेव, अत एव इष्टबुद्धयर्थश्च वर्णानामुपदेशः कर्त्तव्य' इति भाष्यञ्च सङ्गच्छते।

'आदिरन्त्येनेत्येकवाक्यतये'त्यादिमूलन्तु न युक्तम्, आदिरन्त्येनेतिसूत्रे आदिपदस्यान्त्येपदस्य चाक्षरसमाम्नायिकाकारादेरर्थत्वेन पदतदर्थयोरेकवाक्यतायाः कुत्राप्यदर्शनात्, 'घटमानये' त्यादौ घटपद-तदर्थयोरेकवाक्यतापत्तेश्च। एकवाक्यता हि त्रिधा लोके दृश्यते—वाक्यैकवाक्यता, पदैकवाक्यता, पदार्थैकवाक्यता चेति। तत्र वाक्यैकवाक्यता नाम—उपजीव्योपजीवकभावापन्नबोधप्रयोजकत्वं, यथा सञ्ज्ञाशास्त्र-विधिशास्त्रयोः, यथा वाऽङ्गवाक्य-प्रधानवाक्ययोः। 'प्रयाजैश्चरन्ती' त्याद्यङ्गवाक्यानां 'दर्शपूर्णमासाभ्यां यजेते' त्याद्यङ्गिवाक्यानाञ्च। परस्परनिरूप्य—निरूपकभावापन्नविषयताप्रयोजकपदघटितत्वं—पदैकवाक्यत्वं, यथा 'मिदेर्गुणः'—'इको गुणवृद्धी' इतिशास्त्रयोः। परस्परनिरूपकभावापन्नविषयताश्रयत्वम् पदार्थैकवाक्यत्वं यथा—'तस्मिति निर्दिष्टे पूर्वस्य' 'इको यणची' त्यादीनां, प्रकृते च निरुक्तत्रिविधैकवाक्यत्वमध्ये न कस्यापि सम्भव इति दिगित्याहुः।

❀ चिदस्थिमाला ❀

बोधकाद्यन्तपदाक्षिप्ताऽऽदिघटितमध्यमानामित्यर्थः, यथैवमन्त्यस्य न, तथा स्फुटीभविष्यति। प्रासङ्गिकमाह-**स्वजौसिति**। यद्वा-उभयार्थत्वमात्रमन्यत्रापि दृष्टमिति ध्वनयितुमाह-'स्वौजसिति'। **एतदेकवाक्यतयेति**।

❀ ज्योत्स्ना ❀

'हलन्त्य' मित्यस्य वाक्यार्थबोधे तटस्थ इवोद्देश्यतावच्छेदकाक्रान्ते 'ऽइउ'णित्यादावपि प्रवृत्त्याणादेरित्सञ्ज्ञासद्भावेऽपि उपदेशेनाभिव्यक्तस्येत्सञ्ज्ञायां लोपेन भाव्यमिति न तदा लोपः।'उर'णित्यादौ प्रत्याहारपरामर्शवेलायां त्वस्त्येव स इत्यादिरन्त्येनेत्यत्रेत्पदस्य तत्सदृशपरत्वमवश्यं वक्तव्यम्, 'अइउ'णिति णकारस्य वर्णसमाम्नायस्थत्वप्रत्यभिज्ञायाः शशविषाणसदृशत्वात्। न चाण्पदस्य प्रातिपदिकत्वादुपदेशत्वात्तदन्त्यत्वादेव कुतो नेत्सञ्ज्ञा, न च प्रयोजनाभावः, प्रत्याहारस्यैव प्रयोजनत्वादिति वाच्यम्। आदिरन्त्येनेत्येतद्वाक्यार्थबोधोत्तरमणपदशक्तिग्रहेऽर्थवत्त्वात्प्रातिपदिकत्वयोग्यतायामपि वाक्यार्थबोधात्पूर्वं संज्ञाया अप्रसङ्गादिति। प्रसङ्गादाह—**स्वौजसित्यादीनामपीति**।

❀ सदाशिवभट्टीयम् ❀

वच्छिन्ने'त्यादि क्लिश्यन्तो **मिश्राः**[१]समाहिताः, 'अणुदि'दित्यादिष्वव्याप्तेश्च। **स्वौजसमौङित्यादीनामपीति**।

१. भैरवमिश्राः।

एषु संहिताया अविवक्षया न संहिताकार्यम् । अनुकरणत्वेन—

❀ अभिनव-चन्द्रिका ❀

संहिताया अविवक्षयेति । न चाऽग्रे 'इको यणची' त्यत्र ङमुटमाशङ्क्य 'सौत्रत्वान्ने ' त्युक्तं तत्रापि संहिताया अविवक्षया न ङमुडिति कस्मान्नोक्तं ?, न च 'ङमो ह्रस्वादची' त्यत्र 'संहिताया'-मित्यधिकाराभाव इति वाच्यं, 'तयोर्य्वावचि संहितायां' मित्यारभ्य 'संहिताया'मित्यधिकारस्य आऽध्यायपरिसमाप्तेः सत्त्वात्, तथा च तदेवात्र समाधानं युक्तम्, एतदेव वा समाधानं तत्र युक्तमिति वाच्यं, तत्र संहिताया अविवक्षणे सूत्रद्वयापत्तेः, पूर्वं संहितया पठिताया अष्टाध्याय्याः संहिताया अविवक्षणेन सूत्रविभागस्य वार्त्तिककृता कृतत्वात् । 'अइउ'णित्वादौ संहिताया अविवक्षया प्रत्येकं सूत्रत्वेऽपि न क्षतिः, 'अत्वावच्छिन्नःसाधुः' 'इत्वावच्छिन्नः साधु' रित्यादिरीत्या वर्णसाधुत्व-विधायकत्वेन प्रत्येकं सूत्रत्वस्येष्टत्वात् । एतदेव द्योतयितुं 'सौत्रत्वा'दिति समाधानं विहाय-'संहिताया अविवक्षये'ति समाधानमुक्तं, चतुर्दशसूत्रीव्यवहारस्त्वनुबन्धप्रयोज्य इति बोध्यम् ।

❀ चिदस्थिमाला ❀

'आदिरन्त्येने' त्युपात्तैकवाक्यतयेत्यर्थः । इदञ्च[1] 'सुप' इत्याद्यर्थमावश्यकम् । नन्वेवं विधिर्न स्यादत आह—**स्वादीति** । आवृत्त्येति भावः ।

नन्वत्र गुणादिकं कुतो न, अत आह—**एष्विति** । तथा निर्देशेन तदविवक्षानुमीयते, न तु तत्करणे[2]-इष्टनिर्देशानुपपत्त्या, व्याख्यानतो निर्वाहात् । एतेन—"यस्येति च" 'न लोका' 'व्योः' 'औतोम्' इत्यादा-विष्टस्थान्याद्यप्रतिपत्त्यापत्त्या—'तया तदविवक्षे'ति चिन्त्यमित्यपास्तमिति भावः । नन्वेवमपि प्रत्येकं विभक्तिः

❀ ज्योत्स्ना ❀

अनुकरणत्वेनेति । अनुकार्यानुकरणयोरर्थभेदेऽपि शब्दैक्यपक्षे श्रोत्रोपस्थितस्य शाब्दे प्रकारत्वेन भानं यदनुकरणस्य तदेवानुकार्यस्य, भेदपक्षे च व्युत्पत्तिवैचित्र्यात्सादृश्याख्यसम्ब-न्धेनेत्युभयथापि न तत्र सङ्केतः, प्रयोजनाभावादिति—सङ्केतवत्त्वरूपवृत्त्यभावात्प्रातिपदिकत्वा-भाव इति प्रतिपदिकत्वाभावद्वारानुकरणत्वस्य हेतुत्वं तृतीययोच्यते । न च वृत्त्यनुपस्थितस्य शाब्दबोधे प्रकारत्वेतिप्रसङ्गः, आश्रयतानिरूपकतान्यतरसम्बन्धेन वृत्त्युपस्थितस्य तत्त्वाङ्गीकारा-च्छब्दस्य वृत्त्याश्रयत्वाददोषात् । अर्थाध्याहारपक्षे तात्पर्यग्रहसहकारेण तथात्वस्य प्राभा-करैरङ्गीकाराच्चेति भावः । **न विभक्त्युत्पत्तिरिति** । नन्वेवमपदत्वात्समुदाये वाक्य-त्वाभावात् संहिताया अविवक्षोक्तेरसङ्गतिः, "संहितैकपदे नित्या धातूपसर्गयोः । नित्या समासे

❀ सदाशिवभट्टीयम् ❀

अस्य विध्यर्थत्वे फलान्यूह्यानि । **अविवक्षया न तत्कार्यमिति** । न चैकपदे इत्यस्य 'राजीयती' त्यादि-सिद्धये'पदत्वाभाववदुत्तरखण्डकसमुदायत्व'मिति परिष्करिष्यमाणत्वेन प्रकृते च तदाक्रान्तत्वेन तस्यानित्य-त्वेन अविवक्षोक्त्यसंगतिरिति वाच्यं, 'पदत्वे सति तत्त्व' मिति तदर्थात्, प्रकृते च समुदायस्यातथात्वात् । **वस्तुतस्तु**-अनुकरणत्वेन सौत्रत्वाच्चेति 'मध्यमणि' न्यायेन पूर्वोत्तरयोरन्वयः । 'अनुकरणत्वेने'त्यस्य निपातानुकरणत्वेनेत्यर्थः । संहिताया अविवक्षया तद्वारणं तु न युक्तम्, एकसूत्रे तदभावात्, तदुक्त-'मिकोगुणे' ति सूत्रे **उद्योते**—'एकयोगत्वञ्च द्वयोरसंहितापाठमात्रेणे'ति, अत एवेकोयणचीत्यत्र सौत्रत्वादेव ङमुट् वारयिष्यते ग्रन्थकृता । "**यत्तु** क्रमबोधकत्वेन वर्णबोधकत्वाभावान्न 'कार'प्राप्तिरिति, तन्न, समूहस्य तत्त्वेपि प्रत्येकं तत्त्वाऽनपायादिति जरन्त[3] **आहुः** ।

१. इदञ्च=स्वौजसित्यादेः सञ्ज्ञासूत्रत्वञ्च । २.तत्करणे=गुणादिसन्धिकरणे, इष्टनिर्देशः=आकारेका-रादीनां स्पष्टप्रतिपत्तिः।'इष्टनिर्देशानुपपत्त्या सन्धिर्ने'त्युत्तरं न युक्तमित्याशयः। ३ जरन्तः=चिदस्थिमालाकृतः।

—सौत्रत्वाच्च वर्णेभ्यो न विभक्त्युत्पत्तिः ।
कारप्रत्ययोऽपि न, बाहुलकात् ।

※ अभिनव-चन्द्रिका ※

सौत्रत्वाच्चेति । चो हेतौ, यतः सौत्रत्वमतोऽनुकरणत्वम्, अतोऽनुकार्याऽनुकरणयोरभेद-विवक्षायां सादृश्यज्ञानाधीनोपस्थित्याऽर्थविषयकबोधजनकत्वेऽपि, शक्ति-लक्षणाऽन्यतरज्ञानाधीनो-पस्थित्याऽर्थविषयकबोधजनकत्वरूपार्थवत्त्वाभावेन प्रातिपदिकत्वाभावान्न प्रत्येकं स्वादय इति भावः।

बाहुलकादिति । 'रोगाख्याया'मितिसूत्रस्थबहुलग्रहणस्यास्मिन् वार्त्तिकेऽनुवृत्तेरिति भावः ।

स्यादेतत्,-'वर्णात्कार'इत्यस्य यदि वर्णवाचकात्कारप्रत्यय इत्यर्थस्तर्हि विसर्जनीयपदादपि कारप्रत्ययापत्तिः, न च 'यस्मात्कारप्रत्ययश्चिकीर्षितस्तद्घटकवृत्तिवर्णत्वव्याप्यधर्मावच्छिन्नविषयक-बोधतात्पर्येणोच्चरितात्कारप्रत्ययो भवती'त्यर्थे न दोष इति वाच्यम्, अनुनासिकपदस्य स्वघटक-नकारवृत्त्यनुनासिकत्वरूपवर्णत्वव्याप्यधर्मावच्छिन्नविषयकबोधतात्पर्येणोच्चरितत्वेन तस्मात्कार-प्रत्ययापत्तेः, न च 'यस्मात्कारप्रत्ययश्चिकीर्षितस्तद्घटकवृत्तिवर्णत्वव्याप्यजात्यवच्छिन्नविषयकबोध-तात्पर्येणोच्चरितात्कारप्रत्ययो भवती'त्यर्थेनानुनासिकत्वस्य गुणतया-(जातित्वाभावेन) न दोष इति वाच्यं, गुणपदस्य, वर्णसञ्ज्ञापक्षे-घि-नदीपदयोश्च स्वघटकेकाराकारवृत्तिवर्णत्वव्याप्याऽत्वे-त्वादिजात्यवच्छिन्नविषयकबोधतात्पर्येणोच्चारितत्वेन तेभ्यः कारप्रत्ययापत्तेः, न च 'यस्मात्कार-प्रत्ययश्चिकीर्षितस्तद्घटकवृत्तिर्या वर्णत्वव्याप्या जातिस्तया साक्षादवच्छिन्ना या मुख्यविशेष्यता तादृशविशेष्यताकबोधतात्पर्येणोच्चरितात्कारप्रत्ययो भवतीति गुणादिपदस्थले बोधीयमुख्यविशेष्य-ताया अन्यतमत्वादिनैव साक्षादवच्छिन्नत्वान्न दोष इति वाच्यं, ह्रस्व-दीर्घपदयोरुच्चारणार्थैकारादि-घटित'कि'—'कु'इत्यादिपदानाञ्च साक्षात्स्वघटकवृत्तिवर्णत्वव्याप्य-ह्रस्वत्व-दीर्घत्व-कत्वादि-

※ चिदस्थिमाला ※

कुतो न, न च तयोरभेदपक्षे स्वरूपस्यानुकार्यस्य वा श्रोत्रगृहीतत्वेन, सादृश्येनोपस्थितेर्वा तत्र तस्य वृत्त्यभावात्तादृशार्थवत्त्वाभावेनाप्रातिपदिकत्वमेवेति वाच्यम्, एवमपि भेदपक्षे वृत्त्यङ्गीकारेण तत्त्वादाह—**अनुकरणेति** । तत्त्वभङ्गभियेत्यर्थः । ननु नेदमनुकरणम्, अर्थपरत्वात्, अत एवेतः सनकाद्युद्धारः, पाणिनेस्तु तात्पर्यतः शब्दमात्रबोधोऽत आह—**सौत्रत्वाच्चेति** । अनेन सूत्र एव तथा प्रयोगो नान्यत्रेति सूचितम्, अन्यथा'निपातनाच्चे'ति वदेत् ।

वर्णेभ्यः—'प्रत्येक'मिति शेषः, अग्रेऽप्यस्यैतादृशस्यानुषङ्गः । **बाहुलकात्**—'रोगाख्याया'मिति

※ ज्योत्स्ना ※

वाक्ये तु सा विवक्षामपेक्षते ॥" इति वचनात् । न च शक्तपदसमूह एव वाक्यं स्यात्, 'चक्रतु'रित्यादावपि कदाचिद्यणभावप्रसङ्गादिति चेन्न । आदिरन्त्येने'त्यनेनैकवाक्यतायां'गवित्ययमाहे'त्यादाविव वाक्यत्वस्य सुवचत्वात्, 'संहितैकपदे' इत्यत्र वाक्यशब्देनैकपदादभिन्नसमुदायस्य विवक्षणाद्वेति तात्पर्यात् । **बाहुलकादिति** । 'रोगाख्यायां ण्वुल् बहुल'मित्यतो बहुलग्रहणस्य 'वर्णात्कार' इत्यत्र सम्बन्धादित्यर्थः ।

※ सदाशिवभट्टीयम् ※

सौत्रेति । औपदेशिकश्रुतित्वस्य स्वयमेव वक्ष्यमाणत्वेन 'छन्दस्त्वा'दित्येव वक्तव्ये 'छन्दोवत्सूत्रे'त्यतिदेशप्रवर्तकं 'सौत्रत्वा'दिति कुत उक्तमिति तदाशयं सः एव प्रष्टव्यः । **अन्ये** तु सूत्राणामिदं सौत्रं—पाणिनिसूत्रमूलभूतं,—तदुपकारकं वा—छन्द इत्यर्थः, तत्त्वात्=छन्दस्त्वादिति यावत्, अत एवाणपि सफलः,

१. तत्त्वात्=अर्थवत्त्वात् । २, अनुकरणस्वरूपभङ्गभियेत्यर्थः । ३. तथा=अभेदविवक्षया । ४.स=नागेशः ।

यत्तु--"उपजीव्यावरोधात् सन्धिर्न,—

❀ अभिनव-चन्द्रिका ❀

जात्यवच्छिन्नमुख्यविशेष्यताकबोधतात्पर्येणोच्चरितत्वेन तेभ्यः कारप्रत्ययापत्तेरिति चेत्, मैवम्, इकारादिषु पुनः- पुनरकारोच्चारणेन व्यञ्जनद्योतकलमकार एव स्वीक्रियते, न लिकारादौ।

तथा च–'वर्णात्कार' इत्यस्य,–वर्णविशिष्टात्कारप्रत्यय इत्यर्थः, वैशिष्ट्यञ्च–'स्वनिष्ठवर्णत्वव्याप्य-जात्यवच्छिन्नविशेष्यताप्रयोजकतापर्याप्त्यधिकरणघटितत्व' 'स्वनिष्ठवर्णत्वव्याप्यजात्यवच्छिन्नविशे-ष्यताप्रयोजकतापर्याप्त्यधिकरणेतराऽघटितत्वे' तदुभयसम्बन्धेन। 'कि' 'कु'शब्दादौ च द्वितीय-सम्बन्धाभावान्न दोषः। न चा'ऽल्लोपोन' इति सूत्रोदाहृतेऽन्कारः'अस्कार' इत्यादौ कारप्रत्ययानु-पपत्तिरिति वाच्यम्, 'अनिनस्मि'न्निति परिभाषयाऽनादिषु वर्णबोधकत्वाऽतिदेशात्। अन्ये तु—'एवकारः' 'वषट्कार' इत्यादाविव कारप्रत्ययादन्य एव कारशब्दस्तेन समास—"इत्याहुः।

उपजीव्यविरोधादिति। अविकृताकारादिषु गृहीता अजादिपदशक्तिः स्वोपजीव्या-ऽवि-

❀ चिदस्थिमाला ❀

बहुलग्रहणानुवृत्तेः। यत्तु—'कारप्रत्ययस्यात्राप्राप्तिरेव, क्रमबोधकत्वेन वर्णाबोधकत्वा'दिति, तन्न, समूहस्य तत्त्वेपि प्रत्येकं तत्त्वानपायात्।

कैयटतात्पर्यबोधिकां **कौस्तुभ**खण्डिकां **रत्नाकरो**क्तिं खण्डयति—**यत्त्विति**। सन्धिः किं

❀ ज्योत्स्ना ❀

"वर्णोपदेशकालेऽजादिसंज्ञानामनिष्पादात्सन्धिर्न"ति यथाश्रुतं कैयटमतं–'प्रकाश-कौस्तुभादौ दूषितं. तत्परिष्कारदूषणद्वारा स्वयमपि दूषयितुमुपन्यस्यति–'**यत्त्वित्यादि**।

❀ सदाशिवभट्टीयम् ❀

अतिदेशप्रवृत्तावभिप्रेतायान्तु सूत्रत्वस्यैव तत्प्रवृत्तिप्रयोजकत्वेन 'तत्त्वा'दित्येव वदेत्, नाणम्"–इत्यावि-ष्कुर्वते तदाशयम्। इदं पञ्चम्यन्तमपि—तृतीयान्तवत्,–'गुणे त्वन्याय्ये'ति न्यायाच्च,—प्रातिपदिकत्व-प्रतिबन्धकद्वारैव—विभक्त्युत्पत्तिप्रतिबन्धकम्। **एतेना**तिदेशाल्लुगिति वक्तव्ये शास्त्रबाधोक्तिरसङ्गतेत्य**पा-स्तम्**। जातलुकि, अनुपत्यन्वाख्यानेपि वा शास्त्रद्वयानुसन्धानस्यावश्यकत्वेन प्रत्युत तवैव गौरवं, छन्दसि सर्वविधीनां वैकल्पिकत्वेनाऽभावकल्पेन वा बाधाऽभावेनाऽसङ्गतेरभावश्च। **एतेन**–"प्रतिसूत्रं प्रातिपदि-कत्वस्य वक्ष्यमाणत्वेन तदवयवत्वेन लुकः सिद्धा सौत्रत्वाश्रयणं विफलम्"–इत्यपि निरस्तम्। जश्त्वाद्य-भावाय सूत्रप्रकृतिकसुबनुत्पन्नः-इत्येतदादरस्यावश्यकत्वाच्च। किञ्च लुकि पूर्वभागस्य पदत्वे नियमेन प्रत्येकं सूत्रस्य प्रातिपदिकत्वनापत्त्या णादेरित्संज्ञानापत्तिरुपायान्तरेण परिहरणीया स्यात्। **यत्तु** प्रातिपदिका-न्तत्वसम्पत्त्या णादेरित्सञ्ज्ञायै प्रत्येकं सूत्रोपदेशस्य तात्पर्यस्यावश्यकत्वेपि वर्णोपदेशे आचार्यतात्पर्यकल्पने न मानम्, एव धनादौ धादिभ्य इवात्रापि न तदुत्पत्तिः, तथैव च कारप्रत्ययोपि नेति सौत्रत्व–बाहुल-कत्वाश्रयणं विफलमिति, तन्न, 'वर्णानामुपदेश' इत्यादिभाष्योक्तिस्वारस्यस्यैव तत्र मानत्वादिति सुधियो विभावयन्तु इति **केचित्**। **बाहुलकादिति**।

यत्त्विति। एवञ्च पुनः शक्तिग्रहाभावेपि सन्ध्युपजीव्यानिश्चयेनाविकृतरूपाकारादिषु गृहीताऽजादि-

❀ विषमपदविवृतिः ❀

'उपजीव्यविरोधात्सन्धिर्ने'त्यर्थकतया व्याख्यातस्तद्दूषयितुमनुवदति–**यत्त्विति**। तथाचाविकृता-

१. "स्वरसन्धिस्तु न प्रवर्त्तते, वर्णोप्रदेशकालेऽजादिसञ्ज्ञानामनिष्पादात्" इति कैयटः।

२. कौमुदीटीका सिद्धान्त**रत्नाकरः**–रामकृष्णसूरिविरचितः।

—तथा ह्यजादिसञ्ज्ञाग्रहकाले 'आद्गुण इत्यादीनामनिष्पत्त्या तदप्रवृत्तावविकृत-रूपाकारादिषु गृहीताजादिपदशक्तिः पश्चादच्प्रत्याहारे ज्ञाते उपेन्द्र इवात्रापि तत्प्रवृत्तौ विरुद्ध्येत; न हि सन्धिकार्ये कृतेऽविकृतरूपश्रवणं भवति"–इति । तन्न ।

❁ चिदस्थिमाला ❁

वर्णोपदेशकाले उत सन्धिशास्त्रनिष्पत्त्यनन्तरम्–आपाद्यते ?, तत्रोभयत्र अभावे हेतुः–कैयटनोक्तो—'वर्णोपदेश' इत्यादि, तत्राद्यपक्षे स्पष्ट एवार्थः । अन्त्यपक्षे तु तेन—उपजीव्यविरोधः सूचितस्तदसाधकत्वेन, तमुपपादयति—**तथा ह्येति । तदिति** । 'आद्गुण इत्यादी'त्यर्थः, एवमग्रेपि । 'अक्षरसमाम्नाय' इत्यादिः । **गृहीतेति** । आदिरन्त्येनेतिशास्त्रेणेति भावः । पश्चात्=वर्णोपदेशज्ञानाद्यनन्तरम् । अत्रापि=अक्षरसमाम्नायेऽपि । **विरुध्येतेति** । 'उपजीव्यभूतशक्तिग्राहकमानविरोधापत्ते'रिति शेषः । तत्र हेतुमाह—**न हीति** । नचैवं 'तुल्यास्ये'त्यादौ दीर्घाद्यप्युक्तरीत्या न स्यादिति वाच्यं, शास्त्रयोः पौर्वापर्येपि आनुपूर्व्यंशे उपजोव्योपजीवकभावाभावात्, सवर्णसञ्ज्ञायास्तत्रोपजीव्यत्वादिति भावः । **अजिति** । अजादिसञ्ज्ञाया इत्यर्थः । अर्थान्तरे=विकृतरूपेषु तेषु । **सन्देह इति** । तथा चाविकृतानामेव सञ्ज्ञितालाभ इति भावः ।

यत्तु "—क्रमबोधके वर्णोपदेशे–गुणादिप्रवृत्तौ, सुपामिति सोर्लुकि, पदत्वात् 'लोपः शाकल्यस्ये'ति प्रवृत्या–'अ-उण्'इति 'अयुण्'इति वा स्यात् , तथा चेकारस्याजादिसञ्ज्ञा न स्यादित्याशयेन–'अजादिसञ्ज्ञा न स्यात्' इति ['अजादिसञ्ज्ञानामनिष्पादा'दिति कैयटेन–] उक्तं, न च सन्देहनिवृत्तिर्व्याख्यानादिति वाच्यम् , 'ईदूदे'दिति तपरकरणेनेदृशे विषये अप्रवृत्तिज्ञापनात्—" इति **मन्दः**[1], तन्न, तथा सत्य'जादिसञ्ज्ञा न स्या'दिति वाच्ये–'अजादिसञ्ज्ञानामनिष्पादा'दित्यस्यासङ्गत्यापत्तेः, 'काल–निष्पाद'पदयोरेवं सति निष्फलत्वापत्तेश्च । अजादिसञ्ज्ञाऽभावे साध्ये हेत्वनुक्त्या वाक्यस्याप्रयोजकत्वापत्तेश्च । सन्ध्यभावे हेतुत्वाभावेनासम्बद्धत्वापत्तेः, विभक्त्यनुत्पत्तिं प्रतिपाद्य 'स्वरसन्धिस्तु ने'ति तदुक्तग्रन्थस्वारस्येन तदनुत्पत्तेरेव स्फुटत्वेन 'सुपा'मित्यादिपरत्वेन कैयटयोजनस्यात्यन्तानौचित्याच्च, । अशब्दार्थत्वाच्च । इष्टस्थलेऽप्यप्रवृत्तौ परिभाषाया निर्विषयत्वापत्तेश्च । गुणान्तरयुक्तसंग्रहाय तपरकरणस्य–सूत्रमते भेदकपक्षे सत्त्वेनावैयर्थ्याच्च । भाष्यमतेऽभेदकपक्षे तस्य प्रत्याख्यातत्वेन तद्विरोधापत्तेश्च । 'किञ्चिदृशे विषये'इत्यस्य—'सौत्रे' इति, साजात्यात्–'दीर्घे,—इति वार्थः?, नाद्यः, 'यस्येति' 'न लोकाव्यय' 'औतो'मित्यादावप्रवृत्यापत्तेः, वृद्धिसूत्रस्थभाष्यविरोधापत्तेश्च । अत एवान्त्योऽपि नेति दिक् ।

❁ ज्योत्स्ना ❁

स्याविकृतरूपस्य कारणत्वात्सन्धिना तद्विनाशे सत्युपजीव्योपजीवकविरोध इति भावः, तदाह–नहीति। शक्त्यग्रहेणेति । प्राथमिकशक्तिग्रहमात्रेणोद्देश्यतावच्छेदकावच्छिन्ने सर्वत्र युगपत्संस्कारे बाधकाभावा- 'त्तुल्यास्यप्रयत्न'मित्यादिनिर्देशात् ,अन्यथौतोम्शसोरित्यादावगतेरिति भावः। सन्देह इति। प्रयोजकवृद्धग्राहितशक्तिसन्देहस्य तटस्थशक्तिग्रहम्प्रति सामानाधिकरण्येन प्रतिबन्धकत्वात्पाणिनिना स्वशिष्येभ्यो

❁ सदाशिवभट्टीयम् ❁

पदशक्तिः संधिकार्ये कृतेऽविकृतेषु विकृतेषु वेति सन्देहाद्विरुध्येतेति भाव इति व्याचक्षते । **केचित्तु**—"उपजीव्यस्य–संधिकारणीभूताऽजादिपदशक्तिग्रहस्य विरोधादित्यर्थः ।

❁ विषमपदविवृतिः ❁

ऽकारश्रवणमुपजीव्य जातशक्तिग्रहण उपजीव्याविकृतश्रवणविरोधिसन्धिकार्यं न जनयतीति भावः ।

---

१. **मन्दः**=मौनी कृष्णभट्टः, शेखरमनोरमादिखण्डन–'**तर्कचन्द्रिका**'दिकर्त्ता ज्योत्स्नाकृतोऽपि प्राचीनः।

पुनरच्पदस्यार्थान्तरे शक्त्यग्रहेण तद्विरोधाभावात्, न च सन्धौ सन्देहः, व्याख्यानतो निर्णयसम्भवात् । ननु चतुर्दशसूत्र्याम'क्षरसमाम्नाय'इतिव्यवहारानुपपत्तिराम्नाय-समाम्नायशब्दयोर्वेदे एव प्रसिद्धेरित्यत आह—**माहेश्वराणीति** । महेश्वरादागतानी-त्यर्थः, महेश्वरप्रसादलब्धानीति फलितम् । एवञ्चैवमानुपूर्वीका श्रुतिरेवैषा,

❀ अभिनव-चन्द्रिका ❀

कृतत्व–विघातका–'ऽऽद्गुण'इत्यादिप्रवृत्तिं प्रति निमित्तं न भवतीति भावः । **विरोधाभावादिति** । 'आदिरन्त्येने'तिसूत्रबोधिता शक्तिः—अकारादि–चान्तसमुदायघटकत्वावच्छिन्ने, न त्वविकृत-तादृशसमुदायघटकत्वावच्छिन्ने, तादृशसमुदायघटकबोध्यत्वावच्छिन्ने वा इत्यविकृतत्वमुपजीव्यमेव नास्तीति प्रकृते उपजीव्यविरोधाभावेन सन्निपा तपरिभाषाया अप्रवृत्तेरिति भावः । ननु सन्धौ सति घटकत्वसन्देहः स्यादत आह—**व्याख्यानत इति** ।

❀ चिदस्थिमाला ❀

'माहेश्वराणी'त्यधिकोक्तिं सफलयितुमाह—**नन्विति** । **व्यवहारेति** । 'शिक्षा-भाष्यादिकृते'त्यादिः । **वेद एवेति** । तद्रूपेर्थे एवेत्यर्थः । आम्नायस्य क्रियार्थत्वात्' 'अथैतस्य समाम्नायस्ये'त्यादाविति भावः । अत एव 'श्रुतिः स्त्री वेद आम्नायः' इत्यमरोक्तिः । 'चन्द्रोदये विताने च स्यादाम्नायोऽन्वये श्रुतौ' इति नानार्थ-कोशादन्यार्थकत्वेऽपि तत्र प्रसिद्ध्यभावस्तदाह—**प्रसिद्धेरिति** । एतेन–''प्रचयशब्दवत्तदप्रसिद्ध्या न वैदिकी प्रसिद्धिः, 'सर्वाम्नायैर्नमस्कृताः' 'आम्नायोक्ताः प्रकाराः' इति कन्युक्तेर्मघवच्छन्दादिवन्न नियतविषयत्वम्, उक्तनानार्थकोशविरोधान्न तन्मात्रार्थत्वमितीदं चिन्त्यम्—'' इत्यपास्तमिति भावः ।

❀ ज्योत्स्ना ❀

विरुध्येतेति । शक्तिग्रहविषयग्राहितशक्तिविषयकः सन्देह इदानीन्तनानामिह विवक्षितः । **व्याख्या-नतः**=व्याख्यातृपरम्परामूलात् ।

निर्णयसम्भवादिति । अनेन शास्त्रप्रारम्भ एव सन्देहोत्पादकशब्दप्रयोगःस्वाकौशलोन्नायत्वादा-चार्य्येण पराकृत इति संहिताया अविक्षायां बीजप्रदर्शनमिदं कैयटोपाध्यायानामिति सूचयति। अन्यथा निर्णयादित्येतावन्मात्रं वदेत् । **श्रुतिरेवैषेति** । एवञ्चाक्षरसमाम्नायव्यहारो नानुपपन्न इति भावः ।

❀ सदाशिवभट्टीयम् ❀

विरोधाभावादिति ।-अविकृतेषु शक्तिग्रहमुपजीव्य जातस्य विकृतेषु शक्तिग्राहकत्वे स स्यादिति भावः । **ननू**पजीव्यस्याविकृतत्वरूपविशेषणविशिष्टाकारादिवर्णरूपविशेष्यरूपस्य शक्तिग्रहोपजीव्यस्येत्यर्थः । **विरोधात्** =कृते संधौ सन्निपातविघातःस्पष्ट एव,सन्निपातप्रतियोगिनोरुपादानग्रहत्यागस्य वक्ष्यमाणत्वात् । एवं च कैयटः सम्यगेवेति चेन्न,पूर्वापरीभावांशे भाष्यादितस्त्यागेपि अन्यत्र त्यागे–मानाभावादिति भाव'इति–**व्याचक्षते** ।

❀ विषमपदविवृतिः ❀

शक्त्यग्रहेणेति । इदमयुक्तं, न ह्य'कारादिषु शक्तिग्रहमुपजीव्य प्रवर्त्तमानं सन्धिकार्यमर्थान्तरे शक्तिग्रहजननद्वारा स्वोपजीव्यशक्तिग्रहं न विहन्ती'ति 'रत्नकोश' ग्रन्थार्थः, किन्तूक्तरीत्याऽवि-कृताकारादिश्रवणमुपजीव्य जातः शक्तिग्रहः स्वोपजीव्याविकृताकारादिश्रवणं न विहन्तीति, तथा च त्वद्दूषणमपराद्धेषोर्धानुष्कस्य कण्ठाडम्बरमनुकरोति ।

अकारादिषु शक्तिनिश्चयमुपजीव्य प्रवर्तमानं सन्धिकार्यमुक्तनिश्चयविरोधिसन्देहाधायकतया न सन्धिकार्यं प्रवर्तयतीत्याशङ्कते—**नचेति** ।

१. 'व्याचक्षते' इत्यस्य पूर्वेण 'केचित्तु' इत्यनेन सम्बन्धः । उक्तग्रन्थार्थः—इति शेषः ।

ॐ वरवर्णिनी ॐ

बाहुलकादिति । [१५ पृष्ठे] **परे तु**'—ननु—'वर्णात्कार'इत्यस्य—'स्वं रूप'मितिशास्त्रबलात्—'वर्णशब्दात्कारप्रत्ययो भवती'ति नार्थः कर्तुं शक्यते, वर्णशब्दात्कारप्रत्ययापत्तेः, ककारादौ तदनापत्तेश्च । **न च** 'स्वं रूप'मिति सूत्रस्य 'तस्यापत्य'मित्यादावप्रवृत्तयेऽनित्यतया—'उभयगतिरिह भवती'ति न्यायाच्चात्राप्रवृत्त्या—'लोके वर्णशब्देन व्यवहृतो यस्तस्मात्कारप्रत्यय'इत्येवार्थ इति न पूर्वोक्तदोष इति वाच्यं, घटपटादिशब्दे प्रतिवर्णं कारप्रत्ययापत्तेः, उच्चारणार्थकाऽकारविशिष्ट'ह'शब्दादेर्लोके वर्णशब्देन व्यवहाराभावात्ततस्तदनापत्तेश्च । **न च** 'वर्णबोधकात्कारप्रत्यय'इत्येवार्थः, घटादिघटकप्रत्येकवर्णानाञ्च वर्णबोधकत्वाभावान्न दोषः, उच्चारणार्थकाकारविशिष्टहादेरपि वर्णबोधकतया कारप्रत्ययः सुलभ एवेति वाच्यं, वर्ण-प्रमेय-ङीप्-टाप्-घिनद्यादिशब्दानामपि वर्णबोधकतया ततोपि कारप्रत्ययापत्तेः । **न च** 'वर्णत्वव्याप्यधर्मावच्छिन्नविषयताकबोधजनकात्कारप्रत्यय'इत्येवार्थः, तथा च वर्णत्वव्याप्यो धर्मः—अत्व-कत्वादिः, तादृशात्वकत्वादिधर्मावच्छिन्नविषयतानिरूपको बोधः—अकारादिबोधः, तज्जनकादकादेः कारप्रत्ययो भवति, ङीप्टाबादिशब्दाश्च ङीप्त्वाद्यवच्छिन्नविषयताकबोधजनकाः—न तु वर्णत्वव्याप्येत्वादिधर्मावच्छिन्नविषयताकबोधजनका इति न तत्रातिव्याप्तिः, वर्णत्वञ्च न वर्णत्वव्याप्यो धर्म इति न वर्णशब्दादपि कारप्रत्ययापत्तिरिति वाच्यम् । स्वस्मिन्नपि स्वव्याप्यत्वस्य वक्तुं शक्यतया वर्णशब्दात्कारप्रत्ययापत्तेर्दुरुद्धरत्वात् ।

न च 'वर्णत्वविशिष्टधर्मावच्छिन्नविषयताकबोधजनकात्कारप्रत्यय'इत्येवार्थः, वैशिष्ट्यञ्च—'स्वभिन्नत्व' 'स्वव्याप्यत्वो'भयसम्बन्धेन, एवञ्च—वर्णत्वस्य स्वभिन्नत्वाभावान्न वर्णत्ववैशिष्ट्यमिति नोक्तदोष इति वाच्यम् । ह्रस्व-दीर्घादिशब्देभ्यः, अणगादिप्रत्याहारशब्देभ्यश्च तदापत्तेः । अणादौ—अण्पदवत्त्वेन, अकारादिणान्तसमुदायघटकत्वाद्युपलक्षिताऽत्वादिना वा धर्मेणावच्छिन्ना या विषयता तादृशविषयताकबोधजनकत्वस्यादिरन्त्येनेतिसूत्राल्लाभात् । एवं ह्रस्वादिपदानां—मात्राकालिकत्वसमानाधिकरणाकारादिचान्तसमुदायघटकत्वोपलक्षितात्वादिधर्मावच्छिन्नविषयताकबोधजनकत्वस्यो**कालोऽजि**तिशास्त्रेण बोधनात् ।

न च—वर्णत्वव्याप्यधर्मावच्छिन्नविषयताकबोधजनकाद्वर्णात्कार'इत्यर्थेन ह्रस्वादिपदानां वर्णत्वाभावान्न दोषलेश इति वाच्यम् । उच्चारणार्थकाकारविशिष्टात्ककारादेः कारप्रत्ययानापत्तेः, समुदायस्य वर्णत्वाभावात् ।

न च यतः कारप्रत्ययश्चिकीर्षितस्तद्घटकवृत्तिवर्णत्वव्याप्यधर्मावच्छिन्नविषयताकबोधतात्पर्येणोच्चरितात्कारप्रत्यय इत्यर्थः, 'अकार'इत्यादौ व्यपदेशिवद्भावेन स्वस्यापि स्वघटकत्वादकारवृत्तिवर्णत्वव्याप्यात्वाद्यवच्छिन्नविषयताकबोधजनकत्वेन कारप्रत्ययोपपत्तिः, एवम्—उच्चारणार्थाकारविशिष्टहादिघटककेवलहादिवृत्ति-वर्णत्वव्याप्यहत्वावच्छिन्नविषयताकबोधजनकत्वस्य उच्चारणार्थकाकारविशिष्टे हकारे सत्त्वात्तत्रापि कारप्रत्ययोपपत्तिरिति वाच्यम् । 'अनुनासिक'पदस्य--स्वघटकनकारवृत्त्यनुनासिकत्वरूपवर्णत्वव्याप्यधर्मावच्छिन्नविषयताकबोधतात्पर्येणोच्चरितत्वात्ततोऽपि कारप्रत्ययापत्तेः । **न च** 'यतः कारप्रत्ययश्चिकीर्षितस्तद्घटकवृत्तिवर्णत्वव्याप्यजात्यवच्छिन्नविषयताकबोधतात्पर्येणोच्चरिता'दित्यर्थः, 'आनुनासिक्यं नाम गुण' इति भाष्योक्तेरानुनासिक्यस्य गुणत्वेन जातित्वाभावान्नोक्तदोष इति वाच्यम्, 'स्वर'पद'गुण'पदादेः—स्वघटकाकारादिवृत्त्यत्वादिजात्यवच्छिन्नविषयताकबोधतात्पर्येणोच्चरिततया कारप्रत्ययापत्तेः । **न च** 'यतः कारप्रत्ययश्चिकीर्षितस्तद्घटकवृत्तिवर्णत्वव्याप्यजात्या साक्षादवच्छिन्ना या विषयता तादृशविषयताकबोधतात्पर्येणोच्चरिता'दित्यर्थेन गुणपदस्य-अकारैकारौकारान्यतमत्वेन साक्षादवच्छिन्नविषयताप्रयोजकत्वेऽपि साक्षात्-अत्वाद्यवच्छिन्नविषयताप्रयोजकत्वविरहान्न दोष इति वाच्यम्, तत्त्वाद्यवच्छिन्नविषयताकबोधतात्पर्येणोच्चरितात्तच्छब्दात्कारप्रत्ययापत्तेरिति चेत्, 'वर्णत्वव्याप्यधर्मविशिष्टात्कारप्रत्यय' इत्यर्थेनादोषात् । वै० 'स्वावच्छिन्नविषयताकबोधतात्पर्येणोच्चरितत्व' 'स्वानाश्रयीभूतो य उच्चारणार्थकाजितरो वर्णः—तदघटितत्वै'तदुभयसम्बन्धेन । वासुदेवबोधतात्पर्यकादशब्दात्तदापत्तिवारणायाद्यः सम्बन्धः । द्वितीयसम्बन्धोपादानादनुस्वारविसर्गादिशब्देभ्यो न तदापत्तिः, तेषां यादृश-यादृश-वर्णत्व-

तत्प्रसादात्पाणिनिना लब्धा ।

श्रुतिमूलकत्वादस्यैवं वेदाङ्गत्वम्, अत्र प्रमाणं—"येनाक्षरसमाम्नायमधिगम्य महेश्वरात् । कृत्स्नं व्याकरणं प्रोक्तम्—" इति शिक्षावचनम् । 'लण्सूत्रे णकारविषयाचार्यप्रवृत्तिर्ज्ञापयति—व्याख्यानत इति'—इत्यादावा'चार्य'पदेन महेश्वरः । अनुबन्धाश्च महे-

---

❀ **अभिनव-चन्द्रिका** ❀

अस्यैव वेदाङ्गत्वमिति । चिन्त्यमिदं,–पाणिनीयव्याकरणोत्पत्तेः प्राग्वेदस्य पञ्चाङ्गत्वापत्तेः,

❀ **चिदस्थिमाला** ❀

यत्तु–**रत्नाकरकृत्**"–'कृते ग्रन्थे' इत्यणा तेन कृतानीत्यर्थः, न चात्र न मानं, 'येनाक्षरे'ति शिक्षावचनस्यैव मानत्वा"दिति, तन्न, तथा सति श्रुतित्वाभावापत्तेः, तद्धनयन्नाह—**महेश्वरादिति** । 'तत आगतः' इत्यण् । नन्विदं बाधितमत आह—**महेश्वरेति** । एवं व्याख्याफलमाह—**एवञ्चैवमिति** । महेश्वरादागतानीति व्याख्याने चेत्यर्थः । तत्प्रसादात्तेन लब्धा एषा चतुर्दशसूत्री–उक्तानुपूर्वीका श्रुतिरेवेति समुदितार्थः । एवञ्चानादित्वेन, अष्टाध्यायीतोऽस्य बाह्यत्वेन तत्त्वात्तद्व्यवहारो नानुपपन्न इति भावः ।

तत्फलमाह–**श्रुतीति** । **अस्यैवेति** । एवं च व्याकरणान्तरनिरासो नान्याङ्गानां, साजात्यात् । अत्र='श्रुतिरियं तत्प्रसादलब्धे'त्युक्तार्थे । अन्यथा—'अधिगम्य' 'महेश्वरा'दित्यनयोरस्वारस्यं स्पष्टमेवेति भावः ।

एतेन'पञ्चम्यन्तोक्तिश्छन्दानुरोधादिति सामान्यस्य विशेषपरत्वे न मान'मित्यपास्तम् । एतेन 'महेश्वरेण प्रोक्तानी'त्यपि व्याख्यानं निरस्तम् । एवं सति प्रसक्तं भाष्यविरोधं परिहरति—**लणिति** । अस्य—णकारेणान्वयः, यद्वा—'इत्यादौ=इति भाष्यादौ–इत्यत्र वैयधिकरण्येनान्वयः । आदिना—'अव्युत्पत्तिपक्षाश्रयेणाचार्येणोपदिष्टो लकारः, वार्त्तिककारस्तु व्युत्पत्तिपक्षाश्रयेण तत्प्रत्याचष्टे—समाने चेती'ति—ऋलृक्सूत्रस्थकैयटस्य, 'एषा ह्याचार्यस्ये'ति भाष्यान्तरस्य च ग्रहणम् । नन्वेवमपि तद्विषयप्रवृत्तित्वं दुर्घटम्, उक्तयुक्तेरत

❀ **ज्योत्स्ना** ❀

ज्ञापयतीति । न च वक्ष्यमाणरीत्या सर्वेषामदृष्टार्थत्वे ज्ञापकत्वासम्भव इति वाच्यं, सम्भवे

❀ **सदाशिवभट्टीयम्** ❀

निर्णयसम्भवादिति । यत्रैतत्प्रतीकमुपादाय–'अनेन शास्त्रप्रारम्भ एव सन्देहोत्पादकशब्दप्रयोगः

❀ **विषमपदविवृतिः** ❀

'आम्नाय'शब्दो दृष्टान्तार्थः । अनुबन्धानां महेश्वरकृतत्वे तत्प्रत्याख्यानासङ्गतिमाशङ्क्य समाधत्ते—

❀ **वरवर्णिनी** ❀

व्याप्यानुनासिकत्वादिधर्मावच्छिन्नविषयताकबोधतात्पर्यकत्वं, तदनाश्रयीभूतोच्चारणार्थकाजितर-ककारादिवर्णघटितत्वात् । 'दिव उ'दित्यादावुदादिभ्यः कारप्रत्ययापत्तिवारणाय–'**अजि**'ति । उच्चारणार्थकाकारघटितहादिशब्देभ्यः कारप्रत्ययस्य सिद्धये च स्वानाश्रये—'उच्चारणार्थाजितरत्वं' विशेषणम्—' इति **प्राहुः** ।

मिश्रास्तु"—वर्णविशिष्टात्कारप्रत्ययो भवति । वै०—'स्वाद्यवयवकत्व' 'स्ववृत्तिश्रावणप्रत्यक्षविषयतावच्छेदकवर्णत्वव्याप्यजात्यवच्छिन्नबोधकत्वेन तात्पर्यविषयत्व' 'स्वविशिष्टाघटितत्वै'तत्त्रितयसम्बन्धेन । वैशिष्ट्ये वैशिष्ट्यञ्च—'स्वेतरत्व' 'स्वसमभिव्याहृताकारेतरत्वो'भयसम्बन्धेन । उच्चारणार्थकाकारघटितहादेः कारप्रत्ययस्योपपत्तये–'**स्वाद्यवयवकत्वे**'ति । वासुदेवतात्पर्यकादशब्दात्तदापत्तिवारणाय द्वितीयः सम्बन्धः । तच्छब्दादेस्तदापत्तिवारणाय च तृतीयः सम्बन्धः—"इत्याहुः ।

---

१. **अस्यैवेति** । एवकारोऽप्यर्थे—अस्यापीत्यर्थः । तेनैतन्निर्माणात्पूर्वं वेदस्य पञ्चाङ्गत्वापत्तिरिति निरस्तम् । अत्र=चतुर्दशसूत्र्या वेदत्वे, महेश्वरात्पाणिनेर्मन्त्रवल्लाभे च ।

श्वरकृता एवेत्यनुपदं स्फुटीभविष्यति । 'अमङणन'मित्यत्र मकारप्रत्याख्यानपरभाष्यन्तु, —'किमदृष्टार्थमेव तदुच्चारणमुत दृष्टार्थमपी'त्येवं विचारपरं, सर्वत्र प्रत्याख्यानमेवम्परमेव, अन्यथाऽङ्गानामपि पारायणे धर्मश्रवणेन तत्र-तत्र पाणिनिन्यासप्रत्याख्यानस्याप्यसङ्गतिः स्यात् । तदुक्तम्—'इको यणची'ति सूत्रे—'सामर्थ्ययोगान्न हि किञ्चिदत्र पश्यामि शास्त्रे यदनर्थकं स्यात्' इति । 'किञ्चिद्—दृष्टाऽदृष्टार्थवत्, किञ्चिच्छुद्राऽदृष्टार्थवत्,

---

❀ अभिनव-चन्द्रिका ❀

कस्य व्याकरणस्य वेदाङ्गत्वमित्यत्र विनिगमनाविरहाच्च । तैत्तिरीयशाखायामैन्द्रव्याकरणस्य प्रशंसा-दर्शनेन तस्यापि वेदमूलकत्वाच्च । **एवं विचारपरमिति** । एवं विचार्याऽदृष्टार्थमेवेत्येवं परमित्यर्थः ।

❀ चिदस्थिमाला ❀

आह—**अनुबन्धाश्चेति** । चस्त्वर्थे, एवेनानादित्वव्यवच्छेदः । नन्वेवं कथं 'मा'ऽनुबन्धप्रत्याख्यानमत आह—**अमेति** । अपिनाऽदृष्टार्थत्वसमुच्चयः । **इत्येवं विचारपरमिति** । इत्येवं विचारपूर्वकादृष्टार्थत्व-प्रतिपादनपरमित्यर्थः । प्रसङ्गादाह—**सर्वत्रेति** । पाणिनीयन्यासेऽपीत्यर्थः । एवम्परमेव=उक्ततात्पर्यकमेव । अन्यथा=उक्ततात्पर्यानङ्गीकारे, **अपिना**–श्रुतिपरिग्रहः । तत्र तत्र=भाष्ये । **अपिना**–'म'प्रत्याख्यानसमुच्चयः । **तदिति** । सर्वत्र प्रत्याख्यानस्य तत्परत्वमित्यर्थः । **सूत्र इति** । 'भाष्ये' इति शेषः । **सामर्थ्ययोगादिति**,–

❀ ज्योत्स्ना ❀

दृष्टफलद्वारैवादृष्टार्थत्वस्य वक्तव्यतया साक्षात्सङ्केतसहकारेण तथात्वाभावेऽप्यर्थापत्तिसहकारेण तथा-त्वस्य—'ज्ञापयती'त्यनेन विवक्षितत्वात् । सामर्थ्ययोगात् = प्रयोजनवत्त्वसद्भावात् । अनर्थकम् = दृष्टादृष्टप्रयोजनशून्यम् । ननु यत्किञ्चित्प्रयोजनसद्भावहेतुकयथाकथञ्चिच्छास्त्रानर्थक्याभावबोधक-'वृद्धि'सूत्रस्थभाष्येण विरोधोऽस्त्येव, 'सामर्थ्ययोगा'दितिवद्धेतूपन्यासाभावेन यथाकथञ्चिदानर्थ-

❀ सदाशिवभट्टीयम् ❀

स्वाकौशलोल्लापकत्वादाचार्येण पराकृत इति संहिताया अविवक्षाया बीजप्रदर्शनमिदं कैयटोपाध्यायानामिति सूचयति, अन्यथा निर्णयादित्येव वदे'दिति **व्याचक्षते** । तत्राचार्यपदेन महेश्वरमभिप्रैति ?, उत पाणिनिं,? नाद्यः, तस्य चतुर्दशसूत्रीप्रारम्भकत्वेपि यावच्छास्त्रप्रारम्भकत्वाभावेन 'शास्त्रे'त्यादिग्रन्थासामञ्जस्यं स्यात्,

❀ विषमपदविवृतिः ❀

अमङणनमिति । प्रत्याख्यानभाष्यस्य दृष्टार्थकत्वखण्डनपरत्वे 'वृद्धि'सूत्रस्थभाष्यासङ्गतिमाशङ्क्य

❀ वरवर्णिनी ❀

अस्मत्पितामहाः पण्डितराज**श्रीस्नेहिरामशास्त्रिणस्तु**–'वर्णत्वव्याप्यधर्मविशिष्टवर्णविशिष्टात्कारप्रत्ययः, वर्णे धर्मवैशिष्ट्यञ्च—'स्वपर्याप्त्यधिकरणत्व,' 'स्वावच्छिन्नविषयताप्रयोजकत्वो'भयसम्बन्धेन । वर्णवैशिष्ट्यञ्च–'स्वघटितत्व,' 'स्वेतरद्–यद्वाचकं–तदघटितत्वो'भयसम्बन्धेन । वाचकता चाऽपर्याप्त्यापीति–न जिह्वामूली-योपध्मानीयबोधकात् ᳵक ᳶप शब्दात्, जिह्वामूलीयोपध्मानीयादिशब्दाद्, विसर्जनीयानुस्वारानुनासिकादि-शब्दाच्च कारप्रत्ययापत्तिः । हकारादौ च हकारमात्रस्यैव वाचकत्वं, तत्रैव शक्तेः, अकारस्तूच्चारणार्थः, आकाङ्क्षाविधया तद्घटिते बोधकतेत्यन्यदेतत् । अजादिपदे तु समुदाय एव वाचकतेति न तत्र कारप्रत्यया-पत्तिः'रित्याहुः । **फलितमिति** । गत्यर्थानां धातूनां प्राप्त्यर्थकत्वस्याप्यभ्युपगमादिति भावः ।

सामर्थ्ययोगादिति । सम्यगर्थः=प्रयोजनं—समर्थः । समर्थ एव सामर्थ्यं, स्वार्थे ष्यञ् । सामर्थ्य-योगात्=सर्वत्रैवादृष्टरूपफलस्य सम्बन्धात् । के चित्तु—'योगस्य सामर्थ्यं–सामर्थ्ययोगः । राजदन्तादिरा-कृतिगणत्वात्साधुः । मम युक्तिबलात्, पाणिनेर्वा—योगबलाच्चेत्यर्थ'इत्याहुः ।

सर्वथाऽनर्थकं न किञ्चि'दिति तदर्थः। 'वृद्धि'सूत्रस्थे—'वर्णेनाप्यनर्थकेन न भवितव्य'-मिति भाष्यग्रन्थेऽनर्थकत्वं बोध्यार्थराहित्यरूपमिति—न निष्प्रयोजनत्वरूपानर्थक्येन तत्र-तत्र प्रत्याख्यानपरभाष्यासङ्गतिः। अत एव 'सोऽयमक्षरसमाम्नायः—पुष्पितः फलितश्चन्द्रतारकवत्प्रतिमण्डितो ब्रह्मराशि'रिति भाष्यमुपादायोक्तं भर्तृहरिणा,—'यथैवेदमव्युच्छिन्नं चन्द्रतारकादि, एवमस्याक्षरसमाम्नायस्य न कश्चिदाधुनिकः कर्त्तास्ति, एवमेव वेदपारम्पर्येण स्मर्यमाण' इति। आधुनिकः=शरीरी। पुष्पितत्वं—तन्मूलकशब्द-शास्त्रद्वारेण, शब्दप्रयोगेण च—फलितत्वम्।

उक्तञ्चैतच्चतुर्दशसूत्रव्याख्यायां नन्दिकेश्वरकृत—काशिकायाम्—

❀ अभिनव-चन्द्रिका ❀

ननु 'न कश्चिदाधुनिकः कर्त्ते'त्युक्त्या-चिरन्तनः कर्त्ताऽस्तीति प्रतीयतेऽत आह—आधुनिकः

❀ चिदस्थिमाला ❀

ल्यब्लोपे पञ्चमी, सामर्थ्ययुक्तं विहायेत्यर्थः। शुद्धदृष्टार्थवतोऽभावात्तदनुल्लेखः। नन्वेवमपि प्रत्याख्यानपर-भाष्यासङ्गतिरेव, **वृद्धि**सूत्रस्थभाष्यविरोधादत आह—**वृद्धीति**। **इतिः**—असङ्गत्यभावे पूर्वस्य हेतुत्व-बोधकः। **निष्प्रयोजनत्वेति**। दृष्टप्रयोजनशून्यत्वेत्यर्थः। **'आनर्थक्येने'**त्यस्य प्रत्याख्यानेऽन्वयः।

अस्योक्तं श्रुतित्वं द्रढयति—**अत एवेति**। वर्णसमाम्नायस्य श्रुतित्वादेवेत्यर्थः। अव्युच्छिन्नं=शरीरि-कर्तृकत्वेनापरिच्छिन्नम्। एवमेव=उक्तानुपूर्वीकमेव। नन्वाधुनिकत्वनिवेशेन चिरन्तनः कर्त्ता लब्धोऽत आह—**शरीरीति**। एतेन वेदवदस्य सकर्तृकत्वे इष्टापत्तिरिति सूचितम्।

अनुबन्धानां सादित्वं प्रतिपादयन्नत्र तत्त्वे मानान्तरमाह—**उक्तमिति**। आत्मतत्त्वं वागाद्यगोचर-मिति—ज्ञापनाय ढक्कानिनादव्याजेन सनकादिसिद्धानुद्धर्त्तुकामो नटराजराजः[1]—(विश्वरूपविलासवैचित्र्य-चमत्कारप्रवीणत्वात्तत्त्वं[2],)—नृत्तसमाप्तौ चतुर्दशवारं स्वात्मतत्त्वं प्रकटयितुं ढक्कां ननाद, यत्तदेत**दु**-

❀ ज्योत्स्ना ❀

क्त्याभावग्रहणे तत्र प्रमाणाभावादत आह—**वृद्धिसूत्रस्थ इति**। 'ननादे'त्यन्तर्भावितण्यर्थो,—

❀ सदाशिवभट्टीयम् ❀

नान्त्यः,—मूलाभावादिति—वक्तव्यम्। **सामर्थ्ययोगादिति**। प्रयोजनसद्भावाद्धेतोरित्यर्थः। **यत्तु**—अत्र ल्यब्लोपे पञ्चमी, सामर्थ्ययुक्तं विहायेत्यर्थ' इति **भट्टाः**। तत्कथं सङ्गच्छते? किञ्च-तस्य किं फलमिति ते एव प्रष्टव्याः। **न निष्प्रयोजनत्वरूपानर्थक्ये इति**। निष्प्रयोजनत्वरूपानर्थक्यसम्भवे सतीत्यर्थः[3], तद्वर्णानर्थक्य-प्रत्याख्यानभाष्ययोर्[4][5] न विरोधोऽभिधेयपरत्वादित्यर्थः, तृतीयान्तत्वे[6] तूभयोरप्यानर्थक्यप्रतिपादकत्वेनासङ्गतौ हेतुत्वानुपपत्तिः। **वेदपारम्पर्येणेति**। परम्परैव पारम्पर्यं, गुरुशिष्यपरम्परेति यावत्, वेदसम्बन्धिनी या सा तया स्मर्यमाणम्। वेदस्य येऽध्यापका ये चाध्येतारस्तैरधीयमानत्वादध्याप्यमानत्वाच्चास्यापि वेदत्वमिति

❀ विषमपदविवृतिः ❀

समाधत्ते—**वृद्धिसूत्रस्थेति**। **अत एवेति**। चतुर्दशसूत्र्या वेदत्वादेवेत्यर्थः। **शरीरीति**। अनेना-ऽशरीरेणेश्वरेण वेदः कृत इति लभ्यते, इदन्तु न युक्तं, तस्य पौरुषेयत्वात्। 'अस्य महतो भूतस्य

---

१. अनेन 'नटराजराज'पदोपादानेन मङ्गलं ग्रन्थादौ चकार नन्दिकेश्वरः। २. तत्त्वं=नटराजराजत्वम्। ३. प्रत्याख्याते सूत्रादौ। ४. 'वृद्धि'सूत्रस्थेन—'वर्णेनाप्यनर्थकेन ने'त्यादिना। ५. 'अनर्थकेन ने'ति भाष्येऽर्थपदस्येति शेषः। ६. 'निष्प्रयोजनत्वरूपानर्थक्ये' इति सप्तम्यन्तः पाठो भट्टमते न तृतीयान्तः।

"नृत्तावसाने नटराजराजो ननाद ढक्कां नवपञ्चवारम् ।
उद्धर्त्तुकामः सनकादिसिद्धानेतद्विमर्शे शिवसूत्रजालम् ॥
अत्र सर्वत्र सूत्रेषु अन्त्यं वर्णचतुर्दशम् ।
धात्वर्थं समुपादिष्टं पाणिन्यादीष्टसिद्धये ॥" इति ।

धात्वर्थं=धातुमूलकशब्दशास्त्रप्रवृत्त्यर्थम् । अत एव–––'अनुबन्धकरणार्थश्च वर्णानामुपदेशः' इत्युक्तं भाष्ये । अत्र 'करण'शब्दप्रयोगेणानुबन्धानां सादित्वं सूचितं, तत्करणञ्चोपदेशकर्तृकर्तृकमेव–––प्रत्यासत्तेः, तेन तद्व्यतिरिक्तस्य सर्वस्यानादित्वं

❀ अभिनव-चन्द्रिका ❀

शरीरीति । वर्णचतुर्दशमिति । वर्णाश्चतुर्दशेत्यर्थे—आर्षं साधुत्वम् । 'अन्त्या वर्णाश्चतुर्दशे'ति क्वचित्पाठः । **धात्वर्थमिति ।** सनकादिपक्षे—'धात्वर्थ'मित्यस्य—क्रियावाचकपदसम्पत्त्यर्थमित्यर्थः । स्पष्टञ्चेदम् "अः=परमात्मा, इम्=मायाम्—आश्रित्य, उः=व्यापकः, ण्=आसीत्—"इत्यादिना

❀ चिदस्थिमाला ❀

द्भुतवर्णात्मकमाद्यम् अतिरहस्यं पाणिनिशिवप्रसादलब्धसूत्रसमूहरूपम्, अहं=नन्दिकेश्वरो–विमर्शे=विचार्य स्फुटीकरोमीत्यर्थः । आर्षस्तङ् । **अत्रेति ।** एषु नादरूपेषु सर्वेषु सूत्रेष्वित्यर्थः । **अन्त्यवर्णेति** पाठः । अन्त्या वर्णाश्चतुर्दश यस्मिन् समूहरूपे तत्=णादिलान्तानुबन्धसमूहरूपम् । अच् समासान्तः । यद्वा–अन्त्यो वर्णो लः–––चतुर्दशत्वसंख्यापूरको यस्मिंस्तत् । पाठान्तरमन्यत्रोक्तम् । समुपादिष्टं=सम्यक्–यथोचितम्, **उप**–––तत्तत्समीपे कृत्वा, **आ**–––समन्तात्कथितम् । एवञ्चानुबन्धाश्च तदा नासन्, तत्र बुद्धया तन्नादः कृत इति ते तैनेव कृता इति भावः । तावन्मात्रेण सनकादीष्टसिद्धावपि पाणिनेस्तदभावादाह–––**पाणिन्यादीति । आदिना** शाकटायनादिः । 'सर्वं नामे'त्युक्तेराह–––**धातुमूलेति ।** धातुमूलका ये शब्दास्तत्प्रतिपादकशास्त्रेत्यर्थः ।

द्वितीयपद्योक्ते भाष्यमपि मानमाह–**अत एवेति ।** अनुबन्धानां सादित्वादेवेत्यर्थः । **अत एवेत्यस्यार्थं** ध्वनयितुमाह–––**अत्रेति ।** उक्तभाष्ये इत्यर्थः । नन्वेवमपि कथं महेश्वरकृतत्वलाभोऽन्यशिष्यकृतत्वस्यापि सम्भवादत आह–––**तत्करणमिति ।** तेन='अनुबन्धकरणार्थश्चे'ति भाष्येण । इदमेव द्रढयति–**अत्रेति ।** उक्तकाशिकायामित्यर्थः । 'तत्र हेतुत्वेनोक्तये'ति शेषः । अस्य=ढक्कानादस्य । तच्च=ब्रह्मोपदेशरूपत्वञ्च ।

❀ ज्योत्स्ना ❀

नादयामासेत्यर्थः । 'विमर्शे'इति सप्तम्यन्तम् । विमर्शे=विचारे कृते एतड्ढक्कानादरूपं वस्तु शिवसूत्रजालं=शिवोपदिष्टचतुर्दशसूत्रीरूपेण परिणतं, 'बभूवे'ति शेषः । न तूत्तमैकवचनं, मृशतेः परस्मैपदित्वात्, इटो ङित्वेन गुणानापत्तेश्च । 'अन्त्यवर्णाश्चतुर्दश, धात्वर्थं समुपादिष्टा'इति पाठः ।

❀ सदाशिवभट्टीयम् ❀

भावः । **अन्त्यवर्णचतुर्दशेति ।** अत्र 'अन्त्या वर्णाश्चतुर्दश यस्मिन् समूहरूपे तत्–णादिलान्तानु-

❀ विषमपदविवृतिः ❀

निःश्वसित'मिति श्रुतेश्च–––अनायासेनोच्चारितार्थकत्वात् । विमर्शे=विचारे क्रियमाणे शिवादागतमेवैतत्सूत्रजालं, न तु ढक्कानिनाद एव । अन्त्या वर्णाश्चतुर्दश यत्र समुदाये इति विग्रहः, 'अजि'ति

१. **अनादित्वं सूचितमिति । परे** तु–'अनुबन्धकरणार्थश्च वर्णानामुपदेश' इत्यत्र भाष्ये 'आदिच उपदेश' इत्यादावविवोच्चारणार्थ एवोपदेशशब्दः,–––एवञ्चानुबन्धातिरिक्तानामपि महेश्वरकृतत्वमेवेत्याहुः ।

सूचितम् । अत्र सनकाद्युद्धरणेच्छयाऽस्य ब्रह्मोपदेशरूपत्वं सूचितं, तच्च श्रुतित्वाभावे न सङ्गच्छते, 'श्रोतव्यः श्रुतिवाक्येभ्यः—' इत्युक्तेः ।

ऋक्तन्त्रव्याकरणे शाकटायनोऽपि—'इदमक्षरच्छन्दो वर्णशः समनुक्रान्तं—यथाऽऽचार्या ऊचुर्ब्रह्मा बृहस्पतये प्रोवाच, बृहस्पतिरिन्द्रायेन्द्रो भरद्वाजाय, भरद्वाज ऋषिभ्यः, ऋषयो ब्राह्मणेभ्यस्तं खल्विममक्षरसमाम्नायमित्याचक्षते, न भुक्त्वा न नक्तं प्रब्रूयाद्ब्रह्मराशिरिति' । 'ब्रह्मराशि'रित्यस्य,—ब्रह्मप्रतिपादको वर्णराशिरित्यर्थः । तत्त्वञ्च नन्दिकेश्वरकृतकाशिकायां स्पष्टम् ।

❀ अभिनव-चन्द्रिका ❀

नन्दिकेश्वरकृतकाशिकायाम् । **उपदेशकर्तृकर्तृकमिति** । महेश्वरकर्तृकमित्यर्थः । **श्रुतित्वाभावे न सङ्गच्छत इति** । चिन्त्यमेतत्—'गीता'दीनां श्रुतित्वाऽभावेन ब्रह्मोपदेशत्वाऽसङ्गत्यापत्तेः । न च

❀ चिदस्थिमाला ❀

श्रुतित्वेति । वर्णसमाम्नायस्येति भावः । अत एव गीताद्युपदेशादेर्न ब्रह्मोपदेशरूपत्वं, तस्य धनञ्जययुद्धप्रवृत्तिमात्रफलकत्वात् । एतेन 'तत्रापि वेदत्वापत्त्या चिन्त्यमिद'मित्यपास्तम् । उक्तमेव द्रढयितुं मानान्तरमाह—**ऋक्तन्त्रेति** । 'आहे'ति शेषः । अक्षरच्छन्दः=नित्यवेदरूपं, समनुक्रान्तं=सम्यगनुक्रमेण दर्शितं, 'तथा मये'ति शेषः । तत्र दृष्टान्तमाह—**यथेति** । सामान्योक्तं विशिष्याह—**ब्रह्मेति** । तथाकथनाऽभावे हेतुमाह—**ब्रह्मेति** । 'यत' इत्यादिः । ननु नायं ब्रह्मराशिः, तस्यैकत्वात्, नापि श्रुतिराशिः, तत्त्वस्य समूहनिष्ठत्वादत आह—**ब्रह्मप्रेति** । तत्त्वञ्च=ब्रह्मप्रतिपादकत्वञ्च, 'अः=परमेश्वरो निर्गुणः, **इं**=मायामाश्रित्य, **उः**=व्यापकः सगुणो, **ण्**=आसी'दित्याद्यर्थकाऽग्रिमतदीयपद्येष्वित्यर्थः । नन्वनुबन्धानां सादित्वेन प्रत्यासत्त्योपदेशकर्तृकर्तृकत्वलाभेऽपि उपदेशेऽन्यकर्तृकत्वमेव कुतः ?, पाणिनिकर्तृकत्वस्यापि सम्भवादत आह—

❀ ज्योत्स्ना ❀

अक्षरसमाम्नायमित्याचक्षत इति । नचेहेतिशब्देन कर्मत्वस्याभिधानात्प्रथमया भाव्यं, 'नारद इत्यबोधि स'इत्यत्र यथेति वाच्यं, निपातानां वाचकत्वपक्षे वाचकसमुच्चयस्यादृष्टत्वात्तथाकल्पनेऽपि,—द्योतकत्वपक्षे तत्समुच्चयस्य सद्भावे बाधकाभावेनादोषात् । 'कीर्तयिष्यन्ति मनुजाः शताक्षीमिति मां ततः, 'वदन्त्यपर्णामिति तां पुराविद' इत्यादिप्रयोगदर्शनादित्याहुः ।

❀ सदाशिवभट्टीयम् ❀

बन्धरूपम् । समासान्तः । सम्यक् यथोचितं **उप** तत्समीपे कृत्वा **आ** समन्तात् कथिता इत्यर्थ—इत्यन्तं—भट्टा आहुः । **अक्षरसमाम्नायमित्याचक्षते इति** । **केचित्तु** 'तं खल्विममक्षरसमाम्नायं ब्रह्मराशि**रिति** हेतोर्न भुक्त्वा न नक्तं प्रब्रूयादिति—ऋषयो ब्राह्मणेभ्य आचक्षते इति शाकटायनोप्याहे'त्यन्वयः,—'**आहे**'**ति** त्वन्मते [चिदस्थिमालाकृतद्भट्टमते]—इवाध्याह्रियेत । 'कीर्तयिष्यन्ती'त्यादौ—'शताक्षीं नुमः' 'अपर्णां नुम' इति वाक्यैकदेशस्य शताक्षीमपर्णामित्यस्यानुकरणान्नानुपपत्तिः । यथाश्रुते 'ऋषय' इत्यस्य व्यवहिते [असमानवचने च-] 'प्रोवाचे'त्यत्रान्वयोऽपि दुर्वच इति—व्याचक्षते ।

❀ विषमपदविवृतिः ❀

योगविभागादच् । **यद्वा**—चतुर्दशानां पूरणाश्चतुर्दशाः, सर्वेषामप्यविशेषेण तथात्वात्, विग्रहस्तु पूर्ववत् । 'अन्त्य'मित्यस्यासमस्तत्वेऽन्त्यभूतश्चतुर्दशवर्णसमुदाय इत्यर्थः । **तत्करणञ्चेति** । **अन्ये** त्वनुबन्धाः पाणिनिकृता एव, '**समुपादिष्ट**'मित्यस्यैवमनुबन्धा आसक्तव्या इति महेश्वरणोपदिष्टमित्यर्थ

अत एव 'वृत्तिसमवायार्थो वर्णानामुपदेशः कर्त्तव्यः—' इति भाष्ये उक्तम्। पाणिने-र्लाघवेन शास्त्रप्रवृत्तिफलको यः समवायो=वर्णानां क्रमेण सन्निवेशस्तदर्थ—इति तदर्थः।

स चाऽणादिप्रत्याहारद्वारा शास्त्रप्रवृत्त्यर्थः। एवञ्चायमुपदेशः पाणिनेरन्यकृत इति स्पष्टमेवोक्तम्। 'मन्त्रोपदेश' इतिवच्चात्रोपदेशपदप्रयोगः,अत एवा'स्य ज्ञाने सर्ववेदपारायणजं पुण्यं फल'मिति भाष्ये उक्तम्। व्याकरणमुपक्रम्य—'वेदानां वेद' इति च्छन्दोगश्रुतिरप्येतत्परैवेति दिक्। तत्प्रयोजनमाह—**सञ्ज्ञार्थानीति**। एतच्चोपपादितम्। सञ्ज्ञाप्रणयनञ्च लाघवेन शास्त्रप्रवृत्त्यर्थमिति बोध्यम्। सञ्ज्ञार्थत्वोपपत्तये आह—**एषामिति**।

❀ अभिनव-चन्द्रिका ❀

'श्रोतव्यः श्रुतिवाक्येभ्य'इति स्मृतिविरोध इति वाच्यं, 'श्रुतिवाक्येभ्य'इत्यस्य—श्रुत्यर्थप्रतिपादकवाक्येभ्य इत्यर्थकरणेनाऽदोषात्।

तदर्थ इति। अन्ये तु—"वृत्तिः='आदिरन्त्येने'ति सूत्रबोधिता शक्तिः, तस्याः-समवायः=

❀ चिदस्थिमाला ❀

अत एवेति। तेषामन्यकर्तृकत्वादेवेत्यर्थः। **वृत्तिपदार्थमाह—शास्त्रप्रवृत्तीति**। अवशिष्टं शेषपूरणं, **'पाणिने'**रित्यस्यात्रैवान्वयः, नित्यसाकाङ्क्षत्वात्। **शस्तदर्थ इति**। सम्बोध्यत्वेनार्थः=प्रयोजनं यस्य स इत्यर्थः। ननु वर्णसमाम्नायस्य साक्षान्न शास्त्रप्रवृत्त्यर्थत्वमत आह—**स चेति**। समवायश्चेत्यर्थः, सति हि अक्षरसमाम्नायेऽणादिसञ्ज्ञाभिर्लाघवेन शास्त्रप्रवृत्ति'**रिग्यण**' इत्यादौ यथासङ्ख्यप्रवृत्तिश्चेति भावः। एतदाशयेनैवोक्तं—**'क्रमस्य सञ्ज्ञाद्वारैवे**'ति। अनेनास्य शास्त्रबहिर्भूतत्वं सूचितम्। अत एव 'मङ्गलार्थं महतः शास्त्रौघस्यादितो वृद्धिशब्दं प्रयुङ्क्ते' इति भाष्यं सङ्गच्छते।

अत एवेत्यस्यार्थं सूचयन्नाह—**एवञ्चेति**। तस्योक्तफलकत्वोक्तौ चेत्यर्थः। **स्पष्टमेवोक्तमिति**। 'पाणिनिशास्त्रप्रवृत्त्यर्थ उपदेश' इत्युक्ते—उपदेशे गुरुकर्तृकतायाः स्वरसतः प्रतीतेरिति भावः। नन्वेवमुपदेशव्यवहारेण तस्य चाज्ञातज्ञापनविषयकत्वेन वर्णानामपि सादित्वापत्त्या उक्तार्थासङ्गतिरेवात आह—**मन्त्रोपेति**। अत्र--न तु सर्वत्र, तथा च सिद्धोच्चारणेऽपि तद्व्यवहारान्न तदसङ्गतिः। अत एव—"अथ क उपदेशः? उच्चारणम्—" इत्याद्येव भाष्ये उक्तं, न तु आद्योच्चारणमिति। तस्य च—ढक्कानिनादेनाभिव्यक्तिरित्यर्थः। एतेनो'पदेशपदप्रयोगादनुबन्धवद्वर्णानामपि सादित्वमित्यर्धजरतीयं हेय'मित्यपास्तम्। ब्रह्मराशित्वं द्रढयति—**अत एवेति**। ब्रह्मप्रतिपादकत्वादेवेत्यर्थः। **एतदिति**। नान्यपरा, नापि पाणिनीयपरेति भावः।

दिगर्थस्तु प्रागुक्त एव। **तत्प्रयोजनमिति**। साक्षाद्वर्णसमाम्नायप्रयोजनमित्यर्थः। अत एव वक्ष्यति--'सञ्ज्ञाप्रणयनञ्चे'ति। एतेन 'लघ्वर्थत्वादिकं भाष्योक्तमप्यानुषङ्गिकत्वान्नोक्त' मिति **रत्नाकरोक्त**मपास्तं, तस्य साक्षादफलत्वात्, अन्यथा लोकप्रसिद्धमातृकापाठेनैव कलादिदोषरहितवर्णस्वरूपज्ञानसिद्धेः,—कस्य चित्साधु-

❀ विषमपदविवृतिः ❀

इत्याहुः। **ननूपदेशपदस्यादेच** उपदेश इत्यादौ पाणिनीयापूर्वोच्चारणार्थकत्वमिव महेश्वरीयापूर्वोच्चारणार्थकत्वं, तथा च तन्निमित्तत्वं प्राप्तमित्यत आह,—**मन्त्रोपदेशवदिति**। नहि मन्त्र उपदेष्टृनिर्मित इति भावः। **अत एवेति**। महेश्वरकर्तृकत्वाभावादेवेत्यर्थः। इदं चिन्त्यं—, श्रीबादरायणकर्तृकस्यापि भारतादेः सर्ववेदपारायणपुण्यफलकत्वोक्तेः।

ननु हल्प्रत्याहारसिद्धेः प्राक् 'उपदेशेऽ'जित्यस्य वाक्यार्थबोधाभावेऽप्यण्प्रत्याहारकाले 'ल'-णित्यकारस्येत्सञ्ज्ञालोपाभ्यामपहारसम्भवेनाक्षरसमाम्नायिकानामेव ग्राहकशास्त्रेऽण्पदेन ग्रहणेन

अकारश्चेति। तेन 'र'प्रत्याहारसिद्धिः। अनन्त्यत्वात्पृथगुक्तिः। इदं तुल्यास्यसूत्रस्थकैयटानुरोधेन। परे त्वस्यानुनासिकत्वे—'अतो लृे'ति सूत्रे पाणिनिर्लकारं नोच्चारयेत्, प्रत्याहारेणैव निर्वाहात्। किञ्चास्येत्सञ्ज्ञकत्वे बहुषु यणपदघटितसूत्रेष्वर्द्धमात्रालाघवानुरो-

❀ अभिनव-चन्द्रिका ❀

सम्यक् ज्ञानं, तत्—अर्थः=प्रयोजनं यस्येत्यर्थः—"इत्याहुः। ननु दीक्षितस्य परमगुरुत्वेन तद्ग्रन्थखण्डनमनुचितमित्यत आह—**कैयटानुरोधेनेति**।

लकारं नोच्चारयेदिति। यत्तु 'अतो लृे'ति सूत्रे लकारोच्चारणेन रप्रत्याहारोऽनित्यः, तेन 'रषाभ्यां' 'रदाभ्या'मित्यादौ न लग्रहणमिति, तन्न, 'रप्रत्याहारोऽनित्य'इत्यस्य-यदि 'र'निष्ठा रेफलकारोभयनिरूपिता शक्तिरनित्येत्युच्यते, तदा--वैयाकरणानां मते शब्दानां नित्यत्वेन तन्निष्ठस्वरूपसम्बन्धरूपबोधजनकतारूपशक्तेरपि नित्यत्वेन तदनित्यत्वस्य वक्तुमशक्यत्वात्। शक्तिज्ञानाधीनोपस्थित्यादीनां द्विक्षणावस्थायित्वेन तदनित्यत्वकथनस्याप्यनुपयुक्तत्वेन--'रप्रत्याहारोऽनित्य' इत्यस्य-'तन्निष्ठशक्तिज्ञानादिकमनित्य'मित्यर्थस्य वक्तुमशक्यत्वाच्च। न च'रप्रत्याहारोऽनित्य'-इत्यस्य--सर्वत्र रपदं'र-ल' एतदुभयतात्पर्येण नोच्चरितमित्यर्थ इति न दोष इति वाच्यं,'क्वोभयतात्पर्येणोच्चरितं? क्व च ने'त्यस्य व्याख्यानत एव निर्णेयत्वेन—'उरण्रपर' इत्यत्र, 'अतो लृे'त्यत्र च—रेफपदं रेफलकारोभयतात्पर्येणोच्चरितमन्यत्र नेति व्याख्यातुं शक्यत्वेन पुनरपि लकारोच्चारणवैयर्थ्यापत्तेः। **यप्रत्याहारेणैव व्यवहरेदिति**। न च 'पर्यायपदानां लाघवगौरवचर्चा नाद्रियते'

❀ चिदस्थिमाला ❀

त्वाप्रतिपादनाच्चादृष्टार्थत्वे मानाभावाच्च वैयर्थ्यापत्तिरिति भावः। तथा च मूले (सञ्ज्ञायै इमानि सञ्ज्ञार्थानीत्येवम्-) चतुर्थीसमासो बोध्यः। ननु सञ्ज्ञाया अत्रानुपादानात्कथं तदर्थत्वमत आह—**एतच्चोपेति**। 'एषां क्रमबोधकत्वेपीत्यादिने'ति शेषः। 'आदिरन्त्येने'ति सूत्रेण क्रियमाणाऽणादिसञ्ज्ञानां सन्निवेशविशेषं विना दुष्करत्वादिति भावः। सञ्ज्ञाफलमाह—**सञ्ज्ञेति**। 'वृद्धिरादै'जित्यादिवृत्त्याद्युक्तक्रमं विहायैतत्कथने सङ्गतिमाह—**सञ्ज्ञार्थेति**। **तेन**=अस्येत्त्वेन।

'इद'मित्यादिना सूचितामरुचिमाह—**'परे' त्वित्याद्य।हु**रित्यन्तेन। अस्य=लणित्यकारस्य, एवमग्रेऽपि। **लृेतीति**—अनुस्वारं विहाय सूत्रैकदेशानुकरणम्। **प्रत्येति**। रप्रत्याहारेणैवेत्यर्थः, अर्धमात्रालाघवादिति भावः। दोषान्तरमाह—**किञ्चेति**। अनुनासिकत्वफलमाह—**अस्येत्सञ्ज्ञेति**। **यणिति**। तत्पदघटितेत्यर्थः। **बहुष्विति**। यत्र यत्र लाघवसम्भवस्तेषु, न तु सर्वत्रेत्यर्थः। दोषान्तरमाह--**किञ्चेति**। 'अस्येत्सञ्ज्ञकत्वे' इत्यस्यानुषङ्गः। अस्य '**अव्यापकत्वापत्ति**'रित्यत्रान्वयः। '**ग्रहणाभावे**' इत्यस्य

❀ ज्योत्स्ना ❀

नन्वतोलृेत्यत्र लकारोच्चारणमजनुबन्धप्रत्याहाराऽनित्यत्वार्थमतो 'रात्सस्य' 'योऽची' त्यादौ न प्रत्याहारग्रहणम्। एवञ्चे'को यणची'त्यादौ णकारोच्चारणमपि नानर्थकमित्यस्वरसादाह—**किञ्चानु-**

❀ सदाशिवभट्टीयम् ❀

परे त्विति। केचित्तु—ननु ज्ञानलाघवाभावान्न तद्वैयर्थ्यमत आह—**किञ्चास्येति**। अत्र हि प्रत्याहारज्ञानस्य तवाऽप्यावश्यकत्वान्न तल्लाघवमिति भावः। **लाघवेति**। 'यण्वत' इत्यत्र 'यवतः' 'इको यणि'

१. **कैयटानुरोधेनेति**। 'तुल्यास्य'सूत्रे-ऋलृवर्णयोः सावर्ण्यस्वीकारे-तवल्कार इत्यादौ रपरत्वमेव स्यादिति शङ्कायां 'लपरत्वं वक्ष्यामी'ति भाष्यवार्त्तिककारैरुक्तम्। 'लपरत्वं वक्ष्यामी'त्यस्य-'रप्रत्याहाररूपेण-व्याख्यास्यामी'ति कैयटोऽर्थमाह। एवञ्च रप्रत्याहारः कैयटाभिमत इति लब्धम्।

ॐ वरवर्णिनी ॐ

लकारं नोच्चारयेदिति । [२४ पृष्ठे] **परे** तु,–ननु-'अतो ल्रे'तिसूत्रे लकारोच्चारणेन रप्रत्याहारोऽनित्यस्तेन 'रदाभ्यां' 'रषाभ्यां' 'वनो र च' 'रात्सस्ये'त्यादौ न रप्रत्याहारग्रहणमिति चेन्न, वैयाकरणानां मते शब्दस्य नित्यतया रपदाऽनित्यत्वस्य वक्तुमशक्यत्वात् । **न च** रपदस्य नित्यत्वेऽपि–रपदनिष्ठा रेफलकारोभयनिरूपिता शक्तिरनित्येति वाच्यम्, शक्ततावच्छेदकीभूतायाः–'रे'त्यानुपूर्व्याः सत्त्वे–'शक्तिर्नास्ती'त्यस्य वक्तुमशक्यत्वात् । 'सिद्धे शब्दार्थसम्बन्धे'इति पस्पशाह्निकस्थभाष्येण शक्त्याख्यस्य शब्दार्थयोः सम्बन्धस्य नित्यताया एव स्वीकाराच्च । **न च** शक्तेर्नित्यत्वेऽपि—'अतो ल्रे'त्यत्र लकारोच्चारणेन––रप्रत्याहारजन्यो रेफलकारोभयविषयको बोध एवाऽनित्य इति वाच्यम्, तादृशबोधसामग्रीसत्त्वे बोधस्य-वचनसहस्रेणापि निरोद्धुमशक्यत्वात् । **न च**—'रपदं सर्वत्र 'र-ल'तात्पर्येण पाणिनिना नोच्चरित'मिति पाणिनितात्पर्यस्यैवानित्यत्वं तेन कल्प्यते इति वाच्यम्, 'अतो ल्रे'त्यत्र लकारोच्चारणं विनापि—व्याख्यानादिनैव रेफलकारोभयविषयकपाणिनितात्पर्यानित्यत्वस्य निर्णयसम्भवेन—स्वतात्पर्यस्यानित्यत्वबोधनाय—पाणिनेर्लकारोच्चारणरूपोपायान्तरस्यानपेक्षणाल्लकारोच्चारणस्य स्वांशेऽचारितार्थ्यात् । अन्यथा—'इणो य'णित्यादावपि-'इण्प्रत्याहारे, यकारोत्तरे णकारे [यण्प्रत्याहारे] च मे तात्पर्यं नास्ति' 'इको यणची'त्यादौ च तत्र मम तात्पर्यमस्ती'ति बोधनायाप्युपायान्तरस्य करणीयत्वं स्यात् । शब्देन्दुशेखर**जटाजूटे**—वाग्देवतावताराः **श्रीबालशास्त्रि**चरणास्तु—'रषाभ्यां' 'रहाभ्या'मित्यादौ रफोत्तराकारस्यानुनासिकत्वाभावादेव न प्रत्याहार—इत्यस्य वक्तुं शक्यतया रप्रत्याहाराऽनित्यत्वे फलाभावात्,—'अतो ल्रे'त्यत्र लकारोच्चारणवैयर्थ्यरूपो दोषो रप्रत्याहारस्वीकारे वज्रलेपायमान एव नारुचिग्रस्त'इत्याहुः । **एतेन** "––यथा लोके नानार्थहर्यादिस्थले—चैत्रोच्चरितहरिपदधर्मिकात्—चैत्रोच्चरिततद्व्यक्तित्वधर्मितावच्छेदककात्—'चैत्रोच्चरितं हरिपदं विष्णुत्वावच्छिन्नविषयकबोधं जनय'त्वित्याकारकात्तात्पर्यज्ञानाद्विष्णुत्वावच्छिन्नविषयको बोधः । एवं–मैत्रोच्चरितहरिपदधर्मिकान्मैत्रोच्चरिततद्व्यक्तित्वधर्मितावच्छेदककात्,—'मैत्रोच्चरितं हरिपदमिन्द्रत्वावच्छिन्नविषयकबोधंजनय'त्वित्याकारकात्तात्पर्यज्ञानादिन्द्रविषयको बोधः, न तु हरित्वरूपसामान्यधर्मितावच्छेदककं तात्पर्यज्ञानं तत्र शाब्दबोधप्रयोजकं, तथा सतीन्द्रतात्पर्येणोच्चरिताद्धरिपदादपि मर्कटादिबोधापत्तेः, नैवं शास्त्रे, किन्तु 'वृद्धिरादै'जित्यादिसूत्रं—वृद्धिपदत्वाद्यवच्छेदेनैवादैज्विषयकबोधजनकत्वप्रकारकं तात्पर्यं ग्राहयति । तदेवम्—अष्टाध्यायीसूत्रघटक'र'पदत्वावच्छेदे**नादिरन्त्येने**तिशास्त्रेण प्राप्तो यो र-लोभयविषयकबोधजनकत्वप्रकारकस्तात्पर्यग्रहः सो'ऽतो ल्रे'त्यत्र लकारोच्चारणा'दुरण्रपर'इत्येतद्घटकरपदधर्मिकतद्व्यक्तित्वावच्छेदेनैवावसीयते–इत्येतावतैव 'रप्रत्याहारोऽनित्य' इत्युच्यते—" इति केन चिदुक्तं परास्तम् । तथा ज्ञापनेऽपि फलाभावात् ।

यण्पदघटितेति । [२४ पृष्ठे] 'लण्सूत्रे णकारानुबन्धो न कार्य' इति यावत् । **श्रीबालशास्त्रि**चरणास्तु,–केचित्तु यण्पद-यपदयोः पर्यायतया-पर्यायशब्दानां लाघवगौरवचर्चानादरात्-**'अर्धमात्रालाघवेने**'तिशेखरग्रन्थोऽयुक्त एव । पर्यायत्वञ्च स्वविशिष्टत्वं, वै० 'स्ववाच्यतावच्छेदकरूपावच्छिन्नवाचकत्व' 'स्वनिष्ठशक्ततावच्छेदकरूपभिन्नरूपावच्छिन्नत्वै'तदुभयसम्बन्धेनेति नेदं लाघवं रप्रत्याहाराभावबोधकमिति, तन्न,—'यवरलै'-तच्चतुष्टयनिरूपिता वाचकता—यण्पदे यपदे च प्रसक्ता,—तत्र लाघवाद्यपद एव तन्निरूपितवाचकत्वं स्वीकृत्य यपदेनैव व्यवहरणीयं, न यण्पदेन, यण्पदशक्त्यकल्पनेन लाघवात्, अत एव—'एकाचो बश'-इत्यत्र 'झष् झषन्तस्ये'ति वक्तुं युक्त'मिति शेखरः स्वरसतः सङ्गच्छते । तथा च-'अर्धमात्रालाघवानुरोधेने'-त्यस्य–'लण्सूत्रे णकारो न करणीयः, अकारस्याकारेण प्रत्याहारसिद्धे'रित्यर्थो बोध्यः । यत्तु–लण्सूत्रे णकाराऽभावे—'हयवरलट्'इत्येवं त्रयोदशैव सूत्राणि करणीयानीति शेखराभिप्रायमाहुः, तन्न । अट्प्रत्याहारे लकार-

१. "वैयाकरणनये शक्तिर्बोधजनकत्वस्वरूपा, जनकत्वञ्च स्वरूपयोग्यतारूपमिति तस्याः सर्वदैव सत्त्वम् । 'ईश्वरेच्छा रूपा शक्ति'रिति वादिनां तार्किकाणां मतेपीश्वरेच्छाया नित्यतया शक्तिर्नित्ये"ति शब्देन्दुशेखरलघुजटाजूटे—**वैयाकरणकेसरिणः ।**

धेन 'य'प्रत्याहारेणैव व्यवहरेत् । किञ्चानुबन्धानामच्प्रत्याहारे ग्रहणाभावे—'आचाराद-प्रधानत्वाल्लोपश्च बलवत्तर' इति भाष्योक्तस्य—तृतीयहेतोरव्यापकत्वापत्तिः,

❀ अभिनव-चन्द्रिका ❀

इतीदमसङ्गतमिति वाच्यं, लण्सूत्रे णकारोच्चारणं न कर्त्तव्यमिति ग्रन्थतात्पर्येण—यण्पदयपदयोः पर्यायत्वाभावेन परिभाषाया अप्रवृत्त्या ग्रन्थसङ्गतेः ।

अव्यापकत्वापत्तिरिति । न च हेतोरव्यापकत्वं गुणः, व्यापकत्वे हि हेतुर्व्यभिचारी स्यादिति

❀ चिदस्थिमाला ❀

'भाष्योक्त'त्यत्रान्वयः । **इति**=इत्यत्र । तृतीयहेतोः='लोपस्य बलवत्त्वा'दिति हेतोः । **अव्यापकेति** ।

❀ ज्योत्स्ना ❀

बन्धानामिति । 'प्रत्याहारे ग्रहणाभावे'इति पाठः । क्वचि'दच्प्रत्याहारे'इति पठ्यते, तत्र, हल्प्रत्याहारे

❀ सदाशिवभट्टीयम् ❀

त्यादौ'य इकोचि' 'इणो यण्' इत्यादौ–'य इणः' 'यणादिपर'मित्यादौ च 'यादिपर'मित्यादिन्यासेन लाघवमिति भावः । यत्र तु 'इग्यणः'. 'यणो मय' इत्यादौ 'यस्ये'त्यादिन्यासे न लाघवं, तत्र तत्रास्तु णकारेणैव, अत एव 'बहुष्वि'त्युक्तं, न सर्वेषु इति । एतेन–'प्रत्युत गौरव'मित्यपास्तम् ।ननु णोच्चारणम्–'अयोपधात्' 'योऽचि' 'ङेर्य' इत्यादौ दोषाभावाय–यकारेणाकारेण न प्रत्याहार'—इति ज्ञापनार्थं, यवणोः पर्यायत्वाल्लाघवाभावश्चेत्यत आह—**किञ्चानुबन्धेति । हेतोरव्यापकत्वेति** । 'अनुबन्धाः अच्प्रत्याहार-

❀ वरवर्णिनी ❀

ग्रहणापत्तौ 'सरलाना'मित्यादौ णत्वापत्तेः । यत्तु—'अर्धमात्रालाघवानुरोधेने'त्यस्य—'ल' इति पृथक्सूत्रे णकारो न करणीय इति तात्पर्यमाहुस्तदपि न । अणुदित्सूत्रेऽण्पदस्थाने—'आ' इति करणे, इण्पदघटितेषु 'य' इति करणे च—'आ सर्वनाम्नः' 'योऽची'त्यादाविव—वर्णग्रहणं, प्रत्याहारग्रहणं वेति सन्देहापत्तेः, तदपनयनाय व्याख्यानान्तराश्रयणे च, लाघवानवकाशादिति—" शब्देन्दुशेखर**जटाजूटे प्राहुः** ।

यत्तु श्रीजयदेव**मिश्राः**—" इण्पदस्थाने'—'इ-अ' पदम्, अण्पदस्थाने—'अ-अ'पदं प्रयोज्यम्—" इति शेखराशयमाविश्चक्रुः, तन्नास्मभ्यं रोचते,—'अ अ' इत्यादौ—प्रत्याहारग्रहणापत्तेः, व्याख्यानादिना तत्र निर्णयस्वीकारेऽपि 'इ-अ'इत्यादौ यणापत्तेः, 'अ-अ'इत्यादौ .सवर्णदीर्घापत्तेश्च । तत्रापि सौत्रत्वाया-श्रयणे तु महदेव गौरवम्, अतः—**श्रीबालशास्त्रि**चरणोक्तमेव शेखरतात्पर्यं युक्तमिति—**गौडाः** ।

आचारादिति । 'तृषिमृषिकृषे'रित्यादौ ककारादौ परतो यणाद्यकरणरूपात् । अस्य च कालिकेन हेतुना । वस्तुतस्तु मृषेरिकारे पाणिन्युच्चरितत्वेन साधुत्वमनुमाय–'साधुत्वविशिष्ट-यण्बोधकशास्त्रविषयत्व–वि-शिष्टेकत्व–विशिष्टोत्तरत्व'रूपहेतुना कृषेः ककारे **पक्षे**–ऋलृक्सूत्रघटकककाराबोध्यत्वमनुमीयते,तादृशानुमित्यु-त्तरं 'तुल्यवित्तिवेद्यत्व'न्यायेन 'ऋलृक्'घटके ककारे तादृशलक्ष्यस्थककाराबोधकत्वं निश्चीयते । ततश्च तादृशबोध-कत्वाभाव**हेतुका**ऽनुबन्ध**पक्षक**–स्ववृत्तिश्रावणप्रत्यक्ष-विषयतावच्छेदकधर्मावच्छिन्नबोधकत्वाभाव**साध्य**कानुमि-तिरुत्पद्यते । प्राधान्यञ्च—बोधकत्वेन शङ्करतात्पर्यविषयत्वरूपम् । तदेवम्—'अनुबन्धाः प्रत्याहारघटकत्वा-भाववन्तः, बोधकत्वेन महेश्वरतात्पर्यविषयत्वाभावात्, यत्तत्त्वेन तात्पर्यविषयत्वाभाववन्न तत्तद्घटकम्' इति व्यतिरेकानुमितिरप्रधानत्वहेतुका बोध्या । अनुमितेः पूर्वं निश्चितसाध्यवतः सपक्षस्यानिर्णयेनान्वयानुमिते-रसम्भवात् । यद्वा—घटपदे तादृशहेतोः सम्भवेन प्रत्याहारघटकत्वाभावात्तत्रान्वयव्याप्तिरपि सम्भवतीत्य-न्वयानुमितिरपि बोध्येति—**जटाजूटे—श्रीबालशास्त्रि**चरणाः । विस्तरस्तु शब्देन्दुशेखरा**भिनवराज-लक्ष्म्यामनुसन्धेयः** । **लोपश्चेति** । चो हेतौ, बलवत्तरलोपशास्त्रीयोद्देश्यतावच्छेदकाक्रान्तत्वादित्यर्थः ।

अव्यापकत्वापत्तिरिति । ननु साध्यापेक्षया हेतोरव्यापकत्वमिष्टमेव, काऽऽपत्तिः ? । अत एव'धूम-

१. ननु णकारोच्चारणमकारेण सह रप्रत्याहार एव भवति न यणादिरितिज्ञापनार्थम्, तेन'ङेर्यः'

❀ वरवर्णिनी ❀

वान्वह्ने'रित्यादौ नानुमितिरिति चेदत्र वाग्देवतावताराः श्री'**विश्वनाथा**'परनामधेयाः श्री**बालशास्त्रि**चरणाः— 'पक्षतावच्छेदकावच्छेदेनानुमितित्वावच्छिन्नं प्रति पक्षतावच्छेदकव्यापकत्वं हेतोरपेक्षित'मिति नियमस्तथा-चात्रानुबन्धत्वावच्छेदेन साध्यतया हेतोरव्यापकत्वापत्तिर्दोषः, इयमेवापत्तिस्तार्किकै'र्भागासिद्धि'रित्युच्यते। तथा च प्रयोगः—'अनुबन्धाः बोध्यत्वाभाववन्तः, लोपशास्त्रीयोद्देश्यतावच्छेदकाक्रान्तत्वात्, यन्नैवं तन्नैवं, यथा—'अइउ'ण्घटकोऽकारः, नेमे तथा, तस्माद्बोध्यत्वाभाववन्तः।''

अथ चतुर्दशसूत्रीघटकानुबन्धत्वावच्छेदेनानुमितिस्वीकारे—'अइउ'ण्सूत्रघटके णकारे 'हलन्त्य'सूत्र-प्रवृत्तये हल्प्रत्याहारजन्यबोधविषयत्वस्यैव तत्र स्वीकरणीयतया व्यभिचारः, हेतोर्लोपशास्त्रीयोद्देश्यता-वच्छेदकाक्रान्तत्वस्य तत्र णकारे सत्त्वेपि—साध्यस्य तादृशप्रत्याहारजन्यबोधविषयत्वाभावस्यासत्त्वात्। हेतोस्तत्रा-स्वीकारेतु णकारस्याण्प्रत्याहारे ग्रहणापत्तिरेव दोषः। **न च** 'स्वघटितसमुदायावच्छिन्न—बोध्यता—निरूपित-बोधकतावत्प्रत्याहार-जन्यबोध-विषयत्वाभाव' एव साध्यः। स्वम्=अनुबन्धः, अवच्छेदकता च घटकत्वसम्बन्धा-वच्छिन्ना, अवच्छिन्नत्वञ्च घटकत्वस्वरूपमिति—अइउण्घटकणकारे—[स्वं णकारः, तद्घटितः समुदायः— 'अ-इ-उण्' इत्यादिरकारादिश्चान्तः समुदायः, तद्घटका अकारादयः, तन्निष्ठबोध्यतानिरूपिता या बोधकता, तद्वान्प्रत्याहारः—अणादिप्रत्याहारः,] तज्जन्यबोधविषयत्वाभावस्य साध्यस्य सत्त्वान्न व्यभिचारः। हल्प्रत्याहारे च स्वघटितसमुदायावच्छिन्नबोध्यतानिरूपितबोधकतावत्त्वाभावेन हल्प्रत्याहारजन्यबोधविषयत्वस्य तत्र पक्षे सत्त्वेपि न दोष इति वाच्यम्। लणो णकारे स्वघटितहकारादिलान्तसमुदायघटकबोध्यतानिरूपितबोधकता-वद्धल्प्रत्यारजन्यबोधविषयत्वस्य सत्त्वेन व्यभिचारस्य दुरुद्धरत्वात्।

न च 'स्वाघटितसमुदायावच्छिन्नबोधकप्रत्याहारजन्यबोधविषयत्वाभाव' एव साध्यः। प्रकृते स्वं-णकारस्तदघटितः समुदायः—'एओङ्ऐऔ'जित्यादिः, तद्घटकबोधकैङादिप्रत्याहारजन्यबोधविषयत्वा-भावो लणो णकारे। हकारादिलान्तसमुदायस्तु स्वेन णकारेण घटित एवेति न दोष इति वाच्यं, यण्प्रत्या-हारस्यापि स्वेन णकारेण घटिततया—लणो णकारे हल्प्रत्याहारजन्यबोधविषयत्ववत्—यण्प्रत्याहारजन्यबोध-विषयत्वस्याप्यापत्तेः। 'अइउ'ण्घटके णकारे स्वाघटितसमुदायावच्छिन्नबोधकझलादिप्रत्याहारजन्यबोधविषय-त्वाभावेपि—अण्प्रत्याहारजन्यबोधविषयत्वस्याप्यापत्तेश्चेति चेत्, उच्यते—स्वविशिष्टसमुदायावच्छिन्नबोध्य-त्वाभावस्य साध्यत्वेनादोषात्। वै० 'स्वघटितत्व' 'स्वविशिष्टाघटितत्वो'भयसम्बन्धेन। वैशिष्ट्ये वैशिष्ट्यञ्च— 'स्ववृत्तिरूपवत्त्व' 'स्वभिन्नत्वै'तदुभयसम्बन्धेन। स्वम्—अइउणिति णकारः, तद्घटितत्वमकारादिचान्त-समुदायेऽस्ति, एवं—स्वविशिष्टो-ञमङणनम्घटको णकारस्तदघटितत्वमपि अकारादिचान्तसमुदायेऽस्तीति निरुक्तोभयसम्बन्धेन—स्वविशिष्टो यः-अकारादिचान्तसमुदायस्तद्घटकबोध्यत्वाभावस्य णकारे सत्त्वान्न व्यभि-चारः। एवं स्वम्—अइउण्घटको णकारस्तद्भिन्नः, स्ववृत्तिरूपवांश्च—ञमङणनम्घटको णकारः, तद्घटितत्व-स्यैव हलादिप्रत्याहारे सत्त्वेन स्वविशिष्टाघटितत्वस्य हादिलान्तसमुदायेऽसत्त्वात्स्वविशिष्टसमुदायावच्छिन्नत्वस्य णकारेऽभावात्तद्बोध्यत्वाभावासिद्ध्या हल्प्रत्याहारजन्यबोधविषयत्वेऽपि न तत्र अइउण्घटकणकारादौ व्यभिचारः।

'यस्य हलः' 'योची'त्यादौ न प्रत्याहारग्रहणम्। किञ्च—'यणो मयो द्वे वाच्ये' इत्यादौ णकारेण, 'इको-यणची'त्यादावकारेण च प्रत्याहार आश्रयणीय इति कल्पने गौरवं प्रसज्यते। 'योची'त्यादौ यवर्णमा-त्रस्यैव ग्रहणं न प्रत्याहारस्येत्यादौ व्याख्यानाश्रयणे महदेव गौरवमतो रप्रत्याहाराश्रयणे न किञ्चिद्बाधकमिति **कैयटा**नुसारिणस्तदेतदरुचेराह—**किञ्चानुबन्धाना**मिति।

१. अनुबन्धत्वसमानाधिकरणतत्तदनुबन्धव्यक्तित्वावच्छेदेनानुमितौ गौरवाच्चतुर्दशसूत्रीघटकानुबन्ध-त्वावच्छेदेनानुमितिराश्रयणीयतया लण्सूत्राकारस्यानुनासिकत्वे इत्सञ्ज्ञायोग्यत्वरूपानुबन्धत्वरूपपक्षतावच्छे-दकाक्रान्तत्वेपि हेतोस्तत्राभावेन पक्षतावच्छेदकावच्छिन्ने हेतोरभावात्—भागासिद्धिः स्पष्टैवेति भावः।

❀ वरवर्णिनी ❀

एवमश्प्रत्याहारे णकारग्रहणसिद्धिः। 'स्वविशिष्टाघटितत्व'मित्यत्र स्वविशिष्टो वर्णश्च बोधकत्वेन निश्चितो ग्राह्यः, तेनेण्प्रत्याहारे न णकारग्रहणापत्तिः। अन्यथा-स्वम्-अइउण्घटको णकारस्तद्भिन्नत्वं तद्वृत्तिरूपवत्त्वञ्च लण्-घटकणकारे—इत्युभयसम्बन्धेन स्वविशिष्टो—लण्घटको णकारस्तदघटितत्वस्येकारादिणान्तसमुदायेऽभावेन स्वविशिष्टसमुदायावच्छिन्नत्वस्य णकारेऽभावादिण्बोध्यत्वाभावस्य साध्यत्वाभावेनेण्प्रत्याहारे णग्रहणं दुर्वारमेव। तथाविवक्षणे च—लणइउण्घटकणकारयोर्बोधकत्वेन निश्चयस्याभावादन्यतरणकारस्यान्यतरणकारे वैशिष्ट्याभावान्न दोषः।

केचित्तु—'स्वविशिष्टवर्णाघटितसमुदायावच्छिन्नबोधकप्रत्याहारजन्यबोधविषयत्वाभाववत्त्व'मेव साध्यं, वैशिष्ट्यञ्च-'स्वेतरत्व','स्ववृत्तिश्रावणप्रत्यक्षविषयतावच्छेदकधर्मवत्त्वो'भयसम्बन्धेन। अइउण्घटकणकारेऽइउण्घटकणकारनिष्पन्नणप्रत्याहारजन्यबोधविषयत्वापत्तिनिरासायाद्यः सम्बन्धः। अइउण्घटकणकारे हल्प्रत्याहारजन्य-बोधविषयत्वस्य सत्त्वाद्व्यभिचारवारणाय द्वितीयः सम्बन्धः। लणो णकारे इण्प्रत्याहारजन्यबोधविषयत्वस्य निरासाय—द्वितीयसम्बन्धे अनुबन्धत्वानाश्रयत्वस्यापि निवेशान्न दोषलेशोऽपि। तदेवं—'स्ववृत्तिश्रावण-प्रत्यक्षविषयतावच्छेदकधर्मसमानाधिकरणानुबन्धत्वानाश्रयत्व'सम्बन्धेन स्वविशिष्टो यो वर्णस्तदघटित-समुदाये'त्याद्युक्त्यैव सामञ्जस्यात्स्वभिन्नत्वं न देयमेवेत्याहुः। तदप्यसदुक्तानुवादमात्रमिति **गौडाः**।

ननु लणो णकारेऽलशादिप्रत्याहारजन्यबोधविषयत्वस्याप्यापत्तिरस्त्येव, स्वविशिष्ट-ञमङणन-मित्येतद्घटकणकारघटितत्वेन स्वविशिष्टाघटितत्वाभावेन-अकारादिशकारान्तादिसमुदायस्य स्वविशिष्टत्वा-भावादिति चेन्न। लक्ष्यदोषाभावेन तदापत्तेरकिञ्चित्करत्वात्।

ननु रप्रत्याहारवादिनां प्राचामपि न तृतीयहेतोरव्यापकत्वं,--हल्प्रत्याहारसिद्ध्यनन्तरमैऔजितिचकार-स्येत्सञ्ज्ञायामच्प्रत्याहारसिद्ध्योपदेशेऽजनुनासिक इत्यनेनेत्सञ्ज्ञायां लोपशास्त्रीयोद्देश्यतावच्छेदकाक्रान्तत्वस्यापि लणोऽकारे सत्त्वादिति चेन्न, 'पर्वतो वह्निमान्धूमा'दित्यादौ--पर्वते वस्तुतो धूमसत्त्वेऽपि तत्र धूमे धूली-पटलत्वभ्रमेऽनुमितेरनुदयाद्धूलीपटलेऽपि धूमत्वभ्रमे वह्न्यनुमितेरुदयाच्च-वस्तुतो हेतुसत्ताया अनुमिता-वप्रयोजकत्वेन हेतुज्ञानस्यैव कारणताया वक्तव्यतया—'लोपशास्त्रीयोद्देश्यतावच्छेदकाक्रान्तत्वप्रकारक-ज्ञानविषयत्वस्यैव हेतुतायाः प्रकृते स्वीकारादित्सञ्ज्ञायोग्यत्वरूपानुबन्धत्ववति लणोऽकारे हल्प्रत्याहारसिद्धेः प्राक् साध्यस्य-तादृशप्रत्याहारजन्यबोधविषयत्वाभावस्य सत्त्वेपि तादृशज्ञानविषयत्वरूपहेतोरभावेनाव्यापक-त्वापत्तेः सुस्थत्वात्। **ननु** लणोऽकारेऽजादिप्रत्याहारसिद्ध्युत्तरकालभाविनः-लोपशास्त्रीयोद्देश्यतावच्छेदका-क्रान्तत्वप्रकारकज्ञानस्य—विषयतायाः स्वरूपसम्बन्धविशेषात्मिकायास्तत्र लणोऽकारेऽजादिसिद्धिपूर्वका-लेऽपि सत्त्वाद्धेतोर्नाव्यापकत्वमिति चेन्न, 'यदनुबन्धे—यत्प्रत्याहारजन्यबोधविषयत्वाऽभावो विवक्षितस्त-त्प्रत्याहारसिद्धिसमानकालिकलोपशास्त्रीयोद्देश्यतावच्छेदकाक्रान्तत्वप्रकारकज्ञानविषयत्वस्यैव हेतुतया तत्राऽ-कारे तादृशहल्प्रत्याहारसिद्धिसमानकाले, तादृशज्ञानविषयत्वरूपस्य हेतोरभावेनाऽव्यापकत्वापत्तेः सुस्थ-त्वात्। **नचेश्वरज्ञानस्य** सर्वविषयकतया देवदत्तसमवेतहल्प्रत्याहारसिद्धिसमानकालिकलोपशास्त्रीयो-द्देश्यतावच्छेदकाक्रान्तत्वप्रकारकेश्वरीयज्ञानविषयत्वस्य लणोऽकारे सम्भवादव्यापकत्वापत्तिर्नास्तीति वाच्यम्। 'तत्तत्प्रत्याहारज्ञानविशिष्ट—लोपशास्त्रीयोद्देश्यतावच्छेदकाक्रान्तत्वप्रकारकजन्यज्ञानविषयत्व'स्यैव हेतुत्वे नादो-षात्। वै० 'स्वसमानकालिकत्व' 'स्वसमवायितत्तत्पुरुषसमवेतत्वो'भयसम्बन्धेन। **ननु** रप्रत्याहार-मनभ्युपगच्छतो नागेशभट्टस्यापि 'झभञ्'-घटकञकारे तृतीयहेतोरव्यापकत्वापत्तिः, हल्प्रत्याहारसिद्धि-काल एव झल्प्रत्याहारस्यापि सिद्धौ बाधकाभावेन 'झभ'ञ्घटकञकारे तदानीमित्त्वज्ञानाभावाल्लोपशास्त्री-योद्देश्यतावच्छेदकाक्रान्तत्वप्रकारकज्ञानविषयत्वात्मकहेतोरभावादिति चेन्न, 'यदनुबन्धा यादृशप्रत्याहाराबो-ध्यत्वेन विवक्षितास्तादृशप्रत्याहारज्ञानविशिष्ट-—लोपशास्त्रीयोद्देश्यतावच्छेदकाक्रान्तत्वप्रकारकज्ञानविषयत्व'-स्य हेतुत्वं, वै० 'स्वप्रयोजकज्ञानप्रयोज्यत्व'स्वप्रयोज्यज्ञानाप्रयोज्यत्वै'तदुभयसम्बन्धेन। तथा च—

तत्र लोपस्य बलवत्त्वेऽपि हल्प्रत्याहारसिद्धेःप्रागच्पदार्थनिष्पत्त्यभावेनोपदेशेऽजित्यस्य वाक्यार्थाभावेन, लणित्यकारस्येत्सञ्ज्ञालोपयोरभावेन—प्रत्याहारेषु जातिग्रहणपक्षस्यैव भाष्यकृता

❁ अभिनव-चन्द्रिका ❁

वाच्यं, 'हेतोरव्यापकत्वापत्ति'रित्यस्य—पक्षतावच्छेदकाव्यापकत्वापत्तिरित्यर्थः। तथा च हेतोः पक्षतावच्छेदकाऽव्यापकत्वे भागाऽसिद्ध्या भाष्यासङ्गतिरित्याशयात्। अत्रानुमानञ्चेत्थम्—"अनुबन्धाः

❁ चिदस्थिमाला ❁

पक्षतावच्छेदकावच्छिन्नवृत्तित्वरूपव्यापकत्वाऽभावापत्तिरित्यर्थः। तदुपपादयति—**तत्रेत्यादिना**। **तत्रेति**। 'मते' इति शेषः। नन्वेवं ह्रस्वानुनासिकाऽकारस्य तत्र प्रवेशेऽपि न दोषो, लक्ष्याभावादत आह—**प्रत्याहारेष्विति**। तत्सूत्रेऽण्ग्रहणखण्डनायेति भावः। एतेन'तत्रानुनासिकपाठेऽपि, लक्ष्येऽनुनासिकसत्त्वेपि ततो

❁ ज्योत्स्ना ❁

ग्रहणाभावस्येह विवक्षितत्वात्। ननु हल्प्रत्याहारे सत्यप्यनुनासिकाकारस्य ग्रहणे 'मामाँस्रायस्वे'त्यत्र न दोषः, 'अणुदि'दिति ग्राहकशास्त्रघटकाण्पदशक्तिग्रहकाले इत्सञ्ज्ञालोपाभ्यां तदसन्निधानात्सवर्णग्रहणाभावादत आह—**प्रत्याहारेषु जातीति**। अनितेः क्विप्य'नुनासिकस्य क्वी'ति दीर्घे सम्बुद्धौ

❁ सदाशिवभट्टीयम् ❁

ग्रहणगृह्यमाणताशून्याः, प्रत्याहारसिद्धेः प्राग्लुप्यमानत्वा'दित्यनुमितौ हेतोःपक्षतावच्छेदकावच्छिन्नवृत्तित्वरूपव्यापकत्वाभावापत्तेरित्यर्थः। तदुपपादयति—**तत्रेत्यादि-लोपयोरभावेत्यन्तेन**। मम त्वकारेऽनुबन्धत्वस्यैवाभावेन न तत्त्वापत्तिः। ननु—'अक्षु प्रत्याहारार्था अनुबन्धा' इति भाष्यादच्बोधकसूत्रस्थानुबन्धत्वं

❁ वरवर्णिनी ❁

ञकाररूपोऽनुबन्धो झल्प्रत्याहाराबोध्यत्वेन विवक्षित इति—[झल्प्रत्याहारज्ञानप्रयोजकलकारधर्मिकेत्त्वप्रकारकज्ञाना-ऽऽदिरन्त्येतिवाक्यार्थज्ञानादि—प्रयोज्यत्वस्य, झलादिप्रत्याहारज्ञानप्रयोज्य—लक्ष्यधर्मिकसाधुत्वप्रकारकादिज्ञान—प्रयोज्यत्वाभावस्य च सत्त्वात्—] तादृशझल्प्रत्याहारज्ञानविशिष्ट'झभ'ञितिञकारधर्मिकलोपशास्त्रीयोद्देश्यतावच्छेदकाक्रान्तप्रकारकज्ञान-विषयत्वस्य हेतोस्तत्र सत्त्वेन नागेशमतेऽव्यापकत्वापत्तेरभावात्। रप्रत्याहारवादिनां प्राचान्तु—लण्घटकाकारधर्मिकलोपशास्त्रीयोद्देश्यतावच्छेदकाक्रान्तत्वज्ञाने—हल्प्रत्याहारज्ञानप्रयोजकलकारधर्मिकेत्त्वप्रकारकज्ञान-प्रयोज्यत्वस्य परम्परया सत्त्वेऽपि—हल्प्रत्याहारज्ञानप्रयोज्यैऔजितिसूत्रघटकचकारधर्मिकेत्त्वज्ञानाच्प्रत्याहारज्ञानादि—प्रयोज्यत्वस्यैव सत्त्वेन स्वप्रयोज्यज्ञानाप्रयोज्यत्वाभावेन द्वितीयसम्बन्धाभावादुक्तोभयसम्बन्धेन वैशिष्ट्यविरहेणाव्यापकत्वापत्तिः सुयोजैवेतिदिक्। विस्तरस्तु शब्देन्दुशेखरटीकायाम**भिनवराजलक्ष्म्याम**नुसन्धेयः।

ननु त्वदुक्तरीत्या हल्प्रत्याहारसिद्धेः प्राग्लणोऽकारस्येत्सञ्ज्ञालोपयोरभावेऽप्यण्प्रत्याहारसिद्धिसमये इत्सञ्ज्ञालोपयोरकारापहारसम्भवान्न हल्प्रत्याहारेऽकारग्रहणापत्तिः, किञ्च—ग्रहणकशास्त्रे आक्षरसमाम्नायिकानामेव ग्रहणेनानुनासिकाकारस्याण्त्वविरहाद्दीर्घसानुनासिकाकारस्य ग्रहणं न सम्भवतीति—न 'मामांस्रायस्वे'त्यत्र दोषदानमुचितम्, **किञ्च**-त्वदुक्तरीत्या लणोऽकारस्य सानुनासिकस्य कथञ्चिदण्त्वस्य वक्तुं शक्यत्वेऽपि लक्ष्यस्याकारस्य व्यक्तिपक्षे ततो भिन्नतया—हल्त्वाभावा'न्मामांस्रायस्वे'त्यत्र न दोषः सम्भवतीत्यत आह—**जातिग्रहणेति**। अन्यथा'ऽवात्ता'मित्यत्र 'झलो झली'तिसकारलोपो न स्यात्, व्यक्तेर्भेदादिति भावः।

सिद्धान्तितत्वेन—हल्प्रत्याहारे लणित्यकारप्रवेशो—मामाँस्त्रायस्वे'त्यत्रानुनासिकपक्षेऽनुस्वारापत्तिर्दुर्वारा ।

❀ अभिनव-चन्द्रिका ❀

प्रत्याहारजन्यबोधविषयत्वाऽभाववन्तः, 'तस्य लोप'इति शास्त्रीयोद्देश्यतावच्छेदकाक्रान्तत्वात्'' ।

न चा'इउ'णित्यादिघटकणकारादिषु अल्प्रत्याहारजन्यबोधविषयत्वस्य, हल्प्रत्याहारजन्यबोधविषयत्वस्य च सत्त्वेन प्रकृतसाध्यस्याऽभावेन प्रकृतहेतोश्च सत्त्वेन प्रकृतहेतुर्व्यभिचारीति—न तस्य साध्यसाधकत्वमिति वाच्यं, 'स्वेतरो यः स्ववृत्तिश्रावणप्रत्यक्षविषयतावच्छेदकधर्मावच्छिन्नस्तदबोधकप्रत्याहारजन्यबोधविषयत्वाभाव'स्य साध्यत्वेनाऽदोषात् । अल्हल्प्रत्याहारौ च—अनुबन्धणकारादी–तर-स्ववृत्तिश्रावणप्रत्यक्षविषयतावच्छेदकधर्मावच्छिन्न–'ञमङणन'मित्यादिघटकणकारादिबोधकाविति तयोः प्रकृतसाध्यदले प्रवेशानर्हत्वात् ।

अथ वा–''अनुबन्धाः प्रत्याहारजन्यबोधीयघटकत्वावच्छिन्नविषयत्वाभाववन्तः, 'तस्य लोप' इति शास्त्रीयोद्देश्यतावच्छेदकाक्रान्तत्वात्'', तथा च हलादिप्रत्याहारजन्यबोधीयघटकत्वावच्छिन्नविषयताया अनुबन्धणकारादावभावेऽपि अननुबन्धणकारादौ सत्त्वेन सर्वणकारादीनां हल्त्वादिसिद्धिः ।

❀ चिदस्थिमाला ❀

व्यक्तिभेदेन भिन्नत्वान्न दोष' इत्यपास्तम् । **अकारेति** । अकारजातीत्यर्थः । हे आन् ! मां त्रायस्वेति लक्ष्यार्थः । अनितेः क्विबन्तस्य **आनिति** रूपम् । ननु किमनुनासिकत्वसमानाधिकरणजातिनिर्देशः ? उत ह्रस्वत्वसमानाधिकरणजातिनिर्देशः ? । तत्राद्ये आह—**अनुनासिकेति** । तस्य हल्त्वेन ततः पूर्वमकारस्य

❀ ज्योत्स्ना ❀

नलोपाभावे 'आ'नितिरूपम् । 'मामाँस्त्रायस्वे'ति ह्रस्वपाठे त्नन्ततेरञ्जेर्वा संयोगान्तलोपः । तदा जातिग्रहणपक्षोपादाने प्रयोजनं 'सोऽस्ती'त्यत्र बोद्धव्यम् । ननु'मामाँस्त्रायस्वे'त्यत्र मोऽनुस्वाराप्रसङ्गः,—

❀ सदाशिवभट्टीयम् ❀

पक्षतावच्छेदकं न तु केवलानुबन्धत्वम् , अकारे च तदभावान्नाऽव्यापकत्वं हेतोः । किञ्च प्रत्याहारसिद्धेः प्रागित्यस्य कतरोऽर्थः ? यावत्प्रत्याहारसिद्धेः प्राग्लुप्यमानत्वमर्थः, ? उत यत्प्रत्याहारे यदनुबन्धग्रह आपाद्यते तत्प्रत्याहारसिद्धेः प्रागित्यर्थः ?, नाद्यः–हल्प्रत्याहारसिद्धेः प्राक्चादेरपि लुप्यमानत्वाभावात् । द्वितीये तु भाष्येऽजित्युक्त्या विशिष्यैव पक्षतावच्छेदकत्वस्य वाच्यतया लणित्यत्रत्याकारे तदभावान्न[1] तदापत्तिरतो[2] लक्ष्यासिद्धिमाह–**प्रत्याहारेत्यादिना**–**आपत्तिश्चेत्यन्तेन** । चकारोऽव्यापकत्वापत्तेः समुच्चायकः । **तवादि**तृतीयान्तान्तस्य ग्रन्थस्य च मध्यमणिन्यायेन पूर्वोक्तापत्तावुत्तरयोश्च तयोरन्वयः । वस्तुतो हेतुद्वयादव्यापकत्वापत्तिरित्यर्थः, शेषं पूर्ववत् ।

नन्वनुनासिकत्वसमानाधिकरणजातेर्निर्देशः ? उत ह्रस्वत्वसमानाधिकरणजातेः ?, तत्राद्ये आह–

❀ विषमपदविवृतिः ❀

सानुनासिकाकारस्यानण्त्वात्तेन दीर्घसानुनासिकग्रहणं न सम्भवतीत्याशङ्क्याह,—**जातिग्रहणस्येति** ।

मामिति । 'आ'निति—'अ'शब्दस्य द्वितीयाबहुवचनं, तस्य 'नश्छव्यप्रशा'निति रुत्वे 'आँ' इति रूपम् । **यद्यपि**—जातिपक्षे निरनुनासिकाकारस्यापि हल्त्वं सुवचं, तथापि सानुनासिकोच्चारणबलात्सानुनासिकस्यैवाच्त्वजात्यवच्छिन्नस्य हल्त्वमित्यभिप्रेत्य सानुनासिकाकारे रुत्वमापादितं, वस्तुत

१. तदभावात्=पक्षतावच्छेदकाभावात् । २. तदापत्तिः=हेतोरव्यापकत्वापत्तिः ।

'सोऽस्ती'त्यादौ सुलोपाद्यापत्तिश्च ।

अत एव 'प्रत्याहारेऽनुबन्धानां कथमज्ग्रहणेषु ने'त्यनेन 'प्रत्याहारे=वर्णसमाम्नाये

❀ अभिनव-चन्द्रिका ❀

न च लण्सूत्रस्थाकारेऽच्प्रत्याहारसिद्धेः प्रागनुबन्धत्वस्याभावेन न हेतोः पक्षतावच्छेदकाव्यापकत्वापत्तिरिति वाच्यं, प्रकृतेऽनुबन्धत्वयोग्यत्वस्य पक्षतावच्छेदकत्वेन हेतोरव्यापकत्वापत्तेः सत्त्वादिति दिक् । **सुलोपाद्यापत्तिश्चेति** । न चैं'तत्तदो'रिति सूत्रारम्भसामर्थ्येनाऽकारस्य हल्त्वं नेति कल्प्यते, अन्यथा 'स शम्भु'रित्यादौ हल्ङ्यादिलोपे 'एतत्तदो'रिति सूत्रवैयर्थ्यस्य स्पष्टत्वादिति वाच्यं, तद्वैय-

❀ चिदस्थिमाला ❀

'मोनुस्वार' इत्यनेनेति भावः । अन्ये आह—**सोऽस्तीति** । 'एतत्तदो'रित्यनेनेति भावः । इदञ्च **कौस्तुभा**-द्यनुरोधेन, वस्तुतो गुणाभेदकत्वस्य व्यापकजातिनिर्देशस्य च भगवदभिमतत्वेन सर्वत्र दोष इति बोध्यम् ।

यद्यपि 'सोऽस्यादि'रिति ज्ञापकरूप आचारोऽत्र सम्भवति,तथापि तदपेक्षयेष्टं व्यापकत्वं तृतीयस्य भज्येतेति नायमित्सञ्ज्ञक इति सिद्धम् । अनित्सञ्ज्ञकत्वमेव द्रढयति—**अत एवेति** । तस्यानित्सञ्ज्ञकत्वादेवेत्यर्थः ।

❀ ज्योत्स्ना ❀

अवसानेऽनुस्वारलिपेः सर्वत्र दर्शनेन मोऽनुस्वारेऽनुवर्त्तमान'हली'त्यस्याजभावोपलक्षणत्वात्, अत एव व्याकरणान्तरेऽचि परतो मकारश्रवणार्थं 'स्वरेम'इति सूत्रमारब्धम् । यद्वाऽम्प्रत्याहारसापेक्षरुप्रवृत्त्युत्तरप्रसङ्गिनोऽनुस्वारस्य निमित्तभूते हलि अम्पदशक्तिग्रहवेलायां निवृत्तस्यानुनासिकाकारस्य प्रवेशासम्भव इत्यरुचेराह—**सोऽस्तीत्यादाविति** । ननु यथा 'स्थूलं गामानये'त्युक्ते—न कृशस्यानयनं भवति, विशिष्टव्यक्तिस्थाया एव जातेराश्रयणात्, एवमनुनासिकाकारेण निरनुनासिकस्य ग्रहणन्न भविष्यतीत्यत आह—**अत एवेति** । वार्तिके'ऽनुबन्धानामज्ग्रहणे'ष्वित्यस्य—अच्प्रत्याहारग्राहकसूत्रेषु

❀ सदाशिवभट्टीयम् ❀

अनुनासिकेति । अन्य आह—**सोस्तीति** । वस्तुतो गुणाभेदकत्वस्य, व्यापकजातिनिर्देशस्य च भगवदभिमतत्वेन सर्वत्र दोष इति बोध्यम् । एवञ्च 'सोऽस्यादि'रितिनिर्देशरूपाचारोऽत्र सम्भवति, तथापि तदपेक्षयेष्टं व्यापकत्वं तृतीयस्य भज्येतेति नायमित्सञ्ज्ञकं इति सिद्धम् । अनित्सञ्ज्ञकत्वमेव दृढयति—**अत एवेति** । वार्तिकार्थस्तु—गृह्यन्ते एभिस्तानि—**ग्रहणानि**, अचां ग्रहणानि=ग्राहकाणीति यावत्, तेषु='अइउ'-

❀ विषमपदविवृतिः ❀

आनुनासिक्यगुणस्येत्सञ्ज्ञार्थतया कृतार्थत्वान्निरनुनासिकस्यापि हल्त्वेन ग्रहणमित्याह—**सोस्तीति** ।

केचित्तु—'हलन्त्य'मित्यत्र हल्पदेन सानुनासिकाकारग्रहणसम्भवेपि 'मोनुस्वार'इत्यत्र हल्पदेन न तस्य ग्रहणं, ततः पूर्वमुपदेशेजित्यस्य वाक्यार्थसम्भवे इत्सञ्ज्ञालोपाभ्यां तदपहारात्, 'नाज्झलावणुदि'दित्यनयोः सूत्रयोरजणपदाभ्यामाक्षरसमाम्नायिकानामेव ग्रहणेऽप्यन्यत्र दीर्घादीनामपि ग्रहणवत् । एतेन वल्प्रत्याहारेऽप्यकारस्य ग्रहणापत्तौ 'अयत'इत्यादौ 'लोपो व्यो'रिति लोपापत्तिः परास्तेत्याहुः ।

अत एवेति । लण्सूत्रस्थाकारस्येत्सञ्ज्ञालोपयोरनङ्गीकारेण 'लोपश्च बलवत्तर'इति तृतीयहेत्व-

❀ वरवर्णिनी ❀

सुलोपाद्यापत्तिश्चेति । **नचा**कारस्य हल्त्वाद्धल्ङ्यादिलोपेनैव सिद्धे'एतत्तदो'रिति व्यर्थमिति वाच्यम्, तत्र ङ्याब्ग्रहणसामर्थ्येनाच्त्वहल्त्वोभयानाक्रान्तस्य हलो ग्रहणेनादोषादित्य**स्मद्गुरुचरणाः** ।

ननु 'प्रत्याहारेऽनुबन्धाना'मित्यत्र प्रत्याहारपदेनाच्प्रत्याहारस्यैव ग्रहणं न तु प्रत्याहारमात्रस्येति न हेतोरव्यापकत्वं रप्रत्याहारवादिमते इत्यरुचेराह—**अत एवेति** । लणोऽकारस्य निरनुनासिकत्वादेव, रप्रत्याहारस्याभावादेव चेत्यर्थः । तत्र=हेतुकोटौ ।

य एतेऽक्षु=अज्बोधकसूत्रेषु—प्रत्याहारार्था अनुबन्धाः क्रियन्ते—तेषामज्ग्रहणेन ग्रहणं कस्मान्ने'त्यर्थकेनाच्प्रत्याहारे शङ्का कृता, न हल्प्रत्याहारे। भाष्ये च 'अइउ'णित्यादि-सूत्रचतुष्टयोपादानेनैवास्य प्रवृत्तिर्दर्शिता।

❀ अभिनव-चन्द्रिका ❀

र्थेन लाघवाल्लण्सूत्रस्थाऽकाराऽनुनासिक्याऽप्रामाण्यकल्पनस्यैव ज्यायस्त्वात्। न चैवमपि रेफादिषु जातझल्त्वादेरिव लण्सूत्रस्थाऽकारे जातहल्त्वस्यापि निवृत्तिर्भविष्यतीति न दोषः, अन्यथा झल्प्रत्याहारसिद्धिवेलायां द्वितीय'हलन्त्य'मित्यस्य वाक्यार्थबोधाभावेन 'शषस'रित्यत्र रेफादिषु इत्सञ्ज्ञालोपयोरभावेन रेफस्य झल्ग्रहणेन ग्रहणे-'गीर्भ्यां'मित्यादौ जश्त्वाद्यापत्तिरिति वाच्यम्, इत्सञ्ज्ञालोपाभ्यां झल्त्वादेर्निवृत्तावपि-उपजीव्यविरोधेन हल्त्वस्यानिवृत्तेः, हल्त्वमुपजीव्य प्रवर्त्तमानाया 'उपदेशेऽजनुनासिक इ'दितीत्सञ्ज्ञायाः, 'तस्य लोप'इति लोपस्य च,—लण्सूत्रस्थाकारवृत्तिहल्त्वनिवृत्तिं प्रत्यनिमित्तत्वात्। वस्तुतस्तु—लण्सूत्रस्थाऽकारस्यानुनासिक्येऽपि भाष्योक्ततृतीयहेतोर्नाव्यापकत्वापत्तिः, पक्षतावच्छेदकाऽनुबन्धत्वमनुबन्धयोग्यत्वमित्युक्त्वाऽव्यापकत्वापत्तिदानस्यानुचितत्वात्। 'तस्य लोप'-इति शास्त्रीयोद्देश्यतावच्छेदकाकान्तियोग्यत्वस्य हेतुत्वेनाऽव्यापकत्वापत्तेरभावाच्च।

न हल्प्रत्याहार इति। वस्तुतो नेदं साधकं लण्सूत्रस्थाकारस्यानुनासिक्याभावे,—इगादिप्रत्या-

❀ चिदस्थिमाला ❀

भाष्योक्तं वार्त्तिकार्थमाह—**य एत इत्यादि।** 'य एते' इत्यतः प्राक् 'प्रत्याहारे वर्णसमाम्नाये' इत्यपपाठः, पौनरुक्त्यापत्तेर्भाष्यविरोधाच्च। **उद्योतग्रन्थस्तु** प्राचीनानुसारि**कौस्तुभानुरोधेनेति** बोध्यम्। 'अज्ग्रहणे'ष्वित्यत्र कर्मणि ल्युट्, अच्सञ्ज्ञाग्राह्येषु—अकारादिष्विति तदर्थः, तदाह—**अक्ष्विति।** तत्फलितमाह—**अजिति।** 'प्रत्याहारे' इति-'निमित्तात्कर्मयोग' इति तत्र[1] सप्तमी, फलं हि तत्र निमित्तं, प्रत्याहारस्य फलत्वञ्च-तत्करणस्य[2] तत्सिद्धि[3]विषयकेच्छाधीनत्वात्। अत एव'क्रियमाणाना'मिति शेषः, तत्र प्रत्याहारस्य सञ्ज्ञारूपस्य समूहस्य अवयवेन अनुबन्धेन करणकर्मणा सह समवायरूपयोगसत्त्वात्, तदाह—**प्रत्याहारार्था इति।** उक्तहेतोरेवाह—**क्रियन्त इति।** प्रत्यासत्तिन्यायलभ्यं शेषं पूरयति—**अजिति।** अच्सञ्ज्ञयेत्यर्थः। नन्विदमुपलक्षणं वाच्यम्, अन्यत्रापि क्वचित्फलसम्भवादत आह—**न हलिति।** एतत्प्रतिपादन एव तात्पर्यं न तत्प्रतिपादने, अन्यथैतदाधिक्यं स्पष्टमेव, त्वन्मते तु सकलप्रत्याहारमूलभूतत्वाद्धलंशे एव, तदादौ वा शङ्कासमाधानौचित्येन मूलत्यागानौचित्यमिति तदसङ्गतिः स्पष्टैव। तत्र मानान्तरमाह—**भाष्ये चेति।** **वास्य**=वार्त्तिकस्य, अन्यथा तदुपादानं व्यर्थमेव स्यादिति भावः। आद्ययोरव्यापकत्वं ध्वनयितुं स्पष्टत्वात्प्रथम-

❀ **ज्योत्स्ना** ❀

पठितानामनुबन्धानां प्रत्यासत्याऽक्षु ग्रहणं कस्मान्नेत्यर्थः। तत्फलितं भाष्याक्षरानुसारेण व्याचष्टे—

❀ **सदाशिवभट्टीयम्** ❀

णादिसूत्रेषु। अधिकरणे सप्तमी। प्रत्याहारेऽनुबन्धानां=अजादिसञ्ज्ञार्थमनुबध्यमानानां—णादीनामित्यर्थः। 'निमित्तात्कर्मयोग' इति सप्तमी, फलं हि तत्र निमित्तं, प्रत्याहारस्य फलत्वञ्च—तत्करणस्य तत्सिद्धिविषयेच्छाधीनत्वात्। कर्मयोगस्तु प्रत्याहारस्याजादिसञ्ज्ञारूपस्य समूहस्य अवयवेनानुबन्धेन—कर्मणा णादिना समवायरूपयोगसत्त्वाद्बोध्य इति। 'य एत' इत्यतः प्राक् 'प्रत्याहारे वर्णसमाम्नाये' इत्यपपाठः, पौनरुक्त्यापत्तेर्भाष्येऽभावाच्च। **न हल्प्रत्याहारे इति।** त्वन्मते तु सकलप्रत्याहारमूलभूतत्वाद्धलंशे एव तदाशङ्कासमाधानौचित्येन तदसङ्गतिः स्पष्टैव। नन्विदं भाष्यं हशादिषु टादिग्रहणानापादनादुपलक्षणतया त्वयापि

१. तत्र=भाष्यवार्त्तिके। २. तत्करणस्य=अनुबन्धकरणस्य। ३. तत्सिद्धिः=प्रत्याहारसिद्धिः।

तत्र प्राधान्यं—प्रत्याहारेषु ग्रहणार्थत्वरूपम्, हल्षु च तथोपदेशस्तेषाम्, अक्षु तु स्वराणामेव तथोपदेश इति प्राधान्यात्तेषामेव सञ्ज्ञित्वमिति भाष्ये स्पष्टम्।

न च हशादिप्रत्याहारे 'ट'ग्रहणस्यापत्तिरिति वाच्यं, हकारादिषु पुनः-पुनरकारो-

---

ॐ अभिनव-चन्द्रिका ॐ

हारे शङ्काया अकरणवत्–हल्प्रत्याहारे शङ्काया अकरणेऽपि क्षतिविरहात्। वक्ष्यमाणहेतूनां सामान्यतः प्रत्याहारजन्यबोधविषयत्वाभावसाधकत्वेन–'भाष्ये अजिति प्रत्याहारमात्रोपलक्षण'मित्यस्यावश्यं वक्तव्यत्वाच्च। 'न चोदाहरणमादरणीय'मित्यभियुक्तोक्तेश्च। न चा'ऽप्राधान्या'दितिहेतो'र्हयवर'डित्यादिस्थाऽनुबन्धेष्वभावेन सामान्यतः प्रत्याहारजन्यबोधविषयत्वाभावसाधकत्वं निरुक्तहेतूनां नास्तीति वाच्यम्, अनुबन्धानां महेश्वरकृतत्वेन, तदितरस्य च श्रुतित्वेन वेदघटकत्वेन प्राधान्यमिति'हयवर'-डित्यादिसूत्रस्थाऽनुबन्धेष्वपि 'अप्राधान्या'दिति हेतोः सत्त्वात्। वस्तुतस्तु—लण्सूत्रस्थाऽकारस्यानुनासिक्यप्रामाण्ये–तस्य श्रुतिघटकत्वादस्य हेतोः पक्षतावच्छेदकाव्यापकत्वं बोध्यम्। न चैवमपि'स्वौजसमौ'डित्यादिसूत्रस्थानुबन्धेष्वप्राधान्यादिति हेतोरभावेन न सामान्यतः प्रत्याहारजन्यबोधविषयत्वाभावसाधकत्वमस्येति वाच्यम्, 'अप्राधान्या'दिति हेतोः सामान्यतः प्रत्याहारजन्यबोधविषयत्वाभावसाधकत्वाभावेऽपि, 'लोपा'दिति हेतो'राचारा'दिति हेतोश्च सामान्यतः प्रत्याहारजन्यबोधविषयत्वाभावसाधकत्वेन—'अच्पदं प्रत्याहारमात्रोपलक्षण'मिति वक्तुं शक्यत्वात्। सुबादिप्रत्याहारेषु अनुबन्धग्रहणे क्षतिविरहाच्च। एवं–भाष्ये 'अइउ'णित्यादिसूत्रचतुष्टयोपादानं प्रत्याहारनियामक-

ॐ चिदस्थिमाला ॐ

मुपेक्ष्य मध्यमहेतुं व्याचष्टे—**तत्रेति**। वार्त्तिकस्थमध्यमहेतुशरीरे इत्यर्थः। **प्रत्याहारेष्विति**—अर्श-आद्यजन्तं, तद्ग्राहिष्विित्यर्थः। अन्यादृशप्राधान्यस्याभीष्टसाधकस्य दुर्वचत्वादाह—**ग्रहणेति**। तदप्याचार्याचारसंसिद्धं न, अपि तु तथापाठसामर्थ्यादेव सिद्धमित्याह–**हल्षु चेति**। तथा=ग्रहणार्थः। **तेषामेवेति**। अचामेव, 'हलामेव चे'त्यर्थः। 'तत्र-तत्रे'ति शेषः। ननूपलक्षणता वाच्येत्युक्तं, सा च स्वरांश इव व्यञ्जनांशेऽप्यवश्यं वक्तव्या, हशादौ टग्रहणे'देवष्टीकते' इत्यादावुत्वप्राप्तिसम्भवात्। आद्यहेतुभ्यां तु वारणाऽसम्भवः, एवञ्च हलंशेऽपि सा उपलक्षणत्वेन बोध्येति—'अत एवे'ति—ग्रन्थासङ्गतिरत आह–**न चेति**।

ॐ ज्योत्स्ना ॐ

य एत इत्यादि। तत्रा'ज्ग्रहणेने'त्यस्याज्बोधकेनाणगादिशब्देनेत्यर्थः। **ग्रहणार्थत्वरूपमिति**। तच्च 'तुल्यजातीयांस्तुल्यजातीयेषूपदिशत्यचोऽक्षु हलो हल्ष्वि'तिवक्ष्यमाणभाष्यादवगन्तव्यम्। **अनभिधा-**

ॐ सदाशिवभट्टीयम् ॐ

नेयम्, 'अजि'त्युक्तिस्तु आपाद्यमानग्रहणकानां प्राथम्यादिति नास्माकं प्रतिकूलमित्याशङ्कते—**न च**

ॐ विषमपदविवृतिः ॐ

विषयत्वादेवेत्यर्थः। 'अप्रधानत्वा'दिति-द्वितीयहेतोरव्यापकतामाशङ्कते—**न चेति**। **पुनः-पुनरिति**। 'न पुनरन्तरेणाचं व्यञ्जनस्योच्चारणमपि भवती'ति भाष्योक्तन्यायेन पुनः-पुनरकारोच्चारणसार्थक्याद-युक्तमेतत्। हश्प्रत्याहारे तु न टकारग्रहणम्, 'यत्तुल्यजातीयाँस्तुल्यजातीयेषूपदिशति'इति भाष्यस्य–अन्तःस्थानामन्तःस्थेषु पञ्चमानां पञ्चमेषु चतुर्थानां चतुर्थेषु तृतीयानां तृतीयेषु द्वितीयानां द्वितीयेषु

ॐ वरवर्णिनी ॐ

ननु नागेशमतेऽपि अच्प्रत्याहारमात्रेऽनुबन्धग्रहणापादनाद्धशादिषु टादिग्रहणानापादनाद्भाष्यवार्तिकविरोध एवेत्याशङ्क्य समाधत्ते—**न चेति**।

च्चारणेन—उच्चारणार्थवर्णरहितहलां तद्घटितप्रत्याहारे ग्रहणाभावस्य वक्तुं शक्यत्वात्, तद्विषयप्रयोगाणामनभिधानाच्च । तस्मादस्यानुनासिकत्वमप्रामाणिकम्, 'उरण्रपर' इत्यत्र

❀ **अभिनव-चन्द्रिका** ❀

सूत्रमात्रोपलक्षणम् । **तेषामेव सञ्ज्ञित्वमिति** । अन्ये तु "—'आदिरन्त्येने'त्यत्र श्रुत्यादि-साजात्याच्छ्रुतिघटकानामेव हलादिसञ्ज्ञा, नानुबन्धानाम्, अत एव—हशादिप्रत्याहारे न 'ट'ग्रहणापत्तिः–" इत्याहुः ।

तद्विषयप्रयोगाणामिति । हशादिप्रत्याहारे'ट'ग्रहणे तद्घटितशास्त्रविधेयघटितानां 'रामो–टीकते' इत्यादिप्रयोगाणामित्यर्थः । एतेन—'रामष्टीकते' इत्यादिप्रयोगाणां 'कोयष्टिकष्टीकते'इत्यादि-महाकविप्रयोगादनभिधानस्याभावेनेदमसङ्गतमित्यपास्तम् । **पुनः–पुनरिति** । न च वक्ष्यमाण-

❀ **चिदस्थिमाला** ❀

तद्घटितेति । हल्घटितेत्यर्थः । यद्वा उच्चारणार्थवर्णघटितानां प्रत्याहारे इत्यर्थः । न च'न पुनरन्तरेणे'ति भाष्योक्तेस्तच्चारितार्थ्यं, तद्भाष्याशयस्य **भावप्रकाशे**ऽन्यथाप्रतिपादितत्वात् । यथा पूर्वोऽचं गृहीत्वाऽन्त्यानुबन्धानामक्लिष्टस्पष्टोच्चारणोपपत्तिस्तथा 'हयवे'त्यादिरूपेण तदुपपत्तौ याबकारोच्चारणवैयर्थ्याच्च । अत एव'पुनः-पुनरिति वीप्सा । अभ्युपेत्याप्याह—**तद्विषयेति** । टविषयेत्यर्थः । यद्वा–"ननु मध्यसमाधिपक्षे आचारस्यानङ्गीकारणोक्तहेत्वसम्भवोऽत आह—**तद्विषयेति** । तदभ्युपेत्याप्याह—**चेति** । तेन दोषान्तरसङ्ग्रहः, सचेत्थं—टादेरुपदिष्टत्वात्तत्र न ग्रहणं, यदि तत्राऽपि ग्रहणमिष्टं स्यात्तर्हि तथैव द्विस्तमुपदिशेत्, हवत्, यदि 'लाघवाय तथोपदेश' इत्युच्येत तर्हि **कङयो**रन्यतरवैयर्थ्यापत्तिस्तस्य स्थानेऽन्यस्य सुवचत्वात्, एवं **टस्या**पि, न चान्यग्रहणं नैवेष्टमिति हेत्वसिद्धिः, नियमार्थतया वैयर्थ्यमपि नेति वाच्यं, **चस्य** सर्वसवर्णग्रहणं, **कङयो**रेव, **टणयो**रेव च ग्रहणं, **तपयोः** कस्याप्यग्रहणमिति वैरूप्ये बीजाभावात् । 'ऐऔ'जिति सूत्रस्यापि प्लुतव्यावृत्त्यर्थतया नियमार्थतापत्तेश्च । इष्टानुरोधेन तत्र तथेति चेदत्रापि वैयर्थ्येनानिष्टनियमस्वीकारापेक्षया तदभावकल्पनमेवोचितम्–" इति । उपसंहरति-**तस्मादिति** । नन्वेव**मुरण्**इत्यादौ का गतिरत आह-**उरणिति** ।

❀ **ज्योत्स्ना** ❀

नाच्चेति । 'काश्मर्या कृतमालमुद्गतदलं कोयष्टिकष्टीकते'इति मालत्यां प्रयोगदर्शनाच्चिन्त्यमेतत् ।

अप्रामाणिकमिति । इदमपि चिन्त्यम्, उच्चारणार्थानामित्सञ्ज्ञायाः स्वयं वक्ष्यमाणत्वाद्'हये'-

❀ **सदाशिवभट्टीयम्** ❀

हशादीति । आदि**नेण्** । एवञ्च'रामष्टीकते' 'अट्स्वि'त्यत्रोत्वपत्वे स्यातामिति भावः । **तद्घटितेति** । हल्घटितेत्यर्थः । यद्वा-**तेन**=उच्चारणार्थवर्णेन घटिताः=सहिता**स्तद्घटिता** हादिशब्दास्तेषां-**प्रत्याहारे**=तद्बोधक इत्यर्थः । इणादेरपि हादिबोधकत्वेन तत्त्वात्तत्रापि न तेषां ग्रहणम् । अजादीनान्तु न तत्त्वमिति न तत्राऽयं समाधिः, एतदर्थमेव 'तद्घटिते'त्युक्तम्, अन्यथा **प्रत्याहारे**त्येव वदेत् । न च'पुनःपुन'रिति भाष्योक्तेस्तच्चारितार्थ्यं, यथा पूर्वोच्चं गृहीत्वान्त्यानुबन्धानामक्लिष्टत्वस्पष्टत्वोपपत्तिस्तथा हयवरे'त्याद्युपपत्तौ याबकारोच्चारणवैयर्थ्यात् । अत एव 'पुनः-पुन'रितिवीप्सितम् । ननु तदुच्चारणेनोच्चारणार्थवर्णरहितानां तादृश-प्रत्याहारे न ग्रहणमिति ज्ञापने ममापि [उपलक्षणत्वं वदतः] न प्रतिकूलमत आह–**तद्विषयेति** । प्रयोगाभाव एव भाष्यादितात्पर्यं न तूपलक्षणत्वे इति भावः । ननु 'राजाहःसखिभ्यष्ट'ज्, 'अतष्टा'बित्यादिप्रयोगादुपलक्षणत्वे एव भाष्यतात्पर्यमतो बाधकाऽभावेपि–साधकाभावान्नानुनासिकत्वमित्याशयेनोपसंहरति–**तस्मादिति** ।

❀ **विषमपदविवृतिः** ❀

प्रथमानां प्रथमेष्वूष्मणामूष्मसूपदेशस्य ग्रहणार्थत्वं नेतरेषामितरे'ष्वित्यर्थकत्वात् । 'अचोऽक्षु हलो हल्ष्वि'ति भाष्यस्योपलक्षणार्थत्वान्न कश्चिद्दोषः ।

अनभिधानाच्चेति । 'कोयष्टिकष्टीकत'इति मालत्यां प्रयोगदर्शनेनायुक्तमेतदिति **केचित्** ।

'ल'ग्रहणं कर्तव्यमेव—–, ऋऌवर्णयोः सावर्ण्यवदित्याहुः ।

❀ अभिनव-चन्द्रिका ❀

भाष्येणाऽचं विना व्यञ्जनस्योच्चारणासम्भवेनाकारोच्चारणस्य न वैयर्थ्यमिति वाच्यं, प्रथमहलनन्तरमचमुच्चार्य पुनर्व्यञ्जनद्वयानन्तरमच उच्चारणेऽपि बाधकाऽभावेन प्रतिव्यञ्जनोत्तरमकारोच्चारणवैयर्थ्यसद्भावात् ।

❀ चिदस्थिमाला ❀

'सावर्ण्यव'दिति दृष्टान्तेन यथा सावर्ण्यस्यावश्यकत्वं तथा तस्येति, वार्त्तिकतुल्यत्वं तस्येति—च सूचितम् । अत्रत्यं तत्त्वं सर्वं मत्कृत**रप्रत्याहारखण्डने** प्रसिद्धमिति नेह लिखितं, ततो बोध्यम् ।

❀ ज्योत्स्ना ❀

त्याद्यकारस्याप्यनुनासिकत्वस्य स्वमतेऽवश्यवक्तव्यत्वाद्दोषतादवस्थ्यस्य सत्त्वात् । नचोच्चारणमात्रार्थ-

❀ सदाशिवभट्टीयम् ❀

वस्तुतस्तु–"ननु साजात्येन टस्य प्राधान्याद्ग्रहणं स्यादित्याशङ्क्ते–'न च हशे'ति । 'अनभिधानाच्चे'ति–चेनेत एवारुचे'र्लोपश्च बलत्तर'इति हेत्वन्तरसमुच्चयः । पूर्वोक्तारुचेराह—तस्मादिति–" इत्यर्थः । यद्वा–

❀ विषमपदविवृतिः ❀

अन्ये तु 'हशि चे'ति शास्त्रदृष्ट्या त्रैपादिकभावकार्यमात्रस्याऽप्लुतग्रहणसामर्थ्येन सिद्धत्वकल्पनात्पर-

❀ वरवर्णिनी ❀

आहुरिति । परे तु—इत्सञ्ज्ञावत्त्वस्यैवानुबन्धत्वेन हल्प्रत्याहासिद्धेः प्राक् लण्घटकाकारेऽनुबन्धत्वस्यैवाऽभावेन पक्षतावच्छेदकानाक्रान्तत्वान्न तृतीयहेतोरव्यापकत्वं प्राचीनमते दोषः, किञ्च नागेशमतेऽपि उच्चारणार्थानामित्सञ्ज्ञालोपाभ्यामेवापहारस्य सिद्धान्तिततया 'हयवरे'त्यादिसकलाकारेष्वपि तृतीयहेतोरव्यापकत्वापत्तिः, 'मामांस्त्रायस्वे'त्यादिष्वनुस्वाराद्यापत्तिश्च । तस्मात्—हकारादौ प्रतिवर्णमकारोच्चारणसामर्थ्यादजादिप्रत्याहाराणां स्वाद्यवर्णसजातीय–मध्यग-वर्ण-बोधकत्वं स्वीकृत्यानुबन्धानां प्रत्याहारेषु ग्रहणाभावो वाच्यः । साजात्यञ्च—बोधकत्वेनाचार्यतात्पर्यविषयत्वेनैवेति 'हयवर'डित्यादिघटकाकारवल्लण्घटकाकारे बोधकत्वेनाचार्यतात्पर्यविषयत्वस्याभावान्न 'मामांस्त्रायस्वे'त्यादावनुस्वाराद्यापत्तिरिति—'र'प्रत्याहारस्वीकार एव युक्तः, 'उरण्रपर'इत्यत्र लकारानुच्चारणलाघवा"दित्याहुरस्**मद्गुरुचरणाः श्रीस्नेहिरामशास्त्रिणः ।**

"—श्री**बालशास्त्रिगुरुचरणास्तु**–'रप्रत्याहारस्वीकारे न कापि क्षतिः,'अतो ल्रे'ति सूत्रे लकरोच्चारणन्तु —'रपदं रेफलकारोभयविषयकबोधं जनय'त्विति पाणिनितात्पर्यस्यानित्यत्वबोधकं, तेन 'रदाभ्यां' 'रषाभ्या'मित्यादौ रपदेन लकारग्रहणं न, तस्माच्छेखरोक्त आद्यो दोषो न युक्तः । 'यप्रत्याहारेणैव व्यवहरे'दित्यपि न युक्तम्, 'इणो यण्' 'इणः ष'इत्यादौ व्याख्यानात्सन्देहाभावेपि सर्वत्र व्याख्यानाश्रयणे गौरवात्, णकारेण प्रत्याहारे तु व्याख्यानानाश्रयणान्महल्लाघवम् । किञ्च–व्याख्यानाश्रयणेन 'इणो य'णित्यादावभीष्टसिद्धिवत्सर्वत्र व्याख्यानेनैव सिद्धौ इत्सञ्ज्ञा–प्रत्याहारादयो न सन्त्वित्यस्यापि कल्पनापत्तेः, 'नासूया कर्त्तव्या यत्रानुगमः'इत्यादिभाष्याच्च णकारणैव यणादिप्रत्याहारे दोषाभावाच्च । लण्सूत्रस्थाकारे उपलक्षणविधया लोपशास्त्रीयोद्देश्यतावच्छेदकाक्रान्तत्वस्य सत्त्वान्न तृतीयहेतोरव्यापकत्वापत्तिरपि । 'इ-उ' इति समुदायस्याजादिसञ्ज्ञावारणाया**दिरन्त्येने**त्यस्य मध्यगवर्णबोध्यानां सञ्ज्ञेत्यर्थस्यावश्यकतया प्रकृते—'प्रत्याहारेऽनुबन्धाना'मितिभाष्यादाचार्यशैल्याश्च—हल्प्रत्याहारस्थानामचां बोध्यमेव नास्तीत्यपि वक्तुं शक्यत्वाच्च । 'सोऽस्ती'त्यादौ सुलोपाद्यापत्तिश्च'सोऽस्यादिरितिच्छन्दसः' इत्यादिनिर्देशाद्वारणीयेति—रप्रत्याहारखण्डनपरः शेखरग्रन्थोऽसङ्गत एवे'त्याहुः—' इति शब्देन्दुशेखर—**लघुजटाजूटे** वैयाकरणकेसरिणः—**शास्त्रिपादाः ।**

ननु 'हये'त्यादावकारोच्चारणेन तस्य हल्त्वप्रसङ्गोऽत आह—**हकारादिष्विति**। 'न पुनरन्तरेणाचं व्यञ्जनस्योच्चारणमपि भवती'ति—'उच्चैरुदात्तः' इतिसूत्रस्थभाष्यात्, 'एषा ह्याचार्यस्य शैली लक्ष्यते यत्तुल्यजातीयाँस्तुल्यजातीयेषूपदिशति, अचोऽक्षु हलो हल्षु' इति—'प्रत्याहारेऽनुबन्धाना'मित्यत्र भाष्याच्चेति भावः।

❀ अभिनव-चन्द्रिका ❀

[**शास्त्राबोधितेति**। शास्त्रजन्यशाब्दबोधविषयीभूतसाधुत्वाभाववदित्यर्थः, तेन 'क्-द्'इत्यादे-'रनुकरणञ्चानितिपर'मितिसञ्ज्ञाशास्त्रानुमितसाधुत्वस्य सत्त्वेऽपि अनेनाऽसाधुत्वेन तस्य बाधान्न दोषः।] **उच्चारणमपि भवतीति**।—कैमुतिकन्यायेन। तेषां साधुत्वन्तु दूरे एवेति भावः।

❀ चिदस्थिमाला ❀

हल्स्वेति। तस्याननुबन्धत्वेन प्रागुक्तरीत्या वारणासम्भवात्, विशिष्टेन[1] च लक्षणया शुद्धहल्प्रतीतिरिति न दोषः, न च तदर्थमेव[2] सः 'राम' इत्यादौ संयोगान्तलोपापत्तेः, असकृदुपदेशवैयर्थ्यापत्तेश्चेतिभावः।

तत्र हेतुमाह—**न पुनरिति**। **उच्चारणमपीति**। अक्लिष्टस्पष्टोच्चारणमपीत्यर्थः। ननु तथाऽपि निःसन्देहाय तथैवोच्चारणमास्तामत आह—**एषा ह्येति**। आचार्यस्य=अनादिपुरुषस्य, शैली=समाधानपूर्विका प्रवृत्तिः। एवञ्चान्यत्र सञ्ज्ञिविशेषसमर्पणायोपात्तत्वादत्र तस्यासञ्ज्ञित्वमेवेति भावः।

❀ ज्योत्स्ना ❀

त्वादग्रहणम्, प्रत्याहारमात्रार्थत्वस्यान्यत्र तुल्यत्वात्, प्रत्याहारेऽनुनासिकाकाराव्यवहितपूर्ववर्णा-

❀ सदाशिवभट्टीयम् ❀

हशादिग्रहणे टादिग्रहणं कथं नेत्यस्य सङ्ग्रहाय **कौस्तुभोक्त**मेव व्याख्यानमुचितं—वार्तिकस्य, भाष्येऽक्ष्वित्यप्यजादिशब्देष्वित्यर्थकं, सूत्रचतुष्टयोपादानमपि चतुर्दशसूत्र्या उपलक्षणम्। 'अक्षु हल्षु च समाधिवैषम्यं कुत' इति शङ्कायास्तवाऽपि दुःसमाधेयत्वेन—'तदुपलक्षणत्वे चतुर्णामेव ग्रहणं कुत'इत्यादि मां[3] प्रति मा चोदीः। अनुबन्धानां ग्रहणस्यानिष्टत्वे तान्नैवोच्चारीदिति शङ्कानिरासाय—**भाष्ये**—'प्रत्याहारार्था' इति।

एवञ्चानुनासिकत्वं प्रतिजानतो [प्रत्याहारवादिनः] न शङ्कापरभाष्यविरोधः। तृतीयहेतोरव्यापकत्वापत्तिस्तु तवापि दुष्परिहरेति, हल्प्रत्याहारसमकालमेव वलादिप्रत्याहारसिद्धौ प्रतिबन्धकाभावेन वलादिप्रत्याहारेषु यकारादिप्रवेशस्य दुर्वारत्वादित्याशयेन शङ्कते—**न चेति**। **हशादी**त्यादिना वलादीनाम्। **टग्रहणमुपलक्षणं यादेः**। उभयमपि दृढयति—**न पुनरित्यादिना**। तृतीयहेतोर्व्यापकत्वं समर्थयतः **कौस्तुभकृ**तोपीदमावश्यकमेवेतिभावः—इत्याशयेन शङ्किते दूषणान्तरमाह—**हकारादिषु पुनःपुनरित्यादिना**। 'वक्तुं शक्यत्वा'दित्यस्य—अग्रे—'लकारस्येणादिसञ्ज्ञानापत्तेरनुनासिकत्वप्रतिज्ञानैष्फल्यापत्तेश्चे'ति भावः। **अप्रामाणिकमिति**। अनङादिषु प्रयोगसमवायित्वभियाऽनुनासिकत्वाङ्गीकारेप्यावश्यकेन 'सोस्ये'-त्यादिनिर्देशेन प्रत्याहारबोध्यत्ववारणेनेह तत्त्वे मानाभाव इति। अत एव अइउण्सूत्रे **उद्योते**—विधेयविषये उच्चारणार्थस्यानुनासिकत्वमावश्यकमित्युक्तमिति भावः—इति दिगित्याहुः। **तुल्यजातीयेति**। ननु 'तुल्यजातीये'त्यत्र किन्त्वेन साजात्यं विवक्षितम्? 'अज्झल्त्वाभ्या'मिति तु न युक्तम्, अन्योऽन्याश्रयापत्तेः,

❀ विषमपदविवृतिः ❀

त्वाद्विसर्ग **इत्याहुः**। **आहुरिति**। अत्र पाठक[4]कृतरप्रत्याहारमण्डनखण्डनमस्म कृतशब्देन्दुशेखर-

---

१. विशिष्टेन=अनुनासिकत्वविशिष्टेनाकारेण। २. तदर्थमेव=ग्रहणार्थमेव, सः=अकारः।

३. दोषस्योभयोस्तुल्यत्वात्, तादृशदोषोद्घाटनं तव नोचितमित्यर्थः।

४. पाठकः=लक्ष्मणपाठकः।

स्यादेतत्—'न विभक्ता'वित्यादेः सार्थक्याय—'हलन्त्य'मित्यस्यो'पदेशेऽन्त्यं हल् इ'दित्यर्थस्यावश्यकत्वेन 'हलन्त्यम्' 'आदिरन्त्येने'त्यनयोः परस्परापेक्षत्वेनान्योन्याश्रयाल्लकारे इत्सञ्ज्ञामबोधयित्वा हलामित्सञ्ज्ञाबोधनं पाणिनेरयुक्तम्, । न च 'हयवरे'त्यादेरावृत्त्या

❀ अभिनव-चन्द्रिका ❀

ननु 'हलन्त्य'मित्यस्य 'हल्सूत्रान्त्यमि'दित्येवार्थ इति नाऽन्योन्याश्रय इत्याशङ्क्याह—**न विभक्ताविन्यादेरिति । अन्योन्याश्रयादिति ।** स्वज्ञप्त्यधीनज्ञप्तिकत्वमन्योन्याश्रयसामान्यलक्षणं, तथा च 'हलन्त्य'मित्येतज्जन्यवाक्यार्थबोधाधीनज्ञप्तिकत्वमादिरन्त्येनेत्यस्य, 'आदिरन्त्येने'त्येतज्ज्ञप्त्यधीनज्ञप्तिकत्वं 'हलन्त्य'मित्यस्येत्यन्योन्याश्रयः ।

❀ चिदस्थिमाला ❀

'हलन्त्य' मितिसूत्रावृत्तिमवतारयति—**स्यादेतदि**त्यादिना । नन्वष्टाध्यायीस्थस्य 'हलन्त्य'मित्यस्य हलितिसूत्रेऽन्त्यमित्स्यादित्येवार्थ इत्यन्योन्याश्रयसम्भव एव नात आह—**न विभेति । आदिनो**'पदेशेऽजि'त्यस्याजादिपदघटितविधिसूत्राणाञ्च परामर्शः, तदा हि—हल्प्रत्याहारस्यैव सिद्ध्याऽजादिप्रत्याहारस्याऽसिद्ध्या तेषां वाक्यार्थबोधाभावेन नैरर्थक्यं स्पष्टमेव । आवश्यकत्वं—परस्परापेक्षत्वे हेतुः, तच्चाऽव्यवहिते[1], अन्योन्याश्रयोऽयुक्तत्वे हेतुः । कस्य चिदुक्तिं खण्डयति—**न चेति ।** 'हयवरे'त्यादेः, 'ह'लित्यस्याक्षरसमाम्नायिकस्यावृत्तस्यार्थमाह—**शषेति ।** तन्मध्ये इष्टानुरोधेनेष्टोद्देश्यविधेयभावाङ्गीकारादिति भावः । अपिना परेण

❀ ज्योत्स्ना ❀

तिरिक्ताग्रहणज्ञापनस्य पुनः-पुनरकारोच्चारणफलत्वेन वक्तुं शक्यत्वाच्च । तदेतदाहुरित्यस्वरससूचितं निगूढमाकूतं विद्वद्भिराकलनीयम् ।

❀ सदाशिवभट्टीयम् ❀

साजात्ये सति ते सञ्ज्ञे, तयोश्च सत्योः साजात्यमितिचेच्छृणु, औकारावृत्त्यच्त्वाव्याप्यधर्मानवच्छिन्नत्वेन । अचि (—साजात्यम्) । अच्त्वाव्याप्यैण्त्वादिमादायासम्भववारणायाद्यम्, तदवृत्त्यक्त्वादिमादाय तद्वारणाय द्वितीयम् । हकारवृत्तिहल्त्वाव्याप्यधर्मानवच्छिन्नत्वेन हलि तत् । तदव्याप्याट्त्वादिमादाय तदवृत्तियण्त्वादिकमादाय च तद्वारणायोभयम् । अज्झलपदाभ्यां स्वरव्यञ्जनयोर्विवक्षणाच्चेत्याहुः । **न विभक्तावित्यादेरिति । आदिनो**'पदेशे'जित्यस्य स्वपूर्वस्य संग्रहः । 'हलन्त्य'मित्येतद्वाक्यार्थजिज्ञासायामुपस्थितपूर्वोत्तरसूत्रयोः सार्थक्यसम्पादके वाक्यार्थे निष्पन्ने पश्चाद्धलपदार्थः कः ? इति विशेषजिज्ञासाया**मादिरन्त्येने**त्येतद्वाक्यार्थायाऽऽवृत्तिरिति भावः । प्रकृतसूत्रस्थभाष्यमपीहानुकूलम् । **अन्ये** तु--प्रथम'मादिरन्त्येने'त्येतद्वाक्यार्थजिज्ञासायामुत्पन्नातविरोधिन्यायेन कृत्रिमत्वज्ञानाभावेन कृत्रिमाऽकृत्रिमेत्यस्याप्रवृत्त्या च हलितिसूत्रेऽन्त्यमिदित्यर्थे ततो 'न विभक्ता'वित्यादिवैयर्थ्यानुसन्धाने आवृत्त्याऽर्थान्तरस्य युक्तत्वादिदमसत्, भाष्यन्त्वेकदेश्युक्तमेव-

❀ वरवर्णिनी ❀

स्यादेतदिति । एतत्सम्भाव्यत इत्यर्थः । सम्भावनायां लिङ् । **सार्थक्यायेति ।** 'हलिति सूत्रस्यान्त्यमित्स्या'दित्यर्थे तु'न विभक्ता'वित्यादेर्वैयर्थ्यं स्पष्टमेव, विभक्तिस्थतकादेरित्सञ्ज्ञायाः केनापि प्राप्तेरभावात् । **अन्योन्याश्रयादिति ।** स्वज्ञप्त्यधीनज्ञप्तिकत्वमन्योन्याश्रयत्वम्, प्रकृते स्वं–('हलन्त्य'मितिवाक्यार्थज्ञानप्रयोज्यः) इत्पदार्थः, तज्ज्ञप्त्यधीनज्ञप्तिकत्वं हल्पदार्थस्य । एवं स्वं—हल्पदार्थः, तज्ज्ञप्त्यधीनज्ञप्तिकत्वमित्पदार्थस्येति समन्वयः । **हलसञ्ज्ञापीति ।** न च नवसूत्रीमुद्दिश्य दशमेन हलितिसूत्रेण

१. तच्च=परस्परापेक्षत्वञ्च, अव्यवहिते=अन्योन्याश्रये, 'हेतु'रित्यनुषज्यते । **'अयुक्तत्वे'**—'हेतु'रित्यनुषज्यते ।

'शषस'रित्यन्तं समुदायमुद्दिश्य–'ह'लित्यनेन हल्सञ्ज्ञाऽपि विधेयेति वाच्यं, दशसूत्रावृत्तौ गौरवात् । ननु–'उपदेशे इदन्त्यम्', 'अच्', 'अनुनासिकः'–इति सूत्रत्रयमस्तु, अजित्यनन्त्यार्थं, तृतीयेऽजित्यनुवृत्तिसामर्थ्यादच्चेदिद्भवति तर्ह्यनुनासिक एवेति नियमाश्रयणाद्रु-प्रभृतौ न दोषः । योगविभागसामर्थ्याच्चानन्तरस्येति न्यायं बाधित्वा व्यवहितस्यापि तेन

❀ अभिनव-चन्द्रिका ❀

गौरवादिति । चिन्त्यमिदं–गौरवस्य सापेक्षत्वेनान्योन्याश्रयपरिहारान्तरस्याद्याप्यदर्शितत्वेनैतच्छङ्कासमाधानादेरसङ्गतत्वात्, 'तस्मात्पाणिनेरयुक्त'मित्यस्यानन्तरम्––"अतः सूत्रावृत्त्या तं परिहरति––'हलन्त्य'मिती"ति लेखनीयं, तदनन्तरं 'न चे' त्यादिशङ्कासमाधानादिः ।

❀ चिदस्थिमाला ❀

समुदायेन यथाश्रुतार्थबोधनसमुच्चयः । अन्यस्य कस्य चिदुक्तिं खण्डयति—**नन्विति** । अन्त्याचः पूर्वेणैव सिद्धत्वादाह—**अजिति** । नन्वेवमाद्यसूत्रेण रुधात्वादावन्त्यस्येत्वापत्तिरत आह—**तृतीये इति** । 'अनुनासिक' इति सूत्रे इत्यर्थः । अनन्त्यानुनासिकहल इत्वविधानेन सूत्रसाफल्यसम्भवादाह—**अजित्यनुवृत्तीति** । अनुवृत्तावप्युक्तरीत्या वाक्यभेदेन तस्य विधायकत्वेऽनुवृत्तिर्व्यर्था, तां विनाऽपि तस्य सिद्धत्वात् । प्रकारान्तरेणाऽनुवृत्तस्याजित्यस्य विधायकत्वन्तु कथमपि दुर्वचं, तदेतदभिप्रेत्याह–**सामर्थ्यादिति** । 'भूसुवोस्तिङी'ति ज्ञापकान्महाव्याहृतिसूचनद्वारा मङ्गलार्थं तस्यादावुपादानाच्च भूधातौ दोषाभावादाह—**रुप्रभृताविति** । '**स्मृ**' इत्यादिघटादेर्मित्त्वसामर्थ्यात्, '**छिद्**'इत्यादौ तत्र तस्यानन्त्यत्वात्, '**ग्लै**' इत्यादे'रादेच उपदेश' इति ज्ञापकात्, '**पा**' इत्यादेः 'आतां सङ्क्षे'त्यादिज्ञापकान्न दोष इति यद्यपि सुवचं, तथापि **रु** इत्यादौ दोषसत्त्वात्, **प्रभृति**ग्रहणमत्र प्रकारार्थं, तस्यैवोक्तिस्त्वशोकवनिकान्यायेन । तरुवाचकत्वेन प्रसिद्धस्य'द्रु'–रित्यस्यासिद्धिप्रसङ्ग इति बोधयितुं चेति भावः । नन्वेवमपि द्रु-रु–प्रभृतौ दोष एव, अनन्तरस्येति न्यायेन 'अच'त्यस्यैव तेन नियमाऽङ्गीकारात्, न हि तत्र तस्य प्राप्तिरपि त्वाद्यस्यात आह—**योगेति** । अन्यथाऽनुनासिक इत्येकयोगेन विधिनैवेष्टार्थसिद्धौ तदानर्थक्यं स्पष्टमेव । चस्त्वर्थे, एवमग्रेऽपि । **तेन**=तृतीयसूत्रेण ।

नन्वेवमपि 'अनुनासिकश्चेदिद्भवति तर्ह्यजेवे'ति विपरीतनियमः कुतो न, तावतापि तृतीयसूत्रस्य सार्थक्य-

❀ ज्योत्स्ना ❀

रुप्रभृताविति । शब्दार्थकरुधातुप्रभृतिष्वित्यर्थः । **न दोष इति** । 'उपदेश'इति प्रथमसूत्रेणेत्सञ्ज्ञा-

❀ सदाशिवभट्टीयम् ❀

त्याहुः । **दशसूत्रावृत्ताविति** । अन्यथा हकारादेः सञ्ज्ञा ? उत अकारादेः ? इति दुर्निश्चेयं स्यादिति भावः ।

रुप्रभृताविति । 'अशोकवनिका'न्यायेनैतदुक्तिः, ज्ञापकादिना निवारणे तु 'तुरुस्तुशम्ये'त्यादिज्ञापकैक्यमपि व्यावर्त्येत्याहुः ।

❀ विषमपदविवृतिः ❀

व्याख्यायां **चन्द्रिकायां** बोध्यम् । **आवृत्त्येति** । हलित्यनेनोद्देश्यविधेयभावेन हल्सञ्ज्ञाविधानार्थमेकम् । 'आदिरन्त्येने'त्यनेनैकवाक्यतया यरादिप्रत्याहारार्थमपरमिति भावः । **रुप्रभृताविति** ।'रु शब्दे'इत्यादौ।

❀ वरवर्णिनी ❀

हल्सञ्ज्ञाविधानेऽपि आवर्त्तमान'ह'लितिसूत्रस्थलकारस्येत्सञ्ज्ञाया अबोधनाद्धल्झलादिप्रत्याहारासिद्धिरिति वाच्यं, लण्सूत्रस्थलकारस्य तादृशसमुदायघटकतया—हल्सञ्ज्ञायां तद्वृत्तिजात्याश्रयाणां सकललकाराणां हल्त्वाद्धलन्त्यमित्यनेनेत्सञ्ज्ञायाः सम्भवाद्धलादिप्रत्याहारनिष्पत्तौ बाधकाभावात् ।

नियमः। 'मिदचोऽन्त्या'दिति ज्ञापकाच्च न विपरीतनियमः, एवञ्च हल्ग्रहणमपि व्यर्थमन्योन्याश्रयश्च न।

न च पाणिनिसूत्रभेदे पारायणादावदृष्टहानिः, तथा च तत्र–तत्र भाष्यम्—'अपाणिनीयन्तु भवती'ति वाच्यं, कल्प्यमानन्यासस्य लघुत्वेऽस्यादोषत्वात्–, 'सूत्रभेदं तमुपाचरन्ति यत्र तदेवाऽन्यत्सूत्रं क्रियते, भूयो वा, यदि तदेवोपसंहृत्य क्रियते—नासौ सूत्रभेदः' इति 'अच उपसर्गात्तः' इति सूत्रभाष्यात्। 'नासौ सूत्रभेद' इत्यस्य—'दोषाये'ति शेषः, सति सम्भवे दृष्टद्वारैवाङ्गानामदृष्टार्थत्वमिति तदाशयः।

❀ अभिनव-चन्द्रिका ❀

अदृष्टार्थत्वमिति। न च 'सामर्थ्ययोगान्न हि किञ्चिदत्रे'ति भाष्येण पूर्वं किञ्चिच्छुद्धाऽदृष्टार्थवत्, किञ्चिद्दृष्टाऽर्थवदिति व्यवस्थापितम्, अत्र चाङ्गानां दृष्टद्वारैवाऽदृष्टार्थत्वं–'सूत्रभेदं तमुपाचरन्ती'ति भाष्येण व्यवस्थाप्यत इति परस्परभाष्यविरोध इति वाच्यम्, एतद्भाष्यस्य सिद्धान्त्युक्तित्वेन, तस्य चैकदेश्युक्तित्वेनादोषात्। वस्तुतस्तु 'लाघवादेवमेव न्यासः

❀ चिदस्थिमाला ❀

लाभात्, एवञ्च रुप्रभृतौ दोष एव, अत आह—**मिदिति**। हलामनुनासिकानां तथा सती-त्वाभावेन मितोऽसम्भवादिति भावः। प्रकृतमाह—**एवञ्चेति**। एवमर्थकसूत्रत्रयकरणे चेत्यर्थः, **अपिना**—प्रागुक्तगुरुभूतदशसूत्र्यावृत्तिपरिग्रहः। **चेन** तत्रावृत्त्यादिपरिग्रहः, एवञ्च सम्पूर्णसूत्रावृत्तिः किमर्थमिति भावः। **सूत्रभेदे इति**। ततो भेदे इत्यर्थः। तथा च=सूत्रतो भेदे तद्धानिमभिप्रेत्य च प्रवृत्तम्। अन्यथाऽपाणिनीयत्वोक्तेर्निस्सारत्वापत्तिः स्यात्, अदोषत्वात्। **त्वेस्य**=अपाणिनीयत्वस्य। हेत्वसिद्धिं परिहरति—**सूत्रेति**। उपाचरन्ति=कथयन्ति। तदेव=तदर्थकमेव। भूयो वा=तदपेक्षयाऽधिकं। तद्विशिष्टं वा, उपसंहृत्य=संक्षिप्य। ननु तावतापि वस्तुतः सूत्रभेदोऽस्त्येवेति भाष्यासङ्गतिरेवात आह—**नासाविति**। ननु कथं स न दोषाय, ततो जायमानस्य केवलाऽदृष्टस्येतोऽसिद्धेः, एवञ्च तदावश्यकत्वमत आह—**सतीति**। एवञ्च यदि शुद्धाऽदृष्टार्थकत्वं भवेत्तदा भवदुक्तं स्यात्तदेव न, दृष्टन्तु–कल्प्यमानलघुन्यासादेव, न तत इति तथा दुर्वचमिति भावः। 'सति सम्भवे'इत्यनेन प्रत्याख्यानस्थले शुद्धदृष्टार्थत्वमेवेति सूचितम्। **तदाशयः**='नासौ सूत्रभेद' इति वदतो भगवत आशयः। **अत एव**=तत्र तेषां तद्वारैव

❀ ज्योत्स्ना ❀

रूपो दोषो नेत्यर्थः। **ज्ञापकाच्चेति**। 'अनुनासिकश्चेदिद्भवति तर्ह्यजेवे'ति नियमेन नुमादीनामित्वानापत्ते'र्मिदचोऽन्त्या'दिति ज्ञापकत्वमित्यर्थः। **तदाशय इति**। पूर्वपक्ष्यभिप्रेततद्भाष्याशय इत्यर्थः। 'माहेश्वराणी'ति प्रतीके पाणिनिसूत्रन्यासस्य शुद्धाऽदृष्टार्थत्वव्यवस्थापनात् 'नासौ सूत्रभेद'इत्यस्य दृष्टप्रयोजनकोऽसौ न भवति, केवलादृष्टप्रयोजनकः सूत्रभेदो भवत्येवे'ति तु परमार्थः। **प्रकाश-**

❀ वरवर्णिनी ❀

सामर्थ्यादिति। अच्पदानुवृत्तिविरहे तु मनिनादौ मकारादेरित्सञ्ज्ञार्थं तद्विधायकमेव स्यादिति भावः। 'उपदेशे इदन्त्य'मित्यनेनापि रुप्रभृतौ नेत्त्वमित्याह—**व्यवहितस्यापीति**।

मिदचोन्त्यादिति। इदमुपलक्षणं—'ञ्नित्यादिर्नित्यम्' 'अचोञ्णिती'त्यादेरपि। **विपरीतेति**। 'अनुनासिकश्चेदिद्भवति तर्ह्यजेवे'ति वैपरीत्येन नियमे 'मिदचोऽन्त्या'दित्यादेर्वैयर्थ्यं स्यात्, मकारादेरनुनासिकतयाऽज्भिन्नतया च नियमाक्रान्तत्वादित्त्वाप्राप्तेर्मितामसम्भवादित्याशयः। उपाचरन्ति=वर्णयन्ति, 'आचार्या' इति शेषः। तदेव=तावत्प्रमाणकमेव, अन्यत्=अन्यथा, सन्निवेशभेदेनेति यावत्। भूयो वा=ततोऽधिकं वा। उपसंहृत्य=संक्षिप्य, अल्पप्रमाणम्। सूत्रभेदस्यानुपूर्वीभेदे स्पष्टं प्रतीतेराह—**दोषायेतीति**। **दृष्टद्वारैवेति**। तेनानुपूर्वीभेदेप्यदृष्टहानिर्नाशङ्क्येत्याशयः। **अतिगौरवमिति**। अप्राप्तकल्पना-प्राप्तबाधादिदोषत्रययुक्तो हि नियमः, एवञ्च नियमाश्रणेऽतिगौरवं स्पष्टमेवेत्याशयः।

अत एव तत्र-तत्र ज्ञापकपरसकलभाष्योच्छेदो नेति चेन्न, योगविभागनियमज्ञापकाश्रयणेऽतिगौरवात्, न हि 'वर्णाभिव्यक्तिजनक-कण्ठाद्यभिघातगौरवमेवादर्त्तव्यं, न तु ज्ञानजनकमनोव्यापारगौरव'मिति—राजाज्ञाऽस्ति ! ।

न च 'सह आ=समन्ताद्, एति=गच्छतीति–सहेता=मध्यमो वर्ण'इत्यर्थ इत्यतो नान्योन्याश्रय इति वाच्यम्, अन्योन्याश्रय-तत्परिहारादीन् वदता भाष्यकारेण—

❀ अभिनव-चन्द्रिका ❀

पाणिनिना कस्मान्न कृतः ? इति पूर्वपक्ष्याशय इति नापाणिनीयत्वशङ्कालेशः, नापि परस्परं भाष्यविरोधः, एवमेव सर्वेषु लघुन्यासपूर्वपक्षेषूह्यमिति दिक् । **आ समन्तादिति** । 'ओमाङोश्चे'ति पररूपे 'सहेते'इति रूपसिद्ध्यर्थमिदम् । **अतः सूत्रावृत्येति** । इदं 'न चे'त्यतः प्रागेव वक्तव्यमित्यवोचाम ।

❀ चिदस्थिमाला ❀

तदर्थत्वादेव । ननु न मात्रा-पदगौरवमत आह—**न हीति** । अस्य–'अस्ती'त्यत्रान्वयः । वर्णनित्यत्वादाह—**वर्णाभीति** । **नारायणादि**स्वीयसिद्धान्तमतं खण्डयति—**न चेति** । **सहेति** । युगपदित्यर्थः । आङोऽर्थमाह—**सममिति** । 'एती'त्यस्यार्थमेवाह—**गच्छतीति** । बुद्धिविषयमिति भावः । क्वचि 'देती'त्यस्यापि पाठ एव, युक्तश्च सः । एवं योगार्थमुक्त्वा रूढ्यर्थमाह—**मध्येति** । आद्यन्तसमभिव्याहाराच्चास्य लाभः । 'स्वं रूप'मित्यनुवृत्त्याऽऽदेः सञ्ज्ञा, वृद्धिगुणादिसञ्ज्ञास्विव सामानाधिकरण्यात्सञ्ज्ञात्वावगतिः तथा च मध्यमो वर्णः-अन्त्येन सहित आदिरणित्यादिसञ्ज्ञको भवतीत्यर्थः फलितः । सहेते'ति रूपसिद्धिस्तु आ-एतेत्यत्रै**ङिपरे**'ति पररूपं कृत्वा **ओमाङोश्चे**'ति पररूपकरणेन बोध्या । एतद्रूपसिद्ध्यर्थमेवाङः प्रक्षेप इति बोध्यम् ।

नान्योन्येति । नान्योन्याश्रयशङ्कापीत्यर्थः । 'एवं सती'त्यस्य तत्रानिर्देशादिति भावः । शङ्काया अज्ञानतः सम्भवायाह—**तत्परीति** । आदिनाऽऽक्षेपतथोक्त्यादिपरिग्रहः । **कटीवीत्यत्रेति** । 'कटी'त्यत्र 'वी'त्यत्र चेति भावः । इङ् अध्ययने' इक् स्मरणे'इत्यनयोर्नित्यमधिपूर्वकत्वादनुल्लेखः ।

❀ ज्योत्स्ना ❀

कृन्मतं दूषयति-'**न चेति** । 'इणगतावित्यतश्चे' त्यपपाठो–बृहच्छेखरे दर्शनात्, इण आङा 'एत्येधती'ति वृद्धेर्दुर्वारत्वादिति तत्रैव दूषितत्वाच्च । 'पूर्वं धातुरुपसर्गेण युज्यत'इति पक्षेऽन्तरङ्गत्वादाद्गुण

❀ सदाशिवभट्टीयम् ❀

मनोव्यापारगौरवमिति । नन्वत्र किं गौरवं ? योगविभागप्रयुक्तं तु न, आवृत्तिङ्कुर्वता त्वयापि वाक्यार्थद्वयस्वीकारात्, नियमप्रयुक्तन्तु–हलग्रहणेन निमातव्यम्, ज्ञापकन्त्वावृत्तिसत्त्वे 'न विभक्तौ'त्याद्याश्रयणीयमेवेति न तत्क्तमपि, तर्कितन्यासेऽन्योऽन्याश्रयशङ्कैव नोदयत इति **चेत्सत्यम्**, अनन्तरन्यायबाधे योगविभागसामर्थ्याश्रयणे तत्सत्त्वात्, तस्मादपाणिनीयदोषाददुष्टोयं न्यास इति बोध्यम् ।

मध्यमो वर्ण इति । वृद्धिगुणादिसञ्ज्ञास्विव सञ्ज्ञात्वावगतिः सामानाधिकरण्यात्, तथा च मध्यमो वर्णः

❀ वरवर्णिनी ❀

आ इति । 'ओमाङोश्च'तिपररूपप्रवृत्तये आङ उपादानम् । **सहेतेति**–सहेतृशब्दस्य प्रथमैकवचनेरूपमिति तत्त्वम् । **इत्यर्थ इति** । सहेता—मध्यमो वर्णः—अन्त्यसहितादिसञ्ज्ञकः स्यादित्यर्थः, [अणादिसञ्ज्ञः स्यादिति यावत्] सहेता सञ्ज्ञी, आद्यन्तौ सञ्ज्ञेति भावः । **अनन्वितार्थत्वं**—समन्ताद्गमनाभावात् । चो–हेतौ । यतोऽनन्वितार्थत्वमतो—व्यर्थत्वमित्यर्थः ।

'कटी' 'वी'त्यत्र प्रश्लिष्टादीङ्गताविल्यतश्च 'सहाऽऽङ्'पूर्वात्तृजभावबोधनात् । किञ्च योगमर्यादया तत उक्तार्थालाभः, 'आ समन्ता'दित्यस्यानन्वितार्थत्वं–व्यर्थत्वञ्च, रूढौ तु न मानमतः सूत्रावृत्त्या तं परिहरति—**हलन्त्यमिति ।**

भाष्येऽप्यन्योन्याश्रयमाशङ्क्य—'हलन्त्यमित्सञ्ज्ञं भवति, लकारश्चेद्भवतीति वक्तव्य'-मित्युक्त्वा-'एकशेषनिर्देशाद्वा सिद्धम्, हल् च हल् च हल्–हलन्त्यमित्' इत्युक्तम्। तस्यायं भावः,—'कृतैकशेषेण हल्पदेन सम्बन्धसामान्यषष्ठ्या समासोऽन्त्यशब्दस्य च द्वन्द्वान्ते

❀ अभिनव-चन्द्रिका ❀

षष्ठ्येति । अयं च ग्रन्थः 'आदेशप्रत्यययो'रिति सूत्रस्थशब्दरत्नेन साकं विरुणद्धि, तत्र हि—

❀ चिदस्थिमाला ❀

सहाङ्पूर्वादिति । अनेन केवलादाङ्पूर्वाच्च तत्सत्ता बोधिता । **तृजिति ।** ताच्छील्यादेरभावा-त्तृनस्त्वप्रसङ्ग एवेति भावः । **बोधनादिति ।** एतेन—'नवीना'स्त्वित्यारभ्य 'नास्तीत्याहु'रित्यन्तेनैतन्मत-लेखनानन्तरं'—'तन्न, एवं सति वृध्या सहैते'ति रूपापत्तेः । वस्तुतस्तु सह आयतीति सहेता, इट-किट-कटीत्यत्र प्रश्लिष्टस्य भविष्यतीति'—'आदिरन्त्येने'त्यत्र **कौस्तुभे** दृश्यमानः काचित्कः पाठः परास्तः ।

एवं योगरूढिपक्षे दोषमुक्त्वा—शुद्धयोगपक्षे तत्साधारणं दोषमाह—**किञ्चेति ।** 'यत' इति शेषः । सर्वत्राग्रेप्येवम् । आङो रूपसाधनार्थमावश्यकत्वादाह—**आ समन्तादित्यस्येति ।** इदमग्रेप्यन्वेति । 'उपपादनमध्ये'इति शेषः । **चेन**-इण्धातुपक्षे रूपासिद्धिसमुच्चयः, एत्येधेति'वृद्धेर्जागरूकत्वात् । नन्वसता-प्यवयवार्थेन रथन्तरादिवद्व्युत्पादनं साधुत्वार्थमत आह—**रूढौ त्विति ।** शुद्धरूढौ त्वित्यर्थः । कोशादि-तात्पर्यग्राहकाभावादिति भावः । **अतः**=प्रकारान्तरस्यासम्भवात् । **तम्**=अन्योन्याश्रयम् । सम्पूर्णसूत्रा-वृत्तिर्भगवतोप्यभिमतेत्याह—**भाष्येप्येति ।** **वक्तव्यमितीति ।** अस्यान्त्ये एव सम्बन्धः । कैयटीयव्याख्या-नस्य दूष्यत्वादाह—**तस्येति ।** 'अन्त्यशब्दस्ये'त्यस्य मध्यमणिन्यायेनान्वयः । **चो** व्युत्क्रमे, अन्वय-श्च । कर्मधारये त्वन्त्यशब्दस्य पूर्वनिपातापत्तिः, आद्ये प्रथमानुपपत्तिश्च । यथा कथञ्चिदुपपादनापेक्षयाऽ-

❀ सदाशिवभट्टीयम् ❀

अन्त्येन सहादिसञ्ज्ञको भवतीत्यर्थः । रूपसिद्धिस्त्वा एत इत्यत्रैङीति पररूपं कृत्वौमाङोश्चेति पररूपकरणेन बोध्या, अत एवाङत्र । **रूढौ तु न मानमिति ।** नचावृत्तौ यन्मानं तदेव मानन्तत्रेति वाच्यं, शङ्कापर-भाष्यादितस्तदभावानुमितेरित्यूह्यमिति । यत्त्वत्र प्रकरणे द्विवचनेनैव निर्देष्टव्यं स्यादिति **पाठकस्तन्न**,[1] 'नपुंसक-

❀ विषमपदविवृतिः ❀

इण्गताविति । इदं चिन्त्यं-तस्मिन्ने'त्येधत्यूठ्'स्वितिवृद्धौ सहेतेतिरूपानिष्पत्तेः । **व्यर्थत्वं चेति ।** चेन–'ञमङणे'ति णादिभिरणादिप्रत्याहारापत्तिर्बोध्या । **सम्बन्धसामान्येति ।** अवयवावयविभावस्यै-

❀ वरवर्णिनी ❀

सम्बन्धसामान्येति—निरूप्यनिरूपकभावसम्बन्धार्थकेत्यर्थः । 'हल्रूपान्त्य'मित्यत्र हल्यपि व्यपदेशिवद्भावेन—हलिनिरूपितान्त्यत्वस्यारोपादन्त्यत्वे हलिनिरूपितत्वस्य सम्भवात् । एवं राहावपि स्वनिरूपितावयवत्वारोपेण 'राहोःशिर' इत्यादावपि निरूपितत्वं सुलभम् । नचावयवावयविभावार्थक-षष्ठ्या–एव समासेऽपि न दोषः, 'हल्सूत्रान्त्य'मित्यर्थे 'हल्रूपान्त्य'मित्यर्थे चावयवावयविभावस्यैव षष्ठ्यर्थ-तया भानादिति वाच्यम् । 'हल्सूत्रान्त्यमि'दित्यर्थे—मुख्यस्य, 'हल्रूपान्त्य'मित्यर्थे 'राहोःशिर' इति वदारोपितस्य च—अवयवावयविभावस्य—भानेन मुख्यत्वारोपितत्वभेदेन सम्बन्धभेदाभ्युपगमात् ।

एकशेषनिर्देश इति । परे तु सम्पूर्णसूत्रावृत्तिरेव भाष्यसम्मता, एकशेषस्तु न युक्तः, हल्सूत्रबोधक-

१. उदयङ्करपाठकः ।

श्रूयमाणस्यैवोभयत्रान्वयः, एवञ्च हल्सूत्रान्त्यं हल्रूपान्त्यञ्चेति बोधः, अन्त्ये—'राहोः शिर' इतिवत्षष्ठी'ति । अत्रोच्चारयितुरेकशेषनिर्देशोबोद्धुस्त्वावृत्त्या बोधः । 'हसमीपो

❀ अभिनव-चन्द्रिका ❀

'एकापि षष्ठी विषयभेदाद्भिद्यते'इति मूलं खण्डयित्वा—'प्रत्ययपदं–प्रत्ययावयवे लाक्षणिक'मित्याद्युक्तम्, अत्र च मनोरमोक्तमेवाश्रितमिति तद्विरोधः स्पष्ट एव । वस्तुतश्चिन्त्य एवायं ग्रन्थः—षष्ठ्या सम्बन्धत्वेन सम्बन्धद्वयावगाहिबोधस्यानुभवसिद्धव्युत्पन्नत्वाभावात् । अत एव राजपुरुषः

❀ चिदस्थिमाला ❀

न्यत्र क्लृप्तगतिरेवोचितेति भावः । **एवञ्च**=तथान्वये च । **यद्यप्यागन्तूनामिति** न्यायेन तस्यान्त्ये निवेशस्तथापि 'श्रौतक्रमा'दिति न्यायेन, तस्यादावावश्यकतया चाह—**हल्सूत्रान्त्यमिति** ।

ननु द्वितीयवाक्यार्थे षष्ठ्यनुपपत्तिरत आह—**अन्त्येति** । नन्वेवमप्यावृत्त्यलाभेन कथं सम्मतिदानमत आह–**अत्रोच्चेति । आवृत्त्येति** । पूर्वं तज्ज्ञानाभावेन क्रमिकबोधस्यैव वाच्यतयाऽऽवृत्तेर्बोद्धुरावश्यकत्वात् । एवञ्च कण्ठतस्तथा नोक्तमपि तदभिमतमेव, अत्र पक्षे पदद्वयावृत्तेरुक्तरीत्याऽऽवश्यकत्वे षष्ठ्यर्थान्वयक्लेशोऽन्त्ये इति तमसहमानो **मूलकृ**दावृत्तिमेव सम्पूर्णस्य दर्शितवान् । नन्वेवं भाष्यव्याख्याने

❀ सदाशिवभट्टीयम् ❀

मनपुंसकेने'त्येकवचनं, तस्याप्येकशेषस्थानापन्नत्वात् । स्पष्टञ्चेदं प्रकृतसूत्रे कैयटे एव । नन्वेवमपवादबोधात्पूर्वमुत्सर्गवाक्यस्य लक्ष्यसंस्कारकत्वोपपत्तावुदासीनविषय इवापवादविषयेपि प्रवृत्त्यापत्तौ 'पश्चाद्भुक्तवन्तम्प्रतिब्रूयान्मा भुक्था इति तेन किंकृतं स्या'दिति 'स्थानेन्तरतम' सूत्रभाष्योक्तन्यायबोधितापवादशास्त्रवैयर्थ्यापत्तिमूलकेन

❀ विषमपदविवृतिः ❀

कत्वेऽप्येकत्र तस्य मुख्यत्वमपरत्र तस्यारोपितत्वमित्येतावता भेदमाश्रित्येदमुक्तमिति ध्येयम् । नचास्यामवस्थायां सहविवक्षाया असम्भवादेकशेषस्याप्यसम्भव इति वाच्यम्, 'एकशेषनिर्देशाद्वा सिद्धं

❀ वरवर्णिनी ❀

हल्पदार्थस्यान्त्यपदार्थेनान्वयेऽपि—अथ यावत्-हकारादिलान्तसमुदायबोधकहल्पदशक्तिग्रहाभावेन—तस्यान्त्यशब्देनान्वयविरहेण—अन्त्यपदार्थनिष्ठविशेष्यतानिरूपितप्रकारताश्रयत्वस्यैकदा हल्पदार्थयोरसम्भवेन—एकधर्मावच्छिन्ननिष्ठविशेष्यतानिरूपितप्रकारताप्रयोजकत्वरूपसाहित्यविरहात् । **नच** पाणिनेर्द्वितीयहल्पदार्थज्ञानस्यापि तदानीं सत्त्वात्साहित्यसम्भव इति वाच्यं, 'करिष्यमाणशक्तिग्रहोपायकपदस्य तदभिप्रायेणाचार्यस्य पूर्वमप्रयोग'इत्यादिना **हलन्त्यसूत्रशब्दरत्ने**ऽस्य दूषितत्वात् । **नचै**कस्य हल्पदार्थस्य ज्ञानात्तत्रान्त्यपदार्थनिष्ठविशेष्यतानिरूपितप्रकारतामाश्रित्य बोधे जाते, पश्चात्क्रमेण द्वितीयहल्पदार्थे ज्ञातेऽपरो बोध इति वाच्यं, बोधद्वयस्यान्त्यपदावृत्तिमन्तरेणासम्भवेन प्राचीनमतानुप्रवेशापत्तेः । **किञ्च**—हल्पदवाच्यत्वेन यथाकथञ्चिद्धल्पदार्थज्ञानादेकशेषसम्भवेपि—द्वितीयहल्पदनिष्ठशक्तेरद्य यावदज्ञातत्वेनैतत्पदार्थोपस्थित्यभावात्पूर्वं पदार्थद्वयविषयको बोधो वक्तुमशक्यः, 'खले कपोत' न्यायेन–बोधद्वयस्यैकदैवोदयात् । 'राजपुरप्रवेश'न्यायेन क्रमिकबोधाङ्गीकारादवान्तरबोधेपि—तद्बोधे एकहल्पदार्थस्य भानाभावादित्याहुः ।

द्वन्द्वान्त इति । अन्तशब्दः समीपार्थः । **उभयत्रान्वय इति** । एकधर्मावच्छिन्नान्वयित्वरूपसाहित्ये एव द्वन्द्वविधानात्प्रत्येकान्वयाभावे द्वन्द्वस्यासाधुत्वापत्त्या प्रत्येकमन्वयोऽभ्युपेयते, इत्येतद्युक्तिमूलक एव 'द्वन्द्वान्ते'इति न्यायः, सा च युक्तिरेकशेषेऽपि समेति तत्रापि तथान्वय उचित एव । एकशेषस्य द्वन्द्वापवादतया तथौचित्याच्चेति भावः । **समीप इति** । फलाभावादत्रार्थेऽन्त्यपदासम्बन्धोबोध्य इतिकैयटाशयः ।

लकार इत्, हल्रूपान्त्यञ्चे'ति कैयटोक्तव्याख्यायान्तु–'हल् इत्सञ्ज्ञम्भवति, हलन्त्यञ्चे'दिति वदेदित्यूह्यम् ।

नन्वेवमपि 'न विभक्तौ'विति विभक्तिपदबोद्ध्यसुप्तिङ्बोधो 'हलन्त्य'मिति वाक्यार्थबोधोत्तरं, तद्बोधश्चापवादवाक्यार्थबोधोत्तरमित्यन्योन्याश्रयस्तदवस्थ एवेति चेन्न, अपवादवाक्यार्थबोधात्पूर्वं पदपदार्थोपस्थितावुत्सर्गवाक्यार्थबोधे प्रतिबन्धकाभावात् ।

❀ अभिनव-चन्द्रिका ❀

इत्यादौ—सम्बन्धत्वेन रूपेण स्व-स्वामिभाव–जन्य-जनकभावयोर्भानं न भवति, प्रकृते तेन रूपेण सम्बन्धभाने तु–'एकरूपावच्छिन्नस्यैकरूपावच्छिन्नसंसर्गेण एकरूपावच्छिन्नेऽन्वयबोधेच्छारूप'सहविवक्षाया अभावेनैकशेषाप्राप्तेः । 'सहविवक्षाया असम्भवा'दिति प्रतीकस्थ**शब्दरत्नो**क्तदिशा सहविवक्षाया असम्भवाच्च । **अन्योन्याश्रयस्तदवस्थ एवेति** । न च प्रकृते चक्रकमित्यन्योन्याश्रयकथनमसङ्गतमिति वाच्यम्, उभयोरप्येकरूपेणैव दूषकतायाः सत्त्वेन क्षतिविरहात् ।

❀ चिदस्थिमाला ❀

सर्वावृत्तिलाभस्तदेव न, कैयटेनान्यथा व्याख्यातत्वादत आह—**हसमीपइति** । हस्य-ल्-हलिति समास इति भावः । **व्याख्यायान्त्विति** । 'भगवदभिमताया'मिति शेषः । समासानुपपत्त्यादिदोषान्तरमप्यन्यत्र स्पष्टं, तदाह—**इत्यूह्यमिति** ।

एवमपि=उक्तान्योन्याश्रयपरिहारेऽपि । **इति विभक्तीति** । इतिसूत्रघटकविभक्तीत्यर्थः । सुबादिसिद्धिस्तदधीनत्वाद्वाक्यार्थबोधाय च तस्यावश्यकत्वमिति भावः । तद्बोधश्च = 'हलन्त्य'मिति वाक्यार्थबोधश्च । **—पवादेति** । 'न विभे'ति निषेधेत्यर्थः । नन्वपवादवाक्यार्थज्ञानमेव प्रति-

❀ ज्योत्स्ना ❀

इत्यपि न, वृद्धेरनवकाशत्वात् । **इत्यूह्यमिति** । यद्यपि–भाष्ये हल्च हल्च हलित्येकवचननिर्देशाच्छास्त्रप्रयोगसंस्कारफलको विभक्तयन्तैकशेषो विवक्षितः । स च 'द्विर्वचनेऽची'त्यादावसहविवक्षायामिव प्रकृतेऽन्त्यपदार्थसापेक्षस्यापि भवतीति 'हलन्त्यमि'दित्येतावन्मात्रादन्त्यं हल्, हल् चेत्सञ्ज्ञं भवतीत्यर्थद्वयस्यापि क्रोडीकारः । सहविवक्षासद्भावाच्च हलित्येकशब्दप्रयोगः, यत्र च नास्ति सहविवक्षा

❀ वरवर्णिनी ❀

ऊह्यमिति । परे तु हसमीपो लकार इत्यर्थेऽपि अन्त्यपदसम्बन्ध आवश्यक एव, अन्यथा 'हल विलेखने' इत्यत्र लस्येत्वापत्तिः, अन्त्यपदसम्बन्धे तु तत्सामर्थ्यादुपदेशान्त्यस्यैव ग्रहणान्न दोषः, तत्राकारस्यैवोपदेशान्त्यत्वादिति—तत्राप्यन्त्यपदसम्बन्धार्थमेव कैयटेन च तथा नोक्तमिति,—**शेखर**श्चिन्त्य एवेत्याहुः । **अन्योन्याश्रय इति** । नन्वत्र-—'हलन्त्य'मित्युत्सर्गवाक्यार्थबोधो 'न विभक्तौ'वित्यपवादवाक्यार्थबोधोत्तरं, तद्बोधश्च विभक्तिपदार्थज्ञानाधीनः, विभक्तिपदार्थज्ञानञ्च सुप्तिङ्पदार्थज्ञानाधीनं, सुप्तिङ्पदार्थज्ञानन्तु 'आदिरन्त्येने'तिवाक्यार्थबोधाधीनं, तद्बोधश्चेत्पदार्थज्ञानाधीनः, तच्च हलन्त्यमिति ज्ञानाधीनं, तच्च 'न विभक्तौ'वितिवाक्यार्थज्ञानाधीनमिति चक्रकमेवेति चेत्सत्यम्, चक्रकेऽन्योन्याश्रये च स्वप्रयोज्यप्रयोज्यत्वरूपस्यैव दोषतयाऽन्योन्याश्रयसाधर्म्याच्चक्रकेऽपि तत्पदप्रयोग इत्यवधेयम् । विस्तरस्त्व**भिनवराजलक्ष्म्यामनु**सन्धेयः । **पदपदार्थोपस्थिताविति** । शाब्दबोधे तात्पर्यनिश्चयत्वेनैव कारणत्वं, न तु तात्पर्यप्रमात्वेन, तदेवमपवादवाक्यार्थ-बोधात्पूर्वं हलपदे तात्पर्यप्रमात्वविरहेऽपि तात्पर्यनिश्चये बाधकाभावादुत्सर्गवाक्यार्थबोधः सम्भवत्येवेत्याशयः । अपवादवाक्यार्थबोधात्पूर्वमुत्सर्गेण दध्यत्रेत्यादौ यणादिकार्यं मास्तु, उत्सर्गवाक्यार्थबोधे तु न किमपि बाधकं पश्याम इति तत्त्वम् ।

न ह्यभावज्ञाने प्रतियोगिज्ञानस्येव प्रतियोगिज्ञानेऽभावज्ञानस्य कारणता कस्यापि सम्मता, प्रतियोगिज्ञानं विना निषेधवाक्यार्थाऽसम्भवाच्च ।

'पूर्वं ह्यपवादा अभिनिविशन्ते पश्चादुत्सर्गाः' इत्यस्य त्वयं भावः—'लक्षणैक-

❀ अभिनव-चन्द्रिका ❀

प्रतियोगिज्ञानस्येवेति । चिन्त्यमिदम्—'अभावः पदार्थः' 'अभावः प्रमेयः' 'अभावश्चतुर्विधः' इत्यादौ प्रतियोगिज्ञानाभावेपि अभावज्ञानस्य जायमानत्वेनाभावज्ञानत्वेन प्रतियोगिज्ञानत्वेन कार्यकारणभावस्याप्रामाणिकत्वात् । न च प्रतियोगिविशेषिताभावज्ञानं प्रतियोगिज्ञानमन्तरा न भवतीति प्रतियोगिज्ञानं—प्रतियोगिविशेषिताऽभावज्ञानं प्रति कारणं, तथा च मूलस्थाभावज्ञान इत्यस्य प्रतियोगिविशेषिताभावज्ञान इत्यर्थ इति नासङ्गतिरिति वाच्यं, विशिष्टबुद्धित्वेन कार्यकारणभावस्य क्लृप्तत्वेन तेनैव प्रतियोगिविशेषिताऽभावबुद्ध्युपपत्तौ निरुक्तकार्यकारणभावस्य निर्युक्तिकत्वात् ।

अन्ये तु—'नञ्पदार्थतावच्छेदकं यद्विलक्षणं रूपं, तेन रूपेणाभावज्ञानं प्रतियोगिज्ञानमन्तरा न सम्भवति, अत एव 'ने'त्युक्तौ 'किं ने'ति जिज्ञासावश्यमुदेति, तथा चा'भावज्ञाने'इत्यस्य नञ्पद-वाच्यतावच्छेदकविलक्षणरूपेणाभावज्ञाने इत्यर्थ इति नासङ्गति'रित्याहुः । **निषेधवाक्यार्थासम्भ-**

❀ चिदस्थिमाला ❀

बन्धकमत आह—**प्रतीति । वाक्यार्थेति ।** तज्ज्ञानेत्यर्थः । नन्वेवमपवादबोधात्पूर्वमुत्सर्ग-वाक्यस्य लक्ष्यसंस्कारकत्वापत्तावुदासीनविषये इवापवादविषयेपि प्रवृत्त्यापत्तौ 'पश्चाद्धुक्तवन्तं प्रति प्रब्रूयान्मा भुक्था—इति किं तेन कृतं स्या'दिति '**स्थानेन्तरतम**' इति सूत्रभाष्योक्तन्यायबोधितापवादशास्त्र-वैयर्थ्यापत्तिमूलकेन—प्रातिपदिकार्थसूत्रभाष्यपठितेन—'पूर्वं ह्यपवादा अभिनिविशन्ते पश्चादुत्सर्गा' इति न्यायेनोत्सर्गवाक्यार्थबोधात्पूर्वमपवादवाक्यार्थबोधस्यावश्यकत्वसूचनेन प्रागुक्तरीत्या सुप्तिङ्निष्पत्त्यभावेना-न्योन्याश्रयस्तदवस्थ एवात आह—**पूर्वं ह्येति ।** इयं लक्षणैकचक्षुष्काशयेत्याशयेनाह—**लक्षणैकेति ।**

❀ ज्योत्स्ना ❀

तत्रैकशब्दप्रयोगो न कृतः । 'द्विर्वचनञ्च 'द्विर्वचनञ्च—द्विर्वचनं, द्विर्वचने कर्तव्ये द्विर्वचनेऽचिप्रत्यये' इति यथेति कैयटोक्तव्याख्यायास्तात्पर्यं शक्यं वर्णयितुम् । सम्बन्धसामान्यार्थकषष्ठ्याऽन्यशब्दस्य

❀ सदाशिवभट्टीयम् ❀

प्रातिपदिकार्थसूत्रभाष्यपठितेन 'पूर्व'मित्यादिन्यायेनोत्सर्गवाक्यार्थबोधात्पूर्वमपवादवाक्यार्थबोधस्यावश्यकत्व-सूचनेन प्रागुक्तरीत्या सुप्तिङ्निष्पत्त्यभावेनान्योऽन्याश्रयस्तदवस्थ एवात आह—**पूर्वं ह्यपवादेत्यादि । इति**

❀ वरवर्णिनी ❀

निषेधवाक्यार्थेति । सङ्केतसम्बन्धेनेत्पदस्याप्रसिद्धत्वात्—अप्रसिद्धप्रतियोगिकाभावज्ञानस्य च नैयायिकै-रनङ्गीकारात्तादृशेत्पदाभावबोधनासम्भवादित्यर्थः । नचो'पदेशेजनुनासिक'इत्यस्य वाक्यार्थबोधे बाधका-भावेन सङ्केतसम्बन्धेनेत्पदवत्त्वस्य प्रसिद्धेस्तत्प्रतियोगिकाभावबोधनं सम्भवतीति वाच्यम्, हलन्त्यमिति वाक्यार्थबोधात्पूर्वमच्पदार्थज्ञानाभावेनोपदेशेऽजित्यस्यापि वाक्यार्थासम्भवात् । नचालीकप्रतियोगिकाभावस्य नैयायिकमतेऽभावेपि शाब्दिकमते तत्सत्त्वे बाधकाभाव इति वाच्यम्, प्रतियोगिज्ञानं विना निषेधस्य= निषेधशास्त्रजन्यबोधस्य योऽर्थः=फलं—लक्ष्ये प्रवृत्तिः, तदसम्भव इत्यर्थेनादोषात् ।

न च 'न विभक्तौ' वित्यत्रेदित्यस्यानुवृत्तेः श्रवणेन्द्रियेणैव प्रतियोगिनः प्रत्यक्षस्य सम्भवात्, घटकत्व-सम्बन्धेन वाक्ये तत्प्रसिद्धेश्च 'न विभक्तौ'वित्यस्य वाक्यार्थबोधः सुलभ इति वाच्यम्, घटकत्वसम्बन्धेने-त्पदस्य प्रसिद्धावपि सङ्केतसम्बन्धेनेत्पदाप्रसिद्धेः, येन सम्बन्धेन यदभावः प्रत्याय्यस्तेनैव सम्बन्धेन प्रति-योगिप्रसिद्धेरावश्यकत्वात् । **लक्षणैकचक्षुष्कस्येति ।** लक्षणं=पाणिनिसूत्रमेव, एकं=प्रधानं, चक्षुः=

चक्षुष्कस्य उद्देश्यतावच्छेदकावच्छिन्ने सर्वत्रोत्सर्गकृतसंस्कारबुद्धावुत्सर्गापवादयोर्विषयव्यव-स्थानापत्त्या,—'भुक्तवन्तम्प्रति मा भुक्था' इति वाक्यस्येव—अपवादशास्त्रवैयर्थ्यापत्त्या

❀ अभिनव-चन्द्रिका ❀

वाचेति। इदमपि चिन्त्यं,—'न विभक्तौ'त्यादावितिपदस्यानुवृत्तत्वेन श्रवणेन्द्रियेणैव प्रतियोगि-ज्ञानस्य जायमानत्वेन पाणिनिसङ्केतसम्बन्धावच्छिन्नेत्पदवत्त्वावच्छिन्नप्रतियोगिताकाभावबोधस्य 'हलन्त्य'मिति वाक्यार्थबोधात्प्रागपि 'न विभक्तौ'त्यादेः शाब्दबोधसम्भवात्। निषेधसाफल्याय निषेध्यबोधसापेक्षत्वेपि निषेधवाक्यार्थबोधं प्रति निषेध्यवाक्यार्थस्य कारणत्वे मानाभावाच्च।

उद्देश्यतावच्छेदकावच्छिन्न इति। अयं भावः-असति बाधके उद्देश्यतावच्छेदकावच्छेदेन विधया-

❀ चिदस्थिमाला ❀

अस्य—बुद्धि-पर्यालोचन-निर्णय-संस्कारेष्वन्वयः। 'प्रागुक्तरीत्योत्सर्गवाक्यार्थबोधस्य जातत्वेनापवादवाक्यार्थ-बोधात्पूर्व'मिति शेषः। **उद्देश्यतेति**। 'उत्सर्गशास्त्रीये'त्यादिः। **सर्वत्र**=उदासीनविषये, अपवादविषये च।

विषयेति। लक्ष्यभेदेत्यर्थः। अनापत्त्या=अनुपपत्त्या। क्वचित्तथैव पाठः। ननु तदा तस्यैव वैयर्थ्यमिति तदनुपपत्तिदोषो न युक्तोऽतस्तदेवाह—**भुक्तेति**। 'वाक्यस्येवापवादशास्त्रस्य वैयर्थ्यापत्त्या चापवादशास्त्र-

❀ ज्योत्स्ना ❀

समासाभिप्रायकव्याख्याने तु'इरयो रे'इत्यत्रेव न्याय्ये एकशेषे—हल्च हल्च हलौ, हलन्त्यमिदिति द्विवचनेनैव निर्देष्टव्यं स्यात्तथापि हसमीपो लकार इत्यर्थे हस्य लिति षष्ठीसमासानापत्तिः, सामीप्यस्या-षष्ठ्यर्थत्वादित्यादि दीक्षितोक्तदूषणोपलक्षणमेतदितीह परमार्थः। वस्तुतो 'ग्रामकूपो' 'गङ्गातीर'-मित्यादिसमासात्सामीप्यार्थप्रतीतेरानुभविकत्वेनैषोऽप्यदोष इत्यन्यत्र विस्तरेण निरूपणायावद्धाधं साधु।

'भुक्था इति पाठः, लुङि श्नमभावात्। न च निरनुबन्धे माशब्दे उपपदे लङि भविष्यति, तस्य स्वयमनङ्गीकारात्। ननूत्सर्गकृतसंस्कारबुद्धावप्यपवादशास्त्रारम्भसामर्थ्याज्जातनिवृत्त्या नाव्यवस्थेत्यत आह—**इति वाक्यस्येवापवादशास्त्रस्येति**। नैरर्थक्यस्य साधारणधर्मस्य गम्यमानत्वादप्रयोगः।

❀ सदाशिवभट्टीयम् ❀

वाक्यस्येवापवादशास्त्रस्येति। 'वाक्यस्येवापवादशास्त्रस्य वैयर्थ्यापत्त्या चापवादशास्त्रपर्य्यालोचनेने'त्येव पाठः

❀ वरवर्णिनी ❀

प्रमाणं यस्य-तस्य तथाभूतस्येत्यर्थः। अलौकिकज्ञानरहितानां पाणिनिसूत्रमात्रावलम्बनेनैव साधुत्वासाधुत्वे निश्चिन्वतामस्माद्दृशामिति यावत्। पाणिनिप्रभृतयो लक्ष्यैकचक्षुषः, वयं लौकिकास्तु लक्षणैकचक्षुष्का इति तत्त्वम्। एतन्मते यणादिविधायकैस्तत्तच्छास्त्रैर्यणादिघटितस्य साधुत्वबोधनेऽपि 'मदुत्तरप्रवृत्तिमता शास्त्रेण यस्य साधुत्वं बोध्यते तदपि साधु' इत्येवम्'**नचि** चे'त्यनेन बोधितस्य द्वित्वस्यापि साधुत्वमभ्यनुज्ञायते, अतोऽत्र पूर्व-पूर्वशास्त्रबोधिते साधुत्वेऽप्रामाण्यग्रहोऽवश्यमभ्युपेय इति सर्वं सुस्थम्। उद्देश्यतावच्छेदका-वच्छिन्ने=उद्देश्यमात्रे, असति बाधके उद्देश्यतावच्छेदकव्यापकताया एव विधेये भानात्। नन्वपवादशास्त्र-सम्भावनाया बाधकस्य सत्त्वादुद्देश्यतावच्छेदकावच्छेदेन विधेयान्वयो न भविष्यति, किन्तु उद्देश्यता-वच्छेदकसामानाधिकरण्येनैवेति—अपवादविषयपरिहारेणोत्सर्गप्रवृत्तेर्न दोष इत्यत आह—**विषयव्यव-स्थानापत्त्येति**। उद्देश्यतावच्छेदकसामानाधिकरण्येन प्रवृत्तौ कदाचिदपवादविषयीभूतं लक्ष्यमपि संस्कुर्यादद्य यावदुभयोर्विषयाणां याथातथ्येनानिर्देशात्, किञ्चोद्देश्यतावच्छेदकसामानाधिकरण्येन शास्त्र-प्रवृत्तौ कदाचिदसंस्कृतमपि लक्ष्यमापद्येतेत्यव्यवस्थापत्तिरित्युद्देश्यतावच्छेदकावच्छेदेनैव विधेयान्वय-

चापवादशास्त्रपर्यालोचनेन तद्विषयलक्ष्यसंस्कारं निर्णीय,—तदविषयं तत्तल्लक्ष्यं तत्तद्विषयवाक्योपप्लवद्वारोत्सर्गेण संस्करोति, अन्यथा विकल्पापत्ति'रिति । यद्यपि 'भुक्तवन्तं प्रती'ति न्यायो लुगादिना जातनिवृत्तेर्व्यभिचरितस्तथापि तत्राप्यनुत्पत्तिरेवेति न दोषः,

❀ अभिनव-चन्द्रिका ❀

न्वय इति सिद्धान्तः । 'अवच्छेदकावच्छेदेन विधेयान्वय' इत्यस्य—उद्देश्यतावच्छेदकव्यापकत्वं विधेये, विधेयसंसर्गे वा नियमतो भासते इत्यर्थः, तथा च सर्वत्रोत्सर्गप्रवृत्तौ उत्सर्गापवादयोर्विषयव्यवस्था न स्यादिति । **तदविषयमिति** । उत्सर्गशास्त्रीयोद्देश्यतावच्छेदकावच्छिन्नेऽपवादशास्त्रीयोद्देश्यतावच्छेदकावच्छिन्नातिरिक्तत्वेन सङ्कोचं कृत्वा उत्सर्गेण संस्कारः कर्त्तव्य इति भावः ।

लुकानुत्पत्तिरेवेति । न च 'भवे'त्यादौ हेर्लुक्यपि सिपः श्रवणं स्यात्, एवं रीत्या सर्वत्रा-

❀ चिदस्थिमाला ❀

पर्यालोचनेने'ति पाठः । **शास्त्रेति** । तद्वाक्यार्थबोधनिश्चयेनेत्यर्थः । अत्रास्यैव बोधस्य लक्ष्यसंस्कारकत्वादाह-**तद्विषयेति** । तदविषयम्=अपवादशास्त्राविषयं । निषेधेन, महावाक्यार्थबोधेन वा तस्य तत्त्वनिर्णयादिति भावः । अयमपि बोधो न लक्ष्यसंस्कारक इत्याह—**तत्तदिति** । 'तत्तदर्थविभाग'इति वदिदं साधु, एवं सर्वत्र बोध्यम् । अयं द्वारभूतोपप्लवोऽपवादवाक्यस्थलेऽपि बोध्यः—सति सम्भवे । **संस्करोतीति** । अत्र लक्षणैकचक्षुष्क एव कर्त्ता, अत एव क्त्वोपपत्तिरिति भावः । ननु वैयर्थ्यापत्ताविष्टापत्तिरत आह—**अन्यथेति** । तथाङ्गीकारे वैयर्थ्यापत्तिरित्युक्तरीत्यनङ्गीकार इत्यर्थः । **विकल्पेति** । शास्त्रत्वाविशेषात्सर्वथा वैयर्थ्यस्य दुर्वचतया शास्त्रद्वयप्रामाण्यादिति भावः । **निवृत्तेरिति** । 'स्वीकारा'दिति शेषः ।

❀ ज्योत्स्ना ❀

अन्यथा विकल्पेति । सर्वथा शास्त्रबाधस्य जातनिवृत्तौ प्रसङ्गाद्विकल्पापत्तिरिति भावः । **तत्रेति** । लुगादिविषय इत्यर्थः । **न्यायानङ्गीकारेऽपीति** । अत्रापि 'तत्रे'ति सम्बन्धः ।

❀ विषमपदविवृतिः ❀

हल्च हल्च ह'लिति भाष्यप्रामाण्येनाऽसहविवक्षायामप्येकशेषकल्पनादित्यूह्यमिति कैयटोक्तव्याख्यैव युक्ता,मुख्यारोपितयोरेकषष्ठ्यर्थलाभावात् । भाष्याक्षराण्यपिकथञ्चिदेतदानुगुण्येनैवयोज्यानीतिबोध्यम् ।

❀ वरवर्णिनी ❀

आवश्यक इति भावः । **तदविषयमिति** । अयम्भावः—वाक्यार्थबोधः पूर्वं विधिशास्त्रस्य, पश्चान्निषेधशास्त्रस्य, परन्तु लक्ष्ये प्रवृत्तिः पूर्वं निषेधस्य, ततोऽवशिष्टेषु लक्ष्येषु विधेः । 'पूर्वं ह्यपवादा'इत्यत्र—प्रवृत्त्यवधिकमेव पूर्वत्वं पश्चात्त्वञ्च गृह्यते इति ।

बुद्ध्यारूढाः=प्रवर्त्तनीयत्वप्रकारकज्ञानविषयाः, प्रवर्त्तनाय बद्धसन्नाहा इति यावत् । **तत इति** । अपवादविषयं प्रकल्प्य, अपवादप्रवृत्तेः पूर्वमेव उत्सर्गः प्रवर्त्तेत इत्यर्थः । **तत** इतिदिग्योगलक्षणा पञ्चमी । कैयटमते—प्रकल्प्य=अपवादविषयनिर्माणं कृत्वा, ततः=तं परित्यज्य, उत्सर्गः प्रवर्त्तेत इत्यर्थः, ल्यब्लोपे हि पञ्चमी । यथा—यून इत्यादौ—युवन्-असित्यत्र यकारस्य **श्वयुवे**ति सम्प्रसारणे—'न सम्प्रसारणे'इति निषेधप्रवृत्त्यसम्भवः, परस्य—वस्य—सम्प्रसारणे तु सम्प्रसारणपरत्वसम्भवा'न्न सम्प्रसारणे'इति निषेधप्रवृत्तिसम्भव इति—पूर्वयणि अपवादविषयत्वसम्भावनया स्वप्रवृत्त्ययोग्यतां, परयणि तदसम्भावनया स्वप्रवृत्तियोग्यताञ्च सम्भाव्य, अपवादविषयं विहाय परयणो वकारस्य—सम्प्रसारणं भवति, तथैव सर्वत्रापवादविषयं सम्भाव्य—प्रकल्प्य, तं परित्यज्योत्सर्गशास्त्रं प्रवर्त्तेत इति **कैयटा**शयः ।

न्यायानङ्गीकारेऽपि विकल्पापत्तेः सत्त्वाच्च। 'अभिनिविशन्त' इत्यस्य—बुद्ध्यारूढा भवन्तीत्यर्थः। लक्ष्यैकचक्षुष्कस्तु—तत्तच्छास्त्रपर्यालोचनं विनापि अपवादविषयं परित्यज्योत्सर्गेण लक्ष्यसंस्कारज्ञानीते, तस्यापि शास्त्रप्रक्रियास्मरणपूर्वकप्रयोग एव धर्मोत्पत्तेः। तदुक्तम्—'प्रकल्प्य वापवादविषयं तत उत्सर्गः प्रवर्तते' इति। प्रकल्प्य=परित्यज्य।

❀ अभिनव-चन्द्रिका ❀

देशस्य लुकि स्थानिनः श्रवणापत्तिरिति वाच्यं, लुग्विधायकशास्त्राणां तात्पर्यग्राहकत्वं स्वीकृत्य तत्तदादेशविधायके 'सेर्ह्यपिच्चे'त्यादौ 'लोट्स्थानिकसिप्त्वाद्यवच्छिन्नस्य स्थानेऽदन्ताङ्गाव्यवहितोत्तरत्वाभावविशिष्टो हित्वाद्यवच्छिन्नो भवती'ति,—'अभ्यासत्वावच्छिन्नमुद्दिश्यादीतरहल्निवृत्तिपूर्वक आदिर्हल् शिष्यत' इति 'हलादिश्शेष'इत्यत्रेवार्थस्वीकारेण—सिप्त्वावच्छिन्नस्य स्थानित्वेन सकलसिब्निवृत्तिर्भवतीत्यदोषात्। 'लुग्वा दुहे'त्यादिविभाषालुग्विषये च–'दन्त्याद्यात्मनेपदाव्यवहितपूर्वत्वविशिष्टदुहाद्यव्यवहितोत्तरत्व' 'स्वाभावत्वै'तदन्यतरविशिष्टक्सत्वावच्छिन्नः च्लित्वावच्छिन्नस्य स्थाने भवतीति यत्र क्सोऽनुत्पन्नस्तत्रत्वं दुहाद्यव्यवहितोत्तरत्वाभावसामानाधिकरण्यमादाय क्स-तदभावैतदन्यतरघटितरूपं भवतीति च्लित्वावच्छिन्नस्य स्थानित्वेन तस्य कुत्रापि श्रवणं न भवतीति न दोषः, वस्तुतस्तु लुकाऽनुत्पत्तेरन्वाख्यानं चिन्त्यमेव, अन्यादेशेष्विव स्थानिघटितस्य साधुत्वबुद्धिः प्रसक्ता आदेशघटिते साध्वीति बोध्यं, तेन जातनिवृत्तेरभावेन 'भुक्तवन्तं प्रती'तिन्यायविषयत्वाभावात्। भावरूपादेशविषये च स्थानिपदार्थोऽन्यादृशः, लुग्विषये चान्यादृश इत्यत्र प्रमाणाभावात्, भावा-

❀ चिदस्थिमाला ❀

तत्रापि=लुगादिविषयेऽपि। एवञ्च प्रागुक्तरीत्या तदन्यविषयता तस्येति न व्यभिचारस्तदाह—**न दोष इति**।

अभ्युपेत्याप्याह—**न्यायेति**। प्रागुक्तरीत्येति भावः। ध्वनितं चेदमर्थवत्सूत्रे भाष्ये इति तत्रैवोद्योते स्पष्टम्। ननु नायं परिभाषार्थः, 'अभिनिविशन्ते' इत्युक्त्याऽऽदौ तद्बुद्ध्या तत्प्रवृत्तिरित्यस्यैव ततो लाभादत आह—**अभीति**। एवञ्च—हि=यतः, उक्तहेतोः, पूर्वमपवादाः=अपवादशास्त्राणि। अनेन परिभाषाज्ञापकमपि सूचितम्। एवञ्च सर्वथाऽनवकाशत्वविषयोऽयम्। अभिनिविशन्ते=बुद्ध्यारूढा भवन्ति, पश्चादुत्सर्गालक्ष्यं संस्कुर्वन्तीति परिभाषार्थो बोध्यः। **एतेनोक्ता**न्योन्याश्रयपरिहाराय अपवादसिद्ध्युपयोग्यन्यविषये एवापवादबोधात्पूर्वमुत्सर्गस्य न लक्ष्यसंस्कारकता, अपवादसिद्ध्युपयोगिनि तु तद्बोधात्पूर्वमपि सेत्यवश्यं वाच्यं, **न विभक्ता**वित्याद्यपवादारम्भसामर्थ्या'दित्यपास्तम्, उक्तयुक्तेः। द्वितीयमते दोष एव नेति पूर्वतो वैलक्षण्यं प्रतिपादयन्मतान्तरमाह—**लक्ष्यैकेति**। **तच्छास्त्रेति**। अपवादशास्त्रेत्यर्थः। **तत्त**दित्यपपाठः, वीप्साया अनुपयोगात्, बह्वपवादस्थलाशया वा वीप्सा, यावदपवादाशया वा। अन्त्ये—'उत्सर्गेणे'त्यस्य—उत्सर्गत्वावच्छिन्नेनेत्यर्थः, एवमपवा**दे**त्यत्रापि। ननु लक्ष्यैकचक्षुष्कस्य लक्षणापेक्षैव नेति कथन्तेन तत्संस्कारोऽत आह—**तस्यापीति**। लक्ष्यैकचक्षुष्कस्यापीत्यर्थः, **अपि**रुक्तसमुच्चायकः, एवेन तदन्यथा धर्मोत्पत्तिनिरासः। स्पष्टञ्चेदं पस्पशाह्निके। इदमपि तत्र गमकमिति भावः। **वा**=अथवा, 'विषय'—मित्यग्रे—'तत' इति शेषः, अपवादशास्त्रपर्यालोचनात्प्रागपीति तदर्थः। 'अभिनिविशन्ते'इत्यस्य तद्घटकस्यार्थमाह—**प्रवर्त्तत इति**। 'अपवादविषयं प्रकल्प्य=बुद्ध्यारूढं कृत्वा, ततः=तदनन्तरम्, उत्सर्गः प्रवर्त्तते'—इत्यर्थाङ्गीकारे तु पूर्वतो भेदो न स्यात्, इष्टापत्तौ 'वा'ग्रहणासङ्गतिरत आह—**परीति**।

❀ सदाशिवभट्टीयम् ❀

इत्यन्ये। **न्यायानङ्गीकारेपीति**। ननूक्तलुगादिस्थले तथा सुवचत्वेपि 'तस्य लोप' इति विषये नैवं वक्तुं

यत्तु—'प्रकल्प्य वे'त्यस्यायमर्थः,—यथा 'न संप्रसारण' इति वचनात्परस्य यणः पूर्वं सम्प्रसारणं, पूर्वस्य तु तन्निमित्तः प्रतिषेधः' इति—अभ्यस्तसञ्ज्ञासूत्रे कैयटः, तन्न, 'न सम्प्रसारणे' इति सूत्रस्थभाष्यविरोधात् । तत्र हि 'एतदेव ज्ञापयति परस्य—न पूर्वस्येति, यद्वा सम्प्रसारणाश्रयस्य प्रतिषेधः—' इत्याद्युक्तम्, न हि न्यायेन सिद्धे एव-

ॐ अभिनव-चन्द्रिका ॐ

देशविषये च भावघटिते साधुत्वं, लुगादिविषये चाऽभावघटिते साधुत्वं बोध्यते इत्येव विशेष इति दिक् ।

सम्प्रसारणाश्रयस्य प्रतिषेध इति । 'न सम्प्रसारणे' इति सूत्रमकृत्वा 'सम्प्रसारणाच्चे'त्यत्र 'सम्प्रसारणादसम्प्रसारणे' इति न्यासं कृत्वा पूर्वरूपमेव निषेद्धव्यमिति भावः, न च 'एष यूनः पश्ये'त्यत्र यणादेशस्य स्थानिवद्भावादेतत्तदोरिति लोपो न स्यात्, हल्परकत्वाभावादिति वाच्यं, 'सम्प्रसारणाश्रयस्य प्रतिषेध'इति भाष्यप्रामाण्येनैतादृशप्रयोगाणामनभिधानात् ।

ॐ चिदस्थिमाला ॐ

अत एव प्रसङ्गादेतदर्थाभिप्रायां कैयटोक्तिं खण्डयति—**यत्त्विति** । अर्थः=प्रयोजनं, तदाह—**यथेति** । **सम्प्रसारणमिति** । 'प्रवर्त्तेत' इति शेषः । एवमग्रेपि । **अभ्यस्तेति** । उभे अभ्यस्त'मिति सूत्रे इत्यर्थः । 'तत्र ही'त्यस्य 'उक्त'मित्यत्रान्वयः । एतदेव='न सम्प्रसारणे' इति सूत्रमेव । **न पूर्वस्येति** । 'आदा'विति शेषः । तेन न पूर्वं पूर्वस्य भवतीत्यर्थः । पश्चात्प्राप्तन्तु तेन निषिध्यते, लक्ष्यभेदाच्च न **लक्ष्ये लक्षण-स्येति** न्यायसञ्चार इति भावः । लक्षणया निर्वाहे ज्ञापकत्वं नेत्याशयेनाह—**यद्वेति** । प्रथमान्तसम्प्रसारण-पदस्य तदाश्रये लक्षणया सम्प्रसारणनिषेधाभावेन युगपदुभयत्र सम्प्रसारणोत्तरं पूर्वत्र तदाश्रयपररूप-निषेधे यणेष्टसिद्धिरिति भावः । पूर्वस्यैव प्रथमं प्रवृत्तिरित्यपि पक्षे आह—**आदीति** । सप्तम्यन्तस्य सम्प्रसा-रणपदस्य लक्षणया-तदाश्रये यणि परतः पूर्वस्य तन्निषेधः, पूर्वत्र बहुव्रीहिरत्र षष्ठीतत्पुरुषः, षष्ठी सम्बन्ध-

ॐ ज्योत्स्ना ॐ

यत्त्विति । अत्र पक्षे 'प्रकल्प्ये'त्यस्यात्मानं अपवादविषयं परिकल्प्येत्यर्थः । 'श्वयुवे'त्यादिरुत्सर्गो 'न सम्प्रसारण' इत्यादेरपवादस्य विषयो यथा भवति तथा कृत्वेति यावत् । तदाह—**यथेत्यादि** ।

ॐ विषमपदविवृतिः ॐ

कैयट इति । तन्मते चापवादविषयं प्रकल्प्य=सम्पाद्येत्यर्थः । तथा च यथापवादविषयसम्पत्ति-

ॐ **वरवर्णिनी** ॐ

ननु 'परस्य यणः पूर्वं सम्प्रसारणं, पूर्वस्य तन्निमित्तः प्रतिषेधः' इति फलितार्थप्रदर्शनमात्रं कैयटो-पाध्यायानां, तत्त्वतस्तु 'न सम्प्रसारणे' इति **प्रकल्प्ये**त्यादिपरिभाषाज्ञापकमेवेत्यतो भाष्यान्तरविरोधं दर्शयति—**यद्वेति** । सम्प्रसारणाश्रयस्य=सम्प्रसारणं निमित्तीकृत्य जायमानस्य 'सम्प्रसारणाच्चे'ति पूर्व-रूपस्य, प्रतिषेधः=निषेधः । तेन 'यून' इत्यादौ पूर्वस्य यणः सम्प्रसारणेऽपि पूर्वरूपाभावे पुनर्यणि 'यून' इति सेत्स्यत्येवेति भाष्यकृदाशयः । सम्प्रसारणाश्रयस्य पूर्वरूपस्य प्रतिषेधे—'एष यूनः पश्ये'त्यत्र जातस्य यणोऽचः **परस्मिन्निति** सूत्रेण स्थानिवद्भावाद्धल्परत्वाभावा**देतत्तदो**रितिसुलोपो न स्यादिति प्रकृतभाष्य-मेकदेश्युक्तिरिति तु न शङ्क्यम्, वाक्यसंस्कारपक्षे उक्तदोषस्य सम्भवेऽपि पदसंस्कारपक्षेऽचः पूर्वत्वेन दृष्टस्य विधेरसम्भवेन दोषाभावात् । बहुचि—बहुयून इत्यत्र यणापत्तिरपि,—सुबन्तात्ताद्धितोत्पत्तेर्मूल एवोक्ततया—'न पदान्ते'ति स्थानिवद्भावनिषेधाद्वारणीया, पदेऽन्तः—पदान्त इति सप्तमीसमासस्यापि 'न पदान्त'सूत्रे स्वीकारादिति शब्देन्दुशेखरा**भिनवराजलक्ष्म्यां** विस्तरः । तदर्थः='पूर्वं ह्यपवादा' इति न्यायार्थः । उक्तयुक्तेः=पदपदार्थोपस्थितौ शाब्दबोधे बाधकाभावरूपयुक्तेः ।

मुक्तिरुचिता, तस्मान्न्यायस्य मदुक्त एव विषय इति बोद्धयम् । यदपि–'अपवादवाक्यार्थ विना नोत्सर्गवाक्यार्थ इति तदर्थ' इति, तदपि न, उक्तयुक्तेः । 'न विभक्तौ तुस्माः' इति शास्त्रस्थतुस्मपदार्थज्ञानमात्रेण पादीनामेतद्विषयत्वाभावबुद्ध्या तेषु हलन्त्यसत्रप्रवृत्त्या

❀ चिदस्थिमाला ❀

सामान्ये इति भावः । विरोधमुपपादयति—**न हीति** । न्यायेन—'उक्ते'त्यादिः । एवमग्रेपि । **मदुक्त-एवेति** । अत एव 'तत उत्सर्ग' इत्याद्यक्षरानुगुण्यमपीति भावः । **तदर्थ इति** । उक्तवचनद्वयार्थ इत्यर्थः । **उक्तयुक्तेरिति** । आकाङ्क्षादिसत्त्वे पदपदार्थयोरुपस्थितौ तद्बोधे प्रतिबन्धकाभावादित्यर्थः । 'अभिनिविशन्ते' 'अपवादविषयं' 'ततः' इत्यादिपदस्वारस्यभङ्गापत्तेः, परिभाषाद्वयवैयर्थ्यापत्तेश्चेत्यपि बोध्यम् ।

नन्वेवमन्यत्रोत्सर्गापवादस्थले निर्वाहेऽपि प्रकृते प्रथमपक्षे द्वितीयपक्षे चान्योन्याश्रयदोषाभावेपि प्रथमपक्षे परिभाषाविरोधस्तदवस्थः, तत्र तदविषयत्वनिश्चयार्थं तद्विषयलक्ष्यसंस्कारनिर्णयार्थमपवादशास्त्रपर्यालोचनावश्यकत्वस्य प्रागुक्तत्वेनात्रोत्सर्गकृतलक्ष्यसंस्कारबुद्धिं विना तत्पर्यालोचनाऽसम्भवेन–'अपवादवाक्यार्थज्ञानोत्तरमुत्सर्गकृतलक्ष्यसंस्कार' इति परिभाषार्थासम्भवादत आह—**न विभक्ताविति** । एतच्छास्त्रघटकोद्देश्यविशेष्यभूतपदार्थविशेषज्ञानेनेत्यर्थः । **मात्र**पदेन वाक्यार्थबोधव्यावृत्तिः, तदानीमितरसकलकारणसत्त्वेऽपि विभक्तिपदार्थाज्ञानात्तदसम्भव इति भावः । पादीनां=सुबादिप्रत्याहारघटकानाम् । **एतदिति** । 'न विभक्ता' वितीत्यर्थः । **बुद्ध्या**=निश्चयेन । **तेषु**=पादिषु । एवञ्च नापवादवाक्यार्थज्ञानं पूर्वमपेक्षितं सर्वत्रेति नान्योन्याश्रयः । नचैवमपि प्रगुक्तग्रन्थविरोध एवेति वाच्यम्, अपवादशास्त्रघटकसम्भावितपदार्थविशेषज्ञानमात्रेणलक्ष्यसंस्कारः—साधुत्वं–यस्मात्तं लक्ष्यसंस्कारजनकं तद्विषयमिति पूर्वग्रन्थार्थात् । असम्भावितस्थले प्रकृतेऽगत्यैवमङ्गीकारेप्यन्यत्रापवादे सम्भावितस्थले तथैवाङ्गीकाराच्च । एतेन—''उपदेशे इदन्त्यम्', 'अच्', 'अनुनासिक' इति न्यासेपि **पूर्वं हीत्य**स्यावतरणोक्तरीत्या तत्कालेऽच्पदार्थनिष्पत्त्यभावेनान्योन्याश्रयस्तदवस्थः, न च–'एतेने'त्यादि—'सामर्थ्या'दित्यन्तप्रागुक्त्या न दोषः, विभिन्नविभक्तिनिर्देशेन योगविभागेन च अज्विषयनियमस्य सर्वनियामकत्वेनापवादत्वनिर्णया'दित्यपास्तम् । नचैवमपीतः प्राक् सुप्प्रत्याहाराऽसिद्ध्या कथमादौ समास एवेति वाच्यं, 'वर्णोपदेशकालेऽजादिसञ्ज्ञानामनिष्पादा'दिति **कैयटखण्डककौस्तुभा-**

❀ ज्योत्स्ना ❀

मदुक्त एवेति । न चास्मदुक्तार्थन्यायस्य 'न सम्प्रसारण'इत्यादिर्विषयः, परस्य लक्ष्ये सम्प्रसारणप्रवृत्तेः प्राक्तदीयवाक्यार्थघटकपदार्थस्यैवासम्भवात्स्वरूपलाभमप्राप्तस्यापवादत्वेन वक्तुमशक्यत्वात् । 'न विभक्ता'वित्यादौ तु पदार्थबोधो न सम्भवीति विशेषः । **उक्तयुक्तेरिति** । पदपदार्थबोधे सति वाक्यार्थबोधे बाधकाभावो युक्तिः ।

❀ सदाशिवभट्टीयम् ❀

शक्यमिति दोष एवेत्याशङ्क्याह-**सुलभमिति दिगिति** । **दिगर्थस्तु**–'तुसभिन्ना हल इत'इति प्रथमवाक्यार्थेन

❀ विषमपदविवृतिः ❀

स्तथैवोत्सर्गेण प्रवर्त्तितव्यमित्यर्थः । **प्रतिषेध इति** । तन्निमित्तत्वमित्यर्थः । **एवमुक्तिरिति** । 'एतदेव ज्ञापयती'त्याद्युक्तिः । नन्वेवं सञ्ज्ञाहकवाक्यार्थबोधे 'हलन्त्यं' 'न विभक्ता'वित्यनयोरन्योन्याश्रयाभावेपि लक्ष्यसंस्कारके उपप्लूयमानवाक्यार्थबोधेऽन्योन्याश्रयः सुस्थ एव, अपवादवाक्यार्थबोधं विना तद्विषयपरिहारेणोत्सर्गवाक्यार्थोपप्लवायोगात् । यद्वा—'न विभक्ता'वित्येतद्वाक्यार्थबोधे तद्विषयपरिहारेणैतस्य प्रवृत्तिः, एतत्प्रवृत्तौ सुप्तिङादिप्रत्याहारसिद्धिः, तत्सिद्धौ च 'न विभक्ता'वित्येतद्वाक्यार्थबोध इत्यन्योन्याश्रय इत्यत आह—**न विभक्ताविति** । **पदार्थज्ञानमात्रेणेति** । तथा च 'न विभक्ता'वित्ये-

सुप्तिङ्रूपविभक्तिपदार्थज्ञानं सुलभमिति दिक् । अत्राप्युपदेश इति सम्बद्ध्यते, तद्बललभ्यमर्थमाह—**सूत्रे इति** ।

आदिरन्त्येन । आदिरिति किम् ?, अन्त्यशब्देन पूर्वेषामाक्षेपादिगादिप्रत्याहारे-

---

❀ अभिनव-चन्द्रिका ❀

उपदेश इति सम्बध्यत इति । अत एव 'हल विलेखने' इति धातोर्लस्य नेत्त्वम् ।

❀ चिदस्थिमाला ❀

यत्करीत्या निर्वाहात्, तदाह—**दिगिति** ।

'सूत्रे' इत्यस्य निर्मूलत्वं निराचष्टे—**अत्राप्युपेति** । आवृत्त–'हलन्त्य'मिति सूत्रेऽपीत्यर्थः । अपि-द्वितीयसूत्रसमुच्चायकः, मूलाशयवर्णनमिदं तद्रीत्या, न तु–सिद्धान्त इति बोध्यं । मूलमते करणे घञोऽभावादाह—**तद्बलेति** । 'आद्योच्चारणविषये हली'त्युक्तौ तद्विषयतायास्तत्रैव सत्त्वेन तल्लाभात्, अत एव 'तदर्थमाहे'ति नोक्तं, स्वमते तदनुवृत्तेरेवासत्त्वादिति भावः । **आदिरिति किमिति** । तदभावेऽप्यन्त्यपदेनाक्षेपात्तल्लाभः, नचैवमपि शाब्देऽन्वयप्रतियोगित्वानापत्तिस्तथाऽनुपस्थितेरिति वाच्यं, व्युत्पत्तिवैचित्र्येण क्वचित्तदङ्गीकारात् । एवञ्च 'स्वस्य चे'त्यनेन परामर्शोऽपि सूपपादः । एतेन सञ्ज्ञासमर्पणार्थमादिग्रहणमिति **रत्नाकरोक्तमपास्तमिति** प्रश्नः । **अन्त्येति** । अन्त्यत्वस्य पूर्वनिरूपितत्वेनाद्यऽनिरूपितत्वात्पूर्वेषामेवाक्षेपो नादेरिति 'इदन्त्यसहितः पूर्वः प्रत्यासत्त्या पूर्वेषां सञ्ज्ञे'त्यर्थलाभेनेगादाविकारादेरिव तत्सहितपूर्वत्वेना-

❀ सदाशिवभट्टीयम् ❀

पादीनामित्त्वं,ततो विभक्तिपदार्थनिश्चये 'विभक्तिस्थतुसभिन्ना हल इत' इति द्वितीयवाक्यार्थेनाविभक्तिस्थतुसानामित्त्वमिति । नन्वेवं **नाज्झला**वित्यत्रापि 'आक्षरसमाम्नायिका अचो हलश्च मिथो न सवर्णा' इति–प्रथमवाक्यार्थेप्यणुदित्सूत्रबोधानन्तरम्–'अचस्तद्गृहीताश्च हलिभिर्मिथो न सवर्णा' इति द्वितीयो वाक्यार्थः स्यादेव, तथाचाकारश्लेषो व्यर्थः, वाक्यापरिसमाप्तिप्रतिपादकभाष्यासङ्गतिश्चेति चेन्न । 'न विभक्ता'वित्यादौ विभक्तिग्रहणसामर्थ्यात्, द्वितीयवाक्यार्थाङ्गीकारेप्यन्यत्र तदङ्गीकारे मानाभावात् । स्पष्टा चेयं रीतिः प्रकृतसूत्रे शब्दरत्ने 'यथासङ्ख्यसूत्रसामर्थ्येन तत्र तथाङ्गीकारेप्यत्र तथा कल्पने मानाभावा' दित्यादिना । नन्वेवमपि 'हलन्त्य' मित्यस्य बोधकाले 'उपदेशेऽ'जिति 'नाज्झला'वित्यनयोर्बोधाभावेना'णुदि'दित्यस्य वाक्यार्थाज्ञानेनोदितः सवर्णग्राहकत्वाभावान्न **विभक्ता**वित्यत्र तुशब्दस्य तवर्गबोधकत्वाभावेन तज्ज्ञानासम्भवाद्विभक्तिस्थनकारस्येत्वापत्तिः पकारस्येव दुर्वारा, तुशब्दस्तु **तिथोरि**तिवदुच्चारणार्थोकारेण तकारमात्रबोधक इत्येव स्यादिति चेन्न, परस्मिन्नित्यादिनिर्देशैरिहत्यहल्पदस्य नकारभिन्नतत्परत्वनिश्चयात् । एवं सति वर्गग्रहणं व्यर्थमिति चेदस्तु तथा । **नाज्झला**विलेतस्य प्रयत्नभेदप्राप्तसावर्ण्याभावानुवादकत्वमिति मते-तुशब्दस्योदित्सञ्ज्ञकत्वमितिमते च-उदितः सवर्ण-

❀ विषमपदविवृतिः ❀

तद्वाक्यार्थबोधाभावेपि तद्घटकप्रतियोगिसमर्पक'तुस्मा'इतिप्रथमान्तपदार्थज्ञानमात्रेण पादीनां तद्भिन्नत्वेन तन्निषेधाविषयत्वग्रहेण तत्रेत्सञ्ज्ञाप्रवृत्तिः सुलभेत्याशयः । 'अणुदि'दित्यत्रोदिदिति कादीनां सञ्ज्ञेति बोध्यम् । **तद्बललभ्यमिति** । तेन 'हल–विलेखने'इति धातौ लस्य नेत्वम्, उपदेशेनन्त्यत्वादिति भावः ।

❀ वरवर्णिनी ❀

पूर्वेषामिति । अन्त्यशब्देन—आदेरेवाक्षेप इत्यत्र मानाभावादन्त्यवर्णघटितसमुदायमात्रस्याक्षेपे–अन्त्येनेता सहितो वर्णः–अन्त्याक्षिप्त–स्वनिष्ठचरमावयवतानिरूपकसमुदाय–घटकबोध्यानां सञ्ज्ञा स्यादित्येवार्थः स्यात्, एवञ्चेगादिप्रत्याहारेऽकारादिग्रहणापत्तिरित्युत्तराशयः ।

ऽकारादिग्रहणं मा भूदिति । एवमादिशब्देन परेषामाक्षेपादिणादिप्रत्याहारेषु आदीनां ग्रहणं मा भूदिति–'अन्त्येने'ति । 'आदिः'–'अन्त्येने'त्युभयोपादाने तु न दोषः । लोके 'अयमादिरन्त्यो वे'त्युक्तेऽवशिष्टमपि किञ्चिदस्तीति नियमेन प्रतीतेः । 'परस्मिन्सति यस्मात्पूर्वो नास्ति स आदिः' 'पूर्वस्मिन्सति यस्मात्परो नास्ति सोऽन्त्य' इति—अकारादिग्रहणे

❁ अभिनव-चन्द्रिका ❁

अकारादिग्रहणमिति । आदिपदाभावे इगादिपदानां ककारनिष्ठचरमावयवतानिरूपकसमुदायघटके, तादृशसमुदायघटकबोध्ये वा शक्तिबोधनेन इगादिप्रत्याहारेऽकारादीनां ग्रहणं स्यादिति भावः । **आदीनां ग्रहणमिति** । 'अन्त्येने'तिपदाभावे—इणादिपदानामिकारनिष्ठाद्यवयवतानिरूपकसमुदायघटके, तादृशसमुदायघटकबोध्ये वा शक्तिबोधनेनेणादिप्रत्याहारे आदीनां ग्रहणं स्यादिति भावः । **यस्मात्पूर्वो नास्तीति** । स्वघटकपूर्वो नास्तीत्यर्थः, तेन 'घटपटा'वित्यादौ पटशब्दघटकपकारात्पूर्वं घटशब्दाकारस्य सत्त्वेऽपि पकारे पटशब्दादित्वमक्षतम्, एवं 'परो नास्ती'त्यत्रापि स्वघटकःपरो नास्तीत्यर्थ इति घटशब्दानन्तरं पटशब्दाकारसत्त्वेऽपि पूर्वोक्तस्थले घटशब्दाकारे न तदन्त्यत्वक्षतिः । 'स्वघटकत्व' 'स्वघटकाव्यवहितपूर्वत्व' 'स्वघटकाव्यवहितोत्तरत्वाभाववत्त्वै'तत्त्रितयसम्बन्धेन स्वविशिष्टत्वम्-आदित्वम् । एवं-'स्वघटकत्व' 'स्वघटकाव्यवहितोत्तरत्व' 'स्वघटकाव्यवहितपूर्वत्वाभाववत्वै'तत्त्रितयसम्बन्धेन स्वविशिष्टत्वमन्त्यत्वं फलतीति तत्त्वम् ।

❁ चिदस्थिमाला ❁

कारादेरपि ततः पूर्वत्वेन तत्सञ्ज्ञित्वापत्तौ ग्रहणापत्तिरिति भावः । एतेना'दिना नियमेनान्त्यस्यैवाक्षेपे मानाभावेन मध्यमस्याप्याक्षेपे मध्यमेनेता सहित आदिस्ततः परेषामपि सञ्ज्ञा स्यात्, एवमन्त्येनेता सहितो मध्यमस्ततः पूर्वेषामपि सञ्ज्ञा स्यादिति तयोर्ग्रहणमिति' **कौस्तुभो**क्तं, 'तत्सूत्राशयवर्णनमात्रम्, आदिरिता सहित इत्युक्तेऽपि सन्दंशपतितन्यायेन मध्यस्थानामेव सञ्ज्ञित्वावगतेस्तदधिकस्योपस्थापकाभावा' दिति तत्खण्डक**रत्नाकरो**क्तं चापास्तम्, उक्तयुक्तेः । उक्तां सर्वां रीतिमन्यत्रातिदिशति—**एवमिति** । इणः परणकारेणैव सत्त्वस्य वक्ष्यमाणत्वादाह—**आदीनामिति** । **एतेनान्त्येनेति** किं ? सुट्प्रत्याहारष्टाटकारेण माभूदिति **वृत्त्युक्तं**, 'यद्यपि टान्तसङ्घस्य टाटकारोऽन्त्य एव, तथापि व्यवसितान्त्यत्वविरहः, 'इहह्यन्तत्वप्रयुक्तेत्सञ्ज्ञा यस्य तेन प्रत्याहारोऽन्त्यग्रहणसामर्थ्यात्, नहि टाटकारे 'हलन्त्य'मिति प्रवर्त्तते' इति सुडनपुंसकेति सूत्रे **हरदत्तोक्तम्**, अत्र तथा **दण्ड**युक्तं,'टाटकारस्य टाङसीत्यादौ विशेषणार्थत्वेनापूर्वान्तत्वात्, औटष्टस्यानन्यार्थतया प्रत्यासत्तेश्च तेनैव प्रत्याहारसिद्धावन्त्येनेति व्यर्थं'मिति **कौस्तुभ–रत्नाकराद्युक्तं** चापास्तम्, उक्तयुक्तेः, प्रत्यासत्तिन्यायाद्व्याप्तिन्यायस्य प्राबल्याच्च । ननूभयोपादानेऽपि उक्तरीत्या दोष एवात आह—**उभयोपादाने त्विति** । एतदग्रे 'न दोषो लोके' इति पाठः, अत एव पञ्चम्यन्तहेतूक्तेरित्यादेश्च

❁ सदाशिवभट्टीयम् ❁

ग्राहकत्वस्य पूर्वमपि सम्भवेनादोषाच्च । मतान्तरेपि लोपादिनेव जातनिवृत्तेरङ्गीकाराच्च । **न विभेत्यत्र** तु लुप्तनिर्दिष्टो नकार इत्यस्यापि वक्तुं शक्यत्वाच्च । **आदिरन्त्येन** । 'उभयोपादाने तु' एतदग्रे 'न दोषो लोके'

❁ वरवर्णिनी ❁

परे तु—तथा सति'अणिगादिप्रत्याहाराणां पृथक्पृथगुपकल्पितानां वैयर्थ्यापत्तिः' 'एओङ्'–'ऐऔ'-जित्याद्यनेकानुबन्धकरणस्य वैयर्थ्यापत्तिश्च, तस्मादन्यतरोपादानेन सिद्धौ स्पष्टार्थमेवोभयोरुपादान'मित्याहुः ।

स आदिरिति । समुदायविशिष्टत्वमादित्वं, वै० 'स्वघटकत्व' 'स्वघटकपूर्वत्व' 'स्वघटकोत्तरत्वा-

—इकारणकारादीनामाद्यन्तत्वस्यैवानापत्तेः ।

अत्राद्यन्ताभ्यामवयवत्वेन बोधकाभ्यां स्वघटितः समुदाय आक्षिप्तः सञ्ज्ञी, तस्य चैकत्र लक्ष्ये प्रयोगाभावात्प्रत्येकं सञ्ज्ञित्वम् । अन्त्यस्य तु न तत्कार्यं, तस्येत्सञ्ज्ञालोपा-

---

❀ अभिनव-चन्द्रिका ❀

आद्यन्तत्वस्यैवानापत्तेरिति । अकारादिसमुदायनिरूपितादित्वादेरिकारादावभावादिति भावः । **समुदाय आक्षिप्त इति** । वाक्ये वाक्यैकदेशन्यायेन 'आदिरन्त्येने'ति सूत्रकृतोच्चारणादिति भावः ।

❀ चिदस्थिमाला ❀

सङ्गतिः । प्रतीतिर्लक्षणावश्यकत्वे हेतुः, 'सोऽन्त्य इति लक्षणस्यावश्यकत्वे' इति पाठः,'सती'ति तस्य शेषः । **अकारादीति** । इगिणादिनेति भावः । आदिनाऽजादिपरिग्रहः । अत एवाह—**णकारेति** । अनापत्तेः= अप्राप्तेः, उक्तलक्षणनाक्रान्तत्वात् । नन्वेवमपि कथं सञ्ज्ञिलाभः, न च मनोरमायामुक्तत्वादत्रोक्तिर्न, प्रतिज्ञा-भङ्गापत्तेरिति वाच्यं, तदयुक्तत्वेन विलक्षणयुक्तेरत्र वाच्यत्वादत आह—**अत्रेति** । प्रकृतसूत्र इत्यर्थः । आक्षेप-बीजमाह—**अवयवेति** । **स्वेति** । आद्यन्तेत्यर्थः । एतेन—''सञ्ज्ञास्वरूपानन्तर्भूतयोराद्यन्तयोः स्वघटितसमुदायाक्षेपकत्वेऽपि, तदन्तर्भूतयोस्तयोः—सञ्ज्ञायाः पारार्थ्यनियमात्स्वाघटितसमुदायस्यैवाक्षेप—'' ति **मन्दोक्तमपास्तं**, तावतापि तस्य तदनुपपादकत्वात्, तृतीयौचित्याच्चेति दिक् । **तस्य च**=उक्तस्य समुदायस्य च, 'युगप'दिति शेषः । **लक्ष्य इति** । एतेन 'वर्णसमाम्नाये तथा सत्त्वादिदमयुक्त' मित्य-पास्तं, सिद्धानुशासकत्वाच्छास्त्रस्य कार्यार्थसञ्ज्ञायास्तत्राफलत्वाच्च । **प्रत्येकमिति** । 'आनर्थक्यात्तदङ्गे'ष्विति न्यायादिति भावः । सञ्ज्ञित्वमात्रे बाधकाभावादाह—**न तत्कार्यमिति** । न सञ्ज्ञित्वप्रयुक्तं कार्य-मित्यर्थः । 'आचारा'द'प्रधानत्वा'दित्यनयोरसार्वत्रिकत्वादाह—**तस्येदिति** । नन्वेवं भाष्यादिविरोधोऽत

❀ सदाशिवभट्टीयम् ❀

इति पाठः । प्रतीतिर्लक्षणावश्यकत्वे हेतुः, लक्षणस्यानापत्तौ हेतुत्वबोधकः—**सोन्त्य इतीति** ।

❀ वरवर्णिनी ❀

भाववत्वे'तत्रितयसम्बन्धेन । एवमन्तत्वमपि समुदायविशिष्टत्वमेव, वै० 'स्वघटकत्व' 'स्वघटकोत्तरत्व' 'स्वघटकपूर्वत्वाभाववत्वे'तत्रितयसम्बन्धेन । यत्समुदायनिरूपितञ्चादित्वमन्तत्वञ्च वक्तव्यं तत्**स्वम्** । समन्वयश्च—'घट'इतिसमुदायघटकतया, तद्घटककाकारादिपूर्वतया, तद्घटकोत्तरत्वाभाववत्त्वेन च—घकार आदिरित्युच्यते, एवमन्यत्रापि बोध्यमित्यस्म**द्गुरुचरणाः** ।

अकारादीति । आदिना—ञकारादिः । इगिणादिप्रत्याहारे—अकारञकारादिग्रहणे—इकारादेर्निरुक्ताद्य-न्तत्वस्यैवानापत्तिरित्यर्थः । 'आद्यन्तत्वस्यैवानापत्ते'रित्येतत्—अग्रिमे 'समुदाय आक्षिप्तः सञ्ज्ञी'त्यत्र—हेतुरिति'तु—**श्रीबालशास्त्रि**चरणाः । **समुदाय एव सञ्ज्ञेति** । ''वस्तुतस्तु—आदिरेव वाचकः, अन्त्यस्तु तादृशार्थद्योतक एव, तथा च—आद्यन्तोभयसमुदायस्यादेरन्त्यस्य च प्रातिपदिकत्वं, शक्ति-लक्षणा—द्योतकत्वैतदन्यतमसम्बन्धेनार्थवत्त्वस्यैव प्रातिपदिकसञ्ज्ञासूत्रे विवक्षणात् । 'इक' इत्यादौ—सुबुत्प-त्तिश्च 'वृक्षप्रचलन'न्यायेन समुदायादेव । यद्वा—'सह'ग्रहणादेव समुदायाद्विभक्तिः । समुदायबोधकत्व-प्रतिपादकोऽन्यत्रयः **शेखरग्रन्थस्तु**—अणुदित्सूत्रस्थेन—आदेर्बोधकत्वमित्याशयक**शेखरग्रन्थेन** विरुद्ध इति चिन्त्य एव—'' इति **जटाजूटे** विस्तरः ।

भ्यामपहारात् । एतत्फलितकथनमेव भाष्ये, मूले च—**स्वस्य च रूपस्येति ।** स्वमित्यनुवृत्तिपरत्वेन व्याख्यानन्तु हेयमेव, अनुवृत्तौ फलाभावात् । इतेति किं ?—'ञमङणने'ति णकारादिभिः प्रत्याहारो मा भूदिति । 'सह'ग्रहणाच्च समुदाय एव सञ्ज्ञेति समुदायादेवेक इत्यादौ विभक्त्युत्पत्तिर्नादिमात्रात्, न चान्त्यस्येत्सञ्ज्ञालोपाभ्यामपहारात्

❀ अभिनव-चन्द्रिका ❀

समुदाय एव सञ्ज्ञेति । 'इ'गित्यादिसमुदायः सञ्ज्ञेत्यर्थः । परे तु–''सहग्रहणाच्चादेरेव सञ्ज्ञा, नन्वादेरेव सञ्ज्ञा चेदिक इत्यादौ विशिष्टाद्विभक्तिरनुपपन्नेत्यत आह–'समुदाय एव सञ्ज्ञे'ति । 'समुदाय' इति सप्तम्यन्तं, 'सञ्ज्ञे'त्यस्य प्रातिपदिकसञ्ज्ञेत्यर्थः । तथा च सहग्रहणेनैतां तात्पर्यग्राहकत्वबोधनेनार्थवत्सूत्रोक्तार्थवत्त्वस्य समुदाय एव सत्त्वेन नादिमात्राद्विभक्त्युत्पत्तिः । अत एव 'प्रत्याहारायवर्णेऽणुदित्सूत्रं चरितार्थ'मिति तत्र-तत्रत्यग्रन्थः सङ्गच्छते, अन्यथा इगादिपदेषु इकारादेरनर्थकत्वेन–ककारादिचिह्नेन तस्याऽन्त्वेपि अष्टादशानां बोधो न स्यादित्यणुदित्सूत्रेण्ग्रहणं व्यर्थमेव स्यादित्याहुः ।

व्यक्तिपक्ष एवमेवेति । चिन्त्यमिदं, जातिपक्षेऽप्यत्रत्यतत्रत्यव्यक्त्योर्भेदेनादिरित्यस्यादिसदृशः,

❀ चिदस्थिमाला ❀

आह —**एतदिति** । एवेनानुवृत्तिनिरासः । मूले=कौमुद्यां । कैयट–दीक्षित–रत्नाकर–दण्ड्यायुक्तिं खण्डयति—**स्वमित्यनुवृत्तीति ।** 'स्वं रूप'मित्यत इति भावः । **फलाभावादिति ।** मध्यानुबन्धानां तत्त्ववारणायोक्तप्रकारस्यावश्यकत्वेन, तेनैवैतद्वारणे एतन्मात्रवारक—तदनुवृत्तौ फलाभावादित्यर्थः । अत एवैतत्सूत्रप्रत्याख्यानसङ्गतिः, अधिकं शब्दरत्ने भावप्रकाशे च स्पष्टं तत एव बोध्यम् । **इतेति किमिति ।** अस्य चतुर्दशसूत्र्येकवाक्यतया तत्तत्सूत्रान्त्यस्य ग्रहणेन, तस्य चेत्त्वस्यैव सत्त्वादिति—प्रश्नः । यत्तु 'रप्रत्याहारो यथा स्यादिति–इतेति'ति **कौस्तुभ रत्नाकर-दण्ड्या**दयस्तन्न, तस्य खण्डितत्वादत आह—**ञमेति** । 'इगादि'रित्यादिः । तदेकवाक्यत्वेऽपि तत्तत्सूत्रान्त्यस्यैव ग्रहणे मानाभावेन विवक्षितसमुदायान्त्यत्वस्य ञमङणेति णादावपि सत्त्वं, 'परस्मिन्सती'त्यादिलक्षणमपि विवक्षानिबन्धनमत एवेगादिप्रत्याहारसिद्धिः, अन्यथान्त्यवदादेरपि तत्तत्सूत्रादेरेव ग्रहणेन तदसिद्धिः स्पष्टैव । नचैवं सिद्धान्तेऽपि सुडिति प्रत्याहारष्टाटकारेण कुतो न, प्रत्यासत्त्यर्व्याप्तिन्यायस्य प्राबल्येन तस्य तत्र विशेषणार्थतया पूर्वान्तत्वाभावेऽपि तदापत्तेरिति वाच्यं, मिथःसमभिव्याहारादन्त्यपदे स्वरितत्वप्रतिज्ञया वाऽन्त्यत्वप्रयुक्तेत्सञ्ज्ञावत्त्वेव तदङ्गीकारादिति भावः । ननु 'अन्त्यस्येत्सञ्ज्ञादिनाऽपहारादादेरेव सञ्ज्ञात्व'मिति **कैयट**दूषणाय कौस्तुभे उक्तत्वेन तत एव विभक्तिः स्यान्न समुदायादिति 'इक' इत्यादि निर्देशानुपपत्तिरत आह—**सहेति** । अन्यथा तदर्थयोगे

❀ सदाशिवभट्टीयम् ❀

इतेति किमिति । अस्य चतुर्दशसूत्र्येकवाक्यतया तत्सूत्रान्त्यस्य ग्रहणेन तस्य चेत्त्वस्यैव सत्त्वादिति प्रश्नः । **मा भूदिति ।** तदेकवाक्यत्वेपि सूत्रान्त्यस्यैव ग्रहणे मानाभावेन विवक्षितसमुदायान्त्यत्वस्य णादावपि सत्त्वम्, 'परस्मिन् सती'त्यादिलक्षणमपि विवक्षानिबन्धनम्, अत एवेगादिप्रत्याहारसिद्धिः, अन्यथा तत्तत्सूत्रादेरेव ग्रहणे तदसिद्धिः स्पष्टैव । **एतेन** 'पूर्वस्य दीर्घोग' इत्यादिज्ञापकाद्येन प्रत्याहारस्तदवधिकानामेव ग्रहणे सिद्धेऽन्त्यपदसामर्थ्यात् सूत्रान्त्यग्रहणेन सिद्धे इतेति सुत्यजम्, एवं ह्यन्योऽन्याश्रयश्च नेत्यपरं लाघव'मित्य**पास्तम्** । एवं'चेग्हस्व'इत्यादिज्ञापकाद्योवधिस्तदवधिकानामेव पूर्वेषामाक्षेपे सिद्धे आदिग्रहणसामर्थ्यात्सूत्रादेरेव ग्रहणापत्त्येगाद्यसिद्धिप्रसङ्गात्, ज्ञापकात्सूत्रावयवप्रत्याख्याने बहूपप्लवापत्तेश्च । **सूत्रेषु**—वर्णसमाम्नायसूत्रेषु । **तदभावादिति ।**

❀ वरवर्णिनी ❀

न चेति । 'आदिरन्त्येने'त्यस्य न 'वर्णसमाम्नायघटकादि'रित्यर्थो युक्तः, इगादिप्रत्याहारे—

'आदिरन्त्येने' त्यसङ्गतं, सूत्रेष्वित्सञ्ज्ञायामपीगादिशब्देषु तदभावात्, 'अन्त्येने' त्यस्येदन्त्यसदृशेनेत्यर्थात्, व्यक्तिपक्षे एवमेवौचित्यात्, सादृश्यमूलिकैव चात्र तत्त्वप्रत्यभिज्ञेत्याहुः ।

❀ अभिनव-चन्द्रिका ❀

'अन्त्येने' त्यस्यान्त्यसदृशेनेत्यर्थस्यावश्यकत्वात् । ननु 'इणादिप्रत्याहारे आदीनां ग्रहणं माभू'दित्यसङ्गतं, पूर्वणकारेणादिप्रत्याहारे ऋकारादिग्रहणस्याप्यनिष्टत्वादित्याशङ्क्य सिंहावलोकनन्यायेन समाधत्ते—**इण इत्येव सिद्ध इति । पूर्वनिपातापत्तेरिति ।** हल्त्वं जातिरिति कल्पे हल्पदस्य जातिशब्दत्वात्सञ्ज्ञाशब्दत्वाद्वेति भावः । **कर्मधारययोग्यानामिति ।** यत्र समासे तदभावे वा विशेषो नास्ति, तादृशकर्मधारययोग्यपदानामित्यर्थः । एतेन 'निपात एका' जित्यादौ व्यभिचारादि-

❀ चिदस्थिमाला ❀

तृतीयाविधानेन तयैव तदर्थलाभे तदानर्थक्यं स्पष्टमेव । एतेन **सह**ग्रहणमितेत्यस्याप्राधान्यसूचनार्थमन्यथेत्थम्भूतलक्षणे तृतीया स्यादित्यपास्तम्, इक इत्यादिनिर्देशानुपपत्तेः । चो वाक्यालङ्कारे, त्वर्थे वा । सूत्रेषु=वर्णसमाम्नायस्थेषु, **इगादीति ।** 'इको य'णित्यादिस्थेष्विति भावः । नन्वेवं प्रत्याहारसिद्धिरेव न स्यादत आह—**अन्त्येनेत्यस्येति ।** तस्योक्तार्थलक्षणायामन्त्यपदं तात्पर्यग्राहकमिति भावः । एवमादिशब्देऽपि तत्सदृशे लक्षणा बोध्या, तद्ध्वनयन्नाह—**व्यक्तीति ।** एतेना'दित्वान्त्यत्वयोरत्र स्वतः सत्त्वेन तल्लक्षणा नोचिता, इतेत्यस्यैव तु सोचिते' त्यपास्तम् । ननु प्रत्यभिज्ञया ऐक्यस्यैव लाभेन किमर्थं सदृशे लक्षणाऽत आह—**सादृश्येति । चात्र**=व्यक्तिपक्षे । **तत्त्वेति ।** अभेदेत्यर्थः । **आहुरिति** सूचितारुचिबीजन्तु—जातिपक्षे सिद्धान्ते

❀ सदाशिवभट्टीयम् ❀

लोपस्य सामर्थ्यादभावे फलाभावात्सञ्ज्ञापि नेत्यर्थः । **यत्तु** शक्तिग्रहात्पूर्वमर्थवत्त्वाभावेन प्रातिपदिकत्वाभावाद्व्यवसितान्त्यत्वाभावेन सञ्ज्ञाप्राप्तिरेव नेति, तन्न, यत्र सति प्रातिपदिकत्वे परिष्कृतार्थवत्त्वम्भावि तत्र सञ्ज्ञेति तदर्थात् । अन्यथा राम इत्यादावपि सति प्रातिपदिकत्वे परिष्कृतार्थवत्त्वमित्यात्माश्रयः स्यात् । 'आदिरन्त्येने'तिशक्तिग्राहकप्रवृत्तिस्तु न फलम्, इकादिषु कादेरित्त्वेपि चतुर्दशसूत्रीसम्बन्धिविवक्षितान्त्यस्याभावेनेदन्त्यसदृशेनेत्यर्थावश्यकतया सञ्ज्ञाविरहेपि तत्प्रवृत्तेरित्याह—**अन्त्येनेत्यस्येदन्त्येति ।** ननु तत्तत्सूत्रेषु लोपाभावस्य सामर्थ्यात्कल्पनापेक्षया चतुर्दशसूत्र्यामेवोच्चारणसामर्थ्यात्तदभावः कल्प्यताम्, एवं ह्यन्तपदे लक्षणाश्रयणं न, हलि अकारग्रहाभावायावश्यकाचारात्तेषां प्रत्याहारवाच्यतापि नेति चेन्न, व्यक्तिपक्षे ऋलक्सूत्रस्थस्येगादिशब्दस्थस्य कृत्स्नस्य भेदात्तथार्थावश्यकत्वेन तदेकवाक्यतया जातिपक्षेपि तथैवोचितत्वात्, तथा सति 'लोपश्च बलवत्तर' इति भाष्यासङ्गतिप्रसङ्गश्च, तदेतदाह—**व्यक्तीति ।**

❀ विषमपदविवृतिः ❀

इदन्त्यसदृशेनेत्यर्थ इति । प्रत्याहारनिष्पत्तिकाले ऽन्त्यस्यासत्त्वेपि तस्य स्मरणमात्रेण तत्सादृश्यज्ञानमिगादिशब्दघटककादिषु सुलभमित्याशयः । **व्यक्तिपक्ष इति ।** 'प्रत्युच्चारणं वर्णव्यक्तिर्भिन्ने'ति पक्ष इत्यर्थः । अत्र सादृश्यानुयोगिन समुदायाघटकत्वेपि तत्प्रतियोगिनस्तथात्वात्—तेनैव समुदा-

❀ वरवर्णिनी ❀

इकारककारादेर्वर्णसमाम्नायघटकत्वस्य विरहात्, कादेरन्त्यस्येत्त्वाभावाच्च, तस्माद'न्त्यबोध्येन सहित आदिबोध्य' इत्येवमर्थो वाच्यः, सोऽपि न सम्भवति, बोधविषयत्वाभावरूपलोपविधायकेन 'तस्य लोप' इति शास्त्रेण वर्णसमाम्नायघटकतादृशककारादौ बोधकताया एवाभावस्य बोधनादित्याशयकः—**न चे**त्यारभ्य—**तदभावादित्यन्तः शङ्काग्रन्थः**, 'अन्त्येनेते'त्यस्येदन्त्यसदृशेनेत्यर्था**दित्युत्तरग्रन्थाशयः** ।—" इति **बालशास्त्रिचरणाः । सदृशेनेति ।** सादृश्यञ्च—स्ववृत्ति-श्रावणप्रत्यक्षविषयतावच्छेदककत्वादिधर्म-वत्त्वेन ।

औचित्यादिति । व्यक्तिपक्षे यत्किञ्चिद्व्यक्तेरेव वर्णसमाम्नायस्थाकारादिबोध्यत्वेनानेककाकारादिव्य-

'अचि श्नुधात्वि'तिसूत्रे 'इण' इत्येव सिद्धे 'य्वो'रिति निर्देशादिण्परेणैवेति लण्सूत्रे भाष्ये स्पष्टम् ।

हलन्त्यम् । अत्र पदद्वयं,समासेऽन्त्यशब्दस्य पूर्वनिपातापत्तेः । कर्मधारययोग्य-

❀ **अभिनव-चन्द्रिका** ❀

दमसङ्गतमित्यपास्तं, समासाभावे **एकोऽजिति** समासे **एकाजिति** तत्र विशेषस्य सत्त्वात् । चिन्त्य-मिदम्, 'इदितो नुम्' 'अशिती'त्यादौ समासकृतविशेषाभावेऽपि समासदर्शनात्, चक्षिङ्धातौ नुम्वारणायेदित इत्यत्र 'आदेच उपदेशेऽशिती'त्यत्रेत्सञ्ज्ञकशकारादावित्यर्थलाभाय तत्र च कर्म-धारस्यावश्यकत्वात् । अत एव एश्यात्वं न भवति ।

❀ **चिदस्थिमाला** ❀

लक्षणानुपयोगः, इगादिशब्देषु तदभावेऽपि जातेरैक्यात्तत्त्वस्य सत्त्वादिति । नन्विणादिप्रत्याहारेषु ऋकारादीनां ग्रहणं मास्त्विति वाच्ये आदीनामिति किमित्युक्तमत आह—**अचीति** । **परेणैवेति** । णेनेति शेषः । यत्तु —"सूत्रमते वर्णवद्धलपदार्थः प्रसिद्ध एव, युक्तश्चैतत्, अन्यथा व्याकरणज्ञानविकलानां तज्ज्ञानं न स्यात्, यणादयस्तु शास्त्रमात्रोपयुक्ता इति तेषां तदबोधे इष्टापत्तिः, भाष्येऽन्योन्याश्रयशङ्कासमाधानादि सर्वं शास्त्रसिद्धस्यैव शास्त्रे ग्रहणमित्यभिमानेन, लश्चेति वक्तव्यमित्यस्याप्ययं भावः,—'हलन्त्यं—ल्' इति न्यासः कार्यः, उपदेशेऽन्त्यं हल्–लश्चेद्भवतीति तदर्थः, तत्रान्त्यवाक्ये लस्येत्त्वे लोपसम्भवः, एवञ्च संयोगान्तलोपो दुर्लभ इति मनोरमादिचिन्त्यमिति । यद्वा मास्तु प्रश्लेषः—सूत्रशाटकन्यायेन न सः, भाष्ये-ऽनुक्तमपीदं तुल्यन्यायत्वादिहाश्रित"मिति **मन्दः**, तन्न, पाणिनेः पूर्वं तज्ज्ञानेऽपि तदाशयेन प्रयोगाभावस्य शब्दरत्ने प्रतिपादितत्वात्, वार्त्तिककृद्भाष्यकृदादीनामपि तज्ज्ञानस्य त्वदुक्तरीत्या सम्भवेनाभिमानेन प्रवृत्तौ बीजाभावाच्च । तद्विकलपदेनान्यशास्त्राध्ययनशीलानामेव ग्रहणं तेषां, तदबोधे इष्टापत्तेश्च, आगोपालादि तदन्यग्रहणे तेषामबोधस्यैवोपलम्भाच्च, अन्यत्रेत्सञ्ज्ञार्थं कृतलप्रश्लेषेण स्वस्य तत्त्वे फलाभावाच्च, लुप्तनि-र्दिष्ट इत्यनुक्तेश्च, स्वस्मिन्नपि प्रवृत्तौ स्वस्यासत्त्वेनेष्टार्थालाभाच्च, पूर्वत्रासिद्धमितिवत्, सूत्रशाटकन्यायस्य वाक्यापरिसमाप्तिन्यायविरोधेनात्राप्राप्तेति दिक् ।

❀ **ज्योत्स्ना** ❀

अचि श्न्विति । एतत्समानानुपूर्वीकःकिञ्चिदक्षरव्यत्यासेनाणुदिदित्यत्र ग्रन्थो दृश्यत

❀ **सदाशिवभट्टीयम्** ❀

नन्विणादिप्रत्याहारे आदीनां ग्रहणं माभूदिति कथमुक्तम्, ऋकारादीति वक्तव्यम्, अत आह—**अचीति**—अन्ये-ऽवतारयन्ति । **हलन्त्यम्** । **सिद्धत्वादिति** । 'अलोन्त्यात्' 'हलोऽनन्तरा' 'तत्पुरुषः समानाधिकरण' 'निति

❀ **वरवर्णिनी** ❀

क्तिभिरिगादिप्रत्याहारानापत्त्या—आदिरित्यादेः—आदिसदृश इत्येवमर्थ आवश्यक इति **भावः** ।

परे तु—'आदिबोध्य इत्यर्थे तु हकारादिव्यञ्जनमात्रस्यैव बोध्यतयाऽकारविशिष्टहकारादेर्बोध्यत्वाभावेन हलादिप्रत्याहारसिद्धिर्न स्यात्, अतो जातौ व्यक्तौ वा पक्षे आदिसदृश इत्येवार्थो वाच्य इति—व्यक्ति-पक्षमात्रे तथोक्तिश्चिन्त्यैवे'त्याहुः । **परेणैवेति** । असन्दर्भ एवायं ग्रन्थ इति **परे** ।

पदद्वयमिति । लाघवादिति शेषः । समासे तु समासशक्तेः पृथक्स्वीकारे गौरवं स्पष्टमेव । हलिदमित्यनुगतप्रतीते'र्हल्त्वं जातिः, तत्समभिव्याहृतस्यान्त्यपदस्य तद्विशेषणतया पूर्वनिपातापत्ति-रभिहिता । ननु–'अन्त्यमिदमन्त्यमिद'मित्यादिप्रतीत्यनुरोधादन्त्यत्वमपि जातिरिति क्व पूर्वनिपातप्रसङ्ग इत्यरुचेराह—**कर्मधारयेति** । **केचित्त्वन्त्य**पदवद्धलपदमपि गुणवाचि, हकारादिलान्तसमुदायघटकवाचक-त्वाद्धल इत्युभयोर्गुणवाचकतया पूर्वनिपातानियमस्यैव लाभादेवारुचिमाविश्चक्रुः

पदानां समासाभावस्य सूत्रकारशैलीसिद्धत्वाच्च। यद्यपि सर्वोऽपि हल् तं तं समुदायं प्रत्यन्त्यो भवति तथाप्य'न्त्यपदोपदेश'पदाभ्यां प्रत्यासत्त्याऽज्ञातस्वस्वरूपज्ञापकोच्चारण-

❀ अभिनव-चन्द्रिका ❀

अज्ञातस्वस्वरूपज्ञापकोच्चारणविषयसमुदायमिति। स्ववृत्तिश्रावणप्रत्यक्षविषयतावच्छेदकधर्मावच्छिन्नविधेयताप्रयोजकतापर्याप्त्यधिकरणसमुदायमित्यर्थः। स्ववृत्तिश्रावणप्रत्यक्षविषयतावच्छेदकधर्मपर्याप्त्यनुयोगितावच्छेदकधर्मावच्छिन्नानुयोगिताकपर्याप्तिका या–स्ववृत्तिश्रावणप्रत्यक्षविषयतावच्छेदकधर्मावच्छिन्नविधेयताप्रयोजकता–तद्वान् समुदाय इति यावत्। एतेन–प्रत्येकमपर्याप्तस्य समुदाये पर्याप्त्यसम्भवात्–'दन्न'जित्यादावनन्त्यनकारे इत्सञ्ज्ञा दुर्वारेत्यपास्तं, 'दन्न'च्छब्दत्वावच्छिन्नविधेयताप्रयोजकतापर्याप्त्यनुयोगितायाः—'दन्न'जितिसमुदायवृत्तिषट्त्वस्यावच्छेदकत्वेन, 'दघ्न्'शब्दपर्याप्त्यनुयोगितायाश्च 'दघ्न्'इत्येतद्वृत्तिचतुष्ट्वस्यावच्छेदकत्वेन—'दघ्न्'शब्दत्वपर्याप्त्यनुयोगितावच्छेदकचतुष्ट्वधर्मावच्छिन्नानुयोगिताकपर्याप्तिकत्वस्य दन्नच्छब्दत्वावच्छिन्नविधेयताप्रयोजकतायामभावेनाऽदोषात्। न चैवमपि'दघ्न्'शब्दवृत्तित्वविशिष्टदन्नच्छब्दत्वावच्छिन्नविधेयता–प्रयोजकतापर्याप्त्यनुयोगितावच्छेदकं दघ्नवृत्तिचतुष्ट्वमिति—'विशिष्टं शुद्धान्नातिरिच्यते'इति न्यायेन

❀ चिदस्थिमाला ❀

समासेऽन्त्येति। कर्मधारये इत्यर्थः। तस्य यौगिकत्वेन विशेषणत्वादिति भावः। ननु तत्प्रकरणमनित्यमत आह—**कर्मेति।** 'प्राय'इत्यादिः, अत एवैकाजित्यादिसङ्गतिः, 'हलोऽनन्तरा'इत्यादाविति भावः। **भवतीति।** तथा चातिप्रसङ्गः, अन्त्यग्रहणन्त्वादिव्यावृत्त्या सफलमिति भावः। अत एव मूलरीत्याह—**अन्त्यपदोपदेशपदेति।** उपात्तानुवृत्ताभ्यामित्यर्थः। सिद्धान्ते तु अन्त्यग्रहणसामर्थ्यादेव तदर्थलाभ इति नोपदेशपदानुवृत्तिः, एतदर्थमेव प्रत्यासत्त्येत्युक्तं, 'षः प्रत्यये'त्यादिज्ञापकान्नादेरिति न तद्व्यावृत्त्यर्थमन्त्यग्रहणमिति स्पष्टं भाष्यादौ। उपदेशशब्दस्य बहुव्रीहिणा कालपरत्वादिराह—**प्रत्यासत्त्येति।** इह=हलन्त्यमित्यत्र, नत्वन्यत्र, अत एवादिरित्यत्रेतपदं सार्थकम्। अत्र मानान्तरमपि

❀ ज्योत्स्ना ❀

इत्यन्यतरत्र लेखकदोष इहैव वेति बोध्यम्। **सूत्रकारशैलीसिद्धत्वादिति।** 'निपात एकाच्' 'अपृक्त एकाल्', 'अजादेर्द्वितीयस्ये'त्यादौ समासदर्शनात्प्रायोवादोऽयम्। ननु सुप्तिङ्गोध्यानुबन्धविनिर्मुक्त-

❀ सदाशिवभट्टीयम् ❀

कृत्यतौ' 'पिति कृती'त्यादाविति भावः।

❀ विषमपदविवृतिः ❀

याक्षेपः सुलभः। **आहुरित्युत्तरम**'चि स्नुधात्वित्यारभ्य **स्पष्टमित्यन्तो** ग्रन्थः प्रक्षिप्तः, प्रकृतासङ्गतेः। एवंविधेनाग्रिमग्रन्थेन पुनरुक्तेश्च। **समासाभावस्येति।** 'निपात एकाजना'ङित्यादौ कर्मधारयदर्श-

❀ वरवर्णिनी ❀

समासाभावस्येति। उद्देश्यत्वविधेयत्वान्यतरविषयताप्रयोजकानामिति शेषः। तेन 'निपात एकाज्' 'अपृक्त एकाल्'इत्यादौ समासेऽपि न दोषः, तत्र प्रत्ययपदस्यैव निपातपदस्यैव चोद्देश्यताप्रयोजकत्वात्। **यद्यपीति।** तथाच–वराक इत्यादौ 'वृङः षाक'न्नितिषाकनः ककारस्यापीत्सञ्ज्ञायां कित्त्वाद्गुणनिषेधापत्तिरिति भावः। **प्रत्यासत्त्येति।** उपदेशेऽन्त्यमित्यर्थे—उपदिश्यमानान्त्यमित्यर्थोऽर्थादेव लभ्यत इति भावः।

अज्ञातेति। स्ववृत्ति-श्रावणप्रत्यक्षविषयताच्छेदकधर्मा–ऽवच्छिन्नविधेयता–प्रयोजकं पदमुपदेशशब्दार्थ इति जटाजूटकृतः।

विषयसमुदायं प्रत्यन्त्य इह गृह्यते, अत एव—मकारेत्सञ्ज्ञापरित्राणार्थस्थमोरुकारश्चरितार्थः, समुदायोपदेश एव सर्वत्र ऋषितात्पर्येणाऽवयवानां नान्तरीयकतया तेषामज्ञातस्वरस्वरूप-

❀ अभिनव-चन्द्रिका ❀

'दध्न'च्छब्दत्वावच्छिन्नविधेयताप्रयोजकतापर्याप्त्यनुयोगितावच्छेदकं तदपि भवतीति'दध्न्'शब्दत्वपर्याप्त्यनुयोगितावच्छेदकधर्मावच्छिन्नानुयोगिताकपर्याप्तिका—दध्नच्छब्दत्वावच्छिन्नविधेयताप्रयोजकता जातेति—अनन्त्यनकारादेरित्सञ्ज्ञा दुर्वारैवेति वाच्यं, 'दध्न्'विशिष्टाधिकरणत्वस्य, दध्नच्छब्दत्वावच्छिन्नविधेयताप्रयोजकताधिकरणत्वस्य च क्लृप्तत्वेन क्लृप्ताभ्यामाभ्यामधिकरणत्वाभ्यामेवोपपत्तौ'दध्न्'वृत्तित्वविशिष्टदध्नच्छब्दत्वावच्छिन्नविधेयताप्रयोजकताया अतिरिक्ताधिकरणत्वस्य कल्पनायां प्रमाणाभावेन विशिष्टपर्याप्त्यादेरभावेनादोषात्। स्पष्टञ्चेदं 'कालाध्वनो'रित्यत्र **व्युत्पत्तिवादे**। वस्तुतस्तु वैयाकरणमतेऽवयवावयविनोरिव प्रत्येक-समुदाययोरपि परस्परं भेदः स्वीक्रियत इति समुदायपर्याप्तं नैव प्रत्येकं पर्याप्नोतीति न कोपि दोषः। अत एव "समुदायस्य सखिरूपत्वाभावात्—'असखी'तिनिषेधाप्रवृत्तेर्घिसञ्ज्ञे"ति **कौमुदी** सङ्गच्छते। अत एव समास-ग्रहणस्य नियामकत्वं भाष्योक्तं सङ्गच्छते, अन्यथा—'राजन्-ङस्' इत्यस्य प्रत्ययान्ततदादित्वेन, 'पुरुष-सु' इत्यस्यापि प्रत्ययान्ततदादित्वेन तत्समुदायोऽपि—प्रत्यत्यान्ततदादिरिति तदसङ्गतिः स्पष्टैवेति दिक्।

ऋषितात्पर्येणेति। अयं भावः—'स्ववृत्तिश्रावणप्रत्यक्षविषयतावच्छेदकधर्मावच्छिन्नविधेयताप्रयोजकत्वप्रकारकतात्पर्यविशेष्यतापर्याप्त्यधिकरणान्त्यं, 'स्ववृत्तिश्रावणप्रत्यक्षविषयतावच्छेदकधर्मपर्याप्त्यनुयोगितावच्छेदकधर्मावच्छिन्नानुयोगिताकपर्याप्तिका या स्ववृत्तिश्रावणप्रत्यक्षविषयतावच्छेदकधर्मावच्छिन्नविधेयताप्रयोजकत्वप्रकारकतात्पर्यविशेष्यता—तादृशविशेष्यतावदन्त्यमिति वा 'हलन्त्य'मित्यादेरर्थः, अन्यत्सर्वं पूर्वोक्तदिशावसेयम्।

❀ चिदस्थिमाला ❀

ध्वनयितुमाह—**अत एवेति**। तादृशसमुदायान्त्यग्रहणादेवेत्यर्थः। इत्सञ्ज्ञायाः परित्राणमिति पञ्चमीसमासः, 'सुप्सुपे'तीति बोध्यम्, अन्यथोकारे इत्सञ्ज्ञया लुप्ते तत्त्वात्तत्प्राप्त्योकारवैयर्थ्यं स्पष्टमेव। नन्वेवमपि तद्विषयत्वस्य समुदायवदवयवेऽपि सत्त्वेन प्रत्यासत्त्या समुदायान्त्यग्रहणमेव कुतोऽत आह—**समुदेति**। **नान्तरीयकतयेति**। 'उच्चारणेऽपी'ति शेषः, तेषाम्=अवयवोच्चारणानाम्। ननूपदेशशब्दस्य बहुव्रीहिणाऽन्यथा वा कालपरत्वेपि तद्रूपाधारस्य कर्त्रन्वयद्वारा प्रधानक्रियान्वयस्य न्याय्यत्वेनाद्योच्चारणकाले इत्सञ्ज्ञाभवनमित्यर्थलाभः, स च बाधितः, तत्कालात्पूर्वमनभिव्यक्तया तत्काले इत्सञ्ज्ञाया दुर्वचत्वात्, तत्कालेऽभिव्यक्तौ तु तदनन्तरकोल सोचिता, अत एव '**नाज्झला**'विति सूत्रभाष्यसङ्गतिः, किञ्चाइउणितिणादा-

❀ सदाशिवभट्टीयम् ❀

'इत्सञ्ज्ञायाः परित्राणे'ति पञ्चमीसमासः। **नान्तरीयेति**। अन्यनिष्पादकतया निष्पाद्यत्वेनेत्यर्थः।

❀ विषमपदविवृतिः ❀

नादयुक्तमेतत्। **नान्तरीयकतयेति**। अन्तरा=विना—भवोऽन्तरीयः, गहादित्वाच्छः। ततः स्वार्थिकः कः, नशब्देन समासश्च। प्राधान्यादित्सञ्ज्ञाभवनक्रियायामुपदेश इत्यस्यान्वयभ्रमवारणायाह—

❀ वरवर्णिनी ❀

इत्सञ्ज्ञापरित्राणम्=इत्सञ्ज्ञाविरहः। न चावयवेषु ऋषितात्पर्याभावे तेषामुच्चारणं व्यर्थं स्यादत आह—**नान्तरीयेति**। व्यापकतयेत्यर्थः। अवयवोच्चारणं विना समुदायोच्चारणस्य कर्त्तुमशक्यत्वादेव तदुच्चारणं, न तु तत्र मुनेस्तात्पर्यमित्याशयः।

ज्ञापकत्वाभावात्। **उपदेशेऽन्त्यमिति**। तत्र विद्यमानमन्त्यमित्यर्थः। तेन 'अइउ'णित्यादौ णादीनां हल्प्रत्याहारसिद्ध्युत्तरं तत्सिद्धिः, अन्यत्र त्वन्तरङ्गत्वात्प्राय उच्चारणेनाभिव्यक्तस्य

❀ चिदस्थिमाला ❀

विदमपि दुर्वचमत आह—**तत्र विद्यमानमन्त्यमिति**। आद्योच्चारणकाले विद्यमानं तादृशमन्त्यं हलित्यर्थः। एतेन—सप्तम्युपपत्त्यर्थं 'विद्यमानमित्यस्याध्याहार'इत्यपास्तं, तद्धनयंस्तत्फलमाह—**तेनेत्यादिना**। तदध्याहारेणेत्यर्थः, तथा च यत्र यदेत्सञ्ज्ञाशास्त्रप्राप्तिस्तदा तत्र सेति तदर्थकोपदेशपदेन तदव्यवहितोत्तरकालो लक्षणीय इति सर्वत्र तात्सिद्धिस्तदाह—**अइउणित्यादाविति**। **णादीनामिति**। 'लभिन्नाना'मिति शेषः। तस्य तु सूत्रान्तरेणोपदेशाव्यवहितकाले एव सा, तदाह—**हलिति**। तत्=इत्सञ्ज्ञा, 'नाज्झला'विति सूत्रभाष्यन्तु लान्यणाद्यन्यविषयमित्याह—**अन्यत्रेति**। लान्य-णादिभिन्ने इत्यर्थः, अत एव पूर्ववैलक्षण्यबोधक**स्तु**शब्दः, तत्र भाष्येऽनुक्तं हेतुमाह—**अन्तरिति**। 'जशः शी'त्यादावसम्भवादाह—**प्राय इति**। 'उच्चे'त्यस्य 'आद्ये'त्यादिः। **अभीति**। ज्ञातस्य सञ्ज्ञाविधानादिति भावः।

❀ सदाशिवभट्टीयम् ❀

'उच्चारणेपी'ति शेषः, **तेनेति**। अध्याहारेणेत्यर्थः, आद्योच्चारणकाल इत्सञ्ज्ञाभवनमित्यर्थे तु न स्यात्, तत्रार्थे बाधश्च। तत्कालात्पूर्वमनभिव्यक्त्या तत्काल इत्सञ्ज्ञाया दुर्वचत्वात्, **नाज्झलाविति**सूत्रभाष्यविरुद्धत्वाच्च।

❀ विषमपदविवृतिः ❀

तत्र विद्यमानमिति। 'क्रियामात्रं कालोपाधि'रिति मते उपदेशशब्द आद्योच्चारणपरः, मतान्तरे लक्षणया तदधिकरणकालपरः। तेनैधादीनां धादेर्नेत्वं, उपदेशेऽनन्त्यत्वात्, प्रधानक्रियान्वये तु तद्दुर्वारम्। यद्यप्य'धिकरणसप्तम्यन्तस्य साक्षात्कर्तृकर्मणोरेवान्वयः, तद्द्वारा क्रियान्वय'इति वक्ष्यमाणस्वसिद्धान्तरीत्या 'विद्यमान'इत्यध्याहारो नात्रावश्यकः, अत एवाक्षेषु शौण्ड इत्यत्र प्राचां विद्यतिक्रियाध्याहारो नव्यैर्दूषयिष्यते, तथाप्येधादेर्धस्येत्त्ववारणायाप्रधानान्त्यविशेषणतया विद्यतिक्रियाध्याहारः कृतः। न चैवं 'क्रियान्वयोऽप्यस्य कर्त्राद्यन्वयद्वारेणैवे'ति कारकप्रकरणस्थशेखरविरोधः, साक्षादन्वयस्यैवात्र स्वीकारादिति वाच्यम्, तस्याक्षशौण्डस्तिष्ठतीत्यादिविषयत्वात्। यत्र हि कर्तृकर्मविशेष्यतया क्रिया भासते तत्र तद्द्वारैव सप्तम्यन्तस्य क्रियान्वयसम्भवे क्रियान्तराध्याहारो न युक्तः, साक्षादप्रधानक्रियायामन्वयश्चायुक्तः। अक्षशौण्डपदयोः समासानापत्तेः। यत्र तु कर्तृकर्मक्रिये तद्विशेषणे, यथा-कटे शेते देवदत्तः स्थाल्यां पक्व ओदन इत्यादौ, तत्र तु साक्षादेव क्रियान्वयः। 'तत्र विद्यामानमन्त्य'मित्यत्रापीत्थमेव, एवम'क्षेषु शौण्डस्य वस्त्र'मित्यादावप्यध्याहृतविद्यतिक्रियायामेव सप्तम्यन्तार्थस्यान्वय इत्यलं प्रसक्तानुप्रसक्त्या। यद्यप्येधादेर्धकारादिरुपदेशे विद्यमानाकारस्येत्सञ्ज्ञोत्तरमन्त्यश्चेत्युक्तव्याख्यायामप्येधादौ धस्येत्सञ्ज्ञा दुर्वारा, तथाप्याद्ये वयसि धनी देवदत्त इत्यादाविव धर्मिपारतन्त्र्येणोपदेशकालावच्छिन्नान्त्यत्वमपि भासते इति न कश्चिद्दोषः। **तेनेति**। उपदेश इत्यस्येत्सञ्ज्ञाभवनक्रियायामन्वयं विहायान्त्यपदार्थान्वयिविद्यतिक्रियायामन्वयकरणेनेत्यर्थः।

अन्यत्र त्विति। 'ऋहलोर्ण्य'दित्यादौ। तत्पूर्वमपि हल्प्रत्याहारसिद्धिसम्भवादिति भावः। **अन्तरङ्गत्वादिति**। तेन 'न धातुलोप' इतिसूत्रस्थं—'धातुग्रहणं किं? लूञ् लविते'ति भाष्यं सङ्गच्छते। धातुसञ्ज्ञायाः क्रियावाचकत्वज्ञानाधीनत्वेन बहिरङ्गत्वात्। **सिद्ध्युत्तरमिति**। वर्णोपदेशकाले तदव्यवहि-

---

❀ वरवर्णिनी ❀

तेनेति। आद्योच्चारणकाले तु इत्सञ्ज्ञाविधायकहलन्त्यसूत्रवाक्यार्थबोधाभावान्नेत्त्वप्राप्तिः, तत्र विद्यमानमन्त्यमित्यर्थे तु किञ्चित्क्षणाविलम्बेनापीत्त्वे न क्षतिः, उपदेशकालिकविद्यमानत्वस्य हल्प्रत्याहारसिद्ध्युत्तरकालेऽपि सम्भवादिति भावः। अन्यत्र=अक्षरसमाम्नायातिरिक्ते—'भवतष्ठक्छसा'वित्यादौ।

तदव्यवधानेनैवेत्सञ्ज्ञा, पदार्थोपस्थितिरनुबन्धविनिर्मुक्तस्यैव, 'उपदेशोत्तरकाल इत्सञ्ज्ञे'ति 'नाज्झला'विति सूत्रभाष्यात्। 'धु'डित्यादौ सानुबन्धाद्विभक्तिस्तु—तेनैवानुबन्धविनिर्मुक्तोपस्थितेस्तस्यैवार्थवत्त्वात्सुलभा, इत्सञ्ज्ञाकार्यं तु यत्र सञ्ज्ञा तत्रानर्थक्यात्तदुपस्थाप्य एव। स्पष्टञ्चेदं—'तित्स्वरित'मित्यत्र कैयटे।

❀ चिदस्थिमाला ❀

तदव्यवेति। पदपर्यालोचनकाल इति भावः, यथोद्देशपक्षे चेदमत एवाह—**पदार्थोपेति**। अनुबन्धविनिर्मुक्तस्यैव पदार्थस्योपस्थितिरित्यर्थः। **गुरुकुलवत्समासः**। **सूत्रभाष्यादिति**। उत्तरत्वस्याव्यवहितत्वगर्भस्यैव विवक्षणादिति भावः। नन्वेवं तस्य लोपेन तच्छब्दात्तदुपस्थितिर्वाच्येति तस्यार्थवत्त्वात्ततो विभक्तिरुचिता, अनुबन्धस्तु तदग्रे वाच्योऽत आह—**धुडिति**। सूत्र इत्यर्थः। तत्र सञ्ज्ञायामपि लोपो न, उच्चारणसामर्थ्यात्। अन्यथा तत्स्वरूपप्रतिपत्तिरेव न स्यादिति भावः।

तदाह—**तेनैवेति**। सानुबन्धेनैवेत्यर्थः। एवमग्रेपि। नन्वेवं तत्रेत्सञ्ज्ञाऽपि न स्यात्तत्राफलत्वादत आह—**इत्सञ्ज्ञेति**। तस्याः कार्यमित्यर्थः। **कैयट इति**। तत्र हि—'तिती'ति वार्त्तिकप्रत्युदाहरणे **किरती**ति प्रतीके—"इत्सञ्ज्ञा सूत्रोपात्त एव प्रवर्त्तते, उपदेशोत्तरकाले तद्विधानात्, लोपद्वारा च तस्याऽसत्त्वं प्रत्यार्य्ये प्रतिपाद्यते, पदार्थोपस्थितेरनुबन्धविनिर्मुक्ताया एव जायमानत्वात्, ततश्च 'द्विरेफो भ्रमर'इतिवच्छब्दार्थयोरभेदोपचारात्सञ्ज्ञी सञ्ज्ञाधर्मेण कथ्यते"इत्युक्तम्। नन्वेवं व्याकरणस्य विकार इत्याद्यर्थे 'अनुदात्तादेश्चे'त्यञि आद्युदात्तवैयाकरणशब्दे 'चित'इत्यन्तोदात्तत्वापत्तिः, वैयाकरणशब्दस्तु—लित्स्वरेणाद्युदात्त'करण'शब्दस्याङ समासे समासान्तोदात्तबाधक–'तत्पुरुषे तुल्यार्थे'तिपूर्वपदप्रकृतिस्वर–बाधके—**गतिकारकोपेति**–तस्मिन्नेव स्वरे, पुनरपि 'वि'ना समासे, तेनैव तस्मिन्स्वरे आद्य

❀ ज्योत्स्ना ❀

पदार्थानां विभक्तित्वेऽन्तरङ्गत्वाज्जसादौ सादेरित्सञ्ज्ञालोपौ प्रसज्ज्येयातां, निषेधसूत्रस्य तु प्राग्दिशीयेषु

❀ सदाशिवभट्टीयम् ❀

तदव्यवधानेति। यथोद्देश इदम्, अनुबन्धविनिर्मुक्तस्यैव पदार्थोपस्थितिरित्यर्थः, गुरुकुलवत्समासः।

नन्वेवमन्त्यस्य लोपेन तच्छच्छब्दात्तदुपस्थितिर्वाच्येति तस्यैवार्थवत्त्वात्ततो विभक्त्युत्पत्तिरुचिता, अनुबन्धस्तु तदग्रे वाच्योऽत आह—**धुडितीति**। तत्रेत्सञ्ज्ञायामपि लोपो न, उच्चारणसामर्थ्यात्, अन्यथा

❀ विषमपदविवृतिः ❀

तोत्तरकाले च हल्प्रत्याहारस्यासिद्धिरिति भावः। **प्राय इति**। मनिनादेर्नकाराद्यभिप्रायेण **प्रायः**पदं, तत्र हि तवर्गान्तर्गतत्वेव निषेधविषयत्वसम्भावनया 'न विभक्तौ'विति वाक्यार्थबोधोत्तरमेव तत्रेत्सञ्ज्ञा। एवं–सुपः पकारे ऽपि, विभक्तिघटकत्वेन निषेधविषयत्वसंशयात्। **तस्यैवार्थवत्त्वादिति**। **तेनैवेति**। इदमयुक्तम्–सानुबन्धकेनानुबन्धविनिर्मुक्तोपस्थितेरसंभवात्। आर्धधातुकस्ये'डित्यादौ उपदेशोत्तरमेवेत्सञ्ज्ञालोपाभ्यामपहारे जश्त्वानापत्तेश्च, तस्माद्वाक्यार्थबोधोत्तरमेव विधेयत्वप्रतिपत्त्युत्तरमेवेत्सञ्ज्ञालोपौ, 'उपदेशोत्तरकाले इत्सञ्ज्ञे'ति भाष्यमप्येवमेव कथं चिन्त्यम्।

अन्ये तूच्चारणं परिनिष्ठितस्यैवोच्चारणोत्तरमेव तदपहारेण काकस्येव न शब्दबोध्येतत्याहुः। **तदुपस्थाप्य एवेति**। 'कितिचे'त्यादौ तद्बोध्य इत्यर्थ इति भावः।

❀ वरवर्णिनी ❀

इच्चकारेति। वस्तुतस्तु चित्त्वस्यादिरन्त्येनेति सूत्रप्रवृत्तये चारितार्थतया बोधकवृत्तिचित्त्वस्य बोध्ये आरोप एव नेति शङ्कावसर एव नेति तत्त्वम्।

वैयाकरणे चित्स्वरस्तु न, तस्येचकारसदृशत्वेऽपि तत्त्वाभावात्। विभक्त्यादि-सञ्ज्ञापि-सूत्रान्तर्गतानामेवेति,-तत्रैव 'न विभक्तौ'वित्यादीनां प्रवृत्तिः, अत एव—"—'इदम इ'शित्यादावण्त्वात्सवर्णग्रहणं प्राप्तम'प्रत्यय'इत्यनेन निषिध्यते—" इति भाष्योक्तं सङ्गच्छते। यत्त्वनेकाल्सूत्रे 'इशि शिद्ग्रहणाभावेऽपि शित्करणादेव सर्वादेशत्व'मिति

❀ चिदस्थिमाला ❀

उदात्तः, असमस्तविषयत्वाद्गतिर्गताविल्यनुदात्तो न-अत आह—**वैयाकरण इति**। तच्छब्द इत्यर्थः। **तस्येति**। ऐचश्चस्येत्यर्थः, तस्य प्रत्ययमात्रस्वरत्वन्तु न, मानाभावात्, प्रतिपादितमिदं प्राक्। नन्वेवं 'न विभक्तौ'वित्यादीनामानर्थक्यं स्यात्, इत्वकाले विभक्तिसञ्ज्ञाया अभावादत आह-**विभक्त्यादीति**। आदिना प्रत्ययादिपरिग्रहः, एवेन—पदार्थोपस्थितिविषयादिव्यावृत्तिः। **तत्रैव**—इत्सञ्ज्ञाविषये सूत्रोपात्ते एव। उक्तार्थे भाष्यसम्मतिमप्याह—**अत एवेदमिति**। पदार्थोपस्थितेरनुबन्धविनिर्मुक्तत्वादेवेत्यर्थः, अन्यथा तदानीमनण्त्वेनाशङ्कासमाधानयोरसङ्गतिः स्पष्टैव। प्रत्ययग्रहणस्यादेशाद्युपलक्षकत्वादाह—**अप्रत्यय इत्येति**। उक्तार्थे भाष्यविरोधं परिहरति—**यत्त्विति**। अनेकाल्सूत्रे शिद्ग्रहणाभावेऽपि शित्करणादेवेशि सर्वादेशत्वमित्यर्थः। यद्यपि स न श्रवणार्थ इति **शित्करणा**दित्युक्तं, तथापि तस्य फलान्तराभावात्पूर्व-मित्सञ्ज्ञामकृत्वाऽनेकाल्त्वात्सर्वादेशे तत इत्सञ्ज्ञेति तदाशयस्य वाच्यत्वेन पूर्वविरोध इति भावः।

तस्य=भाष्यस्य। 'इत्सञ्ज्ञकशकारे'ति—बहुव्रीहिः, इत्सञ्ज्ञा च विशेषणं, अत एव साम्प्रतिकालाभोऽत आह—**भूतेति**।

❀ ज्योत्स्ना ❀

चरितार्थत्वमत आह—**विभक्त्यादिसञ्ज्ञापीति**। 'चुटू इत्यादा'वित्यादिपदात् 'लशक्वतद्धिते'

❀ सदाशिवभट्टीयम् ❀

स्वरूपप्रतिपत्तिरेव न स्यादिति भावः। **वैयाकरणेति**। व्याकरणशब्दाद्विकारेऽनुदात्तादेश्चेत्यञि आद्युदात्तवैय्याकरणशब्दे **चित** इत्यन्तोदात्तत्वापत्तिरित्यर्थः। यद्यपी'त्वेपि प्रत्याहारसिद्धिरूपफलसत्त्वेनानर्थ-क्याभावात्तदुपस्थाप्ये न तत्कार्य'मितिसमाधानं वक्तुं शक्यं, तथापि न्याय्यसमाधिमाह—**तत्त्वाभावेति**। प्रातिपदिकान्तत्वात्तु न तत्त्वं, यत्र सञ्ज्ञा तत्र फलाभावेन तद्विषयेत्सञ्ज्ञाशास्त्रीयवाक्यस्यानुपप्लवात्। धुडा-दौ तु तत्तदनुबन्धसामर्थ्याद्वाक्यमुपप्लवते- इति तत्सामर्थ्यादुपस्थाप्ये कार्य्यमिति बोध्यम्। **न विभक्तावित्य-**स्यानर्थक्यं परिहरन्नुपजनिष्यमाणेति न्यायमूलकमर्थमाह—**विभक्त्यादीति**। आदिना—प्रत्ययपरिग्रहः, यत्र तु सुङ्स्योरौट्सुपोर्न **विभक्ते**त्यस्य न प्राप्तिस्तत्र त्वनुबन्धविनिर्मुक्तस्यैव विभक्त्यादिसञ्ज्ञा, पूर्वमित्सञ्ज्ञाया अप्रवृत्तौ बीजाभावादिति बोध्यम्। **अत एवेति**। पदार्थोपस्थितेरनुबन्धविनिर्मुक्तत्वादेवेत्यर्थः। अन्यथा तदा-नीमनण्त्वादाशङ्कासमाधानयोरसङ्गतिः स्पष्टैव। 'अप्रत्यय'इत्यस्य आदेशाद्युपलक्षकत्वादेवाह—**अप्रत्यय**

❀ विषमपदविवृतिः ❀

तत्त्वाभावादिति। इदं चिन्त्यम्—अत्राऽपीत्सञ्ज्ञाप्रवृत्तौ बाधकाभावात्। 'चितः सप्रकृते-र्बह्वकजर्थ'मिति वार्तिकस्वारस्येन चिति प्रत्यय एव तत्प्रवृत्त्या न दोष इति तु वक्तुं युक्तमिति **केचित्**। कुण्डिनचि चित्स्वराप्रवृत्तिररुचिबीजम्। **भाष्योक्तमिति**। इदञ्च भाष्यमनुबन्धानां

❀ वरवर्णिनी ❀

विभक्त्यादीति। स्वौजसित्यादिसूत्रान्तर्गतानामेव सुप्पदार्थत्वादिति भावः। **अन्ये** तु—बोध्यस्यैव सञ्ज्ञा, बोधके इत्सञ्ज्ञाभावश्चोपसञ्जनिष्यमाणन्यायादित्याहुः। **अत एव**=बोधके एवेत्सञ्ज्ञायाः स्वीकारा-देव। इशो बोध्यत्वे त्वस्याण्बोधकत्वाभावाद्भाष्यासङ्गतिरेव। **यत्त्विति**। अनुबन्धविनिर्मुक्तस्यैव बोध्यत्वेऽने-काल्त्वाभावात्सर्वादेशता न स्यादिति-भाष्यविरोध इति **शङ्का**, शकारकरणसामर्थ्याद्बोध्यबोधकयोरभेदाध्य-

भाष्ये उक्तं,—तस्येत्सञ्ज्ञकशाकारकरणाद्भूतपूर्वानेकाल्त्वमादाय सर्वादेशत्वमित्यर्थ इति न तद्विरोधः ।

अत्र केचित्—"अनुबन्धा अनेकान्ताः=अनवयवाः, यो ह्येकान्तः स कदाचित्

❀ अभिनव-चन्द्रिका ❀

भूतपूर्वानेकाल्त्वमादायेति । अनुबन्धघटितबोधकवृत्तिधर्माणां बोध्ये आरोपात्,अनेकाल्वृत्तिधर्मावच्छिन्नविधेयताश्रयः सर्वस्य स्थाने भवती'त्यनेकाल्शित्स्वार्थकरणाद्वा, बोधकवृत्त्यनेकाल्त्वादेः स्थानिवद्भावेनादेशे—बोध्ये आरोपाद्वेति भावः । न चानेकाल्त्वादेरल्त्वव्याप्यधर्मघटितत्वेन 'अनल्विधा'विति निषेधान्न स्थानिवद्भाव इति वाच्यं, 'न ल्यपी'तिज्ञापकेनाऽल्त्वव्याप्यधर्म-

❀ चिदस्थिमाला ❀

प्रसङ्गादाह—**अत्रेति** । अनुबन्धविषय इत्यर्थः, 'अनेकान्ता' इत्यस्य व्याख्या—**अनवेति** । 'प्रकृत्यादी'त्यादिः । तत्त्वं व्यतिरेकमुखेनोपपादयति—**यो ह्येकान्त इति** । शाखादिरित्यर्थः । छेदनेन

❀ सदाशिवभट्टीयम् ❀

इत्यनेनेति । **अनवयवा इति** । उपस्थापकानवयवा इत्यर्थः । **कदाचित्तत्रेति** । तदुपस्थाप्ये इत्यर्थः ।

❀ विषमपदविवृतिः ❀

प्रयोगासमवायित्वात्,प्रयोगसमवायिनश्चाण्त्वाद्ग्रहणकशास्त्रप्रवृत्त्यापत्तिरित्य**भिमानेन** । नव्यमतेपीशि समुदायस्यैवार्थवत्त्वेन तदेकदेशेकारस्य निरर्थकत्वादणुदित्सूत्राप्राप्तेः । अत्र **केचिदित्यारभ्याहु**-रित्यन्तो ग्रन्थोऽस्मत्कृत**त्रिपथगायां** विवृतः ।

❀ वरवर्णिनी ❀

वसायादनेकाल्त्वान्न भाष्यविरोध **इत्युत्तरम्** । 'पादस्य लोपोऽहस्त्यादिभ्य'इत्यादौ तु कल्पकाभावान्नाभेदारोपः, तदेवमनुबन्धघटिते एव बोधकत्वम्, बोध्यता तु—अनुबन्धराहितस्येति निर्गलितोऽर्थः ।

—'बोध्यत्वमिव बोधकत्वमप्यनुबन्धविनिर्मुक्तस्यैवे'ति वदतां केषाञ्चन मतमुत्थापयति—**केचिदिति** ।

अनुबन्धा अनेकान्ता इति । तथाचात्र'अनुबन्धा बोधकावयवत्वाभाववन्तः, बोधकावयवत्वेनोपलब्धिविषयत्वाभावा'दित्यनुमानप्रयोगः, हेतोः प्रसिद्धत्वादेवात्राप्रयोगः । हेतुतावच्छेदकरूपेण हेतोरेवासिद्ध्या हेतुसाधनायैव तु–'**विधेये कदापी**'त्यादिग्रन्थः । तदेवं हेतुसाधनाय द्वितीयोऽनुमानप्रयोगः—'अनुबन्धाः, बोधकानवयवाः, बोध्यावयवत्वेनोपलब्धिविषयत्वाभावा'दित्येवंरूपः सूचितः । एवञ्च प्रथमानुमाने हेतुः प्रसिद्धत्वान्नोक्तः, तादृशहेतोः साधनाय यद्द्वितीयमनुमानं, तस्यैव—'विधेये कदाप्यदर्शना'दिति हेतुरिति बोध्यम् । प्रथमानुमाने—'विधेयेऽदर्शना'दित्यस्यैव हेतुत्वे तु हेतुसाध्ययोर्वैयधिकरण्यं स्यात् । एतेन—'अनुबन्धा अनेकान्ता'इति प्रतिज्ञानन्तरं 'विधेये कदाप्यदर्शना'दित्यस्य हेतोरनुक्तेस्तर्कशास्त्रनियमविरुद्धमिदमिति केषां चिदुक्तिः समाहिता, 'विधेये कदे'त्यस्य पूर्वानुमानहेतुत्वस्यैवाभावात् । अपरानुमानस्यायं हेतुरित्यन्यदेतत् । **परे** तु—"बोध्य–बोधकयोरभेदाध्यवसायेन वैयधिकरण्यविरहात्—'विधेये कदे'-त्यैव हेतुः, 'प्रतिज्ञोत्तरं हेतु'रिति च न नियमः, तथा च—'अनुबन्धाः—बोधकावयवत्वाभाववन्तः, विधेयावयवत्वेनोपलब्धिविषयत्वाभावा'दित्येवानुमानप्रयोगः—"इत्याहुः ।

ननु गुणपदघटकगकारस्य विधेयेऽकारादावदर्शनाद्बोधकावयवत्वरूप–साध्याभाव–वति गुणपदघटकगकारे–बोध्यावयवत्वेनोपलब्धिविषयत्वाभावरूपस्य हेतोर्वर्त्तमानतया व्यभिचारः । किञ्च–'प्रत्युच्चारणं शब्दो भिद्यते' इत्यभ्युपेयते चे**द्रुसिजिकिञ्च्य** इति सूत्रस्थसन्घटकसकारस्यापि—लक्ष्यस्थसकाराद्भिन्नतया—विधेयेऽदर्शनाद्व्यभिचारः, प्रत्युच्चारणं शब्दो न भिद्यते चेन्मनिन्घटकानुबन्धनकारे भागासिद्धिः, इत्सञ्ज्ञकनकारस्य मकाराकारोत्तरवर्त्तिनकारस्य चैक्येन मनो नकारस्य च बोध्यावयवत्वेनोपलब्धिविषयत्वस्यैव सत्त्वेन तादृ-

ॐ वरवर्णिनी ॐ

शविषयत्वाभावरूपहेतोः पक्षैकदेशे नकारेऽसम्भवात्, पक्षतावच्छेदकावच्छेदेनानुमितौ—हेतोः पक्षैकदेशावृत्तित्वस्यैव भागासिद्धित्वादिति चेत्,—स्ववृत्ति-श्रावणप्रत्यक्षविषयतावच्छेदकधर्मा-ऽवच्छिन्नबोधकावयवत्वाभावस्यैवात्र साध्यत्वेनाभिमततया,—गुणे—स्ववृत्तिश्रावणप्रत्यक्षविषयतावच्छेदक-गुणत्व-धर्मावच्छिन्नबोधकत्वस्यैव विरहेण [अत्वादिनाऽन्यतमत्वादिनैव वा तस्य बोधकत्वात्—] तदतिरिक्तताद्दृशोदासीनबोधकानवयवत्वस्य गकारेऽक्षततया व्यभिचाराभावात्। ननु—ईदृशानुमितेः—'अनुबन्धः स्ववृत्तिश्रावणप्रत्यक्षविषयतावच्छेदकधर्मावच्छिन्नबोधकावयवो न वे'ति संशय एव प्रतिबध्यो न तु—'अनुबन्धो बोधकावयवो नवे'ति सन्देह इति प्रकृतसंशयानिवर्त्तकतयेदृशाऽनुमितेरप्रयोजकत्वम्, किञ्च—'सनि बोधकता नवे'ति सन्देहप्रयुक्तो हि नकारे बोधाकावयवत्वसन्देहः, विधेयतावच्छेदकता च 'स'त्वे निश्चिता,—इति स्ववृत्तिश्रावणप्रत्यक्षविषयतावच्छेदकधर्माच्छिन्नबोधकानवयवत्वस्य सनो नकारे स्वतः सिद्धत्वात्तत्साधने सिद्धसाधनमितिचेत्

—अत्रास्मद्गुरुचरणाः—'अनुबन्धाः स्वघटितघटकवृत्तिश्रावणप्रत्यक्षविषयतावच्छेदकधर्मावच्छिन्नविषयताप्रयोजकपदानवयवाः, स्वघटितघटकप्रयोज्यविधेयतावच्छेदकधर्माभावा'दित्येवानुमितिः। 'गुप्तिज्किद्भ्यः स'नित्यत्र-स्वम्-अनुबन्धो नकारः, तद्घटितः-'सन्' इति, तद्घटक-सकार-वृत्तिश्रावणप्रत्यक्षविषयतावच्छेदको धर्मः—'स'त्वम्, तादृशधर्मावच्छिन्नविषयताप्रयोजकं पदं-सन्पदं, तदनवयवत्वमनुबन्धे साध्यते, तत्र च अनुबन्ध-नकार-घटित-सन्-घटक-सकार-प्रयोज्यविधेयतावच्छेदक-सत्वधर्मस्याप्यभाव इति लक्षणसमन्वयः। णिनि-मनिनादौ भागासिद्धिवारणाय हेतुदले विधेयतावच्छेदको धर्मश्च-विशेष्यविशेषणभावापन्नशृङ्खलोपनिबद्धयावत्पदार्थसङ्कुचितो ग्राह्यः। तेन—मनिनादिस्थले-तादृशो धर्मो मन्त्वेन्त्वादिः, तदभावस्यानुबन्धनकारेकारादौ सत्त्वान्न भागासिद्धिर्दोषः।

गुणपदघटकगकारे च-स्वं गकारस्तद्घटितं गुणपदं, तद्घटकमपि व्यपदेशिवद्भावेन गुणपदमेव, तद्वृत्तिश्रावणप्रत्यक्षविषयतावच्छेदको धर्मो गुणत्वं, तद्धर्मावच्छिन्नविधेयताप्रयोजकपदं न गुणपदं, अदेङ्निष्ठविधेयताया अत्वादिनाऽन्यतमत्वेन वाऽवच्छिन्नतया गुणत्वेनावच्छिन्नत्वाभावात्, किन्तूदासीनं पदान्तरं तथा, तदनवयवत्वस्य च तत्र सत्त्वान्न व्यभिचारः। साध्यदले—तादृशविषयता च-स्वघटितघटकवृत्तिश्रावणप्रत्यक्षविषयतावच्छेदकधर्मेण साक्षादवच्छिन्ना ग्राह्या, तेन 'आद्गुण'इत्यनेन सङ्केतसम्बन्धेन गुणपदवतो विधानाद्गुणपदावच्छिन्नादेङ्निष्ठविधेयतायाः परम्परया गुणत्वावच्छिन्नत्वेपि न गकारे व्यभिचारः। न चैवमपि गुणपदघटके गकारे—स्वं-गकारस्तद्घटित-गुणपद-घटकाऽकार-वृत्ति-श्रावणप्रत्यक्षविषयतावच्छेदको धर्मोऽत्वं, तेन साक्षादवच्छिन्ना—अकारनिष्ठा विषयता, तत्प्रयोजकं पदं—गुणपदं,-तदवयवत्वस्यैव—सत्त्वेन पुनरपि व्यभिचारस्तदवस्थ एव, किञ्च—स्वं सनो नकारस्तद्घटिताऽष्टाध्यायी, तद्घटकं—'गुप्तिज्किद्भ्यः स'न्निति सूत्रं तद्वृत्तिश्रावणप्रत्यक्षविषयतावच्छेदकधर्मावच्छिन्नविधेयताया अप्रसिद्धिः, किञ्च-स्वं सनो नकारस्तद्घटितं सप्तम्यन्तं 'सनी'ति, तद्घटक इकारस्तद्वृत्तिश्रावणप्रत्यक्षविषयतावच्छेदकधर्मादेरप्रसिद्धिरिति वाच्यम्, 'स्वघटित-पदाघटित-विभक्त्यघटित-घटक-स्वेतरयावद्वृत्तिश्रावणप्रत्यक्षविषयतावच्छेदकधर्मावच्छिन्नविधेयताप्रयोजकपदानवयवा'इत्यस्य साध्यदलेविवक्षणेनादोषात्। नन्वेवमपि कुक्सुम्घटकानुबन्धककारमकारयोः कत्वमत्वरूपविधेयतावच्छेदकधर्माभावस्य हेतोरसत्त्वाद्भागासिद्धिरिति चेन्न, बोधकानवयवत्वेन निश्चितोत्तरत्वाभाववत एवानुबन्धस्य पक्षतया विवक्षणेन—कुगादिघटकानुबन्धककारे बोधकानवयवत्वेन निश्चितो य उच्चारणार्थकोकारस्तदुत्तरत्वस्यैव सत्त्वेन पक्षतावच्छेदकानाक्रान्तत्वेनादोषात्। नन्वेवं—कुक्-मुम्घटकमकाराद्यनुबन्धानां बोधकानवयवत्वसाधकं किमितिचेत्—'कुक्—मुमनुबन्धौ बोधकानवयवौ, बोधकावयवोत्तरत्वविशिष्ट—बोधकानवयवोत्तरत्वा' दित्यनुमानेनैव तथा निर्णयादित्याहुः।

श्रीबालशास्त्रिचरणास्तु"—अनुबन्धाः स्वघटितघटकप्रयोज्यस्ववृत्तिश्रावणप्रत्यक्षविषयतावच्छेदक-

तत्रोपलभ्यत एव, अयन्तु न तथा, तदर्थभूते विधेये कदाप्यदर्शनात्, 'हलन्त्य'मित्य-

❀ अभिनव-चन्द्रिका ❀

घटितधर्मे 'अनुबन्धघटितबोधकाऽवृत्ती'तिविशेषणेनादोषात् । यत्तु-'अनेकाल्बोधकबोध्यस्सर्वस्य स्थाने भवती'त्यर्थेन औश्पदबोध्यौकारादेस्सर्वादेशत्वं'भूतपूर्वानेकाल्त्वमादाय सर्वादेशत्व'मिति शेखरस्यात्रैव तात्पर्यमिति, तन्न 'लोपानुनासिकादेशादेरपि सर्वादेशत्वापत्तेः। **विधेये कदाप्यदर्शनादिति** । न च हेतुवाक्यस्य पूर्वं लेखनौचित्येनेदमसङ्गतमिति वाच्यम्, 'अनुबन्धा बोधकनिरूपितावयवत्वाभाववन्तः, बोधकावयत्वेनोपलब्धिविषयत्वाभावा'दिति पूर्वानुमाने हेतोः स्पष्टत्वादनुक्तेः,तत्रासिद्धत्वपरिहारायैतद्धेतुलेखनात् । वस्तुतस्तु-'स्वघटितपदाघटितविभक्त्यघटितघटकस्वेतरयावद्वृत्तिश्रावणप्रत्यक्षविषयतावच्छेदकधर्माच्छिन्नविषयताप्रयोजकनिरूपितावयवत्वाभाववन्त'इति साध्यदलम्,'स्वघटितपदाघटितघटकप्रयोज्यविधेयतावच्छेदको यो विशेष्यविशेषणभावापन्नशृङ्खलोपनिबद्धयावत्पदार्थसङ्कुचितो धर्मस्तदवच्छिन्नत्व' 'स्वघटितपदाघटितघटकप्रयोज्यविधेयताख्यविषयताऽवच्छेदकधर्म-

❀ चिदस्थिमाला ❀

तत्रानुपलम्भादाह—**कदाचिदिति अयन्तु**=अनुबन्धत्वावच्छिन्नस्तु, **न तथा**=नावयवः । **तदर्थेति** । तद्घटितार्थेत्यर्थः, यद्वाऽवयवित्वेनाभिमतार्थेत्यर्थः । तथा चानुपलम्भकयत्नं विना तत्रान्यत्र चोपलभ्यमानोऽनवयवः, तं विना तत्रैवोपलभ्यमान एव यः सोऽवयव इति भावः । नन्वेवमित्त्वस्यैवाभावेन मूले कुठार एव स्यादत आह—**हलन्त्यमिति** । उभयत्र लक्षणेति भावः । नन्वेवमपि वृत्तिर्न स्यात्सम्बन्धा-

---

❀ वरवर्णिनी ❀

धर्मावच्छिन्नविधेयताकबोधप्रयोजकावयवत्वाभववन्तः, 'स्वघटितघटकप्रयोज्यस्ववृत्तिश्रावणप्रत्यक्षाविषयतावच्छेदकधर्माच्छिन्नविधेयतावच्छेदकधर्मवत्त्व' 'स्वघटितघटकप्रयोज्यस्ववृत्तिश्रावणप्रत्यक्षविषयतावच्छेदकावच्छिन्नविधेयताकबोधप्रयोजकावयवोत्तरतादृशबोधकानवयवानुत्तरत्वै'तदन्यतरसम्बन्धावच्छिन्नप्रतियोगिताक-**'स्वाभाववत्त्वात्'** इत्येव सकलसाधारणी अनुमितिः । वस्तुतस्तु-एवमनुमितौ हेतुतावच्छेदककोटावन्यतरत्वप्रवेशे जगत्प्रवेशापत्त्या गौरवमिति-'अनुबन्धाः स्वविशिष्टवृत्तिश्रावणप्रत्यक्षविषयतावच्छेदकधर्मेण साक्षादवच्छिन्नविधेयताप्रयोजकपदघटकत्वाभाववन्तः, स्वविशिष्टविधेयतावच्छेदकधर्माभावा'दित्येवानुमितिः, साध्यकोटौ-अनुबन्धवैशिष्ट्यञ्च-'स्वेतरत्व' 'स्वघटितपदघटकप्रयोज्यविधेयताप्रयोजकावयवत्व' 'स्वघटितपदघटकानुबन्धेतरत्वै'तन्त्रितयसम्बन्धेन । हेतुकोटौ वै० 'स्वघटितपदघटकप्रयोज्यत्व''स्वघटितघटकपदपर्याप्तश्रावणप्रत्यक्षविधेयतावच्छेदकधर्मावच्छिन्नत्वो'भयसम्बन्धेन । स्वम्—अनवयवत्वेनाभिमतम् । कुगादावन्त्य इवादावपि-कादौ हेतुसाध्ययोः सत्त्वान्न व्यभिचारः । साध्यतावच्छेदककोटौ—'स्वेतरत्व'-निवेशात्कुगाद्यककारे हेतोर्न व्यभिचारः । तत्रैव द्वितीयसम्बन्धदानात्स्वविशिष्टमुदासीनककारमादाय कुगाद्यककारे न व्यभिचारः । तृतीयसम्बन्धनिवेशात्तत्रैवान्त्ये ककारे न व्यभिचारः । वैशिष्ट्यघटके द्वितीयसम्बन्धे 'पदाघटिते'ति निवेशाद्वुञ्छ'णितिसूत्रविहितकगवयवकशब्दे—त्रितयसम्बन्धेनापि स्वविशिष्टं तत्सूत्रघटकं कविधायकं कशब्दमादाय न व्यभिचारः । धर्मे 'स्वविशिष्टनिरूपितपर्याप्तत्व'निवेशात् सन्घटकसकारादौ 'स्वाविशिष्टाकारवृत्तिविधेयतावच्छेदकसमुदायत्वमादाय न व्यभिचारः । स्वविशिष्टपर्याप्तधर्मस्य श्रावणप्रत्यक्षविषयतावच्छेदकीभूतस्य विवक्षणात्सङ्केतसम्बन्धेन विधेयतावच्छेदकीभूतगुणपदपर्याप्त्यधिकरणीभूताकारस्य गकारविशिष्टत्वेप्याद्गुण इत्यादिघटकगुणादिपदघटकगकारादौ न व्यभिचारः । हेतुतावच्छेदकीभूतविधेयतायां प्रथमसम्बन्धोपादानात्-विधायकमन्पदघटकनकारूपानुबन्धे स्वघटितपदपर्याप्तधर्मावच्छिन्नां मनिन्पदप्रयोज्यां मन्निष्ठविधेयतामादाय हेतोर्न पक्षतावच्छेदकाव्यापकत्वम् । तत्रैव द्वितीयसम्बन्धदानात्कुगाद्यनुबन्धककारे णिन्याद्यनुबन्धेकारे च न भागासिद्धिः-''इत्याहुः । विस्तरस्तु शब्देन्दुशेखरा**भिनवराजलक्ष्म्यामनुसन्धेयः** ।

त्रान्त्यशब्दः—परसमीपबोधकः, 'चुटू' इत्यादावादिशब्दः पूर्वसमीपबोधकः, 'अनकालिशि'-दित्यादौ समीपे सामीप्यमूलकावयवत्वारोपेण बहुव्रीहिः, स्पष्टञ्चेदमु'पदेशेऽ'जिति सूत्रे भाष्ये, 'मपर्यन्तस्ये'ति सूत्र कैयटे च । तेन डा-णलादाविशादौ च न दोषः, अत एव 'उपदेशेऽजि'ति सूत्रे 'उपदेश'ग्रहणं चरितार्थम्, तद्धि 'अभ्र आँ अटित' इत्यादा-'वादितश्चे'तीट्प्रतिषेधाभावाय, अनेकान्तत्वे हि तत्प्राप्तिरित्याहुः ।

❀ **अभिनव-चन्द्रिका** ❀

वदुत्तरो यः–स्वघटितपदाघटितघटकप्रयोज्यविधेयतावच्छेदकधर्माभाववान्–तदनुत्तरत्वे'तदुभयसम्बन्धावच्छिन्नप्रतियोगिताकस्वाभावादिति हेतुदलं लेखनीयम्। तेन सर्वामष्टाध्यायीं गृहीत्वा '**भ्यस्सन्नि**'-ति वा गृहीत्वा नाप्रयोजकत्वशङ्का । न वा गुणशब्दगकारे, स्थाम्नोऽकार इत्यत्र ककारे वा व्यभिचारः । न वा सर्वामष्टाध्यायीं गृहीत्वा सन्सकारे 'सुप्यजातौ णिनि'रित्यत्रत्येकारे, कुकि ककारे च भागाऽसिद्धिः, न वा काश्यादिभ्यष्ठञ्ञिठावित्यत्र ञिठ्प्रत्ययठकारे व्यभिचारः । विस्तरस्तु **परिभाषेन्दुचान्द्रिकायां** द्रष्टव्यः । **परसमीपबोधक इति** । चिन्त्यमिदं, शित्किदित्यादौ बहुव्रीह्युपपत्तये समीपेऽवयवत्वारोपस्यावश्यकत्वात् । एवं 'परशब्दः पूर्वसमीपबोधकः' इत्यपि चिन्त्यमेव । **अभ्र आँ अटित इत्यादाविति** । ननु दध्नचश्चकारेणानुबन्धेषु स्वसमभिव्याहृतनिरूपितमवयवत्वमारोपणीयम्,

❀ **चिदस्थिमाला** ❀

भावात्, सामीप्ये तु न वृत्तिरिति स्पष्टमेवात आह—**अनेकालिति** । 'वुञ्छणि'त्यादौ ञित्वप्रयुक्तकार्यं-पूर्वस्यैवे'त्यादि तु व्याख्यानतो निर्णेयं, तदाह—**स्पष्टञ्चेदमिति** । **तेन**=लक्षणारोपकृतबहुव्रीह्यङ्गीकारेण ।

भिन्नसूत्रविषयत्वात्कोटिद्वयेनाह–**डाणलेति** । अत्र ज्ञापकान्तरमप्याह–**अत एवोपेति** । अनुबन्धानामनेकान्तत्वादेवेत्यर्थः । 'अभ्र आँ अप' इत्यत्र फलाभावादाह—**अभ्र आँ अटित इति** । तत्त्वमुपपादयति-**अनेकान्तेति** । हि=यतः ।

❀ **ज्योत्स्ना** ❀

'आदिर्ञिटुडवः', 'षः प्रत्ययस्ये'ति । **तेनेति** । आद्यन्तपदयोः पूर्वपरसमीपबोधकत्वाश्रयणेनेत्यर्थः ।

❀ **सदाशिवभट्टीयम्** ❀

यथा वृश्चत्यादौ चकारादिः । सुवृडादौ संयोगान्तलोपेनापहारादुक्तं—**कदाचिदिति** । **न दोष इति** ।

❀ **वरवर्णिनी** ❀

केचित्तु—'स्वघटित–पदाघटित–विभक्त्यघटित–पदघटकानुबन्धेतरयावद्वर्णघटितसमुदाय—पर्याप्तधर्मावच्छिन्नविषयताप्रयोजकानवत्व'स्यैव साध्यता, तेन 'स्थाम्नोऽकार'इत्यादौ–स्व–ककार–घटिताकारघटकाकार-वृत्तिश्रावणप्रत्यक्षविषयतावच्छेदकात्वावच्छिन्नविषयताप्रयोजकाकारपदावयवत्वस्यैव ककारे सत्त्वेन—अनवयवत्वस्याभावेन साध्याभाववति ककारे—हेतोः सत्त्वेऽपि न व्यभिचारः, तादृशयावद्वर्णघटित-समुदायपर्याप्तधर्मत्वस्याकारत्वे एव सत्त्वेन तदवच्छिन्नविधेयताप्रयोजकत्वस्य चाकारपदे विरहेण (अत्वावच्छिन्नविधेयताप्रयोजकत्वस्यैव तत्र सत्त्वात्) तादृशोदासीनपदानवयत्वस्य ककारेऽक्षतत्वा'दित्याहुः ।

'वुञ्छ'णित्यादौ णित्वप्रयुक्तं कार्यन्तु—छस्यैव न तु ककारस्य, द्वयसचश्चकारस्य पूर्व-परोभयसमीपत्वेनोभयनिरूपितावयवत्वारोपेणोभयोश्चित्त्वे—सिद्धे पुनः दध्नचश्चकारकरणस्य वैयर्थ्यापत्त्या—'स्ववि-शिष्टेऽनुबन्धे एव स्वावयवत्वमारोप्यत'इत्यर्थस्य ज्ञापनात् । वै० 'स्वाघटितपदाघटकत्व' 'स्वसमीपत्वो'-भयसम्बन्धेन । 'लोपश्चे'त्यत्र प्रश्लिष्टस्य शित्यस्य पृथक्पदत्वेन लोपाघटित**शि**त्येतत्पदघटकत्वस्यैव शकारे व्यपदेशिवद्भावेन सत्त्वेऽपि—अनतिदिष्टघटकत्वस्यैवात्र सम्बन्धघटकतयोपादानान्न दोषः ।

परेतु"–एकान्ता एव, शास्त्रे तत्रोपलम्भादन्यत्रानुपलम्भाच्च। अनवयवो हि काकादिरेकजातीयसम्बन्धेन गृहवृक्षादिषूपलभ्यते, नैवमयम्। किञ्चानवयवत्वे ण-श-क्प्रत्ययादौ णादेरित्त्वानापत्तिः, प्रत्ययादित्वाभावात्। एवमन्त्यत्वाभावादिशादेः शस्येत्त्वानापत्तिः।

❀ अभिनव-चन्द्रिका ❀

स्वाघटितं यत्पदं तद्घटकनिरूपितमवयवत्वं नारोपणीयम्। अथवा स्वघटितं–यत्पदाऽघटितं पदं–तद्घटकनिरूपितमवयवत्वमारोपणीयमितिकल्पितकल्पद्वयेऽपि—अद्धातुनिरूपितावयवत्वारोपस्य प्राप्तिर्नेति चेन्न। दघ्नचश्चकोरेण स्वविशिष्टे स्वनिरूपितावयवत्वमारोप्यत इति कल्पनेनादोषात्। वैशिष्ट्यञ्च 'स्वघटकत्व' 'स्वाघटितं यदनुबन्धेतरघटितं पदं तदघटकत्वो'भयसम्बन्धेन। **परे त्विति**। अयं भावः 'तदर्थभूते विधेये कदाप्यदर्शना'दिति हेतुरानङादिनकारादौ व्यभिचरितः, वक्ष्यमाणहेतुना सत्प्रतिपक्षितः, 'अनवयवत्वनिश्चयाधीनः समीपेऽवयवत्वारोपः, तदधीना इत्सञ्ज्ञा, तदधीनश्च लोपः, तदधीनञ्च तदर्थभूते विधेये कदाप्यदर्शनं, तदधीनश्चावयवत्वनिश्चय' इति चक्रकेणासिद्धिग्रस्तश्च। नचैकान्तवादिमतेऽपि 'नानुबन्धकृत'मित्यादिपरिभाषात्रयं वक्तव्यमिति वाच्यम्, शित्करणेनानुबन्धघटितबोधकवृत्तयो येऽनुबन्धत्वघटितातिरिक्ता आनुपूर्वीभिन्नाश्च ये धर्मास्तन्निमित्तककार्ये कर्तव्ये अनुबन्धा अविद्यमानवद्भवन्तीति कल्पनेनाऽदोषादिति। **शास्त्रे तत्रोपलम्भादन्यत्रानुपलम्भाच्चेति**। नचायं हेतुः–पृथिव्यादिगुणे गन्धादौ व्यभिचरित इति वाच्यं, साङ्ख्यमतवद्वैयाकरणमतेऽपि अतिरिक्तद्रव्याभावेन साध्यस्यापि सत्त्वात्। नचैवमप्युत्पन्नविनष्टघटे व्यभिचार इति वाच्यं, तत्रोपलब्धिसम्भावनाविषयत्वाभावस्य हेतुत्वेनाऽदोषात्। वस्तुतस्तु नायं हेतूपन्यासपरो ग्रन्थः–किन्तु अयुतसिद्धत्वप्रतिपादनपरः, हेतुश्च विभक्तिनिष्ठविधेयतानिरूपितोद्देश्यताश्रयघटकत्वादिति दिक्।

❀ चिदस्थिमाला ❀

पूर्वमते **केचिदिति** सूचितामरुचिं प्रतिपादयन्सिद्धान्तमाह—**परे त्वेकान्ता एवेति**। अवयवा एवेत्यर्थः। ननु तदभावसाधकहेतोरुक्तत्वात्कथं तत्त्वमत आह—**शास्त्रे इति। तत्रोपेति**। विधेयबोधके एवेत्यर्थः। एतेन विधेयेऽनुपलम्भेऽपि क्षत्यभावः सूचितः। अत एवाह—**अन्यत्रेति**। इदमपि व्यतिरेकमुखेनोपपादयति—**अनवेति**। हि=यतः। **एकेति**। संयोगादिनेत्यर्थः। **नैवमयमिति**। अनुबन्धत्वावाच्छिन्नो न तादृशसम्बन्धेन सर्वत्रोपलभ्यत इत्यर्थः। एवं तद्धेतुनिरासेन साधितेऽवयवत्वे साधकान्तरमप्याह—**किञ्चेति**। नन्वनयोः प्राक् गतिरुक्तैवात आह—**उक्तार्थेति**।

❀ ज्योत्स्ना ❀

'डा-णलादा'वित्यादिपदात् ष्फ-ढुनदीनां ग्रहणम्। शास्त्रे='इदम इश्' इत्यादौ, तत्र=इशित्यादिरूपबोधके। **अन्यत्रेति**। यदवयवत्वेनोच्चारितस्ततोऽन्यत्रेत्यर्थः। **अनुपलम्भाच्चेति**। ननु यथा वन–व्रण–वृक्षादिषूपलभ्यमानस्यैकस्य वकारस्य तत्तदवयवत्वं, तथैशोशादौ शकारादेरित्यवयवत्वसाधकस्य ततोऽन्यत्रानुपलब्धिरूपहेतोर्व्यभिचारित्वम्, अत्रोपाध्यायाः,—'भिन्नसमुदायविषयं तत्र–तत्र वर्णान्तरमेव तदित्य'इउ'णिति सूत्रे शकुनिभाष्यव्याख्यानावसर उपपादित'मित्याहुः। ननु 'वुञ्छण्के'त्यत्र वकारो वुशब्द इव ततोऽन्यत्रोपलभ्यत एवेत्यत आह—**अनवयवो हीति**। एकजातीय-

❀ सदाशिवभट्टीयम् ❀

इत्त्वाभावरूप इत्यर्थः। सर्वादेशत्वाभावरूपश्च सः। डादिव्यतिरिक्त इत्यर्थः, तत्र सर्वादेशत्वं तु प्रश्लेषेणैव,

❀ विषमपदविवृतिः ❀

विधाविति। इदमयुक्तम्—'न विधौ परः शब्दार्थ' इति न्यायविरोधात्' 'ञ्नित्या-

उक्तार्थलाक्षणिकत्वे तु-लक्षणैव दोषः। किञ्च-दृष्नचश्चकारवैयर्थ्यापत्त्याऽवयवत्वमेव न्याय्यम्। अत एव 'वुञ्छण्कठ'जितिसूत्रविहित-के णित्वप्रयुक्तवृद्धिर्न। 'तस्य लोप' इति भाष्ये—'एकान्तत्वमेव न्याय्य'मित्युक्तेश्च। 'उपदेशेऽ'जितिसूत्रे उपदेशग्रहणन्तु-स्पष्टार्थमेव-"इत्याहुः। सर्वत्रानुबन्धसहितनिर्देशे विधौ-'गुप्तिज्किद्भ्य'इत्यादौ 'नकारेत्सञ्ज्ञकः सो भवती'त्यादिक्रमेण बोधः। अनुवादे 'सन्यत' इत्यादौ च—'नकारेत्सञ्ज्ञके

❀ अभिनव-चन्द्रिका ❀

नकारेत्सञ्ज्ञकस्सो भवतीति। वस्तुतस्तु-अनुवादे 'सन्यत' इत्यादावेवैतादृशार्थस्योपयोगो न तु विधेयसमर्पकस्थले,'गुप्तिज्किद्भ्यस्स'नित्यादौ सो भवतीत्यर्थेपि क्षतिविरहात्। अत एवाऽऽटश्चे-त्यादेर्नाऽसङ्गतिः, टकारेत्सञ्ज्ञकाऽकारादचि परत इत्यर्थादिति भावः।

न च 'लिहा इहे'त्यादौ 'दाण्डा इहे'त्यादावपि टकारेत्सञ्ज्ञकाकारादच्परत्वेन वृद्धिः स्यादिति वाच्यम्, इत्सञ्ज्ञकटकाराऽव्यवहितपूर्ववर्तिआकारबोध्यादचि परत इत्यर्थेनादोषादिति। एवं 'टिड्ढे' त्यस्येत्सञ्ज्ञकणकाराऽव्यवहितपूर्ववर्ती य अस्तद्बोध्यान्ताच्चेति चार्थ इति 'लिहा इह''दाण्डा इहे'त्यादौ टाटापोष्टकारेत्सञ्ज्ञकत्वेपि, णप्रत्ययस्य णकारेत्सञ्ज्ञकत्वेपि च न ङीप्प्रसङ्गो न च वृद्धिप्रसङ्ग इत्य-दोषात्। अत एव 'ताच्छीलिके णेपी'तिसङ्गच्छते। अस्मिन्मते च 'तस्य लोप'इतिलोपपदस्य शाब्दबोधविषयत्वाभाव इत्येवार्थ इति दिक्।

परे तु-अनुबन्धविनिर्मुक्तपदार्थोपस्थितौ प्रमाणाभावाल्लोकप्रसिद्धम'दर्शनं लोप'इति सूत्रसङ्केति-तमर्थं विहाय लोपपदस्य शाब्दबोधविषयत्वाभावार्थकत्वे प्रमाणाभावाच्च-इत्सञ्ज्ञालोपौ लुगादिवल्लक्ष्ये एव प्रवर्त्तेते, बोध्यावयवत्वमेकान्तत्वं, बोध्यानवयवत्वमनेकान्तत्वमित्येव सिद्धान्तः। मूलन्तु न युक्तं

❀ चिदस्थिमाला ❀

दोषान्तरमाह-**किञ्चेति**। अत एव=तस्यैव न्याय्यत्वादेव। उक्तार्थे भाष्यसम्मतिमप्याह-**तस्येति**। इति सूत्रभाष्ये इत्यर्थः। नन्वेवमुपदेशग्रहणस्य का गतिरत आह—**उपेति**। एतेन—"उपदेशे किम्? अग्निचित्—सोमसुत्"—इति **वृत्तिकृदुक्तम्**, "अत्र तत्त्वे लोपः स्यात्, न च तुको वैयर्थ्यं, आगत्येत्यादौ साफल्यात्, न च क्विपः पित्त्वं व्यर्थम्, अग्निचितावित्यादौ साफल्यात्-" इति **मिश्रोक्तं**, तथैव **दण्डयुक्तं**, "उपदेशे किं—कनिपो नकारस्य माभूत्, नान्तलक्षणदीर्घस्तु सखेत्यादौ विभक्तिहेतुकानङि सफलः, अप्रत्यय-त्वेन नित्स्वराभावात्तत्र न सा, न च रपरत्वनिवृत्तिस्तत्फलं, नस्य तत्त्वे तस्य दुर्वारत्वादिति"—**रत्नाकरोक्तञ्च** प्रत्युक्तं, वक्ष्यमाणरीत्या तत्रानतिप्रसङ्गात्,—आद्ये फलाभावात्, लोपस्य फलाभावात्, बहिरङ्गत्वेन सुलोपा-सिद्धत्वेनानन्तत्वेनानतिप्रसङ्गात्, सुलोपात्प्राक् तस्यामग्निचितावित्यादौ तुल्यत्वाच्चेति दिक्। स्फुटीभविष्यति चेदम्। 'पदार्थोपस्थितिरनुबन्धे'त्याद्युक्तेर्विधौ वाक्यार्थबोधमाह—**सर्वत्रेति**। 'अनुबन्धे'ति—बहुव्रीहिः। **विधाविति**-जातावेकवचनं। तत्र हलन्त्यमिति प्रवृत्त्या आह—**नकारेत्सञ्ज्ञक इति**। **चोऽ**प्यर्थे।

❀ ज्योत्स्ना ❀

सम्बन्धेन=संयोगसम्बन्धेन। **नैवमयमिति**। नकारस्य वुशब्देन साकमुत्तरोच्चारणविषयत्वं सम्ब-न्धः, छशब्देन तु पूर्वोच्चारणविषयत्वमिति नैकजातीयसम्बन्धस्तत्रेति भावः। **इत्याहुरिति**। ततो

❀ सदाशिवभट्टीयम् ❀

एकान्तत्व इवानेकान्तत्वेपि यन्निष्ठव्यवसितत्वमादायेत्सञ्ज्ञा तत्कार्यं तत्रैवेत्यङ्गीकाराच्च न वैयर्थ्यमत आह—

❀ विषमपदविवृतिः ❀

दिर्नित्य'मित्यादेर्निद्बोध्यार्थकत्वेन सो भवतीत्यर्थेऽपि स्वरसिद्ध्या 'नकारेत्सञ्ज्ञक' इति विशेषणवैय-

१ पदमञ्जर्यां **हरदत्तमिश्रोक्तम्**। २. तत्त्वबोधिनीकृदुक्तम्।

सशब्दे परे' इत्यादिक्रमेण बोधः। स्पष्टञ्चेदं निष्ठासञ्ज्ञासूत्रे भाष्ये। अत एवाऽऽटश्चे-त्यादेर्नासङ्गतिः। अन्यथा यत्राऽऽट् सूत्रे, तत्र नाच्परो, नेष्यते च तत्र वृद्धिः। यत्र प्रयोगे इष्यते वृद्धिस्तत्र नाऽऽडिति तदसङ्गतिः स्पष्टैव। अन्त्यङ्किम्? वाचालः।

❀ अभिनव-चन्द्रिका ❀

निष्प्रयोजनत्वेन काकदन्तपरीक्षातुल्यत्वात्। अनुवादे 'सन्यत'इत्यादौ गुरुतरधर्मावच्छिन्नलक्षणा-स्वीकारापत्तेश्च। विशिष्टाद्विभक्तिदर्शनेन बोधकावयवत्वस्य निश्चितत्वेन सन्देहानुपपत्तेश्च। अत एव भाष्ये 'एकान्तस्तत्रोपलम्भा'दित्येव हेतुस्तत्रोक्तः, **न च य एव संशायकः स एव कथं निर्णायकः** स्यादिति वाच्यम्, वह्निसंशायकधूमादिहेतोरिव लाघवरूपानुकूलतर्केणास्य हेतोर्निश्चायकत्वसम्भवात्। नच 'उपदेशोत्तरकालेत्सञ्ज्ञे'तिभाष्यविरोध इति वाच्यम्, तस्य भाष्यस्य 'वाक्यापरिसमाप्ति'-न्यायप्रदर्शकत्वेन तत्रोत्तरोत्तरं प्रति पूर्वपूर्वं कारणं बोधयितु'मुपदेशोत्तरकाला इत्सञ्ज्ञे'त्याद्युक्तेः। 'हलन्त्य'मिति वाक्यार्थबोधं प्रति 'अइउण्' इत्याद्युपदेशज्ञानं कारणमिति प्रतिपादयितुं तद्भाष्यप्रवृत्त्या बोधक एव इत्सञ्ज्ञालोपावित्यर्थस्यैतस्माद्भाष्यादलाभाच्च। न च 'इदम इश्'अण्-त्वात्सवर्णग्रहणं प्राप्नोती'तिभाष्यविरोध इति वाच्यम्, 'उपदेश इति किं? अभ्र आँ अटितः' 'पदे किम्, तन्त्रयुतम्' 'लोपश्चे'तिद्विशकारको निर्देश' इत्यादिभाष्यवदस्यापि भाष्यस्य अनेकान्त-पक्षाभिप्रायत्वेनादोषात्। 'प्रत्याहाराद्यवर्णेषु—'अणुदि'त्सूत्रं चरितार्थ'मिति वदता नागेशेन'दं भाष्यमेकदेश्युक्ति' रित्यस्यावश्यं वक्तव्यत्वाच्चेत्याहुः। **अन्ये तु** बोधकावयवेष्वनुबन्धेषु बोध्यावयवत्वमा-रोप्यते इत्येकान्तः। अनारोपश्चानेकान्तः। अत एव 'प्रत्याहाराद्यवर्णेषु अणुदित्सूत्रं चरितार्थ' मिति मूलोक्तं सङ्गच्छते। तथाहि—बोधकावयवे 'ऌृ'गित्यत्र ककारे बोध्यैकपदावयवत्वस्यारोपे 'अयं ककार इत्सञ्ज्ञककाराऽभिन्न' इति ज्ञातुं शक्यत्वात्ककारचिह्नेनायमिकारोप्यणिति ज्ञातुं शक्यत इति ककारादिचिह्नेन प्रत्यहाराद्यवर्णेऽणुदित्सूत्रं चारितार्थमिति सङ्गच्छते। अन्यथा प्रत्याहा-राद्यवर्णानामनण्त्वेन सवर्णबोधानुदयात्तदसङ्गतिः स्पष्टैव। अत एव 'आदिरन्त्येने'ति सञ्ज्ञा आदेरेवेति चेद्विशिष्टाद्विभक्तिः कथमिति शङ्कायाः प्रत्याहारेऽनुबन्धानां द्योतकत्वेनार्थवत्सूत्रोक्ता-र्थवत्त्वं विशिष्टस्यैवेति समाधानं मनसि निधाय समुदाये एव प्रतिपदिकसञ्ज्ञेत्यर्थकः 'सहग्रहणा-त्समुदाय एव सञ्ज्ञे'त्यादि शेखरः, 'इदम इश्–अणुत्वात्सवर्णग्रहणं प्राप्नोती'ति भाष्यम्, 'अणसवर्णा-न्गृह्णातीति', घटित इत्यध्याहारः, तेनाणघटितं स्वादिसवर्णान्गृह्णातीत्यर्थफलकः स्वग्रन्थश्च सङ्गच्छते।

❀ चिदस्थिमाला ❀

यद्यप्यत्र नेत्सञ्ज्ञाशास्त्रप्रवृत्तिस्तथापि लक्षणयाऽऽह—**नकारेत्सञ्ज्ञक इति**। मुख्यार्थबाधादेरिति भावः।

अत्र मानमाह—**स्पष्टमिति**। तत्र हि—'प्रायोगिकरूपाभावे औपदेशिकं रूपं गृह्यते—'इत्युक्तम्। **अत एवेति**। ईदृशबोधाङ्गीकारादेवेत्यर्थः। 'अन्यथे'त्यस्या'ऽसङ्गता'न्वयः। **नाच्पर इति**। 'आण्नद्या' इत्यत्रेति भावः। 'आडजादीना'मित्यत्र तत्परत्वसत्त्वादाह—**नेष्यते चेति**। **वाचाल इति**। सति तत्त्वे-

❀ ज्योत्स्ना ❀

ऽन्यत्रानुपलम्भेनावयत्वानुमानमात्रमिह सारम्। लाघवपक्षपाती त्वनेकान्तत्वपक्ष इति **परिभाषाप्रदी-पार्चिषि** विस्तरेण निरूपितम्।

❀ सदाशिवभट्टीयम् ❀

तस्य लोप इति। नकारेत्सञ्ज्ञक इति। नकारेत्सञ्ज्ञकबोध्यस्तदभिन्न इत्यर्थः। एवमग्रेपि।

❀ विषमपदविवृतिः ❀

ध्यर्थात्। एवमनुवादेपीत्यग्रिमग्रन्थोऽप्ययुक्तः। बोधके एव नकारेत्सञ्ज्ञकत्वस्य पूर्वमुक्तेः। **तत्र नाच्पर इति**। आट आकार इति शेषः।

हल्किम् ? चिरिणोतीत्यादौ धातोरन्त्यस्य मा भूत् ।

आद्योच्चारणमिति । आद्यमुच्चारणमित्यर्थः, भावे घञिति भावः । तच्च प्रत्यासत्त्यैतच्छास्त्रप्रवर्त्तकाचार्याणामेव । आद्यत्वञ्च—अज्ञातस्वस्वरूपज्ञापकत्वम् । उपस्याद्यर्थत्वादिशेरुच्चारणक्रियत्वात् । अत एव 'एकाच उपदेशे' इति सूत्रे कैयटेनोक्तम्—'इत्सञ्ज्ञाविधावुच्चारणवचन उपदिशिर्गृह्यते'—इति । 'आदेच' इति सूत्रेऽपि—'येषां स्वरूपज्ञापनायापूर्वमुच्चारणं तेषामेवोपदेशव्यवहारः'—इति । तत्र सूत्रे भाष्येऽपि—'उद्देशश्च

❀ **अभिनव-चन्द्रिका** ❀

अस्मिन्कल्पे चकान्तत्वं न निष्प्रयोजनं,सन्यत इत्यादौ लक्षणाद्यभावेन प्रयोजनसत्त्वात्—इत्याहुः। **वाचाल इति ।** न च चालित्येव सिद्धे 'आलच'इति गुरुनिर्देशात्—लकारस्य नेत्सञ्ज्ञेति वाच्यम्। 'तनोतेर्ड उः सन्वच्चे'त्यत्रेवात्रापि सन्ध्यभावकल्पनापत्तेः, ज्ञापकेन सूत्राक्षरखण्डनस्यायुक्तत्त्वाच्च । **अज्ञातस्वस्वरूपज्ञापकत्वमिति ।** स्ववृत्तिश्रावणप्रत्यक्षविषयतावच्छेदकधर्मावच्छिन्नविषयताप्रयोजकत्वप्रकारकतात्पर्यविशेष्यतापर्याप्त्यधिकरणत्वमित्यर्थः ।

❀ **चिदस्थिमाला** ❀

'लिती'ति स्वरः स्यादन्तरङ्गत्वात्, चित्त्वन्तु व्यर्थमेव स्यादिति भावः । एतेन—'सद्मेत्यादौ 'सर्वधातुभ्यो मनि'निति मनिनो मस्य तत्त्वेऽन्त्यादचः परो मित्स्या'दिति **दण्डयुक्तमपास्तम्** । उणादिनामव्युत्पन्नत्वात्, अत एव तत्पर्यन्तधावनम्, एवमग्रेऽपीति बोध्यम् । **चिरिणोतीति ।** अत्रापि तत्त्वे 'इदित' इतिनुमापत्तिः । एतेन 'भू'इत्यस्य तत्त्वे 'भविते'त्यादावूदित्त्वादिड्विकल्पापत्तिरिति **दण्डयुक्तमपास्तं**, प्रागुक्तरीत्या तत्राऽदोषात्, तत्रैवं सति 'सू' इत्युक्तेरफलत्वापत्तेः, 'भूसुवो'रित्यादेरानर्थक्यापत्तेश्चेति दिक् । द्वितीयोच्चारणादावतिप्रसङ्गापत्त्या षष्ठीसमासाऽसङ्गतिं ध्वनयन्नाह—**आद्यमिति ।** वक्ष्यमाणरीत्या नेदं युक्तमिति ध्वनयन्नाह—**भावे इति ।** नन्वत्रापि कर्त्रन्तरमादायातिप्रसङ्ग एवात आह—**तच्चेति ।**

नन्वाद्यत्वस्यापि द्वितीयोच्चारणनिरूपितत्वेनोक्तदोषस्तदवस्थ एवात आह—**आद्यत्वञ्चेति ।** ततस्तल्लाभोपायमाह—**उपेति ।** इमं पक्षं समूलयति—**अत एवेति ।** अन्यथा तस्य शास्त्रवाचितया तथोक्त्यसङ्गतिः स्पष्टैव । नन्वेतावताऽऽद्योच्चारणार्थत्वं न लब्धमत आह—**आदेच इति ।** 'कैयटेनोक्त'मित्यस्याऽनुषङ्गः । अत्र भाष्यसम्मतिमप्याह—**तत्रेति ।** 'आदेच'इत्यत्रेत्यर्थः । 'उक्त'मित्यस्यानुषङ्गः । यदि तच्छास्त्रपर-

❀ **ज्योत्स्ना** ❀

ननु 'तौ सत्', 'निष्ठे'त्यादिभिरनुबन्धविनिर्मुक्तस्य सञ्ज्ञाविधानाददोषः, 'स्यादेष दोषो यदी-

❀ **वरवर्णिनी** ❀

चिरिणोतीति । न च हल्ग्रहणाभावे–'उपदेशेऽ'जित्यस्य वैयर्थ्येन 'अचेदिद्भवति तर्ह्यनुनासिक एवे'ति नियमाश्रयणादत्र न दोष इति वाच्यम्, विपरीतनियमापत्तेः, ज्ञापकादिना तद्वारणे तु गौरवमेव दोषः ।

अज्ञातस्वस्वरूपेति । 'स्ववृत्तिश्रावणप्रत्यक्षविषयतावच्छेदकधर्मावच्छिन्नविषयताकबोधप्रयोजकतात्पर्यप्रयोज्योच्चारणजनककृतिविषय उपदेशपदार्थ'इति फलितोऽर्थः । तादृशोच्चारणमात्रस्योपदेशपदार्थत्वे तु–उच्चारणे वृत्तिनियामकसम्बन्धेनान्त्यहलोऽविद्यमानत्वादुपदेशे विद्यमानमित्यर्थासङ्गतिः स्यात्, अतः कृतिविषयत्वपर्यन्तानुधावनमिति. जटाजूटे **श्रीबालशास्त्रि**चरणाः ।

प्रातिपदिकानां नोपदेश—' इति। प्रकृतसूत्रे भाष्येऽपि—'प्रत्यक्षमाख्यानमुपदेश'—इत्युक्तम्। तस्य चोक्त एवार्थः।

परे तु—'उपदेश इति किमर्थम्? 'अभ्र आँ अपः' कः पुनरुद्देशोपदेशयोर्विशेषः?—इति भाष्ये उक्तम्। यदि प्रत्यक्षमाख्यानमुपदेशो गुणैः प्रापणमुद्देशस्तर्हि 'लृटः सद्वा' 'निष्ठे'तिविहितानां शतृशानच्क्तक्तवतूनाम-

❀ अभिनव-चन्द्रिका ❀

प्रत्यक्षमाख्यानमिति। तत्त्वञ्च—प्रत्यक्षविशिष्टविषयताश्रयत्वम्। वै० 'स्वनिरूपितविषयतावच्छेदकधर्मावच्छिन्नत्व' 'स्वजन्यशाब्दबोधीयत्वै'तदुभयसम्बन्धेन। शास्त्रमात्रविषयन्तत्त्वन्तु—पाणिन्युच्चरितपदविशिष्टविधेयताश्रयत्वम्। वै० 'स्वजन्यशाब्दबोधीयत्व', 'स्ववृत्तिश्रावणप्रत्यक्षविषयतावच्छेदकधर्मावच्छिन्नत्वै'तदुभयसम्बन्धेन'। यथा गां सक्थिनि कर्णे वा गृहीत्वोपदिशति—'अयं गौः' इति—तत्र शाब्दबोधस्य शक्तिग्रहात्मकप्रत्यक्षजन्यत्वेन, प्रत्यक्षीयविषयतावच्छेदक–गोत्वादि–धर्मावच्छिन्नविषयताकत्वेन च लक्षणसमन्वय इति दिक्। **लृटः सद्वेति**। चिन्त्यमेतत्,—

❀ चिदस्थिमाला ❀

न्तदा तत्र प्रातिपदिकग्रहणात्तदसङ्गतिः स्पष्टैव। ननु तत्र तथोक्तावपि प्रकृते किमत आह—**प्रकृतेति**। तृतीयपादप्रारम्भोक्तो**पदेशे**ऽजितीत्यर्थः। **यद्वा**—व्याख्येयत्वेन प्रक्रान्तोपदेशपदलाभावधिभूतोपदेशेऽजितीत्यर्थः। ननु तत्रान्यथोक्तेः कथमत्र सम्मतित्वमत आह–**तस्येति**। मूलाद्यसङ्गतिं ध्वनयन्सिद्धान्तमाह—**परे त्विति। अप इति**। 'उद्देशे योऽनुनासिकस्तस्य माभू'दिति शेषः। **उक्तमिति**। 'उपदेशेऽ'जिति सूत्रे इति भावः। प्रथमप्रश्नाशयस्य कैयटेनोक्तत्वेन प्रकृतानुपयुक्तत्वेन च द्वितीयप्रश्नाशयं तदनुक्तमाह—**यदी**त्यादिना—**प्रश्न** इत्यन्तेन। **प्रत्यक्षमिति**। आख्याने प्रत्यक्षत्वस्याविशिष्टत्वादिन्द्रियगोचरार्थस्य यदाख्यानं स उपदेश इत्यर्थः। **गुणैरिति**। प्रत्येकं साधारणप्रसिद्धधर्मोपादानेन यत्प्रतिपादनं स उद्देश इत्यर्थः। बहुत्व-

❀ सदाशिवभट्टीयम् ❀

प्रकृतसूत्रेति। व्याख्येयत्वेन प्रक्रान्तोपदेशपदलाभावधिभूतो**पदेशेऽजि**तीत्यर्थ इत्याहुः। **अन्ये** त्वनुवर्त्तमाने शतृशानचाविति पुन**स्तौ**ग्रहणेन लट्स्थानिकत्वादिरूपधर्मसम्बन्धत्यागवत्सौत्रेत्सञ्ज्ञकत्वरूपधर्मसम्बन्धस्यापि

❀ वरवर्णिनी ❀

प्रत्यक्षमाख्यानमिति। तत्त्वञ्च—प्रत्यक्षविशिष्टबोधजनकत्वं, वै० 'स्वीयविषयतावच्छेदकरूपावच्छिन्नत्व' 'स्वप्रयोज्यत्वै'तदुभयसम्बन्धेन। 'इयङ्गौ'रित्यत्र गोपदजन्यबोधे—प्रत्यक्षविषयतावच्छेदकगोत्वा-ऽवच्छिन्नत्वम्, 'इयङ्गौ'रितिवचनोत्तरं—तद्व्यक्तित्वावच्छिन्नस्य प्रत्यक्षोत्तरमेव बोधस्यानुभवसिद्धत्वेन प्रत्यक्षप्रयोज्यत्वमपि बोध इति समन्वयो बोध्यः। एवं सन्छब्देऽपि—सन्पदजन्यबोधे—प्रत्यक्षविषयतावच्छेदकसन्त्वावच्छिन्नत्वं, सन्छब्दविषयश्रावणप्रत्यक्षप्रयोज्यत्वमपि तज्जन्यबोध इति लक्षणसमन्वयः।

'अभ्र आँ आपः' इत्यत्र तु–'आङोऽनुनासिक' इत्येतच्छास्त्रघटकानुनासिकपदविषयकप्रत्यक्षीयविषयतावच्छेकानुनासिकत्वावच्छिन्नत्वस्यानुनासिकपदजन्यबोधेऽभावेन न लक्षणसमन्वयः। [अनुनासिकपदेन हि—अनुनासिकपदार्थविषयक एव बोधो न त्वनुनासिकत्वरूपानुपूर्व्यवच्छिन्न इति भावः]। 'सास्नालाङ्गूलवती गौ'रित्यत्र तद्वाक्यश्रवणोत्तरं गोत्वावच्छिन्नविषयकप्रत्यक्षाभावेन स्वीयविषयतावच्छेदकरूपावच्छिन्नत्वाभावेन, प्रत्यक्षप्रयोज्यत्वाभावेन च नोपदेशत्वलक्षणसमन्वयः। एवं 'लृटः सद्वा' 'निष्ठे'त्यादिसूत्रविहित-शतृशानच्क्तक्तवत्वादीनाम् 'अभ्र आँ अपः' इतिवदुपदेशत्वाभावेन तद्घटकशकारादीनामित्सञ्ज्ञानापत्तिः, एवं निपातनानुमितक्यबादीनां कादेरित्त्वानापत्तिरिति नागेशाशय इति **श्रीबालिशखिचरणाः**।

निष्ठेति। 'यत्र निष्ठापदं तत्र क्तक्तवतू उपतिष्ठेते' इत्येवं 'क्तक्तवतू निष्ठे'त्यस्यार्थं स्वीकृत्य परिभाषा-

वयवस्येत्सञ्ज्ञानापत्तिः । तथा 'राजसूयसूर्य''चित्याग्निचित्ये'त्यादिनिपातनानुमित-क्यबादिनां पादेरित्त्वानापत्तिः । 'वदः सुपी'त्यत्रोच्चारितस्तु नैतत्सम्बन्धी । अत एव

❀ अभिनव-चन्द्रिका ❀

—'तौ स'दित्यनेन शकारऋकारेत्सञ्ज्ञकस्यातः, शकारचकारेत्सञ्ज्ञकस्यानस्य च 'ता'वित्यनेन परामर्शात्तयोरेव सञ्ज्ञायां दोषाभावात् । **क्यबादीनामिति** । इदमपि चिन्त्यमेव,—पकारेत्सञ्ज्ञक—ककारेत्सञ्ज्ञक'य'प्रत्ययस्यैव निपातनानुमानेनाऽदोषात् । वस्तुतस्तु—'कालेभ्यो भववत्'—'चरणेभ्यो धर्मवत्' इत्याद्यतिदेशशास्त्रविहितप्रत्ययानामित्सञ्ज्ञानापत्तिः । 'स्ववृत्तिश्रावण-प्रत्यक्षविषयतावच्छेदकधर्मावच्छिन्नत्व' 'स्वजन्यशाब्दबोधीयत्वो'भयसम्बन्धेन पाणिन्युच्चरितपद-

❀ चिदस्थिमाला ❀

मविवक्षितम् । **अवयवेति** । तत्त्वावच्छिन्नस्येत्यर्थः । दोषान्तरमाह—**तथेति** । **चेत्यादी**त्यादिना—'सिध्य-पुष्या'वित्यादिपरिग्रहः । न च 'वदः सुपी'त्यत्रोच्चारितस्यैव तत्रानुमानेन तस्योपदेशादिष्टसिद्धिरिति नान्त्य-दोषोऽत आह—**वद इति** । प्रकृतिविशेषसम्बद्धत्वादिति भावः । इदमाद्येऽपि बोध्यम् । इदं द्रढयति—**अत**

❀ ज्योत्स्ना ❀

त्सञ्ज्ञा आदेशं प्रतीक्षेते'ति'तस्मिन्नि'तिसूत्रस्थवक्ष्यमाणभाष्योक्तन्यायतौल्यादित्यत आह—**तथा**

❀ सदाशिवभट्टीयम् ❀

त्यागात्सानुबन्धयोरेव परामर्शः; तदुक्तं वार्तिककृता 'तौ'वचनमसंसर्गार्थ'मिति, भाष्यकृतापि तथैव व्याख्यातम्, अत एव कैयटेनापि 'शतृशानचो रूपमात्रं परामृश्यत इति लट्स्थानिकत्वादिधर्मासम्बद्धयोरपि सञ्ज्ञा भवती-त्यर्थ' इति वदताऽऽदिशब्द उपात्तः, सच्छब्देन तयोर्विधानानन्तरमनुबन्धानामित्सञ्ज्ञा भवत्येवेत्यलम् । एवं 'क्तक्तवतू निष्ठे'त्यादावपि न दोषः, 'अनुबन्धविनिर्मुक्तस्यैवोपस्थिति'रिति नियमस्य विधेयत्वेनोपस्थितप्रत्यया-द्यनुबन्धविषये एव स्वीकारेण श्रुत**निष्ठा**सञ्ज्ञासम्बन्धस्याऽश्रुतेत्**सञ्ज्ञा**सम्बन्धादन्तरङ्गत्वात्प्राबल्येन चानुबन्ध-विशिष्टस्यैव सञ्ज्ञाविधानात्, अत एव 'सुब्विभक्त्यादिसञ्ज्ञा सूत्रान्तर्गतानामेवे'ति प्रागुक्तं, सञ्ज्ञाविषये सर्व-त्रैवमेवेति न दोषलेशशङ्कापि । स्यादेष दोष इति न्यायोपि विषमः, अनुत्पन्नस्य सन आदेशविधानानुपपत्त्या वाक्यभेदे सति प्रथमवाक्येनोत्पन्नस्य सनः प्राप्तेत्सञ्ज्ञा द्वितीयवाक्यविहितादेशं न प्रतीक्षते इति पूर्वपक्षि-णोक्तं, वाक्यभेदे गमकाभावं मनसि निधायोपदेशपदानुवृत्तिमभिप्रेत्य च सिद्धान्तिना नानुत्पन्ने सनि प्रकृप्त्या भवितव्यं, यदा चोत्पन्नः सन् तदा कृतसामर्थ्या पञ्चमीति प्रक्लृप्तिर्न भविष्यतीत्युक्तं, तथाच तत्र वाक्य-भेदसत्त्वाद्विधेयत्वेनोपस्थितप्रत्ययविषयेत्सञ्ज्ञयादेशप्रतीक्षणाभावेपि श्रौतनिष्ठासञ्ज्ञासंबन्धमन्तरङ्गमित्सञ्ज्ञा प्रती-

❀ वरवर्णिनी ❀

त्वाङ्गीकारे निष्ठेत्यादौ क्तक्तवत्वोरुपस्थितावित्सञ्ज्ञायाः सौलभ्यं, 'निष्ठा शी'ङिति कित्त्वनिषेधाज्ज्ञापकाच्च क्तादावुपदेशत्वकल्पनात्ककारस्येत्त्वं सुलभम्, ककारस्येत्त्वाभावे कित्त्वनिषेधवैयर्थ्यं स्पष्टमेवेत्यतोऽरुचेराह—**तथा राजेति** ।

निपातनानुमितेति । पाणिन्युच्चरितत्वरूपहेतुनाऽनुमितेन साधुत्वहेतुना तत्तत्साधुत्वविशिष्टं क्यबादि-रूपं कार्यमनुमीयत इत्यर्थः । तदेवं—'राजसूयशब्दः किञ्चिद्वचनबोधितसाधुताकः, पाणिन्युच्चरितत्वात्' 'राजसूयशब्दः—'राजोपपदसुधातोः क्य'बितिवचनबोधितसाधुतावान्, वचनान्तराबोधितसाधुताकत्वे सति किञ्चिद्वचनबोधितसाधुकत्वा'दिति प्रयोगो बोध्य इति **श्रीबालशास्त्रि**चरणानामाशयः ।

नैतत्सम्बन्धी=नैतद्विहितबोधकः । 'राजोपपदसुधातूत्तरक्यब्बोधकत्वाभावा'दिति शेषः । अत एव= एकसम्बन्धिनोऽन्यसम्बन्धित्वविरहादेव, अन्यशब्दसम्बन्धेन तदर्थस्यापि भेदादेवेति यावत् ।

'तस्यापत्यमत इञ्' इति न्यासेऽन्यशब्दसम्बद्धापत्यार्थस्यानुक्तरूपशेषत्वमुक्तमाकरे । तस्मादत्र सूत्रे उपदेशशब्देनोद्देशस्यापि ग्रहणं वक्तव्यम्, एवम् 'अभ्र आँ अप' इत्यादावपि प्राप्नोतीति तेषां सङ्ग्रहोऽस्य व्यावृत्तिर्येन भवति स विशेषः कः ? इति प्रश्नः ।

तत्सङ्ग्रहार्थमेव लोकव्यवहारेणापि तयोः सङ्कीर्णत्वमुपपाद्यैतद्व्यावृत्तये तत्सङ्ग्रहाय च–'उपदेशनेऽजनुनासिक इति वक्तव्यं, किं पुनरुपदेशनं ? शास्त्रम्'—इत्युक्तं वार्त्तिककृता । तत शास्त्रपदेन प्रयोगशासनकरणभूता धातुप्रातिपदिकप्रत्ययनिपातागमादेशा हलन्त्यसूत्रे व्यवसितपदार्थत्वेन भाष्ये उक्ता गृह्यन्ते । एवञ्च तत्सङ्ग्रहो'ऽभ्र आँ' इत्ये-

❀ अभिनव-चन्द्रिका ❀

विशिष्टविधेयताश्रयत्वरूपप्रत्यक्षाख्यानत्वाभावात् । **गृह्यन्ते इति ।** न च प्रातिपदिकग्रहणेनैव

❀ चिदस्थिमाला ❀

एवेति । अनुवृत्त्यादिकं विनाऽन्यस्याऽन्याऽसम्बन्धित्वादेवेत्यर्थः । से**ऽन्यशब्देति ।** अदन्तान्यप्रकृतीत्यर्थः । इदञ्च मूलेऽपि तत्र स्पष्टम् । **अत्रेति ।** प्रक्रान्तोपदेशपदलाभावधिभूतोपदेशेऽजित्यत्रेत्यर्थः । **इतिहेतौ,** 'मेवे'त्यस्यो'पपादने'ऽन्वयः । **लोकेति ।** 'इषेत्वका'व्याख्याने—'उद्दिष्टो मेऽनुवाक' इति तत्र व्यवहारः, मार्गप्रश्ने—'अमुष्मिन्नवकाशे हस्तदक्षिणो ग्राह्य'इत्यादि गुणैः प्रापणे—'उपदिष्टो मे पन्था' इति च । **अपि**नोक्तयुक्तिसमुच्चयः । नन्वेवमेतद्व्यावृत्तावपि न तत्सङ्ग्रहः, सूत्ररूपशास्त्रे तेषामनुच्चारणादत आह—**तत्रेति ।** वार्त्तिकोक्तावित्यर्थः । तस्य करणसाधनत्वेन योगरूढत्वात्क्रमेण तावाह—**प्रयोगेति ।** तत्रैव

❀ ज्योत्स्ना ❀

राजसूयेति । अत्रापि निपातनादेवेत्सञ्ज्ञा भविष्यतीत्यस्वरसादाह—**सङ्कीर्णत्वमुपपाद्येति ।** तच्च साक्षाद्व्याख्यातेऽपि मन्त्रे 'उद्दिष्टो मे मन्त्र'इति व्यवहारात्, 'कुण्डली देवदत्त'इति गुणैः प्रापितेऽप्यु'पदिष्टो मे देवदत्त'इति च कादाचित्कव्यवहारात् । तथा च–'अभ्र आँ अप'इत्यादौ गुणैः प्रापितेऽनुनासिके इत्सञ्ज्ञातिव्याप्तिर्दुःपरिहरेति भावः । ननूच्चारणक्रियायाम्—'आँ'इत्यनुनासिकाकारस्य निपातत्वरूपोपाधिपरिच्छिन्नस्य विषयत्वेन करणत्वात्—अभ्र आँ—इत्यत्रातिव्याप्तितादवस्थ्यमत आह—**प्रयोगशासनकरणभूता इति ।** प्रयोगस्य=प्रयुज्यमानस्य परिनिष्ठितस्य, शासने=साध्वनुशासने-करणभूताः, न तु परिनिष्ठिता इत्यर्थः । एवञ्च 'आँ'इत्यस्य परिनिष्ठितत्वमेव, न परिनिष्ठित-

❀ सदाशिवभट्टीयम् ❀

क्षते, तद्भाष्यस्यैकदेश्युक्तित्वाच्च । ननु कार्यकाल एकवाक्यतया विधानाद्विधेयत्वेनोपदेशत्वमेव क्तक्तवत्वोरिति वाच्यं, यथोद्देशे तदभावादिति । पक्षद्वयेपि वाक्यैकवाक्यतया विधेयत्वाभावाच्च । निपातनादित्वकल्प-

❀ वरवर्णिनी ❀

परे तु–''चिन्त्यमेतत्,—'वदः सुपी'त्यत्रोच्चरितस्य क्यप एतद्विधेयतावच्छेदकावच्छिन्नत्वेनैतत्सम्बन्धित्वात्, अन्यशब्दसम्बन्ध्यपत्यार्थस्यानुक्तत्वप्रतिपादकाकरविरोधस्तु न, तत्र शेषपदस्यानुपयुक्तपरतयाऽन्यशब्दसम्बन्ध्यपत्यार्थस्योपयुक्तत्वाभावेन तस्याकरस्य योजनीयत्वात्–''इत्याहुः । **केचित्तु**—'स्वरूपबोधकत्वाभावेनोपदेशत्वविरहान्ङ्मुडादौ टादेरित्त्वानापत्तिर्दोष' इत्याहुः ।

विशेषः क इति । कृतेप्युपदेशग्रहणे 'अभ्र आँ अप' इत्यादौ दोषसद्भावे—उपदेशग्रहणं किमर्थमित्यर्थः । **सङ्कीर्णत्वमिति ।** 'वस्तुतो लोके नानयोः सङ्कीर्णता, किन्तु यत्राचार्यः सम्यङ्न बोधयति तत्रोद्देशसादृश्यादेव—'उद्दिष्टो मेऽनुवाक'इति गौणः प्रयोगः, मार्गोपदेशे च निर्देशसौष्ठवादेवोपदेशसादृ-

१ 'निपातनैः किं किं न क्रियते' इति भाष्योक्तेः ।

तद्व्यावृत्तिश्च सिद्धा । तस्य च वार्तिकस्य बाहुलकात्करणे घञा प्रत्याख्यानं भगवता कृतम् । किञ्च हलन्त्यसूत्रे भावघञन्तोपदेशपदानुवृत्तौ—'भवतष्ठक्छसा'वित्यादिविहिते-ष्वित्सञ्ज्ञानापत्तिः, परस्य सत्त्वेन कादेरन्त्यत्वाभावात् । यदि तूपदेशे प्रत्ययत्वादि-

---

❀ अभिनव-चन्द्रिका ❀

सिद्धे इतरग्रहणं व्यर्थमिति वाच्यम्, तत्र परिगणनसार्थक्यार्थं 'प्रातिपदिकपदं तद्बोधकपर'-मित्यर्थस्यावश्यकत्वेनेतरसार्थक्यात् । **अन्त्यत्वाभावादिति** । चिन्त्यमिदं—'ठक्छसा'वित्येत-दन्त्यत्वाभावेपि ठक्–निरूपितान्त्यत्वस्य ककारे सत्त्वेन दोषाभावात् । वस्तुतस्तु–चित्रङि ङकारे

❀ चिदस्थिमाला ❀

रूढौ मानमाह—**हलन्त्येति**,—मकारं विहाय सूत्रानुकरणम्, एवमग्रेऽपि । **व्यावृत्तिरिति** । 'उच्चरित' इत्यध्याहारे धात्वादावुच्चारितानुनासिकस्येत्सञ्ज्ञेत्यर्थात् । अन्यथा शास्त्रविहिताऽनुनासिकत्वस्य तत्रापि सत्त्वादतिप्रसङ्गतादवस्थ्यमेवेति भावः । नन्वेतावता किं मूले दूषणमत आह—**तस्येति** । एवञ्च भाष्य-विरोधाद्भावे घञा तथार्थोक्तिरयुक्तेति भावः । नन्वगतिकगतिबाहुलकाश्रयणमेव तत्र दोष इति तदेकदेश्यु-क्तिरेवात आह—**किञ्चेति** । मूलोक्तरीत्यैवाह—**पदानुवृत्ताविति** । 'पूर्वस्मिन्सति यस्मात्परो नास्ति सोऽन्त्य' इति प्रागुक्तत्वादाह—**परस्येति** । छादेरित्यर्थः ॥

❀ सदाशिवभट्टीयम् ❀

ननु तादृशवचनकल्पनाद्वरु, अगतिकगति च । य एव तु न, पित्त्वालाभादित्याहुः । **भगवता कृतमिति** । एवञ्च भावे घञा तथार्थोक्तिरयुक्तेति भावः । ननु बाहुलकाश्रयणमेव दोष इति तदेकदेश्युक्तिरेवात आह–**किञ्चेति । य** एव तु न पित्त्वालाभादिति पाठो विचारणीयः । **भावेति** । करणसाधनानुवृत्तौ तु विहितस्यापि शासनकरणत्वेन तत्स्यादपीति भावः । **विहितेति** । उपस्थापकस्योपदेशे विद्यमानत्वेपि प्रक्रि-यावाक्यसमवायिनस्तत्त्वाभावादिति भावः । ननूपस्थापक एव सञ्ज्ञालोपयोः प्रवृत्त्या निरनुबन्धकस्यैव प्रयोग-समवायित्वमिति न दोषोऽत आह—**परस्येति । एतेन**—विहिते परस्यासत्त्वेन कादेरन्त्यत्वाद्धेतुसाध्ये

❀ विषमपदविवृतिः ❀

अभ्र आँ अप इत्येतद्व्यावृत्तिरिति । नन्वस्याप्यादेशत्वात्कथमेतद्व्यावृत्तिरिति––चेन्न, स्वयमेव परिनिष्ठितप्रयोगरूपत्वेन प्रयोगशासनकरणत्वरूपोपदेशनशब्दार्थाभावादित्याशयात् । **कैयटे** तु–– 'शास्त्रे उच्चारितोऽनुनासिकः स इत्सञ्ज्ञक'इत्युक्तम् ।

❀ वरवर्णिनी ❀

श्यादु'पदिष्टो मे पन्था' इति गौणः प्रयोग' इत्याहुरस्मद्गुरवस्त्रिपाठिचरणाः । **सिद्धेति** । 'आँ' इत्यस्या-देशत्वेपि तस्य प्रयोगशासनकरणत्वं नास्ति,यत 'आँ' इत्ययमादेशः स्वयमेव जायते—साधुतां याति' न तु कञ्चित्प्रयोगं शास्तीति तस्य नेत्सञ्ज्ञेति भावः । **इत्सञ्ज्ञानापत्तिरिति** । 'हलन्त्य'मित्यस्य—'उपदेशे विद्य-मानो य उपदेशघटकवर्णाव्यवहितपूर्वत्वाभावविशिष्टो हल्' इत्येवमर्थं मत्वायं ग्रन्थः, यदि तु—उपदिश्य-मानसमुदायविशिष्टत्वमन्त्यत्वं, वै० 'स्वघटकत्व' 'स्वघटकवर्णप्रागभावाधिकरणक्षणावृत्तित्वै'तदुभयस-म्बन्धेनेत्युच्यते, ठकारनिरूपितबोधकतायाष्ठक्शब्दे, छकारनिरूपितबोधकतायाश्च छशब्दे सत्त्वात् प्रत्यक्ष-विशिष्टबोधजनकत्वरूपोपदेशत्वस्य ठक्यपि छस्यपिच सत्त्वेन तदन्त्यककारादेरित्सञ्ज्ञायां न किञ्चित्प्र-तिबन्धकमित्युच्यते तदा नायं दोष इति—**श्रीबालशास्त्रि**चरणानामाकूतमस्मत्**पितामह**चरणाः **श्रीस्नेहिरामशास्त्रिण** आविश्चक्रुः ।

विशिष्टान्त्य इदित्यर्थ' इत्युच्यते तदोपदेश इति व्यर्थम्, अन्त्यपदसामर्थ्येनैव तल्लाभात्। अत एवात्र सूत्रे उपदेशग्रहणस्यानुबन्धा अनेकान्ता इत्यस्थितपक्षेऽभ्र आँ अटित इति प्रयोजनमुक्तं, न तूत्तरार्थमित्युक्तम्।

न च करणसाधनोपदेशशब्दानुवृत्त्या सिद्धे हलन्त्यसूत्रे–'व्यवसितान्त्यमिति वक्तव्यं, के पुनर्व्यवसिताः?–धातुप्रातिपदिकप्रत्ययनिपातागमादेशाः'इतिवार्त्तिकाद्यनुत्थानमिति वाच्यं, समुदायद्वाराऽवयवस्याप्युपदेशकरणत्वात्तदन्त्यस्यापि लोपापत्तिरित्याशयात्। भाष्यकृता चान्त्यग्रहणसामर्थ्येन प्रत्याख्यातम्। तत्रानुबन्धविशिष्टानां धातुत्वादि

❀ अभिनव-चन्द्रिका ❀

प्राचीनोक्ताऽज्ञातस्वस्वरूपज्ञापकत्वरूपोपदेशत्वाभावेनेत्सञ्ज्ञानापत्तिर्बोध्या। **उपदेशे** प्रत्ययत्वादि-

❀ चिदस्थिमाला ❀

विशिष्टान्त्य इदिति—षष्ठीतत्पुरुषः। **व्यर्थमिति**। 'हलन्त्य'मित्यत्रेति शेषः, एवञ्चाफलत्वान्नानुवृत्तिरिति भावः। अत एवाह—**अन्त्येति**। प्रागुक्तमिदम्। इदं द्रढयति–**अत एवात्रेति**। प्रागुक्तरीत्योपदेशेऽजितिसूत्र इत्यर्थः। **अस्थितेति**। तस्य दुष्टत्वस्य प्रागुक्तत्वादिति भावः। स्वमते मूलरीत्या प्रसक्तभाष्यविरोधं परिहरति—**न चेत्यादिना**। **सिद्धे इति**। तदन्त्यान्यव्यावर्त्तने सिद्ध इत्यर्थः। **आदिना** तद्व्याख्यानपरभाष्यपरिग्रहः। **लोपेति**। 'अन्यथे'त्यादिः। उक्तहेतोरेवाह—**इत्याशयादिति**। तदनुवृत्तिं वदतो मते वार्त्तिकाद्याशयादित्यर्थः।

अत एव सिद्धान्तमाह—**भाष्येति**। चस्त्वर्थे—पूर्ववैलक्षण्ये। **सामर्थ्येनेति**। 'उक्तार्थलाभात्त'दिति शेषः। अत्र मते तु तस्यास्वरितत्वादेव शङ्केति बोध्यम्। ननूपदेशे एवेत्सञ्ज्ञा, ततो धात्वादिसञ्ज्ञेत्यर्थस्य 'न धातुलोप' इति सूत्रे भाष्ये उक्तत्वेन कथमिष्टसिद्धिरेवं सतीत्यत आह—**तत्रेति**। व्यवसित-

❀ ज्योत्स्ना ❀

करणत्वमतो नोक्तदोष इति भावः। **सामर्थ्येनैवेति**। आदिव्यावृत्त्यर्थमन्त्यस्येत्येतद्भविष्यतीति करणघञन्तोपदेशपदानुवृत्तिं विना न तत्र गत्यन्तरमस्तीति चिन्त्यमेतत्। 'न धातुलोप' सूत्रस्थभाष्यविरोधं दीक्षितोक्तं परिहरति—**तत्रानुबन्धेति**।

❀ सदाशिवभट्टीयम् ❀

पित'इत्यपास्तम्। **सामर्थ्येनेति**। आदेरपि व्यपदेशिवत्त्वात्तत्त्वमेवेति न तद्व्यावृत्त्यै। इदमेवाभिप्रेत्य 'सर्वोऽपि हलं तं समुदायं प्रत्यन्त'इत्युक्तं भाष्ये। ननु श्वन्नित्यादिप्रातिपदिकव्यावृत्त्या नानुवृत्तिवैयर्थ्यमत आह—**अत एवेति**। **अनुत्थानेति**। एवं मन्यते—तस्य भावघञन्तत्वे आद्योच्चारणे विद्यमानमन्त्यमित्याद्यर्थे उच्चारणस्यान्त्यमिति प्रत्यासत्तेराश्रयितुमशक्यत्वात्, यत्किञ्चित्समुदायान्त्यस्यापि प्राप्नोतीत्यु-

❀ वरवर्णिनी ❀

अनुत्थानमिति। भावघञि तु आद्योच्चारणे विद्यमानमन्त्यं हलिदित्यर्थे कस्यान्त्यमितिनिरूपकांशजिज्ञासायां यत्किञ्चित्समुदायान्त्यमित्यस्यैव लाभेन तद्वार्त्तिकोत्थानं सम्भवति,करणे घञा शास्त्रपरत्वे तु प्रत्यासत्त्या शास्त्रान्त्यस्यैव लाभेन न तद्वार्त्तिकोत्थानमित्याशयः **शङ्कितुः**। समुदायद्वाराऽवयवस्यापि तत्करणतया करणसाधनोपदेशपदानुवृत्तावपि तदन्त्यस्येत्त्वापत्तिरिति दोषोऽस्त्येव, व्यवसितान्त्यग्रहणे तु व्यवसितत्वपर्याप्त्यधिकरणीभूतसमुदायान्त्यस्यैव तत्र ग्रहणान्न दोष इति वार्त्तिकोत्थानमित्युत्तराशयः–इति **भट्टाः**। पर्याप्तिलाभो वार्त्तिकफलमिति तत्त्वम्। व्यवसितान्त्यं=धातुत्वादिना परिच्छिन्नान्त्यम्।

तु धातुत्वादियोग्यघटितत्वाद्बोध्यम् । निपातानां द्योतकत्वेन, 'ब्राह्मणवसिष्ठ'न्यायेन च पृथग्ग्रहणम् । व्यवसितत्वञ्च—'धातुत्वादिना परिच्छिन्नत्वा'दिति कैयटः । एवञ्चो-दश्विदादिप्रातिपदिकान्त्यस्यापि लोपः प्राप्नोतीति 'प्रातिपदिकानां प्रतिषेधो वाच्योऽकृ-त्तद्धितान्तानाम्' इति वार्त्तिककृतोक्तम् । कुम्भकार इत्यादावपवादविषयपरिहारेणोत्सर्ग-

❀ अभिनव-चन्द्रिका ❀

विशिष्टान्त्यमिति । प्रत्ययादिबोधकान्त्यमिति यावत् । **बोध्यमिति** । वस्तुतस्तु-धात्वादिपदं धात्वादिबोधकमिति व्याख्यातत्वेन एवं व्याख्यानं निरर्थकम् । **ब्राह्मणवसिष्ठन्यायेनेति** । निपातस्यापि प्रातिपदिकबोधकत्वेन प्रातिपदिकग्रहणेनैव सिद्धे निपातग्रहणं प्रपञ्चार्थमिति भावः । **परिच्छिन्नत्वादिति** । विशिष्टत्वादित्यर्थः । **प्रातिपदिकानां प्रतिषेधो वाच्य इति** । न च चित्रङो ङकारस्य 'ऐकागारिक'डित्यत्र टकारस्य चेत्सञ्ज्ञा न स्यादिति वाच्यम् ,स्ववृत्तिः प्रातिपदिकवृत्तिश्च यानुपूर्वी ता-

❀ चिदस्थिमाला ❀

पदार्थशरीरे इत्यर्थः । नन्वेवमपि तत्र निपातपदोक्तिर्व्यर्था, प्रातिपदिकत्वादेव सिद्धेरत आह—**निपातेति** । अर्थवत्सूत्रे शक्तिलक्षणान्यतररूपवृत्तेरेव निवेश इति भावः ।

द्योतनाया अपि तत्र निवेशावश्यकत्वस्यान्यत्रोक्तत्वादाह—**ब्राह्मेति** । अनेन'गोबलीवर्द'न्यायो नास्तीति सूचितं, तच्च भावप्रकाशे स्पष्टम् । 'व्यवसित'पदस्य निश्चितपरत्वभ्रमं व्यावर्त्तयति—**व्यवेति** । शास्त्रकृता तेन तत्त्वेन(धातुत्वादिना) बोधितत्वादित्यर्थः । उक्तार्थे साधकान्तरं ध्वनयन्नाह—**एवं चोदेति** । तत्सामर्थ्येन तेषां ग्रहणे चेत्यर्थः । **आदिना** शक्रुदादिपरिग्रहः । ननु शकृति ऋतः प्रत्ययत्वात्'ति'दित्यत्र प्रत्ययग्रहणेऽपि दोष इति चेदत्र **कैयटः**—'एतावव्युत्पन्नौ । यद्यपि 'शकेर्ऋति'निति व्युत्पाद्यते, तथाप्युपदेशे तकारोन्त्यो न भवतीतीत्सञ्ज्ञा नेति । वस्तुतस्तु आद्यस्य (उदश्वितः) व्युत्पत्तावपि तस्य (तकारस्य) तुका निष्पन्नत्वात्प्रत्ययानवयवत्वादिदोषत्वात्तत्राऽव्युत्पन्नत्वोक्तेर्न फलं, द्वितीयस्त्वव्युत्पन्न एव, तेषां तत्त्वस्यैव सिद्धान्तितत्वात्, तदननुवृत्तेर्भाष्याभिमतत्वाच्चेति बोध्यम् । ननूक्तरीत्या पूर्वमित्सञ्ज्ञा, ततः प्रातिपदिकसञ्ज्ञेति कथमत्र निषेधप्रसक्तिरत आह—**अपवादेति** । वार्त्तिकोक्तनिषेध इत्यर्थः । —**णोत्सर्गेति** । 'हलन्त्य'—

❀ सदाशिवभट्टीयम् ❀

त्तिष्ठत एव तत् । शास्त्रपरत्वे तु प्रत्यासत्त्या शास्त्रान्त्यस्यैव स्यादित्यनुत्थितिरिति । **धातुत्वादिनेति** । शास्त्रकृता तेन तत्त्वेन बोधितत्वादित्यर्थः । पचादौ चान्तस्यैव तत्त्वेन चान्त्यस्य तात्पर्यस्य तत्रैव सत्वात् । तात्पर्यग्रहे बीजन्तु थमुप्रत्यय उकारः । ननु व्यवस्थितपक्षे प्रयोजनदातृभाष्यन्तवैव प्रातिकूलम्, अनुत्तरार्थत्वे हि तत्रैव क्षोदं कृत्वा न कर्तव्यमित्येव ब्रूयादिति, मम तूत्तरार्थमावश्यकतया लाघवाभावेन क्षोदो न कृत इति—साधकमेवातोऽननुवृत्तौ साधकान्तरमाह,—**एवञ्चेत्यादिना, अस्यानुत्थानमेव स्यादित्यन्तेन** ।

❀ वरवर्णिनी ❀

घटितत्वादिति । बोध्यबोधकयोरभेदाध्यवसाय इति भावः । धातुत्वादियोग्यबोधकत्वादिति तु युक्तम्, अत एव'लोपश्चे'ति प्रश्लिष्टशकारस्यादेशबोधकत्वेनेत्सञ्ज्ञासिद्धिः, ङमुडित्यत्र टकारस्यागमबोधकत्वाच्चेत्सञ्ज्ञासिद्धिः । व्यवसितत्वं=परिनिष्ठितम्, धातुत्वादिना-अनतिप्रसक्तेन,**परिच्छिन्नत्वात्**=विशिष्टत्वात् । नन्वभ्र ओ अटित इत्यत्रास्थितपक्षे प्रयोजनमुक्त्वा-'तर्हि कर्त्तव्यं ? न कर्त्तव्य'मित्यादिना भाष्ये तदग्रे शङ्काया अकरणादुत्तरार्थमुपदेशपदमिति ज्ञायते, एवञ्च तद्भाष्यं नास्माकं प्रतिकूलं, प्रत्युत तवैव प्रतिकूलं—'तर्त्ताहिं कर्त्तव्यं ? न कर्त्तव्यम्-एकान्ता अनुबन्धा इति''—इत्येवमनुक्तेरित्यतो मानान्तरमाह—**एवञ्चेति**—भट्टाः । भावसाधनोपदेशपदस्योत्तरसूत्रेऽनुवृत्तेरभावाद्व्यवसितान्त्यग्रहणे चेत्यर्थः । **'प्राप्नोती'**त्यस्य—'व्यवसितान्त्यत्वा'दित्यादिः ।

परिहारेणेति । 'उपसञ्जनिष्यमाण'न्यायादिति भावः । नन्वेवमपि व्यवसितपदार्थे भविष्यदपवाद-

प्रवृत्तेः पूर्वं प्रातिपदिकत्वे णादिलोपो न स्यादिति—'अक्र'दित्यादि । तच्च 'फलाभावा-न्नेत्सञ्ज्ञे'त्यादिना भाष्ये प्रत्याख्यातम् । अत्राद्योच्चारणार्थकोपदेशपदानुवृत्तौ त्वस्य वार्त्तिकस्यानुत्थानमेव स्यात् । 'उद्देशश्च प्रातिपदिकानां नोपदेश' इति 'आदेच' इति-सूत्रभाष्ये उक्तेः । एतद्भाष्यैकवाक्यतया पस्पशाह्निकान्तस्थे 'अग्रहणप्रातिपदिकानामुपदेशः

❀ अभिनव-चन्द्रिका ❀

दृशानुपूर्व्यवच्छिन्नविषयताप्रयोजकानां प्रातिपदिकानां प्रतिषेधो वक्तव्यः; 'अक्र'दित्यादि तात्पर्य-ग्राहकमित्यर्थेनादोषात् । तथाहि 'चित्र'ङित्यादि चित्रशब्दत्वावच्छिन्नबोधकं, चित्रशब्दत्वं च न स्ववृत्त्यानुपूर्वी, या च चित्रङ्शब्दत्वरूपा स्ववृत्त्यानुपूर्वी, सा च न प्रातिपदिकवृत्तिरिति न दोषः । न च 'उदश्वितोन्यतरस्या'मित्यदौ इत्सञ्ज्ञालोपाभावप्रयोज्यं स्ववृत्त्यानुपूर्व्यच्छिन्नविषयताप्रयोजक-त्वम् , एतन्निषेधप्रवृत्तिप्रयोज्यौ चेत्सञ्ज्ञालोपाभावौ—इत्यन्योन्याश्रय इति वाच्यम् । इत्सञ्ज्ञा-लोपाभावसम्भावनाप्रयोज्या या स्ववृत्तिप्रातिपदिकवृत्त्यानुपूर्व्यवच्छिन्नविषयताप्रयोजकत्व-

❀ चिदस्थिमाला ❀

मितीत्यर्थः । कत्व इति । 'प्रातिपदिकेतिनिषेधेन तदभावात्'(इत्वाभावात्)इति शेषः । तच्चेति । 'प्राती'–तिवार्त्तिकमित्यर्थः । तिति प्रत्ययग्रहणात्स्वरिताऽप्राप्तेराह—फलेति । आदिना लोपः । तस्योक्तार्थे साध-कत्वमेवञ्चेत्यनेनोक्त्वा विपक्षे बाधकत्वमप्याह–अत्रेति । 'हलन्त्य'मित्यत्रेत्यर्थः । नन्वन्यत्र भाष्ये तेषामुप-देशस्यापि प्रतिपादनात्तदुत्थितिः सङ्गतैव, किञ्च भाष्ययोर्मिथो विरोधोऽतआह—एतदिति । 'आदेच'इति सूत्रस्थो'देशश्चे'त्यादिभाष्येत्यर्थः । 'सम्भवत्येके'ति न्यायादिति भावः । स्थेऽग्रहणेति । गणादावपठितेत्यर्थः ।

❀ ज्योत्स्ना ❀

प्रत्याख्यातमिति । न च 'राजे'त्यादौ नित्स्वरः फलं, निदन्तत्वाभावात् । न च व्यपदे-शिवद्भावः, 'अप्रातिपदिकेने' ति निषेधात् । प्रत्ययविधिविषयः स निषेध इति चेत् , एवन्तर्हि करणघञन्तोपदेशपदानुवृत्तिमन्तरेण नान्यदिहावलम्बनं पश्यामः । न चैवमपि दोषः, प्रातिपदि-कत्वेन राजन्नित्यादेरुपदेशत्वादिति वाच्यं, शास्त्रपरोपदेशपदस्य यथाश्रुतत्वेन प्रातिपदिकस्य तत्त्वा-नङ्गीकारात् । 'साधूपदेशकरणीभूते शास्त्रे धातुत्वाद्युपाधिपरिच्छेदयोग्यघटितत्वेन उच्चारितो यस्त-

❀ सदाशिवभट्टीयम् ❀

फलाभावेति । अत्र यथा फलाभावस्तथा विवरणतोऽवसेयः । अवसेय्यते चास्माभिः कालेन । स्थेग्रहणेति ।

❀ विषमपदविवृतिः ❀

पूर्वं प्रातिपदिकत्वे इति । अनुबन्धविनिर्मुक्तपदार्थोपस्थितिरित्यनेनापि विरुणद्धि इति बोध्यम् । 'यदा मञ्जकादिनिवृत्त्यर्थं प्रातिपदिकानामुपदेशः कर्त्तव्य इति तदाऽयं प्रतिषेध' इति कैयटोक्तं वार्तिको-त्थानबीजं दूषयितुमाह—एतद्भाष्येति । नच प्रातिपदिकानां प्रतिषेधे चित्रङादीनामपीत्सञ्ज्ञाना-

❀ वरवर्णिनी ❀

विषय-कुम्भकारणित्येतदतिरिक्तत्वेन सङ्कोचेऽपि—अण्प्रत्ययमात्रस्य प्रत्ययत्वेन व्यवसितत्वात्कुम्भकारणित्येत-दपवादविषयसमुदायातिरिक्तत्वाच्चेत्सञ्ज्ञासिद्धावकृत्तद्धितग्रहणं व्यर्थम्, भविष्यदपवादविषयघटकातिरिक्तत्वेन सङ्कोचे तु न मानं, न च फलं किञ्चिदपि पश्यामः । किञ्च–'खट्वाक्रीती'त्यादौ भविष्यत्क्रीतान्तप्रातिपदिक-घटकातिरिक्तत्वेनाजाद्यतष्टाबित्यत्र सङ्कोचापत्तौ खट्वेत्यत्र टाबभावापत्तिरिति चेन्न—आचारक्विबन्तादशब्दा-द्यञि पूर्वं पूर्वविप्रतिषेधेनाल्लोपे निष्पन्नेऽशब्दे, अस्यापत्यमिरित्यत्र च भविष्यदपवादविषयातिरिक्तत्वेन सङ्कोचादिञो अकारस्येत्त्वानापत्तेः, अतोऽकृत्तद्धितग्रहणं कर्त्तव्यमेवेति शास्त्रिपादाः । कारणसाधनोप-

कर्त्तव्यो—मञ्चकोमञ्चक इति मा भू'दिति भाष्ये उपदेशशब्दो ग्रहणं—कर्त्तव्यमित्यर्थकः। तच्चानुवादरूपमेव सन्देहनिवर्त्तकमिति बोद्ध्यम्।

नन्वेवं 'तस्मिन्निति निर्दिष्टे' इति सूत्रे—'षष्ठीप्रकल्पकत्वं तस्ये'ति पक्षे 'गुप्तिज्किद्भ्यः' इत्यादावपि षष्ठीप्रक्लृप्त्यापत्तिः, न च सनः सनेवादेशो भविष्यतीति बाधकाभाव इति वाच्यम्, 'उपदेशे इत्युच्यमाना इत्सञ्ज्ञा न प्रकल्पेत'—इत्युक्तं भाष्ये, तद्विरुद्धयेता त्रोपदेशपदाननुवृत्ताविति चेन्न, तस्यैकदेश्युक्तित्वेनासाधकत्वात्। तथा हि—तत्र

❀ अभिनव-चन्द्रिका ❀

सम्भावना तादृशसम्भावनाविषयीभूतानां प्रातिपदिकानां प्रतिषेधो वक्तव्यः। अक्रुदित्यादि

❀ चिदस्थिमाला ❀

'उपदेशशब्द' इति. बहुव्रीहिः—'उपदेशः कर्त्तव्य' इति शब्द—इत्यर्थः। तच्च=ग्रहणञ्च। **अनुवादेति**। प्रक्रियया तेषां सिद्धत्वादिति भावः किमर्थं तस्य करणमत आह—**सन्देहेति**। 'वर्णादी'त्यादिः। तथा चाननुवृत्तिस्तस्य सिद्धा, तत्र शङ्कते—**नन्वेवमिति**। तस्य भावसाधनतया तथार्थकत्वाभाव इत्यर्थः। अन्यथा चरमेण पौनरुक्त्यापत्तिः,। अस्य तद्विरुद्धयेतेत्यत्राऽन्वयः। **सूत्र इति**। 'भाष्ये उक्त'मित्यत्रान्वयः। **तस्येतीति**। सूत्रद्वयस्येत्यर्थः, सूत्रद्वयस्य युगपद्धृतत्वात्। **इत्युच्यमानेत्सञ्ज्ञेति**। इत्यनुवर्त्य विधीयमानेत्यर्थः। हि=यतः। तत्र=सूत्रद्वये।

❀ ज्योत्स्ना ❀

त्सम्बन्धिन'इति प्रदीपदर्शितसूत्रार्थाङ्गीकारेण सकलेष्टसिद्धेरिति तत्त्वम्।

दीक्षितोक्तं दूषणान्तरं परिहर्त्तुमुपन्यस्यति—**नन्वेमिति**।

❀ सदाशिवभट्टीयम् ❀

गणादावपठितेत्यर्थः। **उपदेशशब्द इति**। बहुव्रीहिरयम्—'उपदेशः कर्त्तव्य' इति शब्द इत्यर्थः। **नन्वेवमिति**। तस्य भावसाधनतया तथार्थकत्वाभाव इत्यर्थः। अन्यथा चरमेण पौनरुक्त्यापत्तिः। **इत्युच्यमानेति**। इत्यनुवर्त्य विधीयमानेत्यर्थः। तत्र=सूत्रद्वयेत्यादावित्यादिना बहोर्लोपेति।

❀ विषमपदविवृतिः ❀

पत्तिरिति वाच्यम्, एतच्चात्रयुक्तं—यदित्कार्याभावादित्सञ्ज्ञा न स्याद्यत्रेत्कार्यं भविष्यति तत्रेत्सञ्ज्ञा, तद्यथाऽऽगस्तिकौण्डिन्ययोरगस्तिकुण्डिन'जित्यग्रिमभाष्येण वार्तिकारम्भे कुण्डिनचश्चकारस्येत्सञ्ज्ञा

❀ वरवर्णिनी ❀

देशपदानुवृत्तौ, सर्वथोपदेशपदाननुवृत्तौ च भाष्यविरोधमाशङ्कते-**नन्वेवमिति**। **तस्येति**। 'तस्मिन्निति'- 'तस्मादिती'ति सूत्रद्वयस्येत्यर्थः। सप्तमीनिर्देशेन यत्र कार्यं तत्र सप्तम्यन्तार्थान्वय्यर्थकं, पञ्चमीनिर्देशेन च यत्र कार्यं तत्र पञ्चम्यन्तार्थान्वय्यर्थकं पदं षष्ठ्यन्तं बोध्यमित्यर्थ इति तदाशयः। ननु पञ्चम्यन्तार्थान्वयिनः सन्नित्यस्य षष्ठ्या विपरिणामेपि सामर्थ्याद्गुपादिभ्यः परं सनमनुमाय तस्य स्थाने आन्तरतम्यात्सनेवादेशो भविष्यतीति न कोऽपि दोष इति षष्ठीप्रकॢप्तौ बाधकाभाव इत्यत आह—**उपदेश इति**। **न प्रकल्पेतेति**। आन्तरतम्याज्जातस्य सनः पाणिन्यनुचरित्वादिति भावः। अननुवृत्तौ=भावघञन्तोपदेशपदाननुवृत्तौ। तस्य=तस्मिन्निति सूत्रभाष्यस्य। एकदेश्युक्तित्वं दर्शयति—**तथाहीति**।

'ङमो ह्रस्वादची'त्यादौ—यत्र सप्तमी पञ्चमी चेत्युभयं निर्दिश्यते तत्र–किं पूर्वस्य कार्यमथ परस्येति सन्देहे–परत्वानवकाशत्वाभ्यां पञ्चमीनिर्देशो बलवानिति सिद्धान्तिनोक्तम्।

तत एकदेशिना—'यथार्थं वा षष्ठीनिर्देशः कर्त्तव्य' इति समाधानान्तरमुक्तम्। 'यथाविषयं प्रगुक्तेषु कार्यिणः षष्ठ्या निर्देष्टव्या'इति तदर्थः । तेषु सप्तमीनिर्देशस्य क्वचित्पूर्वत्र क्वचिदुत्तरत्राऽऽवश्यकत्वेनोभयनिर्देशे गौरवेणैषैकदेश्युक्तिः ।

❀ अभिनव-चन्द्रिका ❀

तात्पर्यग्राहकमित्यदोषात् । **सन्देह इति** । न च ह्रस्वाऽव्यवहितोत्तरत्वविशिष्टो यो ङम् तदन्तं यत्पदं तदव्यवहितोत्तरत्वविशिष्टः अजादिपदाव्यवहितपूर्वत्वविशिष्टो य उदासीनस्तस्य ङमुडित्यर्थ इति सन्देह एव तावन्न सम्भवतीति वाच्यम्, 'तस्मि'न्निति 'तस्मा'दितिपरिभाषयोर्योऽशः सिद्धो बाधितो वा तदंशानुपस्थितेः सिद्धान्तसिद्धान्तत्वेनोभयोरपि षष्ठ्यंशोपस्थापकत्वे प्रयोजनविरहादन्यतरोपस्थापितषष्ठ्यंशस्य श्रुतानुमितपरिभाषया सूत्रोपात्तङमादावेवान्वयेन विनिगमनाविरहेणासन्देहापत्तेः । **पञ्चमीनिर्देशो बलवानिति** । 'तस्मादित्युत्तरस्ये'तिपरिभाषायाः प्रकृते

❀ चिदस्थिमाला ❀

आदिना 'बहोर्लोप' इत्यादिसूत्रपरिग्रहः । **यत्रेति**—पूर्वेण समानाधिकरणम् । **अथेति**—पक्षान्तरे । 'उभयनिर्देश' इत्यस्या अनपूर्वत्वायाह—**परत्वेति** । यद्यपि भाष्येऽनवकाशत्वादित्येवोक्तं, तथापि तदुदाहरिष्यमाणोदाहरणविशेषापेक्षम्, अत एव 'ङः सी'त्यादौ द्वयोरनवकाशत्वेऽपि न क्षतिरिति भावः । यथार्थमित्यत्रार्थशब्दो न प्रयोजनादिवाचीति सूचयन्—तस्य कैयटोक्तार्थमेवाह—**यथाविषयमिति** । यथाप्रदेशमित्यर्थः, यत्र पूर्वस्य कार्यन्तत्र पूर्वबोधकपदस्य षष्ठ्यन्तस्योच्चारणं कार्यं, यत्र परस्य कार्यं तत्र परबोधकशब्दस्य षष्ठ्यन्तस्य तथेति यावत् । तदाह—**प्रागुक्तेषु कार्यिण इति** । प्रदेशेष्वित्यर्थः । षष्ठ्या=षष्ठ्यैव । तेषु=प्रागुक्तेषु सूत्रेषु । 'ङःसी' त्यादावुभयोरप्यनवकाशत्वादाह—**क्वचिदिति** । 'गोत'इत्यादौ 'सर्वनामस्थाने'इति सप्तमी पूर्वत्र=इतोत्सर्वनामस्थाने इत्यत्र—चरितार्था, 'ङम' इत्यादावचीति सा उत्तरत्र

❀ ज्योत्स्ना ❀

क्वचित्पूर्वत्रेति। 'इतोत्सर्वनामस्थाने' 'गोतो णि'दित्यादौ । **क्वचिदुत्तरत्रेति**। 'ङमो ह्रस्वादचि ङमुण्नित्यं, मय उञो वो वे' त्यादौ ।

❀ सदाशिवभट्टीयम् ❀

यत्रेति पूर्वेण समानाधिकरणम् । तत्र खलु=स्थानिनि,–हेतुमाह **उपेति** । एवञ्च षष्ठीप्रकॢप्तः प्रागेव परन्त्वान्तरङ्गत्वेनोपदेशोत्तरकालं सूत्र एवेत्सञ्ज्ञोच्चारितस्य कार्यन्तु प्रयोग एवेति निरनुबन्धकस्यैव प्रत्ययत्वेन

❀ वरवर्णिनी ❀

तत्र किं पूर्वस्येति । न च—ह्रस्वात्परो यो ङम्, तदन्तं यत्पदं तस्मात्परस्याजव्यवहितपूर्वत्वविशिष्टस्योदासीनस्य कस्य चिन्ङमुडित्यर्थे न सन्देह इति वाच्यं, 'ङम'इत्यादावुभाभ्यां षष्ठ्यंशोपस्थितेः फलाभावेनैकेनैव षष्ठ्यंशोपस्थितिर्वाच्या, सा च केनेति सन्देहोपपत्तेः, उभयोरेकस्य गुणप्रधानभावे च न किञ्चिद्विनिगमकमिति च तदाशयः । **बलवानिति** । एवञ्च—स एव षष्ठ्यंशोपस्थापक इति तदाशयः ।

यथाविषयमिति । 'ङमो ह्रस्वा'दित्यादौ कार्यिणः—अजादयः षष्ठ्यन्ता एव वाच्याः, किं प्रकॢप्त्येत्यर्थः । **उभयनिर्देश इति** । 'घेर्ङिति'—'आण्नद्या ङितः' । 'ङमो ह्रस्वादचो ङमुट्'—'मय उञो वो वाऽचि' 'आमः सर्वनाम्नः सुट्'—'आमि त्रेस्त्रयः' । 'आने मुक्–' 'आनस्येदास' इत्येवमुभयनिर्देशे गौरवमित्यर्थः । प्रक्लृप्तिपक्षे कल्पितस्यादेशस्य उच्चारणाभावादुच्चारितस्यापूर्वोच्चारणाभावादित्सञ्ज्ञा न स्यादत आह–

ततःपरेणैकदेशिना—षष्ठीपदानुवृत्त्या तस्मिन्नित्यादेरेव षष्ठीप्रकल्पकत्वमाश्रित्य 'यथार्थं वा षष्ठी'त्येकदेश्युक्तिः प्रत्याख्याता। षष्ठीपदानुवृत्तौ गौरवादुभयोः प्रकल्पकत्ववारणाय परत्वानवकाशत्वयोरेकः पूर्वपरयोरिति पूर्वपरग्रहणस्य युगपत्प्रकल्पकत्वाभावे ज्ञापकस्य चावश्यकत्वाच्चेयमप्येकदेश्युक्तिः। ततः पूर्वेणैकदेशिना तत्पक्षे गुप्तिजित्यादौ दोषः शङ्कितः।

ततः षष्ठीप्रक्लृप्तिवादिनैकदेशिनोक्तम्—'स्यादेष दोषो यदीत्सञ्ज्ञा आदेशं प्रतीक्षेत!, तत्र खलु कृतायामित्सञ्ज्ञायां लोपे च कृते आदेशो भविष्यति, 'उपदेश' इति हीत्सञ्ज्ञोच्यते'—इति। एवञ्च त्वदुक्तिर्व्याहतेत्याशयः।

तदग्रे उपदेशपदाननुवृत्तिमभिप्रेत्य—'अथवा नानुत्पन्ने सनि प्रक्लृप्त्या भवितव्यम्, यदा चोत्पन्नः सन् तदा कृतसामर्थ्या पञ्चमीति प्रक्लृप्तिर्न भविष्यति' इति समाधानान्तरं कृतम्। तत्र परत्वविशिष्टस्य सन उत्पादने पञ्चम्या उपक्षयात्प्रवृत्त्य-

---

❀ चिदस्थिमाला ❀

मय उञो वो वेत्यत्रेति भावः। **षष्ठीति**। 'षष्ठीं स्थान' इत्यतः। आदिना—तस्मादित्यस्य परिग्रहः, पूर्वस्य कार्यित्वप्रतिपादनयोग्या षष्ठी तद्बोधकपदे भवतीत्यर्थः, एवमग्रेऽपि। हेत्वन्तरमाह—**उभयोरिति**। 'युगप'दिति शेषः। **काशत्वयोरि**त्यस्या'वश्यकत्वे'ऽन्वयः। पक्षान्तरमाह—**एक इति**। **इति**=इत्यत्र। **तत्पक्षे**=प्रकल्पकत्वपक्षे। **दोषः**=प्रागुक्तरूपः। **षष्ठीति**। परेणेत्यर्थः। **स्यादिति**। 'तदे'त्यादिः! **तत्र**=स्थानिनि। **खलु**=निश्चयेन। तत्र हेतुमाह—**उपेति**। **हि**=यतः। षष्ठीप्रक्लृप्तेः प्रागेव परत्वादन्तरङ्गत्वाच्चोपदेशोत्तरकालं सूत्र एवेत्सञ्ज्ञा उच्चारितस्य, कार्यन्तु प्रयोग एवेति तत्र निरनुबन्धकस्यैव प्रत्ययत्वेन विधानात्सशब्द एव तत्कार्यभागिति तदादेशस्य कुतः सानुबन्धकतेति भावः। हेतूक्तेर्भावमाह–**एवञ्चेति**। तथोक्तौ चेत्यर्थः।—**ननुवृत्तिमिति**। अत एवेयं सिद्धान्त्युक्तिः। 'हलन्त्य'मित्यत्रेति भावः। **तत्र**='गुप्तिजि'ति सूत्रे। **विशिष्टेति**। अनुत्पत्तौ 'धातोः परस्ये'ति वक्तुमशक्यत्वादिति भावः। **प्रवृत्त्यन्तरेति**। पुनः

❀ ज्योत्स्ना ❀

उभयोः प्रकल्पकत्ववारणायेति। तत्र पर्यायेण प्रकल्पकत्ववारणाय परत्वानवकाशत्वयोराश्रयणं, युगपत्प्रकल्पकत्ववारणाय तु ज्ञापकाश्रयणं, यदाह **प्रदीपकृत्**–सूत्रद्वये प्रमाणत्वाद्द्वे भवेतां प्रकल्पिके। षष्ठ्या विभक्त्यास्तेनात्र ज्ञापकार्थत्वमाश्रितम्—इति। पूर्वस्य परस्य च कार्यविधायकत्वपक्षे तु ज्ञापकत्वस्य नोपयोगः, कार्यित्वनिमित्तत्वयोरेकत्र युगपदसम्भवादितीह तात्पर्यम्। 'ज्ञापकस्य चावश्यकत्वा'दिति पाठः। 'वे' ति पाठेऽपि वाशब्दश्चार्थे व्याख्येयः। **उपदेशपदाननुवृत्तिमभिप्रेत्येति**। यद्येवमित्सञ्ज्ञालोपयोरित एव सुशकत्वान्नास्ति पूर्वः पक्षस्तत्किमर्थं समाधानप्रयासः, सति चास्मिन्स-

---

❀ वरवर्णिनी ❀

अथवेति। अनुमानेन वचनान्तरं कल्पयित्वा तस्य वचनान्तरस्य विधेयताप्रयोजकत्वेऽस्यैव विधायकतोचितेति विधानं विना न प्रक्लृप्तिः, स्थानिनः सनोऽसिद्धत्वात्, विधानानन्तरन्तु हेत्वभावान्नानुमितिरिति भावः। **कृतसामर्थ्येति**। उद्देश्यसम्पत्तये वाक्यान्तरकल्पनमपेक्ष्य क्लृप्तवाक्येनैव सनो विधाने लाघवात्क्लृप्तवाक्येनैव सनो विधाने च पञ्चम्युपक्षयात्पञ्चम्यन्तराभावाच्च न प्रक्लृप्तिरिति भाष्यतात्पर्यम्। एवञ्च=उपदेशपदानुवृत्तिपरभाष्यस्यैकदेश्युक्तित्वस्य सिद्धौ च।

न्तराभावान्नास्ति तस्याः प्रकल्पकत्व'मिति तदर्थं कैयट आह । एवञ्च प्रकृतसूत्रस्थस्य सूत्रार्थप्रतिपिपादयिषया प्रवृत्तस्य भाष्यवार्त्तिकस्यैकदेशयुक्ततद्भाष्यबलेन प्रौढिवादत्वकल्पनं नोचितम् , लक्ष्यासिद्धेश्च । 'अइउ'णित्यादीनामपि क्रमबोधकत्वेनार्थवत्त्वात्प्रातिपदिकत्वम् । चित्रङश्चोः कुरित्यादेरपि प्रातिपदिकत्वम् । लोपश्चेत्यत्रापि शकारस्य स्वरूपे-

❀ अभिनव-चन्द्रिका ❀

षष्ठ्यंशोपस्थापकत्वमिति भावः । **बोधकत्वेनेति** । चिन्त्यमिदम्—क्रमेण श्रावणप्रत्यक्षबोधजनकत्वेऽपि क्रमविषयकशाब्दबोधजनकत्वाभावात्, 'अइउ'णितिसमुदायस्या'त्वावच्छिन्नः साधु'रित्यादिक्रमेण प्रत्येकं बोधजनकत्वेन समासकृतनियमेन वाक्ये प्रातिपदिकत्वाभावाच्च, प्रातिपदिकत्वेपि धात्वादीनां पृथक्परिगणनसार्थक्याय प्रातिपदिकबोधकमित्यवश्यं वक्तव्यत्वेनेत्सञ्ज्ञाप्राप्त्यभावात् । वस्तुतस्तु-धातुप्रातिपदिकनिपातागमादेशप्रत्यया इति न परिगणनं किन्तूदाहरणमात्रं, तथाच-यत्किञ्चिद्बोधकतापर्याप्त्यधिकरणान्त्यं हलिति 'हलन्त्य'मित्यस्यार्थेन णकारस्येत्सञ्ज्ञालोपयोरपि णत्वस्येत्सञ्ज्ञालोपयोरभावेन तेन रूपेणोपस्थितस्वसमीपवर्त्त्युकारादिबोधकत्वात् । अथवा उणित्युकारबोधकमिति वा णकारादेरित्सञ्ज्ञा बोध्या, व्यपदेशिवद्भावेन स्वस्यापि स्वान्त्यत्वात् । **प्रातिपदिकत्वमिति** । तद्बोधकत्वमित्यर्थः । 'चोःकु'रित्यादौ कुपदबोध्यककारादीनां प्रातिपदिकत्वात् ।

❀ चिदस्थिमाला ❀

प्रवृत्तौ मानाभावादिति भावः । **तस्याः**=पञ्चम्याः । मनोरमादिकं खण्डयति—**एवञ्चेति** । तस्य तत्त्वेनासाधकत्वे चेत्यर्थः । **प्रकृतेति**-प्राग्वत् । **तदिति** । 'तस्मि'न्नितिसूत्रस्थेत्यर्थः । अनौचित्ये हेत्वन्तरमाह—**लक्ष्येति** । 'ठक्छसा'वित्यादिविहितेत्यर्थः । ननु अत्र व्यवसितान्त्यग्रहणे सूत्रस्य तत्रापाठात्तदन्तस्येत्सञ्ज्ञा न स्यादत आह—**अइउणिति** । क्रमविशिष्टे समूहे तस्य शक्तिरिति भावः । परोक्तदोषानुद्धरति—**चित्रङित्यादिना** । 'उपदेश'शब्देन करणव्युत्पत्त्या धात्वादिरूपशास्त्रस्यैवो'पदेशेऽ'जिति सूत्रेऽपि ग्रहणादाह—**चोरिति** । **कत्वमिति** । तदन्त्यत्वन्तु व्यपदेशिवद्भावेनेति भावः । नन्वनुबन्धानामनेकान्तत्वे एतत्सम्भवेऽपि नैकान्तत्वे, तत्र मुख्येऽवयविन्येव बहुव्रीहेरस्य तदनवयवत्वात्, 'एवञ्चेदमेक-

❀ ज्योत्स्ना ❀

माधाने सत्यामप्युपदेशपदानुवृत्तौ दोषाभावादनुपपन्नमेव तत्, सत्यं, सत्यामेवोपदेशपदानुवृत्तावभ्युपगम्य प्रकल्पकत्वं प्रागुक्तमेकं 'समाधानमिदानीं तु प्रकल्पकत्वमेव निरस्यते तत्कृतस्तरां दोष इति लाघवात्प्रयोजनान्तराभावाच्चोपदेशपदानुवृत्तिरभिप्रेतेत्युच्यते इत्याशयः । **शकारस्य स्वरूपेणेति** ।

❀ सदाशिवभट्टीयम् ❀

विधानात्सशब्द एव तत्कार्यभागिति तदादेशस्य कुतः सानुबन्धकतेति भावः । **लक्ष्येति** । शानचि च

❀ विषमपदविवृतिः ❀

न स्यादित्येवंपरेणास्यापि दोषस्य दत्तप्रायत्वात् । **लक्ष्यासिद्धेश्चेति** । भावे घञन्तत्वेपि लक्ष्यसिद्धिप्रकारश्चन्द्रिकायामुपपादितो द्रष्टव्यः । **लोपश्चेति** । इदमनुबन्धा अनेकान्ता'इति पक्षाभिप्रायेण

❀ वरवर्णिनी ❀

प्रवृत्तस्येति । एतेन प्रकृतोपयोगितया बलवत्त्वं सूचितम् ।

१. 'अकृत्तद्धितान्ताना'मित्यस्याश्रूयमाणकृत्तद्धितान्तामित्यर्थः, । तेनोदश्विदादौ क्विपः सर्वापहारिलोपादश्रूयमाणकृदन्तत्वान्नेत्त्वम् , । 'चो कु'रित्यादौ न तथेति भवत्येव सञ्ज्ञा, कुम्भकार इत्यत्र तु श्रूयमाण एवाणिति न तत्रेत्सञ्ज्ञाप्रतिषेधः—इति—**श्रीधरः** ।

णार्थवत्त्वात्प्रातिपदिकत्वम् । अनुबन्धानामेकान्तत्वे तु 'लोपो यी'त्यतो लोपग्रहणेऽनुवर्त्तमाने पुनर्लोपग्रहणात्सर्वादेशत्वं बोद्ध्यम् । 'एकाच उपदेश' इत्यत्रत्यः कैयटोऽपि चिन्त्य एव । अन्योऽपि तज्जातीयश्चिन्त्य एव । 'एकाच उपदेश' 'आदेच उपदेशे' इत्यादौ तु भावसाधन एवेति सुधियो विभावयन्त्वित्याहुः ।

ननु शास्त्रेऽनुनासिकोच्चारणाभावात्तत्त्वज्ञानं दुर्लभमत आह—**प्रतिज्ञेति** । प्रतिज्ञाविषयानुनासिक्यवन्त इत्यर्थः । 'पाणिनीया' इत्यस्य पाणिनिप्रभृतिप्रोक्ता वर्णा

❀ **अभिनव-चन्द्रिका** ❀

प्रातिपदिकत्वमिति । चिन्त्यमिदं—'लोपश्चे'त्यत्र शकारस्य प्रातिपदिकत्वेपि तद्बोधकत्वाभावात्, तस्मात्पूर्वोक्त एव समाधिः—'चोः कुः' 'लोपश्चे'त्यादावपि बोध्य इति दिक् ।

❀ **चिदस्थिमाला** ❀

देशयुक्तिरेवेति नैव दोषोऽयमिति सूचयन्नाह—**अनुबन्धानामिति** । नन्वेवं प्रागुक्तप्रथमकैयटस्य का गतिरत आह—**एकाच इति** । अपिना—मूल-मनोरमादिसमुच्चायः । नन्वेवमपि अन्यत्रोक्तस्य तस्य का गतिरत आह—**अन्योऽपीति** । 'आदेच' इति सूत्रस्थकैयटस्य तत्सूत्रस्थतत्परत्वेन युक्तत्वादाह—**तज्जातीय** इति । अत एव तत्सूत्रस्थभाष्यविरोधोऽपि न, उपदेशेऽजितिसूत्रभाष्यन्तु व्याख्यातमेव, तद्ध्वनयन्नाह—**एकाच इति** । 'उपदेशेऽत्वत इत्यादौ'त्विति पाठः । 'आदेच उपदेशे इत्यादौ तु' इत्यपपाठः, तत्र तस्य कर्मव्युत्पन्नत्वात् । आदिना—'प्रत्यक्षमाख्यानमुपदेशः, 'उद्देशश्च प्रातिपदिकानां नोपदेशः'इत्यादिपरिग्रहः । **शास्त्र इति** । धात्वादावित्यर्थः । **तत्त्वेति** । अनुनासिकत्वाननुनासिकत्वविवेकेत्यर्थः । अनुनासिकत्वेत्यर्थो वा, एवमग्रेऽपि । 'प्रतिज्ञा'शब्दे 'आतश्चोपसर्गे' इति कर्मण्यङ् । अत एव तेन समानाधिकरणबहुव्रीहिर्न व्यधिकरणस्तदे तत्स्फुटयति—**प्रतिज्ञेति** । अत एवाऽऽसुब्वत इति वत्—(आनुनासिक्यवन्त इति) प्रयोगः । यत्तु **दण्डी**—'पाणिनीया' इत्यस्य तत्प्रोक्तशास्त्राध्येतार इत्यर्थ इति, तन्न, छन्दोब्राह्मणाभिन्ने तथा नियमाभावात्, अर्थाऽसङ्गतेश्च, एतद्ध्वनयन्नाह—**पाणीति** । पाणिनि शब्दश्च भाष्यवार्त्तिककृतोरप्युपलक्षणमित्याशयेनाह—**प्रभृतीति** । एतेन—पाणिनीया—इत्यस्य तत्प्रोक्तशास्त्राध्येतार इत्यर्थं मत्त्वा—प्रश्नसमानार्थकत्वाभावेनेदमुत्तरमसङ्गतमिति—**मन्दोक्तमपास्तम्** । **वर्णा इति** । वर्णविशेषा इत्यर्थः ।

❀ **ज्योत्स्ना** ❀

तत्र 'लोप'इति भिन्नं पदं, श इति च, पूर्वस्य विभक्तिसकारस्य श्चुत्वेन द्विशकारको निर्देशः । अनुबन्धानामनेकान्तत्वपक्षे शिदिति बहुव्रीहिः समीपेऽवयवत्वारोपेणोपपादनाल्लोपस्य शित्वमिति भावः । अत एकान्तत्वपक्षे तत्र समाधानान्तरमित्याह—**एकान्तत्वे त्विति** ।

❀ **सदाशिवभट्टीयम्** ❀

स्थानिवत्त्वे वक्ष्यमाणेत्यादिलक्ष्यासिद्धेरित्यर्थः । 'ऌटः सद्वे'तिविहितत्वेनाद्योच्चारणाभावात् । **एकाच इति** । 'उपदेशेऽत्वत इत्यादा'विति पाठः । 'आदेच'इत्यपपाठः । तस्य तत्र कर्म्मव्युत्पन्नत्वात् ।

❀ **वरवर्णिनी** ❀

चित्रङ इति । अत्र 'प्रातिपदिकानां प्रतिषेध' इति निषेधस्तु न, तस्य प्रातिपदिकविशिष्टानामित्यर्थकतया चित्रङोदरतथात्वात्, वै० 'स्वविषयकबोधप्रयोजकत्व' 'स्वाघटकाघटितत्वै'तदुभयसम्बन्धेनेत्यत्य**स्मद्गुरुचरणाः । आहुरिति** । परे तु—'भवतष्ठ'गित्यादौ 'ऌटः सद्वा' 'निष्ठे'त्यादौ च दोषस्य निराकृतत्वात्, चित्रङादौ ङिति पृथक्पदं कल्पयित्वा तस्य ङिति लक्षणां कृत्वा—चित्रेति प्रातिपदिकात् क्यच्स च ङिदित्यर्थेन चित्रङादौ दोषाभावात्, चोः कुरित्यादौ शास्त्रान्तरीयसञ्ज्ञात्वोपगमेनोदित्त्वस्योपपादयितुं शक्यत्वात्, लोपश्चेत्यत्र प्रश्लेषसामर्थ्यादेवेत्त्वकल्पनाच्च न प्राचीनमते कश्चिद्दोषः । तस्माद्भावसाधनतैव दीक्षितोक्ता, युक्ता । करणसाधनत्वे तु—अइउणित्यादौ विशिष्टस्यार्थवत्त्वाभावेन प्रातिपादिकत्वं न स्यादित्याहुः ।

इत्यर्थः । प्रतिज्ञा चायमेवमिति कथनं, वर्णानां तत्त्वज्ञापको व्यवहारश्च, ताभ्यां तज्ज्ञानं सुलभमिति भावः । प्रतिज्ञातारश्च प्रत्यासत्त्यैतच्छास्त्रकर्त्तार एवेति दिक् । **निर्देशादिति** । तेषां तत्र ग्रहणे हि नासिकादौ यणापत्तिरिति भावः । न चेत्त्वविधानसामर्थ्याद्यण-भावः सिद्धः, तस्यापि प्रत्याहारेष्वनुबन्धाग्रहणज्ञापनद्वारैव यणभावकल्पकत्वौचित्यात् । साक्षाच्छास्त्रबाधकल्पनापेक्षयाऽस्यार्थस्यौचित्यात् । 'निर्देशा'दित्यस्य-'तन्मूलभूतेत्त्वविधान-

❀ अभिनव-चन्द्रिका ❀

इति भाव इति । न चा'नुनासिक'इत्यादौ 'यस्येति'लोपान्न यण्प्राप्तिर्नापीत्त्वप्राप्तिरिति शेखरोक्त-मसङ्गतमिति वाच्यं, 'यचि भ'मित्यत्र यकारसाहचर्येण अच्त्वहल्त्वोभयानाक्रान्त एवाज्गृह्यते इति भसञ्ज्ञाया अप्राप्त्या यस्येतिलोपस्याप्रवृत्तेः । वस्तुतस्तु नासिकाशब्दो नात्यन्तस्वार्थिककनन्तः, किन्तु णासृधातुप्रकृतिकण्वुलन्तः, अत एव 'घोणा नासा च नासिके'तिकोशः सङ्गच्छते । अन्यथा नासेत्यनेनैव सिद्धौ स्वार्थककनन्तोपादानं व्यर्थं स्यात्पर्यायस्वार्थिककनन्तानां कोशे अदर्शनात् ।

❀ चिदस्थिमाला ❀

उद्देश्यभूतमिदं । सकलग्रन्थेषु न्यूनताध्वननाय सङ्ग्रामादिसङ्ग्रहाय चाह—**अयमिति** । **व्यवेति** । पाणिन्यादीत्यादिः । अत एवाह—**ताभ्यामिति** । 'प्रत्येक'मिति शेषः, **एवेनै**तदध्येतृव्यावृत्तिः । एतेन 'वृत्तिकारादिव्यवहारात्तथे'तिसकलग्रन्थकारोक्तमपास्तम् । अत्र प्राचोक्तमयुक्तमिति स्पष्टमन्यत्र, तदाह—**दिगिति** । तत्र=प्रत्याहारेषु । **सिद्ध इति** । एवञ्च कथं तन्निर्देशस्य ज्ञापकत्वमिति भावः । 'यस्येति चे'ति लोपस्तु न, परत्वेन विशेषविहितत्वेन च ह्रस्वत्वेनादौ बाधात्, अनन्तरमपि न—सकृद्गतिन्यायात्, विकारान्यानुपूर्व्यैक्येन 'लक्ष्ये लक्षण'मिति न्यायाच्च, इतोऽपीत्त्वानन्तरमपि न, नासाशब्दात् के तस्य सिद्धेः । एतेन—'तदभावोप्यत एवे'ति **रत्नाकरो**क्तमपास्तम् । तस्यापि=इत्त्वविधिसामर्थ्यस्यापि । तत्र हेतुमाह—**साक्षादिति** । नन्वेवं मूलासङ्गतिरेवात आह—**निर्देशादिति** । **तन्मूलेति** । निर्देशस्य

❀ सदाशिवभट्टीयम् ❀

यणापत्तिरिति । शाकलेन निर्देशोपपत्तिस्तु न, भत्वात् । नन्वेवं 'यस्ये'तिलोपापत्तिर्वाच्येति चेन्न, परत्वप्रत्याहारग्रहणसामर्थ्याभ्यां 'केण' इति ह्रस्वेन बाधात्, अनन्तरमपि न, 'सकृद्गता'विति न्यायात् । इदञ्च नासाशब्दात्केऽभिप्रेते, 'णास्–शब्दे' इत्येतस्माण्ण्वुलि तु न शङ्काकलङ्कलेशोऽप्यत एवाह- **इति भाव** इति । वस्तुतः 'कोसौ प्रत्याहारो यत्रेतां ग्रहण'मित्यवतरणं बोध्यम् ।

❀ विषमपदविवृतिः ❀

तत्पक्षे शकारस्यादेशबोधकसमीपे शकारोच्चारणमात्रेण शिलाङ्गीकारादिति बोध्यम् ।

आनुनासिक्यवन्त इति । [८० पृष्ठे] 'न कर्मधारयान्मत्वर्थीय'इति नाश्रितम्, 'असुब्वत' इति भाष्यप्रयोगेण क्वचिल्लाघवानादरात् । **यणापत्तिरिति** । वस्तुत आङ्गत्वाद्यस्येति लोपापत्तिर्द्रष्टव्या, नचेत्त्वं तदपवादः, इकारलोपानपवादत्वात्, कारिकादौ चारितार्थ्याच्च ।

❀ वरवर्णिनी ❀

अनुनासिकोच्चारणेति । इदानीं लोकेऽनुनासिकोच्चारणसम्प्रदायस्य लुप्तत्वादित्यर्थः **अयमेवेति-कथनम्**='अयमनुनासिक' इत्यादिकथनम् । व्यवहारः=प्रत्यय इत्यादौ विसर्गादिदर्शनम् । ताभ्याम्= उपदेशव्यवहाराभ्याम् । "**प्रतिज्ञा**—चायमनुनासिक इत्यादि भाष्योक्तवाक्यजन्यः शाब्दबोधः, तत्तत्कार्य-दर्शनरूपहेतुप्रयोज्या इत्सञ्ज्ञकत्वसाधिकाऽनुमितिश्चे"ति **जटाजूटकृतः** । **यणापत्तिरिति** । न च कका-रस्याच्त्वेऽनुनासिकशब्दे ककारे परतो भत्वात्–यणं बाधित्वा यस्येति लोप इत्येवापादनीयमिति वाच्यम्,

सामर्थ्यादित्यर्थ' इति तात्पर्यम् । आदिना—तृषिमृषिकृषेरेकःपूर्वेत्यादिसङ्ग्रहः ।

ननु 'प्रत्याहारेऽनुबन्धानां कथमज्ग्रहणेषु न' इति वार्त्तिके प्रत्याहारशब्दस्य वर्णसमाम्नाये प्रसिद्धेः 'प्रत्याहारेष्विता'मित्यनुपपन्नमत आह—**आदिरन्त्येनेतीति** । वार्त्तिके तादर्थ्यात्ताच्छब्द्यमिति भावः ।

ऊकालोऽच् । कुक्कुटरुते—उकारे एकद्वित्रिमात्रत्वप्रसिद्धेरकारादयो नोक्ताः । 'ऊ' इति एकद्वित्रिमात्राणां क्रमेण प्रश्लेषनिर्देशो—व्याख्यानात्, तेन स्वोच्चारणकालसदृशो—लक्ष्यते । स कालो यस्येति बहुव्रीहिः, तत्फलितमाह—**उश्च ऊश्च ऊ३श्चेति** । ननु

❀ **अभिनव-चन्द्रिका** ❀

एकद्वित्रिमात्राणामिति । न च स्वरूपसूत्रे शेखरे 'एकादिदशान्तानां द्वन्द्वैकशेषावनभिधानान्न भवत'इति वक्ष्यमाणत्वेनेदमसङ्गतमिति वाच्यं, सङ्कलितसङ्ख्यातात्पर्येण द्वन्द्वैकशेषौ

❀ **चिदस्थिमाला** ❀

मूलभूतेत्यर्थः । अस्याशाब्दत्वादाह—**तात्पर्यमिति** । ज्ञापकान्तरमस्तीत्याह—**आदिनेति** । आदिना—'उणादयः' 'पापाणके' इत्यादिपरिग्रहः । **एतेनोक्तारुचिसत्त्वादेवादी**त्युक्तमिति **रत्नाकराद्युक्त**मपास्तम् । सुयोजत्वे सम्भवति तथोक्तेरयुक्तत्वात्, अत एव 'तात्पर्य'मित्युक्तम् । मूलकृदादिमतेनाह—**ननु प्रत्येति** । —**नुपपन्नमिति** । तत्र तद्ग्रहणस्य सत्त्वेन ग्रहणाऽपि तदभावस्य दुर्वचत्वादिति भावः । अत एवाह—**इति भाव इति** । 'ननु कोऽसौ प्रत्याहारो यत्रेतां न ग्रहणं, लोक-शास्त्रान्तरप्रसिद्धार्थस्तु न, असम्बद्धत्वात्, शास्त्रेऽत्र तु न परिभाषितोऽत आह—आदिरितीति'—तु व्याख्यानं सिद्धान्ते बोध्यम् । मूले—**व्यवह्रियन्ते इति** । उक्तवार्त्तिकभाष्यादाविति भावः । ननु वर्णसमाम्नाये कण्ठादिक्रमसत्त्वेन 'आकाल' इत्युचितमत आह—**कुक्कुटेति** । तच्छब्दभूतोकारे एवेत्यर्थः । तेन तथैव युगपत्क्रमेणोच्चारणादिति भावः । क्रमबोधने तात्पर्येण, 'सङ्ख्याया अल्पीयस्या' इत्यनेन च तस्य पूर्वनिपातः, एवमग्रेऽपि । अत्रादौ न प्लुतनिर्देशः, 'विभाषा पृष्टे'ति हिशब्देकारस्य प्लुतविध्यानर्थक्यापत्तेः, निर्देशासङ्गतेश्च । अत एव न मध्ये ऽपि तस्य निवेशः, 'अतो दीर्घ'इत्यादि वैयर्थ्यापत्तेश्च, मध्यमोत्तमयोर्वैपरीत्यमपि न, उक्तहेतोः, 'ओमभ्यादाने' इत्यस्यानर्थक्यापत्तेश्च, पूर्वमध्यमयोरपि वैपरीत्यमुक्तरीत्या न, तदेतदभिप्रेत्याह—**क्रमेणेति** । **प्रश्लेषेति** । तेन निर्देश इत्यर्थः, न तु दीर्घ एव, सञ्ज्ञात्रयकरणसामर्थ्यात्, विशिष्टैका तु न सञ्ज्ञा, प्रयोजनाभावात्, सञ्ज्ञाकरणस्य लघ्वर्थत्वाच्च, तदाह—**व्याख्यानादिति** । अत एव सञ्ज्ञासञ्ज्ञिनोः क्रमोऽपि, महासञ्ज्ञाकरणात् । एतेन यथासङ्ख्यसूत्रमिहैवोपन्यस्तुं युक्तमित्यपास्तम् । तेन=ऊपदेन । **सदृश इति** । एतेन 'कालो लक्ष्यत' इति सकलग्रन्थकारोक्तमपास्तं, तथापि सामानाधिकरण्याऽसम्भवात् । वः कालो यस्येति विग्रहः, 'काल' इति जात्याख्यायामेकवचनं, तस्य वैकल्पिकत्वाद् 'व'इति बहुवचनं, तत्फलितमाह—**स काल इति** । उद्देश्यतावच्छेदककोटिप्रविष्टतयोकारादेरपि ह्रस्वादिसञ्ज्ञा बोध्या 'अज्झलोः प्रतिषेध'इतिवत् । भाष्ये'दीर्घप्लुतयोस्तु ह्रस्वसञ्ज्ञाप्रसङ्ग'इत्युक्तं, तद्रीत्याशङ्कते—**नन्विति** ।

❀ **सदाशिवभट्टीयम्** ❀

एकद्वित्रिमात्रेति । एका द्वे तिस्रश्च माला यस्य तस्य भावस्तत्त्वमिति—वाग्दृषदप्रिय इतिवदनेकपदो बहुव्रीहिः । एवमुत्तरत्रापि । एतेनैकादिदशान्तानां द्वन्द्वैकशेषयोरनभिधानस्य वक्ष्यमाणत्वेनेदमसङ्गतमित्यपास्तम् । **व्याख्यानेति** । अत्रादौ न प्लुतदीर्घौ, अन्त्ये न दीर्घः, 'ओमभ्यादाने' इत्यारम्भात् । 'अज्झलोः प्रतिषेध' इतिवत्—ह्रस्वसंज्ञा-दीर्घप्लुतयोरपि प्राप्नोतीति भाष्ये उक्तन्तद्रीत्याशङ्कते—**नन्विति** ।

❀ **विषमपदविवृतिः** ❀

ऊकालोच् । **एकद्वित्रिमात्रकत्वेति** । एकादिनवान्तानां द्वन्द्वस्यासाधुतायाः स्वेन वक्ष्यमाणतया

'उकालो ह्रस्व' इति वाक्येऽण्त्वात्सवर्णग्रहणे द्वित्रिमात्रयोरपि ह्रस्वसञ्ज्ञायां प्रदाय प्रद्धये-त्यादौ 'ह्रस्वस्ये'ति तुक्स्यादिति चेन्न। 'ऊ अ'जित्येवाज्ग्रहणसामर्थ्यादूसदृशोऽजित्यर्थे सादृश्यस्य व्याख्यानात्कालकृतस्यैव ग्रहणमिति सिद्धे अधिकं कालग्रहणम्— 'उच्चारितसम्बन्धिकालसदृशकालस्यैव सञ्ज्ञा, न तु तेन गृहीतसम्बन्धिकालसदृशकालस्यापी'त्यर्थेनादोषात्। तदुक्तं भाष्ये—'यावत्तपरकरणं तावदत्र कालग्रहणम्'—इति।

❀ अभिनव-चन्द्रिका ❀

नेत्यर्थे तात्पर्येणादोषात्। **अण्त्वात्सवर्णग्रहणेति**। न च ककारादिचिह्नाभावेन अण्त्वाभावात्कथमणुदित्सूत्रप्रवृत्तिरिति वाच्यम्, व्यासज्यवृत्तिधर्मानवच्छिन्ना कालघटितधर्मानवच्छिन्ना च या अण्वृत्तिविषयता तादृशविषयताप्रयोजकं पदं स्वबोध्यान्सवर्णा-

❀ चिदस्थिमाला ❀

अन्यथोच्चारितस्यैव प्रत्यायकत्वात्सूत्ररीत्या भाष्यरीत्या च मिथःसमभिव्याहाराद्व्याप्यजातिग्रहणेन शङ्कैव नोदेति, अत एव 'कालशब्दः प्रत्येकं परिसमाप्यते' इत्युक्तं भाष्ये, 'तत्रैतत्स्यात्— उकारात्परः कालशब्दो न श्रूयते इत्यत आह—**प्रत्येकं चे**'त्येवं कैयटेनावतारितं चेतीति बोध्यं। वाक्ये= प्रथमवाक्ये। **अण्त्वादिति**। अनेन द्वितीयवाक्यादौ शङ्कानिरासः, यत्नाधिक्येन व्यापकजात्यविवक्षणाच्चेत्यपि बोध्यम्। **सञ्ज्ञायामिति**। अत्र पक्षे शब्दसाम्येन यथासङ्ख्यं बोध्यं, न च तत्तत्सञ्ज्ञया बाधः, एकसञ्ज्ञाधिकारादन्यत्र समावेशस्येष्टत्वात्, यत्तु—'तथासत्यभ्यासस्य ह्रस्वविधौ दीर्घप्लुतयोरप्यापत्ति'रिति **रत्नाकरस्तन्न**, 'आपोऽन्यतरस्या'मिति विकल्पविधानेन ह्रस्वविधाने द्विमात्राऽविधानस्य ज्ञापनेन, 'प्लुतश्च विषये स्मृत' इत्युक्तेस्त्रिमात्रस्याऽविधानेन च विधिमात्रे दोषाभावात्, तथा चाऽनुवादे दोषस्तद्ध-नयन्नाह—**प्रदायेति**। 'स्वानहं गच्छामी'त्यादौ ङमुट् स्यादित्यपि बोध्यम्। **उ अजिति**। स्पष्टार्थं सन्धिर्न, अत्राचा ते न विशेष्यन्ते, तेषान्तत्त्वस्याव्यभिचरितत्वेन तद्वैयर्थ्यापत्तेः, एवं सत्युकाराणामेव सञ्ज्ञित्वेन सञ्ज्ञाविधानवैयर्थ्यापत्तेश्च, विधिष्वेव तद्ग्रहणेनेष्टसिद्धेः; अपि तु तैरच्, तत्र मुख्यसमानाधिकरण्यस्वीकारे प्रोक्तदोषद्वयाल्लक्षणया सामानाधिकरण्यं, तत्र च सादृश्यान्तरस्याऽसम्भवाद्व्याख्यानाच्च कालकृतस्यैव तस्य ग्रहणमिति भावः, तदाह—**वाज्ग्रहणेति**। त्यर्थे—'लब्धे'। **सिद्धे**—'इष्टे'। **उच्चारितेति**। 'प्रथमवाक्ये' इत्यादिः, वर्णेत्यर्थः। कालशब्दस्य प्रत्येकं परिसमाप्तेरिति भावः। **तेनेति**। तत्रोच्चारितवर्णेन गृहीतवर्णे-त्यर्थः। 'इत्यर्थकमित्यदोषा'दिति, पाठः। इति सूत्रार्थकमिति तदर्थः। **तपरेति**। अन्यत्रेति भाव इति केचित्, उदूकाल इत्येवमत्रैवेति भाव इत्यन्ये। अत एव 'सिद्धन्तु तपरनिर्देशा'दिति प्रागुक्तं, तत्र—न च 'तपरस्तत्कालस्ये'तिवत्कालपरस्तत्कालस्येति सूत्राभावात्कथं समत्वमिति वाच्यं, एककार्यपरत्वादेवमुक्तेः, तत्तूपपादितमेव। इदमपि प्राग्वदयुक्तमेव,अत एवाग्रे भाष्ये पक्षान्तराण्युक्तानीति बोध्यम्। यत्त्व'त्राज्ग्रहणमच्समुदायनिवृत्त्यर्थ'मिति भाष्ये रत्नाकरादौ चोक्तं तदसदिति ध्वनयन्,—कालग्रहणादुक्तार्थेप्यन्यत्र द्वितीयवाक्यातिप्रसङ्गेन दोष एवेत्याह—**न चेति**। 'तथापी'ति शेषः, 'निपात एका'जित्यत्रैकग्रहणेन ज्ञापितत्वादिति भावः।

❀ सदाशिवभट्टीयम् ❀

अन्यथोच्चारितस्यैव प्रत्यायकत्वात्सूत्ररीत्या भाष्यरीत्या च मिथः समभिव्याहारात् व्याप्यजातिनिर्देशसत्वेन शङ्कैव नोदयति। 'उ अ'जिति समाहारद्वन्द्वः, भिन्ने च पदे। असन्धिस्तु शाकलेनासन्देहार्थः। दीर्घपाठे तु 'इत्यर्थकमित्यदोषा'दिति पाठः। 'अदसोसे'रित्यत्र वक्ष्यमाणरीत्या निर्देशोपपत्तिः, असन्धिः संहिताविवक्षया शाकल्यह्रस्वेनेदानीं दीर्घस्यापि विधानाद्वा। इदानीं ह्रस्वशासनानामकिञ्चित्करत्वं तु भाष्य एव

❀ विषमपदविवृतिः ❀

एकद्विकरणे हेतुरिति वदयमप्यसाधुरेव। **तावदत्र कालग्रहणमिति**। **अन्ये तु**–शब्दस्य लक्षणये-

न चाजिति वर्णग्रहणे जातिग्रहणस्य दुर्वारत्वात्तितउच्छत्रमित्यत्र दीर्घात्पदान्ताद्वेति तुगापत्तिरिति वाच्यं, ज्ञापकसिद्धत्वेन तस्यासार्वत्रिकत्वात् । अन्तरङ्गत्वेन ह्रस्वत्वनिमित्त-नित्यतुक एव प्राप्तेश्च । अज्ग्रहणं प्रतक्ष्येत्यादौ—ह्रस्वस्येति तुग्व्यावृत्त्यर्थम् ।

उच्चैरु । नात्र श्रुतिकृतमुच्चैस्त्वमुपांशुप्रयोगेऽव्याप्तेः । श्रुतिप्रकर्षस्याऽव्यवस्थितत्वाच्च, किन्तु स्थानकृतम् । 'उच्चै'रित्यधिकरणशक्तिप्रधानम् । अधिकरणत्वञ्चोच्चारणं प्रति ।

❀ अभिनव-चन्द्रिका ❀

न्गृह्णाती'तिग्राहकशास्त्रस्यार्थेनादोषात्, विवेचयिष्यते चेदमग्रे । **वर्णग्रहणे जातिग्रहणस्येति ।** यादृशवर्णत्वव्याप्यजात्यवच्छिन्नग्रहणं यत्र तादृशजात्यवच्छिन्नमात्रारब्धसमुदाये सा जातिरतिदिश्यते इत्येतदर्थकवर्णग्रहणे जातिग्रहणमिति परिभाषयेतिभावः । **तितउच्छत्रमिति ।** ऊकालोऽजित्यत्राच्त्वजात्यवच्छिन्नग्रहणस्य सत्त्वेनाच्त्वजात्यवच्छिन्नमात्रारब्धे 'अ-उ'इतिसमुदाये अच्त्वजातेरतिदेशेन तस्य दीर्घसञ्ज्ञायां'पदान्ताद्वे'तिविकल्पेन तुगापत्तिरितिभावः । **असार्वत्रिकत्वादिति ।** वस्तुतस्तु–एतत्परियाषाया अस्वीकारेपि न क्षतिः । न च 'धीप्सती'त्यादौ 'दम्भ इच्चे'तिकित्त्वं स्यादितिवाच्यम्, 'वचिस्वपी'त्यत्र भाष्ये,—'वच्यादिभ्यो विहिते किती'त्युक्तत्वेन सत्यपि कित्त्वे क्षत्यभावात्, पूर्वोत्तरसाहचर्येण धातोरेव ग्रहणाच्च । **न च** 'नपुंसकस्य झलचः'इति सूत्रेभाष्ये ऊर्गित्यादौ नुम्वारणाय 'अच्'इत्यावर्त्य अचः परो यो झल्तदन्तस्येत्यर्थः, तथा च एतत्परिभाषाया अभावे 'तक्ष्णी'त्यादौ नुम्न स्यात्, अचः परो यो झल् तदन्ताङ्गस्याभावादिति वाच्यम् । 'नपुंसकस्य न यमः'इतिन्यासेनादोषात् । यत्तु—न च श्रायसावित्यादावुगिल्लक्षणनुमापत्तिः, एतत्परिभाषाभावे वृद्ध्यादेशेऽच्त्वपर्याप्त्यनुयोगितावच्छेदकधर्मावच्छिन्नानुयोगितापर्याप्तस्थानिता-

❀ चिदस्थिमाला ❀

दुर्वारत्वादिति । 'अओर्दीर्घत्वा'दिति शेषः । अनुवृत्त्यर्थमाह—**दीर्घादिति ।** परत्वात्तुग्विकल्पापत्तिरित्यर्थः, नित्यश्चेष्यते, न च तदभावे नित्यस्तुग्दुर्वारः, सकृद्गतिन्यायात्, भ्रष्टावसरत्वाच्च, पुनः प्रसङ्गविज्ञानन्त्वीदृशे विषये नेति—अचश्चेति सूत्रे कैयटे व्यक्तं, तत्त्वन्तु **गदा**तोऽवगन्तव्यम् । सार्वत्रिकत्वेऽप्याह—**अन्तरिति ।** तदीयनिमित्तमध्ये तन्निमित्तस्य प्रविष्टत्वादिति भावः । 'ह्रस्वत्वे'ति बहुव्रीहिः, 'नाजानन्तर्ये' इति त्वनित्या, नास्त्येव वा, अत आह—**अजिति ।** उत्तरार्थमपि बोध्यम् ।

ननु स्थानादिलाभः कथमत आह—**नात्रेति ।** ननु तस्य तेन कथं लाभोऽत आह—**उच्चैरिति ।** तथा चोच्चदेशाधिकरणवृत्तिरजित्यर्थः । **चोच्चारणमिति ।** साक्षात्परम्परया वा, प्रत्यासत्तेः, कारकाणां

❀ सदाशिवभट्टीयम् ❀

स्पष्टम् । **तुगापत्तिरिति ।** न चैतदभावे नित्यविधिर्दुर्वारः, सकृद्गतिन्यायाभिप्रायकतया भाष्ययोजनं कैयटोक्तन्तु दूषितमन्यत्रेति वाच्यं, प्राप्तविभाषाणां—निषेधरूपतया निषेधानां बलीयस्त्वान्नित्यविधेरपि निषिद्धत्वात् । नचानन्तरस्येति न्यायेन ह्रस्वप्रयुक्तस्य न निषेध इति वाच्यम्, योगविभागो मास्तु, छे चेत्यत्रैव दीर्घादित्यस्यापकर्षोस्तु, उभयत्रविभाषा चेयमिति भगवतोभिप्रायात् । कैयटमते दूषणान्तरं स्फोटयितुमाह—**अन्तरङ्गेति ।** स्पष्टञ्चेदं भाष्ये । **उच्चैरु ।** तेषां तत्त्वेपि क्षत्यभावदाह—**हल्स्वरेति ।**

❀ विषमपदविवृतिः ❀

मात्रापरत्वेन वर्णपरत्वाभावान्नाणुदित्सूत्रप्रवृत्तिरित्याहुः । **तितउच्छत्रमिति ।** ननु वर्णाद्वर्णान्तरोच्चारणेऽर्धमात्राकालव्यवायस्य स्वीकारेण अ,उ इत्यस्य न द्विमात्रत्वमिति चेन्न, वर्णोच्चारणाधिकरणकालस्य द्विमात्राकालत्वेनादोषात् । तदेतदभिप्रेत्य वक्ष्यते—**अज्ग्रहणमिति ।** **अन्तरङ्गत्वेनेति ।** कार्यिणोपि

तच्च ताल्वादीनां सभागत्वे एवेत्याशयेनाह—**ताल्वादीति** । इदं प्राचामनुरोधेन । वर्णसमाम्नायेऽकारस्य प्राथम्यात्कण्ठादीति वक्तुमुचितम्, एवमन्यत्रापि बोद्धयम्। प्रयत्नप्रेरितो वायुर्यदोर्ध्वभागे प्रतिहतोऽचं व्यञ्जयति तदा स उदात्त इति भावः । **अजिति।** 'ऊकाल'इत्यतस्तदनुवर्त्तते । उदात्तत्वादीनामज्धर्मताया एव लोकप्रसिद्धत्वेन हल्स्वरप्राप्तौ

❀ अभिनव-चन्द्रिका ❀

कत्वस्याभावेन 'अचः परस्मि'न्निति स्थानिवत्त्वाप्रवृत्तेरिति वाच्यम्, अच्त्वपर्याप्त्यनुयोगितावच्छेदकधर्मावच्छिन्नानुयोगिताकपर्याप्तिकस्थानितावच्छेदककादेशःस्थानिवदिति अचःपरस्मिन्नित्यस्यार्थेनादोषात्। प्रकृते च स्थानितावच्छेदकं यत्पूर्वत्वं परत्वं तत्पर्याप्त्यनुयोगितावच्छेदकीभूतं पूर्वपराण्वृत्तितद्व्यक्तित्वं, तदेवाच्त्वपर्याप्त्यनुयोगितावच्छेदकमिति स्थानिवत्त्वं सुलभम् । नचैवं णिलोपादेः स्थानिवत्त्वं स्यात्—अच्त्वपर्याप्त्यनुयोगितावच्छेदकधर्मस्य स्थानितावच्छेदकणित्वपर्याप्त्यनुयोगितावच्छेदकत्वादितिवाच्यं, 'णेरनिटी'त्यस्य ण्यन्ताङ्गान्त्यालो लोप इत्यर्थेन स्थानितावच्छेदकाल्त्वपर्याप्त्यनुयोगिताया अच्त्वपर्याप्त्यनुयोगितायाश्च एकस्यैव धर्मस्यावच्छेदकत्वेनादोषात् । वस्तुतस्तु णित्त्वस्येकारेपि पर्याप्तत्वेन न कोपि दोष इति सुधियो विभावयन्तु । **सभागत्वे एवेति** । तत्तत्स्थानेषु भागत्रयकल्पनां कृत्वोर्ध्वभागे वाय्वाघातेनोत्पन्नोऽजुदात्तः, अधोभागे वाय्वाघाते तेनोत्पन्नोऽजनुदात्तः, ऊर्ध्वभागे आहत्याधोभागाहतेनोच्चरितोच्स्वरितः, भागत्रये वाय्वाघातेनोत्पन्नोच प्रचय इति भावः ।

❀ चिदस्थिमाला ❀

तथैव क्रियान्वयनियमात् । **तच्च**=तथोच्चारणञ्च । **ताल्वादीनामिति** । तत्रैवोच्चारणसम्भवात्, भागं विना तथा दुर्वचत्वाच्चेति भावः । प्राचां=प्रक्रियाकृताम् । **अन्यत्रापि**='तुल्यास्ये'ति सूत्रवृत्तावपि । एतेन—'तालुन आदिस्ताल्वादिः, स आदिर्यस्येति बहुव्रीहिः, तत्पुरुषबहुव्रीह्योरेकशेषो वा—'इतिपरास्तम्, आद्ये विध्यभावात्, क्लिष्टत्वाच्च, स्वायत्ते शब्दप्रयोगे एवमुक्तेर्निष्फलत्वाच्च । **प्रयत्नेति** । 'कायाग्निरि'ति शेषः । ऊर्ध्वभागे=मूर्ध्नि, स्थानोर्ध्वभागे वा । इदं सर्वमग्रेऽपि बोध्यम् । **वर्त्तत इति** । 'अचश्चे'त्यत्रानुवृत्त्यर्थं तस्य स्वरितत्वस्यावश्यकत्वात् , वस्तुतोऽत्रानुवृत्तौ न फलमिति ध्वनयन्नाह—**उदात्तेति** । **लोकेति** । अत्रैव सूत्रे भाष्ये स्पष्टमिदम् । तेषान्तत्त्वमभ्युपेत्यापि क्षत्यभावमाह—**हल्स्वरेति** । 'स्वरविधा'

❀ ज्योत्स्ना ❀

प्राचामनुरोधेनेति । 'अनुक्षरन्ति काकुदं'[1]मिति पस्पशाभाष्योपदर्शितश्रुतौ वर्णाभिव्यक्तिस्थानस्य तालुत्वप्रतिपादनेन तस्यैव प्राधान्यमुपगच्छतामनुरोधेनेत्यर्थः । काकुदं=तालिवति च भाष्ये ।

उदात्तत्वादीनामज्धर्मताया एवेति । अस्य 'वस्तुत'इत्यादिः, बृहच्छेखरे तथा दर्शनात्, नातः पूर्वग्रन्थस्यासम्बद्धत्वशङ्केति बोध्यम् । स्पष्टञ्चेदं भाष्ये । नन्वेवमप्यच इति षष्ठ्यन्तानुवृत्तिरावश्यकी-राजदृषदित्यादौ समासान्तव्यञ्जनस्य स्वरवारणायेत्यत आह—**हल्स्वरप्राप्ताविति** ।

❀ सदाशिवभट्टीयम् ❀

तेषां तत्त्वे हि स्वरविधायकैर्हलां स्थाने हलो विधीयेरन्निति दोषो वाच्यः, स एव न, तत्स्थानिनोऽभावात्,

❀ विषमपदविवृतिः ❀

निमित्तत्वमाश्रित्येदम् । **स इति** । ऊर्ध्वभागप्रतिहतवायुव्यञ्जितोऽजित्यर्थः । हल उदात्तादिसञ्ज्ञायां बाधकाभावं चाह—**हल्स्वर इति** । तथा च हल उदात्तादिसञ्ज्ञायां किं बाधकं,

१ सुदेवो असि वरुण ! यस्य ते सप्त सिन्धवः, अनुक्षरन्ति काकुदं सूर्म्यं सुषिरामिव''इति भाष्योपात्ता ऋक्।

व्यञ्जनस्याविद्यमानत्वाच्चेदं स्वरूपकथनपरं बोध्यम् । **आये इति** । यच्छब्दः 'फिषोऽन्त' इत्यन्तोदात्तः, जस्सुप्त्वादनुदात्तः, 'एकादेश उदात्तेने'त्येकार उदात्तः । **अर्वाङिति** । अभिमुखवाच्यव्युत्पन्नं 'फिषोऽन्त' इत्यन्तोदात्तम् । आद्यस्य शेषनिघातेनाऽनुदात्तत्वम् । अर्वन्तमञ्चतीत्यर्थे कृदुत्तरपदप्रकृतिस्वरेण वाऽन्तोदात्तत्वम् । एकस्मिन्नच्युदात्तानुदात्तयोर्धर्मिणोर्मेलनविरोधादाह—**वर्णधर्माविति** । बाहुलकादधिकरणे घञ् । अर्श आद्यजित्यन्ये । इयं त्रिसूत्री स्पष्टार्था, लोकवेदयोरुदात्तादिव्यवहारस्य प्रसिद्धत्वात् ।

ह्रस्वग्रहणमिति । ह्रस्वपदघटितग्रहणमित्यर्थः । **अतन्त्रमिति** । स्वशास्त्रसङ्केतितरूपे-

❀ अभिनव-चन्द्रिका ❀

अर्श आद्यजिति । भावघञन्तादिति शेषः । 'करणाधिकरणयोश्चे'तिल्युटा बाधादिति भावः ।

❀ चिदस्थिमाला ❀

विलस्यार्थान्तरसत्त्वादत्रानुल्लेखः । चेदम्=अजितिपदम्, एतेन—"इदं प्रकृतसूत्र–समासस्येति–सूत्रस्थभाष्यविरुद्धं, तत्र हि—'हल्स्वरे'त्येव स्वीकार्यं, न तु 'स्वरविधा'वित्यादि,—'उदश्वित्वान् घोष' इत्यादौ तथा सति मतुप उदात्तत्वप्रसङ्गात्. कथं हलां स्वरप्राप्तिः, उच्चैरित्यत्र तन्निवृत्तमित्युक्तम्—"–इति रत्नाकरोक्तमपास्तम् । **आये इतीति** । आकारो निपातत्वादाद्युदात्तः । वेदभाष्यानुरोधेनाह—**अर्वाङिति** । अत एवाह—**फिषोऽन्त इति** । आद्यस्य=तदकारस्य । सम्भवात्पक्षान्तरमाह—**अर्वन्तमिति** । 'समासस्ये'त्येतदपवादत्वादाह—**कृदुत्तरेति** । 'गतिकारकोपे'तिविहितेनेत्यर्थः ।—**दात्तत्वमिति** । शेषं प्राग्वदिति भावः । **विरोधादिति** । तथा च पूर्वसूत्राभ्यां धर्मिपरावनुवृत्तावपि इह लक्षणया धर्मपराविति भावः । इतरेतरद्वन्द्वेऽपि वर्त्तिपदार्थयोः प्रकारत्वे तद्धर्मयोरपि प्रकारत्वेन, तत्समूहे भावप्रत्ययेन मूले 'उदात्तानुदात्तत्वे' इत्यस्योपपत्तिः, अत एव 'तस्य भाव'इति सूत्रे कैयटेनोक्तं"—'धवखदिरत्व'मित्यादौ जातिसमुदाये भावप्रत्ययः–" **इति** । तस्य च समुदायस्यानुद्भूतावयवत्वे एकवचनम्, उद्भूतावयवत्वे द्विवचनाद्यपीत्याकूतम् । भाष्योक्तं पक्षमाह—**अर्श इति** । भावघञन्तादिति भावः । अस्यापि बाहुलकादविशिष्टत्वादाह—**अन्ये इति** । **स्पष्टार्थेति** । स्पष्टं चेदं 'तस्मादित' इत्यत्र कैयटे । शुक्लादितुल्याश्चोदात्तादयः । एतेन"–वर्णधर्मपरत्वेन प्रसिद्धानां तेषां धर्मिपरत्वमनया बोध्यते–"इत्यपास्तम् । अत्रत्यमूलादेरसाङ्गत्यादन्यथा योजयति–**ह्रस्वपदेति** । मूले बहुव्रीहिरिति भावः । ननु सूत्रे किं कर्मधारयः ? एकदेशिसमासो वा ? अन्त्येऽपि,—स्वशास्त्रसङ्केतितस्य ह्रस्वशब्देन ग्रहणम् ? उत मात्राकालिकमात्रस्य ?, नाद्यः,—ह्रस्व–प्लुत–स्वरिताऽसंग्रहापत्तेः, पूर्वनिपातवैपरीत्यापत्तेश्च, कर्मधारययोग्यपदानां प्रायशः समासाभावाच्च, न द्वितीयः,—दीर्घ–प्लुत–स्वरिताऽसङ्ग्रहापत्तेः । ह्रस्वशब्दस्य मात्राकालिकेऽचि सङ्केतितत्वात्, अन्त्ये ह्रस्वशब्दोच्चारणं व्यर्थं, स्पष्टार्थमर्धमात्रमित्यस्यैव सुवचत्वादत आह—**स्वशास्त्रेति** । मात्राकालिकोऽच् तथा, तत्सम्बन्धि तद्घटितं यद्विशिष्टरूपं तद्धर्मस्तेनाऽबोधकमित्यर्थः, मात्राकालिका-

❀ सदाशिवभट्टीयम् ❀

अचोपि नानन्तरतमत्त्वात् । यद्यपि तेषां तत्त्वे 'यतोनाव'इति ज्ञापकं न सम्भवति, तथापीयं वाचनिक्यावश्यकीति भावः । **विरोधादिति** । तथा च पूर्वत्र धर्म्मिपरयोरपि इह लक्षणया धर्म्मपरतेति भावः । इतरेतरद्वन्द्वेपि वर्त्तिपदार्थयोः प्रकारत्वे तद्धर्म्मयोरपि प्रकारतेति तत्समूहे भावप्रत्ययेन मूले 'उदात्तानुदात्तत्वे'इत्यस्योपपत्तिः । 'अर्द्धह्रस्वशब्दोऽर्द्धमात्रायां रूढ'इति भाष्यतो विशिष्टरूढेरेव लाभादाह—**ह्रस्वपदेति** । मूले बहुव्रीहिरिति भावः । **स्वशास्त्रेति** । रूप्यत इति **रूपोऽर्थः**, स्वशास्त्रसङ्केतितः

णाबोधकमित्यर्थः । किन्त्वर्धमात्रारूपार्थबोधकमिति भावः । एवञ्च—दीर्घादिष्वप्यर्धमात्रैवो-दात्ता । इत आरभ्य नवसूत्र्या 'अ अ' इत्यतः प्रागुत्कर्षेणास्य त्रिपाद्यामपि प्रवृत्तिः । सर्वञ्चेदं भाष्ये स्पष्टम् । 'अर्धमुदात्त'मिति वृत्तिस्तु—सत्या सत्यभामेतिवद् व्याख्येया । 'उत्तरार्ध'मित्यस्य चार्धमात्रातोऽवशिष्ट उत्तरो भाग इत्यर्थः । वेदे तु यथाप्रयोगं प्रातिशा-ख्यादस्माच्च व्यवस्था । **तस्य चेति** । अनुदात्तस्येत्यर्थः । **उदात्तेति** । उदात्तस्वरितयोः परत्वे सतीत्यर्थः । तयोः परत्वञ्चोपस्थितानुदात्तापेक्षयैव । **अन्यत्र**—उदात्तस्वरितयोः परत्वाभावे । **प्रातिशाख्ये इति** । लोके त्वनुदात्त एवेति भावः । ह्रस्वस्वरितमुदाहरति—**क्वेति** । 'किमो'दित्यत्, 'क्वाती'ति क्वादेशे 'तित्स्वरितम्' इति स्वरितः । दीर्घ तमुदाहरति—**रथानामिति** । **येऽरा इति** । 'स्वरितो वाऽनुदात्ते पदादा'वित्येकारः स्वरितः । 'नोदात्तस्वरितोदय'मिति निषेधस्तु—'उदात्तादनुदात्तस्य स्वरित' इत्यस्यैवा-नन्तरस्येति न्यायात् । स्वरितपरमुदाहरति—**शतचक्रमिति** । अहेरित्यर्थेऽह्यः । वृत्रस्येत्यर्थः । 'छन्दसि वा वचनं प्राङ् णौ चङ्युपधायाः' इति वचनाद् गुणाभावः ।

❀ **चिदस्थिमाला** ❀

च्ववदर्थत्वेनाबोधकमिति यावत्, उक्तदोषात् । अन्त्यदोषमूरीकृत्याह—**किन्त्विति** । तत्फलमाह—**एवञ्चेति** । 'लोके'इति शेषः । अत एव वक्ष्यति—'वेदे त्वि'ति । अत एव 'तस्ये'ति ग्रहणं सफलं, तद्धि दीर्घादिस्वरितसंग्रहार्थं, तथाऽर्थे तु स न स्यात्, न च षष्ठीकल्पनार्थं, सम्बन्धिशब्दत्वादेव सिद्धेः, न च त्रिपादीस्थस्वरितसंग्रहाय तत्, अन्यथाऽसिद्धत्वात्स न स्यात्, भाष्यरीत्या तदभावात्, तदेतद्ध्वन-यन्नाह—**इत इति** । अत एवैकश्रुतिं प्रति स्वरितस्य सिद्धत्वाद्—'इमं मे'इत्यादौ स्वरित'मे'शब्दात्परेषां गमित्यादीनामेकश्रुतिः, तदाह—**सर्वञ्चेदमिति** । तदुक्तं भाष्ये—''अर्धह्रस्वशब्दोऽर्धमात्रायां रूढः, ततः प्रमाणे मात्रचो लुक्–''इति । एतेन—'तथा **दण्डिरत्नाकरा**द्युक्तं,–'समं स्यादिति सिद्धेऽर्धग्रहणमपि व्यर्थ' मिति चरमोक्तं चापास्तम् । तैत्तिरीये लोकवत्सत्त्वादाह—**अस्माच्चेति** । एवञ्च ऋग्वेदान्यपर-मिदमिति सिद्धम् । अस्येत्यनुक्त्याऽप्रक्रान्तस्वरिताभ्रमेऽपि उदात्ताऽभ्रमायाह—**अनुदात्तेति** । बहुव्रीहौ परशब्दस्य द्वेधा पूर्वनिपातापत्तेराह—**उदात्तेति** । नन्वेवमन्यापेक्षया परत्वेऽन्यानुदात्तस्यापि तत्त्वापत्ति-रत आह—**तयोरिति** । 'प्रत्यासत्त्ये'ति भावः । अत एवाह—**उदात्तेति** । प्रातिशाख्यसमाख्याबल-लब्धमर्थमाह—**लोके त्विति** । तं=स्वरितम् । द्वयोरपि फिट्स्वरेणान्तोदात्तत्वादाह—**येऽरा इतीति** । इत्यत्रेत्यर्थः । **स्वरित इति** । पाक्षिक इति भावः । असिद्धत्वन्तूक्तरीत्या नात एवाह—**नोदात्तेति** । **परमिति** । 'स्वरित'मिति शेषः । यत्तु **दण्डी**—'अह व्याप्ता'वित्यतः कर्मणि ण्यत्, तित्त्वात्स्वरितत्वं, सञ्ज्ञापूर्वकविधेरनित्यत्वाद्वृद्ध्यभावः—' इति, तन्न, तस्या अभावात्, तद्ध्वनयन्नाह—**अहेरिति** । तथा च

❀ **ज्योत्स्ना** ❀

अह्य इति । षष्ठ्यन्तमित्यर्थः । **गुणाभाव इति** । 'घेर्ङिती'त्यनेन । **इति स्वरित इति** ।

❀ **सदाशिवभट्टीयम्** ❀

मात्राकालिकाज्रूपोऽर्थो यस्मिन्मात्राकालिकाजर्द्धरूपेऽर्थे तेनाऽबोधकं, तस्याबोधकमिति यावत् । कर्मणो हेतुत्व-विवक्षया तृतीयेत्यन्ये । **केचित्तु** तादृशभाष्यानुपालम्भात्, प्रमाणमेव ह्रस्वस्यादावितिहर्य्युक्तेश्च मूले तत्पुरुषेपि न बाधकम् । वस्तुतस्त्वस्य प्रमेयपरत्वेपि जानुदघ्नमितिवन्मात्रचि तस्य लुकि दीर्घस्वरितादि-

❀ **विषमपदविवृतिः** ❀

न तावदचः स्थाने उदात्तस्य हल आपत्तिः, आन्तर्यतोऽच एवोदात्तस्य प्रवृत्तेः, नापि हल्स्थाने

'उदात्तस्वरितयो'रिति स्वरितः । 'उदात्तयणो हल्पूर्वा'दिति तु न, छान्दसत्वात् । यच्छब्दः 'फिष' इत्यन्तोदात्तस्तदेकादेशश्च वा स्वरितः । **स इति** । उदात्तादिह्स्वादि-सञ्ज्ञक इत्यर्थः ।

मुख—। उच्यतेऽसौ वचनः, बाहुलकात्कर्मणि ल्युट् । 'मुखसहिता नासिके'ति

❀ चिदस्थिमाला ❀

वेदभाष्ये''—'अयं ही'ति षडर्चस्य षोडशसूक्तस्यानादेशपरिभाषया इन्द्रो देवता, तत्र—'यं सुपर्णः परावतः श्येनस्य पुत्र आभरत् । शतचक्रं योऽह्यो वर्त्तनि'रिति (ऋक्) चतुर्थी, । श्येनस्य=ताक्ष्यस्य, पुत्रः=तनयः, सुपर्णो, यं=सोमं, परावतः=परागतान्, दूरात्=द्युलोकात्, आभरत्, कीदृशं तं—'शतचक्रं, शतमिति बहुनाम, तस्य कर्त्तारं, मूलविभुजादित्वात्कः, यद्वा शतकरणसाधनं, बहुयागनिष्पादनमित्यर्थः । 'घञर्थे कविधान'मिति कः, 'क्वादीनां के'इति द्वित्वम् । यः=सोमः अह्यः=अहेर्वृत्रस्य, वर्त्तनिः=वर्त्तयिता, 'प्रेर-यिता—''इत्युक्तम् । यच्च'प्यहिरिव भोगैः' 'अहिं वृत्र'मित्यादावाद्युदात्तत्वं पठ्यमानं ग्रामादित्वाद् वृषादित्वाद्वा भवति, 'इगन्ताना'मिति तु न, तत्र 'जनपदशब्दाना'मित्यनुवृत्तेः, एवञ्चो'दात्तादनुदात्ते'ति स्वरिते, तत्स्थानिकत्वाद्यण'उदात्तस्वरितयो'रिति अकारस्य स्वरितत्वेऽपि, स्वरविधौ व्यञ्जनस्याऽविद्यमानवत्त्वेनोदात्ता-दिति स्वरितत्वेऽपि वा, तस्याऽसिद्धत्वेन शेषनिघाताऽप्रवृत्त्या 'स्वरितो वे' त्यस्याऽप्रवृत्त्या पूर्वस्वरिताऽसिद्धिरत्र पक्षे,तथापि उञ्छादित्वेन, घृतादित्वेन वान्तोदात्तत्वमत्राऽहिशब्दस्य । यद्वा 'मकरवरूढे'त्यग्रिमेण 'च्छन्दसि चे'त्यनेन तदन्यार्थकेन लक्ष्यानुसारादादिर्द्वितीयं वोदात्तमित्यर्थकेनात्र तत्त्वं, तथा च यण उदात्तस्थानिक-त्वात्तस्य स्वरितत्वे 'स्वरितो वे'त्यस्य प्रवृत्त्येष्टसिद्धिरिति तेषामाकूतं, तदेतदभिप्रेत्य सामान्यत आह— **उदात्तस्वरितयोरिति । छान्दसत्वादिति** । तत्र सर्वकार्याणां व्यवस्थितत्वादित्यर्थः । यदि तु दण्डयु-क्तपक्षेऽपि छान्दसत्वाद्वृद्ध्यभावस्तर्हि सोऽपि पक्षो युक्तः, अत एव तत्रैव—'अह गतौ, अह्यः=गन्तव्यः, वर्त्मनिर्मार्गभूतः, इति पक्षान्तरत्वेनोक्तं, तत्रापि तथा वृद्ध्यभावसाधनन्तु चिन्त्यमेवेति दिक् । **वा स्वरित इति** । 'स्वरितो वे'त्यनेनेति भावः । अनन्तरत्वादुदात्तादिसञ्ज्ञकस्यैव परामर्श इति भ्रमवारणायाह— **उदात्तेति** । यद्यपि भाष्ये करणे ल्युटि 'शक्यं क्षु'दितिवत्पदसंस्कारपक्षे सिद्धेन वचनपदेन बहुव्रीहिरित्युक्तं, तथापि बहुव्रीहितस्तत्पुरुषस्य लघुत्वाद्वाक्यसंस्कारपक्षेऽनिर्वाहाच्च तन्न युक्तमिति ध्वनयन्नाह—**उच्यते इति** ।

❀ ज्योत्स्ना ❀

'अहिरिव भोगै'रित्यादावाद्युदात्ततया पठ्यमानस्याहिशब्दस्य शेषनिघाते 'उदात्तादनुदात्तस्य स्वरित' इति तस्य स्वरिते'न मुन'इत्यत्र नेति योगविभागाद्वा छान्दसत्वाद्वा असिद्धत्वाभावे आदेः पुनः शेषनिघाते यणि अयं स्वरितो, न त्वहिशब्दः स्वरितान्तः उदात्तान्तो वा स्वतन्त्रोऽस्तीति भावः । **इति तु नेति** । स्वरितेऽप्युदात्तोऽस्तीति षाष्ठभाष्यरीत्येदं, वस्तुतः उदात्तस्वरितयोरित्यादावेवं सति स्वरितग्रहणवैयर्थ्यप्रसङ्गाच्छास्त्रे उदात्तसञ्ज्ञकस्यैव ग्रहणौचित्यसिद्धा-न्ताच्छङ्कासमाधाने निर्दले । अत एवा 'नुदात्तस्य च यत्रोदात्तलोप'इत्यस्य स्वरितलोपे न प्रवृत्तिः—

❀ सदाशिवभट्टीयम् ❀

संग्रहे भाष्ययोजने च कैय्यटादीनां रूढिस्वीकारो मुधेति प्राहुः । **उदात्तस्वरितयोरिति** । यद्यप्यस्याद्यु-दात्तत्वं ग्रामादित्वाद्भवति, एवञ्चोदात्तानुदात्तेति स्वरिते तत्स्थानिकत्वाद्यण 'उदात्तस्वरितयो'रित्यकारस्य स्वरितत्वेपि स्वरविधौ व्यञ्जनस्याविद्यमानत्वेनोदात्तेति स्वरितत्वेपि वा तस्याऽसिद्धत्वेन शेषनिघाताप्रवृत्त्या 'स्वरितोवे' त्यस्याऽप्राप्त्या पूर्वस्वरितासिद्धिरत्र पक्षे, तथापि उञ्छादित्वादन्तोदात्तत्वमेवाहिशब्दस्य, तथा च

विग्रहः । तया वचन इति,—'साधनं कृते'ति समासस्तदाह—**मुखसहितेत्यादि** । मुखेति किम् ? यमानुस्वाराणामेव प्रसज्येत, एवञ्चाङ्गोऽनुनासिक इत्यत्रानुस्वारः स्यात् । नासिकेति किम् ? शक्तेत्यादौ 'अनुदात्तोपदेश' इत्यादिना कलोपो मा भूत् ।

अष्टादशेति । यद्यपीदं न व्यक्तिपक्षे—व्यक्तीनामानन्त्यात्तथाप्यष्टादशधर्मवत्त्वमकार-जातीयादेरित्यर्थः । ह्रस्वत्वादीनां तत्तत्समानाधिकरणोदात्तत्वानुनासिकत्वादीनाञ्च भेदमा-श्रित्येदम्बोद्धव्यम् । एवमग्रेऽपि । **लृवर्णस्येति** । विवृतस्येत्यर्थः । तेन 'लृति लृ वे'ति विधेयस्येषत्स्पृष्टस्य दीर्घत्वेऽपि न क्षतिः । **दीर्घाभावादिति** । अत एव तुल्यास्यसूत्रे

❀ आभिनव-चन्द्रिका ❀

इति विग्रह इति । वस्तुतस्तु'मुखसहितया नासिकये'ति न विग्रहः, किन्तु मुखद्वितीयया नासिक-येति, अन्यथोत्तरपदलोपस्य नित्यत्वे मुखसहितनासिकयेतिमूलस्यासङ्गत्यापत्तेरिति **साम्प्रदायिकाः** । **अन्ये** तु मुखपदं मुखसहिते लाक्षणिकं, सूत्रस्य शाकपार्थिवादौ पाठे न मानं, नापि प्रयोजनमित्याहुः ।

यमानुस्वाराणामिति । प्रसादवासिन्यायमबुध्वायं ग्रन्थ इति बोध्यम् । **न व्यक्तिपक्ष इति** । चिन्त्यमिदं, जातिपक्षेपि व्यक्तीनामानन्त्येन धर्मैरेवाष्टादशविधत्वस्योपपादनीयतया पक्षद्वयेपि कौमुदीसामञ्जस्यात् । ननु स्वसमभिव्याहृतपदार्थतावच्छेदकमिथोविरुद्धयावद्धर्मबोधनस्य विधा-पदार्थत्वेन ह्रस्वत्वादयोऽष्टावेव धर्मा इतिविधापदार्थानुपपत्तिरित्यत आह–**तत्समानाधिकरणेति** ।

❀ चिदस्थिमाला ❀

एतेन 'मूलं फलितार्थकथनपर' मिति **दण्डिरत्नाकरोक्तं**, भाष्यरीत्या **दण्ड्युक्तञ्चापास्तम्** । समाहारद्वन्द्वे मुखनासिकमिति स्यादत आह—**मुखसहितेति** । **तयेति** । अधिकरणस्यापि 'स्थाल्यां पच्यते' इतिवत्करण-त्वं, यद्वा मुख्यं करणत्वमेवेत्यन्यत्र स्पष्टम् । यद्यप्यत्र सूत्रेण समाससिद्धिस्तथाप्यन्यार्थं वार्त्तिकस्यावश्यकत्व-मिति सूचनायाह—**साधनमिति** । यमानां विशिष्य प्रातिशाख्ये विधानादाह—**इत्यत्रानुस्वार इति** । इत्यनेन तस्य लक्ष्ये इत्यर्थः, । 'अनुनासिकस्य क्वी'त्यादावनुवादे त्वप्रतिपत्तिरेव स्यादिति भावः । 'शक्तइत्या-दा'विति पाठः । 'शक्तेत्यादा'विति पाठे क्तान्तसम्बोधनपरतया योज्यम् । **नन्त्यादिति** । 'नापि व्यापक-जातिपक्षे, तस्या एकत्वादि'त्यपि बोध्यम् । अत एव व्याप्यजातिपक्षेण समाधत्ते—**तथाप्यष्टेति** । तत्स्वरूप-स्याप्यतत्त्वादाह—**अकारजातीयादेरिति** । आदिनेकारजातीयादिपरिग्रहः । इदमपि न वास्तवमित्याह—**ह्रस्वत्वेति** । तुल्यास्यसूत्रस्थभाष्याविरोधायाह—**विवृतेति** । अत्र मानमाह—**अत एवेति** । आदिना

❀ ज्योत्स्ना ❀

रिति स्पष्टं षाष्ठे **प्रदीपे** । **इति समास इति** । इदं वृत्तिकाराद्यनुरोधेन । भाष्ये तु 'करणे ल्युट्, बहुव्रीहिश्च समास' इत्युक्तम् । नन्वष्टादशत्वं धर्माणामनुपपन्नं, ह्रस्वत्वादयस्त्रयस्त्रय उदात्तादयोऽनु-नासिकश्चेति सप्तानामेव तेषामुपलम्भादत आह–**भेदमाश्रित्येति** । रूढत्वेऽपि सूत्रे लौकिकमास्यं

❀ सदाशिवभट्टीयम् ❀

यण उदात्तस्थानिकत्वात्तस्य स्वरितत्वे 'स्वरितो वे'ति प्रवृत्त्येष्टसिद्धिः । **इति समास इति** । इदं वृत्तिकारा-द्यनुरोधेन, भाष्ये तु 'करणे ल्युट् कुक्कुटाण्डवद्बहुव्रीहिश्च समास' इत्युक्तम् । बहुव्रीहित-स्तत्पुरुषो लघुरित्यभिप्रायो मूलस्येत्याहुः । **ह्रस्वत्वादीनामिति** । स्वसमानाधिकरणोदात्तत्वा-पेक्षयेत्यर्थः । **कत्वादीनाञ्चेति** । दीर्घत्वादिसमानाधिकरणोदात्तत्वाद्यपेक्षयेत्यर्थः । अत एवा'ष्टा-

❀ विषमपदविवृतिः ❀

तस्यापत्तिर्हल्स्वरप्राप्तौ व्यञ्जनस्याविद्यमानवत्त्वादित्यर्थः । **शक्तेति** । क्तान्ताट्टापि बोध्यम् । **विवृत-**

भाष्ये 'ऌति सवर्णे' इत्यनेन पक्षे द्विलकारकाभावे 'अकः सवर्णे' इति दीर्घत्वे 'होतॄकार इति ऋकारघटितप्रयोगः सङ्गच्छते । **ह्रस्वाभावादिति** । इदमेओङित्यादौ भाष्ये स्पष्टम् । गानरोदनादौ चतुर्मात्रार्धमात्रादीनामुपलम्भेऽपि शास्त्रीयकार्ये उपयोगाभावाल्लोके प्रयोगेष्वप्रयोगाच्च नोक्ताः । अत एवानुदात्ततरस्यानुक्तिः । एकश्रुतेः स्वरान्तरत्वे इदमुपलक्षणं,—तस्या लोकेऽपि सत्त्वात् ।

तुल्यास्य-। तुल्यावास्यप्रयत्नौ यस्येत्यर्थः । आस्ये भवमास्यं, व्याख्यानात् ।

❀ अभिनव-चन्द्रिका ❀

'उदात्तत्वविशिष्टानुनासिकत्वविशिष्टह्रस्वत्व'मित्यादिक्रमेणाष्टादशविधत्वमिति भावः । **एकश्रुतेरिति** । अस्याः 'प्रचय'इत्यपि व्यवहारः ।

तुल्याविति । न च 'नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्या'मिति नपुंसकैकशेषेण 'तुल्या'विति-पुंल्लिङ्गनिर्देशोऽसङ्गत इति वाच्यम्, प्रवृत्तिनिमित्तनिष्ठनानाप्रकारतानिरूपितनानाविशेष्यताकबोधकत्वरूपशब्दतन्त्रविषय एव एकशेषशास्त्रप्रवृत्त्या प्रवृत्तिनिमित्तनिष्ठैकप्रकारतानिरूपितनानाविशेष्यताकबोधकत्वरूपार्थतन्त्रस्य प्रकृते स्वीकारेणादोषात् । 'प्रत्यर्थं शब्दनिवेश'इतिभाष्यस्य–प्रतिप्रवृत्तिनिमित्त-

❀ चिदस्थिमाला ❀

आदिना—ऐ औच् इत्यादिपरिग्रहः । उभयसाधारणमाह—**गानेति** । अत्राद्यादिनाऽऽगमशास्त्रीय-मातृकान्यास–राणायनीयशाखास्थ'सुजाते एश्वे'त्यादिपरिग्रहः । द्वितीयादिना दीर्घविवृतत्ववर्णमात्रिकैजादिपरिग्रहः ।

एतेन पूर्वत्र तथानुक्तत्वान्न्यूनता,दोषश्चेत्यपास्तम् । **नोक्ता इति** । चतुर्मात्रादय इत्यर्थः, । प्रक्रियादशायां तत्सत्त्वे मानाभावाच्चेत्यपि बोध्यम् । **अत एवेति** । उक्तहेतुगणादेवेत्यर्थः । यद्यप्येकश्रुतावपीदं सम्भवति, तथापि तत्र किञ्चिद्वैलक्षण्यादाह—**एकेति** । त्रैस्वर्याभावरूपत्वेऽदोषादाह—**स्वरान्तरेति** । **इदमिति** । प्रागुक्तं सर्वं तस्या अप्युपलक्षणमित्यर्थः । अपिना वेदपरिग्रहः ।

व्यधिकरणत्रिपदबहुव्रीहिनिरासाय, प्रयत्नशब्दस्य पुंस्त्वमेवेति ध्वननाय चाह—**तुल्याविति** । अत एव प्रत्येकसाम्यमादाय न सावर्ण्यम्, अत एव चा'कः सवर्ण'इत्यादौ सवर्णग्रहण'भिकोऽसवर्ण' इत्यादावसवर्णग्रहणञ्च चरितार्थम् । नन्वास्यशब्देन कथं कण्ठादिस्थानग्रहणमत आह—**आस्ये भवमिति** । 'शरीरावयवाच्च'दिति यत् । ननु मुख्यमेवोष्ठावधि-काकलकपर्यन्तं तत्कुतो नेति चेन्न, आस्यपदोपादानवैयर्थ्यापत्तेः, इत एव–(तुल्य आस्ये प्रयत्नो यस्येति–)–व्यधिकरणबहुव्रीहिर्न, तदाह—**व्याख्येति** ।

❀ ज्योत्स्ना ❀

न गृह्यते इत्याह–**आस्ये भवमिति** । 'स्थानमेवे'त्यनेनास्यभवानां वायुसंयोगानां व्युदासः । कौस्तुभोक्तं

❀ सदाशिवभट्टीयम् ❀

दशाधाभिन्नामवर्णस्य प्रतिपत्तिं वक्ष्यामी'ति परपशास्यान्तिमभाष्यं सङ्गच्छते । **ऋकारघटित इति** । स एवेत्यर्थः । तत्सत्त्वे तदघटितमपि प्रयुञ्जीत । यथाश्रुतं तु न सङ्गतम् । किञ्च 'ऌति ऌ वे'त्यस्य प्रत्याख्यानमपि तदभाव एव सङ्गच्छते, अन्यथा ऌकारवदीषत्स्पृष्टमपेक्ष्य ऌकारवतो विवृतस्यान्तरतमत्वात्स एव स्यादिति तदसङ्गतिः स्पष्टैव । **तुल्यास्येति** । **तुल्याविति** । अत एव प्रत्येकं साम्यमादाय न सञ्ज्ञा, 'अकःसवर्ण'इत्यादौ

❀ विषमपदविवृतिः ❀

स्येत्यर्थ इति । मातृकायां त्वीषत्स्पृष्ट एव ऌकारो दीर्घ इति भावः । **लोक इति** । 'प्लुतावैच इदुतौ' वित्येतद्विषयः । चतुर्मात्रास्तु छान्दसा इति भावः ।

तुल्यास्यप्र । **यजुष्येकेषामिति** । नन्वत्र प्रयत्नभेदादेव न सावर्ण्यमित्यरुचेराह—

तच्च—वर्णोपयोगित्वात्स्थानमेव, प्रयत्नस्य पृथगुपादानात् । प्रकृष्टो यत्नः—आभ्यन्तरः । तस्य वर्णोत्पत्त्यव्यवहितप्राग्भावित्वरूपप्रकर्षवत्त्वात् । जनकत्वं षष्ठ्यर्थः । तत्तत्कार्यगत-

❀ अभिनव-चन्द्रिका ❀

निष्ठप्रकारतं शब्दनिवेश इति भावः । प्रकृते च—तुल्यत्वनिष्ठैकप्रकारतानिरूपितनानाविशेष्यताकबोधस्यैव जननात्, अनेकशब्दप्रयोगस्याप्राप्तत्वाच्च । **जनकत्वं षष्ठ्यर्थ इति** । अत एव वर्णोत्प-

❀ चिदस्थिमाला ❀

ननु स्थानमपीति वाच्ये 'स्थानमेवे'त्युक्तं, तत्त्वस्य प्रयत्नेऽपि सत्त्वादत आह-**प्रयत्नेति** । 'प्र'फलमाह—**प्रकृष्टेति** । प्रयोगः प्राग्वत् । **जनकत्वमिति** । जन्यताविशिष्टमिति भावः । वर्णानां जन्यतामते इदं, नित्यत्वपक्षे त्वभिव्यञ्जकत्वं तथेति बोध्यम् । ननु प्रयत्नस्य स्वतो भेदेन तत्त्वेऽपि 'दैत्यारि'रित्यादौ कार्यव्यक्तिभेदेऽपि स्थानस्यैकत्वात्तुल्यत्त्वस्य भेदघटितत्वपक्षे सावर्ण्याऽप्रसक्त्या कथं दीर्घोऽत आह—**तत्तदिति** ।

❀ सदाशिवभट्टीयम् ❀

सवर्णग्रहणाच्च । ननु वर्णोपयोगित्वेन हेतुना लालादेर्व्यावृत्तावपि प्रयत्नस्य तत्त्वेनाव्यावर्तनादेवेत्यसङ्गतमत आह—**पृथगुपेति** । शब्दोऽनित्य इति नयेऽस्यैव सम्भवादाह—**जनकेति** । **अन्ये तु**—ननु यत्नप्रयत्नशब्दयोः प्रयत्नमात्रे रूढत्वात्पर्यायत्वेन 'लाघवाद्यत्नेति वाच्ये प्रोपादानमधिकसंग्रहार्थ'मित्यस्य वक्तुमशक्यत्वेन

❀ वरवर्णिनी ❀

स्थानमेवेति । 'ननु प्रयत्नस्याप्यास्येऽवच्छेदकत्वसम्बन्धेन जायमानतया प्रयत्नग्रहणं व्यर्थमेवेति चेन्न, अवच्छेदकत्वसम्बन्धावच्छिन्नवर्णनिष्ठजन्यतानिरूपिततादात्म्यसम्बन्धावच्छिन्नजनकतावच्छेदकधर्मवत एवास्यभवपदेन विवक्षिततया—प्रकृते ककारादिवर्णानां समवायेन गगने उत्पद्यमानानामपि अवच्छेदकत्वेन कण्ठ एवोत्पद्यमानतया तादृशतादात्म्यसम्बन्धावच्छिन्नजनकतायाः कण्ठादावेव सत्त्वेन प्रयत्ने तदभावात् । अवच्छेदकत्वसम्बन्धावच्छिन्नाया जनकतायाः प्रयत्ने सत्त्वेऽपि तादात्म्यसम्बन्धवच्छिन्नाया जनकताया-आत्मनि सत्त्वेन तत्राभावात् । तादृश्या जनकतायाः कण्ठादावेव सत्त्वा'दिति **वदन्ति** । न च यो जनकः स एव तादात्म्येन तदवच्छेदक इति उदात्ताकारादिनिष्ठतादृशजन्यतानिरूपितायास्तादृशतादात्म्यसम्बन्धावच्छिन्नजनकतायाः कण्ठोर्ध्वभागत्वादावेव सत्त्वेन तद्वतां तुल्यत्वाभावादनुदात्तोदात्ताकारादेः सावर्ण्यानापत्तिरिति चेन्न, प्रयत्नसाहचर्याद्यावदास्यभवस्यापि वर्णविभाजकधर्मावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकधर्मवत एव तौल्ये सावर्ण्यस्वीकारेण—कत्वादेरेव तथात्वादुदात्तत्वादीनाञ्च वर्णविभाजकधर्मत्वाभावादित्यपि वदन्ति । परे तु 'स्वजनकस्थानजन्यत्व' 'स्वाजनकस्थानाजन्यत्वो'भयसम्बन्धविशिष्टसम्बन्धप्रतियोगित्वसम्बन्धेन वर्णविशिष्टो वर्णः सवर्ण इत्यर्थः । वै० 'स्वीयानुयोगितासमानाधिकरणप्रतियोगिताकत्व' 'स्वीयप्रतियोगितासमानाधिकरणानुयोगिताकत्व' 'स्ववृत्तिसंसर्गतावच्छेदकरूपावच्छिन्नत्व' 'स्वभिन्नत्वै'-तच्चतुष्टयसम्बन्धेन । सम्बन्धश्च—स्वघटितवाक्यप्रतिपाद्यतया तात्पर्यविषयीभूतो ग्राह्यः, तात्पर्यज्ञानन्तूद्बोधकान्तरादेवेति नान्योन्याश्रयः । एतच्चतुष्टयसम्बन्धेन सम्बन्धविशिष्टसम्बन्धविशिष्टत्वमेव च परस्परपदार्थः । द्वितीयसम्बन्धवैशिष्ट्यञ्च—प्रतियोगित्वानुयोगित्वान्यतरसम्बन्धेन । स्वघटितवाक्यप्रतिपाद्यस्य सम्बन्धस्य ग्रहणात्सम्बन्धान्तरविशिष्टसम्बन्धान्तरवत्त्वेपि—यत्र चैत्रो मैत्रं ताडयति न मैत्रश्चैत्रं ताडयति, तत्र 'परस्परं ताडयती'ति न प्रयोगः । न च यत्र स्वं नत्वा चैत्रः कालान्तरे पुनः स्वं नमतिं तत्र तथाप्रयोगापत्तिः । कालान्तरीणस्य स्वप्रतियोगिकसम्बन्धस्यापि भेदादिति वाच्यं, 'स्वीयानुयोगितासामानाधिकरण्य' 'स्वीयप्रतियोगितावैयधिकरण्यो'भयसम्बन्धेन स्वविशिष्टप्रतियोगित्वं प्रथमः सम्बन्धः, 'स्वीयप्रतियोगितासामानाधिकरण्य' 'स्वीयोनुयोगितावैयधिकरण्यो' भयसम्बन्धेन स्वविशिष्टानुयोगिताकत्वं द्वितीयः सम्बन्धो विवक्ष्यते इत्यत्रैव 'स्वभिन्नत्व'सम्बन्धदानस्याभि-

भेदं स्थानेष्वारोप्य भेदघटिततुल्यत्वस्य निर्वाहः । वस्तुतः 'सादृश्यं न भेदघटित'मिति भाष्यसम्मतमिति न कश्चिद्दोषः । स्पष्टञ्चेदं भाष्ये । तदाह—**ताल्वादीति** । शिक्षाया-ङ्कण्ठादीनाङ्कण्ठत्वादिनैव स्थानतोक्त्या तद्रूपेणैवाऽऽस्यशब्देन ग्रहणमिति तद्भागभेदमा-दाय नोदात्तादिषु सावर्ण्यभङ्ग इति बोद्धयम् । यस्यैतद्द्वयं येन यदीयेनैतद्द्वयेन तुल्य-मित्यर्थः । 'यजुष्येकेषा'मिति निर्देशाद्यावदास्यभवतुल्यत्वं ग्राह्यम् । अत एवैचोः

❀ अभिनव-चन्द्रिका ❀

त्यव्यवहितप्राक्कालिकत्वरूपप्रकर्षो गृह्यते इति भावः । **यावदास्यभवतुल्यत्वमिति** । तत्त्वञ्च **'स्वजनकयावत्स्थानप्रयत्नजन्यत्व' 'स्वाजनकस्थानप्रयत्नाजन्यत्वै'**तदुभयसम्बन्धेन स्ववि-शिष्टत्वम् । अत्राद्यसम्बन्धोपादानेन एकारसावर्ण्यमिकारे न । यावत्पदस्यापीदमेव फलम् । द्वितीय-सम्बन्धोपादानेन इकारसावर्ण्यमेकारे न । अथवा स्वविशिष्टः सवर्णसञ्ज्ञको भवतीति सूत्रार्थः । वै० **'स्वनिष्ठावच्छेदकत्वसम्बन्धावच्छिन्नव्याप्यतानिरूपितावच्छेदकत्वसम्बन्धावच्छिन्नव्यापकतावत्त्व'**

❀ चिदस्थिमाला ❀

अस्योपपत्तिरन्यतो बोध्या । इदमपि पररीत्येति ध्वनयन्सिद्धान्तमाह—**वस्तुत इति** । यथा चैतत्तथा मञ्जूषायां स्पष्टम् । **एतेनात्र** द्वौ तुल्यशब्दौ तन्त्रेण निर्दिष्टौ, तत्रैकः सदृशवाची, अपरो लक्षणयैकत्वसङ्ख्यावाची, तत्र चास्ये सादृश्यायोगात्प्रयत्ने चैकत्वायोगात्सम्भवानुरोधेनैकस्थानं सदृशप्रयत्नं च सवर्णमित्यर्थ इत्यपास्तम् । उक्तरीत्या निर्वाहात्तन्त्रलक्षणयोराश्रयणे मानाभावाच्च, तदेतद्ध्व-नयन्नाह—**स्पष्टमिति** । प्रागुक्तं सर्वमित्यर्थः । **तदाहेति** । प्रागुक्तं सर्वमाहेत्यर्थः । कार्यगतभेदारोपं विनाऽपि निर्वाह इति ध्वनयन्नाह—**शिक्षायामिति** । **कण्ठादीनामिति** । **एतेनास्यशब्दस्य** तद्धिता-न्तत्वस्फुटीकरणाय–ताल्वादीत्युक्तं मूले, न तु कण्ठादीति, तथा सति 'कण्ठ आदिरवयवो यस्ये'तिव्युत्पत्त्या प्राथमकल्पिकास्यप्रतीतिरपि स्यात् । **एतेन** वर्णसमाम्नाये, मातृकान्यासादौ चाकारस्य प्राथम्येन, स्थान-प्रयत्नविवेके कण्ठस्थानस्यैव प्रथमत उक्तत्वेन च 'कण्ठादी'त्येव वक्तुमुचितमित्यपास्तम् । **एवेनावान्तर-**धर्मव्यावृत्तिः । एतेन 'वर्णानां स्वरूपतो भेदाय कण्ठादिष्वप्यवान्तरस्थानभेदस्यावश्यकत्वेन भेदघटित-तुल्यत्वस्य न क्षति'रित्यपास्तम् । **भवेति** । तद्भवार्थकास्यशब्देनेत्यर्थः । **आदायेति** । तथाचोपस्थितत्वेन ततोन्तरङ्गत्वादेतद्भेदारोपेणैव निर्वाहे न कार्यगतभेदारोप इति भावः । ननु तुल्यशब्दस्य ससम्बन्धिक-त्वात् 'यस्य येने'तिलाभेऽपि 'यस्यैतद्द्वयं येन वर्णेन तुल्य'मिति मूलमयुक्तमेवात आह—**यस्यैतदिति** ।

ननु किं यावत्स्थानसाम्यमिष्टमुत यत्किञ्चित्स्थानसाम्यमत आह—**यजुष्येकेषामिति** । अन्यथा यणम-

❀ ज्योत्स्ना ❀

यत्किञ्चित्स्थानतौल्यपक्षं दूषयितुमाह—**इति निर्देशादिति** ।

❀ सदाशिवभट्टीयम् ❀

'रूढिर्योगे'ति न्यायेन यत्नसामान्यग्रहणमेव स्यादत आह—**जनकेति** । तथाच प्रयत्ने जनकत्वग्रहे यत्न-सामान्यस्य जन्यप्राग्वर्तित्वरूपजनकत्वबाधात् योगार्था एवाश्रीयन्ते, 'भूमौ पङ्कजमुत्पन्न'मिति यथेत्या**हुः** ।

निर्देश इति । इदञ्च विवृतत्वव्याप्यानां सञ्ज्ञाऽनुपयुक्तत्वमिति सूत्ररीत्योक्तम् । 'सप्त प्रयत्ना' इति भाष्यरीत्याप्याह—**अत एवैचोरिति** । एकारैकारयोर्मिथ इत्यर्थः ।

❀ वरवर्णिनी ❀

प्रायेणोक्तदोषाभावात् । द्वितीयसम्बन्धवैशिष्ट्यनियामिके प्रतियोगित्वानुयोगित्वे–प्रतियोगिभूतसम्बन्ध-प्रतियोगिताव्यधिकरणीभूते ग्राह्ये इत्याहुः । विस्तरस्त्वस्मत्कृतशब्देन्दुशेखरा**भिनवराजलक्ष्म्या**मनुसन्धेयः ।

सावर्ण्यमाशङ्क्य–'नैतौ तुल्यस्थानौ' इति भाष्ये समाहितम्। अत एव वल्योर्न सावर्ण्यम्। तेन 'तद्वानासा'मित्यादौ 'तोर्लि'ति न । अत 'एव प्रयत्नशब्देन यत्नमात्रग्रहण'मिति पक्षे यत्किञ्चित्प्रयत्नभेदे यत्किञ्चित्प्रयत्नैक्यमादाय सवर्णसञ्ज्ञेत्यर्थो 'झरो झरि सवर्णे' इति सवर्णग्रहणेन ज्ञापकेन साधितो भाष्ये । तेन स्थानांशे 'यावत्स्थानसाम्ये' इत्येव स्वारसिकोऽर्थ इति प्रतीयते ।

न च यावदास्यभवतुल्यत्वविवक्षणे प्रयत्नग्रहणं व्यर्थं, प्रयत्नस्याप्यास्यभवत्वादिति वाच्यं, ह्रस्वदीर्घयोः सावर्ण्यानापत्तेः, तयोर्जनकानामास्यभवानां वायुसंयोगानामतुल्य-

---

❀ अभिनव-चन्द्रिका ❀

'स्वनिष्ठावच्छेदकत्वसम्बन्धावच्छिन्नव्यापकतानिरूपितावच्छेदकत्वसम्बन्धावच्छिन्नव्याप्यतावत्त्वै' त-दुभयसम्बन्धेन । अत्र प्रथमसम्बन्धदानेन इकारसावर्ण्यमेकारे न, स्वमकारोऽवच्छेदकतासम्बन्धेन स्वाधिकरणं कण्ठः । तद्वृत्तिर्योत्यन्ताभावः—न त्ववच्छेदकतासम्बन्धेनाकारात्यन्ताभावः, किन्त्वी-कारस्यात्यन्ताभावः, तत्प्रतियोगित्वन्तत्र नत्वाकारे इति प्रथमसम्बन्धसङ्गतिः । एवमवच्छेदकता-सम्बन्धेन अकाराभाववान्–ताल्वादिरवच्छेदकतासम्बन्धेन तदवृत्तित्वमकारे इति द्वितीयपदसम्बन्ध-सङ्गतिः । अथवा स्वविशिष्टः सवर्णसञ्ज्ञको भवति, वै०'स्वनिष्ठजन्यतानिरूपितजनकतावि-शिष्टजनकतानिरूपितजन्यतावत्त्वसम्बन्धेन, जनकतावैशिष्ट्यञ्च—'स्वव्यापकत्व' 'स्वव्याप्यत्वो' भयसम्बन्धेन । अत्र प्रथमसम्बन्धदानेन एकारसावर्ण्यमिकारे न, द्वितीयसम्बन्धदानेन इकार-

❀ चिदस्थिमाला ❀

न्यत्र सावकाशं बाधित्वा सवर्णदीर्घः स्यात्। **नैताविति**। ताल्वादिस्थानस्याधिक्यात्, तथा च याव-त्स्थानैक्यपरं तद्भाष्यमिति तात्पर्यम्। अत एव=अत एव च। एवमग्रेऽपि। इष्टापत्तिं निराचष्टे—**तेनेति**। तयोरसावर्ण्येनेत्यर्थः। उक्तार्थे गमकं ध्वनयन्नाह—**तद्वानासामिति**। आदिना 'तद्वस्त्वि'त्यादिपरिग्रहः। **इति नेति**। इतिपरसवर्णो नेत्यर्थः। मात्रं कात्स्न्र्ये। **भेदे**–सति। **सवर्णेति**। अन्यथा तादृशसावर्ण्यस्य स्वस्य स्वस्मिन्नेव सत्त्वेन यथासङ्ख्येन निर्वाहे व्यावर्त्याऽधिकसङ्ग्रहयोरभावेन तदसङ्गतिः स्पष्टैव। **साधित इति**। यदि स्थानांशे तथा–(यत्किञ्चित्साम्यं)–इष्टं स्यात्तर्हि प्रयत्नांशेऽपि (यत्किञ्चित्साम्यं तथैव) प्राप्तमेवेति ज्ञापकेन तत्साधनप्रयासवैफल्यमेवेति भावस्तदाह—**तेनेति** । **साम्ये इति** । 'सवर्णसञ्ज्ञे'ति शेषः। **यावदिति** । **एतेनान्यतरसाम्येऽपि** तदापत्तेश्चिन्त्यमिदमिति **कैयटाद्युक्तमपास्तम्** । **व्यर्थमिति** । तद्धितान्ताऽऽस्यपदोपादानादेव सर्वलाभादिति भावः । नन्वेवमपि तद्वैयर्थ्यमपरिहृतमेव, अत आह—

❀ ज्योत्स्ना ❀

सवर्णग्रहणेन ज्ञापकेनेति। झरो झरीत्येव वक्तव्ये यथासङ्ख्यनिरासार्थं तत्र सवर्णग्रहणं—'शिण्ढी' त्यत्र डकारपरतो लोपार्थ—–यावत्प्रयत्नसाम्ये सवर्णसञ्ज्ञायां डकारढकारयोस्तद्भेदात्सावर्ण्याभावा-दनर्थकं स्यादिति भावः।

साधितो भाष्ये इति। यद्यपि भाष्ये 'सवर्णसंज्ञावचनमनर्थकं स्या'दित्येवोक्तं 'तथापि सवर्णसंज्ञया

❀ सदाशिवभट्टीयम् ❀

कण्ठादीनामेवेति। वायुसंयोगादीनामेवेति तु न, तद्वानासां वाप्रादय ? ['वाऽन्यस्य'] इत्यादिनिर्देशात्। **अन्येतु**–प्रयत्नसमभिव्याहारादास्यभवमपि करणमेव, तत्त्वञ्च कण्ठादेरेव न वायुसंयोगस्य, व्यापारवत्त्वरूपकर-णत्वाभावात्। कण्ठादेस्तु संयोग एव स इत्याहुः। **एतेन** वायुसंयोगव्युदासाय ज्ञापकान्तरस्य तवाप्यावश्य-

❀ विषमपदविवृतिः ❀

तद्वानासामिति। अनेन यावत्स्थानसाम्य एव सवर्णसञ्ज्ञेत्यत्रायं निर्देश एव ज्ञापक इति सूचितं भवति। **ह्रस्वदीर्घयोरिति**। इदमुपलक्षणम्–उदात्तानुदात्तयोरित्यपि बोध्यम्। ननु 'मात्राकालिकला-

त्वात् । तस्मादास्यभवानाङ्कण्ठादीनामेव ग्रहणमिति बोधनाय तत्सार्थक्यात् । आस्येति किं ? तर्पा । 'झरो झरी'ति लोपो मा भूत् । प्रयत्नेति किं ? वाक्श्चोतति । प्रेति किं ? शचयोः श्वासाघोषविवाराख्यबाह्यप्रयत्नसाम्येन तत्रैव दोषात् ।

कस्य किं स्थानमित्याशङ्कायामाह—**अकुहेति** । यद्यपि सर्ववर्णोच्चारणे कण्ठव्यापार आवश्यकस्तथापि चकाराद्युच्चारणे ताल्वादिव्यापारोऽपि तथा, अकारादीनामुच्चारणे

❀ **अभिनव-चन्द्रिका** ❀

-सावर्ण्यमेकारे न । **कण्ठव्यापार आवश्यक इति** । चिन्त्यमिदं—कण्ठव्यापारावश्यकत्वेपि तत्स्थानकत्वे प्रमाणाभावात्, अन्यथा सर्ववर्णोच्चारणे उरोमूर्धादिव्यापारावश्यकत्वेन सर्वेषामुरस्यमूर्धन्यत्वापत्तेः, इकारैकारयोस्सावर्ण्यापत्तेश्च । त्वदुक्तरीत्या इकारस्यापि कण्ठस्थानिकत्वेन यावदास्यभवतुल्यत्वस्य

❀ **चिदस्थिमाला** ❀

तस्मादिति । एतेन वायुसंयोगव्यवच्छेदः, एतेन—'प्रत्येकव्यापारनिरासार्थमुभयोरुपादानं, तेनो'भयसाम्ये सत्येव सञ्ज्ञा नान्यतरसाम्येऽपी'ति **कैयटकौस्तुभो**क्तं, तत्खण्डनाय—'ज्ञापकेनापि प्रत्येकव्यापारनिरास इतीदमयुक्त'मित्यन्योक्तं, 'विनिगमकाभावादुभयसाम्ये एवैतत्प्रवृत्तौ प्रयत्नग्रहणं चिन्त्यम् , अन्यथा सत्यपि तस्मिन्नन्यतरसाम्ये प्रवृत्त्यापत्तिः, द्वन्द्वोपात्तसाहित्यविवक्षायां तु एकपदोपात्तत्वेनास्मन्मते सुतरां तद्विवक्षायाः सुवचत्वा'दिति **रत्नाकरो**क्तं चापास्तम् । **लोप इति** । इदमग्रेऽपि बोध्यं । तत्रैव=वाक्श्चोततीत्यत्रैव । 'दोष'इति पाठः । तस्य च—'माभू'दिति शेषः । दोषा'दिति पाठे—'प्रेति कि'मित्यग्रे—'इति तु ने'ति शेषो बोध्यः । **आवश्यक इति** । तथा च सर्वेषां तत्त्वे वाच्ये विशिष्यैवमुक्तिरयुक्तेति भावः । स्पष्टत्वायाह—**चकारेति** । एतेनेकारत्यागे बीजं चिन्त्यमित्यपास्तम् । अपिना कण्ठव्यापारः ।

❀ **ज्योत्स्ना** ❀

वचन'मिति समासाभिप्रायेण प्रदीपकृतैवं व्याख्यातमिति भावः । **कण्ठादीनामेवेति** । प्रयत्नभिन्नास्यभवत्वव्याप्यजातिविशेषवद्यावत्तौल्यग्रहणज्ञापनद्वारा कण्ठादीनामेव ग्रहणमिति बोधनायेत्यर्थः । एवं त्वास्यभवत्वव्याप्ययावद्वायुसंयोगतौल्यमेव कुतो न गृह्यते विनिगमनाविरहादिति चिन्त्यमेतत् । प्रत्युत यत्किञ्चिदास्यभवतौल्यविवक्षाज्ञापकं शक्यते वक्तुमिति **कौस्तुभोक्तो** यत्किञ्चित्स्थानतौल्यपक्ष एव ज्यायान् । नचैवं ञमामपि परस्परं सावर्ण्यप्रसङ्गः, तत्तत्कण्ठादिस्थानमारभ्य नासिकापर्यन्तगामिनीनां तत्तदन्तरालरूपाणां रेखाणां तत्तत्स्थानत्वेन स्थानैक्याभावात् । न चैवं कङ्योरपि तदनापत्तिः, तत्तद्रेखारम्भककण्ठादीनां तत्तद्रेखाभेदाभावात्, 'अनुस्वारस्य यमि परसवर्ण' इति वक्तव्ये ययीति व्यापकप्रत्याहारनिर्देशाज्ज्ञापकात्, स्पष्टञ्चेदमनुनासिकसंज्ञासूत्रे भाष्यकैयटयोः । एतेनेकारोकारलकारादी-

❀ **सदाशिवभट्टीयम्** ❀

कत्वे तदकृत्वैव तेन तदभिन्नानां यावतामास्यभवानां ग्रहणबोधनेनेष्टसिद्धौ प्रयत्नग्रहणं व्यर्थमेवेत्य**पास्तम्** ।

तत्रैव दोषादिति । **केचित्तु**—आस्यशब्देनास्यभवत्वव्याप्यजातिविशेषवद्यावत्तौल्यं विवक्षितमिति साहचर्याद्यत्नशब्देनापि यत्नत्वव्याप्यजातिविशेषवद्यावत्तौल्यविवक्षणेनादोषात्स्पष्टार्थं **प्रोपादानमित्याहुः** ।

नन्वनेनापूर्वकादीनां कण्ठस्थानत्वे तुल्यस्थानत्वात् सवर्णपदशक्तिग्रहे कुशब्दस्य तद्वा-

❀ **विषमपदविवृतिः** ❀

दिरूपहस्वत्वादिकं'त्विति वक्ष्यमाणग्रन्थेनास्य विरोधः, तत्र ह्रस्वत्वादिजनकयत्नस्यास्य बाह्यत्वोक्तेरिति चेन्न, तज्जनकयत्नानां बाह्यत्वेपि तत्तत्स्थानस्थितवायुसंयोगानामास्यान्तर्गतत्वाविरोधात् । **तथापीति** । नन्विकारैकारयोः सावर्ण्यं दुर्वारम्, इकारस्यापि कण्ठतालुत्वादिति चेन्न । विवृततरत्वादिप्रयत्नभेदेन सावर्ण्यस्य वारयितुं शक्यत्वात् । अत एवैदेतोर्न सावर्ण्यम् । किञ्च वस्तुतः कण्ठस्थानत्वं न साव-

तु नेति भावः । कचयोस्तु न सावर्ण्यं, यावत्स्थानसाम्याभावात् , भिन्नस्थानकथन-वैयर्थ्यापत्तेश्च । अत्र कण्ठपदं कण्ठस्थानतत्समीपजिह्वामूलस्थानोभयपरं, तेन 'कण्ठ्या-वहौ' 'जिह्वामूले तु कुः प्रोक्त' इति शिक्षया न विरोधः । जिह्वामूलीयपदस्य च—वर्ण-विशेषे रूढिरिति न व्यवहारातिप्रसङ्गः । अत एवायोगवाहेषु जिह्वामूलीयगणनं भाष्ये । तत्तद्वर्णोत्पत्तेः प्राक्तत्तत्स्थानादौ जिह्वास्पर्शाद्यनुभवेन तत्तद्वर्णानां तत्तत्स्थानत्वनिर्णये-

❀ अभिनव-चन्द्रिका ❀

सत्त्वात् । यद्देशावच्छेदेन वाय्वाघातेन वर्णो जायते तत्तस्य स्थानमिति स्वोक्तिविरोधाच्च । **जिह्वामूल-स्थानोभयपरमिति** । अन्यतरेति वक्तुं युक्तम् । **रूढिरिति** । योगरूढिरित्यर्थः ।

❀ चिदस्थिमाला ❀

तथा=आवश्यकः । **नेतीति** । तथा चाकारादीनां तदेव स्थानमन्येषान्तु स्थानद्वयमिति भावः । एवं सति प्राप्तातिप्रसङ्गं वारयति—**कचयोरिति** । ननु 'जिह्वामूले तु कुः प्रोक्त' इति शिक्षोक्तेरत्र कुग्रहणमयुक्तं, न च वृत्त्यादिप्रामाण्येन शिक्षास्थजिह्वामूलपदस्य लक्षणया स्वसमीपदेशकण्ठबोधकत्वमत एवातिप्रसङ्गवारणाय तस्य रूढित्वकल्पना नेति लाघवमिति वाच्यं, मानाभावात् । न चात्र कण्ठपदं लक्षणया तत्परमेवेति वाच्यम् , अहयोः कण्ठ्यत्वस्य तत्रोक्तत्वेन तद्विरोधापत्तेरत आह—**अत्रेति** । लक्षणेतिभावः । 'समीपे'-त्यनेन तत्र मूलं प्रदर्शितम् । **शिक्षयेति**—समूहपरम् , एवं सत्यतिप्रसङ्गं निराचष्टे—**जिह्वेति** । चस्त्वर्थे । 'रूढिर्योगमपहरती'ति न्यायोऽत्रानुसन्धेयः । इदं द्रढयति—**अत एवेति** । तस्य तत्र रूढेरेवे-त्यर्थः । अन्यथा कोरपि तत्त्वात्—(जिह्वामूलीयत्वात्) तस्य च, वर्णसमाम्नाये सत्त्वात्तदर्थं (≍क≍पादि-) —शब्दान्तरेण गणने कार्ये सामान्यतस्तेन (जिह्वामूलीय—) शब्देन तत्र (अयोगवाहेषु जिह्वामूलीय—) गणनासङ्गतिः स्पष्टैव । नन्वनेनापूर्वकादीनां कण्ठस्थानत्वे बोधिते तुल्यस्थानत्वात्सवर्णपदशक्तिग्रहे कुशब्दस्य तद्ग्राहकत्वमणुदित्सूत्रेण बोधनीयमिति कथमत्र वाक्ये कुशब्देन पञ्चानामुपस्थितिरत आह—**तत्तदिति । निर्णये इति** । तथाच तस्य प्राग्जातत्वेनाक्षतिरिति भावः । नन्वेवमेतदुक्तिर्व्यर्थाऽत आह—

❀ ज्योत्स्ना ❀

नामकारौकारादिभिः सावर्ण्यापत्तिर्दत्तोत्तरा, कण्ठताल्वाद्यन्तरालरूपाणां कण्ठताल्वादिपदवाच्यानाम-प्यतिरिक्तस्थानत्वस्य सुवचत्वात् । 'यजुष्येकेषां' 'तद्वानासा'मित्यादिनिर्देशानामत्रैव प्रमाणत्वात् । एवञ्च ऐचोः परस्परं सवर्णसंज्ञा कस्मान्नेतिप्रश्नेन तौ तुल्यस्थानाविति यथाश्रुतभाष्यसङ्गतिः । एतेन 'ए ऐ तु कण्ठताल्व्यौ' 'दन्तोष्ठ्यो वः स्मृतो बुधै'रित्यादि शिक्षापाठो व्याख्यातः । अन्तरालोपलक्षणवाचिपद-समुदायातिरिक्तस्यान्तरालवाचित्वाभावात्तत एव प्रत्ययविधानात् । अनुनासिकस्थानान्तरालवाची तु नासिकाशब्द एवेति तेषां नासिकाव्यवहार इति विशेषः । 'दन्तोष्ठ्य'इत्यादिपाठस्तु प्रायः पुस्तकेषु न दृष्टः । न चैवमष्टौ स्थानानि इति शिक्षोक्तसङ्ख्यानियमभङ्गः, तावत्सङ्ख्यातिरिक्तानामुपलक्षकत्वाभावे तात्पर्यात्, बृहच्छेखरे साम्यस्यैवाङ्गीकाराच्चेतिदिक् । 'यकारादीनामुच्चारणे तु तथा ने'ति पाठः । यत्किञ्चित्स्थानतौल्यपक्षे कचयोः सावर्ण्याभावार्थमाह—**भिन्नस्थानकथनेति** । 'सूत्रे आस्यग्रहण-वैयर्थ्यापत्तेश्चे'त्यपि द्रष्टव्यम् । जनकस्थाने जनकत्वारोपमूलकरणत्वस्य स्थानत्वव्याप्यतया करणत्वाभ्युप-गमेन स्थानत्वाभावोक्तिं दूषयति—**कण्ठादीनामपीति** । अनुनासिकाकारादीनां नासिकास्थान-

❀ सदाशिवभट्टीयम् ❀

हकत्वमणुदित्सूत्रेण बोधनीयमिति कथमत्र वाक्ये कुशब्देन पञ्चानामुपस्थितिस्तत्राह=**तत्तदिति** ।

❀ विषमपदविवृतिः ❀

र्थ्योपयुक्तम्, किन्तु शिक्षायां तथोक्तमेव तदेतदभिप्रेत्याह—**भिन्नस्थानकथनेति** ।

ऽप्यकुहेत्यादिकथनं साधारणधर्मबोधनायानुवादकं, न त्वेतदेव कण्ठादिस्थानविधायकमिति भ्रमितव्यम्। विसर्जनीयपदेनात्र साहचर्यादकाराश्रयस्य ग्रहणम्। अत एव 'अयोगवाहा विज्ञेया आश्रयस्थानभागिनः' इति शिक्षया न विरोधः । **दन्ता इति**। दन्तसंयुक्तदेशा इत्यर्थः। अतो भग्नदन्तस्याप्युच्चारणं भवत्येव । 'उश्च पश्च ध्मायेते अनेन तत्र भव' इति योगेनोपध्मानीयस्यौष्ठ्यत्वमित्याह—**उपूपेति**। रूढत्वाच्च न व्यवहारातिप्रसङ्गः। **नासिका चेति**। चेन स्वस्ववर्गानुकूलं ताल्वादि गृह्यते। अत एवैषां प्रातिशाख्ये 'नासिकायां भव' इत्यर्थकनासिक्यशब्देन व्यवहारः।

यत्तु—'अनुस्वारयमानां च नासिका स्थानमिष्यते।'

—इति शिक्षोक्तेरेषां नासिका करणम्। किञ्च—स्थानत्वे कङयोः सावर्ण्यानापत्तिः, यावत्स्थानैक्याभावात्। यत्किञ्चित्स्थानैक्येन तत्त्वे तु—ञमामपि परस्परं सावर्ण्यापत्तिरिति, तन्न। कण्ठादीनामपि करणत्वस्यैव 'अस्यन्त्यनेन वर्णान्' इति भाष्यात्प्रतीतेः। स्थानत्वव्यवहारस्तु—वर्णाभिव्यक्तिजनकताल्वादौ वर्णजनकवायुसंयोगाधारे वर्णाधारत्वाऽऽरोपेण।

❀ अभिनव-चन्द्रिका ❀

वायुसंयोगाधार इति। 'एतेन यद्यपि सर्ववर्णोच्चारण'इत्यादि ग्रन्थोऽसङ्गत इति बोध्यम्। **अग्रहणबोधनादिति**। परे तु निरनुनासिकाकारोपलम्भेन आकारादीनां यथानासिकास्थानं तथा नकारादीनामपि निरनुनासिक्यकगकाद्युपलम्भेन नासिकास्थानम्। न च ङकारादिरेव निरनुनासिको गकार इत्यत्र प्रमाणाभाव इति वाच्यम्,'यथा तृतीयास्तथा पञ्चमा आनुनासिक्यमेषामधिको गुण'इति भाष्यस्यै-

❀ चिदस्थिमाला ❀

—प्यकुहेत्यादीति। साधारणेति। अकारादीनां कण्ठस्थानत्वादीति भावः। **न त्विति**—उक्तदोषात्। ननु विसर्जनीयमात्रस्य कण्ठ्यत्वे शिक्षाविरोधोऽत आह—विसर्जेति। **साहचर्यात्**=उपक्रान्ताकारसमभिव्याहारात्। यथाश्रुतन्तु न युक्तमित्यन्यत्र स्पष्टम्। एवञ्चेकाराद्युत्तरस्य तस्य तत्तत्स्थानं बोध्यम्। यथाश्रुतेऽनुपपत्त्या लक्षणयाह—**दन्तेति**। तत्सम्बद्धाः प्रदेशा इत्यर्थः। तद्भावमाह—**अत इति**। ध्मायेते=उच्चार्येते। नन्वेवमुपयोरप्यनेन शब्देन व्यवहारः स्यादत आह—**रूढेति**। ननु शिक्षायामुक्तत्वा नासिकायाः स्थानत्वं निर्मूलमत आह—**अत एवैषामिति**। ञादीनामित्यर्थः। 'भवे'त्यर्थकेति पाठः। 'भव'इत्यर्थकेति पाठान्तरम्, अनुकरणत्वमुभयथापि। तथाच व्यवहारान्यथानुपपत्त्या तत्त्वं समूलमिति भावः। खण्डनकृदायुक्तिं खण्डयति—**यत्त्विति। स्थानत्वे इति**। 'नासिकाया'इत्यादिः। तथाच 'त्वङ्करोषी'त्यादौ परसवर्णङाद्यनापत्तिरिति भावः। तत्त्वे तु=सावर्ण्याङ्गीकारे तु। **पत्तिरिति**। तथा च 'त्वञ्चयसी'त्यादौ ङाद्यापत्तिरपीति भावः। **भाष्यात्**=करणव्युत्पत्तिप्रदर्शकात्। नन्वेवं केषाञ्चित्स्थानत्वेन, केषाञ्चित्करणत्वेन व्यवहारे बीजाभावोऽत आह—**स्थानत्वेति**। 'कण्ठादीना'मित्यादिः। वर्णानां नित्यत्वादाह—**वर्णाभीति**। ताल्वादौ=कण्ठादौ। आरोपबीजमाह—**वर्णजनकेति**। वर्णाभिव्यक्तिजनकेत्यर्थः।

❀ ज्योत्स्ना ❀

त्वानुक्त्या न तस्याः स्थानत्वमित्याशङ्कानिरासाय हेतुं तत्राह—**वर्णाभिव्यक्तीत्यादि**।

❀ सदाशिवभट्टीयम् ❀

साहचर्यात्=उपक्रान्ताकारसमभिव्याहारात्। यथाश्रुतं तु न युक्तमिति स्पष्टमेव। ध्मायेते=उच्चार्य्येते। अत एव=नासिकायाः स्थानत्वादेव। **वर्णजनकेति**। तदभिव्यक्तिजनकेत्यर्थः। **संयोगाधारेति**। वर्णाभिव्य-

❀ विषमपदविवृतिः ❀

एषामिति। ञमङणनानामित्यर्थः। ञमङणनानामपि नासिकास्थानत्वे शिक्षायामेषां तत्स्थानानुक्त्या

तत्तत्स्थानजिह्वाग्रादिसम्बन्धेन वर्णोत्पत्त्या जिह्वाग्रादौ, तत्सम्बन्धजनकप्रयत्नविशेषे स्पृष्टतादौ च करणत्वव्यवहारः । वर्णाभिव्यक्त्यनन्तरभावी सावर्ण्यानुपयुक्त आन्तरतम्यपरीक्षोपयुक्तश्च—कण्ठविवरादिनिष्ठविकासादेरास्यबहिर्देशावच्छिन्नकार्यस्य जनको यत्नो—गुणशब्देनोच्यते । अकारादिनिष्ठानुनासिक्यस्य 'भेदकत्वाद्गुणस्ये' त्यादौ गुणत्वेन व्यवहारस्तु कण्ठाद्यवच्छिन्नवायुसंयोगेनोत्पन्नेषु नासावच्छिन्नवायुसंयोगेन तद्रूपधर्मोत्पत्त्या । एवञ्च नासिकायास्तत्र गुणजनकत्वादनुनासिकाकारादीनां नासिकास्थानं नोक्तं मूले । 'एकोऽयमात्मोदकन्नाम तस्य गुणभेदादन्यत्वं भवति, अन्यदिदं शीतमन्यदिदमुष्ण'-

---

❁ चिदस्थिमाला ❁

जिह्वाग्रादौत्यदिना—मध्यादिपरिग्रहः । **वर्णोत्पत्त्येति** । व्यापारवदसाधारणकारणत्वेन मुख्यं तत्र तत्त्वमिति भावः । अन्यत्र गौणं तत्त्वमित्याह—**तत्सम्बन्धेति** । नन्वेवं बाह्यस्य न सङ्ग्रहोऽत आह—**वर्णाभीति** । बाह्यत्वं निरूपयति—**कण्ठेति** । आदिना—सङ्कोचादिपरिग्रहः, सामानाधिकरण्येनान्वयः । यत्तु "एवं विभागे नासिकायाः स्थानत्वलाभेऽपि गुणत्वस्यालाभाद्वृद्धिसूत्रस्थभाष्यविरोधापत्तिः, तस्मात्सा न स्थानं, न च स्थानमपि तत्रत्यगुणपदेन विवक्षितम्, अपसिद्धान्तात्, 'नैतौ तुल्यस्थाना' वित्यादिभाष्यविरोधादनिष्टप्रसङ्गात्, अनुनासिकसञ्ज्ञाविधेर्नैष्फल्याच्च । एतेन 'यत्किञ्चित्स्थानसाम्ये सति यावत्प्रयत्नसाम्यं सावर्ण्यहेतुरितीहैव सूत्रे भाष्ये स्पष्ट'मिति **कौस्तुभोक्तं** निरस्त'मिति—"**रत्नाकरस्तं** खण्डयति—**अकारादीति** । 'भेदकत्वा'दिति भाष्यग्रन्थः । त्पन्नेषु=अकारादिषु । **तद्रूपेति** । आनुनासिक्यरूपेत्यर्थः, अत एव नासिकामनु-=पश्चाद्गत इति योगसङ्गतिः, एवञ्च पटुत्वादिवत्स धर्मो गुणरूप एवेति तत्त्वं, न तूक्तरीत्येति न भाष्यविरोध इति भावः । यत्तु **खण्डन**कृतादिर्भि'व्यापारमात्रेण तस्याः स्थानत्वेऽनुनासिकाकारादीनामपि तत्त्वप्रसङ्ग इति तदनुक्त्या न्यूनतादोषो मूले' इति, तत्खण्डयति—**एवञ्चेति** । उक्तरीत्योक्तव्यवहारोपपत्तौ चेत्यर्थः । **गुणेति** । तथा च गुणिजनकत्वाभाव इति भावः । अत आह—**अनुनासिकेति** । तद्व्यवहारस्य तत्रैव तथा प्राक्प्रतिपादितत्वादिति भावः । नन्वेवं भाष्योपपादने नियामकाभावेन तदुक्तरीतिरेव कुतो नात आह—**एकोऽयमिति** । **दृष्टान्तेति** । 'भेदकत्वे'त्यादिः । अत्र जात्यात्मना नैकत्वमभिमतं, तथा सति तस्या व्यक्तिभेदादेव भेदोपपत्तेर्गुणकृतभेदपर्यन्तधावनाऽसङ्ग-

❁ सदाशिवभट्टीयम् ❁

त्यवच्छेदकत्वावच्छिन्नतादृशसंयोगाधारतायास्ताल्वादावेव सत्वान्न संयोगस्योभयनिष्ठत्वेपि वर्णजनकवायौ

❁ विषमपदविवृतिः ❁

न्यूनता स्यादिति भावः । **जिह्वाग्रादाविति** । अत्र तद्व्यवहारः प्रातिशाख्ये 'व्योर्लघुप्रयत्नतर'इत्यत्र च बोध्यः । तत्र हि लघुतरः प्रयत्नो जिह्वाग्रादिर्यस्योच्चारण इति विग्रहे जिह्वाग्रादीनां प्रयत्नशब्देन व्यवहारात् । **लघुतरत्वञ्च**—शिथिलत्वं । कङयोः सावर्ण्ये 'आनुनासिक्यमेषामधिको गुण' इति भाष्येण—नासिकाया आस्यशब्देन, तत्रत्यप्रयत्नस्य प्रयत्नशब्देनाग्रहणबोधनरूपा युक्तिर्वक्ष्यमाणा गुणशब्दस्य सावर्ण्यानुपयुक्तत्वान्तरतम्यपरीक्षोपयोगित्वरूपार्थबोधकत्वे गुणशब्देनापि सूचिता भवति इत्यभिप्रेत्याह—**वर्णाभिव्यक्त्यनन्तर इति** । ननु गुणशब्दस्योक्तार्थकत्वे वृद्धिरादैजितिसूत्रस्थस्य 'भेदकत्वाद्गुणस्ये'त्यस्यापि तथैवार्थः स्यात्, तथा चै'कोयमात्मोदकं नाम, तस्य गुणभेदादन्यत्वं भवति, अन्यदिदमुष्णमन्यदिदं शीत'मिति दृष्टान्तभाष्यमसङ्गतं स्यात्, तेन तस्य धर्मार्थकत्वलाभादित्याशङ्क्य गुणपदस्यानेकार्थत्वेन समाधानमभिसन्धायाह—**अकारादिनिष्ठेति** । तर्ह्युदात्तत्वादीनां गुणत्व-

मिति दृष्टान्तपरभाष्येण तथैव प्रतीतेः । आत्माऽत्र द्रव्यम् । उदात्तत्वादीनां गुणत्वव्यवहारस्तु सावर्ण्यानुपयुक्तत्वान्तरतम्यपरीक्षोपयोगित्वरूपसादृश्येनेति बोद्धयम् । ङादीनान्तु तद्गुणरहितस्वरूपानुपलम्भेन उभयावच्छेदेन वायुसंयोगोत्तरमेव स्वरूपोत्पत्त्या विनिगमनाविरहेणोभयोः स्थानत्वम् । 'अनुस्वारयमानाञ्चे'ति शिक्षायां चेन ङादीनामपि सङ्ग्रह इति युक्तम् । अत एव 'कण्ठयोऽकार'इत्याद्युक्त्वा 'नासिक्यान्नासिक्ययमानुस्वारानिति स्थानानी'त्युक्तं प्रातिशाख्ये । 'नासिक्या–ङञणनमा' इति तद्व्याख्यातारः । कङयोः सावर्ण्यन्तु भवत्येव । 'आस्ये तुल्यदेशप्रयत्नम्' इति वार्त्तिके–किमास्योपादाने प्रयोजनमिति प्रश्ने—'प्रयत्नविशेषणमास्योपादान'मित्युक्त्वा–तद्व्यावर्त्यत्वेन बाह्यप्रयत्नान्प्रदर्श्य–

❀ चिदस्थिमाला ❀

त्वापत्तेः, किन्तु व्यक्तिकृतं, तदाह—**आत्मात्रेऽति** । नन्वेवमपि उदात्तत्वादीनां गुणत्वव्यवहारो भाष्यादिकृतोऽसङ्गतः, तेषां वर्णोत्पत्तिप्राग्भावित्वात्, आस्यान्तर्गतत्वाच्च, अत आह—**उदेति** । **रूपेति** । एतद्रूपसादृश्यमात्रेणेत्यर्थः, 'धर्मरूपं सादृश्य'मिति मतेनेदम्, 'अतिरिक्तं सादृश्य'मिति मते तु–तद्रूपणीयेन=तत्कृतेन तेन (सादृश्येन). इति बोध्यम्, एतदर्थमेव पूर्वं मध्यमविशेषणद्वयम्, अन्यथा स्वरूपभेदायाऽऽद्यस्य, बाह्यत्वायाऽन्त्यस्यावश्यकत्वेऽपि मध्यमतदाधिक्यं स्पष्टमेवेति भावः । नन्वकारादितुल्यता ङादीनां कुतो नात आह—**ङादीनान्त्विति** । नन्वेवं शिक्षाविरोधोऽत आह—**अनुस्वारेति** । युक्तत्वमेव प्रतिपादयति—**अत एवेति** । ङादीनां तत्स्थानत्वादेवेत्यर्थः । आदिना–'तालव्य इकार'इत्यादिपरिग्रहः । अन्यथा–'इति स्थानानी'त्यसङ्गतिः स्पष्टैव । ननु तत्र तत्पदेनान्य एवाभिमतोऽत आह—**नासिक्या इति** । नन्वेवं यावत्स्थानैक्याभावेन कङयोः सावर्ण्यं न स्यादिति आह—**कङयोरिति** । **आस्य इति** । 'सूत्रे तस्याऽतद्धितान्तत्वेन व्यधिकरणत्रिपदबहुव्रीहौ प्राप्तातिप्रसङ्गवारणाय कृते'-इत्यादिः । **प्रश्ने इति** । देशविशेषणत्वे फलाभावादिति भावः । **प्रयत्नेति** । सौत्रत्वाद्द्वन्द्वसाधुत्वमिति

❀ ज्योत्स्ना ❀

तथैव प्रतीतेरिति । पार्ष्टिकोत्पन्नगुणत्वस्यैव प्रतीतेरित्यर्थः ।

❀ सदाशिवभट्टीयम् ❀

स्थानत्वव्यवहारातिप्रसङ्गः । **रूपसादृश्येनेति** । एतदर्थमेव पूर्वं बाह्यलक्षणे मध्यमविशेषणद्वयम् । अन्यथा स्वरूपभेदायाद्यस्य बाह्यत्वायान्त्यस्यावश्यकत्वेपि तद्वैफल्यं स्पष्टमेव । अत एव=ङादीनां स्थानत्वादेव,

❀ विषमपदविवृतिः ❀

व्यवहारानुपपत्तिः, स्वाश्रयवर्णजनकस्थानविशेषावच्छिन्नवायुसंयोगातिरिक्तस्य तज्जननेऽनुपयोगादित्यत आह—**उदात्तत्वादीनामिति** । नचोदात्तत्वांशे उक्तदृष्टान्तभाष्य एव स्वारसिकत्वेन नोदात्तत्वांशेन स्वारसिकमिति वाच्यं, तस्यानुनासिक्यांशे कथंचिद्योजनीयत्वात् । उदात्तत्वादीनां सावर्ण्यानुपयुक्तत्वं तूदात्तादिजनकयत्नस्येत्यादिना वक्ष्यमाणं द्रष्टव्यम् । नन्वेवं ङादीनामपि स्वरूपोत्पत्तौ कण्ठाद्यवच्छिन्नवायुसंयोगस्यैव हेतुत्वं, तद्गतानुनासिक्यजनने तु नासावच्छिन्नवायुसंयोगस्य हेतुत्वमिति कङयोरपि तुल्यस्थानत्वं नासिकाया आस्यान्तर्गतत्वेपि सुवचमिति तस्यास्तद्बहिर्भावोपपादनप्रयासो व्यर्थ इत्याशङ्क्याह–**ङादीनामिति** । नन्वेवं शिक्षायां ङादीनां नासिकास्थानानुक्त्या न्यूनतेत्याशङ्क्याह—**अनुस्वारेति** । एतेन प्रथमदूषणं निराकृतं वेदितव्यम् । द्वितीयं निराचष्टे—**कङयोरित्विति** ।

'यथा तृतीयास्तथा पञ्चमा आनुनासिक्यमेषामधिको गुण' इति भाष्येण तस्य बाह्य-प्रयत्नत्वोक्त्याऽत्र सूत्रे नासिकाया आस्यशब्देन, तत्रत्यप्रयत्नस्य च प्रयत्नशब्देनाग्रहण-बोधनात् । 'नासिका आस्यबाह्ये'ति वदतां मते तद्ग्रहणाभावाच्च ।

अत एव बाह्यप्रयत्नानुपक्रम्य—

"अमोऽनुनासिका न ह्रौ नादिनो ह झषः स्मृताः ।
ईषन्नादा यणश्चैव श्वासिनस्तु खफादयः ॥
ईषच्छ्वासाँश्चरो विद्यात्—" इत्युक्तं शिक्षायाम् ।

※ चिदस्थिमाला ※

भावः, तस्य=आनुनासिक्यस्य, प्रक्रमाद्गुणशब्दोक्तेश्चेति भावः । **तत्रत्येति** । नासिकास्थेत्यर्थः । 'नाऽग्रहणस्ये'ति व्यस्तः पाठः । समस्ते पाठे उभयोरप्येकदेशान्वयो गुरुकुलादिवच्छेषषष्ठ्या समासश्च । **बोधने,**—भाष्यस्य कर्तृत्वेन, उक्तेः करणत्वेनान्वयः । अन्यथा तत्र स्थाने तत्कथनवैयर्थ्यापत्तिः, आस्यग्रहणव्यावर्त्यानां सावर्ण्यानुपयुक्तानां प्रदर्शनमेव हि तत्र प्रक्रान्तम्, अत एव च 'गुण' इत्युक्तम्, अधिकमुद्योतादौ स्पष्टम् । 'नासिकाऽऽस्यान्तर्गते'ति कैयटादिसम्मतपक्षेणेदम्, अत एवाह—**नासिकेति** । भाष्यादिसम्मतत्वादयमेव पक्षो युक्त इत्युद्द्योतादौ स्पष्टम्, अत एव बहुवच-नोक्तिः । तस्य प्रयत्नत्वं द्रढयति—**अत एवेति** । तस्य तत्त्वादेवेत्यर्थः, अन्यथा तदुपक्रमेण तत्समभि-व्याहारेण च 'अमोऽनुनासिका'इत्युक्त्यसङ्गतिः स्पष्टैव । **न ह्राविति** । भिन्ने पदे, 'हेति'पादपूरणे । तत्र

※ सदाशिवभट्टीयम् ※

अन्यथा स्थानिनीत्यस्यासङ्गतिः स्पष्टैव । **बाह्यप्रयत्नत्वोक्त्येति** । अन्यथा—आस्यग्रहणव्यावर्त्यानां साव-र्ण्योऽनुपयुक्तानां प्रदर्शनप्रक्रमेण तत्कथनवैयर्थ्यापत्तिः । **अग्रहणबोधनेति** । नासिकाया आस्यपदेन ग्रहणे तु तत्रत्यप्रयत्नस्यास्यपदव्यावर्त्यत्वोक्तिरसङ्गता स्यात्, तत्रत्यप्रयत्नस्याग्रहस्तु अधिको गुण इत्युक्त्या गुणा-नामभेदकत्वेनेति वक्ष्यमाणरीत्या बोध्यः । इदं च नासिकाऽऽस्यान्तर्गतेतिमते मणिमन्त्रादिन्यायेन तद्ग्रहे प्रतिबन्धकत्वं भाष्यस्योक्तम् । वस्तुतः सा तद्बाह्यैवेति निरूपितं विस्तरादुद्योते, तत एव बोध्यं—तदाह—**वदतामिति** । बहुवचनेनास्यैव भाष्यसम्मतत्वं ध्वनयति ।

※ विषमपदविवृतिः ※

अत एव बाह्येति । नासिकाया आस्यशब्देन तत्रत्यप्रयत्नस्य च प्रयत्नशब्देनाग्रहणादेवेत्यर्थः ।

अन्ये तु—'मुखनासिकावचन'इतिसूत्रे—"मुखनासिकमावचनमस्य—मुखनासिकावचनः, किमि-दमावचनम्, ? ईषद्वचनमावचनं, किञ्चिन्मुखवचनं किञ्चिन्नासिकावचन"मिति भाष्येण—'भागस्य मुखेनोच्चारणाद्भागस्य नासिकये'तिकैयटग्रन्थेन च—ङादीनां भागतो नासिकास्थानत्वं, भागतो मुख-स्थानत्वमिति पक्षोऽवतिष्ठते । "मुखोपसहिता वा नासिका वचनमस्य सोयं मुखनासिकावचन" इति भाष्येण,—'मुखस्य नासिकायाश्च यदन्तरालं स्थानान्तरमेवानुनासिकस्येति दर्शयतीति' कैयटेन च—मुखनासिकयोरन्तरालं स्थानान्तरमेवेत्यपरः पक्षः । "मुखद्वितीया वा नासिका वचनमस्ये"तिभाष्येण—'यदा तु सर्व एव वर्णो मुखेन नासिकया चोच्चार्यते' इति कैयटेन च सर्वभागावच्छेदेन मुखेन नासिकया चोत्पत्तिरिति **तृतीयः पक्षः** । त्रिष्वपि पक्षेषु नासिका नास्या-न्तर्गतेति स्पष्टमेव । किञ्च—"मुखग्रहणं किमर्थं ? नासिकावचनोऽनुनासिक इत्युच्यमाने यमानुस्वा-राणामेव प्रसज्येत, अथ नासिकाग्रहणं किमर्थं ? मुखवचनोनुनासिक इत्युच्यमाने कचटतपानामेव

नादेति—संवारघोषयोरुपलक्षणम्। **श्वासे**ति—विवाराघोषयोः। न ह्वावित्युपलक्षणम्—ऐचः सर्वस्य प्लुतऌकारस्य च अनुनासिकस्यादर्शनादित्यलम्।

एदैतोरित्यादौ लोकानुभवसिद्धार्थानुवादके तपरशास्त्राप्रवृत्त्या प्लुतानामपि तत्स्थानत्वं बोध्यम्। तथा च पाणिनीयशिक्षा—

❀ अभिनव-चन्द्रिका ❀

व प्रमाणत्वादित्याहुः। **ऐचः सर्वस्येति**। अनुपलम्भादिति भावः। वस्तुतस्तु रैनौशब्देन नहः समासे ताभ्यां ण्यन्ताभ्यां क्विपि रैंश्छिन्धि नौंश्छिन्धीत्यादौ नश्छवीतिरुत्वे अनुनासिके च तदुपलम्भेन

❀ चिदस्थिमाला ❀

न्यूनतां निराचष्टे—**नादेतीत्यादि**। घोषयोः—तयोरपि। एवमग्रेऽपि। **अन्विति**। 'तस्ये'त्यादिः, **अणोप्रेत्य**—त्रानुनेत्यादिवत्तत्र विध्यभावात्, एवं चोभयत्र द्वादशत्वोक्तिः सम्भावनाभिप्राया, न तु सत्ताऽभिप्रायेति बोध्यम्। 'अनुस्वारोत्तमा अनुनासिका' इति तैत्तरीयप्रातिशाख्यं, 'यमानुस्वारनासिक्यानां नासिके अनुनासिकाश्चोत्तमाः' इति कातीयप्रातिशाख्यं, वर्गोत्तमाः=ङञणनमा अनुनासिका भवन्ति, चशब्दात्स्वस्थानाद्यपरित्यागद्वारेण नासिकास्थानं द्वितीयमेषामित्यर्थः' इति तद्भाष्यञ्चात्रानुकूलम्। 'नासिके' इत्यस्य—द्वे रन्ध्रे स्थानमित्यर्थः। एतेन"—अचां यणामिव ङमामपि नासिकाव्यापाराऽसहकृतं कण्ठादिकमेव स्थानं, न तु स्थानद्वयं, पाणिनिशिक्षायामनुक्तत्वात्, 'अमोऽनुनासिका' इति बाह्यप्रयत्नप्रकरणे पाठाच्च, 'यथा तृतीया'इत्यादिभाष्योक्त्या कातीयादिवचनद्वयस्य तत्तच्छाखामात्रविषयत्वाच्चेति"—**रत्नाकरोक्त**मपास्तम्। एवं तैत्तरीयप्रातिशाख्ये—'नासिक्या नासिकास्थाना मुखनासिक्या वे'त्युक्तत्वात्तत्र मतद्वयं बोध्यं, नासिक्या यम्—यमानुस्वारास्तत्र भवाः, उद्देश्यसमर्पकमिदम्। 'मुखनासिक्या'इत्यस्य यथोपपत्तिस्तथा स्पष्टं **प्रभायाम्**। मुखस्यस्थानत्वादत्रानुक्तिः, तदाह—**अलमिति**।

लोकेति। प्लुतानामपि तत्र तत्स्थानत्वानुभवात्। अत्र मानान्तरमप्याह—**तथा चेति**।

❀ ज्योत्स्ना ❀

ऐचः सर्वस्येति। 'एच'इति त्वपपाठः। 'हसे हसने' 'टुओश्वी'त्यादावेकारौकारयोरनुनासिकत्व-

❀ सदाशिवभट्टीयम् ❀

भिन्नस्थानेति। प्रयत्नात्पृथक्स्थानस्यास्यपदेन कथनेत्यर्थः। **एतेन** भिन्नस्थानकथनस्यान्तरतम्यपरीक्षोपयोगित्वादननुभवसिद्धानुवादरूपत्वाच्च कलादिदोषज्ञानोपयोगित्वाच्चेदमसदित्य**पास्तम्**। **ऐचः सर्वस्येति**। **एच इति** त्वपपाठः, हसे इत्यादावनुनासिकत्वप्रतिज्ञानात्। **यत्तु** 'परिनिष्ठिते प्रयोगे' इति शेषं कृत्वा हसे इत्यादौ प्रक्रियायान्तत्सत्वेपि न क्षतिरित्याहुरत एवादर्शनादित्युक्तन्तत्वसत्त्वादिति,—तन्न सम्यक्, 'हसे हसने' इत्यादीनां अपरिनिष्ठितत्वस्य वक्तुमशक्यत्वेन **भुक्तेपी**ति न्यायावतारात्। ह्रस्वऌकारस्यापि गम्लादाविव सम्भवेन प्लुतेत्युत्तरग्रन्थासामञ्जस्याच्च। अत्र पाठे सर्वस्येत्युक्तिस्तु प्रयोगभेदाभिप्रायेण।

ऌकारस्य चेति। चेन दीर्घप्लुतऋकारयोः संग्रहः। स्पष्टञ्चेदं स्थानेऽन्तरतमसूत्र **उद्योते**। सेयं सिद्धस्य गतिरेतच्छ्रद्धालुभिरादर्त्तव्या, तत्त्वन्तु ग्रन्थकृद्वेद। **अनुवादेति**। एवं चात्र तत्प्रवृत्तावपि अनुभवेन स्थानैक्यमादायासमकालयोरपि सञ्ज्ञा स्यादेवेति वैफल्यादप्रवृत्तिः। अपूर्वबोधकत्वे त्वस्य सङ्कोचे तत्राप्रवृत्तिरेव

❀ विषमपदविवृतिः ❀

प्रसज्येते"ति भाष्येण नासिका नास्यान्तर्गतेति स्पष्टमेवोक्तं भवति, नासिकायास्तदन्तर्भूतत्वे नासिकास्थानानां यमानुस्वाराणामपि मुखवचनत्वेन कचटतपानामेवेत्यवधारणासङ्गतेः। 'प्रासादवासि' न्यायेन मुखग्रहणखण्डनपरभाष्येण च नासिका नास्यान्तर्गता, मुखनासिकावचनमिति सूत्रमपि नासिकायां आस्यबहिर्भावे समञ्जसम्। तथाच—सानुनासिकाकारादीनां चोभयावच्छिन्नवायुसंयो-

"कण्ठ्यावहाविचुयशास्तालव्या ओष्ठजावुपू ।
स्युर्मूर्धन्या ऋटुरषा दन्त्या लृतुलसाः स्मृताः ॥
जिह्वामूले तु कुः प्रोक्तो दन्त्योष्ठ्यो वः स्मृतो बुधैः ।
ए ऐ तु कण्ठ्यतालव्यावो औ कण्ठोष्ठजौ स्मृतौ ॥
अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा ।
जिह्वामूलञ्च दन्ताश्च नासिकोष्ठौ च तालु च ॥
हकारं पञ्चमैर्युक्तमन्तस्थाभिश्च संयुतम् ।
उरस्यं तं विजानीयात्कण्ठ्यमाहुरसंयुतम् ॥"—इति ।

यत्तु—'दन्तोष्ठादि समुदितं स्थान'मिति, तन्न । शिक्षायां 'दन्त्योष्ठ्य'-

---

❀ चिदस्थिमाला ❀

'लसा' इति पाठः । ननु उरसः स्थानत्वे उक्तेऽपि तद्विषयो नोक्तोऽत आह—**हकारमिति** । 'पूर्वोक्तैरसंयुतं तं कण्ठ्यमाहु'रिति द्वितीयवाक्यार्थः । एतेन 'अकुहे'त्यत्रापि हकारस्तदसंयुत एव विवक्षितः, अन्यथा एतद्विरोधापत्तेरिति सूचितम् । ननु मूले एकादश स्थानान्युक्तानि, तस्य चाशयः–'समुदितमति-

❀ सदाशिवभट्टीयम् ❀

फलं स्यादिति भावः । **एतेन** 'वृद्धिर्यस्या' 'अकुहे'त्यादावनुवादेपि तत्प्रवृत्त्यङ्गीकाराच्चिन्त्यमित्य**पास्तम्** ।

❀ विषमपदविवृतिः ❀

गेनैव स्वरूपोत्पत्तिः । आनुनासिक्यं तूभयेषां धर्मः, इयांस्तु विशेषः—अकारादीनामानुनासिक्यादयो न नियताः, ङकारादीनान्तु नियता इति । अनुस्वारयमानां चेति शिक्षायास्तेषां नासिकैव स्थानमित्यर्थः । गुणशब्दस्तु धर्मपर एव, तथैव लोकप्रसिद्धेः । सावर्ण्यानुपयुक्तत्वं तु न गुणशब्दार्थः, मानाभावात्, 'एकोयमात्मोदकं नाम तस्य गुणभेदादन्यत्वं भवत्यन्यदिदमुष्ण'मिति भाष्यस्वारस्येन च गुणशब्दो धर्मपर इति लभ्यते । आन्तरतम्यपरीक्षोपयुक्तश्चेति विशेषणवैयर्थ्यञ्च । नच पृथक्पृथक् द्वयप्रवृत्तिनिमित्तत्वेपि तद्विवक्षितुं शक्यम्, त्वन्मते आभ्यन्तरप्रयत्नानामपि गुणत्वापत्तेः, स्थानार्थगुणप्रमाणकृतमित्यभियुक्तोक्तौ प्रमाणस्य पृथक्करणं ब्राह्मणवसिष्ठन्यायेन । यद्वा पाणिनीयशिक्षायां यस्य यस्य वर्णस्य यद्यत्स्थानमुक्तं तत्तदेवास्यशब्देन गृह्यते, पञ्चमानां च नासिकास्थानानुक्त्या न तस्यास्यशब्देन ग्रहणम् । 'अनुस्वारयमानाञ्चे'ति—चशब्दोऽवधारणे, स च भिन्नक्रमः, नासिकैव स्थानमित्यर्थः । तथा च यस्य वर्णस्य पाणिनीयशिक्षायामुक्तं स्थानं वर्णान्तरस्यापि तत्रोक्तं तद्द्वयं परस्परं सवर्णसञ्ज्ञं भवतीति तुल्यास्यसूत्रार्थः । वलयोस्तु न सावर्ण्यम् । शिक्षोक्तकण्ठादिस्थानपर्याप्तस्थानताया एव सवर्णसञ्ज्ञोपयोगित्वात् । नचैवं कङयोः सावर्ण्यानापत्तिः, शिक्षान्तरे ङकारस्य नासिकास्थानत्वोक्त्या कण्ठपर्याप्तस्थानत्वाभावादिति वाच्यम्, पाणिनीयशिक्षोक्ततत्तत्स्थानकत्वे सति तदुक्ततदितरस्थानराहित्यस्यैव तत्पर्याप्तस्थानकत्वशब्दार्थत्वेन विवक्षितत्वात् । शिक्षान्तरोक्तस्य च प्रायेणैतच्छास्त्रीयकार्यनिर्वाहानुपयुक्तत्वात् । अत एवाइउण्सूत्रे'ऽकारस्य विवृतोपदेशः कर्तव्य'इति वार्तिकभाष्ये सङ्गच्छेते, अन्यथा शिक्षान्तरे अकारस्य विवृततरोक्त्या तदसङ्गतिः स्पष्टैव । यावत्साम्यं तु न तुल्यशब्दार्थः, 'तेजसा सूर्यतुल्यो ब्राह्मण' इत्यादौ यत्किञ्चित्साम्येपि तुल्यशब्दप्रयोगदर्शनात् । 'लण्वे'तिसूत्रे 'उदोष्ठ्ये'तिसूत्रे च पर्याप्तिर्न विवक्षितेति अदुहहि वुवूर्षतीत्यादौ न दोष इत्याहुः ।

समुदितमिति । तदेव स्थानत्वपर्याप्त्यधिकरणमित्यर्थः, तथा च न वलयोः सावर्ण्यमित्यर्थः ।

'कण्ठ्यतालव्या'वित्यादौ तत्र भव इत्यधिकारविहितयतः प्रत्येकमनुत्पत्त्यापत्तेः । 'दन्तोष्ठ्य'-मित्यादि त्वसङ्गतमेव, स्वाङ्गसमुदायस्य स्वाङ्गत्वाभाववच्छरीरावयवसमुदायस्य शरीराव-यवत्वाभावात् । एतेन–'दन्तोष्ठरूपमतिरिक्तं स्थान'मित्यपास्तम् । 'अष्टौ स्थानानी'ति-प्रतिज्ञाविरोधाच्चेति दिक् ।

सूत्रे प्रशब्देन विलक्षणार्थबोधेऽपि लोके यत्नप्रयत्नयोः पर्यायतेति ध्वनयन्नाह—**प्रयत्नो द्विधेति** । क्वचिद्यत्न इत्येव पाठः । **चतुर्धेति** । **यत्तु**—

'स्वराणामूष्मणाञ्चैव विवृतं करणं स्मृतम् ।
तेभ्योऽपि विवृतावेङौ ताभ्यामैचौ तथैव च ॥'

—इति शिक्षावाक्याद्विवृततरविवृततमयोः प्रतीत्या, नाज्झलाविति सूत्रभाष्यादूष्मणा-मीषद्विवृतत्वस्य च प्रतीत्या चतुर्धेत्यसङ्गतमिति, तन्न । नाज्झलावितिसूत्रेण विवृतत्व-

---

❀ **अभिनव-चन्द्रिका** ❀

चिन्त्यमेतत् । **स्वाङ्गसमुदायस्येति** । स्वाङ्गसमुदायवाचकस्येत्यर्थः । **स्वाङ्गत्वाभावादिति** । स्वाङ्गवाचकत्वपर्यायस्याभाववदित्यर्थः । **शरीरावयवसमुदायस्येति** । तद्वाचकस्येत्यर्थः । **शरी-**

❀ **चिदस्थिमाला** ❀

रिक्तं स्थानमिति, एवञ्च शिक्षायां कथमष्टावित्युक्तिरत आह—**यत्त्विति** । **विहितेति** । 'शरीरावे'त्यनेन । इदानीं तत्राभवत्वादिति भावः । अर्वाचीनप्रयोगमुक्तार्थसाधकत्वेन प्राचोक्तं खण्डयति—**दन्तो-ष्ठ्यमिति** । तत्प्रयोगसाधनाय कौस्तुभाद्युक्तं खण्डयति—**एतेनेति** । दन्त्योष्ठ्यमित्यादितत्रत्यप्रयोगा-साधनेनेत्यर्थः । एवञ्च शिक्षाया उपपत्तावपि मूलमयुक्तमेव, ततो न्यूनाधिक्यसत्त्वादिति बोध्यम्, तदाह—**दिगिति** । ननु प्रयत्नपदस्याभ्यन्तरपरत्वस्य प्रागुक्तत्वेन तस्य वक्ष्यमाणभेदासम्भवेन मूलमयुक्त-मत आह—**सूत्र इति** । प्रयत्नयोः=तच्छब्दयोः । **प्रतीत्या चेति**—सचः पाठः । **सूत्रेणेति** । अन्यथा तदानर्थक्यं स्पष्टमेव, एवञ्च सूत्रमतेनेदम् । नचैवं संवृतोक्तिरधिका,'अअ'इति शास्त्रविधेयत्वेन

❀ **ज्योत्स्ना** ❀

प्रतिज्ञानात् । **अतिरिक्तं स्थानमिति** । नैतदन्तरालस्यातिरिक्तस्थानत्वे दूषणमपि तु दन्तौष्ठसमुदा-यस्य विशिष्टस्य शुद्धातिरिक्तत्वे । पूर्वन्तु विशिष्टस्य शुद्धानतिरिक्तत्वमुक्तमिति ततोऽस्य भेदः ।

❀ **सदाशिवभट्टीयम्** ❀

'तेभ्योपि विवृतावेङा'वित्यादिवाक्यान्तरेण एचां विवृततरत्वाद्युक्तेरन्याचामीषद्विवृतत्वसमानाधिकरणेष-

❀ **विषमपदविवृतिः** ❀

प्रत्येकमिति । अत एव 'आग्नेयं चतुर्धा करोती'त्यस्याग्नीषोमीयेऽप्रवृत्त्यो'र्भौ वा ऽविशेषा'दिति कात्यायनसूत्रस्याप्रामाण्यं जैमिनिनोक्तं, वस्तुतो देवतार्थकतद्धितस्यैन्द्राग्न्यादौ चतुर्धाकरणादिवारणाय तथा स्वभावाङ्गीकारेपि इतरतद्धिते तथाऽनङ्गीकारात् । अत एव देवदत्तस्य तद्भार्यायाश्चापत्ये दैव-दत्तिरित्याद्यप्रयोगः, प्रतिज्ञाविरोधाच्चेत्युक्तरीत्याऽदुद्दहि वुवूर्षतीत्याद्यसिद्धिरिति दूषणं द्रष्टव्यम् ।

नाज्झलाविति सूत्रेणेति । वस्तुतस्तूष्मणामीषद्विवृतत्वेपीषत्स्पृष्टत्वऌकारलकारयोः सावर्ण्ये होतृकार इत्यत्र तोर्लीति परसवर्णापत्त्या तयोस्तदभावाय नाज्झलावितिसूत्रस्यावश्यकत्वात् । अधिकं 'नाज्झला'विति सूत्रेऽस्मत्कृतव्याख्यायां **कौस्तुभप्रभायां** बोध्यम् । **स्पर्शेत्यादेः** क्रमेण स्पृष्टेष-

व्याख्यानामेषां सवर्णसञ्ज्ञानुपयुक्तत्वबोधनमित्याशयात् । भाष्यमते तु सन्तु सप्त प्रयत्नाः । एवञ्चैदैतोश्च न सावर्ण्यप्रसक्तिः, प्रयत्नभेदादिति बोद्धव्यम् । नाज्झलाविति सूत्रमपि प्रयत्नभेदप्राप्तसावर्ण्याभावानुवादकं सत्तस्यैव बोधकम् । अत एव भाष्ये तन्न वक्तव्यमिति नोक्तम् । स्पृष्टादीनामाभ्यन्तरत्वन्त्वोष्ठप्रभृतिकाकलकपर्यन्तरूपास्यान्तर्गत-तत्तत्स्थानेषु जिह्वाग्रादीनां स्पर्शेषत्स्पर्शदूरावस्थानसमीपावस्थानरूपाभ्यन्तरकार्यकारित्वाद्व-र्णोत्पत्त्यव्यवहितप्राग्भावित्वाच्च बोद्धव्यम् । तत्र बहूनामेकस्थानत्वेऽपि कस्य चिदुच्चारणे सम्यक्स्पर्शः कस्य चिदीषदिति शिक्षाकारोक्तिमनुभवञ्चानुसृत्य विवेक्तव्यम् । 'प्रयतन' मिति नपुंसके भावे ल्युट् । 'प्रयत्न'मित्यपपाठः, नङन्तस्य पुंस्त्वात् । तथा च शिक्षा— 'स्वराणामूष्मणाञ्चे'त्याद्यनन्तरम्—

"अचोऽस्पृष्टा यणस्त्वीषन्नेमस्पृष्टाः शलः स्मृताः ।
शेषाः स्पृष्टा हलः प्रोक्ताः—"इति ॥

अचोऽस्पृष्टाः—स्पर्शाभावरूपविवृतत्ववन्तः । 'यणस्त्वीष'दित्यनेन—तेषामीषत्स्पृष्टत्व-

---

❀ अभिनव-चन्द्रिका ❀

रावयवत्वाभावादिति । तद्वाचकत्वपर्याप्त्यभावादित्यर्थः । **अपपाठ इति** । चिन्त्यमिदं,

❀ चिदस्थिमाला ❀

तदुक्तेः । तदेतत्, आशयपदसूचितामरुचिञ्च ध्वनयन्नाह–**भाष्येति** । एवञ्च=सप्तप्रयत्नाङ्गीकारे च । एवञ्च तदर्थं ज्ञापकानुसरणं व्यर्थमिति भावः । अत्र पक्षे 'नाज्झला'विति सूत्रं प्रत्याख्यातमिति भ्रमं निराचष्टे– **नाज्झलावितीति** । तस्यैव=प्रयत्नभेदस्यैव ।

पर्यन्तरूपेति । पर्यन्तदेशरूपेत्यर्थः, आदिना उपाग्रादिपरिग्रहः । विकाससङ्कोचरूपकार्यकर-विवारसंवारभेदायाह—**दूरेत्यादि** । अत्र=स्पृष्टादीनाम्मध्ये । **इति**=इत्यादि । **शिक्षेति** । अनुपदमेव स्फुटीभविष्यतीयम् । अत्र सर्वत्र मानमाह—**तथा चेति** । 'पाणिनीये'तिशेषः । **स्पर्शा-भावेति** । तथा च दूरावस्थानलाभः । इत्यनेन=तुशब्दयच्छब्दमात्रघटितेन, पूर्वोत्तरसाहचर्यादिति भावः ।

❀ ज्योत्स्ना ❀

प्रयत्नमित्यपपाठ इति । 'जानीया'दिति क्रियाध्याहारस्तु साधारणभवतिक्रियाध्याहाराद्गुरु-रिति मन्यते । **ईषदित्यनेनेति** । विशेषतो विशेष्यानुक्त्या स्पृष्टा इत्यस्यानुवृत्तेरिव स्पृष्टा इत्यस्या-प्यपकर्षादुभयोरपि विशेष्यत्वादिति शेषपूणमिह बोध्यम् । किन्त्वचोऽस्पृष्टा इति–पूर्ववाक्येनाचां पुनर्विवृतत्वबोधनं किमर्थमिति चिन्त्यं, 'स्वराणामूष्मणाञ्चैव विवृतं करणं स्मृत'मित्यनेनैव तस्य बोधनात् । तस्मादयमत्रार्थः—'तेभ्योऽपि विवृतावेङौ ताभ्यामैचौ तथैव चेति'वाक्यान्तरेणैचां विवृततमत्वाभिधानात्ततोऽन्येषां स्वराणां स्पृष्टत्वमीषत्प्राप्तम्—'अचोऽस्पृष्टा'इत्यनेन निषिध्यते, 'यणस्त्वीष'दित्यादि त्वचां विवृतत्वस्येव हलां स्पृष्टत्वस्य नियमप्रदर्शकम्, 'ईष'दित्यत्र स्पृष्टा इत्यस्यापकर्षादितिबोध्यम् ।

❀ सदाशिवभट्टीयम् ❀

त्स्पृष्टत्वधर्मस्य प्रसक्तस्य निषेधमुखेन पूर्ववाक्यविहितविवृतत्वबोधे एव तात्पर्य्यादाह—**रूपविवृतत्वेति** । अपूर्वबोधने हि स्वराणां विवृतमित्यनेन पौनरुक्त्यं स्यादित्याहुः । **यणस्त्वेति**—वाक्ये स्पृष्टा इत्यस्य

मीषद्विवृतत्वञ्च बोधितम् । नेम इत्यर्थे । तेन शलामीषद्विवृतत्वं यणपेक्षयाऽधिकविवृतत्वञ्चेति बोद्ध्यम् । अत्र शिक्षोक्तव्याप्यधर्मवतां व्यापकधर्ममादाय न सावर्ण्यमिति यणां चवर्गादिभिर्न सावर्ण्यम् । तेनाञ्चित इत्यादौ न यादिः परसवर्णः ।

विवृतमेवेति । प्रक्रियादशायां विवृतत्वम्प्रतिज्ञेयमित्यर्थः । तेन दण्डाढकादौ दीर्घसिद्धिः । अन्यथा संवृतस्य ह्रस्वाकारस्य विवृतेन दीर्घेण सावर्ण्याभावात्स न स्यादिति भावः । दीर्घाकारस्य विवृततरत्वन्तु पाणिनिशिक्षायामुक्तत्वान्नैतच्छास्त्रप्रक्रियोपयोगीति दिक् ।

तस्य प्रयोगे संवृतत्वे मानमाह—**अ अ** । प्रयत्नभेदादीर्घाभावः । अत्रोद्देश्ये सव-

---

❀ अभिनव-चन्द्रिका ❀

जानीयादित्यध्याहारेण न तस्य पुंस्त्वेपि क्षतिरिति विरहात् ।

❀ चिदस्थिमाला ❀

शलामीषत्स्पृष्टत्वस्यार्धस्पृष्टत्वस्य चाभावादसङ्गतिं परिहरति—**नेमेति** । **ईषदिति** । अजपेक्षयेति भावः, अत एवाह—**यणपेक्षेति** । **अत्रेति** । तेषां भेदेन कथने सतीत्यर्थः । एवाञ्चाऽसावर्ण्येऽस्य हेतुत्वं फलति ।

ननु तस्य संवृतत्वस्य—प्रयोगाच्छिक्षान्तरात्, 'अ अ'इति सूत्रान्तराच्च लाभेऽपि विवृतत्वस्यैवाऽसिद्ध्या कथमवधारणगर्भोक्तिरत आह—**प्रक्रियेति** । सर्वत्रेति भावः । स्पष्टञ्चेदमइउणितिसूत्रभाष्ये । अन्यथा=सर्वत्र तत्प्रतिज्ञाया अभावे । दीर्घेण=आकारेण । ननु 'विवृतकरणाः स्वरास्तेभ्य ए ओ, ताभ्यामप्यै औ, ताभ्यामप्याकारः, संवृतोऽकारः'इत्यन्यशिक्षोक्तेराकारस्य विवृततरत्वलाभेन तस्य विवृतत्वप्रतिज्ञायामपि सावर्ण्याऽसिद्धिस्तदवस्थैवेत्यकारस्य विवृततरत्वं प्रतिज्ञेयमत आह—**दीर्घेति** । अत एव अइउण्सूत्रस्थभाष्यवार्त्तिकादिसङ्गतिः, अन्यथाऽतिप्रसङ्गापत्तिश्च, तदाह—**दिगिति** । तस्य=ह्रस्वाकारस्य । सूत्रे'सुपा'मिति सुपो लुक् । **प्रयत्नेति** । आद्यस्य विवृतत्वात्, द्वितीयस्य संवृतत्वात् । सूत्र-

❀ सदाशिवभट्टीयम् ❀

सम्बन्धात्तेषामीषद्विवृतत्वं शाब्दस्पर्शाऽपेक्षयेषत्स्पृष्टत्वमार्थसमाजग्रस्तं,तत्सर्वमाह—**इत्यनेनेत्यादिना** । **शलामीषदिति** । ईषत्वमजपेक्षया । **अत्रेति** । तेषां भेदेन कथने सतीत्यर्थः । एवञ्च सावर्ण्येऽस्य हेतुत्वं फलितम् । **अ अ** । **प्रयत्नेति** । प्रयत्नभेदादक्षरसमाम्नायस्थाकारेणाग्रहादच्त्वाभावान्न दीर्घोऽत एव गुणोपि नेति भावः । समासस्तु दीर्घश्चाऽच्च तयोरभाव इति । प्रयत्नभेदस्याद्दीर्घयोरभाव इति भावः । प्रयोज्यत्वं षष्ठ्यर्थः । सिद्धान्तभूतजातिनिर्देशे संवृतावर्णस्याच्त्वे संहिताऽविवक्षया गुणो नेति । दीर्घस्तु अङ्गद्वयविरहान्न । एकसूत्रे संहितानियमे तूद्देश्ये लुगिव सुपां सुलुगिति ङसः सुरेव, तस्य रुत्वयत्वलोपाः, तदसिद्धत्वान्न गुणादि । उत्वन्तु न,अतीति विवृतनिर्देशादिति बोध्यम् ।

❀ विषमपदविवृतिः ❀

त्स्पृष्टविवृतसंवृतव्याख्यानरूपत्वम् । **ईषद्विवृतत्वञ्चेति** । ईषत्स्पृष्टत्वमित्यर्थः । **यणामिति** । यणामीषत्स्पृष्टत्वे स्पृष्टत्वस्यापि व्यापकधर्मस्य सत्त्वेन यकारस्य चवर्गेण रेफस्य टवर्गेण सावर्ण्यापत्तिः, तथाच स्थानांश इव प्रयत्नांशेपि यावत्साम्यमेव विवक्षितमिति भावः । **अञ्चित इति** । ननु यकारगतानुनासिक्यस्य नासिकास्थानत्वेपि यकारस्य तत्स्थानलाभावान्न तस्यानुस्वारेण स्थानत आन्तर्यम्, किन्तु ञकारस्यैवेति स एव प्रवर्तते, अत एव 'चुञ्चे इत्यत्र ञकारः परसवर्णो ने'ति विवरणे उक्तमित्यरुचेराह—**आदाविति** । तेन 'यरोनुनासिक' इत्यत्र सवर्णग्रहणाकर्षेपि चतुर्मुख इत्यादौ णकारापत्तिर्न । **प्रयत्नभेदादिति** । ननु अनेनैव विवृतस्य संवृतादेशे तस्यासिद्धत्वेनोत्तरोप्यकारो विवृतदीर्घो दुर्वार इति चेन्न, अअ इति पृथङ्निर्देशेनोत्तराकारस्य मूलत एव संवृतत्वकल्पनात् ।

र्णग्रहणं, जातिर्निर्देशो वा न, व्याख्यानात् । अधिकारत्वे फलमाह—**त्रिपाद्यामपीति ।** **अन्यथा** 'गोधुङ्ध्मा'नित्यत्र घत्वजश्त्वानुनासिकेषु—भष्भावानापत्तिरिति भावः ।

❀ अभिनव-चन्द्रिका ❀

व्याख्यानादिति । 'सुपि चे'त्यादिसूत्रादिभिर्दीर्घविधानरूपव्याख्यानादित्यर्थः, अन्यथा रामाभ्यामित्यादौ अनेन संवृतादेशे तद्वैयर्थ्यं स्पष्टमेवेति दिक् । **घत्वजश्त्वानुनासिकेष्विति ।** प्राप्तेष्विति शेषः । तथा च घत्वे—नित्यत्वाज्जश्त्वं बाधित्वा अनुनासिके—भष्भावो न स्यादिति भावः । यत्तु—'घत्वे पूर्वोपस्थितनिमित्तकत्वेनान्तरङ्गत्वाज्जश्त्वे नित्यत्वादनुनासिके भष्भावो न स्या'दिति मूलं लापयन्ति, तन्न, चक्रकापत्तेः, तथाहि—,गोदुद्घ् मदिति दशायां घत्वे जाते–अपवादत्वाज्जश्त्वं बाधित्वा भष्भावः प्राप्तः, तं बाधित्वा नित्यत्वादनुनासिकः प्राप्तः, तं बाधित्वा पूर्वोपस्थितनिमित्तकत्वेनान्तरङ्गत्वाज्जश्त्वं प्राप्तं, तद्बाधित्वा अपवादत्वाद्भष्भावः,

❀ चिदस्थिमाला ❀

मतेनाह—**सवर्णेति** । भाष्यमतेनाह—**जातीति** । व्यापकजातीत्यर्थः । तथाचाकारादीनामप्ययमादेशः स्यादिति भावः । **व्याख्यानादिति** । यथोद्देशपक्षेऽस्याऽसिद्धत्वेन तदप्रवृत्तेः, कार्यकाले तु तपरनिर्देशादेकशेषनिर्देशाद्वा सिद्धेरित्यर्थः ।

अतिदेशविधित्वे फलस्य मनोरथादिसिद्धेः स्पष्टत्वादाह—**अधीति ।** अन्यथा=तत्त्वानङ्गीकारे, तत्त्वमात्राङ्गीकारे । यत्त्वेवं सति प्रशाननड्वानित्यादौ'मोनो धातो'रित्यस्य, 'संयोगान्तस्य लोप' इत्यस्य च सिद्धत्वेन नलोपापत्तिः, नत्व-नुम्विध्योः सम्बुद्धौ चारितार्थ्या'दिति **दण्डी,** तन्न, 'नह्येकमुदाहरण'मितिन्यायेन सामान्यशास्त्रवैयर्थ्यापत्त्या तत्रेष्टसिद्धेरत आह—**गोधुङ्ध्मानित्यत्रेति ।** इत्यादावित्यर्थः । आदिना 'गुडलिण्मा'नित्यादिसंग्रहः । सिद्धान्ते—'जश्त्वासिद्धत्वाद्घत्वे, जश्त्वानुनासिकयोरसिद्धत्वाद्भष्भावेऽनुनासिकस्याऽसिद्धत्वाज्जश्त्वेऽनुनासिक'—इतिप्रक्रिया । हस्य झयनन्तर्भूतत्वाद्घादेरसिद्धत्वाच्च वत्वस्याऽप्राप्तिरेव, तद्रीत्यैवाह—**घत्वेत्यादि** । अयम्भावः—तादृशविधिपक्षे त्रिपाद्यामप्रवृत्तौ गोदुह्मदित्यादौ घत्वजश्त्वयोरेव प्राप्तावपि घत्वस्य पदान्ते सर्वथा निरवकाशत्वेन जश्त्वबाधकत्वेनादौ घः, ततः परत्वेन भष्भावादन्तरङ्गत्वेनानुनासिकाच्चादौ जश्त्वं, सर्वथाऽनवकाशत्वादेव स्वस्य पूर्वं प्रवृत्तिरिति बाधस्थले बाधके कृते, सति हेतावुत्सर्गप्रवृत्तेरङ्गीकारात्, ततः शिष्टेऽनुनासिके कृतेऽझषन्तत्वेन भष्भावो न स्यादिति ।

ननु सिद्धान्ते प्रोक्तप्रक्रियायामपि नात्र पक्षे सा वक्तुं शक्या, वैषम्यात्, तथाहि—प्रागुक्तरीत्या जश्त्वात्प्राग्घत्वेऽपि—तदुत्तरमनुनासिकतोऽन्तरङ्गजश्त्वतो—'येननाप्राप्ति'न्यायेन–, सर्वथा निरवकाशत्वेन च बाधकत्वेन वत्व-भष्भावयोरेव प्राप्तिः । नचाऽन्त्यस्य तत्त्वेऽपि वत्वस्य 'तसा'विति भविषये, तडित्वानित्यादौ तदविषये चारितार्थ्येन कथं तत्त्वमिति वाच्यं, तावन्मात्रफलकत्वे'त'इत्येव सिद्धे सामान्यसूत्रस्य 'नह्येक'मितिन्यायेनाचारितार्थ्यात् । 'तसा'वित्यत्र'द'प्रश्लेषे तु अत्रापि तथा बोध्यम् । एवञ्च तयोर्मध्येऽविरोधेन

❀ ज्योत्स्ना ❀

व्याख्यानादिति । तेन दीर्घाकारस्य न संवृतोऽकार इति भावः । **घत्वजश्त्वानुनासिकेष्विति** । जश्त्वं त्वनुनासिकेन परत्वान्न बाध्यते, 'प्रत्यये भाषाया'—मित्यनेन

❀ सदाशिवभट्टीयम् ❀

पूर्वत्र । घत्वेत्यादि । अयम्भावः–गोदुह्–मदितिस्थिते पदान्ते घत्वस्य जश्त्वापवादत्वात्ततः प्राग्घत्वम् । औपदेशिकझषन्ते भुदादौ युगपत्प्रवृत्त्यान्तरङ्गजश्त्वमपवाद्य चारितार्थ्यात्—भष्त्वात्पूर्वमिण्ङिशीना-

❀ विषमपदविवृतिः ❀

घत्वजश्त्वानुनासिकेष्विति । ननु घत्वे कृते जश्त्वमपवादत्वाद्बाधित्वाऽनुनासिकश्चान्त-

वस्तुतो घत्वे कृते 'झय' इति वत्वापत्तिर्दोषः। न च ततः परत्वाज्जश्त्वानुनासिकत्वयो-

❀ अभिनव-चन्द्रिका ❀

—इति । तस्मादन्तरङ्गपरिभाषाया अनित्यत्वात्त्रिपाद्यां तदप्रवृत्तेर्वा चक्रकं समाधेयमिति पूर्वोक्तरीतिरेवाश्रयणीयेति दिक् । **परे तु**–'पूर्वत्रासिद्ध'मित्यस्याधिकारत्वाभावेपि न क्षतिः, न च त्रिपाद्यां पूर्वदृष्ट्या परस्यासिद्धत्वं न स्यादिति वाच्यं, 'विप्रतिषेधे पर'मित्यत्र ययोर्बाध्यबाधकभावस्तयोरेव पौर्वापर्यं बाधप्रयोजकं, न तु विप्रतिषेधसूत्रावधिकं पौर्वापर्यं तत्र बाधप्रयोजकं, तद्वदत्रापि असिद्धत्वाश्रयावधिकमेव पूर्वत्वं गृह्यते, न त्वेतत्सूत्रावधिकमित्यदोषात् । न च सपादसप्ताध्याय्यामपि परासिद्धत्वप्रसङ्ग इति वाच्यं, सपादसप्ताध्याय्युत्तरमेतत्सूत्रप्रणयनेन, 'श्चुत्वं धुटि सिद्ध'मिति वार्तिककरणेन च त्रैपादिकशास्त्रमेवैतत्परिभाषाप्रवृत्तौ लिङ्गमिति स्वीकारेणादोषात् । अधिकारत्वे प्रतिसूत्रमावृत्तौ गौरवाच्चेति प्राहुः । **वत्वापत्तिरिति** ।

❀ चिदस्थिमाला ❀

परत्वस्य, तुल्यत्वेन नित्यत्वस्य, मिथोऽविषये मिथश्चारितार्थ्येनापवादत्वस्य चाभावेप्यल्पापेक्षत्वेनान्तरङ्गत्वादन्त्यादनुनासिकाच्च पूर्वं वत्वापत्तिः, एवञ्चोक्तरीत्या ततो भष्भाव-जश्त्वा-नुनासिकानां क्रमेण प्रवृत्त्या 'गोधुङ्वा'नित्यादि स्यादिति–स एव दोषो देयः । किञ्च सर्वथा निरवकाशत्वेन बाधोत्तरमुत्सर्गप्रवृत्तावप्यन्यत्र बाध्याप्रवृत्तिरितिसिद्धान्तादत्र वत्वेन,–जश्त्वस्य येननाप्राप्त्या, भष्भावानुनासिकयोरन्तरङ्गत्वेन,–बाधात्–भष्भावादीनामप्राप्त्या वत्वमेव स्यादिति तथैव वाच्यमिति घत्वेत्यादि चिन्त्यमिति चेद्–अत एव'इति भाव'इत्यनेनारुचिसूचकेन तं पृथक्कृत्य सिद्धान्तमुक्तरूपमाह—**वस्तुत इति** । 'घत्वे'इत्युपलक्षणं–ढत्वस्यापि । उक्ताशयानाभिज्ञः शङ्कते—**न चेति** । ततः=वत्वात् । 'यक्षानु-

❀ ज्योत्स्ना ❀

विधीयमानस्य तस्य पदान्तत्वसापेक्षाज्जश्त्वतो बहिरङ्गत्वात् । **भष्भावापत्तिरिति** । न च पदान्ते भष्भावो जश्त्वमपवादत्वाद्बाधत इति वाच्यम्, औपदेशिकझषन्ते भुदित्यादौ चरितार्थः-आनुदेशिकझषन्ते 'गोधुङ्वा'नित्यादौ 'हकारावस्थायां प्रसक्तं जश्त्वं भवत्युत हकारस्य घकारे कृते पश्चात्प्राप्तोऽप्यवादो भवती'ति सन्देहे भष्भावो भवतीत्याशयात्।'बुधमनोहरा'कारमतमुक्त्वा सिद्धान्तमाह–**वस्तुतो घत्वे कृते इति** । अत्र पक्षे घत्वोत्तरं वत्वात्प्राग्जश्त्वप्रसक्तिस्तु न प्रदर्शिता, परत्वस्येवान्तरङ्गत्वस्यापि त्रिपाद्यां स्वमते सर्वथा प्रवृत्त्यभावसिद्धान्तात् । नन्वधिकारपक्षे त्रिपाद्यां

❀ सदाशिवभट्टीयम् ❀

मिति न्यायेन धातूपसर्गयोः कार्यस्येव पूर्वोत्पन्ननिमित्तकत्वेनान्तरङ्गत्वाज्जश्त्वम्, अनुनासिकात्त्वपरनिमित्तकत्वेनान्तरङ्गत्वात् । सिद्धान्ते तु'—जश्त्वाऽनुनासिकत्वयोरसिद्धत्वात्–भष्भावेऽनुनासिकस्यासिद्धत्वाज्जश्त्वेऽनुनासिक–'इति प्रक्रिया । घादेरसिद्धत्वाद्ढत्वस्य त्वप्राप्तिरेवेति । **घत्वे कृत इति** । उक्तरीत्या । **वत्वेति** । जश्त्वस्यापरनिमित्तकत्वेनान्तरङ्गत्वेप्यनुनासिकस्य परत्वेपि–वत्वस्य 'ककुद्मान्''तडित्वा'नित्यत्र भत्वात्तदप्राप्तियोग्ये चारितार्थ्येन वेदे[२]ऽनुनासिकाभावपक्षे त्वनेनापवादत्वाभावेपि प्रतिपदोक्तत्वादनुनासिकतोऽपरनिमित्तकत्वेनान्तरङ्गत्वाच्चोभाभ्यां पूर्वं वत्वप्रवृत्तिरिति भावः । प्रत्याहारग्रहणसामर्थ्यादित्य**न्ये** । उक्ताशयमजानानस्तुल्यबलत्वं जानानः शङ्कते–**न चेति** । वत्वचारितार्थ्यन्तूक्तमेव । 'यक्षानुरूपो बलि'रिति न्यायेन समा-

❀ विषमपदविवृतिः ❀

रङ्गत्वाद्बाधित्वा भष्भावे न कश्चिद्दोष इत्यरुचेराह–**वस्तुत इति । परत्वाज्जश्त्वेति** । न च 'झय' इति वत्वं जश्त्वानुनासिकत्वयोरपवादः, तान्ते चरितार्थत्वात्, तत्र 'तसौ मत्वर्थे' इत्यनेन भत्वाज्जश्त्वाप-

१. सिद्धान्तकौमुदीटीका । २. 'प्रत्यये भाषायां नित्य'मिति लोके एव 'गोधुङ्ग्मा'नित्यत्र नित्यमनुनासिको न वेदे इति भावः ।

स्तदप्राप्तिरिति वाच्यं, 'विप्रतिषेधे पर'मित्यस्य यथोद्देशत्वेन त्रिपाद्यामप्रवृत्तेः। 'पूर्वत्रासिद्धे नास्ति विप्रतिषेधोऽभावादुत्तरस्ये'त्यनेन तस्या यथोद्देशत्वस्यैव बोधनात् । अन्यथा परस्यासिद्धत्वेऽपि विप्रतिषेधसूत्रस्य सिद्धत्वात्परिभाषान्तराणामिवास्या अपि कार्यकालपक्षे तेनाकर्षणापत्तेः । अत एव भाष्ये वत्वमेवापादितम्। अधिकारत्वादेव–'श्चुत्वं धुटि सिद्धं वाच्य'मित्यादि चरितार्थम् । एवञ्च यत्रानुवृत्तिस्तस्यासिद्धत्वं, पूर्वत्वञ्च क्व चित्सपादसप्ताध्याय्याः, क्व चित्सूत्रान्तरसहितायाः। तत्रायमर्थः–'हो ढ' इत्यादावस्योपस्थितौ वाक्यभेदेनान्वयः–'हस्य ढो भवति, इदञ्च शास्त्रं पूर्वत्रासिद्ध'मिति । अत एव 'न मु ने'

❀ चिदस्थिमाला ❀

रूप'इति न्यायेन पाक्षिकसिद्धान्तं प्रसङ्गात्प्रतिपादयन्समाधत्ते—**विप्रेति** । नन्वेवमपि कार्यकाले दोष एवात आह— **पूर्वत्रेति** । तस्याः='विप्रे'ति परिभाषायाः । एवं प्रागग्रेऽपि । एवेन—कार्यकालत्वव्यवच्छेदः । इदञ्च'सकृद्गती'तिन्यायपक्षावलम्बिनोक्तं, 'पुनः प्रसङ्गे'ति पक्षे तु प्रागुक्तमेव शरणम् ।

नन्वु कथन्तेन तत्त्वबोधनमत आह–**अन्यथेति** । तेन तदबोधन इत्यर्थः । **सिद्धत्वेपीति** । सिद्धान्तेऽपि पूर्वदृष्ट्येति भावः । **परीति** । परिभाषान्तराणामित्यर्थः । 'इवास्या अपी'ति पाठः । **तेनेति** । परेणेत्यर्थः, तथा च तदसङ्गतिः स्पष्टैव । तथा च सिद्धान्ते मनोरथे लोप एव स्यात्, न उत्वमिति भावः । इदानीं भाष्यासङ्गतिरपीति ध्वनयन्नुक्तहेतोरेव उक्ताशयकमुक्तदोषं द्रढयति—**अत एवेति** । अधिकारत्वे वार्त्तिकसम्मतिमपि ध्वनयन्फलान्तरमाह—**अधीति** । एवं सति स्वगृहे वाक्यार्थस्य न फलमित्याह–**एवञ्चेति** । अधिकारविधित्वे चेत्यर्थः । तस्य तदा पूर्वत्वस्य दुर्वचत्वादाह—**तस्यासिद्धत्वमिति** ।

एवं सति प्रथमवाक्यार्थासङ्गतिं परिहरति–**क्व चित्सपादेति** । प्रथमसूत्रेऽनुवृत्ताविदम्। सङ्ग्राहकवाक्ये कस्य चिद्ग्रहणे मानाभावेनोपस्थितत्वाविशेषात्सर्वस्यैव ग्रहणादिति भावः । द्वितीयादावाह—**क्व चित्सूत्रान्तरेति** । तत्र द्वितीयपक्षे योजयति—**तत्रायमिति** । **वस्योपस्थिताविति** । विशिष्टसूत्रस्याधिकारत्वेनेति भावः । अत एवाह—**वाक्यभेदेनेति** । **इतिरन्वयसमाप्तौ** । उक्तार्थे ज्ञापकमपि सूचयन्नाह—**अत एवेति** । वाक्यभेदेन तथान्वयाङ्गीकारादेवेत्यर्थः । आदिना—'न मुदादेश'इत्यादिवार्त्तिकसङ्ग्रहः ।

❀ ज्योत्स्ना ❀

कार्यकालत्वादुपस्थितस्यापि 'विप्रतिषेधे पर'मित्यस्य—प्रयोजनालाभः, पूर्वं प्रत्यसिद्धत्वादतस्तत्र तदप्रवृत्तावपि स्वतन्त्रविधिपक्षे तदप्रवृत्तौ मानाभावः, सफलत्वादत आह—**अत एव भाष्ये इति** । **सूत्रान्तरसहिताया इति** । यथा शत्रन्तस्य भवतेः सौ संयोगान्तलोपे दीर्घनलोपौ संयोगान्तलोपस्यासिद्धत्वान्न भवतः । **वाक्यभेदेनान्वय इति** । विधेयभेदे वाक्यभेदस्योचितत्वादिति भावः । ननु 'पूर्वकार्यं प्रत्यसिद्धत्वविशिष्टो ढो भवती'त्येवं विशिष्टविधेयभेदाभावाद्वाक्यभेदाभावात्पदैकवाक्यतयैवान्वयोऽस्त्वित्यत आह—**अत एवेति** । अयम्भावः—यद्यत्र पदैकवाक्यता स्या-

❀ सदाशिवभट्टीयम् ❀

धत्ते—**विप्रेति** । **अन्यथेति** । कार्यकाले त्रिपाद्यां विप्रतिषेधसूत्रोपस्थितौ विप्रतिषेधरूपनिमित्तनाशक'पूर्वत्रे'त्यनेन विप्रतिषेधसूत्रस्य बाधः ? उत असिद्धत्वनिरूपकपूर्वस्यासिद्धिसम्पादनद्वारा विप्रतिषेधसूत्रस्य तत्प्रतिबन्धकत्वमित्यत्र विनिगमनाविरहापत्तिरिति भावः । **एतेना**धिकारत्वे यथोद्देशत्वे विधित्वे सपादित्रिपाद्योर्विप्रतिषेधाभावाऽनुवादनेन वार्त्तिकसामञ्जस्येनेदमसङ्गतमित्य**पास्तम्** । अत एव=तस्या यथोद्देशत्वादेव । **वत्वमेवेति** । वत्वभष्भावानापत्त्युभयापादने त्वरुचितयाऽपि नेयं स्यादिति भावः । **दितमिति** । अन्यथा पक्षद्वयसाधारणत्वेन तदनापत्तिरेवापादिता स्यात् । **यत्रानुवृत्तिरिति** । एवञ्चाधिकारत्वे त्रिपाद्यामपीत्यादिफलितमिति भावः । स्वदेशे वाक्यार्थबोधे फलाभावेपि पदार्थोपस्थितौ प्रतिबन्धकाभावेन तत्सत्वादाह—**सपादेति** ।

❀ विषमपदविवृतिः ❀

प्राप्तेः । इदमुपलक्षणमधिकारत्वाभावे गोमानित्यादौ नलोपाद्यापत्तेः । **अत एव नमुने इति** । अत

इत्यादिभिस्तन्निषेध उपपद्यते । 'पूर्वत्रे'ति सङ्ग्राहकमेव । शृङ्गग्राहिकयैव तु तत्तच्छास्त्रं प्रति तस्यासिद्धत्वं प्रतिपाद्यते । तेनापवादस्य यं प्रत्यपवादत्वं तत्रासिद्धत्वाभावेऽप्यन्यत्रा-

❀ अभिनव-चन्द्रिका ❀

प्रतिपदोक्तत्वादिति भावः । **शृङ्गग्राहिकयैवेति** । तत्तच्छास्त्रमनूद्य तद्दृष्ट्याऽसिद्धत्वं बोध्यते इत्यर्थः । वस्तुतस्तु पूर्वत्वेन रूपेण सामान्यलक्षणप्रत्यासत्त्या पूर्वदृष्ट्याऽसिद्धत्वबोधनेनोपपत्तौ चिन्त्यमिदम् । न च 'न मुन' इति निषेधासङ्गतिरिति वाच्यम्, 'अदसोसे'रित्येकवाक्यतापन्नपूर्वत्रा-सिद्धमित्यत्रत्यपूर्वपदार्थे 'आङो ना स्त्रियाम्' 'टाङसि' 'अकस्सवर्णे' एतद्भिन्नत्वेन 'न मुन' इति निषेधेन सङ्कोचेनादोषात् । एवं 'नलोपस्सुप्स्वरे'त्यनेनापि सुप्स्वरादिविधिभिन्नशास्त्रभिन्नत्वेन 'नलोपः प्रातिपदिके' तिसूत्रैकवाक्यतापन्नपूर्वत्रासिद्धमित्रत्यपूर्वपदार्थे सङ्कोच इति न दोषः । एवं 'श्चुत्वं धुटी'तिवार्तिकेन श्चुत्वविधायकैकवाक्यतापन्नपूर्वत्रेत्येतद्घटकपूर्वपदार्थे 'डस्सि धु'डित्येत—

❀ चिदस्थिमाला ❀

तन्निषेध इति । शास्त्रासिद्धत्वनिषेध इत्यर्थः । अन्यथा मुत्वविध्यनन्तरमेव 'न ने'इत्येव ब्रूयात्, एतेन तत्रैतदुपस्थितौ पदैकवाक्यतयाऽन्वयेन पूर्वकार्यं प्रत्यसिद्धत्वविशिष्टो ढो भवतीति वाक्यार्थः, विशिष्टविधौ विशेषणविधेरार्थिकत्वान्नमुने इत्यादिभिरसिद्धत्वनिषेधोपपत्तिः, तर्हि स्वविषये तत्तच्छास्त्राणां विशेष्यविधित्व-मात्रं बोध्यते इत्यपास्तम्, उक्तहेतोः, शाब्दनिषेधे—नशाब्दस्यैव निषेध्यत्वौचित्यात्, कार्यासिद्धत्वे तथा सुवचत्वेऽपि सिद्धान्ते तथा दुर्वचत्वाच्च । नन्वेवमपि नेष्टसिद्धिः, सर्वसपादसप्ताध्याय्या एकत्राप्राप्तेः, एवञ्चापवादस्य सर्वत्रासिद्धत्वे उत्सर्गं प्रत्यप्यसिद्धत्वापत्तिः, तदभावेऽन्यत्राप्यसिद्धत्वानापत्तिरत आह— **पूर्वत्रेतीत्यादि । तस्येति** । यत्रानुवृत्तिस्तस्येत्यर्थः, यत्तु—**खण्डनकृदादिः**"—असिद्धं=प्रागेव न जात-मित्यर्थः, एवञ्च कार्यासिद्धत्वेऽपि 'मनोरथ'इत्यादावुत्त्वे कार्ये रलोपस्य प्रागेवाऽप्रवृत्तौ रोरुत्वस्याप्रती-घातात्तत्सिद्धिरप्रत्यूहैव, किञ्च सत्यपि शास्त्रे, जातेऽपि च कार्ये, शास्त्रप्रामाण्यात्कार्यमात्रेऽभावारोपेण रोरुत्वेन तथे"ति, तदसत्, सूत्रपाठे कार्यापाठात्, पूर्वशास्त्रविहितत्वादिरूपपूर्वत्वाद्याश्रयणे लक्षणापत्तेश्च,

❀ ज्योत्स्ना ❀

तुल्यन्यायान्न मुन इत्यनेनापि तथैव स्यादिति–स्याद'दसः से'रित्यत्रासिद्धत्वविशिष्टमुत्वं ने कर्तव्ये न स्यादिति—, न स्यात्—'अमुने'ति । न चैव'मदसोसे'रित्यस्यानन्तरं 'न ने' इत्येव क्रियेतेति 'न मुन' इत्यतेद्विशेषणीभूतस्यासिद्धत्वस्य निषेधकं भविष्यति, न विशिष्टस्य मुत्वस्यापि, सामर्थ्या-दिति वाच्यं, वाक्यभेदेनान्वये सामर्थ्यकल्पनागौरवाभावात् । फलमुखे गौरवं न दोषायेति चेत्, कार्यासिद्धत्वपक्षे विशिष्टविधेः सम्भवेऽपि शास्त्रासिद्धत्वे तदसम्भवात्, शास्त्रासिद्धत्वमपेक्ष्य कार्यासिद्धत्वस्य गुरुभूतत्वात् । सन्निवेशविशेषवाचिना पूर्वत्रेत्यनेन आञ्जस्यतः शास्त्रबोधनाच्छास्त्र-विहितत्वेन कार्यबोधने लक्षणापत्तेर्वक्ष्यमाणन्यायेन मुत्वप्रवृत्त्यनन्तरं तत्कार्यस्यासिद्धत्वेऽपि पररूपाप्रवृत्तौ घिसञ्ज्ञाया अभावेन नाभावाप्रसक्त्या सूत्रवैयर्थ्यापत्तेः । उक्तसामर्थ्येन शास्त्रासि-द्धत्वस्यैव कल्प्यत्वाच्चेति दिक् । **सङ्ग्राहकमेवेति** । उपस्थिततद्विशेषाणां सङ्ग्राहकमित्यर्थः ।

❀ सदाशिवभट्टीयम् ❀

आदिभिरिति । आदिपदबहुवचनोपपत्तिस्तु 'न मुटादेश'इत्यस्य 'नलोपे'तिनियमरूपस्य च निषेधस्य सत्वान्निर्वा[illegible]

❀ विषमपदविवृतिः ❀

एव=वाक्यभेदेनान्वयादेव । तन्निषेधः=असिद्धत्वनिषेधः । पदैकवाक्यतयाऽन्वये तु 'अदसोसे'रित्या-दिनाऽसिद्धत्वविशिष्टस्य मुत्वस्य विधानेन 'न मुने' इत्यनेनापि तथाविधस्य मुत्वस्यैव निषेद्धव्यत्वे-

१ प्रातिस्विकरूपेणैतत्प्रत्येतदसिद्धमित्यर्थः । पूर्वत्वेन पूर्वमात्रमनुगमय्येति वार्थः ।

सिद्धत्वं भवत्येव । **असिद्धमिति** । सिद्धं=निष्पन्नं, प्रवृत्तम् । 'सिद्धश्च[1] प्रत्ययविधा'वित्यादौ तथा दर्शनात् । तद्भिन्नम्—असिद्धमनिष्पन्नमप्रवृत्तम् । यद्यपि लोकेऽनाहार्यज्ञानस्यैव प्रवर्त्तकत्वं निवर्त्तकत्वञ्च दृष्टं—, तथापीह शास्त्रप्रामाण्यादाहार्यारोपोऽपि शास्त्रप्रवृत्तावप्रवृत्तौ च नियामक इति बोद्धव्यम् । अत्र कार्यासिद्धत्वेऽमू इत्याद्यसिद्धिः । 'अद अ औ' इति स्थिते परत्वान्मुत्वे तस्य सपादसप्ताध्यायीस्थकार्यदृष्ट्याऽसिद्धत्वेऽपि 'देवदत्तहन्तृहत' न्यायेनाकाराभावेन पररूपाद्यनापत्तिः । अतिदेशस्याऽऽरोपरूपत्वान्निरधिष्ठानारोपासम्भ-

❀ अभिनव-चन्द्रिका ❀

द्भिन्नत्वेन च सङ्कोचः, एवमपवादशास्त्रैकवाक्यतापन्नपूर्वत्रेत्येतद्घटकपूर्वपदार्थे उत्सर्गशास्त्रभिन्नत्वेन सङ्कोच इति दिक् । **आहार्यज्ञानस्येति** । बाधज्ञानसमानकालिकेच्छाजन्यज्ञानस्येत्यर्थः । **पररूपाद्यनापत्तिरिति** । नच मुत्वस्यासिद्धत्वेऽपि देवदत्तहन्तृहतन्यायेन तत्स्थान्यकाराभावेऽपि अदश्शब्दाद्याकारेण त्यदाद्यत्वनिष्पन्नाकारस्य पररूपं भवत्येवेति कथं पररूपानापत्तिरिति वाच्यम् । इष्टपररूपाद्यनापत्तिरिति तस्यार्थेनादोषात् । वस्तुतस्तु मुत्वशास्त्रेण 'स्वघटितं साधु तदितत्सर्वमसाधु' इतिबोधनेन अ अ औ इत्यस्यासाधुत्वेन यत्किञ्चिद्बोधितसाधुत्ववत्त्वेव सर्वशास्त्रप्रवृत्त्या यथाश्रुतमेव साधु । मुत्वस्यासिद्धत्वेपि तदधिकरणकालस्य असिद्धत्वे प्रमाणाभावेन अर्धमात्राधिककालशून्यत्वरूपसंहिताया आद्यकारान्त्याकारयोरभावेन पररूपप्राप्त्यभावाच्च । परे तु—कार्यासिद्धत्वस्वीकारेऽपि 'पूर्वत्रासिद्ध'मित्यस्य—त्रैपादिकं शास्त्रं न प्रवृत्तं, तत्कृता स्थानिनिवृत्तिर्न जाता—इति सम्भावनायां

❀ चिदस्थिमाला ❀

दोषान्तरकथनद्वारा तदेतद्ध्वनयन्नाह—**सिद्धमित्यादिना** । यावदर्थमाह—**प्रवृत्तमिति** । एवमग्रेऽपि । 'सिद्धे शब्दार्थे'त्यत्र सिद्धशब्दस्यान्यार्थत्वादाह—**सिद्धश्चेति** । नञः समासघटकत्वेन भेदार्थकत्वादाह—**तद्भिन्नमिति । ज्ञानस्यैवेति** । निश्चयस्यैवेत्यर्थः । तथानुभवेन तथैव कार्यकारणभावोन्नयनात्, तदाह—**दृष्टमिति** । पीह=व्याकरणे । **शास्त्रेति** । पूर्वत्रासिद्धमितिशास्त्रेत्यर्थः । **आहार्येति** । बाधकालिकेच्छाजन्यनिश्चयोऽपीत्यर्थः । तथा सति कस्य चित्प्रवृत्तिः कस्य चिदप्रवृत्तिरित्याशयेनाह—**शास्त्रस्येति** । अत्र=प्रकृतसूत्रे । 'मनोरथा'सिद्धिस्तु न, तत्र दर्शनाभावरूपे लोपेऽभावारोपस्य दर्शनारोपरूपत्वात्, द्वितीयाभावस्य प्रथमाभावप्रतियोगिरूपत्वस्य प्राचां मते सत्त्वात्सूत्रसामर्थ्यादस्यैवात्राङ्गीकारात् । 'देवदत्ते'तिन्यायेऽभावप्रतियोगिकाभावस्यैव देवदत्तादिपदस्वारस्येन विषयत्वात्, तदेतद्ध्वनयन्नाह—**अमू इत्याद्यसिद्धिरिति** । आदिना'अमी'इत्यादिपरिग्रहः । तामेवाह—**अदेति । परत्वादिति** । उक्तरीत्येति भावः । यत्तु न्यायानङ्गीकारेऽयन्दोष इति **मान्याः**[2], तदसदिति भावप्रकाशे स्पष्टं, तद्ध्वनयन्नाह—**देवेति । पररूपाद्येति** । आदिना वृद्ध्यादिसङ्ग्रहः । **अतीति** । 'सिद्धेऽसिद्धत्वातिदेशा'दित्यादिः । **रोपासम्भवेनेति** । 'पूर्वत्रे'तिसूत्रोदाहरणसम्पत्त्यै उक्तरीत्या लक्ष्ये'इति शेषः । एतेन—'वस्तुतः कार्या-

❀ ज्योत्स्ना ❀

पररूपाद्यनापत्तेरिति । आदिना अकारौकारयोर्वृद्धौ मुस्थानिकवृद्धिर्मुत्वञ्च गृह्यते ।

❀ सदाशिवभट्टीयम् ❀

परत्वादिति । शब्दान्तरप्राप्त्योभयोरप्यनित्यत्वात् । अन्तर्गतयावन्निमित्तकत्वेनापरनिमित्तकत्वेनोभ-

❀ विषमपदविवृतिः ❀

नामुनेत्यत्र मुत्वानापत्तिः । असिद्धत्वस्य प्राधान्येनाविहितत्वेन तन्निषधायोगात् । **शास्त्रप्रवृत्ताविति** ।

---

१. 'सिद्धश्च प्रत्ययविधौ पुंवद्भाव' इति हि—वार्त्तिकं, फलमस्य—दरदोऽपत्यं स्त्री—दरत्, तस्या अयं दारदीय इत्यत्र पूर्वमेव पुंवद्भावे वृद्धत्वाच्छः । 'द्व्यञ्मगधे'त्यणोऽतश्चेति स्त्रियां लुक् । पुंवद्भावेऽणिनिमित्तकवृद्धौ वृद्धसञ्ज्ञा सुलभेति तत्त्वम् । २. **कौमुदी**टीकायां **नागेश**गुरवो **हरि**दीक्षिताः ।

वेन कार्यप्रवृत्तेरत्र पक्षे आवश्यकत्वात् । शास्त्रासिद्धत्वे तु—यत्राप्यन्तरङ्गत्वात्त्रैपादिकं प्रवृत्तं तत्रापि—तत्तच्छास्त्रे एवाभावारोपेण तन्निवृत्तिबुद्धेरभाव, आदेशबुद्ध्यभावो, लक्ष्ये

❀ अभिनव-चन्द्रिका ❀

'यद्भवति तद्भवति, यन्न भवति तन्न भवती'त्यर्थकरणेन 'अमू' इत्यादौ मुत्वे जातेऽपि–'मुत्वं न कृतं, तत्कृता स्थानिनिवृत्तिर्न जाते'ति सम्भावनया—पररूपे जाते सन्नियोगशिष्टन्यायेन मकारस्यापि निवृत्तौ वृद्धौ तद्घटकमात्रोद्देश्यकविकाराभावेन तल्लक्ष्यत्वाभावात्पुनर्मुत्वे अमू अमी इत्यादिसिद्धिः ।

न च 'पूर्वत्रासिद्ध'मित्यस्य तादृशार्थकत्वे प्रमाणाभाव इति वाच्यं, हर एहीत्यादौ लोपस्यासिद्धत्वेऽपि स्थानिबुद्धेरभावेन पूर्वत्रासिद्धमित्यस्य वैयर्थ्यापत्त्या एतादृशार्थकल्पनात् । न च 'अमूदृक्' 'अमूभ्याम्' 'अमीभि'रित्यादौ तद्घटकमात्रो द्देश्यकविकारसत्त्वेन तल्लक्ष्यत्वस्य सत्त्वेन पुनर्मुत्वं न स्यादिति कार्यासिद्धत्वपक्षोऽसङ्गत इति वाच्यम्, 'नमुने' इति निषेधेन मुत्वे 'लक्ष्ये लक्षण'न्यायो न प्रवर्त्तते इति कल्पनेनादोषात् । अन्यथा अद् अ औ इत्यस्यां दशायां परत्वान्मुत्वे तस्यासिद्धत्वात्पररूपे लक्ष्ये लक्षणन्यायेन मुत्वाप्राप्त्या इनादेश–गुणयोः कृतयोर्मुत्वे च नादेशप्राप्त्यभावेन तद्वैयर्थ्यं स्पष्टमेवेत्याहुः । **त्रैपादिकं प्रवृत्तमिति** । चिन्त्य-

❀ चिदस्थिमाला ❀

सिद्धत्वेऽपि न दोषः, शास्त्रयोः स्वतोऽविरोधेन तस्य कार्यद्वारकत्वात्, अन्यथाऽतिप्रसङ्गः । 'मनोरथ'-इत्यादौ विरोधप्रयोजकीभूतकार्याऽसिद्धौ शास्त्रस्य सिद्धत्वेऽपि नपुंसकतुल्यत्वात् । **एतेन**''–अमू इत्याद्यसिद्धिः प्रत्युक्ता । 'अमी'इत्यत्रै'त ई'दितिसामर्थ्यादेवेत्वोत्तरं मुत्वस्य सुवचत्वात् । वार्त्तिकविरोधस्तु न—उत्तरस्य कार्यस्याभावादितिव्याख्यानात् । न च न्यायविरोधः, एकत्र विषये स्वस्वकार्यद्वारा प्रसक्तविरोधयोः शास्त्रयोः परशास्त्रीयकार्यस्यासिद्धत्वेन स्थानिनो निवृत्त्यभावात् । भाष्ये तु न्यायमवष्टभ्य शास्त्राऽसिद्धत्वमादृतं, तदप्राप्तिमभिप्रेत्य प्राचा निष्कर्ष आदृत–''इति **रत्नाकरो**क्तिरपास्ता, उक्तहेतोः, उक्तरीत्या तदभावोपपादकहेत्वसिद्धेश्च, उक्तरीत्या लाघवेनैत **ई**दित्यस्य शास्त्रासिद्धत्वे ज्ञापकत्वस्यौचित्याच्च, न्यायस्याऽनित्यत्वन्तु मूलाभावादयुक्तमित्यन्यत्र स्पष्टमिति दिक् । ननु सिद्धान्तेऽपि क्वचित्कार्यासिद्धत्वमेवावश्यकम्, अन्यथेष्टाऽसिद्धेः, एवञ्च सर्वत्रैकरूप्याय तथैवास्त्वत आह—**शास्त्रेति** । **तुरु**क्तवैलक्षण्ये,'न दोष'इत्यत्रान्वयः । **अन्तरङ्गत्वादिति** । स्वनिमित्तस्यैवादौ सत्त्वादित्यर्थः । न त्वन्तरङ्गपरिभाषाविषयः, त्रैपादिकेऽन्तरङ्गे सर्वथा तदप्रवृत्तेर्भाष्यसम्मतत्वात् । यदि त्वन्तरङ्गत्वादिव्यवहारस्य परिभाषामूलकत्व**स्यैवाचः परेति** भाष्ये ध्वनितत्वमित्युच्यते,तर्ह्यस्तु क्रमेणान्वाख्याने 'पट्व्या'इत्यादाविव लोकन्यायसिद्धान्तरङ्गत्वस्यात्रापि विषयः । नच तद्भाष्यविरोधः, 'नाजानन्तर्य' इतिवज्जातबहिरङ्गस्य सिद्धता यत्र तद्विषयकत्वस्य तत्राभ्युपगमात् । तत्सन्दर्भपर्यालोचनया तथैव प्रतीतेः । 'असिद्धं' 'पूर्वत्रासिद्ध'मित्यनयोर्युगपत्प्राप्तौ प्रत्यक्षेणानुमानिकबाधसम्भवाच्च, प्रकृते तु न तथेति दिक् । एतेन तद्भाष्य-स्वग्रन्थ-विरुद्धमिदमित्यपास्तम् ।

❀ ज्योत्स्ना ❀

यत्राप्यन्तरङ्गत्वादिति । यथौजढदित्यादौ ढत्वादौ कृते हृतशब्दस्य द्विर्वचनम् ।

❀ सदाशिवभट्टीयम् ❀

योरप्यन्तरङ्गत्वात् । 'अत इति''अदस' इति सत्वेनोभयोरपि प्रतिपदोक्तत्वात्–परत्वेनैव व्यवस्थेति भावः । ननु शास्त्रासिद्धत्वेपि अनित्यत्वेन तन्न्यायाप्रवृत्तिरवश्यं वाच्या, अन्यथा पिपठीरित्यत्र पूर्वप्रवृत्तिकत्वेन षत्वे

शास्त्रासिद्धत्वेप्युक्तन्यायेन सकारबुद्धेरभावद्रुत्वं न स्यादिति कार्यासिद्धत्वेपि तदप्रवृत्त्या न दोष इत्यत आह—**शास्त्रेति । तन्निवृत्तीति** । स्थानिनिवृत्तिरित्यर्थः । एवञ्च सकारनिवृत्तिबुद्धेरभावेन तत्सत्त्वात्त्स्यादेवेति भावः ।

❀ विषमपदविवृतिः ❀

तेनाग्नी३इतीत्यत्र प्लुते प्रवृत्तेऽपि तस्यासिद्धत्वात्प्रगृह्यसञ्ज्ञाप्रवृत्तिः । **अन्तरङ्गत्वादिति** ।

जातत्वबुद्ध्यभावश्च । जायमानं कार्यन्त्वादेशे एव स्थानिबुद्ध्या प्रवर्त्तते । 'न हि रजत-भ्रमप्रयुक्ता प्रवृत्तिः शुक्तिं न गोचरयती'ति न दोषः । यत्र तु सहप्रसङ्गस्तत्राप्रवृत्ति-रेव,—अभावारोपात् । न च 'पूर्वत्र ने'त्येव सूत्रमस्त्विति वाच्यम्, पूर्वशास्त्रप्राप्तौ निषेध इत्यर्थे 'नलोपः सुपि'ति सूत्रासङ्गतेः, तद्धि नियमार्थम्, त्वद्रीत्या 'राजन्—अश्व' इत्यस्यां दशायाङ्कस्यापि पूर्वशास्त्रस्याप्राप्त्यैतन्निषेधाप्रवृत्तौ नलोपे जाते 'भुक्तवन्त'मिति न्यायेनैतदप्रवृत्तौ राजाश्वे दीर्घसिद्ध्या नियमानुपयोगात् । 'राजभ्या'मित्यादावपि दीर्घा-

❀ अभिनव-चन्द्रिका ❀

मिदं, तादृशप्रयोगस्याभावात् । न च पिपठिषतेः क्विपि पिपठीरित्यादावन्तरङ्गत्वात्षत्वे तस्यासिद्धत्वा-द्रुत्वे तादृशलक्ष्यसम्भव इति वाच्यम्, षत्वस्यासिद्धत्वात्क्विपि अतो लोपे सुप्प्रत्यये हल्ङ्यादि-लोपे पदान्तत्वेन षत्वस्यैवाप्राप्तेः । एतन्मूलकमेव पठ्यते 'असिद्धशास्त्रप्रतिबन्धकसापादिकशास्त्रप्रवृत्ति-सम्भावनायां पूर्वं त्रैपादिकं न प्रवर्तते' इति । **यत्र तु सह प्रसङ्ग इति** । सर्वत्र सहप्रसङ्ग एवेति 'यत्रा-प्यन्तरङ्गत्वात्त्रैपादिकं प्रवृत्त'मित्यादौ नोपयोग इत्यरुचिर्बोधितेतिदिक् । अत्रेदं चिन्त्यं-'पूर्वत्रे'त्येव सूत्रमस्तु, 'आमन्त्रित'मितिसूत्रादविद्यमानवदित्यनुवर्त्तते इति ।

❀ चिदस्थिमाला ❀

दीक्षितादिमतेनायं ग्रन्थ इति **केचित्** । **प्रवृत्तमिति** । 'पूर्वमेवे'ति शेषः । एवेन—कार्यव्यवच्छेदः । **तन्निवृत्तीत्ति** । स्थानिनिवृत्तिबुद्धेरभाव इत्यर्थः । विनिगमनाविरहात्सम्भावितमाह—**आदेशेति** ।

नन्वेवं कार्यमेव न स्यादत आह—**जायेति** । बुद्धेरन्यथात्वेऽपि तस्यैव सत्त्वात् । अत्र हेतुं लौकिक-माह—**न हीति** । 'अपि'सूचितमाह—**यत्र त्विति** । 'शास्त्रयो'रिति शेषः । **अप्रवृत्तिरेवेति** । 'परस्य आदौ'इति शेषः । मात्रादिलाघवादाह—**न चेति** । 'एव'मिति शेषः । शास्त्रासिद्धत्वस्येष्टत्वे इति तदर्थः ।

नेत्येवेति । पूर्वत्र जातस्य तत्कालप्राप्तस्य च निषेध इत्यर्थेनोभयत्रापीष्टसिद्धेरिति भावः । ननु 'पूर्वत्रे' त्यस्य-पूर्वशास्त्रप्राप्तावित्यर्थः, ? उत पूर्वशास्त्रविषयत्वसम्भावनायामित्यर्थः ?, तत्राद्ये दोषमाह—**पूर्वेति** । **निषेध इति** । 'तदन्यतरस्ये'ति शेषः । नलोपोत्तरं पूर्वशास्त्रप्राप्तिसत्त्वेऽपि जातस्य निषेधो दुर्घट इति पुनर्निषेधो नेत्याह—**भुक्तेति । नैतदिति** । निषेधेत्यर्थः । नन्वेवं तदकरणलाघवमेवेति तत्रेष्टापत्तिरेवात आह—**राजभ्यामिति** । उक्तरीत्यैवेति भावः । द्वितीये दोषमाह—**पूर्वेति** । बहुव्रीहिः, पूर्वशास्त्रविषय-केत्यर्थः, एवमग्रेऽपि । अत्र पक्षे न सूत्रासङ्गतिः, 'राजाश्व'इत्यादौ नलोपे दीर्घरूपविषयस्य सम्भावितत्वेन

❀ ज्योत्स्ना ❀

यत्र त्विति । अमीत्यादौ । **एतन्निषेधाप्रवृत्ताविति** । 'पूर्वत्र ने'त्यस्य–निषेधस्याप्रवृत्तावित्यर्थः । **एतदप्रवृत्ताविति** । 'पूर्वत्र ने'त्यस्याप्रवृत्तावित्येवेहाप्यर्थः । पूर्वत्र पूर्वशास्त्राप्राप्तिर्हेतुरुत्तरत्र

❀ सदाशिवभट्टीयम् ❀

पूर्वत्र नेति । अत्र न्यासे निषेधानां बलीयस्त्वेन 'प्रकल्प्ये'ति न्यायेन चान्तरङ्गस्य पूर्वमप्रवृत्तिरेवेति बोध्यम् । नन्वेवं तदकरणलाघवमेवेति तत्रेष्टापत्तिरेवाऽत आह—**राजभ्यामिति** ।

❀ विषमपदविवृतिः ❀

पूर्वत्रासिद्धनिमित्तकत्वादित्यर्थः । **वस्तुतोऽस्यान्तरङ्ग**शब्दार्थलाभावात्, उदाहरणाभावाच्चासङ्गत-मेतत् । सपादसप्ताध्यायीस्थकार्यसम्भावनायां त्रैपादिकस्याप्रवृत्तेः । 'अग्नी इती'त्यादावपि यथोद्देश-पक्षाश्रयणेन प्लुतात्पूर्वमेव प्रगृह्यसञ्ज्ञा शास्त्रप्रवृत्तौ नियामकमिति । पूर्वोक्तं **त्वणोप्रगृह्येति** सूत्रस्थ-

पत्तेश्च। 'पूर्वशास्त्रविषयसम्भावनाया'मित्यर्थे राजभ्यामित्यादौ नलोपे सुब्विधि-दीर्घ-विषय-सम्भावनया सर्वथा नलोपानापत्तेरिति दिक्।

बाह्यप्रयत्न इति । काकलकाधस्ताद्गलविवरविकास-सङ्कोच-श्वासोत्पत्ति-ध्वनिविशेष-रूपनाद-तद्विशेषरूप-घोषाल्पघोष-प्राणाल्पत्व-महत्त्व-रूपकार्यकरत्वमेषाम्। तथाहि—

"आत्मा बुद्ध्या समेत्यार्थान्मनो युङ्क्ते विवक्षया।
मनः कायाग्निमाहन्ति स प्रेरयति मारुतम्॥
सोदीर्णो मूर्ध्न्यभिहतो वक्त्रमापद्य मारुतः।
वर्णान् जनयते—" इति शिक्षायामुक्तम्।

❀ चिदस्थिमाला ❀

तत्र निषेधाभावार्थत्वादत आह—**राजभ्यामिति**। 'पूर्वत्र कार्ये एव निषेधो न कृते'इत्यर्थेऽपि प्रागुक्त-रीत्या 'राजभ्या'मित्याद्यसङ्गतिः, सूत्रासङ्गतिश्च। एतेन—"कार्यासिद्धत्वेऽपि नायमतिदेशः, किन्तु कार्यस्या-सिद्धत्वम्=अनिष्पन्नत्वं प्रतिपाद्यते, तत्र निष्पन्नस्य अनिष्पन्नताया ब्रह्मणापि दुष्करतया प्रागप्रवृत्तिरेव प्रति-पाद्यते इति न दोषः"—इत्यपास्तम्, उक्तयुक्तेः, तदाह—**इति दिगिति**।

ननु कथं विवारादीनां बाह्यत्वं, विवारत्वादिकञ्चात आह—**काकलकेति** । **अधस्ता**दित्यनेन तस्यास्यबहिर्भावः सूचितः । 'विकाससङ्कोचे'ति पाठः। **तद्विशेषेति**। नादविशेषेत्यर्थः। 'अघोषे'त्यत्र नञोऽल्पार्थत्वादाह—**अल्पघोषेति**। तद्रूपेत्यर्थः। **कार्येति**। तथा चोक्तरूपास्यबहिर्भूतकार्यकरत्वाद्व-र्णाभिव्यक्त्यनन्तरभावित्वाच्च बाह्यत्वं, तत्तत्कार्यकरत्वाच्च विवारत्वादिकमिति भावः। आस्यबाह्यदेश-स्थत्वेन तु न बाह्यत्वमेषां, 'नाभिप्रदेशात्प्रेरितो वायुरूर्ध्वमाक्रामन्, मूर्ध्नि प्रतिहतो=निवृत्तः सन्, तत्तत्स्थानान्याहत्य, ध्वनीनभिव्यज्य, तत्काल एव स्पृष्टतादीनुत्पाद्य, वर्णानभिव्यज्य, यत्नविशेषसहायेन गलविवरविकासादीन् करोती'तिसिद्धान्तात्। अत एव न शिक्षाविरोधस्तद्ध्वनयन्नाह—**तथाहीति**। कर्तृत्व-प्रवृत्त्यादेरनात्मधर्मत्वादाह—**आत्माऽन्तःकरणमिति**। साङ्ख्यरीत्येदं, त्रयाणामुल्लेखात्। अनु-

❀ ज्योत्स्ना ❀

'भुक्तवन्त'मितिन्यायो हेतुर्विशेषः। 'ध्वनिविशेषरूपनादतद्विशेष'ति पाठः, बृहच्छेखरे तथा दर्शनात्। 'युङ्क्ते' इत्यत्रान्तःकरणं कर्तृ, तत्परिणामो मनः—कर्म, तत्परिणाम इच्छा—करणम्।

❀ सदाशिवभट्टीयम् ❀

दिगिति। तेन 'किम्वुक्त'मित्यादावनुस्वारादौ कर्त्तव्ये वत्वादेर्निषेध इत्यस्य सङ्ग्रहः। **वाक्यभेदेति**। नन्वस्तु पदैकवाक्यता तावतापि 'नमुन' इति सूत्रेऽधिकारादसिद्धपदसम्बन्धे 'मु असिद्धं ने'त्याशयात्, मुभाव-निष्ठासिद्धत्वस्यैवानेन निषेधः, न मुभावस्येति चेन्न। पदैकवाक्यतापक्षे**ऽदसोसे**रित्यत्रोपस्थितावसिद्धपदस्य मुभा-वेनाऽन्वयेऽसिद्धत्वविशिष्टमुभावस्य विधानात्तत्रानेनासिद्धत्वनिवृत्तौ सन्नियोगशिष्टमुभावस्यापि निवृत्त्यापत्तेः। वाक्यैकवाक्यतायान्त्वसिद्धत्वं शास्त्रस्यैवेति न मुत्वस्य तत्सन्नियोगशिष्टत्वम्। नचैवं नाभावे कर्त्तव्ये सिद्ध-त्वनिवृत्त्या मुत्वस्यापि निवृत्तौ—कृते नाभावेऽसिद्धत्वनिवृत्तिबोधकस्य—निष्फलत्वापत्त्या सन्नियोगेति न्यायबाध इतिवाच्यं, गौरवात्कार्यासिद्धत्वापत्तेश्चेत्याहुः। कार्यस्य शास्त्रजज्ञानवेलायामसिद्धत्वमिति पक्षे 'न मु''नलोपः' 'श्चुत्वं धु'डित्याद्यक्षरस्वारस्येपि भाष्यागृहीतत्वान्नाश्रितस्स इति बोध्यम्। **बाह्यप्रयत्ना इतीति**। एषां बाह्यत्वं विवारत्वादिकञ्चोपपादयति—**काकलेति**। **अधस्ता**दित्यनेनास्यबाह्यत्वं सूचितम्। 'अघोषे'त्यत्र नञोऽल्पार्थकत्वादाह—**अल्पघोषेति**।

'आत्मा=अन्तःकरणं, संस्काररूपेण स्वगतानर्थान्बुद्ध्या=स्ववृत्त्या, समेत्य=एकबुद्धिविषयान्कृत्वा तद्बोधनेच्छया मनो युक्तं करोति, तदिच्छावन्मनः—कायाग्निञ्जाठरमग्निमभिहन्ति, सः—कायाग्निः, सोदीर्णः—स मारुतः उदीर्णः ऊर्ध्वं प्रेरित—इत्यादिस्तदर्थः। एवञ्च शब्दप्रयोगेच्छयोत्पन्नयत्नाभिहताग्निना नाभिप्रदेशात्प्रेरितो वायुर्वेगान्मूर्धपर्यन्तङ्गत्वा प्रतिनिवृत्तो वक्त्रं प्राप्य उक्तयत्नसहायेन तत्तत्स्थानेषु जिह्वाग्रादिस्पर्शपूर्वकं तत्तत्स्थानान्याहत्य वर्णानभिव्यनक्ति। ततो यत्नविशेषेण गलविवरविकासादीन्करोति। तत्र ये तत्तत्स्थानाभिघातका यत्नास्ते आस्यान्तर्गततत्तत्कार्यकारित्वादाभ्यन्तरा इत्युच्यन्ते। गलविवरविकासादिकराश्चास्यबहिर्भूतदेशे कार्यकरत्वाद्बाह्या इति। मात्राकालिकत्वादिरूपह्रस्वत्वादिकन्तु वाय्वल्पत्वमहत्त्वकृतमिति—नाभिप्रदेशात्प्रेरकयत्न एव कश्चिद्विलक्षणोऽल्पं वायुं प्रेर-

---

❀ चिदस्थिमाला ❀

भवस्य नष्टत्वादाह—**संस्कारेति**। तत एव तदर्थमाह—**स्ववृत्त्येति**। **समेत्ये**तीणो रूपमिति नैकीकरणमर्थ इत्याह—**एकेति**। अर्थानां वक्तुमिच्छाया असम्भवादाह—**तद्बोधेति**। 'युङ्क्ते' इत्यन्तर्भावितण्यर्थमित्याह—**युक्तं करोतीति**। 'मन' इत्यस्य मध्यमणिन्यायेनान्वय इत्याह—**तदिति**। 'सोदीर्ण' इति प्रतीकं, तत्स्पष्टार्थं सप्रतीकं प्रत्येकं व्याचष्टे—**समेति**। फलितमाह—**एवञ्चेति**। तथा तदर्थे चेत्यर्थः। एतेन—ये 'वर्णाभिव्यक्त्यनन्तरं मूर्ध्नि प्रतिहतो=निवृत्त—'इति वदन्ति, तेषां शिक्षाविरोधः स्पष्ट एवेति सूचितम्। ततः=तदभिव्यक्त्यनन्तरं। विशेषेण=तत्सहायेन। तत्र=तयोर्मध्ये। **तत्तत्कार्येति**। स्पर्शादित्वरूपेत्यर्थः। **देशे कार्येति**। काकलकाधस्ताद्गलविवरे विकासादिरूपेत्यर्थः। **इतिः**—फलितार्थसमाप्तौ। नन्वेवं ह्रस्वादीनां कुत्रान्तर्भावोऽत आह—**मात्रेति**। **कृतमिति**। तथा चोक्तकारणा-

❀ ज्योत्स्ना ❀

उत्पन्नयत्नेति। 'युङ्क्ते'इति धातुना तिङा वोच्यमानयत्नेत्यर्थः। अत एव 'युङ्क्ते'इत्यस्य व्याख्यानं—'युक्तं करोती'ति यत्नार्थककरोतिना कृतम्, एवमन्यत्र बोध्यम्।

❀ सदाशिवभट्टीयम् ❀

अर्थानां वक्तुमिच्छाया असम्भवादाह—**तद्बोधेति**। नन्वेवं ह्रस्वादिजनक एकः, स्पर्शादिजनक एकः, अग्न्यादिघातजनक एक इति एकैकस्य वर्णस्य प्रयत्नत्रयं प्रयत्नद्वयं वा जनकमिति तात्पर्यम्, तच्च संहितासूत्रभाष्यविरुद्धं, तत्र हि स्वोत्पादितवर्णनाशावधि प्रयत्नस्थितिः, ततस्तं प्रयत्नमुपसंहृत्य द्वितीयप्रयत्नोत्पत्तिरिति प्रथमवर्णनाशकाले द्वितीयवर्णोत्पादकप्रयत्नोत्पत्तिकाले च वर्णविरामसत्त्वात्प्रतिवर्णं विरामसंज्ञा प्राप्नोतीत्याशङ्कितं, तस्यचायं भावः,—नाभिरूपैकदेशावच्छेदेनानेक-प्रयत्नोत्पत्तिर्युगपद्बाधितेति,एवञ्चैकस्यैव प्रयत्नस्याग्न्याघातह्रस्वादिस्पर्शादिजनकत्वमिति स्पष्टमेवायातमिति,—तदेतत्सकलं मनसि निधाय शङ्कते—

❀ विषमपदविवृतिः ❀

वक्ष्यमाणशेखरदिशोपपन्नम्। **सोदीर्ण इति**। 'सोचि लोपे चे'दिति सुलोपः। **उदीर्ण इति**। ॠ गतावित्यस्योत्पूर्वस्य रूपम्। **आत्मान्तः करणमिति**। इदमसङ्गतम्-आत्मपदस्य जीवपरत्वे बाधकाभावात्। **इच्छयोत्पन्नयत्नेति**। इच्छयोत्पन्नो यत्नो यस्मिन्निति विग्रहः। तथा च 'विवक्षयेत्ये'तत् यत्नेनेत्येतस्याप्युपलक्षणमिति भावः। **ततो यत्नविशेषेणेति**। इद'मेक एव यत्नः कार्यजनको वर्णनाशकश्चे'ति 'परः सन्निकर्ष' इति सूत्रस्थभाष्यविरुद्धम्। तस्मात्तेनैव यत्नेनेति वक्तुमुचितम्। औपा-

यति कश्चिदधिकमिति–तस्य वायुप्रेरणारूपङ्कार्यमास्यबाह्यदेशमिति तदपि बाह्यमेव।

अत एव अइउण्सूत्रे भाष्ये–'ह्रस्वत्वादिजनकयत्नस्यास्यविशेषणेन सवर्णसूत्रेऽग्रहण'मित्युक्तम्। यद्यपि–'एक एव यत्नः सर्वकार्यजनको वर्णनाशकश्चे'ति 'परः सन्निकर्ष' इति सूत्रे भाष्ये उक्तं–तथापि तत्तत्कार्येणोपाधिना एकस्मिन्नपि भेदमारोप्य तथा व्यवहार इति बोद्ध्यम। उदात्तादिजनकयत्नस्याभ्यन्तरकार्यकरत्वेऽपि—उदात्तादिशब्दैर्विना बोधितानां तेषाम्–'अनङ्गुदात्त' इत्यनेनाविवक्षाबोधनात्सवर्णसञ्ज्ञानुपयुक्तत्वान्तरतम्यपरीक्षोपयुक्तत्वरूपसादृश्येन बाह्येषु गणनम्। इदं—ह्रस्वत्वादेरानुनासिक्यस्य चोपलक्षणम्।

शर इति। शषसाः। अनुप्रदानं–बाह्यप्रयत्नः। **विवृण्वते इति**। तदभिव्यक्त्यु-

❀ अभिनव-चन्द्रिका ❀

तथा व्यवहार इति। वस्तुतस्तु सर्वप्रयत्नजनकमहाप्रयत्नैक्येप्यनुभवसिद्धानामनेकेषामवान्तरप्रयत्नानामपलपितुमशक्यत्वाच्चिन्त्यमिदम्। भाष्यन्तु–सर्वप्रयत्नजनकमहाप्रयत्नैक्यमादाय प्रवृत्तमिति न तद्विरोध इति दिक्।

❀ चिदस्थिमाला ❀

भावान्न क्वाप्यन्तर्भावः, अत एव तुः प्रयुक्तः। एवमाशङ्क्य समाधत्ते—**इतीति**। 'यद्यपि तथापी'ति शेषः। इतिः—हेतौ। **तस्य**=यत्नस्य। **तदपि**=ह्रस्वत्वादिकमपि। अपिना—उक्तम्। अत्र मानमाह—**अत एवेति**। तस्य तत्त्वादेवेत्यर्थः। **आस्यविशेषेति**। 'आस्ये तुल्यदेशप्रयत्न'मितिपक्षे—'आस्ये' इतितद्विशेषणेनेत्यर्थः। सवर्णसूत्रे=तत्सञ्ज्ञाविधायकसूत्रे। भाष्यविरोधं परिहरति—**यद्यप्येक एवेति**।

नन्वेवमप्युदात्तादीनामत्रोक्तिरयुक्ता, प्रागुक्तरीत्या तेषामाभ्यन्तरत्वस्यैव लाभादतः प्रागुक्तमाह—**उदात्तेति**। आदिना गमकान्तरस्यापि समुच्चयः। **तेषाम्**=उदात्तादीनाम्। इत्यनेन=इत्यत्रत्योदात्तग्रहणेन। मूलीयन्यूनतां निराचष्टे—**इदमिति**। अयोगवाहनिरासाय आह—**शषसा इति**। अत एव यमविसर्गादेः पृथग्ग्रहणम्, अत एवानुस्वारस्य श्वासादयो नेत्याहुः। [मूले—**एते एवे**त्यन्वयः।] 'अनुप्रदान'शब्दस्वारस्यात्तत्प्रदत्वं नार्थ इत्याह—**अन्विति**। तथाच तत्प्रयत्नका इति तदर्थो बोध्यः। नन्वेषां

❀ ज्योत्स्ना ❀

सर्वकार्यजनक इति। स्वोत्पादितवर्णनिष्ठ–ह्रस्वत्व–दीर्घत्वादिसर्वकार्यजनक इत्यर्थः। **वर्णनाशकश्चेति**। अत्रापि स्वोत्पादितवर्णनाशक इत्यर्थः। 'येनैव यत्नेनैको वर्ण उच्चार्यते, तेनैव विच्छिन्ने तस्मिन्वर्णे उपसंहृत्य तं यत्नमन्ययत्नमुपादाय द्वितीयः प्रवर्तते'इति हि'परःसन्निकर्ष' इतिसूत्रे भाष्यम्। **अविवक्षाबोधनादिति**–अविवक्षा च प्रत्यसत्त्या शास्त्रीयकार्ये बोध्या। तेन

❀ सदाशिवभट्टीयम् ❀

यद्यपीति। अयोगवाहनिरासायाह—**शषसेति**। अत एव विसर्गादेः पृथग्ग्रहणमत एवानुस्वारस्य श्वासादयो न। **अनुप्रदानं बाह्ये**ति। उद्योते तु श्वासोऽनुप्रदीयते यैरित्यर्थ उक्तः, रूढौ मानन्तु

❀ विषमपदविवृतिः ❀

धिकभेदाभिप्रायेण वा कथञ्चिद्योज्यम्। **वायुप्रेरणारूपमिति**। अल्पवायुमहावायुप्रेरणारूपमित्यर्थः। **अविवक्षेति**। कार्यानुपयोगित्वमित्यर्थः। **अत एवेति**। पूर्वलाभावादेवेत्यर्थः। तथा च 'वर्गेष्वाद्याश्चत्वार एव यमा' इति प्राचीनविवरणं तत्सदृशार्थकतया योज्यमिति भावः। ननु राज्ञा मज्ज्ञामित्यादौ श्चुत्वं न स्यात्, यमेन व्यवधानादिति चेन्न, 'अशरीरं यमं प्राहु'रित्यादिवचनेन यमादीनामशरीरोक्त्या तद्व्यवधानस्याकिञ्चित्करत्वात्।

तरज्ञायमाने कण्ठविवरविकासे तेषां कर्तृत्वविवक्षा बोध्या । विवार एषां प्रयत्न इति भावः । **अन्ये त्विति** । वर्गतृतीयचतुर्थपञ्चमाः, तद्यमा, हकारानुस्वारौ, यरलवा इत्यर्थः । नादभागिनः–तत्प्रयत्नकाः । यद्यपि खयादिषु घोषाघोषान्यतरप्रयत्नमात्रेणापि प्रक्रियांशनिर्वाहस्तथापि शिक्षानुरोधेनान्येषामुक्तिः । अल्पासवः–अल्पप्राणाः, यत एतदुच्चारणोत्तरं प्राणानामल्पत्वमिव भवति । **वर्गेष्विति** । 'विद्यमानाना'मिति शेषः । **चतुर्णामिति** । निर्धारणे षष्ठी, 'अन्यतमा'दिति शेषः । **पूर्वसदृश इति** । सादृश्यं—यत्नकृतम् । अत एवायोगवाहेषु यमानां गणनं भाष्ये, 'चत्वारश्च यमाः स्मृताः' इति पाणिनिशिक्षा च

❀ अभिनव-चन्द्रिका ❀

चत्वारश्च यमा इति । कचटतपानां पञ्चमे परत एको यमः, द्वितीयानाम्पञ्चमे एकः, तृतीयानां पञ्चमे-

❀ चिदस्थिमाला ❀

नन्वेषां करणत्वेन कथं कर्तृत्वमत आह—**तद्भीति** । वर्णाभील्यर्थः । **तेषां**=वर्णानाम् । '**कण्ठ**'मित्यस्य पूर्वान्वय इति भावः । मूलादिन्यूनतां निराचष्टे—**वर्गेति** । अत्र प्रकरणे सर्वत्रैवमेव बोध्यम् । एतेन—तथा दण्ड्याद्युक्तमपास्तम् । प्राग्वदाह—**तदिति** । आधिक्यं निराचष्टे—**यद्यपीति** । 'खयादिष्वघोषाद्यन्यतमे'ति पाठः । एवं हशादिष्वपि बोध्यम् । 'दिषु घोषाघोषान्यतरे'ति पाठे—'खयादिष्वि'त्यत्रादिना हशादेरपि परिग्रहः । शास्त्रानुरोधेन तथा द्वन्द्वप्रयोगेऽपि यथासम्भवं योगो, न यथासङ्ख्येन । 'दिषु घोषाघोषान्यतरे'ति पाठेऽप्येवं, यद्वा–तदा–'हशखयादि'ष्विति पाठः (एवञ्च यथासङ्ख्येनान्वयात्समासः सुलभः) । मूले—**वर्गयमगा इति** । वर्गगा यमगाश्चेत्यर्थः । वस्तुतस्तत्त्वस्याभावादाह=**इवेति** । वर्गेष्वेव यमानां स्थितिरित्यर्थभ्रमवारणाय—सप्तम्युपपत्तये चाह—**विद्येति** । बहुवचनात्सर्ववर्गस्थास्ते ग्राह्याः, अत एव तथा वक्ष्यति—**तत्र वर्गाणा**मित्यादिना—**मूल** एव । नन्वेवमपि प्रयोगे युगपच्चतुर्णां स्थित्यभावेन लक्ष्यविरोध एवात आह—**निर्धेति** ।

अन्यतमादिति । एतेन परशब्दयोगे 'चतुर्भ्य' इति पञ्चम्युचितेत्यपास्तम् । नात्र यथासंख्यमिष्टमिति ध्वनयन्नाह—**मूले—पञ्चमे परे इति** । अन्यथा 'पञ्चमेषु परे'ष्वित्युक्तं स्यात् । 'आड्गुण'इत्यादाविव पूर्वपरयोः स्थाने इत्यर्थभ्रमवारणायाह—**मध्य** इति–व्याख्यायाम् । **यत्नकृतमिति** । न तु कत्वादिधर्मकृतमिति भावः । एतेन—'वर्गपञ्चमयुक्ताः प्रथमादयो यमा'इति **विवरणो**क्तमपास्तम् । **अत एवेति** ।

❀ ज्योत्स्ना ❀

सवर्णसञ्ज्ञायास्तथाविधत्वात्तस्य तथात्वेन तस्याः सम्भवेऽप्युदात्तस्य उदात्त इत्याद्यान्तरतम्यस्य लौकिकत्वेन तत्र नाविवक्षेत्यादि **पारिभाषाप्रदीपार्चिषि** विस्तरः । 'पूर्वसदृश'इत्यस्य पूर्वेण सदृश एव न पूर्वः, नाप्युत्तरसदृशः, पूर्वेणैव च सदृश इति–तत्रावधारणान्तरप्रतीतेरर्थद्वयं, तत्राद्ये विनिगमकमाह—**अत एवेति** । एतेन'वर्गपञ्चमयुक्ताः प्रथमादयो यमा' इति प्राचीनविवरणकृदुक्तिः परास्ता । अन्येऽप्याह—**शिक्षा च सङ्गच्छत इति** ।

❀ सदाशिवभट्टीयम् ❀

तुल्यास्यादिसूत्रस्थभाष्यमेव । **यद्यपीति** । 'खयादिष्वघोषाऽन्यतमे'ति पाठः । एवं हशादिष्वपीति बोध्यम् । 'घोषाऽघोषाऽन्यतरे'ति पाठे खयादिष्वित्यत्रादिना हशादिपरिग्रहः । शास्त्रानुरोधेन तथा द्वन्द्वप्रयोगेऽपि । यथासम्भवयोगो न यथासङ्ख्येन । वर्गेष्वेव यमानां स्थितिरिति भ्रमवारणाय षष्ठ्यौचित्यात्सप्तम्युपपत्तये चाह—**विद्येति** । नन्वेवमपि प्रयोगे युगपच्चतुर्णां स्थित्यभावेन लक्ष्यविरोध एवात आह—**निर्द्धेति** । **अन्यतमादिति** । **एतेन** परशब्दयोगे चतुर्भ्य इति पञ्चम्युचितेत्य**पास्तम्** ।

सङ्गच्छते । अयञ्च वेदे एव तदाह—**प्रातिशाख्ये इति । अन्येषामिति ।** अचाम्, उक्तान्यहलाञ्चेत्यर्थः । **यरलवाश्चेति ।** चेनाचामपि ग्रहणम् । 'सुपां सुलुगि'ति सूत्रे 'इकारस्यान्तर्यतो दकार' इति भाष्यात्—घोषसंवारनादाल्पप्राणत्वमचाम् । अन्यथा तदौ पर्यायेण स्याताम्, अल्पप्राणत्वानङ्गीकारे दधौ पर्यायेण स्याताम् । अचां घोषत्वं 'परः सन्निकर्ष' इति सूत्रे भाष्येऽपि स्पष्टम् । **अन्ये इति ।** द्वितीयचतुर्थौ, तद्यमौ, शषसहा, अयोगवाहाश्चेत्यर्थः । जिह्वामूलीययमादीनां स्थानबाह्यप्रयत्नकथनन्तु—स्वरूपनिर्णयाय, न तु सावर्ण्यान्तरतम्यपरीक्षादावुपयोगीति बोध्यम् । **अनुपयुक्ता इति ।** तुल्यास्यसूत्रे

❀ अभिनव-चन्द्रिका ❀

एकश्चतुर्थानाम्पञ्चमे एकः-इति सङ्कलनया चत्वार इति भावः । **अन्यथेति ।** घोषसंवारनादाऽस्वीकारे-

❀ चिदस्थिमाला ❀

धर्मकृतसादृश्यानङ्गीकारेण यत्नकृतसादृश्याङ्गीकारात्, परसादृश्यानङ्गीकारेण पूर्वसादृश्याङ्गीकाराच्चेवेत्यर्थः । उभयत्र—'सङ्गच्छते' इत्यस्यैवास्याप्यन्वयः । अन्यथा पठितैरेव तेषां (यमानां) ग्रहणे तत्र ग्रहणासङ्गतिः,परसदृशत्वेऽपि तेषां पञ्चत्वेन तदुक्तचतुष्ट्वसङ्ख्याविरोधापत्तिश्चेति भावः । चतुष्ट्वोपपत्तिस्तु प्रथमयमत्वादिना बोध्या । ननु सिद्धान्तेऽपि तेषां विंशतित्वेन चतुष्ट्वमनुपपन्नमेवेति चेन्न, वर्गप्रथमत्वादिना तथोक्तं, पञ्चत्वसङ्ख्याव्यवच्छेदे तात्पर्यात् । **शाख्ये इतीति ।** एतेन 'तद्-नमन'मित्यादौ यमेन व्यवधानाद्'यरोनुने'त्यस्याप्रवृत्त्यापत्तिरित्यपास्तम्, उक्तयुक्तेः, तत्राप्यखण्डपद एव तदुत्पत्तेश्चेति बोध्यम् ।

प्राग्वदाह—**अचामिति ।** एवमग्रे सर्वत्र बोध्यम् । अचान्तत्त्वे मानमाह—**सुपामिति ।** 'भाष्ये' अन्वयः । **दकार इति ।** 'आर्द्रेचर्म'न्नित्यादौ लुग्ग्रहणप्रत्याख्यानाय पूर्वसवर्णेन साधनावसरे इति भावः । उक्तं द्रढयति—**अन्यथेति ।** अल्पप्राणत्वमात्राङ्गीकारेण तन्नितयानङ्गीकार इत्यर्थः । अनङ्गीकारे=त्रितयमात्राङ्गीकारे । **स्पष्टमिति ।** तत्र हि—'ह्रादाविरामः संहिते'ति न्यासे 'कुक्कुटः' 'पिप्पली' 'पित्त' मित्यत्र—'स्पर्शानामघोषाणाञ्च संयोगेऽसंन्निधानात्संहिता सञ्ज्ञा न स्या'दित्युक्त्वा,—'किमुच्यते' 'संयोग' इति, अथ यत्रैकः पचतीतिएकः पूर्वपरयोर्ह्रादेन प्रच्छाद्यते—इत्युक्तं । 'द्वयोरकारयोर्घोषवतोर्मध्ये चकारो घोषवानिव लक्ष्यते'इत्यर्थ इति **कैयटः ।**

ननु जिह्वामूलीयादेः स्थानादिकथनं व्यर्थमफलत्वादत आह—**जिह्वेति ।** क्रमस्य बोध्यत्वादस्य पूर्वनिपातः, अत एव यथाक्रममाह—**स्थानेति । सावर्ण्यान्तेति** च । आदिना—सावर्ण्यनिवृत्तिपरिग्रहः । ननु तद्ग्रहणेऽपि लोकवत्तेनोभयोर्ग्रहणमस्तु, यत्तु—'तथा सति कादीनां मिथः सावर्ण्यानापत्ति'रिति—**दण्डी ।** तन्न, क्वापि सर्वप्रयत्नसाम्यासम्भवात्, पूर्वं ज्ञापकेन 'किञ्चित्प्रयत्नभेदेऽपि किञ्चित्प्रयत्नसाम्यमादाय सवर्णसञ्ज्ञे'ति भाष्यसाधितार्थस्योक्तत्वाच्च,-अत आह—**उपेति ।** हि= यतः । तथा च 'झरो झरी'ति लोपापत्तिरिति भावः । गुणशब्दत्वस्य, क्रियाशब्दत्वस्य च व्यवच्छेदा-

❀ ज्योत्स्ना ❀

इति भाष्यादिति । एवं हि तत्र भाष्यम्—'लुकि किमुदाहरणम् ?, आर्द्रेचर्मन्, लोहितेचर्मन्, नैतदस्ति, पूर्वसवर्णेनाप्येतत्सिद्धं, न सिध्यति,—यद्यत्र पूर्वसवर्णः स्यादान्तर्यतो दकारः प्रसज्येते'ति । 'जिह्वामूलीययमादीनाम्'-आदिना अनुस्वारविसर्गादिः । **सावर्ण्यान्तरतम्यपरीक्षादाविति ।** आदिना सावर्ण्यकार्यम् । **शचयोरपीति ।** तेन'वाक्श्चोतती'त्यादौ 'झरो झरी'ति

❀ विषमपदविवृतिः ❀

अयोगवाहा इति । द्वितीयचतुर्थयमभिन्ना इत्यर्थः । **जिह्वामूलीय इति ।** उपध्मानीयस्य स्थानकथनं तूपध्मानीयोपधस्योब्जेजर्जस्त्वेन बकरार्थं कथं चिद्भवतीति भावः । **यमादीनामिति ।**

प्रशब्दग्रहणात् । उपयुक्तत्वे हि श-छयोरपि सावर्ण्यं स्यादिति भावः। आन्तरतम्यपरीक्षा च–'घोषवत'इत्यादिना तत्र तत्र स्फुटीभविष्यति । **स्पर्शाः**–तत्पदव्यवहार्याः । अन्तस्था-शब्द आदन्तः । स्पर्शोष्मणोरन्तर्मध्ये तिष्ठन्तीति तदर्थः । **ऊष्माण इति** । ऊष्मा वायुस्तत्प्रधाना इत्यर्थः । एवं 'सोष्माण'इत्यस्य 'वायुना सह वर्त्तन्त इत्यर्थ' इति प्राति-शाख्यभाष्ये स्पष्टम्। यद्यपि वर्गद्वितीयचतुर्थयोरपि 'स्थानेन्तरतम'सूत्रभाष्यादूष्मत्वं, तथापि 'विवृतमूष्मणा'मित्यत्रैत एव गृह्यन्ते। अन्यथा कण्ठ्यादीनां सावर्ण्यानापत्तौ 'नाज्झलौ'वि-

---

❀ अभिनव-चन्द्रिका ❀

इति भावः । ननु तद्धर्मावच्छिन्ने तद्धर्मावच्छिन्नान्वयस्याव्युत्पन्नत्वादाह–**स्पर्शपदव्यवहार्या इति** ।

❀ चिदस्थिमाला ❀

याह—**तत्पदेति** । कप्रत्ययान्तत्वं निराचष्टे—**आदन्त इति** । विजन्त इति भावः । स च न शुद्धरूढ इत्याह—**स्पर्शोष्मणोरिति** । 'ऊष्मपदव्यवहार्या'इत्यर्थे भाष्यप्रातिशाख्यविरोधापत्तेराह—**ऊष्मा वायुरिति** । अत एव तदेकवाक्यतामाह—**एवमिति** । उक्तवदित्यर्थः । अत एवाह—**यद्यपीति** । **भाष्यादिति** ।—''तमग्रहणात् ये सोष्माणो नादवन्तश्च ते भवन्ति चतुर्थाः—वाग्घसति, अन्यथा सोष्माणः सोष्माण इति द्वितीयाः, नादवतो नादवन्त इति चतुर्थाः प्रसज्येरन्—'' इति भाष्यादित्यर्थः । अन्यथा=तयोरपि ग्रहणे । **कण्ठ्यादीनामिति** । 'मिथ' इति शेषः । आभ्यन्तरयावत्प्रयत्नसाम्याभावा-दिति भावः । आंशिकं चेदं, तदाह—**नाज्झलाविति** । 'स्वरा'इत्यस्य प्राग्वदर्थं हृदि निधाय तत्र हेतु-

❀ ज्योत्स्ना ❀

शकारस्य लोपो न । न च महाप्राणप्रयत्नभेदः, यावत्प्रयत्नसाम्यस्य सावर्ण्यानुपयुक्तत्वात् । क्वचित् 'शछयो'रिति पाठः, तदा महाप्राणतासाम्यमप्यायाति । तत्र'राजंश्छिन्धी'त्यनुस्वारस्य हल्त्वमा-श्रित्योक्तलोपः प्रत्युदाहरणीयः । **आदन्त इति** । क्विबन्तो विजन्तश्चेत्यर्थः । यद्वा 'आतश्चो-पसर्गे' इत्यङन्तादाप् । नचाङ्विधा'वकर्तरि च कारके'इत्यनुवृत्त्या तस्य कर्तर्यविधानाद्वक्ष्यमाण-कर्तृव्युत्पत्तिविरोधः, अन्तर्भावितण्यर्थात्तिष्ठतेः कर्मणि प्रत्यये तस्य फलितत्वात्। 'आबन्त'इति बृहच्छेखरे पाठदर्शनादेवं व्याख्याया उचितत्वात् । 'अन्तस्थैश्चापि संयुत'मित्यकारान्तपाठे'सुपि स्थ' इति कप्रत्ययः । **कण्ठ्यादीनां सावर्ण्यानापत्ताविति** । यद्यपि घकारस्योष्मत्वाद्विवृतत्वाधिक्येऽपि स्पृष्टत्वमात्रसाम्यात्ककारेण सावर्ण्यं वक्तुं शक्यं, सवर्णसञ्ज्ञायां यावत्प्रयत्नसाम्यस्य ज्ञापकेन निरा-कृतत्वात्तथापि बाह्यप्रयत्नसाम्यनिराकरणे तत्तात्पर्यम्, आभ्यन्तरयावत्साम्यन्त्वपेक्षितमेवेत्याशयः ।

❀ विषमपदविवृतिः ❀

आदिपदेनानुस्वारविसर्गौ । अत्र यमानुस्वारयोर्नासिकास्थानकथनम्—'अथ मुखग्रहणं किमर्थं ? नासिकावचनोऽनुनासिक इतीयत्युच्यमाने यमानुस्वाराणामेव प्रसज्येते'ति भाष्योक्तदिशा मुखग्रहणव्यावृत्तिबोधनाय । **आदन्त इति** । 'स्थः कचे'ति कप्रत्ययान्तोऽदन्तस्ततष्टाप्, नित्य-स्त्रीलिङ्गोऽयम्, 'अन्तस्थाभिश्च संयुत'मिति शिक्षावाक्यानुरोधादिति भावः । एतेन विश्वपाशब्द-वदादन्तत्वे 'ईषत्स्पृष्टमन्तस्थाना'मिति निर्देशासङ्गतिरित्यपास्तम् । **स्पर्शोष्मणोरिति** । मातृकापेक्ष-येदम् । **नाज्झलावित्यादिनिर्देशेनेति** । चझयोः सावर्ण्याभावे हस्य स्थाने झः पूर्वसवर्णो न स्यादिति भावः ।

त्यादिनिर्देशासङ्गतिरिति भावः । **अचः स्वरा इति** । उदात्तादिभिः स्वयमेव राजन्त इति व्युत्पत्तेः । तद्धर्मत्वादुदात्तादयोऽपि 'स्वरा'इत्युच्यन्ते । **कपाभ्यामिति**—खफयोरप्युपलक्षणम् । अं अः इत्युपलक्षणमिकारादेरपि । तदाह—**अचः पराविति** ।

ऋलृवर्णयोरिति । आ च लृवर्णश्चेति विग्रहः, 'ऋत्यक' इति प्रकृतिभावः । एतदर्थमेव वर्णोपदेशे लृकारपाठः, अन्यथा तस्यासत्त्वशङ्कयाऽस्य वचनस्यैवाशक्यत्वं स्यात् । ध्वनितञ्चेदम् 'एओ'ङितिसूत्रशेषे भाष्ये । तत्र हि 'सँय्यन्ते'त्यादौ 'हलोनन्तरा'

❀ अभिनव-चन्द्रिका ❀

तथा च स्पर्शपदेन स्पर्शपदव्यवहारत्वेनोपस्थितिः । एवमुत्तरत्रापि बोध्यम् । आ च लृवर्णश्चेति । ननु 'आ च आ च रलौ'इति मनोरमोक्तं विहाय किमिति द्वितीयः प्रकार आश्रीयते इतिचेच्छृणु न पदान्ताः परेऽणःसन्ती'ति भाष्यप्रामाण्येन लृकारान्तानामनभिधानेन आ च आ चे तिविग्रहस्य वक्तुमशक्यत्वात् ।

❀ चिदस्थिमाला ❀

माह—**उदेति** । स्वपूर्वाद्राजतेर्ड इति भावः । स्पष्टञ्चेद'मुच्चैरुदात्त' इत्यत्र भाष्ये । नन्वेवमुदात्तादीनां कथन्तत्वमत आह—**तद्धर्मेति** । **ऋलृवर्णयोरिति** । अत्र—'आ च आ चे'त्यादिमनोरमाद्युक्तपक्षाङ्गीकारे रूपसिद्धिः क्लिष्टेत्यन्यथा आह—**आच लृवेति** । वार्त्तिके दीर्घ वारयति—**ऋत्यक इतीति** ।

नन्वेवं सावर्ण्यादृकारेण लृग्रहणे सिद्धेराकारादिवत्तदुपदेशो व्यर्थोऽत आह—**एतदिति** । एतद्बोधार्थमेवेत्यर्थः । तस्य=लृकारस्य । **अशक्यत्वमिति** । तदभावादिना पदार्थोपस्थित्यभावेन बोधाजनकत्वेनासम्बद्धत्वेनाकरणीयत्वमित्यर्थः । नन्वेतादृशं न क्वापि दृष्टमत आह—**ध्वनितमिति** । 'तत्र ही'त्यस्य 'उक्त'मित्यत्राप्यन्वयः । 'आदा'वित्यस्य='न प्राप्नोती'त्यत्रान्वयः । 'सूत्रे'इत्यस्य-'ग्रहणा'दित्यत्रान्वयः । अस्थित-

❀ सदाशिवभट्टीयम् ❀

निर्देशासङ्गतिरिति । यद्यपि यावत्स्थानसाम्यमिवं यावत्प्रयत्नसाम्यविवक्षामन्तरेणापि निर्देशसङ्गतिस्तथापि यावत्प्रयत्नसाम्यानङ्गीकारे खकारहकारयोरपि सावर्ण्यापत्तौ देवः खनतीत्यादौ 'हशि चे'त्युत्वाबापत्तिः, 'कर्त्तरि भुवः खिष्णुजि'त्यादिनिर्देशासङ्गतिश्च । एवञ्च यत्किञ्चित्प्रयत्नसाम्ये इदमसङ्गतं, यावत्साम्ये मूलोक्तमसङ्गतमिति तात्पर्यम् ।

ऋलृवर्णयोः । एतदर्थमेव=तद्बोधार्थमेव । **असत्त्वमिति** । तदभाववादिना पदार्थोपस्थित्यभावेन बोधाजनकत्वेनाऽकरणीयत्वमित्यर्थः । नचानुपदेशत्वमात्रेणाऽसत्त्वशङ्कायामाकारादीनामपि सा स्यादिति वाच्यम्, अक्षरसमाम्नाये जातिनिर्देशसत्त्वेनात्वादिजातेराकारादिषु सत्त्वात्, ऋकारे लृत्वजातेरभावादिति

❀ वरवर्णिनी ❀

लृवर्णश्चेति । 'आ च आ चे'त्यादिमनोरमोक्तविग्रहस्तु—'न पदान्ताः परेऽणः'इति भाष्यात् लृकारान्तात्सुबुत्पत्तेरनभिधानान्नोचितः, अन्यथा गमुलित्यादौ तत्सम्भवेन 'न ही'त्यादिभाष्योक्तिरसङ्गतैव स्यात् । न चैवं—'लाकृति'रित्यादेरनभिधानापत्तिः,—'अवसानकार्यभाजः परेऽणः पदान्ता न सन्ती' त्यत्रैव भाष्यतात्पर्येण लाकृत्यादीनामनभिधाने प्रमाणाभावात् । एवञ्च सुप्रकृतिकलृशब्दस्यानभिधाने प्रमाणाभावान्मनोरमोक्तं युक्तमेवेति **जटाजूटकृतः** । केचित्तु लृकारान्तेभ्यः पञ्चम्येकवचने उलित्यादौ पदान्तानामवसानकार्यभाजान्तादृशानां सम्भवेन—पञ्चमीषष्ठीविधायकानेकशास्त्रीयोद्देश्यतावच्छेदकावच्छिन्ने लृकारान्तातिरिक्तत्वेन सङ्कोचापेक्षया स्वौजसितिसामान्यशास्त्रे सङ्कोचे लाघवात् लृकारान्तेभ्यः सुबुत्पत्तेरेवानभिधानमिति नागेशाशयमाहुः । न च नागेशनये 'लृवर्णस्ये'त्यत्रापि समासानापत्तिरिति वाच्यम्, तस्याखण्डपदत्वस्वीकारेण क्षतिविरहादित्यसद्गुरुवरित्रिपाठिचरणाः ।

इति सूत्रे '—प्रत्याहारघटकेष्वपि ग्रहणकशास्त्रप्रवृत्त्या मात्राकालिकस्य यद्वयादेरणुदित्सूत्रेण यादिग्रहणेन ग्रहणाद्द्विव्यञ्जनाश्रयो विधिर्न प्राप्नोती—'त्याशङ्क्य मात्रिकव्यञ्जनानुपदेशादनुपदिष्टस्यासत्त्वादसत्प्रतिपत्तेरशक्यत्वान्नाणुदित्सूत्रेण तद्ग्रहणमित्युक्तम् ।

न च क्लृ३प्तशिखेत्यादावनृत इति निषेधात्प्लुतानापत्तिः, ऋलृवर्णयोः पृथगनुबन्धत्वकरणेन क्वचित्परस्पराग्राहकत्वकल्पनेनादोषात् ।

ॐ अभिनव-चन्द्रिका ॐ

ग्रहणकशास्त्रप्रवृत्त्येति । व्यासज्यवृत्तिधर्मावच्छिन्ना या कालघटितधर्मानवच्छिन्नाण्वृत्तिविषयता तादृश-

ॐ चिदस्थिमाला ॐ

पक्षाभिप्रायेणेयं शङ्केति सूचयितुमाह—**प्रत्याहारेति** । तद्बोध्यघटकानुच्चारितद्वितीयादिवर्णेष्वपीत्यर्थः । आदिना-वद्वयादिविधिः, संयोगसञ्ज्ञादिः । **असदिति** । अत्र शास्त्रे प्रक्रियादशायामित्यर्थः । तद्ग्रहणम्=मात्रिकद्वयाद्यात्मकव्यञ्जनग्रहणम्। वस्तुत इयमेवमानुपूर्वीका श्रुतिरेवान्यार्थमुपदिष्टेति नानर्थक्यशङ्केति बोध्यम् । एवं सति वार्त्तिककृतदोषमुद्धरति—**न चेति** । लकारोपदेशस्योक्तरीत्या साफल्येन तस्य ज्ञापकत्वं नेति (हेतोः)—तथा कौस्तुभाद्यसाङ्गत्यध्वननाय आह—**ऋलृवर्णयोरिति** । क्वचित्=अनिष्टस्थले । प्रकारान्तरेण

ॐ ज्योत्स्ना ॐ

द्विव्यञ्जनाश्रय इति । संयोगसञ्ज्ञारूपः न प्राप्नोतीति, 'वर्णैकदेशा वर्णग्रहणेन न गृह्यन्त' इत्युक्तेरिति भावः । **अदोषादिति** । 'लृकारोपदेशःसावर्ण्यानित्यत्वे ज्ञापक' इति **कौस्तुभाद्युक्तं** त्वयुक्तम्, फलस्योपदर्शितत्वात् । किन्त्वाकारादीनामप्यसत्त्वशङ्का कस्मान्न भवति, शिष्टोपदेशादिति चेत्,

ॐ सदाशिवभट्टीयम् ॐ

वदन्ति । **संय्यन्तेत्यादाविति** । आदिना कुक्कुटादिपरिग्रहः । **द्विव्यञ्जनेति** । मात्रादिरयं, स च कुक्कुटादौ संयोगगुरुसञ्ज्ञाप्लुतादिरूपः, संय्यन्तेत्यादौ चा'नची'ति द्वित्वरूपः, तस्य द्विव्यञ्जनाश्रयत्वं प्रकृतलक्ष्याभिप्रायम् । 'हलोनन्तरा' इति सूत्रोपन्यासस्तु कुक्कुटाद्यनुरोधादिति बोध्यम् । **एतेन**—परसवर्णस्यासिद्धत्वादनुस्वारं हल्मादाय संयोगसञ्ज्ञादिः सेत्स्यतीति तदसङ्गतमित्यपास्तमिति वदन्ति ।

वस्तुतस्तु 'अनुपदिष्टत्वा'दित्यस्य 'शिष्टै'रिति शेषो, न तु 'महेश्वरेणे'ति, तथा सति अयोगवाहानामट्सु णत्वमृतिकृवेत्यादेः कर्त्तुमशक्यत्वस्य ब्रह्मणापि दुर्वारत्वात् । 'वृत्तिसमवायार्थ उपदेश'ल्कारोपदेशो यदृच्छे'-त्यादिकं चोपलक्षणतां विना नोपपद्येत । किञ्चाकारादिसत्त्वस्य जातिनिर्देशेनोपपादने मात्रिकव्यञ्जनादेरसत्त्वमुपपादयितुमशक्यमिति चिन्त्यमेवेदमित्याहुः । तदपरे न क्षमन्ते—चतुर्दशसूत्रीनिर्दिष्टजात्याक्रान्तत्वस्याऽसत्त्वशङ्कानिवर्त्तकत्वे मात्रिकाऽर्द्धमात्रिकव्यञ्जनसाधारणयत्वादिजातेस्तत्र निर्दिष्टत्वेनानुपदेशान्मात्रिकव्यञ्जनासत्त्वप्रतिपादकै'रेओङ्'सूत्रस्थभाष्यविरोधात्तस्माच्छिष्टोपदेश एवासत्त्वशङ्कानिवर्त्तक इत्येव भाष्यकृदाकूतम् । किञ्चानुवादोपि सन्देहनिवर्तक एवेति प्रागुक्तत्वेन तस्य च लकारे बहुशः प्रदर्शनेन चिन्त्यमेवे-

ॐ विषमपदविवृतिः ॐ

अशक्यत्वं स्यादिति । इदमयुक्तम्—अयोगवाहानां दीर्घादीनां सानुनासिकयवलानां दुःस्पृष्टसञ्ज्ञकलकारस्येषत्स्पृष्टक्कारल्कारयोश्चासत्त्वापत्तेः । अक्षरसमाम्नाये एषामनुपदिष्टत्वात् । एओङ्सूत्रस्थ'मनुपदिष्टं सत्कथं विज्ञातुं शक्य'मिति भाष्यन्तु—वेदलोकसाधारण्येन सावर्ण्यानित्यत्वज्ञापकत्वायोगात् । न च स्थानेन्तरतमसूत्रेण निर्वाहः, वकारस्य स्थाने ल्कारस्वरूपसम्प्रसारणापत्तेः, तस्माद्वकारस्य ल्काराभावाय वर्णोपदेशे ल्कारपाठ इत्येव तत्त्वम् ।

पृथगनुबन्धत्वेति । गम्लृ सृप्लृ गतौ, एजृ भ्राजृ दीप्तावित्यादौ । **ओकारस्यौ-**

अकारहकारयोरिति । 'एकारस्य तालव्यत्वमोकारस्यौष्ठ्यत्व'मिति मते—एकार-शकारादीनामप्युपलक्षणमिदम् । एतेन 'नाक्शलौ'इत्येव सूत्रयितुमुचितमित्यपास्तम् । 'हशि चे'त्येव सिद्धे'ऽतोरो'रित्याकारे व्यावृत्त्यर्थम् । सूत्रे द्विवचनोपपत्तये मध्यमपदलोपिसमासं

❀ अभिनव-चन्द्रिका ❀

विषयताप्रयोजकं स्वबोध्याण्सवर्णान्गृह्णातीति ग्रहणकशास्त्रस्यार्थादिति भावः ।

तालव्यत्वमिति । केवलतालव्यत्वमित्यर्थः । एवमुत्तरत्रोष्ठत्वमित्यत्रापि । नचैकारैकारयोरुकारौ-कारयोः सावर्ण्यापत्तिर्यावदास्यभवतुल्यत्वस्य सत्त्वादिति वाच्यम्, इकारोकारयोर्विवृतत्वेन एकारौ-कारयोश्च विवृततरत्वेनाभ्यन्तरप्रयत्नैक्याभावेनादोषात् । **अपास्तमिति** । 'एकारशकारयोस्तालु-मात्रजन्यत्व'मितिमते सावर्ण्यापत्तेरिति भावः । न च शकारस्येषद्विवृतत्वेन इकारस्य विवृतत्वेन

❀ चिदस्थिमाला ❀

तत्र तद्वारणन्तु गौरवग्रस्तमिति स्पष्टं भाष्ये । नाज्झलाविति सूत्रपाठसार्थक्यायाह—**एकारस्येति** । 'शुद्ध'मिति शेषः । एवमग्रेऽपि । **मत इति** । 'तालव्यावकारचवर्गाविकारैकारौ यकारः शकारः, शेषः ओष्ठोपपाद्य'इति बह्वृचप्रातिशाख्यमते इत्यर्थः । आदिबहुवचनाभ्यामैकारशकार—ओकारोपध्मानीय-औकारोपध्मानीयपरिग्रहः, फलन्तु—'पर्यङ्के शेते' 'करवावहै शयनं' 'गोᳲपानं' 'गौᳲ पठती'त्यादावया-द्यापत्तिः । कौस्तुभाद्युक्तिं खण्डयति—**एतेनेति** । उक्तदोषेणेत्यर्थः । किञ्च यत्किञ्चित्स्थानसाम्यमिति मते हैजदेर्मिथः सावर्ण्यापत्त्या गोभ्यां गोदुहावित्यादौ ढत्वाद्यापत्तेः । एतेन नाच्शराविव्येव सुवचमिति **रत्ना-**

❀ ज्योत्स्ना ❀

ऌकारेऽपि तथैव प्राप्नोतीति चिन्त्यमेतत् । **एकारशकारादीनामपीति** । अत्रादिपदग्राह्यचिन्त्य-मिति पण्डितैकशेष-**शेषश्रीशिवराम**पण्डिताः । वस्तुतस्त्वत्र पक्षे एकारस्येकारेण सावर्ण्याभावाय विवृततरत्वादिरूपप्रयत्नभेदस्यावश्यवक्तव्यत्वात्तत एवैकारशकारयोरपि सावर्ण्याप्रसङ्ग इत्युपलक्षणत्वो-क्तिरेव चिन्त्या । कुतस्तर्हि 'नाक्शला'विति सूत्रकृता न कृतमिति चेत् 'नाज्झला'विति न्यासे गौरवाभावे-नाविशेषात्, व्यक्तिज्ञानगौरवमस्त्येवेति चेन्न, सूत्रे सवर्णदीर्घनिर्देशादगंशे परस्परं सावर्ण्यनिषेधा-भावेऽप्येजंशे एकारैकारयोरोकारौकारयोर्वाक्यभेदेन तत्सद्भावार्थमज्ग्रहणस्य सत्त्वात् । हल्प्रत्या-हारस्य प्रत्याहारान्तरोपजीव्यत्वेन तद्ग्रहणस्यैव योग्यत्वाच्चेति दिक् ।

नन्व'तो रोरप्लुतादप्लुते हशी'ति न्यासादकारहकारयोः सवर्णसंज्ञया 'शिवोऽर्च्य' इति सिद्धा-वतीति वचनमज्झलोः सावर्ण्याभावबोधकमिति 'नाज्झला'वित्यनर्थकमत आह—**'हशि चेत्येव सिद्धे**

❀ सदाशिवभट्टीयम् ❀

दमाभाति । **अन्ये** तु वस्तुत एवमानुपूर्वीका श्रुतिरेवेयमिति—**नानर्थक्यशङ्केति**—समर्थयाञ्चक्रुः, तदाकूतं किमिति तु संशयितमेव ? । अत एव तदुपदेशप्रयोजनगणनावसरे एतन्नोक्तं भाष्यकैयटयोः ।

नाज्झलौ । मत इति । 'तालव्यावेकारचवर्गाविकारैकारौ यकारः शकारः शेष औष्ठ्योपपादयि-तव्य' इति बह्वृचप्रातिशाख्यमते इत्यर्थः । **एकारादीना**मित्यादिबहुबचनाभ्यामेकारशकार ओकारोपध्मा-नीयादिपरिग्रहः, सूत्रमते विवृतत्वव्याप्यानां संज्ञानुपयुक्तत्वस्योक्तत्वादनयोर्विवृतरत्वादिना भेदेपि तत्प्राप्ति-र्बोध्या । अत्र मते 'यजुष्येकेषा'मित्यादिनिर्देशादैऔजित्यारम्भादैचाभिवेकारकारैयोः स्थानसाम्येपि सञ्ज्ञा न । 'स्वरानुस्वारोष्मणामस्पष्ट'मिति तत्रैव प्रातिशाख्ये प्रयत्नस्यैक्यस्योक्तत्वेन च संज्ञाप्राप्तिर्बोध्या । अत्र वदन्ति—एवमपि नाच्शलाविति नु न सूत्रितं, शलां परस्परं सवर्णसंज्ञानिषेधापत्तेः, यथाश्रुतन्यासेतु—पूर्वसवर्णकरणा-न्नेति । **हशि चेत्येव सिद्ध इति** । एतदवतरणस्य **पाठकग्रन्थे**ऽतीतिव**चन**मित्यस्यानुवर्त्य योगविभागेन

❀ विषमपदविवृतिः ❀

ष्ठ्यत्वमिति । एतच्च प्रकृतानुपयुक्तत्वादुपेक्ष्यम् । **एकारशकारादीनामिति** । **अन्ये** त्वाकारहकार-

दर्शयति—**आकारसहित इति**। अत एव 'वेला'स्विति निर्देश उपपद्यते। समाहारद्वन्द्वे तु टच्प्रसङ्गः, अज्झलिति समाहारद्वन्द्वं कृत्वा आपदेन द्वन्द्वे तु अज्भिरप्याकारस्य सावर्ण्यं न स्यादिति भावः। अत एव भाष्ये प्रयत्नभेदेनैषां सावर्ण्याभावः साधितः। **एतेषु**

❀ **अभिनव-चन्द्रिका** ❀

आभ्यन्तरप्रयत्नैक्याभावान्न दोष इति वाच्यं, सूत्रकृन्मते दोषसत्त्वात्। वस्तुतस्तु 'एकारादीनां केवलौष्ठ्यत्व'मितिमते इकारैकारयोः सूत्रकृन्मते सावर्ण्यस्य दुर्वारत्वेन केवलौष्ठ्यत्वादि न सूत्रकृतां मतमिति–'एकारशकारयोरप्युपलक्षण'मिति मूलं चिन्त्यमेवेति–नाक्शलाविति‌न्यासे न कोपि दोष इति दिक्। **सावर्ण्याभावः साधित इति**। स्यादेतत्–भाष्यकारमते प्रयत्नभेदेन अज्झलोः सावर्ण्याभावेपि सूत्रकृन्मते कथं सावर्ण्याभावः ?, न 'च तुल्यास्य'सूत्रे 'नाज्झला'वितिनिषेधेन अज्झल्-भिन्नत्वेन सङ्कोचेन नाज्झलोः सावर्ण्यप्रसक्तिरिति वाच्यम्, एवं तर्हि अचां हलामपि परस्परं सवर्ण-सञ्ज्ञानापत्तिरिति चेन्मैवम् अज्भिन्नेन तुल्यास्यप्रयत्नमज्भिन्नं सवर्णसञ्ज्ञं भवति, हल्भिन्नेन तुल्यास्य-प्रयत्नं हल्भिन्नं सवर्णसञ्ज्ञं भवतीति नाज्झलावितितात्पर्यग्राहकेनावृत्त्या तुल्यास्यसूत्रस्यार्थद्वयकरणे-नादोषात्। अत्र प्रथमवाक्येन हलां, द्वितीयवाक्येन च अचां सवर्णसञ्ज्ञा बोध्या। अथवा स्वविशिष्ट-

❀ **चिदस्थिमाला** ❀

करोक्तमपास्तम्, हकारासङ्ग्रहाच्च। प्रकारान्तरेण वारणन्तु गौरवपराहतमिति दिक्। नाच्शलाविल्येव सूत्रयितुमुचितमिति यथा न, तथा कौस्तुभव्याख्याने स्फुटीकृतम्। ननु सावर्ण्यपक्षे'ऽतोरो'रित्यत्राप्लुत इति व्यर्थं, 'हशि चे'ति सिद्धेरतस्तत्तदभावज्ञापकमिति मास्तु नाज्झलाविति—सूत्रमत आह—**हशीति**। **तोरोरिति**। अत्राऽप्लुते इतीत्यंश इत्यर्थः। अन्यांशस्त्वनुवृत्त्यर्थं आवश्यकः। न च हकारेऽतोरोरित्येव सिद्धि-रास्तां तत्र पक्षे, एवञ्च 'यशि चे'त्येव पठितुं युक्तमिति 'हशिचे'त्ययुक्तमिति वाच्यं, तपरकरणादाकार इव हकारेऽपि पूर्वसूत्राऽप्रवृत्तेः। अगतिकगति-क्लिष्टसमासाङ्गीकारे बीजमाह—**सूत्र इति**। अत एव= आकारप्रश्लेषादेव, अनेन तत्र मानमुपदर्शितम्। आकारस्याऽचा समाहारेप्येकवद्भावादग्रे तथा द्वन्द्वेन द्विवचनोपपत्तिरित्याशयेनाह—**समाहारेति**। युक्त्यन्तरं खण्डयति—**अज्झलिति**। **'द्वन्द्वे तु'**—'इतरेतरे'त्यादि। अपिर्हलसमुच्चयद्वारा दृष्टान्तबोधकः। अन्यथा तस्य तेन सह विवक्षाया असम्भवाद्द्वन्द्वो न स्यात्। अत्र प्लुतस्यापि प्रश्लेषे भाष्यं प्रामणमिति सूचयंस्तत्रेष्टापत्तिं निराचष्टे—**अत—एवेति**। तस्य तैः सावर्ण्यस्येष्टत्वादेवेत्यर्थः, तथा च द्वयोः प्रश्लेषेण तयोस्तेनैव तदनिष्टत्वमिति भावः। एकपदे एव दोष-

❀ **ज्योत्स्ना** ❀

इति। **व्यावृत्यर्थ मिति**। 'श्व आगन्ते' त्यादौ। तथा चोक्तज्ञापकेन सूत्रप्रत्याख्याने इहैव

❀ **सदाशिवभट्टीयम्** ❀

विधानमित्यर्थः—इति न शङ्काकलङ्कलेशः। **व्यावृत्यर्थमिति**। अत्ववति चेदस्त्येवेति नियमद्वारेति भावः। तपरकरणेन दीर्घवद्ध्रस्वाकारेपि व्यावर्त्यात्तत्रानेन न सिद्धिः। **सावर्ण्यं न स्यादिति**। परवल्लिङ्गमिति नपुंस-कत्वापत्तिर्बोध्या। **अत एवेति**। प्रश्लेषादेवेत्यर्थः। एकपदे एव दोषसम्भवेन पदद्वयपर्यन्तधावनं व्यर्थमिति

❀ **विषमपदविवृतिः** ❀

योरादिपदेन ग्रहणमित्याहुः। अत्रादिशब्दग्राह्यं चिन्त्यमिति केचित्। यजुष्ष्येकेषामिति निर्देशादिकारैकारयोर्न सावर्ण्यम्। नन्वकारहकारयोः सावर्ण्ये शिवोऽर्च्य 'इत्यादौ हशि चे'त्येव सिद्धे 'ऽतोरो'रिति व्यर्थं, तस्मात्तयोस्तन्नेत्याशङ्क्याह—**हशि चेत्येवेति**। तथा च अकारहकारयोरपि सवर्णसञ्ज्ञासत्त्वादाकारे परतोऽपि 'हशि चे'त्युत्से प्राप्ते ह्रस्वाकार एवेति नियमार्थमतो रोरिति

परेष्विति । इदमुपलक्षणम्,–'एतेषु विद्यमानस्ये'त्यपि बोध्यं, तेन हकारादीनामकारादिषु परतो दीर्घादिसङ्ग्रहः । **अच्त्वं स्यादिति ।** अच्पदबोध्यत्वं स्यादित्यर्थः । इदं 'प्रत्याहारघटकेष्वपि ग्राहकशास्त्रप्रवृत्ति'रिति मते, व्यक्तिपक्षे च बोध्यम् ।

अणुदि । अणमुद्दिश्य सवर्णबोधकताऽत्र विधीयते । 'सवर्णस्ये'त्यस्य–'बोधक'

❀ अभिनव-चन्द्रिका ❀

स्सवर्णसञ्ज्ञको भवति । वै० 'स्ववृत्ति–अच्त्वाभावविशिष्टात्वाभावविशिष्टाच्त्वाभावहल्त्वाभाव'तदन्यतरस्तद्वत्त्व'स्वनिष्ठजन्यतानिरूपितजनकताविशिष्टजनकतानिरूपितजन्यतावत्त्वै'तदुभयसम्बन्धेन । जनकतावैशिष्ट्यञ्च 'स्वव्यापकत्व''स्वव्याप्यत्वै'तदुभयसम्बन्धेनेत्यदोषात् । अथ वा वृत्तौ 'मिथ'इति पूर्वान्वयि, तथा च मिथः तुल्यास्यप्रयत्नं सवर्णसञ्ज्ञं भवतीति सूत्रार्थः । मिथःपदार्थश्च–सम्बन्धविशिष्टसम्बन्धसम्बन्धित्वं । वै० 'स्वप्रतियोगितासमानाधिकरणानुयोगितानिरूपकत्व' 'स्वानुयोगितासमानाधिकरणप्रतियोगितानिरूपकत्व''स्वभिन्नत्व' 'स्ववृत्तिसंसर्गतावच्छेदकरूपवत्त्वै'तच्चतुष्टयसम्बन्धेन। देवदत्तो यज्ञदत्तं नमस्करोति, यज्ञदत्तश्चैत्रं नमस्करोति, तत्र 'देवदत्तयज्ञदत्तौ परस्परं नमस्कुरुत' इति प्रयोगवारणाय आद्यम्।'तत्रैव यज्ञदत्तं चैत्रो नमस्कुरुते' इति वारणाय द्वितीयं,देवदत्तो यत्रात्मानं नमस्करोति तत्र परस्परन्नमस्करोतीतिप्रयोगवारणाय तृतीयं, देवदत्तो यत्र यज्ञदत्तं नमस्करोति, यज्ञदत्तश्च देवदत्तं ताडयति तत्र 'परस्परं नमस्कुरुत' इति प्रयोगवारणाय चतुर्थम् । प्रकृते चानुयोगिकत्वप्रतियोगित्वे च अज्निष्ठे हल्निष्ठे वा विवक्षिते, न तु अज्निष्ठा प्रतियोगिता हल्निष्ठा चानुयोगिता, न वा हल्निष्ठा प्रतियोगिता अज्निष्ठानुयोगिता । अत्रैव नाज्झलाविति-तात्पर्यग्राहकमित्यदोषादिति दिक् ।

बोधक इति शेष इति । 'घटकतये'ति शेष इत्यपि बोध्यम् । तथा च अण् उदिच्च घटक-

❀ चिदस्थिमाला ❀

सम्भवेन पदद्वयपर्यन्तधावनं व्यर्थमिति सूचयितुमाह–**इदमिति ।** ननु अच्शब्दस्य सञ्ज्ञाशब्दत्वेन तदुत्तरभावप्रत्ययात्तेन शब्दस्यैव बोधनादनन्वयापत्तिरत आह–**अच्पदेति ।** इदं=हकारादौ तेन तत्त्वापादनम् । घटकेष्वपि=तद्बोध्यघटकानुच्चारितद्वितीयादिवर्णेष्वपि । **मत इति ।** 'अज्झलोः प्रतिषेधे'त्यादिवदतो वार्तिककृतो मत इत्यर्थः। अन्यथा हस्य तत्त्वेऽपि इकारादेरनुच्चारितत्वेन शादेस्तत्त्वाप्राप्त्या हकारादीनामित्याद्युक्त्यसङ्गतिः स्पष्टैव । 'मते' इत्यनेनारुचिः सूचिता–नायं सिद्धान्तः, उच्चारितस्यैव तत्त्वमित्यणुदित्सूत्रभाष्यविरोधादितिरूपा । **व्यक्तीति ।** जातिपक्षे दोष एव न, इत्वशत्वादिजातेर्भेदात्, तत्सूत्रे जातिपक्षस्याभावाच्च, एवञ्च तदा तथोक्त्यसङ्गतिरेवेति भावः । ननु मूलोक्तः सञ्ज्ञासञ्ज्ञिभावो न युक्तः, विभिन्नविभक्तिकत्वात्, किञ्च 'सिद्धं धर्मिण'मित्यादिन्यायविरोधादत आह–**अणमिति ।** सम्बद्धविधेयानुपादानादिदमपि कथमत आह–**सवर्णेति ।** अर्थविशेष्यकशक्तिग्रहवत्पदविशेष्यकस्यापि तस्य स्वीकारात् । एवमन्य-

❀ सदाशिवभट्टीयम् ❀

सूचयितुमाह—**उपलक्षणेति ।** भावप्रत्ययान्तस्य सञ्ज्ञाशब्दपरत्वादनन्वयोऽत आह—**बोध्येति ।** इदं=शकारादिसंग्राहकस्य 'हकारादी'त्यादिपदस्योपादानम् । जातिपक्षे तु जातेर्भेदात् शङ्कैव नेति भावः ।

❀ विषमपदविवृतिः ❀

सूत्रमिति भावः । **अत एव भाष्य इति ।** आकारप्रश्लेषादेवेत्यर्थः । **अणमुद्दिश्येति ।** तेन सञ्ज्ञायाः

❀ वरवर्णिनी ❀

अणमुद्दिश्येति । अथ कोऽर्थोऽस्य सूत्रस्य ? 'अणसवर्णान्गृह्णाती'त्यर्थे व्यक्तिपक्षे'ऽस्य च्वा'वित्यादावकारस्याण्त्वाभावेन सवर्णग्रहणानापत्तौ 'मालीभवती'त्यादावीत्त्वानापत्तेः, जातिपक्षेऽपि–उच्चारित-

इति शेषः । आदेशादौ सवर्णग्रहणवारणायाह—**प्रतीयते इति ।**

परे तु—'प्रत्ययग्रहणमेकदेशानुमत्या 'भाव्यमानेन सवर्णानां ग्रहणं ने'ति परिभाषां

❀ **अभिनव-चन्द्रिका** ❀

तया सवर्णान्गृह्णातीति सूत्रार्थः । अण्घटितमुदिच्च स्वादिसवर्णान्गृह्णातीति यावत् । एतेन "—'न चाणुदित्सूत्रं व्यर्थं, प्रत्याहाराद्यवर्णेषु ककारादिचिह्नेन स एवायमिति प्रत्यभिज्ञयाऽण्त्वादणुदित्सूत्रं चरितार्थ'मिति शेखरोऽसङ्गतः । प्रत्याहाराद्यवर्णस्य अनर्थकत्वेन तज्जन्योपस्थित्या शाब्दबोधाजननात्—"इत्यपास्तम् । इगादिपदानां घटकतया स्वादिसवर्णग्राहकत्वेन शाब्दबोधे बाधकाभावात् ।

❀ **चिदस्थिमाला** ❀

त्रापि बोध्यम् । यत्तु,—**रत्नाकरकृत्** "—'कृत्रिमाकृत्रिमे'तिन्यायेन तत्सञ्ज्ञकस्यैव ग्रहणेनादेशादीनामनिषेधे 'वृतो वेत्यादिव्यर्थम्—अतो यौगिकादर—" इति तन्न, द्वयोः प्रसिद्धत्व एव तन्न्यायसञ्चारात्, तद्धनयन्नाह—**आदेशादाविति ।** आदिना आगमपरिग्रहः,मूलादेस्तदनुयायि**रत्नाकरादे**श्च चिन्त्यत्वं ध्वनयितुं सिद्धान्तमाह—**परे त्विति । एकदेशेति ।** परिभाषायां भाव्यमानत्वेनाभिमतप्रत्ययादेशागमसमूहैकदेशप्रत्ययस्यात्रोच्चारणेन तदंशे निषेधसम्मत्येत्यर्थः । **ज्ञापयतीति ।** न च स्वस्मिन् चारितार्थ्याभावः, भाव्यमानः प्रत्ययभिन्न एवेतिभ्रमनिवर्तकत्वात्, उदिदंशे परिभाषाया अप्रवृत्तिरित्याजस्येन बोधनार्थत्वाच्च । उदित्साहचर्येण विधेयांशेऽणंशस्य प्रवृत्तेरेव हि तस्य वैयर्थ्यं ज्ञापकत्वमूलम्, अन्यथा प्रत्ययमात्रांशे निषेधांशासाफल्ये ज्ञापकस्यासङ्गतिरेव—'वाक्येवाक्यैकदेश'इति न्यायेन'श्तिपा शपे'तिज्ञापकैकाज्ग्रहणवद् 'गतिकारके'ति ज्ञापकाऽतिङ्ग्रहणवच्च

❀ **वरवर्णिनी** ❀

स्यैव प्रत्यायकतया—'इको यणची'त्यादाविगादिबोध्योकारादिभिरण्त्वेऽपि सवर्णग्रहणानापत्ते**र्ल्वादिभ्य** इत्यादिनिर्देशासङ्गतेश्च । 'अण्बोधकं पदं सवर्णग्राहक'मित्यपि **नार्थः**, 'अस्य च्वा'वित्यादावपदस्ये'को यणची' त्यादाविगादिपदस्याण्बोधकत्वेन दीर्घाकारेकारादेर्ग्रहणेऽपि—उकारादेरनुच्चारितस्य दीर्घादिग्राहकत्वानुपपत्तेरनुद्धारात् । **किञ्च**—यत्किञ्चित्सवर्णग्रहणवारणाय—'अण्बोधकं स्वबोध्या'नित्येवमर्थस्यावश्यमाश्रयणीयत्वेन—इगादेः समुदितस्यैव सहग्रहणात्सञ्ज्ञात्वे—स्वसवर्णाप्रसिद्ध्या दीर्घेकारादिग्रहणानापत्तेः । **नचा**'ण्बोधकं स्वबोध्यसवर्णान्गृह्णाती'त्यर्थस्वीकारेणोक्तदोषविरह इति वाच्यम्, अशादिपदस्याप्यण्बोधकपदतया स्वबोध्यजकारादिसवर्णचकारादेरपि ग्रहणापत्तौ 'देवाश्चरन्ती'त्यादौ यत्वापत्तेः । **नचाण्मात्रबोधकं** पदमित्याद्यर्थे न दोष इति वाच्यम्, अशादिपदस्यातथात्वेन दीर्घाकारादिग्रहणानापत्तेः । **न चा**'ण्बोधकं स्वबोध्याण्सवर्णान्गृह्णाती'त्यर्थेन न दोषः, जकारादेरण्त्वाभावादिति वाच्यं, प्रत्ययादिपदानामपि—अण्बोधकत्वेन स्वबोध्याण्सवर्णग्रहणापत्तेः, अर्थवत्सूत्रन्तु हिरुगादौ चरितार्थमिति न 'तदारम्भसामर्थ्याद्राम इत्यादौ न दोष'इति वक्तुं शक्यम् । 'व्यासज्यवृत्तिधर्मावच्छिन्नविषयत्वाप्रयोजकं यदण्बोधकं पद'मित्यर्थे—प्रत्ययादिपदानां भिस्भ्यसादिवृत्तिप्रत्ययत्वरूपव्यासज्यवृत्तिधर्मावच्छिन्नविषताप्रयोजकतयाऽप्रयोजकत्वविरहेणोक्तदोषाभावेपि—ह्रस्वदीर्घादिपदैरुदात्तादिपदैश्च स्वसवर्णग्रहणापत्तिर्दुर्वारैवेति चेदत्रास्म**द्गुरुचरणाः**"——'अणिविशिष्टं पदं स्वबोध्याण्सवर्णान्गृह्णाती'त्यर्थः । वै० 'स्वघटितत्व'"स्वसमभिव्याहृतानुबन्धेतरवर्णाघटितत्वो'भयसम्बन्धेन । नातो ह्रस्व-प्रत्ययादिपदेऽतिप्रसङ्गः—"इति **श्रीस्नेहिरामशास्त्रिणः । केचित्तु**—अणिनिष्ठवर्णत्वव्याप्यधर्मावच्छिन्नवर्णविशिष्टं पदं स्वबोध्याण्सवर्णान्गृह्णातीत्यर्थः, वै० 'स्वाद्यवयवकत्व' 'स्वाघटितवर्णद्वयारब्धसमुदायाघटितत्वो'भयसम्बन्धेन । तथा च—अणिनिष्ठो वर्णत्वव्याप्यो धर्मोऽत्वादिः, तदवच्छिन्नोऽकारस्तदाद्यवयवकत्वं, तादृशाकारेतरवर्णद्वयारब्ध-घटादि-समुदायाघटितत्वञ्चाजादिप्रत्याहारे सुलभमिति तत्र लक्षणसमन्वयः । अकारे तु व्यपदेशिवद्भावेन स्वाद्यवयवकत्वसत्त्वाल्लक्षणसमन्वयः । प्रत्यय—धि—ह्रस्वोदात्तादिपदादौ च तादृशसम्बन्धविरहान्न दोषः । स्वस्यापि स्वव्याप्यत्वे तु—'स्वभिन्नत्व'मपि वर्णत्वव्याप्यधर्मे विशेषणीयम्—" इत्याहुः । **अन्ये तु**—'अशब्दसञ्ज्ञे'त्यनुवर्त्य प्रत्ययादिपदेषु दोषं निरस्यन्ति,

ज्ञापयतीति युक्तम् । प्रत्ययपदस्य तदर्थत्वन्तु न युक्तं—वार्त्तिककृता टित्किन्मित्सूपसङ्ख्यानोक्तेः । भाष्यकृता चा'प्रत्ययग्रहणमेतत्परिभाषाज्ञापक'मित्युक्तेः । 'ज्यादादीयसः' इति सूत्रे भाष्ये ध्वनितमिदम् । तत्र हि—"किमर्थमादित्युच्यते ? 'ज्याद्' इत्येवोच्यतां, का

❀ अभिनव-चन्द्रिका ❀

सहग्रहणेन आदेरेव सञ्ज्ञात्वेन प्रत्याहाराद्यवर्णस्यानर्थक्याभावाच्च । **ज्ञापयतीति** । न च पुनरपि

❀ चिदस्थिमाला ❀

'ज्ञापयती'त्यस्य बोधयतीत्यर्थकत्वाच्चेति भावः । ननूक्तक्लेशान्नेदं युक्तमिति मूलोक्तमेव युक्तमत आह—**प्रत्ययेति** । न तु तस्य तत्त्वं युक्तमित्यन्वयः । अत एवोभयसाधारणहेतूक्तिरग्रे । **तदर्थेति** । विधीयमानार्थकत्वमित्यर्थः । **उपेति** । निषेधेत्यादिः । ननु अज्ञात्वा वार्तिककृता तथोक्तमत आह—**भाष्येति** । **उक्तेरित्यग्रे चो** योज्यः, अन्यथा तदसङ्गतिः स्पष्टैव । नन्वियमप्येकदेशयुक्तिरस्तु, किञ्चाप्रत्ययग्रहणस्यान्यत्रेवात्र न स्वारसिकं ज्ञापकत्वं, किञ्चोपायस्योपायान्तरादूषकत्वमत आह—**ज्यादादीति** । **चो** 'ध्वनित'मित्यग्रे

❀ ज्योत्स्ना ❀

दोषः प्रसज्येतेति भावः । **परे त्वप्रत्ययग्रहणमिति** । अस्य 'व्यर्थं स'दिति वाक्यशेषः । वैयर्थ्यञ्च—प्रत्ययसञ्ज्ञाया अन्वर्थत्वा'त्सनाशंसे'त्युकारग्राह्यदीर्घस्यार्थाप्रत्यायकत्वेन तदप्रवृत्त्या विधातुमशक्यत्वादिति भाष्योक्तमनुसन्धेयम् । **इति युक्तमिति** । सत्यपि ज्ञापके प्रत्ययग्रहणस्य कथं स्वस्मिश्चरितार्थतेत्यत्रेदञ्चिन्त्यम् । भाष्यन्तु—'ज्ञापयती'त्यस्य रूढ्यर्थप्रतिक्षेपेणान्वर्थताश्रयणपूर्वकं

❀ सदाशिवभट्टीयम् ❀

अणुदित् । **ज्ञापयतीति** । 'गतिकारके'तिवद्बोधयतीत्यर्थः, अतो न सार्थक्यप्रश्नावसरः । ननु वार्तिकस्योपदेशन इति वदज्ञानेन प्रवृत्तिरत आह—**भाष्येति** । ननु भाष्यमपि योगरूढ्या परिभाषार्थबोधयतीत्यर्थकमत आह—**ज्यादेति** । एवञ्च शब्दार्थसम्बन्धनिश्चयस्य ऋष्यनुभवसिद्धत्वेन तदनुक्त्या

❀ विषमपदविवृतिः ❀

सञ्ज्ञिनः **पूर्वमुच्चारणं** न दोषाय । तस्या एवोद्देश्यत्वादिति सूचितं भवति । **एतत्परिभाषाज्ञापकमिति** । 'स्थालीपुलाक'न्यायेनैकदेशानुमत्येति बोध्यम् । दूषणान्तरं चाह—**जातिपक्षे इति** ।

❀ वरवर्णिनी ❀

इगादिपदेषु 'त्वादिभ्यश्चे'त्यादिनिर्देशाद्**दीर्घाज्जसी**त्यादिज्ञापकाच्च न दोष'इति तदाशय—"इति **गौडाः** ।

गुरुवर**श्रीबालशास्त्रि**चरणास्तु—'साक्षात्परम्परया वा व्यासज्यवृत्तिधर्मावच्छिन्नविषयत्वाप्रयोजकं यदण्बोधकं पदं तत्स्वबोध्याण्सवर्णान्गृह्णाती'त्येवार्थः, प्रत्ययादिपदे प्रत्ययपदजन्यबोधविषयतावच्छेदकत्वस्य व्यासज्यवर्त्तिन्येव प्रत्ययत्वे सत्त्वान्न दोषः, [भिसादौ प्रत्ययत्वस्य व्यासज्यवृत्तित्वात्]। 'साक्षात्परम्परये'त्युक्तेर्गुणपदवत्त्वादिना बोधकगुणादिपदादपि न सवर्णग्रहणापत्तिः, गुणादिपदस्य प्रत्येकमकारादिनिष्ठविषयताप्रयोजकतया साक्षाद्व्यासज्यवृत्तिधर्मावच्छिन्नविषयत्वाप्रयोजकत्वेऽपि व्यासज्यवृत्तिह्रस्वपदत्वादिरूपानुपूर्व्याऽपि परम्परया ह्रस्वादिपदप्रयोज्यविषयतावच्छेदकत्वात्—" इत्याहुः । एतन्नये 'कालघटितधर्मानवच्छिन्ने' त्युक्तेर्नावश्यकतेति महदेव लाघवमित्यस्म**त्पितृ**चरणाः । विस्तरस्त्वस्मत्कृत**शब्देन्दुशेखराभिनवराजलक्ष्म्यां** द्रष्टव्यः ।

टिदिति । लविता, बभूव, अनड्वन्नित्यादौ पक्षे इडादयो दीर्घा अपि प्राप्नुवन्ति, वुक् कदाचिदनुनासिकोऽपि प्राप्नोतीति टिदादीनामपि प्रतिषेधः करणीय इति वार्तिकार्थः । **ननूपदेशने** इति वार्तिकवत्तदर्थाज्ञानेनैवेदं वार्तिकं प्रवृत्तमित्यरुचेराह—**भाष्यकृतेति** । 'कृत्रिमाकृत्रिम'न्यायेनाप्रत्ययपदेन प्रत्ययभिन्नस्य ग्रहणमित्याशङ्कया वार्तिकोत्थानम्, ज्ञापकपदस्य बोधनार्थकतया सूत्राक्षरमर्यादयैव तदर्थलाभाद्वार्त्तिकं व्यर्थमित्याशयेन च भाष्यं प्रवृत्तमिति न प्राचीनमते तद्विरोध इत्यरुचेराह—**ज्यादेति** । **परे तु** "अस्यापि भाष्यस्य कृत्रिमन्यायप्रवृत्तिशङ्कयैव प्रवृत्तिरित्येवं तज्ज्ञापनसम्भवान्न प्राचीनमते तद्विरोधः"—इत्याहुः ।

रूपसिद्धिः? आन्तर्यतो दीर्घस्य दीर्घो भविष्यति, एवन्तर्हीदमेव ज्ञापयति भवत्येषा परिभाषा—'भाव्यमानेन'—''इत्यादि। त्वदुक्तव्याख्याने हि पूर्वपक्षसिद्धान्तयोरुभयोरपि निर्दलत्वापत्तिः।

जातिपक्षेऽप्यनयैव परिभाषया सवर्णग्रहणं वारणीयं, व्यक्तिपक्षे गुणाभेदकत्वप्राप्तश्च वारणीयं, तेन 'घटव'दित्यादौ नानुनासिको वकारः। एतेन—'ऽजुदिदित्येव सिद्धेऽण्ग्रहणेन यण्सु गुणभेदकत्वं ज्ञाप्यते' इति परास्तम्—'इत्याहुः।

❀ अभिनव-चन्द्रिका ❀

'ज्याद ईयस'इत्येवोच्यतां, लोपेनैव सिद्धेऽकारादेशविधानसामर्थ्येन पररूपाप्रवृत्त्या सवर्णदीर्घेण ज्यायानिति रूपसिद्धेरिति वाच्यं,वृद्धशब्दाण्ण्यन्तात्क्विपि ज्यादेशे वृद्धौ पुकि ईयसुनि श्रवणार्थमकारोच्चारणस्य चारितार्थ्यात्। दीर्घोच्चारणेन द्विमात्रिक एव विधेय इति पाणिनितात्पर्यावधारणेन पाणिनितात्पर्यविषयीभूतद्विमात्रिकविधानाय दीर्घोच्चारणसार्थक्येन स्वांशे चारितार्थ्यन्नास्तीति वक्तुम-

❀ चिदस्थिमाला ❀

योज्यः। इदम्=प्रत्ययपदस्य तदर्थत्वायुक्तत्वम्। **का रूपेति**। अदादेशे 'अतो गुणे' इति पररूपापत्तिः, न च विधिवैयर्थ्यं, ज्येयानित्यस्य वारणार्थत्वादिति भावः। 'अणुदि'त्सूत्रेण सवर्णग्रहणेऽपि 'स्थानेऽन्तर' इति दीर्घ एव, न ह्रस्व इति पररूपाप्राप्त्या सवर्णदीर्घेण रूपसिद्धिरित्याशयेन समाधत्ते–**आन्तर्यत इति**। अत एवात्र तपरः कृतः। इदमेव=आद्ग्रहणमेव। अत्रैवकारोल्लेखेन 'स्वस्मिंश्चारितार्थ्येन स्वारसिकज्ञापकतास्यैव नत्वन्यस्ये'ति—'अणुदित्सूत्रे च ज्ञापयतीत्यस्याद्ग्रहणं सामान्यापेक्षं ज्ञापकमितिबोधनाय तत्सिद्धान्तं बोधयतीत्यर्थ' इति च सूचितम्। **त्यादीत्यस्येत्युक्त**मिति शेषः। **त्वदुक्तेति**। प्रत्ययपदस्य मूलोक्तेत्यर्थः। **ख्याने**। तृतीयान्तपाठः क्वचित्। **हि**स्त्वर्थे। पूर्वपक्षस्याज्ञानकृतत्वादाह—**सिद्धान्तेति**। त्वदुक्तस्यैव सिद्धान्तत्वेन वक्तव्यत्वात्। एवञ्च शब्दार्थसम्बन्धनिश्चयस्य ऋष्यनुभवसिद्धत्वेन तदनुक्त्या तस्य तदर्थत्वमप्रामाणिकमत एवोपायस्योपायान्तरेत्यविषयत्वं, तत्रैकदेश्यनुक्तित्वञ्च। न च अत्राप्येकदेश्युक्तित्वं, तत्कल्पकभाष्यान्तरानुपलम्भादिति भावः। तत्सत्त्वेऽपि परिभाषावश्यकतामाह–**जातीति**। **अपि**रुक्तपक्षसमुच्चायकः। **अनयैव**–न तूक्तार्थकाप्रत्यय इत्यनेन, असम्भवात्, उदिदंशे एव तच्चारितार्थ्यापत्तेश्च, एकयोगनिर्दिष्टत्वात्। ननूदिदंशे सिद्धान्तवदसम्बन्धेनागत्या योगविभागेन जातिपक्षे तेनापि वारणसम्भवस्तपरसूत्रवदत आह—**व्यक्तीति**। अन्यथा शास्त्रेणाण्रूपशास्त्रप्राप्तिरेव वारणीया स्यान्नाशास्त्रगुणभेदकत्वप्राप्तिरिति दोषस्तदवस्थ इति भावः। **वकार इति**। 'मादुपधायाः' इत्यनेनेति भावः। **कृष्ण–कौस्तुभा**द्युक्तिं खण्डयति–**एतेनेति**। उक्तरीत्योक्तसमूलपरिभाषाया आवश्यकत्वेन,

❀ ज्योत्स्ना ❀

बोधयतीति प्रदर्शितरीत्यैव नेयमिति **परिभाषाप्रदीपार्चिषि** निरूपितं विस्तरात्। ननु मात्रिकेण द्विमात्रिकस्य ग्रहणं मात्रिकत्वादिरूपतत्तत्कार्यस्य तत्तत्स्थानेष्वारोपाद्भेदघटिततौल्यस्य

❀ सदाशिवभट्टीयम् ❀

तस्य तदर्थकत्वमप्रामाणिकमिति भावः। **एतेनेति**। आवश्यकपरिभाषया 'घटव'दित्यादिसिद्धौ ज्ञापने फलाभावेनेत्यर्थः।

❀ विषमपदविवृतिः ❀

'अप्रत्यय'इत्यस्याविधीयमानार्थकत्वे तु जातिपक्षप्राप्तस्य निषेधो न स्यात्, 'अनन्तरस्ये'ति न्यायात्, तस्य पर्युदासत्वाच्चेति भावः। **परास्तमिति**। तथा चाणुदित्सूत्रे चाण्ग्रहणमेव कार्यम्, 'हयवरट्'सूत्रस्थम्-'अथ किमर्थमन्तस्थानामण्सूपदेशः क्रियत' इति भाष्यं त्वेकदेश्युक्तिरिति भावः।

ननु 'चो'रित्यादावनुवादे कथमुदित्त्वमिति चेन्न, व्याकरणान्तरे एषामुदित्सञ्ज्ञकत्वेनादोषात् । उपदेशशब्दस्य करणसाधनत्वेन शास्त्रपरत्वे तस्यापि शास्त्रत्वेनेत्त्वप्रवृत्तेः सुलभत्वाच्च । चो भिन्नक्रम इत्याह—**उदिच्चेति** । यद्यपि समुदायसवर्णिनोऽप्रसिद्धास्तथापि तदवयव-चादि-सवर्णा एवात्र तत्सवर्णा बोध्याः। ह्रस्वाकाराद्यो[दि]रपि काल-पुरुषाद्युपाधिभेदेन

❀ अभिनव-चन्द्रिका ❀

शक्यत्वाच्च । दीर्घोच्चारणं विनापि 'ज्याया'निति रूपसिद्धिर्भवतीति पूर्वपक्षान्तरमेतत् । **चादि-सवर्णा इति** । एतत्साहचर्येण—अण्पदं अण्घटकपरमिति—तदपि स्वादिसवर्णानेव गृह्णातीत्यपि

❀ चिदस्थिमाला ❀

व्यक्तिपक्षेऽपि गुणाभेदकत्वप्राप्तस्य तया वारणसम्भवेन भेदकत्वज्ञापने फलाभावेन, सिद्धान्ते तस्यैवासत्त्वेन चेत्यर्थः । **सिद्धे इति** । यवलांशे गुणानामभेदकत्वान्निर्वाह इति भावः । 'चो'रित्यादावुदित्करणादप्रत्ययस्योदिदंशेऽसम्बन्ध इति ध्वनयितुमाह—**नन्विति** । कुगादौ तु न तद्ग्रहः, 'उकारमात्रेत' इति व्याख्यानात् । एतेन 'तस्योच्चारणार्थत्वान्ने'ति **रत्नाकराद्युक्तम**पास्तमिति भावः । **कथमिति** । आद्योच्चारणरूपोपदेशाभावादिति भावः । तत्र मूलमतेन समाधत्ते—**व्याकेति** । एषां=चादीनाम् । सिद्धान्तमतेनाह—**उपेति** । तस्यापि=अनुवादस्यापि । अपिः–विधेयसमुच्चायकः । **शास्त्रत्वेनेत्वेति** । तद्व्याप्यप्रातिपदिकत्वेनेत्यर्थः । **चो भिन्नेति** । न च स्वसमुच्चायकः, सवर्णत्वेनैव तल्लाभात् । एतेन 'चात्स्वरूपस्ये'ति **रत्नाकराद्युक्त**मपास्तमिति भावः । यत्तु—उदिदित्यतद्गुणसंविज्ञानो बहुव्रीहिः—तेन चोरित्यादौ चादीनामेव सञ्ज्ञात्वम्, अन्यथोक्तरीत्योकारस्य पदपर्यालोचनदशायामेव निवृत्तत्वेन सूत्रस्यासम्भवदुक्तिकत्वापत्तेरिति, तन्न,—निमित्तसत्त्वेन तद्गुणत्वस्यैव सत्त्वात्, अनन्तराद्यर्थेऽसमासाच्च, तद्ध्वनयन्नाह—**यद्यपीति । समुदायेति** । इत्सञ्ज्ञकोकारविशिष्टेत्यर्थः । स्थानप्रयत्नभेदादिति भावः । **सवर्णिन इति** । अत्र सवर्णशब्दो धर्मपरः, **तच्छब्दे**नोभयत्रोक्तरूपसमुदायपरामर्शः । ननु ह्रस्वाद्योरकाराद्योः कथं मिथः सवर्णत्वम्? भेदघटिततुल्यत्वाभावेनातुल्यस्थानत्वात्, तथा च **चस्तथैव** व्याख्येयोऽत आह—**ह्रस्वेति** । कार्यस्यैक्येन 'कार्यभेदा'दिति प्रागुक्तयुक्तेरसम्भवादाह—**कालेति** । अन्यत्रानिष्टत्वस्येष्टस्य

❀ ज्योत्स्ना ❀

सावर्ण्यप्रयोजकस्य सत्त्वादस्तु, न तु मात्रिकस्यापीत्यत आह—**ह्रस्वाकाराद्यो[दि]रपीति** ।

❀ सदाशिवभट्टीयम् ❀

सुलभत्वादिति । अत्र पक्षे कुक्–टुक्–नुम्–तुक्–धुडादौ न दोषः, 'उकारमात्रेदिति' व्याख्यानात्, 'परेश्च घाङ्के'त्यादाविव स्वरूपपरत्वं वा । **सवर्णिन इति** । सवर्णशब्दोऽत्र धर्मपरः । **चादीति** । इशादाविव नव्यमतेऽनुवादेपि इत्सञ्ज्ञालोपप्रवृत्तौ प्रतिबन्धकाभावेनोकारविनिर्मुक्तस्यैव चादेरुपस्थित्या न्यायसिद्धमिदमित्य**न्ये** । उकाररूपावयवसवर्णानां चुशब्दो न ग्राहकः, 'न विभक्तौ' वितिनिषेधेन सोरुकारस्येत्त्वानापत्त्याऽऽद्गुण इत्यादिनिर्देशासङ्गतेः । ननु यथाश्रुत एव स्वरूपपरिचायक आस्तां किं भिन्नक्रमत्वेनात आह—**ह्रस्वेति** । 'दैत्यारि'रित्यादौ दीर्घाद्यर्थमारोपस्यावश्यकत्वादिति भावः ।

❀ विषमपदविवृतिः ❀

सवर्णस्य चेति । चकारादसवर्णस्यापीत्यर्थः स्यादित्यत आह—**चो भिन्नक्रम इति । ग्राहकसूत्र**

स्थानेषु भेदमारोप्य तुल्यस्थानत्वं सूपपादम्। **अत्रेति**। ग्राहकसूत्र एवेत्यर्थः। व्याख्यानादिति भावः। 'उपसर्गादृती'त्यादितपरकरणादिति तु न युक्तम्, लृकारग्रहणेन चारितार्थ्यात्। एवमिणपि—परेणैव, 'अचि श्नु'ति सूत्रे—'इण' इत्येव सिद्धे 'य्वो'रिति गुरुनिर्देशाद्व्याख्यानाच्चेति लण्सूत्रे भाष्ये स्पष्टम्। नन्वेवम्—'अस्य च्वा'वित्यादौ सवर्ण-

❀ अभिनव-चन्द्रिका ❀

बोध्यम्। **ग्राहकसूत्र एवेति**। एतेन तपरसूत्रे अण्ग्रहणानुवृत्तिकल्पे तत्राप्यण्पदे परणकारेणैव प्रत्याहार इति बोध्यते।

❀ चिदस्थिमाला ❀

यथाश्रुतादलाभात्सर्वं वाक्यं सावधारण'मितिन्यायेनाह—**ग्राहकेति**। अत्र ज्ञापकमुर्कदित्यत्र तकारः, स हि चुरादिण्यन्तात्कृतधातोर्लुङि चङि अचीकृतदित्यत्र दीर्घऋकारस्थाने ह्रस्व एव यथा स्यादित्येतदर्थः। पूर्वेणात्राण्ग्रहणे तु उद्देश्ये विधेये चानण्त्वाद्भिन्नकालाग्रहणेन तस्य स्थानित्वादेशत्वयोरप्रसक्त्या व्यर्थं तत्स्यात्। न च तपरसूत्रेण लृग्रहणार्थं तत्, स्थानेऽन्तरेतिवारणेन तद्ग्रहणे फलाभावात्। न चैवमपि विधेयत्वात्स्वस्मिन्नचारितार्थ्यम्, 'अण्कर्मणि चे'ति सूत्रस्थभाष्यप्रामाण्येन प्रतिप्रसवविधेर्युक्ततया तपरत्वाभावे आदेशान्तरनिवृत्त्यर्थत्वेन स्वरूपाभ्यनुज्ञानार्थतयाऽपूर्वबोध्यत्वाभावेनाविधेयत्वात्। कृते तु तस्मिन् भाव्यमानताप्रीत्यन्यदिति—तदेतदभिप्रेत्याह—**व्याख्यानादिति**। ज्ञापकादित्यर्थः। यद्वा उपदेशपरम्परात इत्यर्थः, एतदुभयसङ्ग्रहार्थमेव **व्याख्यानादि**त्युक्तम्। **रत्नाकरदण्ड्या**द्युक्तिं खण्डयति— **उपेति**। आदिना 'ऋत उ'दित्यादिपरिग्रहः। एतेन लृवर्णस्य ऋवदित्यतिदेशपक्षे तस्य तत्त्वसम्भव इति **मन्दोक्त**मपास्तम्, तस्य मुनित्रयानुक्तत्वात्, अत एव सावर्ण्यवचनेन समानजात्यतिदेशमेव वक्ष्यति, तस्य प्रत्याख्यानप्रकारत्वाच्च।

प्रसङ्गादाह--**एवमिति**। **गुर्विति**। एकमात्रापदकृतेत्यादिः। ज्ञापकमुक्त्वा उपदेशपरम्परामाह—**व्याख्यानाच्चेतीति**। **एवमिति**—अणुदित्सूत्राङ्गीकारे इत्यर्थः। आदिना 'अकः सवर्णे'इत्यादिपरिग्रहः—सूत्र-

❀ ज्योत्स्ना ❀

लृकारग्रहणेनेति। अण्ग्रहणाननुवृत्तिमभिप्रेत्येदम्, वस्तुतः सूत्रमते लृकारस्य ऋकारेण सावर्ण्याभावेन ग्रहणाभावाद्वार्तिकमतेऽण्ग्रहणाभावेन सन्देहाभावाच्चिन्त्यमेतत्। प्रत्याहारे=इगादौ। तत्प्रत्यभिज्ञानेन=वर्णसमाम्नायस्थत्वप्रत्यभिज्ञानेन। ननूच्चारितस्य सञ्ज्ञास्वरूपान्तर्भावेण टि-घु-भाद्यन्तर्गत-

❀ सदाशिवभट्टीयम् ❀

लृकारग्रहणेति। 'यो ह्युत्सूत्रं कथयति नादो गृह्येते'ति भाष्यग्रन्थेन, 'सूत्रेष्वेव हि तत्सर्वं यद्वृत्तौ यच्च वार्तिके' इति **हरि**ग्रन्थेन च तयोः सावर्ण्यस्य सूत्रमतेपि सत्त्वात्। वार्तिकमतेपि—पूर्वेणाण्ग्रहणपक्षे एकारादावाकृतिनिर्देशप्राप्तसवर्णग्रहणाभावायाप्रत्यय इत्यंशवन्नियमार्थमावश्यकत्वेन सत्त्वादण्ग्रहणस्य—तन्मतेऽप्ययं ग्रन्थो बोध्यः। 'लृवर्णस्य ऋव'दिति तु प्रत्याख्यानप्रकार इति—प्रकृते नावसरस्तस्येति सर्वमवदातम्।

अन्ये तु तपरकरणस्य परेणाण्ग्रहणं बोधयित्वा ग्रहणकशास्त्रप्रवृत्त्याऽष्टादशानां ग्रहणं प्रापय्य तपरसूत्रप्रवृत्त्या तद्बाधकल्पनया चारितार्थ्यकल्पनापेक्षया ऋलृवर्णयोः सावर्ण्यबोधनद्वारा तत्प्रवृत्त्या तद्ग्रहणेन साफल्यकल्पनाया एव लघुत्वादिति भावः। अत एव 'न युक्त'मित्येवोक्तं, न तु 'चिन्त्यमपास्तं' वा, तत्र 'तन्त्रे'त्यादीत्याहुः।

❀ विषमपदविवृतिः ❀

एवेति। एतन्नियमपरे तपरसूत्रेपि बोध्यम्। **इति तु न युक्तमिति**। तपरसूत्रेऽणपदानुवृत्तौ तु युक्तमेवैतत्। अत्र परेणाण्ग्रहणे 'उर'दिति तपरकरणं भाष्योक्तमपि ज्ञापकं बोध्यम्। तदुपपादन-

ग्रहणं न प्राप्नोति, अण्ग्रहणेन वर्णसमाम्नायस्थानामेव ग्रहणेन,—णकारादिचिह्नेन प्रत्याहारे तत्प्रत्यभिज्ञानेन तत्रत्याद्यवर्णोपस्थितेषु—उच्चारिताभेदेन गृहीतेषु-सूत्रस्य चारितार्थ्येन,—व्यक्तिपक्षे तत्रत्यात्रत्यव्यक्त्योर्भेदेन—प्रकृते प्रत्याहारघटकद्वितीयवर्णादौ चोच्चारितस्यैव ग्राहकत्वादप्रवृत्तेरिति चेन्न, जातिपक्षाश्रयणेनादोषात् ।

❀ अभिनव-चन्द्रिका ❀

चारितार्थ्येनेति । 'अण्घटितं स्वादिसवर्णान्गृह्णाती'ति सूत्रार्थात्, 'आदिरन्त्येने'तिसूत्रेण सञ्ज्ञादेरेवेति स्वीकाराद्वेति भावः । एतेन'एकशक्तिनिरूपकार्थविषयकशाब्दबुद्धित्वावच्छिन्नम् अपरशक्तिनिरूपकार्थविषयकतात्पर्यज्ञानम्प्रतिबध्नातीति प्रतिबध्यप्रतिबन्धकभावमूलक'सकृदुच्चरित'न्यायेन प्रत्याहाराद्यवर्णेन अष्टादशोपस्थितावपि-प्रत्याहारनिष्ठशक्तिनिरूपकार्थविषयकतात्पर्यज्ञानस्य प्रत्याहाराद्यवर्णविषयकशाब्दबुद्धेः प्रतिबन्धकत्वेनेदमसङ्गत'मित्यपास्तं, प्रत्याहारस्थले स्वाद्यवर्णे पृथक्शक्त्यभावेन निरुक्तप्रतिबध्यप्रतिबन्धकभाव स्यतन्मूलकसकृदुच्चरितन्यायस्य च विषयाभावादिति दिक् । **जातिपक्षाश्रयणेनादोषादिति** । परे तु-'अण्बोधकं सवर्णान्गृह्णाती'ति सूत्रार्थः । 'आदिरन्त्येने'तिसूत्रबोधितसञ्ज्ञा मध्यगबोध्यानामेव । ननु 'इको यणची'त्यादौ अण्बोधकपदसवर्णाप्रसिद्ध्या सवर्णग्रहणं न स्यात् । न चाऽण्बोधकं स्वबोध्यसवर्णान्गृह्णातीति न दोष इति वाच्यम्, अशादिप्रत्याहारस्थले स्वबोध्यदादिसवर्णतादिनामपि ग्रहणापत्तेश्च । न चाण्मात्रबोधकं स्वबोध्यसवर्णान् गृह्णातीति न दोष इति वाच्यं, तत्रैव स्वबोध्यादिसवर्णदीर्घाकारादिग्रहणानापत्तेरिति चेन्न । 'अण्बोधकं

❀ चिदस्थिमाला ❀

सामर्थ्याद्भविष्यतीति शङ्कां निराचष्टे—**णकारादीति** । प्रत्याहारे=तद्घटके । **तदिति** । आक्षरसमाम्नायिकेत्यर्थः **तत्रत्येति** । प्रत्याहारस्थेत्यर्थः । **पेति** । आक्षरसमाम्नायिकेष्विति शेषः । नन्वेवमप्यनुच्चारितत्वात्कथं ग्रहणमत आह—**उच्चारितेति । भेदेनेति** । अनण्त्वादिति शेषः । अप्रवृत्तावन्वयः । प्रकृते=अस्य च्वावित्यादौ । आदिमाद्वं तदपीति प्रकटयन् आद्येत्युक्तिव्यावर्त्यमाह—**प्रत्येति । घटकेति** । तद्बोध्यघटकेत्यर्थः । अत्रोक्तहेत्वसङ्गमादन्यहेतुमाह-**चोच्चारीति** । तदभेदेन गृहीतेत्यादि-लक्षणापक्षस्य मनोरमाद्युक्तस्यासाङ्गत्यं ध्वनयितुमाह—**जातीति** ।

❀ ज्योत्स्ना ❀

वन्न बोधकत्वमत आह—**तत्रत्याद्यवर्णोपस्थितेष्विति** । ननूपस्थितस्योच्चारितत्वाभादग्राहकत्वमत आह—**उच्चारिताभेदेनेति** । 'न ऋदिल्लृदित्प्रयुक्तकार्यसङ्करो यथा व्यक्तिपक्षे' [मूले १२९ पृष्ठे] इति चूर्णिकान्तःपाठः । जातिपक्षे ग्राहकसूत्रेऽण्ग्रहणाभावात्सत्यपि हकाराकारयोः सावर्ण्ये न ग्रहणमत आह

❀ विषमपदविवृतिः ❀

प्रकारस्तु **कौस्तुभप्रभायां** बोध्यः । **न प्राप्नोतीति** । अत्र हेतुर्व्यक्तिपक्षे—**तत्रत्यात्रत्यव्यक्त्योर्भेदेनेत्येतावानेव, चारितार्थ्येनेत्यन्तस्तु** अण्ग्रहणसार्थक्यप्रदर्शनपरः । नन्वाद्यवर्णेष्युरणित्यादौ कथं ग्रहणकशास्त्रप्रवृत्तिः ? व्यक्तिपक्षे पाणिन्युच्चारितस्याक्षरसमाम्नायस्थाद्भेदादित्यत आह—**णकारादिचिह्नेनेति** । नन्वा'दिरन्त्येने'त्यत्र सहग्रहणात्समुदायस्यैव सञ्ज्ञात्वं, तथा चाणित्यत्राकारस्य निरर्थकत्वात्कथं तत्राणुदित्सूत्रप्रवृत्तिरित्यत आह—**तत्रत्येति** । ननूपस्थितस्यानुच्चारितत्वात्कथं प्रत्यायकत्वमत आह—**उच्चारिताभेदेनेति** । नन्वेवं च 'णकारादिचिह्नेने'ति पूर्वग्रन्थो ऽसङ्गतः अण्पदेन वर्णसमाम्नायस्थानामेवोपस्थितेः । आद्यवर्णोपस्थितेरिति तु असङ्गतमनुपयुक्तञ्च । तस्य निरर्थकत्वेनानुपस्थापकत्वादिति चेन्न । प्रत्याहाराद्यवर्णे णकारादिचिह्नेनाक्षरसमाम्नायस्थाभेदग्रहणं विनोच्चारिताद्यवर्णाभेदेनाक्षरसमाम्नायस्थस्य ग्रहणासम्भव इत्याशयात् । **प्रकृते इति** । 'अस्य च्वा'वित्यादौ । दूषणान्तरं चाह—**प्रत्याहारघटकेति** । तत्र हेतुमाह—**उच्चारितस्यैवेति** ।

अत एवानेकतकारादीनां झल्त्वादिसिद्धिः । सूत्रेऽण्ग्रहणं च न कार्यम् । 'ऋलृवर्णयोः सावर्ण्य'मित्यनेन समानजातित्वस्यैवातिदेशेनो'पसर्गादृती'त्यादौ न दोषः, एतद्व्यतिरिक्तसवर्णे समानजातित्वसत्त्वात् । पृथगनुबन्धकरणाच्च न ऋदिल्लृदित्प्रयुक्तकार्यसङ्करः । अत्र पक्षे अइउण्सूत्रशेषोक्तभाष्यरीत्या तपरसूत्रस्य जातिग्रहणप्राप्तसवर्णग्रहणनियाम-

❀ अभिनव-चन्द्रिका ❀

पदं स्वबोध्याण्सवर्णान् गृह्णातीति—अर्थेनादोषात् । नचैवमपि अर्थवदित्यत्रत्यप्रत्ययपदस्य अकारादिणान्तसमुदायघटकबोध्योकारादिबोधकत्वेन तत्रापि-स्वबोध्यो य अकारादिणान्तघटकबोध्यः-'सनाशंसभिक्ष उ'रित्यादिः, तत्सवर्णग्रहणे—हाहा हूहू इत्यादावपि 'अप्रत्यय'इति पर्युदासापत्तिरिति वाच्यं, व्यासज्यवृत्तिधर्मानवच्छिन्ना या अण्वृत्तिविषयता तादृशविषयताप्रयोजकं स्वबोध्याण्सवर्णान्गृह्णातीत्यर्थेन प्रत्ययत्वस्य व्यासज्यवृत्तित्वेनादोषात् । नचैवमपि 'ह्रस्वस्य पिती'त्यादौ ह्रस्वादिपदस्य व्यासज्यवृत्तिधर्मानवच्छिन्नाण्वृत्तिविषयताप्रयोजकत्वेन सवर्णग्रहणे प्रदायेत्यादौ तुगाद्यापत्तिरिति वाच्यं,कालघटितधर्मानवच्छिन्ना व्यासज्यवृत्तिधर्मानवच्छिन्ना च या अण्वृत्तिविषयता तादृशविषयताप्रयोजकं स्वबोध्याऽण्सवर्णान्गृह्णातीत्यर्थेनादोषात् । अत एव भाष्ये अनणि झलादिप्रत्याहारे एव दोषो दत्त इत्याहुः ।

❀ चिदस्थिमाला ❀

तद्द्रढयितुमस्यावश्यकतामाह—**अत एवेति** । जातिपक्षाश्रयणादेवेत्यर्थः । एवेन लक्षणाव्यवच्छेदः । **सिद्धिरिति** । अत एवावात्तामित्यादौ लोपः, सूत्रस्य तु—अभित्था इत्यादिरवकाश इति भावः ।

नन्वेवमाद्यवर्णेऽप्यत एव सिद्धिरिति सूत्रं व्यर्थमत आह—**सूत्रे इति** । यत्त्वत्र पक्षेऽण्ग्रहणस्थाने ऋग्रहणं कार्यमिति **कौस्तुभरत्नाकरादय**स्तत्खण्डयितुमाह—**ऋलृवर्णयोरिति** । एतेन ऋलृसाधारणजात्यभावात्कथं जातिपक्षे सिद्धिरित्यपास्तम् । इदञ्च ऋष्युक्त्यनुरोधेन गौरवमनुसृत्योक्तं, लाघवेन तदननुरोधे तु सावर्ण्यवचनस्थाने तस्य 'ऋव'दित्यतिदेशेन सिद्धिरत एव न **शब्दरत्न**विरोध इति बोध्यम् ।

समानेति । 'अन्यत्रान्यशब्देने'ति न्यायेनेति भावः । तदेवाह—**एतदिति** । अकारादावचीत्यर्थः । एतेनैतद्भिन्ने कखादौ सावर्ण्ये सत्यपि तदभावाच्चिन्त्यमिदमित्यपास्तम् । नन्वेवं मिथः साङ्कर्यापत्तिरत आह—**पृथगिति** । चस्त्वर्थे । नन्वेवमपि विधेयेऽपि दोषोऽतः सूत्रेऽण्ग्रहणमित्युक्तिस्वारस्यं प्रकटयन्—**कौस्तुभरत्नाकरा**द्युक्त्यसाङ्गत्यं ध्वनयंश्चाह—**अत्र पक्षे इति** । जातिपक्षे इत्यर्थः । 'व्यक्तिपक्षे इवात्र पक्षेऽपी'ति पाठान्तरम् । भाष्यरीत्या=भाष्यबलात् । तत्र तथोक्तत्वेन तस्य दृष्टान्तत्वमित्याह-**तपरेति** । **अग्रेति** । तुल्य-

❀ सदाशिवभट्टीयम् ❀

समानजातित्वस्यैवेति । समानो वर्णो=जातिरित्यर्थः । स्वार्थे ष्यञ् । 'वर्णाश्रमाचारवा'नित्यादौ वर्णपदेन जातेर्व्यवहारादिति भावः । होतृकारे दीर्घस्तु **अकोकीति** न्यासेन सुवचः । अत्रैव पक्षे शाकल्यप्रतिबन्धस्तु न फलम्,—'ऋत्यक' इत्यस्याप्रवृत्तेः। इदञ्च ऋष्युक्त्यनुरोधेन गौरवमनुसृत्योक्तम्। लाघवादरे तु 'लृवर्णस्य ऋव'दिति शब्दरत्नोक्तमनुसन्धेयम् । **एतद्व्यतिरिक्तेति** । आकारादावचीत्यर्थः । अच्त्वेन

❀ विषमपदविवृतिः ❀

अण्ग्रहणञ्चेति । **चेन** 'नाज्झला'विति सूत्रसङ्ग्रहः । ननु ऋलृवर्णयोःसावर्ण्येपि ऋकारेण न लृकारग्रहणं, विभिन्नजातित्वात्, सावर्ण्यं तु होतृ लृकार इत्यत्र 'कःसवर्णे' दीर्घार्थं स्यादित्याशङ्क्याह—**ऋलृवर्णयोरिति** । ननु समानजातित्वनिर्देशे सावर्ण्याभावाद्धोतृलृकार इत्यत्र सवर्णदीर्घो नःस्यादित्यत आह—**एतद्व्यतिरिक्तेति** । तथा च सावर्ण्यमपि—समानजातित्वाव्यापकत्वात्समानजातित्वातिदेशेनातिदिष्टमिति भावः । ननु ऋलृवर्णयोः सावर्ण्यस्याविधानेन पृथगनुबन्धकरणेन कस्यानित्यत्वं ज्ञाप्यमित्यत आह—**पृथगिति** । 'अत्र पक्षे' इति पाठः । '**व्यक्तिपक्षे**' इति त्वपपाठः,अनन्वयात् ।

कत्ववदप्रत्यय इत्यस्य योगविभागेन—तत्प्राप्तसवर्णग्रहणनिषेधकत्वात्—'त्यदादीनामः' इत्यादौ विधेये न दोषः । एवं—गुणाभेदकत्वप्राप्तसवर्णग्रहणनिषेधकत्वमप्यस्य बोद्धयम् । अत एव 'घटव'दित्यादौ मतोर्मस्य नानुनासिको वकारः । **सामर्थ्यादिति ।** 'एचोऽयवायावः' इत्यादौ स्थानेऽन्तरतमसूत्रेणैव निर्वाह इति वक्ष्यते । 'न य्वाभ्या'-मित्यत्र ऐऔ स्वरूपेण पाठ्यौ, 'वृद्धिरादैजि'इत्यत्राप्यैङित्येव पाठ्यं, तत्र गुणसूत्रे च परस्परसवर्णसञ्ज्ञावादिमते चतुर्णां ग्रहणसत्त्वात् । अत्रैतत्सूत्रवैयर्थ्योपन्यासेन तन्मूल-

ॐ चिदस्थिमाला ॐ

न्यायादिति भावः । एकयोगे उदिदंशे एव सम्बन्धापत्तिरत आह—**योगेति** । 'भाव्यमानेने'ति परिभाषाबोधनद्वारेति शेषः । **तदिति** । जातिग्रहणेत्यर्थः । अस्यावश्यकतां ध्वनयितुं व्यक्तिपक्षे इव जातिपक्षे फलान्तरमाह—**एवमिति** । तुल्यायुक्त्या=योगविभागेनेत्यर्थः । विनिगमनाविरहादिति भावः । **अत एवेति** । उभयप्राप्तनिषेधकत्वादेवेत्यर्थः । अन्यथा जातिग्रहणप्राप्तवारणेऽप्येवंरीत्या स दुर्वार एवेति भावः ।

यद्यप्यन्यतरसामर्थ्यादिति युक्तम्—तथापि प्रथमोपस्थितत्वेनान्तरङ्गत्वात्तदेवास्त्वित्याशयेनाह—मूले-**ऐऔजिति** । यथास्थितसूत्राशयेनाह—**तेनैव इति** । नन्वेवमेङोयेवेति पाठे यथासङ्ख्यमिष्टं न स्यात्, 'स्थानेऽन्तरे'ति तु न, एकारैकारयोरायोर्मिथोव्यवस्थानुपपत्तेरत आह—**एचोयवेति** । 'विवृतावर्णस्य विवृतावर्ण' इत्यादेर्वक्ष्यमाणत्वादिति भावः । नन्वेवमपि 'न य्वाभ्या' मित्यावेङिति पाठे विधेयत्वात्तयोरग्रहणेऽनिष्टं स्पष्टमेवात आह—न य्वाभ्यामिति । नन्वेवमपि 'वृद्धिरादैच्' इत्यादौ का गतिरत आह—**वृद्धिरिति ।** अपिः पूर्वसमुच्चये । तत्र=वृद्धिसञ्ज्ञासूत्रे । यत्तु सत्यपि सावर्ण्ये गुणवृद्धिसञ्ज्ञयोः प्रतिनियतनिर्देशसामर्थ्यादेव सवर्णग्राहकत्वाभावः सुवच इति **रत्नाकरस्तन्न**, सामर्थ्यात्साङ्कर्याभावेऽपि वैपरीत्येन—साफल्यस्यापि सुवचत्वात्, तद्ध्वनयन्नाह—**चतुर्णामिति** । ननु तर्ह्येतदर्थमेव सूत्रमस्तु, किञ्च बहुषु स्वरूपेण पाठे गौरवम्, किञ्चैवम्—पूर्वपक्षसिद्धान्तयोः मूलोक्तयोर्निर्दलत्वापत्तिः—तद्धि पूर्वपक्षे सिद्धान्तदूषणातिरिक्तदूषणकत्वम् अस्ति चात्र वक्ष्यमाणं तत्, अत एव सिद्धान्ते निर्दलत्वमत आह—**अत्रैतदिति** । मूले—'ऐऔजि'तिसूत्रवैयर्थ्योपन्यासेनेत्यर्थः । **तन्मूलेति** । 'ऐऔजि'तिसूत्रवैयर्थ्यमूलकस्येत्यर्थः । ननूक्त-

ॐ सदाशिवभट्टीयम् ॐ

सादृश्यात् । अतः कखादौ भिन्नजातीयेन सत्यपि सावर्ण्ये न दोषः । **योगविभागेनेति** । 'भाव्यमानेने'ति परिभाषाबोधनद्वारेति भावः । अस्याऽऽवश्यकतां ध्वनयितुं व्यक्तिपक्ष इव जातिपक्षेपि फलान्तरमाह—**एवमिति** । तुल्ययुक्त्या योगविभागेनेत्यर्थः । विनिगमनाविरहादिति भावः । अस्य **फलं**—प्रागुक्तमपि दार्ढ्याय स्मरति—**अत एवेति** । उभयप्राप्तनिषेधकत्वादेवेत्यर्थः । अन्यथा जातिग्रहणप्राप्तवारणेप्येवंरीत्या स दुर्वार एवेति भावः । एवञ्चैवमित्यादिग्रन्थावश्यकत्वं विषयभेदात्, एवञ्च क्वचि**देव**मित्यादिग्रन्थादर्शनं प्रामादिकमिति बोध्यम् । यद्यप्य'न्यतरसूत्रसामर्थ्या'दिति युक्तं वक्तुं, तथापि प्रथमोपस्थितत्वेनान्तरङ्गत्वात्तदेवास्त्वित्याशयेनाह—मूले-**ऐऔजिति** । यथास्थितसूत्राशयेनाह—**तेनैच इति** । ननु सूत्रसत्त्वे जातिपक्षे जातीनां चतुष्टं व्यक्तिपक्षे शक्यार्थमादाय यथासङ्ख्यमिष्टं च सिध्यति, तदभावे कथमत आह—**एचोऽयवेति** । नन्वेवमपि 'न य्वाभ्या'मित्यादौ एङिति पाठे विधेयत्वात्तयोरग्रहणे एङोश्च विधानेऽप्यनिष्टं स्पष्टमेवात आह—**न य्वेति** । नन्वेवमानुपूर्वीका श्रुतिरेवाऽन्यार्थमिति—न तद्वैयर्थ्यमत आह—**अत्रैत**-

ॐ विषमपदविवृतिः ॐ

तस्य सर्वस्येति । संयोगान्तलोपादेः । **शब्दबोध्यो वर्ण इति** । इदमयुक्तम्—उच्चारितस्यैव प्रत्यायकत्वात्, इण्प्रत्याहारे प्लुतैचोऽघटकत्वापत्तौ ततः **परस्य** षत्वानापत्तेश्च । भाष्यप्रामाण्यात्त-

१. ननु ऐ औजिति सूत्राभावेऽनुपदिष्टत्वात्तयोरसत्त्वं प्रसज्येतेति चेन्न । 'एओ—ऐऔ'जित्येव सिद्धेऽनुबन्धद्वयकरणसामर्थ्यादित्येव मूलाशयेनादोषादिति **श्रीगुरु**चरणाः ।

कस्य गुणवृद्धिसञ्ज्ञाविधौ प्रत्याहारद्वयग्रहणवैयर्थ्यस्य, 'प्लुतावैच' 'एचोऽप्रगृह्यस्ये'त्यत्र तद्ग्रहणवैयर्थ्यस्य च सङ्ग्रहो बोध्यः । प्रयत्नभेदेनाप्यसावर्ण्यमेतयोः प्रागुक्तं न विस्मर्त्तव्यम् ।

यद्यपीति । इदं व्यक्तिपक्षे,–"वर्णानामुपदेशस्तावदुपदेशोत्तरकालेत्सञ्ज्ञा, तदुत्तरकालमादिरन्त्येनेति प्रत्याहारस्तदुत्तरकाला सवर्णसञ्ज्ञा, तदुत्तरकालमणुदिदिति, एतेन सर्वेण समुदितेन वाक्येनान्यत्र सवर्णानाङ्ग्रहणं भवति, न चात्रे'कारः शकारं गृह्णाती–"ति 'नाज्झलौ'वितिसूत्रभाष्योक्त'वाक्यापरिसमाप्ति'न्यायादित्यर्थः । अयं भावः–'आदिरन्त्येने'ति प्रत्याहारसिद्धौ 'नाज्झलौ'वित्येतद्वाक्यार्थबोधे सति निर्णीतैतद्विषयपरिहारेण सवर्णसञ्ज्ञाबोध्यनिश्चये अणुदित्सूत्रेण तावतां ग्रहणं बोधनीयम्, अन्यथा बाधकसम्भावनया तुल्यास्यसूत्रजशक्तिग्रहेऽप्रामाण्यसन्देहेनाणुदिच्छास्त्रजबोधानापत्तिः,—न चैतद्वाक्यार्थ-

---

❀ अभिनव-चन्द्रिका ❀

अणुदिच्छास्त्रजबोधानापत्तिरिति । **न स्वस्मिन्नपि स्वाङ्गे इति** । स्वं प्रति, स्वं कारणं प्रति वा स्वस्य कारणत्वासम्भवादिति भावः, अन्यथा आत्माश्रयान्योन्याश्रयाद्यापत्तेः ।

❀ चिदस्थिमाला ❀

रीत्यास्यापि साफल्यमत आह—**प्लुतावैचइति** । **तदिति** । प्रत्याहारद्वये इत्यर्थः । एवं मूलं कथञ्चित्संयोज्य सिद्धान्तमतेनाह—**प्रयत्नेति** । एतेनैवमानुपूर्वीका श्रुतिरेव चतुर्दशसूत्रीति अन्यार्थमावश्यकत्वेनेदं चिन्त्यमित्यपास्तम् । जातिपक्षेऽण्ग्रहणस्यैवाभावादाह—**इदमिति** । तत्र हेतुमाह—**वर्णानामिति** । उपदेशः=आद्यमुच्चारणम् । तावत्=आदौ, तच्च प्रत्यासत्त्यैतच्छास्त्रप्रवर्तकानामिति बोध्यम् । **कालेत्सञ्ज्ञेति** । ज्ञातस्य सञ्ज्ञाविधानात् । तदपि तदव्यवधानेनैव, पदार्थोपस्थितिरपि पश्चादिति भावः । **तदुत्तरकालमिति** । सामान्ये नपुंसकम् । प्रत्याहारः='आदि'रितिसूत्रैकवाक्यतयाऽणादिसञ्ज्ञारूपः। **सवर्णसञ्ज्ञेति**। इष्टविषये तत्सञ्ज्ञित्वग्रहः । **तदुत्तरेति** । सवर्णपदबोध्यनिश्चयोत्तरकालं तत्सूत्रमकारादिभिः स्वसवर्णत्वेन ज्ञातानां ग्रहणं बोधयतीत्यर्थः । **एतेनेति** । सर्वसमूहयुक्तेना'णुदित्सूत्रेणे'त्यर्थः । समूहस्याप्युक्तरीत्या परम्परयोपयोगादिति भावः । अन्यत्र=समुदितघटकान्या'कः सवर्णे'इत्यादावविधेये इति शेषः । **नचात्र**=नहि-'नाज्झलौ'वित्यत्र । इदं वार्तिकरीत्येति नोच्चारित इत्यणुदित्सूत्रभाष्यविरोधः । **वाक्यापरीति** । स्वस्वाङ्गान्यतरबोधकाले–समुदितवाक्यार्थापरीत्यर्थः । सवर्णपदार्थनिर्णयं विना तद्ग्रहणबोधनासामर्थ्यमिति यावत् । तथा च—साकाङ्क्षतयार्थवद्वाक्यस्याप्यपरिसमाप्तिरिति—भावः । नन्वेतावताऽन्यत्र केवलेन ग्रहणंनेत्येव लभ्येत, किञ्च—समुदायमध्ये निषेधस्याप्रवेश इति कथं तत्र तेन तदग्रहणमत आह–**अयमिति** । **निश्चये इति** । अनेन प्रतियोगिज्ञानार्थं ततः प्राक् तस्य सामान्यतो बोधोऽस्त्येवेति सूचितम् । अन्यथा=सामान्यबोधोत्तरं निषेधाद्यपर्यालोचने । **नापत्तिरिति** । तत्सन्देहस्य प्रतिबन्धकत्वादिति भावः । **नचैतदिति** । नहि

❀ ज्योत्स्ना ❀

इदं व्यक्ति पक्ष इति । ननु ढत्वस्यासिद्धत्वात्संयोगान्तलोप एवेह वक्तुमुचितोऽत आह—

❀ सदाशिवभट्टीयम् ❀

दिति । ननु समुदायमध्ये निषेधस्याप्रवेशात्कथन्तेन तत्रैतदग्रहणमत आह—**अयं भाव इति** । अच्पदं विहायाणित्युक्तिसाफल्यायाह—**गुणा इति** । **अन्ये तु** जातेः पदार्थत्वेपि गुणानां भेदकत्वे सूत्रमावश्यकमित्य**वतारयामासुः** ।

बोधात्प्राक् तन्निश्चय'–इति । **होढ इति** । हकारेणाऽऽकारग्रहणे सति यद्यत्प्राप्नोति तस्य सर्वस्याप्युपलक्षणमिदम् । ननु यण्सवर्णिनामप्रसिद्धेरज्ग्रहणेनैव सिद्धेऽण्ग्रहणं व्यर्थमत आह–**यवला इति** । 'अमो ऽनुनासिका न ह्रा'विति शिक्षोक्तेर्यण इति नोक्तम् । तेन सँय्यन्तेत्यादौ परसवर्णनिष्पन्नानुनासिकयवलाना'मनचिचे'ति द्वित्वं सिद्ध्यति । 'हलो यमा' मिति लोपस्तु वैकल्पिकः । अत्रेदं बोद्ध्यम्–'व्यक्तिः पदार्थो गुणा भेदका' इत्यभिमानेनात्र सूत्रेऽण्ग्रहणमिति ।

'अतो भिस'इत्यादौ तपरकरणा'त्सहिवहो'रितिसूत्रस्थवर्णग्रहणाद्व्याख्यानाच्च तपरपदे बहुव्रीहिपञ्चमीतत्पुरुषावित्याह–**तः पर इत्यादिना** । वर्णग्रहणे तु-तत्सामर्थ्यादत्वावच्छिन्न-सर्ववर्णग्रहणबोधनेन तपरसूत्राप्रवृत्तिः । आद्योदाहरणम्–'अतो भिस'इति, अन्त्योदाहरणं–'वृद्धिरादै'जिति । यद्यप्यत्र सञ्ज्ञा तात्परा, न च तत्समकालस्तत्सवर्णो वा प्रसिद्ध-

❀ अभिनव-चन्द्रिका ❀

बहुव्रीहिपञ्चमीतत्पुरुषाविति । आवृत्त्या अर्थद्वयस्वीकारादिति भावः ।

❀ चिदस्थिमाला ❀

'नाज्झला'वित्येतदित्यर्थः । **तन्निश्चय इति** । सवर्णपदबोध्यनिश्चय इत्यर्थः । तथा च सामान्यतो—विधिबोधस्य प्राक्सत्त्वेऽपि तन्निश्चयाभावात्तत्र तदप्रवृत्तिरिति भावः । ननु ढत्वादीनामसिद्धत्वात्सर्वत्र संयोगान्तलोप एव वक्तुमुचितोऽत आह–**हकारेणेति** । एतेन''–अनादरेण,'संयोगान्तलोपो झलो लोपः' इति पक्षेण वा तथोक्तमिति-उक्तरीत्या वाग्घरित्यादौ 'झयो ह' इति घः–इति, **कौस्तुभमनोरमा**द्युक्तं चिन्त्य''मिति च **रत्नाकरोक्त**मपास्तम् । 'उपलक्षणत्वात्, हस्य झल्त्वाच्च । अत एवाह–**सर्वस्याप्युपेति** । 'अनुनासि-के'तिग्रन्थस्यैदैतोरित्यादिग्रन्थेन विच्छेदादव्यवहितसङ्गत्यभावाद्व्यवहितसङ्गतिमाह—**नन्विति** । ननु-'अइउण्'सूत्रभाष्यादौ 'यणः सानुनासिकाः'इत्युक्तेरत्र तथैव कुतो नोक्तमत आह–**अम इति** । 'न ह्रा'विति भिन्ने पदे, अत एव 'हयवरट्'सूत्रस्थभाष्यसङ्गतिः । तथा च–तद्भाष्यादि तद्भिन्नपरमिति भावः । तत्फल-माह—**तेनेति** । पठितशुद्धानामुभयग्राहकत्वेन तेषां यत्वेनेत्यर्थः । **परेति** । 'वा पदान्ते'तीत्यादिः । लोपेन द्वित्वस्य न फलमिति खण्डयति—**हल इति** । अत्र चेदमेवाज्ग्रहणं व्याख्यानं–वा मानम् । जातिपक्षेऽण्ग्रहणप्रत्याख्यानादाह–**व्यक्तिरिति** । अच्पदं विहायाणित्युक्तिसाफल्यायाह–**गुण इति** ।

अस्यासिद्धान्ततां ध्वनयितुमाह—**अर्भाति** । बहुव्रीहौ मानमाह–**अत इति** । द्वितीय मानमाह–**सहीति** । अथ वर्णग्रहणस्य प्रत्याख्यानादुभयसाधारणं मानमाह—**व्याख्येति** । तन्त्रादिनेति भावः । एतेन तथा **रत्नाकराद्युक्त**मपास्तम् । ननु वर्णग्रहणे कृतेऽपि—अस्य तात्परत्वात्प्रवृत्तिर्दुर्वारेति स्वसिन्न-चारितार्थ्यमेवेति कथमादौ तदुक्तिसम्भवोऽत आह—**वर्णेति** । तेनेति शेषः । 'यावता विने'ति न्यायादिति भावः । **अन्त्यविति** । आकारार्थन्तु न तत्, तस्यानण्त्वाद्गुणानामभेदकत्वाद्दीर्घनिष्ठव्याप्यजातिनिर्देशा-च्चेति भावः । उभयोदाहरणन्तु-'अदेङ्गुण'इति बोध्यम् । द्वितीये शङ्कते—**यद्यप्यत्र सञ्ज्ञेति** । तथा च सञ्ज्ञिनामतत्त्वात्—कथं तन्निमात्रव्यावृत्तिरिति भावः । न च=नहि । तस्य सार्द्धद्विमात्रत्वात्—सिद्धान्ते सवर्णपदानुवृत्तेराह—**तत्सवर्ण इति** । **वा**–इवार्थे चार्थे वा । गुणानां भेदकत्वेनासन्देहार्थ-

❀ ज्योत्स्ना ❀

हकारेणाकारस्येति । '**बहुव्रीहिपञ्चमीतत्पुरुषाविति** । अत्र तत्पुरुषपदन्न सञ्ज्ञापरं, भाष्ये 'पञ्चमीतियोगविभागाभावेन तदसम्भवात्, किन्तूत्तरपदार्थप्रधानस्तत्पुरुष इति लक्षणपरम्, अतः 'सुप्सुपे'ति समासेऽपि न दोष इति भावः । **वर्णग्रहणेत्विति** । 'सहिवहो' रित्यत्र । सञ्ज्ञा=

स्तथापि तपरकरणाद्भाष्यप्रामाण्याच्च 'तात्परशब्दबोध्यो वर्णः स्वसमकालग्राहक'इत्यर्थेनाऽदोषः । इदञ्च विद्ध्यर्थमेव—अण्ग्रहणाननुवृत्तेः । गुणानां भेदकतयाऽनणि विधित्वेऽपि 'वृद्धिरादै'जित्यादावाकारांशे सावकाशेनानेना'तो भिस'इत्यादौ परत्वेना'णुदि'त्सूत्रबाधः । सङ्ख्याकृतव्यवहारस्य परस्परपरिहारेणैव दृष्टतयेह विरोधस्य सत्त्वात् । गुणानामभेदकत्वे

❀ अभिनव-चन्द्रिका ❀

इत्यर्थेनादोष इति । 'तः परो यस्मात्तात्परश्च तद्घटकाजुच्चारणाधिकरणीभूतकालसदृशकालवांश्च यः स्वबोध्यसवर्णस्तं गृह्णाती'ति न दोष इति यावत् । यथा 'अतोभिस''अतोऽ'मित्यादौस्वघटकाकारोच्चारणाधिकरणीभूतकालसदृशकालवृत्तिस्वबोध्यसवर्णस्य ह्रस्वाकारादेरेव ग्रहणमिति न दोषः ।

❀ चिदस्थिमाला ❀

तया च पूर्वार्थत्वसम्भवात्—'अदे'ङित्यत्रैतद्युक्तेर्दुर्वचतया चाह—**भाष्येति ।** 'इदं तर्हि प्रयोजनमान्तर्यत'इत्यादिवृद्धिसूत्रस्थभाष्येत्यर्थः । एतेन—'तपरकरणसामर्थ्यादशब्दसञ्ज्ञेतिनिषेधाद्वा न सवर्णग्रहणमिति' **कौस्तुभा**द्युक्तमपास्तम् । उक्तयुक्तेः, तस्य प्रत्याख्यानाच्च । वार्तिकमतमाह—**इदञ्चेति ।** तपरसूत्रञ्चेत्यर्थः । व्यक्तिपक्षे इति भावः । यद्यप्यणनुवृत्तौ नियामकत्वसम्भवः, तथापि लाघवान्नियमतो विधेर्ज्यायस्त्वमित्याह—**अणिति ।** व्यक्तिपक्षेऽपि गुणाभेदकत्वपक्षे विध्यनुपयोगादाह—**गुणानामिति ।** अयमुभयत्र हेतुः । नन्वेवम्—'अतो भिस' इत्यादावष्टादशग्रहणापत्तिरत आह—**अनणि विधित्वेऽपीति ।** अणुदित्सूत्रस्य तु 'अक' इत्यादौ सावकाशता स्पष्टैव । ननु मिथोऽविषये सावकाशत्वेऽप्यविरोधात्कथं विप्रतिषेधसूत्रसञ्चारोऽआह—**सङ्ख्येति ।** गौण्या मुख्याया वा उत्तरसङ्ख्यायाः पूर्वसङ्ख्याबाधकत्वादिति भावः । स्पष्टञ्चेदम्—अइउण्'सूत्रे भाष्ये । ननु तत्पक्षेऽपि गुणाभेदकत्वेनेदं सुवचमत आह—**गुणेति ।** तदा तदननुवृत्तावनण्यनुपयोगेऽपि अणंशे तेन समकालस्यापि ग्रहणाप्राप्तावपि निरवकाशत्वेनानेन अणुदिदितिबाधेनास्य प्रतिप्रसवविधित्वमेवेति भावः । ननु तद्गुणसंविज्ञानबहुव्रीहिणा अदित्यादि-

❀ ज्योत्स्ना ❀

ऐजित्येवं रूपा । **तपरकरणादिति ।** आकारार्थं तु तन्नेति वक्ष्यते । तात्परशब्दबोध्यः=ऐकाराकाररूपः । ननु तपरसूत्रस्य विधित्वेऽतोभिसित्यादावणुदिदित्यष्टादशानामपि ग्रहणं प्राप्नोत्येवेत्यत आह—**गुणानां भेदकतयेत्यादि ।** ननु विरोधे सति परत्वेन बाधः, विप्रतिषेधे परं कार्य'मिति वचनात्, न चेह तथेत्यत आह—**सङ्ख्याकृतेत्यादि । परस्परपरिहारेणैवेति ।** त्रिपुत्रे द्विपुत्रव्यवहाराभावादित्यर्थः । **विरोधस्येति ।** षट्त्वाष्टादशत्वयोरित्यर्थः । 'गुणानामभेदकत्वन्तु

❀ सदाशिवभट्टीयम् ❀

तपरस्त । नन्वदेङित्यत्र तपरत्वं पूर्वत्र कृतार्थमत आह—**भाष्यप्रमाण्येति । अनवकाशत्वादिति ।** तदा तदननुवृत्तावनण्यनुपयोगेपि अणंशे तेन समकालस्यापि ग्रहणप्राप्तावपि निरवकाशत्वेनानेनाणुदिदिति बाधेनास्य प्रतिप्रसवविधित्वमेवेति भावः । ननु तद्गुणसंविज्ञानेनादित्यस्य सञ्ज्ञात्वमत

❀ विषमपदविवृतिः ❀

परकरणाच्च तात्परशब्दः स्वबोध्यसमकालग्राहक इति तूचितम् । **सङ्ख्याकृतव्यवहारस्येति ।** इदमयुक्तम्—, आकडाराधिकारादन्यत्र सञ्ज्ञयोर्बाध्यबाधकभावाभावात् । न च स्वतो विरोधरहितयोस्तद्बहिर्भूतयोर्बाध्यबाधकभावाभावेपि स्वतो विरुद्धयोस्तदबहिर्भूतयोरपि सोऽस्त्येवेति वाच्यं, सङ्कोचे मानाभावात् । किञ्च—'तपरः षण्णां सञ्ज्ञा' 'अण्त्वष्टादशानां सञ्ज्ञे'त्यनुक्त्या—सवर्णग्राहकत्वतात्कालिकसवर्णग्राहकत्वयोरविरोधेन च—विप्रतिषेधशास्त्राप्रवृत्तिः । एतेन—'गुणानामभेदकत्वेत्वनवकाशत्वाद्बाध' इत्यग्रिमग्रन्थोऽप्यपास्तः । तस्मादण्ग्रहणानुवृत्त्या नियमार्थ एवायं युक्तः,

त्वनवकाशत्वाद्बाध इति बोद्ध्यम् । अत्रावध्यवधिमतोः साजात्येन वर्णस्यैव सञ्ज्ञात्वेऽपि विशिष्टाद्विभक्त्युत्पत्तिः सौत्रत्वाद्बोध्या । 'तत्कालस्ये'त्यस्य—तदुच्चारणकालसमकालस्येत्यर्थस्तदाह—**समकालस्यैवेति** । एवकारो—न्यायसिद्धबाध्यबाधकभावस्यानुवादक इति

❀ चिदस्थिमाला ❀

विशिष्टस्य सञ्ज्ञात्वमत एव ततो विभक्तिस्तत्र, एवञ्च तत्समकालाप्रसिद्ध्या सूत्रं मूकं स्यादत आह—**अत्रेति** । तपरसूत्रे इत्यर्थः । **वध्यवधीति** । तथा च षष्ठ्यर्थबहुव्रीहौ तत्सम्भावनायामपि—अत्र स एव न, किन्तु पञ्चम्यर्थे बहुव्रीहिरिति तथा दुर्वचमिति न दोष इति भावः । वर्णस्यैव='अत' इत्याद्येकदेशस्यैव । विशिष्टात्= अदित्यादितः—'अतोभिसः इत्यादाविति भावः । विवरणविव्रीयमाणयोर्विरोधं खण्डयति—**तत्कालेति** । तत्पदस्य तदुच्चारणकालसदृशे लक्षणा, कालपदेन बहुव्रीहिरिति भावः । ननु विधित्वे एवासङ्गतिरत

❀ ज्योत्स्ना ❀

नैतद्विषय' इति पाठः । सूत्रवैयर्थ्यप्रसङ्गात्तपरेषु गुणानामभेदकत्वन्नेत्यर्थः । एवञ्चाकारांशे गुणान्तरविशिष्टानां ग्राहकस्यैक्षु परत्वाद्बाधकत्वोक्तिर्नानुपपन्नेति भावः । क्वचित्पठ्यते—'गुणानामभेदकत्वेत्वनवकाशत्वाद्बाध' इति, तत्रापि षष्ठ्यर्थे सप्तमी, व्याख्यानाद्गुणानामभेदकत्वस्य बाध इत्युक्तार्थ एव पर्यवसानं बोध्यम् । एतेनानवकाशत्वेन बाधकत्वोक्तिर्वक्ष्यमाणनियमार्थत्वोक्तिविरोधाच्चिन्त्येति परास्तम् । **यदपि**—नियमाद्विधेर्बलीयस्त्वं मन्यमाना नियमार्थत्वोक्तेरेव चिन्त्यतामाहुस्तन्न, अपवादस्यापि सामान्यवाक्यशक्त्यवच्छेदकत्वेन नियमानतिरेकात् । नियमवाक्यानां विधिमुखेन प्रवृत्तेः सर्वसम्मतत्वात् । एतावान् परमपवादनियमयोर्भेदो यदनेकस्मिन्शेषिण्येकस्य शेषस्य प्राप्तौ तत्रैव शेषिविशेषे शेषान्तरविधानेऽपवादत्वं, यथाऽऽ'हवनीये जुहोती'त्यनेनानेकेषु होमेष्वेकस्याऽऽहवनीयस्य प्राप्तौ होमविशेषे 'पदे जुहोती'त्यनेन विधीयमानस्य पदस्य । नियमस्त्वेकस्मिन्शेषिण्यनेकस्य शेषस्यानेकस्मिन्शेषिण्येकस्य वा शेषस्य प्राप्तौ, तत्र शेषिणि शेषविशेषे वा तस्य शेषस्य विधाने, यथा पुरोडाशार्थे एकस्मिन्व्रीहौ प्राप्तयोर्नखविदलनावहननयोर्व्रीहीनवहन्ती'त्यनेनावहननरूपशेषविशेषस्य तत्र विधाने । यथा चे'मामगृभ्णन्रशनामृतस्येत्यश्वाभिधानीमादत्त' इत्यनेन लिङ्गादश्वगर्द्दभरशनयोरेकस्य मन्त्रस्य प्राप्तावश्वरशनारूपशेषिविशेषे पुनस्तस्य विधान इति ।—तद्वत्प्रकृतेऽणुदिदित्यनेनैकस्मिन्समकालासमकालग्राहकत्वप्राप्तौ पुनस्तत्र समकालग्राहकत्वान्नियमत्वमेवास्य वक्तुं युक्तं, भाष्येऽपि तथैवोक्तमित्यन्यदेतत् । कौस्तुभोक्तं दूषयति—**अत्रेति । साजात्येनेति**। 'पाटलिपुत्रकात्पूर्वोऽय' मित्युक्ते देशप्रतीतेरेव दर्शनात् । **न्यायसिद्धेति**। ननु चेह परत्वाद्बाध्यबाधकभाव उपक्रान्तस्तत्र शास्त्रसिद्धेति वक्तव्यम् ?। एवं मन्यते—विप्रतिषेधसूत्रे यदि विधिपक्षस्तदा परशास्त्रप्रवृत्तौ निमित्तसद्भावात्पूर्वशास्त्रेण प्रवर्त्तितव्यं ततश्च 'समकालस्यैवे ति नियमो न लभ्यस्तदर्थमेवं वक्तव्यं, पूर्वशास्त्रप्रवृत्तिः प्रथमप्रवृत्तायाः परशास्त्रप्रवृत्तेः वैयर्थ्यसम्पादिका चेत् न तया प्रवर्त्तितव्यमिति न्यायानुसरणस्यैव नियमनिश्चायकत्वाभिप्रायेण—**न्यायसिद्धेत्युक्तमिति** ।

❀ सदाशिवभट्टीयम् ❀

एव ततो विभक्तिरेवञ्च तत्समकालाऽप्रसिद्ध्या सूत्रं मूकं स्यादित्यत आह—**अत्रेति** । एवञ्च षष्ठ्यर्थबहुव्रीहौ तत्सम्भवेप्यत्र पञ्चम्यर्थे स इति न दोष इति भावः । **साजात्येनेति** । इदमुपलक्षणं, पञ्चम्यर्थबहुव्रीहिविग्रहप्रदर्शनपरभाष्यस्य । **एतेन**—पञ्चमीसमासे एङादिशब्दस्यावधित्वेनाङ्गीकारादतोऽसदित्यपास्तम् । गमकात्तत्र त्यागेपि अत्र त्यागे मानाभावाच्च । नचैवं वृतिमत्त्वेपि तकारापेक्षत्वात्पारिभाषिकार्थ-

भावः । जातिपक्षे तु नियमार्थमेव—सवर्णग्रहणानुवृत्तेः । एवं 'गुणानामभेदकत्व'मिति—'वृद्धिरादै'जितिसूत्रभाष्यसम्मत—सिद्धान्त—पक्षेऽपि नियमार्थमेव ।

इदम्—'आद्गुणः' इत्यादौ विभक्तितकारे न प्रवर्त्तते, 'उपसर्गादृती'ति तपरकरणात् । 'ऋदोर'बित्यादौ दकार एवेति न दोषः । स च—पञ्चमीसमासाभावे तकार इवोच्चारणार्थो,

❀ अभिनव-चन्द्रिका ❀

नियमार्थमेवेति । स्यादेतत्—यत्र गुणानां भेदकत्वे 'अतो भिस ऐ'सित्यादौ परत्वात्तपर-

❀ चिदस्थिमाला ❀

आह—**एवेति** । **न्यायेति** । परत्वादित्यर्थः । भाष्यमतमाह—**जातीति** । **तुरुक्तवैलक्षण्ये** ।—ननु तदाण्ग्रहणभावेन कथं तत्त्वमत आह—**सवर्णेति** । 'तपरः सवर्णस्य चेत्सर्वस्य जात्याश्रयतया ग्राहकस्तर्हि स्वसमकालस्यैवे'त्यर्थः । एवञ्च—यद्व्यक्तिमुपादाय जातिनिर्देशस्तद्भिन्नकालव्यक्तियुतजात्यग्रह इति फलितम् । **एवमिति** । अत्र पक्षे 'जात्याश्रयतये'त्यस्य स्थाने गुणाभेदकत्वेनेति बोध्यम् । एवं सिद्धान्तमुक्त्वा पक्षद्वयातिप्रसङ्गं निराचष्टे—**इदमिति** । नन्वेवमपि 'ऋदो'रित्यादौ तातपरत्वादतिप्रसङ्ग एवात आह—**ऋदोरिति** । ननु एवं किं फलं तस्यात आह—**स चेति** । दकारश्चेत्यर्थः । **साभावे इति** । एकदेशयुक्ततत्पक्षे इत्यर्थः । विनिगमनाविरहादाह—**मुखेति** । नन्वेवमपि प्राचां मतेऽतिप्रसङ्ग

❀ ज्योत्स्ना ❀

ननु स्वसमकालानां भिन्नजातीयानामिकारादीनां ग्रहणार्थं विध्यर्थतैव कस्मान्नेत्यत आह—**सवर्णेति** । यद्यपि—सवर्णग्रहणानुवृत्तिर्विधिपक्षेऽप्यस्ति, तथापि—नियमार्थतापक्षस्तां विना

❀ सदाशिवभट्टीयम् ❀

वत्त्वं तस्य नेति वाच्यं, तत्र विभक्तीतरस्य—प्रकृतिप्रत्ययान्यतरस्य वृत्तिमतो वा ग्रहीष्यमाणत्वात् । नन्वेवमप्यवयवात्—सन्निपातपरिभाषया न सुप्, समुदायात्तु 'धु'डित्यत्रैव सुलभमिति चेत्सत्यम् । **नियमार्थेति** । 'तपरः सवर्णस्य चेत्सर्वस्य जात्याश्रयतया ग्राहकस्तर्हि स्वसमकालस्यैवे'त्यर्थः । एवञ्च यद्व्यक्तिमादाय जातिनिर्देशस्तद्भिन्नकालव्यक्तियुक्तजात्यग्रह इति फलितम् । **एवञ्चेति** । अयं भावः—व्यक्तिपक्षे पक्षद्वयेपि परत्वानवकाशत्वाभ्यामणुदित्सूत्रबाधेन विधित्वेपि सूत्रसार्थक्यमेवेति लाघवात्तत्र तदेवाश्रितम्, अत्र तु पक्षे विधित्वे बाध्यशास्त्रस्याभावेन जातिनिर्देशेनासमकालग्रहणस्य दुर्वारतया व्यर्थमेव स्यादिति—नियमार्थत्वं पक्षद्वयेपीति । **अन्ये तु**—जातिपक्षाश्रयणेपि गुणानां भेदकत्वेन नियामकत्वं दुर्घटमित्यत आह—एवञ्चेति । ननु जातिपक्षाश्रयणसामर्थ्यादेव गुणान्तरयुक्तस्यापि ग्रहणं भविष्यति, अन्यथा ह्रस्वत्वादिगुणानामपि भेदकत्वात्—तत्पक्षाश्रयणं व्यर्थं स्यादिति—किमर्थं गुणाभेदकत्वं नियमार्थमङ्गीक्रियतेऽत आह—**सिद्धान्तेति** । तथाच तस्यैव सिद्धान्तभूतत्वेन तेनैवोपपत्तौ जातिपक्षाश्रयणसामर्थ्योपवर्णनं निष्फलमिति सूचितम् । **'पक्षेपी'**त्यपिः समुच्चये, तेन जातिपक्षसंग्रहः । एवञ्च गुणाभेदकत्वमितिपक्षसहिते जातिपक्षे नियामकं सूत्रमिति तात्पर्यमित्याहुः । अत्र व्याख्यानेऽक्षरस्वारस्यभङ्गो बोध्यः । **न प्रवर्तते इति** । प्रवृत्तौ तु 'रमेश'इत्यत्रैव स्यात्, तपरभिन्नस्तत्कालस्येत्युक्तत्वादुपेन्द्र इत्यत्रैव स्याद्दिति भावः । **उच्चारणार्थ इति** । ऋकारोच्चारणार्थ इत्यर्थः । तदभावे तु सन्धिप्रवृत्त्या न स्यादिति । एवञ्चासन्देहायेति यावत् । विनिगमनाभावादाह—**मुखसुखेति** ।

❀ विषमपदविवृतिः ❀

'गोतो णि'दित्यादौ तु तकारोच्चारणसामर्थ्याद्दकारोऽविवक्षितः । **सिद्धान्तपक्षेपीति** । इदं—'गुणानामभेदकत्वे त्वनवकाशत्वाद्बाध' इति पूर्वग्रन्थेन विरुद्धं,—तत्र विधित्वमङ्गीकृत्यानवकाशत्वाद्बाधोक्तेः । **पञ्चमीसमासाभावेति** । 'एओङ्' 'ऐऔ'जिति सूत्रे–'किं दकारे प्रयोजनम् ?

मुखसुखार्थो वा । तपरसूत्रे दकारप्रश्लेषपक्षे तु—धकारादिस्थानिको दकारो बोध्यः ।

वृद्धिरा । वृद्धिः, आत्, ऐजिति पदत्रयमिति—न समासान्तादिप्रवृत्तिशङ्का । तपरकरणमसन्देहार्थतया पूर्वार्थम्, प्रकृतसूत्रे भाष्येऽत्र शास्त्रे गुणानामभेदकत्वं ज्ञाप-

---

❀ अभिनव-चन्द्रिका ❀

सूत्रेण बाध इत्यनुपपन्नम्, एवं गुणानामभेदकत्वपक्षे च तपरसूत्रं नियमार्थमित्यनुपपन्नम् ।—'अणुदित्तपरसूत्रयोः सङ्केतग्राहकत्वेन वैयाकरणमते शब्दानां नित्यत्वेन बोधजनकतारूपशक्तेरपि नित्यत्वेन नित्ययोः परस्परं बाधायोगात् । एकस्मिन्पदे नानाशक्तिमत्त्वे बाधकाभावाच्च । अत एवाकडारेतिसूत्रं पाणिनिना प्रणीतम्, एकस्यैव कृत्कृत्यादिनानासञ्ज्ञादर्शनाच्चेति चेन्मैवं, अणुदित्तपरसूत्रयोस्तात्पर्यग्राहकत्वेनादोषात् । तथाहि—'अतो भिस ऐसि'त्यादावणुदित्सूत्रेणाष्टादशसु तात्पर्य प्रसक्तं-तपरसूत्रेण षट्सु च, तत्र तं विना तात्पर्यद्वयावधारणस्यावश्यकत्वाद्गुणानां भेदकत्वे परत्वात्तपरसूत्रेण षट्सु तात्पर्यमवधार्यते । गुणानामभेदकत्वादौ च नियामकत्वेन तत्तात्पर्यमवधार्यते इति ।

❀ चिदस्थिमाला ❀

एवात आह—**तपरेति** । 'पक्षे त्वि'त्यनेन तस्यासिद्धान्तत्वं सूचितम् । यथा चैतत्तथा **प्रभादौ** स्पष्टम् । आदिना थसङ्ग्रहः । 'ऋदो'रित्यत्रेति भावः । 'कृतमनयो'रित्यादिभाष्यस्यान्यथोपपत्तेः । पस्पशाभाष्यानुरोधेनाह—**वृद्धिरिति** । लाघवमप्यत्रेत्याह—**न समेति** । समाहारद्वन्द्वपक्षाश्रयिकेति भावः । आदिनेतरेतरद्वन्द्वे द्विवचनपरिग्रहः । एतेन तथा **कौस्तुभरत्नाकरदण्ड्या**द्युक्तमपास्तम् । ननु पूर्वत्रानुपयोगे 'ऐच्' इत्येवास्तु सन्देहनिवृत्तिर्व्याख्यानतः सन्धिशास्त्रस्येदानीमसिद्धत्वात्सन्धिरेव वा न भविष्यति, अत आह—**तपरेति** । व्याख्यानमगतिकगति-'अइउण्'इत्यादौ सन्ध्यभावप्रतिपादककैयटखण्डनरीत्या तत्सम्भवश्चेति भावः । नन्वसन्देहार्थतयेति कुतः, गुणानां भेदकत्वे समकालसर्वग्राहकत्वस्यैव सम्भवादत आह—**प्रकृतेति** । ''वृद्धिरादैच्'' इतीत्यर्थः । अत्र=व्याकरणे । ज्ञापकात्—'अनुदात्त'इत्युदात्त-

❀ ज्योत्स्ना ❀

नैव सम्भवतीत्यभिप्रायेणेह तदनुवृत्तिरुक्तेति बोध्यम् । **दकारप्रश्लेषपक्षे त्विति** । **तुना**-ऽरुचिः सूचिता,—तद्बीजन्तु—'दिव उ' दित्यस्य दकारप्रश्लेषमूलभूतस्य प्रयोजनाभावः, 'द्युभ्या' मित्यादा'वुदात्तस्वरितयोर्यण' इति स्वरितव्यावृत्त्यर्थमवश्यं वक्तव्येनोदात्तनिपातनेनैव तित्स्वरितस्यापि व्यावृत्तिसिद्धेरिति—**परिभाषाप्रदीपार्चिषि** विस्तरेण निरूपितम् ।

'समासान्तादी' त्यादिपदादितरेतरयोगे द्विवचनप्रसङ्गसङ्ग्रहः, किन्त्वत्र पक्षे वृद्धिशब्दः प्रत्येकं तन्त्रेणावृत्त्या वा योजनीयः ।

''—समाहारद्वन्द्वोऽनित्यत्वाच्च न समासान्त-'' इति पक्षे पुनः-समाहारस्यैकत्वात्तदर्थान्वये

❀ सदाशिवभट्टीयम् ❀

वृद्धिरा । 'कृतमनयो'रिति भाष्यस्याऽन्यथोपपत्तेः । पस्पशास्थभाष्यानुरोधेनाह-**पदत्रयेति** । अत एव कुत्ववत्समासान्तोत्र भाष्ये नापादितः ।

❀ विषमपदविवृतिः ❀

अथ किन्तकारे ?, यद्यसन्देहार्थस्तकारो दकारोपी'ति भाष्यस्य—पञ्चमीसमासतदभाववादिपरतया कैयटेन योजितत्वात्तदनुसारेणेदं, न तु पञ्चमीसमासस्य पाक्षिकत्वाभिप्रायेण । **धकारस्थानिक इति** । इदमप्ययुक्तं—दकारांशे पञ्चमीसमासानाश्रयणेनादोषात् ।

कादाश्रित्य सवर्णग्रहणार्थत्वाभावस्योक्तत्वात् । 'कृष्णौत्कण्ठ्यं' 'गङ्गौघ' इत्यादौ त्रिमात्र-व्यावृत्तये—परार्थमपि । वृद्धिशब्दोऽत्र पदपरोऽर्थपरत्वासम्भवात् । 'आदैचो वृद्धिपदाऽभिन्ना' इति वाक्यार्थः, पदपदार्थयोस्तादात्म्यस्याङ्गीकारात् । 'रामेति द्व्यक्षरं नाम मानभङ्गः पिनाकिनः' इत्यादौ तयोरभेदप्रतीतेरनुभवसिद्धत्वादित्यन्यत्र विस्तरः ।

❀ अभिनव-चन्द्रिका ❀

तादात्म्याङ्गीकारादिति । न च मधुशब्दोच्चारणे जिह्वाया माधुर्यप्रसङ्गः, अस्यादिशब्दोच्चारणे जिह्वाया भेदनप्रसङ्ग इति वाच्यं । 'भेदसहिष्णुरभेद'इत्यत्र वास्तवो भेद इति स्वीकारेणादोषात् । अभेदस्तु इतरेतराध्यासाच्छब्दार्थप्रत्ययानां भासत इति मञ्जूषायां निरूपितं, अत एव'शब्दार्थप्रत्ययानामितरेतराध्यासात्सङ्करस्तत्प्रविभागसंयमात्सर्वभूतरुतज्ञान'मिति पातञ्जलसूत्रं सङ्गच्छते । अत एव शब्दे पृष्टेपि 'गौ'रिति वदति, अर्थेपि 'गौ'रिति, ज्ञाने पृष्टेपि 'गौ'रिति । वस्तुतस्तु-शब्दार्थयोरात्यन्तिकाभेदस्वीकारेपि न क्षतिः । न च पूर्वोक्तमाधुर्यादिदोषप्रसङ्ग इति वाच्यं,

❀ चिदस्थिमाला ❀

ग्रहणात् । **सवर्णेति** । 'समकाले'ति शेषः । एतेन 'त्' इति जश्त्वार्थं चतुर्थं भिन्नपदमिति प्रत्युक्तम्, पूर्वार्थत्वेन तस्य सिद्धत्वात् , उक्तभाष्यविरोधाच्च । **उक्तत्वादिति** । किञ्च केवलपरार्थत्वे जश्त्वं न स्यात्, न केवलं तदर्थं येन पाणिनेरज्ञतापत्तिरित्याह—**कृष्णाविति** । **त्रिमात्रेति** । तदादीत्यर्थः । क्वचित्तथैव पाठः । **परार्थमपीति** । कार्यकाले यथोद्देशे चेति भावः । स्फुटीभविष्यति चैतदनुपदमेव । एतेन 'यथोद्देशे एवेद'मिति **कौस्तुभाद्युक्तमपास्तम्** । **त्वासम्भवादिति** । इतोऽन्यस्य शक्तिग्राहकस्याभावादिति भावः । नन्वेवमनन्वयापत्तिः, समानविभक्तित्वाद्बाधाच्च भेदाभेदयोरसम्भवादत आह—**आदैच इति** । अङ्गीकारे हेतुमाह—**रामेति** । आदिना'हिरण्यपूर्वं कशिपु'मित्यादिपरिग्रहः, अत एवायं शुक्ल इतिवदयं डित्थ इत्यादिव्यवहारोऽत एव च–सञ्ज्ञाशब्दोत्तरभावप्रत्ययार्थत्वं पदस्य ।–स्पष्टञ्चेदं भाष्यादौ । अत्रादैजुद्देशेन वृद्धिपदाभेदो विधेयः, वैपरीत्यन्तु न, पदेनार्थस्मरणाय सम्बन्धज्ञानविधया शक्तिग्रहोपयोग इति—अर्थविशेष्यकशक्तिग्रहस्यैवास्यौचित्यात् । उद्भिदा यजेत, विष्णुर्नारायण' इत्यादौ चैवमेव बोधः, सञ्ज्ञासञ्ज्ञिभावस्तु फलितार्थो–न शाब्दः, अभेदस्य व्यावर्त्यव्यावर्तकत्वरूपविशेषणविशेष्यभावस्य च तयोरभावात्तत्र पर्यसानात्,तदाह—**इत्यन्यत्रेति** । मञ्जूषादावित्यर्थः ।

❀ ज्योत्स्ना ❀

नास्ति तन्त्रायपेक्षेत्यन्यत्र विस्तरः । **तादात्म्यस्येति** । भेदसहिष्णोरभेदस्येत्यर्थः । एतेनाग्निशब्दाद्युच्चारणे मुखदाहाद्यापत्तिरिति परास्तम् । **अन्यत्र विस्तर इति** । मञ्जूषायाम् ।

❀ सदाशिवभट्टीयम् ❀

पिनाकिन इत्यादाविति । आदिना'हिरण्यपूर्वं कशिपु'मित्यादि ।

❀ विषमपदविवृतिः ❀

'त्रिमात्रचतुर्मात्रव्यावृत्तये' इति युक्तः पाठः ।

अन्यत्र विस्तर इति । मञ्जूषादौ विस्तर इत्यर्थः । वस्तुतस्तु पदपदार्थयोस्तादात्म्यमयुक्तं, 'वह्नि'रित्युक्ते मुखे दाहापत्तेः । न च भेदाभेदयोरङ्गीकारेणोक्तदोषनिस्तारः, भेदमात्राङ्गीकारेणोक्तदोषनिरसनोपपत्तौ—अभेदाङ्गीकारे मानाभावात् । 'रामेति द्व्यक्षरं नामे'ति लक्षणया–ऽर्थपरम् । 'आदैचो वृद्धिपदाभिन्ना'–इति वाक्यार्थ' इत्यप्ययुक्तम्, तथा सति शक्तिग्राहकत्वानुपपत्तेः । अभेदस्य त्वया संसर्गत्वानङ्गीकाराच्च । 'तत्पदाभिन्नत्वेन तच्छक्यत्वानुमानात् परम्परया शक्ति-

वृद्धिशब्दस्य सञ्ज्ञात्वन्तु—व्याख्यानात् । विधेयत्वेऽपि तस्य पूर्वपाठो मङ्गलार्थः । 'अपृक्त एका'लित्यादौ तथा करणं—विधेयस्य प्रथमं प्रयोगेऽसाधुत्वभ्रमनिवारणायेति भाष्ये स्पष्टम् । सर्वशब्दानां सर्वार्थवाचकत्वेऽपि वाचकत्वस्य गृहीतस्यैव बोधजनकतया

❀ अभिनव-चन्द्रिका ❀

नैयायिकादिमतेपि कालिकादिसम्बन्धेन मुखे मधुनस्सत्त्वेन माधुर्यप्रसङ्गात्कारणतावच्छेदकसम्बन्धेन कारणसत्ताया एव कार्ये नियामकत्वेन शब्दस्य मुखे अवच्छेदकत्वसम्बन्धेन सत्त्वेन—तदभिन्नार्थस्य तेन सम्बन्धेन सत्त्वेऽपि—कारणतावच्छेदकसंयोगसम्बन्धेन मुखे मध्वादेरभावेनादोषादिति दिक् ।

ननु 'वृद्धिपदमर्थबोधकं, पदत्वात् गोपदवत्'इत्यनुमानेनैव वृद्धिपदे आदैचां वाचकत्वं गृहीतुं शक्यते । नच अर्थत्वेनाऽदैज्वाचकत्वग्रहेऽपि आदैच्त्वेनादैज्वाचकत्वग्रहाय सूत्रं विधायकमिति वाच्यं,'वृद्धिपदमादैच्त्वावच्छिन्नवाचकं आदैजितराबोधकत्वे सति अर्थबोधकत्वा'दित्यनुमानेन तत्त्वे-

❀ चिदस्थिमाला ❀

नन्वादैचामेव सञ्ज्ञात्वेनोक्तविपरीतं यथाश्रुतमेव कुतो नोक्तमत आह—**वृद्धीति** । तस्यैवेत्यर्थः । **व्याख्यानादिति** । एकस्यानेकसञ्ज्ञाकरणेऽत्र प्रयोजनाभावादिरूपादित्यर्थः । नन्वेवं तस्य परपाठोऽयुक्तः इति नानुपूर्वीव्यत्ययकल्पनेति लाघवमत आह—**विधेयेति** । 'वर्णसमाम्नायस्तु न पाणिनिकृतः' इति प्रागेवोक्तम् । 'अपृक्तसञ्ज्ञाया'मित्यादिभाष्यवार्तिकविरोधाद'पृक्त एका'लितिपरिभाषे'ति**कैयटो** न युक्त इति ध्वनयितुमाह—**अपृक्तेति** । आदिना—'स्वं रूपं' 'तपरः' 'येन विधि'रित्यादिपरिग्रहः । तथा करणं=पूर्वपठनम् । **विधेयस्येति**,—पूर्वोक्तरान्वयि । ''—'सर्वे सर्वार्थवाचकाः' इति पक्षे नियामकत्वमेतेषाम्, अत एव 'व्यवहाराय नियम इत्यादिसङ्गतिः, 'स्वेच्छया सञ्ज्ञाः क्रियन्त' इति पक्षे तु विधित्व'मिति—'' **कौस्तुभादयः**, तदसदिति ध्वनयन्नाह—**सर्वेति** । इदञ्च—तदभ्युपेत्योक्तम् । वस्तुत-

❀ सदाशिवभट्टीयम् ❀

'अपृक्तसञ्ज्ञाया'मित्यादिभाष्यवार्तिकविरोधादपृक्त एकालितिपरिभाषे'ति **कैयटो** न युक्त इति—सूचयन्नाह—**अपृक्तेति** । आदिना 'स्वं रूप''न्तपरः''येन विधि'रित्यादि । अत एव=तासामनित्यत्वव्यवहारादेव । अन्यथाऽकृत्रिमत्वादसङ्गतिः स्पष्टैव । ननु त्रिमात्रादिव्यावृत्त्या यत्परार्थत्त्वमुक्तं तद्यथोद्देशे सम्भवति तदा स्वगृहे वाक्यार्थबोधेनाविधेयाण्त्वेन सवर्णग्रहणसम्भवात्,—न तु कार्यकाले, तदाविध्येकवाक्यतया विधेयाण्त्वेन

❀ विषमपदविवृतिः ❀

ग्राहकत्व'मित्यपि न,वृद्धिपदाभेदतद्वाच्यत्वयोः सहचारग्राहकमानाभावात्-तयोर्व्याप्तिग्रहासम्भवात्, वृद्धिसूत्रे भाष्ये साक्षात्सञ्ज्ञासञ्ज्ञिभावस्यैव वाक्यार्थत्वोक्तेश्च । तद्भाष्यं चोपपादयिष्यामः । तस्मा'दादैचो वृद्धिपदवाच्या'इत्येव वाक्यार्थः, आदैचां वृद्धिपदस्य च वाच्यवाचकभावस्य संसर्गमर्यादया भानाङ्गीकारात् । न च 'समानविभक्तिकनामार्थयोरभेदेनैवान्वय' इति व्युत्पत्तिभङ्गः, 'प्रतीतपदार्थकतदर्थयोरभेदान्वयः, अप्रतीतपदार्थकतदर्थयोस्तु वाच्यवाचकभावेनान्वय' इति व्युत्पत्त्यङ्गीकारात् । तदुक्तं भाष्ये-'इदं खल्वपि भूयः सामानाधिकरण्यम्, एकविभक्तिकत्वञ्च द्वयोश्चैतद्भवति, कयोर्विशेषणविशेष्ययोर्वा सञ्ज्ञासञ्ज्ञिनोर्वा, तत्रैतत्स्याद्विशेषणविशेष्य इति,तच्च न, द्वयोर्हि प्रतीतपदार्थकयोर्विशेष्यविशेषणभावो भवति,—न चादैच्छब्दः प्रतीतपदार्थकः तस्मात्सञ्ज्ञासञ्ज्ञिनावेवे'ति । **वाच्यवाचकत्वेऽपीति** । **सर्वार्थवाचकत्वेऽपीति** । सर्वस्य शब्दस्य सर्वत्रार्थे सङ्केतयितु-

सञ्ज्ञासूत्राणामज्ञातशक्तिज्ञापकतया—विधित्वम् । किञ्च—'सर्वे सर्वार्था'इत्यभ्युपगमो योगिदृष्ट्या नास्मदृष्ट्या, सर्वशब्दानामर्थानाञ्च विशिष्य ज्ञानाभावात् । सामान्यतस्तथा ज्ञानञ्च—न बोधोपयोगि, शास्त्रन्त्वस्मदाद्युद्देशेनैव प्रवृत्तमिति बोद्ध्यम् । तत्रैव सङ्केत-ग्राहकशास्त्रकरणं–स्वेच्छयैवेत्येषां 'यदृच्छा'शब्दत्वेन व्यवहारः, 'स्वेच्छया सञ्ज्ञाः क्रियन्त' इति च । एतदुपदेशरूपसङ्केताग्राक्तत्र सञ्ज्ञात्वाग्रहेण तासामनित्यत्वव्यवहारः ।

अत एव तत्तत्सञ्ज्ञाकरणज्ञानरूपप्रकरणादन्यार्थाग्रहणरूपनियमः 'कृत्रिमाकृत्रिम'न्याय-मूलतयोक्तः सङ्ख्यासञ्ज्ञासूत्रे भाष्ये । आर्थिकमेवामुं नियममादाय सञ्ज्ञासूत्रेषु नियमत्व-व्यवहारो—'व्यवहाराय नियमः सञ्ज्ञायाः सञ्ज्ञिनि क्वचि'दित्यादिना—कृतः ।

❀ अभिनव-चन्द्रिका ❀

नापि ज्ञातुं शक्यत्वादित्यरुचेराह–**किञ्चेति** । विशेषधर्मपुरस्कारेणेत्यर्थः । **सामान्यज्ञानमिति** । सामान्यधर्मप्रकारकं ज्ञानमित्यर्थः । **न बोधोपयोगीति** । न विशेषधर्मप्रकारकबोधोपयोगीत्यर्थः ।

❀ चिदस्थिमाला ❀

स्तदेव नेत्याह—**किञ्चेति । अर्थानामिति** । सर्वेषामित्यर्थः । 'विशिष्ये'त्युक्तिफलमाह—**सामान्यत-स्तथेति** । शब्दत्वेनार्थत्वेन सर्वार्थवाचकत्वादिप्रकारकं ज्ञानन्त्वित्यर्थः । नन्वस्तु स योगिदृष्ट्या तथापि तान्प्रत्येव शास्त्रं सफलमेवात आह—**शास्त्रन्त्विति** । तेषां साध्वसाधुविवेकस्य तत एव ज्ञातत्वेनाफलत्वा-दिति भावः । तत्र विरोधाभावात्सर्वग्रन्थैकवाक्यतामाह—**तत्रैवे**त्यादिना । तत्रैव–आदैजाद्यर्थे एव, नत्वन्यत्र ।—अत्र इच्छैव नियामिकेति भावः । तेषाम्=सञ्ज्ञाशब्दानाम् । **इति चेति** । 'व्यवहार'—इत्यस्यानुषङ्गः । सङ्केतात्=तद्ग्रहात् । तत्र=वृद्ध्यादिपदे । तासाम्=सञ्ज्ञानाम् । अत एव=तासामनित्यत्व-व्यहारादेव । **प्रकरणादिति** । तस्याभिधानियामकत्वस्य हर्यादिग्रन्थे स्पष्टत्वादिति भावः । अनेन नियमे शाब्दत्वं वारितम्, अत एवाग्रे **एवोक्तिः** ।

न्यायेति । न्यायस्य मूलत्वेनेत्यर्थः । अन्यथाऽकृत्रिमत्वात्तदसङ्गतिः स्पष्टैव । नन्वेवं 'व्यवहाराय नियम' इत्यादिहरिग्रन्थासङ्गतिरेवात आह—**आर्थिकमिति** । तत्र सङ्केतग्राहके कृते तत्तत्सङ्केतज्ञानरूप-प्रकरणवशात्तस्यैवोपस्थितिनान्यस्येति फलितमित्यर्थः । **कृत इति** । हरिणेति शेषः । इदञ्च—'विशेषण-विशेष्यव'दित्यनेन सूचितमित्यन्यत्र स्पष्टम् । नन्वेवं सम्बन्धानित्यतया 'सिद्धे शब्दार्थसम्बन्धे'इति वार्तिक-विरोध एवात आह—**वाचकेति । तदिति** । वाचकत्वेत्यर्थः । नन्वेवमपि टि–घु–भादीनां कथं साधुत्व-

❀ ज्योत्स्ना ❀

न बोधोपयोगीति । इदं चिन्त्यं,—'घटाः' इति समान्याकारस्य तस्य बोधो-पयोगित्वदर्शनात्, नीलपीतादिव्यक्तिविशेषबोधः प्रकरणादिसहकारेण शक्तेरवच्छदादिति चेत्समं प्रकृतेऽपि, 'सर्वं विष्णुमयञ्जग'दित्यादौ सर्वादिशब्दोपस्थितेऽर्थे गत्यन्तराभावाच्चेति विस्तरेण निरूपितं **मञ्जूषाविषम-टिप्पण्यामस्माभिः । तत्रैवेति** । आदैजादिशब्देष्वित्यर्थः । **'सङ्केतग्राहके'**त्यस्य वृद्ध्यादिपदे' त्यादिः । **आसाञ्चेति** । स्वेच्छया कृतानां सञ्ज्ञानामित्यर्थः ।

❀ विषमपदविवृतिः ❀

मशक्यत्वादिति भावः । **सामान्यतस्तथा ज्ञानमिति** । 'पटशब्दो जातिमद्वाचकशब्दार्थस्य वाचक' इत्येवंरूपेण शक्तिग्रहेपि घटपदेन घटत्वविशिष्टार्थाबोधात् । **प्रकरणादिति** । प्रकरणस्य स्वविषयविषयकशाब्दबोधे हेतुत्वादन्यार्थाग्रहणमर्थसिद्धम् ।

वाचकताबोधकत्वेऽपि तदनुत्पादकत्वान्न शब्दार्थसम्बन्धनित्यताहानिः । आसाञ्च शिष्टप्रयुक्तत्वात्साधुत्वमित्यन्यत्र विस्तरः ।

कार्यकालपक्षे 'मृजेर्वृद्धि'रित्यादौ वृद्धिपदार्थजिज्ञासायां 'वृद्धिरादै'जित्युपस्थित्या तदर्थबोधरूपे शक्तिग्रहे वृत्ते विधिवाक्यार्थबोधः । अत एव 'ष्यङः सम्प्रसारण'मिति सूत्रे भाष्ये—'कार्यकालं सञ्ज्ञापरिभाषं, 'भस्ये'त्युपस्थितमिदं भवति—'यचि भमिति' —इत्युक्तम् । 'ईदूदे'दिति सूत्रे भाष्येऽपि—'कार्यकालं सञ्ज्ञापरिभाषं, 'प्रगृह्यः प्रकृत्ये'-

❀ अभिनव-चन्द्रिका ❀

तदर्थबोधरूप इति । परम्परया अनाहार्य्याप्रामाण्यज्ञानानास्कन्दितलक्ष्यधार्मिकसाधुत्वप्रकारकज्ञानोपयोगी बोधरूप इत्यर्थः ।

अत एवेति । सञ्ज्ञाशास्त्राणां वाक्यैकवाक्यतयैव विधिवाक्यान्वयादित्यर्थः ।

❀ चिदस्थिमाला ❀

मनादित्वाभावात्, व्याकरणसंस्कृतत्वाभावाच्च, अनपभ्रष्टतारूपं तु तत्र तदुपयोग्यत आह—**आसाञ्चेति** । टि-घु-भादिसञ्ज्ञानामित्यर्थः । एतेन'सञ्ज्ञाशास्त्राणामेतच्छास्त्रेऽनेन शब्देनैते एवे'तिनियमार्थत्वं कृत्रिमाकृत्रिमन्यायबीज'मिति **कौस्तुभाद्युक्तमपास्तम्** । उक्तरीत्या विधित्वे सम्भवति नियमत्वायोगात्, तद्ध्वनयन्नाह—**इत्यन्यत्रेति** । मञ्जूषादावित्यर्थः । ननु त्रिमात्रादिव्यावृत्त्या यत्परार्थमुक्तं तद्यथोद्देशे सम्भवति, तदा स्वगृहे वाक्यार्थबोधेनाविधेयाण्त्वेन सर्वणग्रहणसम्भवात्—न तु कार्यकाले—तदा विध्येकवाक्यतया विधेयाण्त्वेन तदसम्भवात्, अतः सिंहावलोकनन्यायेनाह—**कार्येति । अपि**र्यथोद्देशपक्षसमुच्चायकः । प्रदेशेन सह वाक्यैकवाक्यत्वेऽपि वस्तुतो भिन्नवाक्यतोभयत्र समानेति भावः । तत्र तत्र तामाह—**मृजेरिति । वृत्ते इति** । पदार्थोपस्थितेस्सत्त्वादिति शेषः । एवञ्च वाक्यैकवाक्यत्वेऽपि पदैकवाक्यत्वाभावेन—तत्र तस्याभिधेयत्वं सुस्थमेवेति भावः । नन्वत्रैव किं मानम्, पदैकवाक्यताया एकदेशोपस्थित्या सम्भवादत आह—**अत एवेति** । वाक्यभेदादेवेत्यर्थः । अस्य त्रिष्वन्वयः । **भस्येत्युपेति** । प्रकरणप्राप्ते तत्रेत्यर्थः । 'भपदार्थजिज्ञासाया'मिति शेषः । एवमग्रेऽपि । अस्य भाष्यस्यैकदेश्युक्तित्वादेवाह—**ईदूदेदितीति** ।

❀ ज्योत्स्ना ❀

शिष्टप्रयुक्तत्वादिति । तथा च देशभाषानुसारेण क्रियमाणानां 'कूची' 'मची'त्यादीनां साधुत्वं नेति भावः । कौस्तुभकारास्तु—साध्वसाधुबहिर्भूतत्वं तेषामभ्युपगच्छन्ति, तन्मतपरिष्कारो **मञ्जूषावधमटिप्पण्यां** द्रष्टव्यः ।

❀ सदाशिवभट्टीयम् ❀

तदसम्भवादतः सिंहावलोकनन्यायेनाह—**कार्येति** । **अपि**र्यथोद्देशपक्षसमुच्चायकः प्रदेशेन सह वाक्यैकवाक्यत्वेपि वस्तुतो भिन्नवाक्यतोभयत्र समानेति भावः । तत्र तत्र तामाह—**मृजेरिति । वृत्ते इति** । 'पदार्थोपस्थितेस्सत्त्वा'दिति शेषः । एवञ्च वाक्यैकवाक्यत्वेपि पदैकवाक्यत्वाभावेन तत्र—कार्यकाले तस्याऽविधेयत्वं सुस्थमेवेति भावः । नन्वत्रैव किं मानं ? पदैकवाक्यताया एकदेशोपस्थित्या सम्भवादत आह—**अत एव भाष्येति** । वाक्यभेदादेवेत्यर्थः ।

❀ विषमपदविवृतिः ❀

अत एव ष्यङिति । सम्पूर्णसञ्ज्ञाशास्त्रोपस्थितेरेवेत्यर्थः ।

त्युपस्थितमिदं भवति–'ईदूदेद्द्विवचनं प्रगृह्य'मिति'। 'निष्ठे'ति सूत्रे कैयटोऽपि–'निष्ठे' त्युक्ते सञ्ज्ञावाक्यं–'क्तक्तवतू निष्ठे'ति स्मर्यते'इत्याह। अत्र पक्षे एकत्र शक्तिग्रहे वृत्तेऽपि 'तत्प्रदेशस्थस्यैव तत्रार्थे शक्ति'रिति सम्भावनया प्रदेशान्तरस्थे बोधो न स्यादिति सर्वप्रदेशेषु तत्तत्पदशक्तिग्रहपूर्वकं विधिवाक्यार्थबोधः। यथोद्देशे तु एकदैव शक्तिग्रहात्सर्वत्र बोध इति विशेषः। एतेन "—कार्यकालपक्षे तपरत्वं स्पष्टार्थमेव, आदैच्पदार्थस्य वृद्धिविशेषणतया विधेयत्वेन सवर्णग्रहणाप्रसक्तेः। 'यत्र वृद्धिपदं तत्रादैजित्युपतिष्ठते' इति क्रमेण सञ्ज्ञासूत्राणामर्थात्—"इत्यपास्तमित्यन्यत्र विस्तरः।

❀ अभिनव-चन्द्रिका ❀

इत्याहेति। अयं भावः–सञ्ज्ञाशास्त्राणां वाक्यैकवाक्यतयैवान्वयं विहाय पदैकवाक्यतया पदार्थैकवाक्यार्थतया वाऽन्वयस्वीकारे'यत्र वृद्धिपदं तत्रादैजित्युपतिष्ठते' इतिसञ्ज्ञाशास्त्राणामर्थस्वीकारेण विधिप्रदेशे वृद्धिपदश्रवणेनादैजुपस्थितावपि तदर्थस्य विधिवाक्यार्थानन्वयप्रसङ्गइति। **सर्वप्रदेशेष्विति**। सञ्ज्ञाशास्त्राणां साध्वनुशासकत्वान्नैष्फल्यज्ञानेनोपक्षाबुद्धौ सञ्ज्ञाशास्त्रजबोधरूपशक्तिग्रहसंस्कारस्य लुप्तत्वात्पुनः शक्तिग्रहार्थमेकत्र विधिप्रदेशे सञ्ज्ञाशास्त्रोपस्थितावपि तज्जनितशक्तिग्रहजसंस्कारस्य उपेक्षाबुद्ध्यभावात्, प्रतिविधिप्रदेशमावृत्त्या सञ्ज्ञाशास्त्राणां वाक्यार्थबोधे फलाभावाच्च, सामान्यधर्मावच्छिन्ने एव शक्तेर्गृहीतत्वाच्च—चिन्त्यमिदम्।

❀ चिदस्थिमाला ❀

इतीति। 'उक्त'मित्यस्यानुषङ्गः। भवदवलम्बभूतेनापि–[**कैयटेनापि**]–तथोक्तमित्याह—**निष्ठेतीति**। नन्वेवं को विशेषः पक्षयोरत आह—**अत्र पक्षे इति**। कार्यकालपक्षे इत्यर्थः। **रस्थे**–'तदर्थस्ये'ति शेषः। एकदैव—एकत्रैवेत्यपि बोध्यम्। **दण्डि-कृष्ण-कौस्तुभर-त्नाकरा**द्युक्तिं खण्डयति—**एतेनेति**। पक्षद्वयेऽपि तदर्थमुक्तरीत्या तपरत्वस्यावश्यकत्वेनेत्यर्थः। **वृद्धीति**—बहुव्रीहिः। **ननु पदैक**वाक्यतयान्वये तत्र सूत्रोपस्थितौ वृद्धिपदस्य सञ्ज्ञासूत्रस्थस्यानन्वयप्रसङ्गः, सञ्ज्ञासूत्रानर्थक्यञ्चात आह—**यत्रेति**। उपस्थाप्यस्योपस्थापकेन वृद्ध्यादिपदेन 'मृजेर्वृद्धि' 'यस्ये'त्यादौ वृत्त्या बोधनात्परं सञ्ज्ञासूत्वव्यवहारः,। न चैवं 'वृद्धिर्यस्ये'त्यादावादैचामुपस्थितौ सवर्णग्रहणं दुर्वारमिति तपरत्वमावश्यकमिति वाच्यम्, तादृश्यलक्ष्याभावेनेष्टापत्तेरिति भावः। क्रमेण=रीत्या। किञ्च'अथसञ्ज्ञे'त्यादिप्रकृतसूत्रस्थवार्तिकाऽन्यथातत्प्रत्याख्यानपरभाष्यद्वयविरोधः, किञ्च—'मृजे'रित्यादिसूत्रस्थवृद्ध्यादिपदानां तदुपस्थितिसम्पत्त्या चारितार्थ्येन स्वोपस्थापितपदार्थेऽन्वये मानाभावेन तत्रेक्परिभाषानुपस्थित्यापत्तिः, किञ्चोपस्थाप्यार्थस्य वृत्त्या बोधनात्सञ्ज्ञासूत्रत्व'मिको गुणे'त्यादिवदुपस्थापकत्वात्परिभाषात्वं वेत्यत्र विनिगमकाभावः। किञ्च—वृद्ध्यादिपदैर्वृत्त्या बोधनं दुरुपपादमिति दिक्। तदाह—**इत्यन्यत्रेत्ति**। **उद्योतादावित्यर्थः—अत्रेति**।

❀ सदाशिवभट्टीयम् ❀

इत्याहेति। वक्ष्यमाणरीत्या यचीत्यादेरंशस्यैवोपस्थितेर्वक्तव्यतया सर्वत्र सर्वोपस्थितिकथनासङ्गतिः स्यादिति भावः। **यथोद्देशे त्विति**। अत्र तु न तत्सम्भावना, केवलं स्वदेशे वाक्यार्थत्वात्। **वृद्धिविशेषणेति**। बहुव्रीहिरयम्। **विधेयत्वेनेति**। 'वृद्धिर्यस्ये'त्यादावनुवादे तु न दोषः, तादृशलक्ष्याभावादिति भावः।

❀ विषमपदविवृतिः ❀

एतेनेति। उक्तभाष्यविरोधेनेत्यर्थः।

१. **भट्टोजी**दीक्षितगुरवः **प्रक्रियाप्रकाशादि**काराः शेषश्री**कृष्णाः**।

अत्रातद्भावितानामपि आदैचां ग्रहणं, तेन शालीयासिद्धिः ।

भूवादयो । क्रियावाचिनः किम् ? विकल्पार्थक'वा'शब्दस्य निपातस्य धातुत्वेऽप्रातिपदिकत्वात्सुबभावे पदत्वानापत्तेः, तदुक्तौ तु न दोषः, वार्थस्य विकल्पस्य भूत-

❀ अभिनव-चन्द्रिका ❀

भूवादयो धातवः । भूश्चादयश्च—भूश्चादयश्च भूवादयः—इतितन्त्रेणायं निर्देशः । एकश्चादिशब्दः प्रकारार्थः, अपरश्च प्रभृत्यर्थः, विशिष्टाऽऽवृत्तिश्च,—भूसाहचर्याद्वाशब्दोऽनव्यय एव गृह्यते, वाशब्दसाहचर्याच्च भूशब्दोऽसत्त्ववाची गृह्यते,—इति परस्परसाहचर्यात् तादृशः क्रियावाच्येव सम्भवतीति क्रियावाचिन इत्यर्थलाभाय, एकपदोपस्थापितयोः परस्परं भेदेनैवान्वयस्य व्युत्पन्नत्वेन भूवाप्रभृतयो ये भूवासदृशाः—इत्यभेदान्वयलाभाय, एकरूपावच्छिन्नस्य एक-

❀ चिदस्थिमाला ❀

'वृद्धिरादै'जित्यत्र वृद्धिशब्देनाविहितानामपीत्यर्थः । तद्भावितानामेव ग्रहणे मानाभावात्, शालीयाद्यसिद्धेश्चेति भावः । अपिना—तद्भावितानां सङ्ग्रहः । तदाह—**तेनेति** । उभयग्रहणेनेत्यर्थः । आदिना तावद्भार्यादिसंग्रहः । द्वन्द्वैकशेषघटितबहुव्रीहिमभिप्रेत्याह—**क्रियेति** । 'इति ने'ति शेषः । एवमग्रे सर्वत्र । 'आतो-नाप'इत्युक्ते 'याः पश्यसी'त्यादावदोषान्**मनोरमारत्नाकरदण्ड्या**दिग्रन्थानामसाङ्गत्यं ध्वनयितुमाह—**विकल्पेति** । यत्तु—वातीत्यादिप्रयोगापत्तिरिति**रत्नाकर**स्तन्न, तदर्थस्य कालासम्बन्धेन लडाद्यप्राप्तेरत आह—**त्वेऽप्रातीति** । नन्वेवमपि दोषः, विकल्पस्य विकल्पयतीत्यादौ क्रियात्वदर्शनादत आह—**तदुक्तौ त्विति** । 'क्रियावाचिन' इत्युक्तौ त्वित्यर्थः । **वार्थस्येति** । अनेन विकल्पयतीत्यादौ—तत्त्वं सूचितम् । **भूतेति** । वर्तमानस्याप्युपलक्षणम् । नन्वेमप्यस्त्यादीनां धातुत्वानापत्तिः, तदर्थस्याक्रियात्वात्-

❀ ज्योत्स्ना ❀

पदत्वानापत्तेरिति । इदं चिन्त्यं—निपातस्यानर्थकस्य प्रातिपदिकत्वं चोदितं, तत्रानर्थकग्रहणं न कर्त्तव्यं, 'निपातः प्रातिपदिक'मिति प्रकृतसूत्रभाष्येणैवानूद्यमानार्थस्यैव दूषितत्वात्, तस्मादौणादिकाऽव्युत्पन्नदिव्शब्दस्य धातुत्वे स्वादयो न स्युरिति भाष्योक्तमेव प्रत्युदाहरणीयम् । **क्रियात्वाभावादिति** । भूत-भविष्यत्कालपरिच्छिन्नत्वं हि क्रियात्वं, 'क्रियाभेदाय कालस्तु सङ्ख्या

❀ सदाशिवभट्टीयम् ❀

भूवादयः किमिति । 'इति ने'ति शेषः । एवमग्रेपि । ननु निष्पाद्यत्वरूपसाध्यत्वेन प्रतीयमानत्वस्य क्रियात्वेनाऽस्त्यर्थस्य क्रियात्वं न स्यादत आह—**अस्त्याद्यर्थेति** । 'भूप्रभृतयो भूसदृशा' इति तु नोक्तं, शब्दप्रभृत्यर्थकादिभूयोगे एकशेषे प्रमाणलाभानापत्तेरित्याहुः । **पदत्वानापत्तेरिति** । अत्र **पाठकाः**[1], "—इदं चिन्त्यं—निपातस्यानर्थकस्य प्रातिपदिकत्वं बोधितं तत्राऽनर्थकग्रहणं न कर्त्तव्यं, निपातः प्रातिपदिकम्—"**इत्याद्याहुः** । वस्तुतस्तु—वार्तिककृद्रीत्यैकदेशिना तथोक्तम् । 'अर्थव'त्सूत्रे'ऽथवे'त्यादिना—'अधिपरी'ति ज्ञापकेनाऽनर्थकानामप्यर्थवत्कार्यं भवति—इत्युक्त्वा तत्तत्प्रत्याख्यानेन तस्य तदुक्तित्वध्वननात् । अत एव—'अनर्थकग्रहणं न करिष्यते—' इति 'सति कुड्ये चित्र'मिति न्यायेन प्रौढित्वसूचकमुक्तम् । **नन्वथवे**त्यादिभाष्यात्तस्य पक्षान्तरत्वेन न तत्प्रत्याख्यानबोधकमिति चेत्—पूर्वत्रारुच्यैवोत्तरपक्षबोधनात्प्रत्याख्यानस्यैव युक्तत्वात्, परन्तूद्योते ज्ञापकस्य शैथिल्यमुक्तमित्**याहुः** । "यद्यपि—भाष्ये प्रसज्यप्रतिषेध उक्तस्तथापि

❀ विषमपदविवृतिः ❀

भूवादयो धातवः । **कालसम्बन्धाभावेनेति** । तथाच कालपरिच्छिन्नत्वं क्रियात्वं, तच्च साक्षात्क्रियायामेवेति 'कालाः परिमाणिने'ति प्राचीनग्रन्थेषु स्फुटम् । **एतेन**—न तावद्धात्वर्थत्वं क्रियात्वं, 'क्रियावाचित्वे ज्ञाते सति धातुत्वज्ञानं, धातुवाच्यत्वे च क्रियात्वज्ञान'मित्यन्योन्याश्रयात्,

१. **शेखरटीका**विशेषकर्त्तारो **लक्ष्मणपाठकाः** । 'वस्तुत'स्त्वित्यादिग्रन्थोपि तत्रत्य एवेति प्रतीमः ।

भविष्यत्कालसम्बन्धाभावेन क्रियात्वाभावात् । अस्त्याद्यर्थस्यापि तत्त्वं भूतभविष्यत्कालसम्बन्धात् । भ्वादयः किम् ? 'आणवयति' 'वट्टयती'त्यादीनां धातुत्वे शास्त्रविषयतया साधुत्वापत्तेः । सूत्रशेषे भाष्ये स्फुटमेतत् । स्तम्भ्वादीनामुदित्त्वेन धात्वधिकारविहितकार्योद्देश्यत्वादिना स्थितपाठभ्रंशानुमानान्न तेषु दोषः ।

❀ अभिनव-चन्द्रिका ❀

रूपावच्छिन्नसंसर्गेण एकरूपावच्छिन्नेऽन्वयबोधेच्छारूपसहविवक्षालाभाय च । **क्रियावाचिनः किमिति** । क्रियावाचकत्वञ्च—साध्यत्वविशिष्टत्वं, वै० च 'स्वावच्छिन्ननिरूपितशक्तिपर्य्याप्त्यधिकरणत्व' 'स्वावच्छिन्नेतरनिरूपितशक्तिनिरूपकार्थविषयकबोधतात्पर्येणोच्चारिताऽघटितत्व' 'स्वावच्छिन्ननिरूपितशक्तिनिरूपकार्थविषयकबोधतात्पर्येणोच्चरितत्वै, तन्त्रितयसम्बन्धेन । आद्यसम्बन्धदानेन भूयते इत्यादिभावतिङन्तस्य न क्रियावाचकत्वम् । द्वितीयसम्बन्धदानेन दरिं द्रातीतिदरिद्रा इत्यस्य न क्रियावाचकत्वम् । तृतीयसम्बन्धदानेन विकल्पार्थकवाशब्दस्य न क्रियावाचकत्वम् । **साधुत्वापत्तेरिति** । आणवयतीत्यादौ धातुसञ्ज्ञायामपि-सञ्ज्ञाशास्त्राणां साधुत्वविधायकत्वाभावात् कथं साधुत्वापत्तिरिति वाच्यम्, 'भू सत्तायाम्' इत्याद्यनेकशास्त्राणां साधुत्वानुशासकत्वे महागौरवेण 'भूवादय'इत्यस्यावृत्तिं कृत्वा धातुसञ्ज्ञाविधायकत्वस्य साधुत्वविधायकत्वस्य च स्वीकारेणादोषात् । अत्रैव मानमाह-**सूत्रशेषे भाष्य इति** ।

❀ चिदस्थिमाला ❀

निष्पाद्यत्वरूपसाध्यत्वेन प्रतीयमानत्वस्यैव तत्त्वादत आह-**अस्त्याद्येति** । तत्त्वम्=क्रियात्वम् । पूर्ववदाह—**भ्वादय इति** । आज्ञापयतीत्यर्थे आद्यं प्राकृतम् । वर्त्तयतीत्यर्थे द्वितीयम् । आदिना वर्धयतीत्याद्यर्थे वड्ढयतीत्यादेः परिग्रहः । अपभ्रंशानामपि स्वातन्त्र्येणैव बोधकत्वाङ्गीकारात्—क्रियावाचकत्वम् । न हि साधुत्वासाधुत्वे नियते, किन्त्वन्यादृशे इति स्पष्टम्—मञ्जूषायाम् । अत्र प्रकृतिभागस्य धातुत्वापत्तिर्बोध्या—अत एव तिङुत्पत्तिर्नोपादिता, ततस्तस्याः सत्त्वादत एवाह—**शास्त्रेति** । अप्रामाण्यशङ्कानिरासायाह—**सूत्रेति** । प्रकृतेत्यादिः । नन्वेवं स्तम्भ्वादीनां धातुत्वानापत्तिस्तेषां भ्वादावपाठादत आह—**स्तम्भ्वादीति** । आदिना जु-पस-ऋति-चुलुम्पादिपरिग्रहः । **उदित्त्वेनेति** । नन्वधातुत्वेऽपि प्रातिपदिकत्वात्सुप्युदित्करणं नुमाद्यर्थं स्यात्, एतेन तथा—**रत्नाकरदण्ड्या**द्युक्तमपास्तमत आह—**धात्वधीति** । 'जृस्तम्भु' 'स्तम्भुस्तुम्भु''जुचङ्क्रम्य''भञ्जपसाञ्च' 'ऋतेरीयङ्''अनेकाज्ग्रहणं चुलुम्पाद्यर्थं' 'कण्ड्वादिभ्य'इत्यादिविहितप्रत्ययादिरूपाणि कार्याणि बोध्यानि । आदिना—तत्प्रकृतिकच्ल्यनुवादेनाङ्विधानस्य, सार्वधातुके परे विकरण-

❀ ज्योत्स्ना ❀

सर्वस्य भेदिके'त्युक्तेरिति भावः । **'स्तम्भ्वादीना'**मित्यादिपदात्—'जुचङ्क्रम्ये'त्यत्र पठितस्य—जोः, 'जपजभे'त्यत्र पठितस्य—पसः, 'ऋतेरीय'ङित्यादौ पठितस्य ऋतिप्रभृतेश्चुलुम्पान्दोल-प्रेङ्खोल-प्रभृतीनां सङ्ग्रहः । तत्र—स्तम्भ्वादीनां केषाञ्चिदुदित्त्वेन, जुप्रभृतीनां केषाञ्चिद्धात्वधिकारविहिततत्तत्कार्योद्देश्यत्वेन, चुलुम्पप्रभृतीनामन्येषान्तु—धात्वधिकारविहितकार्योद्देश्यत्वादिना चेत्यादिपदग्राह्येण—'बहुलमेतन्निदर्शन' मिति बहुलग्रहणेन स्थितपाठभ्रंशानुमानमिति बोध्यम् ।

❀ विषमपदविवृतिः ❀

नापि—लिङ्गसङ्ख्याकारकानन्वयि तत्, निपातसञ्ज्ञकवाशब्दार्थेऽपि तत्सत्त्वेनोक्तदोषानिस्तारात् । नापि—साध्यतया प्रतीयमानत्वं तत्, धात्वर्थे तथात्वस्य, निपातार्थे तदभावस्य च शपथैकनिर्णेयत्वादित्य**पास्तम्** । साध्यत्वेन प्रतीयमानत्वस्यापि धात्वर्थमात्रवृत्तित्वसमर्थनसम्भवाच्च ।

१. 'आणवेदि' 'वट्टेदी'त्यत्रापाद्यमाने इमे रूपे । २. लिडादौ क्विबादेः कर्त्रर्थकत्वेऽपि तस्योच्चारणाभावाल्लक्षणसमन्वयो बोध्यः ।

प्राग्रीश्व । 'अधिरीश्वरे' इत्यभिव्याप्य प्राग्निपाता इत्यधिकारः । 'प्राङ्निपाताः सन्तो गत्यादिसञ्ज्ञका'इत्यर्थः । तेन ताभिः समावेशः, 'अधिरीश्वरे' विभाषा कृञी'—त्यत्र निपातपदसम्बन्धश्च सिद्धः । एषां द्योतकत्वं, वाचकत्वञ्च यथाकार्यं, यथाप्रयोगं बोद्ध्यमित्यन्यत्र विस्तरः । 'असत्त्वे' इति पर्युदासो लाघवादित्याह—**अद्रव्येति** ।

❀ **चिदस्थिमाला** ❀

विधानस्य च संग्रहः । नन्वेतैरनेकवचनकल्पने गौरवमत आह—**स्थितेति** । 'रीश्वरात्प्रा'गित्यर्थेऽधेः कर्मप्रवचनीयसञ्ज्ञकस्य निपातसञ्ज्ञा न स्यात्, अग्रे समावेशश्च न स्यात्, अतोऽन्यथा व्याचष्टे—**अधिरीश्वर इति** । ल्यब्लोपे पञ्चमी । प्राग्ग्रहणमेकसञ्ज्ञाधिकारेऽपि गत्यादिसञ्ज्ञासमावेशार्थमित्याह—**प्रागिति** । तदर्थमाह—**प्रागिति** । आदिनोपसर्ग-कर्मप्रवचनीयसञ्ज्ञापरिग्रहः । व्युत्क्रमेणोभयफलमाह—**तेनेति** । ल्यब्लोपे पञ्चम्याः, प्रागित्यस्याधिकाराऽन्तर्गतत्वस्य चाश्रयणेनेत्यर्थः । ताभिः=गत्यादिसञ्ज्ञाभिः । 'निपातसञ्ज्ञाया' इति शेषः । प्रकारान्तरेण समावेशसाधनं तु गुरुभूतमतिप्रसक्तञ्च तद्धिताणादौ । तथा च 'विषिञ्चती'त्यादौ षत्वं, सुपो लुक्च सिद्धः । ननु रीश्वरशब्दात्प्रागित्यर्थेऽपि ततोऽधेः पूर्वत्वान्न दोष इति चेन्न, तद्घटितसूत्रात्प्रागित्यर्थस्यैव सूत्रकारशैलीसिद्धत्वात्, एवमपि विभाषेत्यत्र दोषापत्तेश्च । एतेन "—आवृत्त्या प्राक्पदस्य तत्र पक्षेऽपि तथेति अधिकारस्य लाघवार्थतया सञ्ज्ञाविशेषानुक्ताविव प्रवृत्तेर्युक्तत्वात्,—प्रतिसूत्रं सम्बन्धस्यैवाभावेन सूत्रस्य तदनुपपत्त्या तदभावेऽपि रीश्वरशब्दस्यानर्थकत्वेनार्थस्यानवधित्वेन तस्यानवधिमत्त्वेन सूत्राणामेव तत्त्वस्यावश्यकत्वेन गत्यादिसञ्ज्ञानान्तदबाधकत्वात्समावेशः,—'प्राग्दीव्यत'इत्यादौ तु वैपरीत्यमितीआऽण्बाध इति च **रत्नाकरोक्तमपास्तम्** । तदेतद्ध्वनयन्प्राप्तविभाषात्वेन 'विभाषा कृञी' त्यत्र 'अधिरीश्वरे'इत्यस्यानुवृत्तेराह—**विभाषेति** । इत्यत्र=इत्युभयत्र । यत्तु महासञ्ज्ञया 'नियमेन पातयन्ति स्वार्थमन्यस्मिन्'—इत्यर्थलाभेनैषां द्योतकत्वमेवेति, तन्न, तस्याः प्राचामनुरोधित्वात् । अत एव पादपूरणार्थानामपि सञ्ज्ञा, बहुवचनं तु—निपतनं='निपाताः'—अनेकेष्वर्थेषु—येषामित्यर्श आद्यच्सूचनद्वारा निपातानामनेकार्थत्वबोधकं, तद्ध्वनयन्नाह—**एषामिति** । कार्यस्यापि—प्रयोगाश्रयत्वादाह—**यथा प्रेति** । एतेनो'पसर्गाणां द्योतकत्वं तद्भिन्ननिपातानां वाचकत्व'मिति **नैयायिकोक्तमर्धजरतीयानौचित्येन** 'सर्वेषां द्योतकत्वं वाचकत्वञ्चेति'—**दीक्षिताद्युक्तञ्च** परास्तं, तदाह—**इत्यन्यत्रेति** । मञ्जूषादावित्यर्थः । यद्यपि भाष्ये प्रसज्यप्रतिषेध उक्तः—तथापि स न युक्तः,—वाक्यभेदासमर्थसमासापत्तेस्तद्ध्वनयन्नाह—**असत्त्वे इति** । नन्वेवं भाष्योक्तप्रसज्यप्रतिषेधफले 'विप्रातीति विप्र' इत्यत्रातिप्रसङ्गः, तत्र प्रशब्दस्य क्रियाविशिष्टद्रव्यवाचकत्वात्समुदायस्य च द्रव्यभिन्नत्वात्तदन्यत्र वर्तमानत्वात्, इष्टापत्तिस्तु न—अव्ययसञ्ज्ञायां तदन्तविधिसत्त्वेन तदन्तस्याव्ययत्वे सुपोऽश्रवणापत्तेरत

❀ **ज्योत्स्ना** ❀

इत्यभिव्याप्येति । 'रीश्वरा' दिति ल्यब्लोपे इयं पञ्चमीति भावः । **एषामिति** । प्रादीनां, चादीनाञ्चेत्यर्थः । **यथाकार्यमिति** । 'अनुभूयते सुखं' 'साक्षात्क्रियते घट' इत्यादौ द्योतकत्वम्, 'अहंयु'रित्यादावस्मदाद्यर्थवाचकत्वं, वाचकत्वमन्तरेण कर्मलकारयुस्प्रत्ययादीनामसम्भवादिति भावः। नन्वेवं 'शरैरुस्रैरिवे'त्यादौ इवादीनां सादृश्यवाचकत्वमादाय तदन्वय्युस्रादिभ्यस्तृतीया कदाचिन्न प्राप्नोति, षष्ठी च स्यादत आह—**यथाप्रयोगमिति** । तथा च तत्र षष्ठ्यादिघटितप्रयोगाणामनभिधानात्तादृशस्थले वाचकत्वकल्पना नेति भावः ।

❀ **सदाशिवभट्टीयम्** ❀

स न युक्तः, वाक्यभेदासमर्थसमासापत्तेस्तद्ध्वनयन्नाह—**असत्त्वे इति** । नन्वेवं भाष्योक्तप्रसज्यप्रतिषेधफले 'विप्रातीति—**विप्र' इत्यत्राति**प्रसङ्गस्तत्र प्रशब्दस्य क्रियाविशिष्टद्रव्यवाचकत्वात्समुदायस्य च द्रव्यभिन्नत्वात्तदन्यत्र वर्तमानत्वात्, इष्टापत्तिस्तु न, अव्ययसञ्ज्ञायां तदन्तविधिसत्त्वेन तदन्तस्याव्ययत्वे सुपो-

विशेष्यतया द्रव्यभिन्नार्था इत्यर्थः। तेन क्रियाविशिष्टद्रव्यवाचिनां विप्रादिघटकप्रादीनां न। चादयः किम्? स्वरादिपठितानामसत्त्ववृत्तित्वे आद्युदात्तत्वं मा भूदिति।

उपसर्गाः। योगग्रहणं—'यदर्थे प्रादीनामन्वयस्तं प्रत्येवोपसर्गत्वादी'त्यर्थबोधनाय। तेन 'विगताः सेचका अस्माद्विसेचको ग्राम'इत्यादौ षत्वं न।

गतिश्चेति। 'च' उपसर्गसञ्ज्ञासमावेशार्थः। तेन 'प्रतिप्रणीत'मित्यादौ गतित्वात्

❀ अभिनव-चन्द्रिका ❀

विशेष्यतया द्रव्यभिन्नार्था इति। लिङ्गसङ्ख्यान्वयितानवच्छेदकं यद्रूपं तद्रूपेतररूपावच्छिन्नविषयकबोधतात्पर्येणाद्युच्चरिता इत्यर्थः। तेनात्यन्तनिरर्थकानामपि निपातसञ्ज्ञा सिद्धिरिति दिक्। **तम्प्रत्येवोपसर्गत्वादीति**। 'जन्यबोधविषयीभूतक्रियाविशेषविषयकतात्पर्यग्राहकत्वे सति प्राद्यन्यतमत्वमुपसर्गत्व'मिति स्वीकारादिति भावः।

❀ चिदस्थिमाला ❀

आह—**विशेष्येति**। अत्र सत्त्वशब्देन 'सतो भावः सत्त्व'मिति साध्यावस्थापन्नक्रियारूपा सत्ता नोच्यते, चादीनां तदवाचित्वात्—किन्तु 'सीदन्ति—क्रियागुणादयो यस्मि'न्निति व्युत्पत्त्या द्रव्यं तदाह—**द्रव्येति**। **वृत्तित्वे इति**। 'सति तत्त्वा'दिति शेषः। एतेन प्रातरादीनां केषाञ्चिदेव तत्त्वापत्तिर्न सर्वेषामिति सूचितम्। **मा भूदितीति**। इष्टापत्तिस्तु न—'अन्तरिच्छन्ति' 'प्रातरत्त'मित्यादिवैदिकप्रयोगविरोधापत्तेः। अद्रव्यार्थाः किं? पशुः। एवो गन्ता—'क्रियाया'मित्येवोक्तार्थलाभादाह—**योगेति**। आदिना गत्यादि। **बोधनायेति**। प्रत्यासत्तिन्यायसञ्चारबोधनद्वारेति भावः। **प्रतिगता इति**। 'विगता' इति क्वचित्पाठः। क्रियायोगे किम्? अधिसेचकं, विभक्त्यर्थेऽव्ययीभावः—अत्रो'पसर्गा'दिति षत्वम्। निपातसञ्ज्ञायास्तस्य सिद्धत्वादाह—**उपसर्गेति**। अन्यथैकसञ्ज्ञाधिकारात्पर्यायः स्यात्, इष्टापत्तिस्तु न, 'अभिषावक' इत्यादौ षत्वविकल्पापत्तेः—तदेतद्ध्वनयन्नाह—**तेनेति**। 'गतिरन्तर'इत्यस्य विषयत्वायाह—**प्रतीति**। अत्र प्रस्य

❀ ज्योत्स्ना ❀

'प्रतिगताः सेचका अस्मात्प्रतिसेचक'इति पाठः। 'प्रसेचक' इति त्वपपाठः, इणः परत्वाभावात्षत्वाऽप्राप्तेः, अत एव भाष्ये-'विसेचक' इत्युदाहृतम्।

❀ सदाशिवभट्टीयम् ❀

ऽश्रवणापत्तेरत आह—**विशेष्येति**। 'अत्र सत्त्वशब्देन सतो भावः—**सत्त्वमिति** साध्यावस्थापन्नक्रियारूपा सत्ता नोच्यते, चादिनान्तदवाचित्वात्, किन्तु सीदन्ति क्रियागुणादयो यस्मिन्निति व्युत्पत्त्या द्रव्यन्तदाह—**द्रव्येति**'भट्टा आहुः। **गतिश्च**। **प्रतिप्रणीतमिति**। प्रसङ्गादनन्तर इत्यस्य व्यावर्त्यप्रदर्शनाय **प्रतीति**। अत्र **प्रस्य** तत्समावेशो बोध्यः। 'प्रकृतिव'दित्यतिदेशेन सुगो लुकि तु **निरि**त्यादौ रुत्वादिस्यादत आह—**प्रेति**। यथासम्भवं लौकिकालौकिकान्यतरप्रयोगानुकरणानीत्यर्थः।

❀ विषमपदविवृतिः ❀

अभिव्याप्येति। [पृष्ठे १४४] आङोऽध्याहार इति भावः। **विप्रादिघटकेति**। विपूर्वात्प्रा पूरण इत्यस्मात्कर्तरि के रूपमिति भावः। **इत्यर्थबोधनायेति**। अयं भावः,—'क्रिये'ति लुप्ततृतीयान्तं, 'योग'-इति—पदान्तरस्याध्याहारः—'स्तोऽश्चुने' त्यादिवत्। सूत्रस्थं 'योग'पदं च,—अर्शआद्यजन्तं प्राद्यन्वयिधात्वर्थपरं विषयसप्तम्यन्तम्। तथा च 'क्रियया युक्ताः प्रादयः स्वान्वयिक्रियाविषये क्रियावाचकं

'गतिरनन्तरः' इति स्वरः, उपसर्गत्वाण्णत्वञ्च सिद्ध्यति।

प्रादयः।—इति योगविभागस्तु क्रियायोगाभावेऽपि निपातत्वाय। एतत्सिद्धमेवोपसर्गप्रतिरूपकस्य निपातत्वमुक्तं चाद्यन्तर्गणसूत्रेणेति दिक्। 'प्रपरे'त्यादावनुकार्यानुकरणयोरभेदविवक्षया सुबनुत्पत्तिः। **निस्दुसिति**। अत्रेदं बोध्यं—सान्तग्रहणे रान्तस्याग्रहणमेव, यत्र तु रुत्वमसिद्धं तत्र रान्तग्रहणेऽपि न सान्तग्रहणं, तद्दृष्ट्या रुत्वस्यासिद्धत्वात्।

यत्र तु रुत्वस्य सिद्धत्वं, यथा—षत्वणत्वयोः—तद्विषयोपसर्गत्वप्रतिषेधपरे—'दुरः षत्वणत्वयो'रिति वार्त्तिके कृतरेफसान्तस्यापि ग्रहणम्। 'षत्वणत्वयो'रित्यस्य' तद्विधायक-

---

❀ अभिनव-चन्द्रिका ❀

सुबनुत्पत्तेरिति। शक्त्या लक्षणया वाऽर्थविषयकबोधजनकत्वरूपार्थवत्त्वस्याभावेन प्रातिपदिकसञ्ज्ञाया अभावादिति भावः। ननु प्रतिपदोक्तस्य दुर एव ग्रहणं स्यान्न तु कृतरुत्वदुस इत्यत

❀ चिदस्थिमाला ❀

तत्समावेशः। **णत्वञ्चेति**। 'उपसर्गादसमासेपी'ति भावः। **तत्त्वायेति**। 'तेषा'मित्यादिः। तेन 'प्रगत आचार्यः प्राचार्यः'—इत्यादौ—अव्ययपूर्वपदप्रकृतिस्वरसिद्धिः। नन्वेवमु**पसर्गेति** चाद्यन्तर्गणसूत्रे व्यर्थमत आह—**एतदिति**। वौद्ध-**प्रादय** इति योगविभागसिद्धत्वेनाभिमतमेवेत्यर्थः। सूत्रपाठापेक्षया गणपाठस्य पूर्वत्वस्य—'पूर्वपरावरे'तिसूत्रभाष्ये स्पष्टत्वादत एव गणपाठमाश्रित्य—**तद्धितश्चे**त्यादिप्रत्याख्यातं 'तद्धितश्चे'तिसूत्रे। भाष्ये योगविभागस्य वैयर्थ्यन्तु न, पाणिनिरज्ञतापत्तेः। लाघवात्—' भाष्यकृताऽप्रत्याख्यानाच्च। भाष्यारूढत्वादनार्षत्वशङ्कापि तत्र न। एतेन'**उपसर्गे**तिचाद्यन्तर्गणसूत्रेणैव तत्र निपातत्वसिद्धेर्योगविभागो व्यर्थः'—इति**कौस्तुभ**ाद्युक्तमपास्तम्। तदाह—**दिगिति**। 'प्रकृतिव'-दित्यतिदेशेन सुब्लुगपेक्षया लाघवात्—क्वचिदनिष्टाद्यापत्तेश्चाह—**प्रेति**। यथासम्भवं लौकिका लौकिकान्यतरप्रयोगानुकरणानीति भावः। **निस्दुसितीति**। एतेन मूले एवमेव पाठः सूचितः। 'एकस्या आकृते'रिति न्यायात्। एतेनान्यथा पठन् **दण्डी** प्रत्युक्तः। **रत्नाकरा**द्यसङ्गतिं ध्वनयन्सिद्धान्तमाह—**अत्रेदमिति**। **सान्तेति**। 'निसस्तपता'वित्यादावित्यर्थः। स्वरूपभेदादिति भावः। एतद्ग्रहणेऽर्धजरतीयत्वेन पूर्वतो वैषम्यमाह—**यत्र त्विति**। यस्मिन्शास्त्रे प्रवर्तयितव्ये त्वित्यर्थः। एवमग्रेऽपि। 'निरः कुषः' इत्यादाविति भावः। **अपि**रुक्तसमुच्चायकः। असम्भवनिरासाय वक्ष्यमाणार्थसङ्गतये च मध्ये विषयमाह—**यथेति**। **तदिति**। 'यत्रे'ति परामृष्टषत्वादिशास्त्रे इत्यर्थः। **कृतरेफेति**—'स'विशेषणम्। अपिना रान्तसमुच्चयः। ननु 'षत्वणत्वयो'रितिवार्तिके कार्यानिर्देशात्तयोः कर्त्तव्ययोस्तत्प्रतिषेध इति वार्तिकार्था-

❀ ज्योत्स्ना ❀

यत्र तु रुत्वमसिद्धन्तत्रेति। यथा 'निरः कुषः' 'सुदुरोरधिकरणे' इत्यादौ। नचैव'मेकाच उपदेश' इत्यनन्तरं 'निरः कुषोऽनिष्ठाया'मिति लघुभूतन्यासेन सिद्धे 'स्वरतिसूती'ति विकल्पप्रकरणे—'निरः कुषः' 'इण्निष्ठाया'मिति गुरुभूतन्यासवैयर्थ्यम्, उपसर्गद्वयेन रूपद्वयस्य सिद्धत्वादिति वाच्यम्, 'अनिष्ठाया'मिति पर्युदासेन कृत्स्वेव प्रसङ्गात्, 'न निष्ठाया' मिति पृथग्योगेन

❀ विषमपदविवृतिः ❀

प्रति उपसर्गसञ्ज्ञका' इति। 'विगताः सेचका' इति पाठः। **अभेदविवक्षेति**। इदं प्राचामनुरोधेन, स्वमते तदभावस्य वक्ष्यमाणत्वात्। **सान्तग्रहण इति**। 'निसस्तपता'वित्यादौ।

शास्त्रयो'रित्यर्थात्। अत एव सुषामादिषु दुष्ठुशब्दपाठः सार्थकः, स हि 'अपदुःसुषु स्थः कुः' इति दुस्पूर्वकस्थाधातोः कुप्रत्यये साधुः। अन्यथा दुस्पूर्वकात्कुप्रत्यये 'उपसर्गा'दित्येव षत्वे सिद्धे तद्वैयर्थ्यं स्पष्टमेव। न चास्य रूढत्वेनावयवार्थाभावादुपसर्गत्वा-

❀ अभिनव-चन्द्रिका ❀

आह—**तद्वैयर्थ्यं स्पष्टमेवेति**। न च दुरपूर्वकात्स्थाधातोः कुप्रत्यये सत्वार्थं सुषामादिषु-दुष्ठुशब्दपाठ आवश्यकइति वाच्यं। स्वपदुस्सुस्थ इति न्यासेन रोः सुपि इति नियमात् दुरोग्रहणमेवेतिज्ञापकस्य सुस्थत्वात्।

❀ चिदस्थिमाला ❀

वार्तिकस्योपसर्गसञ्ज्ञासूत्रस्थत्वलाभेन तद्दृष्ट्या रुत्वस्यासिद्धत्वात्कथं सिद्धत्वमत आह—**षत्वेति**। एवञ्च वार्तिकस्य तत्सूत्रस्थत्वलाभेन तद्दृष्ट्या रुत्वस्य पूर्वत्वेन सिद्धत्वमिति भावः। न प्रागुक्तोऽर्थः—किन्त्वयमेवेति कृतरेफसान्तग्रहणमपि तत्रावश्यकमित्यत्र मानमाह—**अत एवेति**। तत्र कृतरेफसान्तस्यापि ग्रहणादेवेत्यर्थः। कुरित्यनुवृत्तिलभ्यम्। **साधुरिति**। अयं सर्वलिङ्गः,—अन्यथा उक्तरीत्या[1] तत्र रान्तमात्रग्रहणे सान्तस्यैव ग्रहणं, तत्र तथास्वरूपनिर्देशादित्याह—**दुसिति**। अस्य तत्र तदप्रतिषेधादिति भावः। **अर्थाभावादिति**। क्रियायोगाभावेनेतिभावः। अभ्यर्हितत्वात्प्रतिष्ठाशब्दस्य

❀ ज्योत्स्ना ❀

निषेधस्य निषेधकरणे तु तदनुवृत्तिरुत्तरत्रापि सम्भाव्येत, नापि च लाघवमिति भावः। **अपिग्रहणमिति**। तत्फलन्तु 'दुःसेधती'त्यत्र षत्वं कदापि नेति भावः। **अत एवेति**। वार्त्तिके कृतरेफसान्तस्यापि ग्रहणादेव। 'अपदुस्सुषुस्थः कु रि'तिसूत्रे द्विसकारपाठः, प्रतिपदोक्तसान्तानुकरणाद्रान्ते तदभावः, तद्ध्वनयन् ज्ञापकमुपपादयति—**अन्यथा दुस्पूर्वकादिति**। एतेन—'दुर्युपपदे यदा कुप्रत्ययस्तदा वार्त्तिकेन निषेधे प्राप्ते षत्वार्थं 'दुष्ठु'पाठश्चरितार्थः'—इत्यपास्तम्।

❀ सदाशिवभट्टीयम् ❀

अन्यथा दुसिति। स्वपयोर्दुसि च स्थः कु रित्यसन्दिग्धन्यासेन दुस्येव कुप्रत्ययोऽङ्गीक्रियतान्न दुरीति—सुषामादिषु दुष्ठुशब्दस्त्यज्यतामिति भावः। 'यावता विनानुपपन्न'मिति प्रतिपदोक्तपरिभाषापि नेत्यपि बोध्यम्। ननु—

❀ विषमपदविवृतिः ❀

यत्र तु रुत्वमसिद्धमिति। इदमयुक्तम्, **इण्निष्ठायामिति**—सूत्रस्थभाष्यविरोधात्, तथाहि—'इडित्यनुवर्तमाने पुनरिड्ग्रहणं किमर्थं ? नित्यार्थमारम्भः, नैतदस्ति प्रयोजनम्, सिद्धात्र विभाषा 'निरः कुष' इत्यनेन, तत्रारम्भसामर्थ्यान्नित्योऽपि विधिर्भविष्यति, नात्र पूर्वेण विभाषा प्राप्नोति, किं कारणं ? 'यस्य विभाषे'ति प्रतिषेधात्, तत्रारम्भसामर्थ्याद्विभाषा लभ्येत,—पुनःपुनरिड्ग्रहणादिडेवेति। "इण्निष्ठायां तत्र यदुपाधेर्विभाषा तदुपाधेः प्रतिषेध" इति भाष्यकृता सिद्धान्तितत्वात्। निरः कुषो निष्ठाया 'यस्य विभाषे'ति प्रतिषेधेपि निसः कुषो निष्ठाया इट्सम्भवेन 'निष्कुषितं' 'निष्कुष्ट'मिति रूपद्वयस्य सिद्धौ 'नात्र पूर्वेण विभाषा प्राप्नोती'ति भाष्यासङ्गतेः। इड्ग्रहणे क्रियमाणेप्युक्तरीत्येड्विकल्पापत्त्या पुनरिड्ग्रहणादिडेवेति भाष्यासङ्गतिश्च। उक्तरीत्या विकल्पप्राप्ताविण्निष्ठायामिति सूत्रवैयर्थ्यं च। तस्मादिण्निष्ठायामिति सूत्रारम्भसामर्थ्यादुक्तभाष्यप्रामाण्याच्च, यत्र रुत्वस्यासिद्धत्वं सिद्धत्वं वा तत्र सर्वत्र रान्तग्रहणे सान्तग्रहणं व्यर्थमेव—"इत्युक्तं तद्वैयर्थ्यं स्पष्टमेवेति।

ननु रेफान्तदुर्पूर्वकात्स्थाधातोः कुप्रत्यये षत्वाभावघटितप्रयोगवारणाय सुषामादिषु दुष्ठुशब्दपाठइति चेन्न, 'अपसुदुःषुस्थ' इति न्यासे रेफान्तस्य 'रोः सुपी'ति नियमेन विसर्गाप्राप्त्या सान्तपूर्वकात्स्थाधातोरेव कुप्रत्ययविज्ञानेनादोषात्।

१. अन्यथा=रान्तमात्रग्रहणे। तदा तत्रोभयोरपि ग्रहणं स्वरूपानिर्देशादित्याह—**दुसिति**—इति पाठान्तरम्।

भावः, अत्यन्तरूढेषु प्रतिष्ठा—निष्ठादिषु षत्वानापत्तेः। अर्थवत्त्वारोपेण चेत्—प्रकृतेऽपि। दुसः पाठस्तु 'दुरयते'इत्यादौ रुत्वासिद्ध्या लत्वाभावार्थ इति दिक्।

न वेति। इतिर्लोकेऽर्थपदार्थकस्य शब्दपदार्थकत्वकृत्। यथा 'गवित्ययमाहे'-त्यादावनुकरणे। इह तु 'स्वं रूप'मिति परिभाषणाच्छब्दपदार्थकस्यार्थपदार्थकत्वकृत्। क्वचिदितेर्न पदार्थविपर्यासकत्वं यथाऽनुवादवाक्ये। स च न-वा-शब्दाभ्यां प्रत्येकं

❁ अभिनव-चन्द्रिका ❁

न वेति विभाषा।'अभावविकल्पयोर्विभाषासञ्ज्ञा स्या'दितिवृत्तिरुचिता, मूलोक्तवृत्तिस्तु न युक्ता, प्रथमान्तद्वयाऽसमभिव्याहृतस्य, समासाघटकस्य च अत्यन्ताभावार्थकत्वेन निषेधार्थकत्वाभावात्।

❁ चिदस्थिमाला ❁

पूर्वनिपातः। तत्र समाधत्ते—**अर्थवत्त्वेति**। साधुत्वाय रथन्तरादिवद्व्युत्पत्तेरावश्यकत्वात्।

प्रकृतेऽपीति। 'तर्हि''सम'मित्याद्यन्तौ। ननु 'निरः कुषः' 'सुदुरोरधिकरणे' 'निसस्तपता'वित्यादि-निर्देशात्त्रितयस्य सफलस्य सत्त्वेऽपि दुसः पाठोऽफलोत आह—**दुस इति**। न चैवमपि निर्मूलः स इति वाच्यम्, 'उपसर्गस्यायता'वित्यात्र तथा **वामनोक्तेः**। 'हयवरट्'सूत्रेऽयोगवाहप्रकरणस्थभाष्यो-क्तेश्च, शास्त्रस्य प्रयोगमूलकत्वाच्च। एतेन'–दुस् नोस्त्येव, तेषामिव तस्य सूत्रादावव्यवहृतत्वात्। वामनादीनां प्रमाद एवेति,—**केनचिदुक्तम्**, ''–रान्तग्रहणे सान्ताग्रहणं, तथाचेण्निष्ठायामिति निरः परस्य कुषो निष्कुषित इति सिद्धेऽपि निसो निष्कुष्ट इत्यपि स्यात्—अथ निरः कुषः—इति पूर्वेणैवोक्तरूपद्वय-सिद्धाविण्निष्ठायामित्यस्य वैयर्थ्यप्रसङ्गाद्रुत्वं नासिद्धमिति नोक्तदोषः। न च 'यस्य विभाषा' इति निषेधबाधनार्थता तस्येति वाच्यम्, निष्ठायामित्येतावतैव सिद्धे पुनरिड्ग्रहणेन–'इण्निष्ठाया'मित्यस्य नित्यताया अपि ज्ञापनात्–इति चेत्तर्हि तावतैव 'निसस्तपता'वित्यादौ सान्तग्रहणे रान्ताग्रहणमिति निष्टपति निस्तपतीत्यादिरूपद्वयापत्तिः। तथा दुरो ग्रहणं नेति रान्ते एव 'न सुदुर्भ्या'मिति निषेधेऽपि सान्ते उपसर्गादितिपूर्वेण नुमः प्राप्त्या दुर्लभो दुलम्भ इति रूपद्वयापत्तिः।षत्वविधौ–**सुविनिर्दु**रित्यत्र तु रुत्व-सिद्ध्या सान्तस्यापि ग्रहणे 'दुःसुषुपतु'रिति एकमेव रूपम्। 'लक्षणप्रतिपदोक्ते'त्यस्यानित्यत्वेन तत्राप्रवृत्तेः, तस्माद्यथाप्राप्तमुचितमेव, अनभिधाने तु न मानम्–प्रादौ रान्तसान्तयोर्भिन्नपाठवैयर्थ्यञ्च। तेन 'दुरः षत्वे'त्यत्र दुर एव ग्रहणं न दुस इति तत्रापि षत्वणत्वतदभावघटितरूपद्वयम्–''इति **रत्नाकरोक्तं**, 'निसादिचतुर्णां लौकिकप्रयोगस्थानामनुकरण'मित्य**न्योक्त**ञ्चापास्तम्। तदाह—**इति दिगिति**।

इति साफल्यमाह–**इतिरिति**। नान्यादृशमिमिति भावः। लोके प्रागुक्तं न सार्वत्रिकमित्याह–**क्वचिदितिर्न पदार्थेति**। **कत्वकृदिति**। उपस्थितत्वादिति भावः।·एवमग्रेऽपि। इह तु=व्याकरणे तु। परिभाषणं–शब्द-पदार्थकत्वे हेतुः। **इतीतेरिति**। इदमेवेतेरित्यर्थः। अस्योदाहरणमाह—**यथेति**। 'मृगो धावती'ति 'पश्य'–इत्यादाविति भावः। स च=इतिश्च। यद्यखण्डनिपातो निषेधार्थो 'नवा' शब्दो गृह्येत तर्हि सञ्ज्ञा-करणानर्थक्यं, विभाषाप्रदेशेषु नेत्यस्यैवौचित्यात्—तदाह—**नवेति**। 'वा'मात्रसम्बन्धेऽप्युक्तदोष

❁ ज्योत्स्ना ❁

न पदार्थविपर्यासकत्वमिति—'न'शब्दसहितः पाठः। **यथाऽनुवादवाक्य इति**।

❁ सदाशिवभट्टीयम् ❁

'निरः कुषः''सुदुरोरधिकरणे' 'निसस्तपता'वित्यादिनिर्देशात्–त्रितयस्य सफलस्य सत्त्वेऽपि दुसः किं फलमत आह—**दुसः पाठेति**।

सम्बध्यते, व्याख्यानात् । तेन नवाशब्दयोरर्थौ सञ्ज्ञिनौ । 'स्वं रूप'मित्यस्य प्रत्याख्याने त्वितिशब्दो व्यर्थ एव, अर्थे कार्यस्याबाधात् । तयोरेव सञ्ज्ञित्वे तु 'विभाषा श्वे' रित्यादौ नवाशब्दावादेशौ स्याताम् । प्राप्तविभाषासु नास्योपयोगः, तासां पक्षे निवृत्तिमात्रफलऽकत्वात् अप्राप्तविभाषास्वपि न, तासां पक्षे विधिमात्रार्थत्वात् । अप्राप्तत्वेन निषेधाऽसम्भवाच्च, तस्मादुभयत्र विभाषार्थमिदम् । 'विभाषा श्वे'रित्यादौ एतदभावे यदि विधिमुखेन प्रवृत्तिस्तर्हि पित्स्वेव विकल्पः स्यात्, कित्सु तु नित्यमेव सम्प्रसारणं स्यात् । निषेधमुखेन प्रवृत्तौ कित्स्वेव प्रवर्त्तेत न पित्सु । उभयथा प्रवृत्तिस्तु—वैरूप्याद्वाक्यभेदा-

❀ अभिनव-चन्द्रिका ❀

अत एव गङ्गां निषेधयतीत्यादितात्पर्येण 'गङ्गां ने'त्यादि न प्रयुज्यते । **इतिशब्दो व्यर्थ एवेति** । वस्तुतस्तु 'स्वं रूप'मित्यस्य प्रत्याख्यानेपि इतिशब्दो न व्यर्थो, न वा इतेः पदार्थविपर्यासकत्वं, 'निषेधविकल्पौ विभाषासञ्ज्ञा'वितितात्पर्येण 'वा विभाषे'ति वाक्यस्य निराकाङ्क्षत्वात् । अत एव 'निषेधः पदार्थः' 'अभावः प्रमेय' इत्यादितात्पर्येण 'न पदार्थः' 'वा प्रमेय'इत्यादि न प्रयुज्यते, तस्मादितेः सर्वनामत्वेन इतेरेवनिषेधविकल्पार्थकत्वं, नवेतितात्पर्यग्राहकमित्येव रमणीयः पन्थाः । 'गवित्ययमाहे'त्यनुकरणस्थलेप्येवमेव । अत एव 'नारद इत्यबोधी'त्यादौ नारदपदान्न द्वितीया, अन्यथा नारदस्यैव बोध्यं प्रति कर्मत्वेन सा दुर्वारा स्यात् । मम तु इतिपदमेव नारदार्थकं, नारदपदञ्च तात्पर्यग्राहकम्, इतिशब्दादुत्पन्ना द्वितीया लुप्तेति न कोपि दोष इति सुधियो विभावयन्तु । 'व्यक्तिपक्षे 'विभाषा श्वे'रित्यादौ पित्सु विधिमुखेन प्रवृत्तिः, कित्सु निषेधमुखेन प्रवृत्तिर्लक्ष्यानुसारात्प्रतिलक्ष्यं लक्षणोपप्लवः क्रियत इति सूत्रमनावश्यकम् । जातिपक्षे तु सूत्रमावश्यक'मिति कैयटोक्तं न युक्तमिति

❀ चिदस्थिमाला ❀

एवेत्याह—**व्याख्यानादिति** । अर्थौ=निषेधविकल्पाख्यौ । सूत्रमतेनेदमुक्तमिति ध्वनयितुमाह—**स्वं रूपमिति** । तत्प्रत्याख्यानसाधकयुक्तिरप्यत्र नास्तीत्याह—**अर्थे इति** । ननु तत्सूत्रसत्त्वेऽपीतिर्मास्तु, शब्दे कार्यस्य बाधादत आह—**तयोरेवेति** । नवाशब्दयोरेवेत्यर्थः । **नवाशब्दाविति** । 'पर्यायेण, युगपद्वे'ति शेषः । निराकाङ्क्षत्वात्सम्प्रसारणग्रहणाननुवृत्तेः । एतेन 'नवाशब्द आदेशः स्या'दिति **दण्डयुक्त**मपास्तम् । क्वचिदेवास्या उपयोगो न सर्वत्रेत्याह—**प्राप्ते**त्यादिना । 'विभाषोपपदेने'त्यादिप्राप्तविभाषास्वित्यर्थः । **निवृत्तिमात्रेति** । भावांशस्य सिद्धत्वादिति भावः । **अप्राप्तेति** । 'विभाषोर्णो'रित्यादिष्वित्यर्थः । **विधिमात्रेति** । अभावांशस्य सिद्धत्वात् । सम्भवाद्दोषान्तरमाह—**अप्राप्तेति** । तत्त्वं लक्ष्ये उपपादयति—**विभाषेति** । अत्र किति सम्प्रसारणं प्राप्तमकिति न तत्राह—**यदीति** । **नित्यमेवेति** । यजादित्वादितिभावः । 'प्रवृत्तौ त्विति' पाठः । **उभयथेति** । पित्सु विधिमुखेन कित्सु निषेधमुखेनेत्यर्थः । **वैरूप्याद्वाक्येति** । वैरूप्यलक्षणवाक्यभेदापत्तरित्यर्थः । लिट्त्वेनोपस्थापकलिट्पदात्—पित्त्वकित्त्वरूपविरुद्धधर्मद्वयेन लिड्उपस्थितिं कृत्वा तथा वक्तव्यत्वादिति भावः । **चेन** भावतात्पर्यकतालाभेन विधिमुखेनैव प्रवृत्तेरितिदोषसमुच्चयः ।

❀ ज्योत्स्ना ❀

'इति हेतुस्तदुद्भव' इत्यादौ यथा । **वैरूप्यादिति** । एकेन वाक्येन भिन्नरूपयोर्विधि-निषेधयो-

❀ सदाशिवभट्टीयम् ❀

नवेति वि । ननु तत्सूत्रसत्त्वेपीतिर्मास्तु शब्दे कार्यस्य बाधादत आह—**तयोरेवेति** । **प्राप्तेति** । 'विभाषोपपदेन प्र'त्यादिषु । **अप्राप्तेति** । 'विभाषोर्णो'रित्यादिषु ।

पत्तेश्चाशक्या । सञ्ज्ञाकरणे तु श्रुतक्रमानुरोधात्पूर्वं किन्तु निषेधस्ततः किदकिद्रूपे सर्वस्मिन् लिटि ऐकरूप्यं प्रापिते सति 'पक्षे भवती'त्येकरूपेण विधिमुखेनैव विकल्पः ।

भाष्यकृतस्तु—एवं हि 'हृक्रोरन्यतरस्या'मित्यादावनुपपत्तिर्विभाषापदाभावात् । 'इति-शब्दस्य 'विभाषे'त्यत्रापि सम्बन्धाद्विभाषापदार्थः सञ्ज्ञे'ति तु न युक्तम्, अर्थे सञ्ज्ञात्वस्यादृष्टत्वात् । 'अर्थाक्षिप्तशब्दमात्रं सञ्ज्ञे'त्यपि न युक्तम्, एकस्यार्थस्य समान-फलकानेकसञ्ज्ञाकरणस्य 'अनाकृतिः सञ्ज्ञा' इति वृद्धिसञ्ज्ञासूत्रस्थभाष्येण तिरस्का-रात् । तस्मात्तत्र लक्ष्यानुसारेणैवोभयमुखेन प्रवृत्तिर्वाच्येति—विभाषापदघटितेऽपि तथैवास्तु, किं सूत्रेणेति—जातिव्यक्तिपक्षयोरुभयोरपि सूत्रं प्रत्याचख्युः ।

❀ अभिनव-चन्द्रिका ❀

मनसि निधायाह-**जातिव्यक्तिपक्षयोरिति** ।

अयम्भावः—सञ्ज्ञाहकवाक्ये यदि विधिमुखेन प्रवृत्तिस्तर्हि उपप्लुतवाक्येऽपि विधिमुखेनैव प्रवृत्तिः स्यात् । यदि सञ्ज्ञाहकवाक्ये निषेधमुखेन प्रवृत्तिस्तर्हि उपप्लुतवाक्येष्वपि निषेधमुखेनैव प्रवृत्तिः

❀ चिदस्थिमाला ❀

यद्वा एकत्र तथा सत्याह—**वैरूप्यादिति** । आवृत्तावाह—**वाक्येति** । आर्थिकमाह—**किन्त्विति** । ननु लिट्पदादनेन रूपेणोपस्थितिः । एतेन '—सिद्धान्तेपि वैरूप्यलक्षणवाक्यभेदापत्तेस्तुल्यत्वादिदम-युक्तम्—'इत्यपास्तम् । **ऐकरूप्यमिति** । वैरूप्यैकरूप्ये अत्र विषयकृते ग्राह्ये इति भावः। एकरूपेण=लिट्त्वेन। एवं हि=तदर्थं सूत्राङ्गीकारे हि । **अनुपेति** । अभ्यवपूर्वस्य हृञोऽदनार्थत्वाद्विकारार्थस्य कृञोऽकर्मकत्वा-द्वतीत्यादिना तत्र कर्मत्वे प्राप्तेऽर्थान्तरे चाप्राप्ते तदारम्भेणोभयत्र विभाषात्वस्य तत्रेष्टत्वादितिभावः । **विभाषेति** । तस्यैव पदस्य सञ्ज्ञात्वादिति भावः । तत्र वैरूप्योद्धारफलक**दण्डन्याद्युक्तिं** खण्डयति—**इतीति** । 'मध्यमणिन्यायेने'ति भावः । **पदार्थ इति** । एवञ्च 'हृक्रोरि'त्यादौ तस्य सत्त्वान्नानुपपत्ति-रिति भावः । **अर्थे इति** । क्वापीति भावः । **कौस्तुभाद्युक्तिं** खण्डयति—**अर्थेति** । मात्रं कार्त्स्न्ये । ननु विभाषापदमेव, तथा च नानुपपत्तिस्तत्रेति भावः । तन्यादेः कृदाद्यनेकसञ्ज्ञास्वीकारादाह—**समानेति** । **अनाकृतिरिति** । अभिन्नत्यर्थः । वृद्धिशब्दस्यैव सञ्ज्ञात्वं, नादैच्छब्दयोरित्यर्थसाधकमिदं भाष्यम् । तस्मात्=तत्रानुपपत्तेरन्यथाऽनुद्धारात् । तत्र='हृक्रोरि'त्यादौ—**उभयेति** । 'उक्तदोषमङ्गीकृत्ये'ति शेषः । 'घटितेष्वपी'ति पाठः । **तेपी**ति पाठे—जातावेकवचनं, तथैव=लक्ष्यानुसारेण तमङ्गीकृत्योभयमुखेन प्रवृत्तिरेव । **सूत्रेणेतीति** । प्रकृतेत्यादिः । एवमग्रेऽपि । यत्तु—**रत्नाकरः**—"जातिपक्षे क्वचित्साफल्यस्ये-ष्टत्वेनाव्यापकत्वेन लक्षणस्यैकत्वेनैतदभावे प्रागुक्तरात्या दोष इत्येतदावश्यकत्वं, व्यक्तिपक्षे तु प्रतिलक्ष्यं लक्षणभेदेनोभयरूपेणापि प्रवृत्त्युपपत्तेर्व्यर्थमिद''मिति, तत्खण्डयति—**जातीति** । व्यापकत्वमव्यापकत्वं साफल्यमसाफल्यञ्चोभयत्र तुल्यमिति भावः । स्पष्टञ्चेदमन्यत्र ।

❀ ज्योत्स्ना ❀

विधातुमशक्यत्वादिति भावः । विधेयभेदाद्वाक्यभेदाङ्गीकारे तु स एव दोष इत्याह—**वाक्य-भेदापत्तेश्चेति** । **प्रत्याचख्युरिति** । अत्रेदं चिन्त्यम्,—'अशिष्यो वा विदितत्वा'दिति प्रत्या-

❀ विषमपदविवृतिः ❀

श्रुतक्रमानुरोधादिति । यद्यपि शब्दस्य विरम्य व्यापाराभावस्तथापि शाब्दबोधोत्तरकालिको बोद्धृणां प्रतिपत्तिक्रमोऽयमित्यदोषः । व्यक्तिपक्षे तु—'लक्ष्यभेदेन लक्षणभेदात्क्वचित्किञ्चिल्लक्षणं विधिमुखेन प्रवर्त्तते इतीष्टसिद्ध्या सूत्रं न कर्त्तव्यमिति' **कैयटोक्तमयुक्तमित्यभिप्रेत्याह— जातिव्य-क्तिपक्षयोरुभयोरपीति** ।

स्वं रूपं श । 'स्वं रूप'मित्यस्य 'बोध्य'मिति शेषो, व्याख्यानात्तदाह-**सञ्ज्ञीति** । 'राज्ञो य'दित्यादौ लौकिकव्युत्पत्त्योपस्थितार्थस्य प्रत्ययेन पौर्वापर्यासम्भवात्प्रातिपदिकादित्यनेनान्वयासम्भवाच्च तदर्थकशब्दमात्रग्रहणापत्तौ नियमार्थं सूत्रम् ।

तत्र स्वशब्द आत्मीयत्वेनार्थमाह, रूपशब्देन शब्दस्वरूपम्, एतदुभयं सञ्ज्ञीत्यर्थः । तत्रार्थो न विशेष्य—उक्तयुक्तेः, किन्तु शब्दविशेषणम् । एवञ्च-'अर्थविशिष्टः शब्दः

❀ अभिनव-चन्द्रिका ❀

स्यात्, उभयमुखेन प्रवृत्तिस्तु गौरवाद्वाक्यभेदप्रसङ्गाच्च युक्तेति । **आत्मीयत्वेनेति** । यदर्थतात्पर्येण यत्पदमुच्चार्यते स तस्यात्मीयोऽर्थ इति, 'स्वविषयकबोधतात्पर्येणोच्चरितत्व'सम्बन्धेन शब्दं प्रति अर्थस्य विशेषणत्वमिति स्वशब्द आत्मीयत्वेनार्थमाहेति व्याख्यानाल्लभ्यते, ननु 'रूप्यते बोध्यत इति रूपमर्थ' इति कैयटोक्तव्याख्यानेनेतिभावः । **अर्थविशिष्टःशब्द इति** । वै० 'स्वविषयकबोधजनकत्व-

❀ चिदस्थिमाला ❀

स्वं रूपमिति । इदं न सञ्ज्ञापरं, पूर्वनिर्देशात्, 'रूपग्रहणेनार्थस्यापि विवक्षे'ति भाष्यविरोधापत्तेश्च, अत एव 'शब्दस्य स्वं, रूपं वा—स्वरूपान्यतरस्य सञ्ज्ञे'त्यपि नार्थः । अर्थे क्वापि सञ्ज्ञात्वस्यादृष्टत्वाच्च । शब्दार्थान्यतरस्य सञ्ज्ञात्वसञ्ज्ञित्वलाभेन इष्टार्थालाभापत्तेश्च । विभिन्नविभक्तित्वादसमानाधिकरण्याच्च,—तथा वाक्यार्थासम्भवाच्च । 'रूपं शब्दस्य सञ्ज्ञे'ति भाष्ये तु सञ्ज्ञाशब्दः सञ्ज्ञायते—इति व्युत्पत्त्या सञ्ज्ञिपरत्वेन बोध्यपरः । अत एव सञ्ज्ञासूत्रमेवेदमिति न । तत्प्रकरणस्य विच्छिन्नत्वाच्च । तदेदधृदि निधायाह—**व्याख्यानादिति** । तदाह=तत्फलितमाह ।

अस्योदाहरणमाह-**राज्ञ इति** । शब्दद्वारा सम्भवादाह-**प्रातीति** । **न्वयेति** । 'अभेदे'त्यादिः । **सम्भवाच्चेति** । 'सामर्थ्येन विनिगमनाभावेन बहुलक्ष्यसंस्कारानुरोधेन चे'ति शेषः । **तदर्थकेति** । राजार्थकेत्यर्थः । मात्रशब्दः कात्स्न्र्ये । **सूत्रं**-'प्रकृते'त्यादिः । **तत्र**=सूत्रे। ननु रूपग्रहणवैयर्थ्यापत्त्या शब्दस्वरूपरूपात्मवाची न स्वशब्दोऽत आह-**स्वेति । स्वरूपमिति** । 'गृह्यते' इति शेषः । ननूभयोर्गोश्रृङ्गवत्समप्रधानयोः सञ्ज्ञित्वांऽशे आनर्थक्यम् , उक्तदोषापत्तिश्चातो विशिष्टस्य तत्त्वं वाच्यं, तत्र विनिगमकाभावप्राप्तमाह—**तत्रार्थ इति** । तत्र=तयोर्मध्ये । विशेष्यशब्दो विशेष्यलिङ्गः । **उक्तयुक्तेरिति** । असम्भवादिरूपयुक्तेरित्यर्थः । **शब्देति**-षष्ठीतत्पुरुषः । 'विशेषण'शब्दोऽजहल्लिङ्गः । एवञ्च=तस्य तद्विशेषणत्वे च । न चैवं

❀ ज्योत्स्ना ❀

ख्यानभाष्ये 'वा'शब्दस्वारस्येन तस्य पाक्षिकत्वलाभात्प्रकारान्तरेण तद्व्याख्याया अनौचित्यमिति । न च 'हृक्रोरन्यतरस्या'मित्यादावनुपपत्तिः, अर्थाक्षिप्तशब्दमात्रस्य सञ्ज्ञात्वेन दत्तोत्तरत्वात्, न च समानफलकानेकसञ्ज्ञात्वं, लाघवेन सर्वत्र 'वे'त्येव वक्तव्ये गुरुभूततन्निर्देशानामर्थैक्ये शब्दकृतगौरवानादरज्ञापकत्वेन फलैक्याभावात्, तस्मात्—'व्यक्तिपक्षे लक्ष्यभेदेन लक्षणभेदात्सञ्ज्ञावैयर्थ्यं, न जातिपक्षे' इति—प्रदीपकृत्प्रदर्शितरीत्यैव भाष्यं व्याख्येयमिति सम्यगालोचयामः ।

❀ सदाशिवभट्टीयम् ❀

स्वं रूपम् । इदं न सञ्ज्ञापरं, पूर्वनिर्देशात्, रूपग्रहणेनार्थस्यापि 'ग्रहणविवक्षये'ति भाष्यविरोधापत्तेश्च । रूपं शब्दस्य सञ्ज्ञेति भाष्ये तु सञ्ज्ञाशब्दः—सञ्ज्ञायते इति व्युत्पत्त्या बोध्यपरः । **नियमार्थमिति** । आर्थिकनियमार्थमित्यर्थः । शाब्दस्तु न, 'नवे'त्यादावगतेः । ननूभयोर्गोश्रृङ्गवत्समप्रधानयोः संज्ञित्वांशे आनर्थक्यमुक्तदोषापत्तिश्चातो विशिष्टस्य तत्त्वं वाच्यं, तत्र हि विनिगमकमाह—**अर्थो नेति** । नन्वेवमप्यशब्दसञ्ज्ञेतिह्यर्थमर्थे कार्यस्य बाधादत आह-**दाधेति** ।

सञ्ज्ञी'त्यर्थवद्ग्रहणपरिभाषा सिद्धा । अत्र चार्थः—कल्पितान्वयव्यतिरेककल्पितः, प्रकृति-प्रत्ययादिबोध्यः—शास्त्रीयोऽपि । स च मुख्यः प्रसिद्धश्चेति—'गौणमुख्यन्यायो''ऽभिव्यक्त-पदार्था ये' इति न्यायश्च सिद्धः । अत एवेयं विशिष्टरूपोपादान एव, इदं सूत्रञ्च । तत्रैवार्थोपस्थितेस्तत्रैवानियमप्रसक्तेश्च, न तु वर्णग्रहणे—इत्याकरे स्पष्टम् । 'दाधा घु'

❀ अभिनव-चन्द्रिका ❀

प्रकारकतात्पर्यविशेष्यतापर्याप्त्यधिकरणत्व' सम्बन्धेन'स्वविषयकबोधजनकत्वनिष्ठप्रकारतानिरूपितत-त्तत्सूत्रोच्चरितपदवृत्त्यानुपूर्वीपर्याप्त्यनुयोगितावच्छेदकधर्मावच्छिन्नानुयोगिताकपर्याप्तिका च या विशेष्यता तादृशविशेष्यताविशिष्टतात्पर्यीयविषयता'सम्बन्धेन वा । वै० 'स्वसमनियतत्व' 'स्वसमाना-समानाधिकरणानुपूर्वीव्याप्यधर्मावच्छिन्नत्वो'भयसम्बन्धेन । विस्तरस्तु परिभाषेन्दुशेखर**चन्द्रि-कायां** द्रष्टव्यः । **विशिष्टरूपोपादान एवेति** । तच्च-आनुपूर्व्यवच्छिन्नमुख्यविशेष्यताप्रयोजकत्वम् ।

❀ चिदस्थिमाला ❀

प्राचामुदीचां पशुरपत्यमित्यादौ दोष एवेति वाच्यं, लौकिकव्युत्पत्त्योपस्थितार्थे कार्यबाधे तदर्थकानेक-शब्दग्रहणे प्राप्ते एवार्थविशिष्टोपस्थितशब्द एव सञ्ज्ञीत्येतदर्थमस्याङ्गीकारात् । नचैवमप्यन्तरङ्गत्वा-द्राजन्शब्दस्यैव ग्रहणं भविष्यति, प्रकारत्वेनोपस्थितशब्दत्यागे मानाभावादिति वाच्यम् । उक्तन्याय-सिद्धार्थानुवादकेनैव सूत्रेण शब्दार्थविषये क्वचिदुक्तन्यायाप्रवृत्तेरपि ज्ञापनात्, इतोऽपि 'जनपदे लुप्' 'तस्यापत्य'मित्यादौ न दोषः । ननु सूत्रे लौकिकार्थस्य ग्रहणेन परिभाषायाञ्च शास्त्रीयग्रहणेन कथमनेन तत्सिद्धिरत आह—**अत्र चेति** । प्रकृतसूत्रे चेत्यर्थः । तदर्थवत्तयोरपि वस्तुतोऽसत्त्वादाह—**कल्पितेति** । **अपि**र्लौकिकसमुच्चायकः, अत एवैतत्सूत्रसाफल्यम् । स च=अर्थश्च । **मुख्य इति** । मुखमिव प्रधान-त्वान्मुख्यः—प्रथम इत्यर्थः । तन्मूलकमेवाभियुक्तोक्तमाह—**अभिव्यक्तेति** । **अत एवेति** । मुख्य-प्रसिद्धान्यतराग्रहणादेवेत्यर्थः । अस्याग्रेऽप्यन्वयः । इयम्=अर्थवदितिपरिभाषा**विशिष्टेति** । उपात्तम्—विशि-ष्यार्थोपस्थापकं विशिष्टरूपं यत्र—कार्ये एवेत्यर्थः । स्पष्टञ्चेदं परिभाषेन्दुशेखरे । **सूत्रञ्चेति** । चेन 'गौणेत्यादि न्यायसमुच्चयः । अत एव प्रातिपदिककार्ये तदप्रवृत्तिः । 'विशिष्टरूपोपादाने एवे'त्यस्यानुषङ्गः । 'प्रवर्त्तत'इतिशेषः । उभयत्र हेतुद्वयमाह—**तत्रैवेत्यादि** । एवव्यवच्छेद्यमाह—**न त्विति** । आकरे=कैयटादौ । ननु एवमपि—'अशब्दसञ्ज्ञे'तिव्यर्थम्, 'उपसर्गे घो'रित्यादावर्थे कार्यस्य बाधादत आह—**दाधेति** । वैपरीत्यन्तु न, आत ईत्वादिविधानेन घुधातौ तदसम्भवात् । बाधस्यावास्तवत्वस्य वक्ष्य-

❀ ज्योत्स्ना ❀

प्रकृतिप्रत्ययादीति,—आदिपदान्नियतप्रयोगोपसर्गादिग्रहणम् । **शास्त्रीयोऽपी**त्यपिना-लौकिको ग्राह्यः, तत्र प्रकृत्युदाहरणं—'मत्त'इत्यादावदो जग्ध्याद्यभावः । प्रत्ययोदाहरणम्—'ऋतीयते' इत्यादावियङ्वयवयङन्तस्य द्वित्वाद्यभावः । उपसर्गोदाहरणं-'गर्मुत्स्थान'मित्यादा-'वुदःस्थास्तम्भो'रित्यादिना पूर्वसवर्णाद्यभाव इत्याद्यूह्यम् । 'अपि' शब्दोक्तं लौकिकमर्थं विभजते-**स चेति** । 'मुख्य' इत्यनेनामुख्यस्य गौणलाक्षणिकस्य व्यावृत्तिः, 'प्रसिद्ध' इत्यनेनाऽप्रसिद्धस्य सञ्ज्ञाभूतस्य व्यावृत्तिः । आद्योदाहरणम्—अग्निसोमसदृशावित्यर्थे'ऽग्निसोमौ माणवका'वित्या-दावीत्वषत्वाद्यभावः । अन्त्योदाहरणं,—सञ्ज्ञा-श्वशुरस्यापत्यमित्याद्यर्थे 'श्वाशुरि'रित्यादौ 'राजश्व-शुराद्य'दित्यादेरभावः । **न तु वर्णग्रहण इति** । तेन 'दध्यश्नाती' त्यादौ न यणाद्यनुपपत्तिरिति

❀ विषमपदविवृतिः ❀

स्वं रूपं शब्दस्य । **कल्पितान्वयव्यतिरेकेति** । पदस्याखण्डत्वेन तत्र प्रकृतिप्रत्ययान्वय-

इत्यस्य 'ई हल्यघो'रित्यादौ चारितार्थ्येनो'पसर्गे घो'रित्यादौ 'स्वं रूप'मित्यनेन परत्वाद्बाधशङ्कावारणार्थम्—**अशब्दसञ्ज्ञेति** । नात्र षष्ठीतत्पुरुषः, कर्मसञ्ज्ञादेरर्थसञ्ज्ञात्वेन निषेधाप्रवृत्तौ 'कर्मण्यणि'त्यादौ स्वरूपग्रहणापत्तेः, किन्तु सप्तमीतत्पुरुषः । शब्दपदेन च—शब्दशास्त्रन्तदाह । **शब्दशास्त्रे इति** ।

भाष्ये तु—अर्थे कार्यस्य बाधेऽप्युपस्थितत्वाद्राज्ञ इत्यादौ तज्जन्यबोधे प्रकारतया भासमानस्य राजञ्शब्दस्यैव ग्रहणं भविष्यतीति व्यर्थं सूत्रम् । उपस्थितार्थत्यागे मानाभावेन तस्य विशेषणतयाऽन्वयसम्भवेन चार्थवत्परिभाषापि सिद्धा । लक्ष्यानुसारात्तत्तत्सञ्ज्ञाकरणज्ञानरूपप्रकरणाच्च षान्तसङ्ख्यावाचकषष्शब्दस्य षट्सञ्ज्ञाकरणेन शब्दशास्त्रीयसञ्ज्ञायां स्वरूपाग्रहणज्ञापनाच्च—'उपसर्गे घोरि'त्यादावदोषेणा-

❀ अभिनव-चन्द्रिका ❀

उपस्थितत्वादिति । शब्दे अर्थे च खण्डशक्तिस्वीकारेण पदेनैव पदपदार्थयोरुभयोरप्युपस्थितत्वादित्यर्थः । **प्रकारतया भासमानस्येति** । 'स्वविषयकबोधजनकत्वप्रकारकतातात्पर्यविशेष्यतापर्याप्त्यधिकरणत्व'सम्बन्धावच्छिन्नप्रकारतया भासमानस्येत्यर्थः । अस्मन्मते च प्रत्येकस्मात्समुदायस्समुदायाच्च प्रत्येकमतिरिच्यते इति समुदायपर्याप्तं न प्रत्येकं पर्याप्नोतीति न कस्या अपि

❀ चिदस्थिमाला ❀

माणत्वादाह—**शङ्केति** । तथा च घुशब्दे इत्यसात्स्यादितिभावः । **पत्तेरिति** । अर्थे कार्यस्य बाधसत्त्वात् । **शास्त्रमिति** । यथाश्रुते बाधाल्लक्षणेति भावः । लुप्तषष्ठ्यन्तश्चैतत् । इदञ्च सूत्राशयवर्णनमात्रमित्याशयेनाह—**भाष्ये त्विति** । 'उक्त'मित्यत्रान्वयः । यद्यपीदमुक्तन्यायस्य क्वचिदप्रवृत्ति ज्ञापकमिति प्रागुक्तं तथापि तत्रार्थे कार्यस्याबाधेन ज्ञापने फलाभावः—इत्याशयेनान्याग्रहणाय हेतुगर्भं विशेषणमाह—**उपेत्यादि** । एवेनान्यव्यवच्छेदः । नन्वेवं परिभाषासिद्ध्यभावापत्तिरत आह—**उपेति** । ननु तत्र कार्यबाधात्तत्यागोऽत आह—**तस्येति** । **अपि**नोक्तरीत्योक्तन्याययोः सिद्धी समुच्चीयेते । निषेधार्थमपि नेत्याह—**लक्ष्येति** । तदननुसारिणं प्रत्याह—**तत्तदिति** । अप्रकरणज्ञं प्रत्याह—**षान्तेति** । **ज्ञापनादिति** । अन्यथा 'नान्ताः ष'डिति करणेऽपि उक्तरीत्या तस्यैव ग्रहणमिति तद्वैयर्थ्यं स्पष्टमेवेति भावः ।

❀ ज्योत्स्ना ❀

भावः । **चारितार्थ्येनेति** । 'घु'शब्दस्याकारान्तत्वाभावा'त्स्वं रूप'मित्यस्याऽप्राप्त्या'दाधाघ्वि'त्यस्य तथात्वमिति भावः ।

❀ सदाशिवभट्टीयम् ❀

'आदिरन्त्ये'त्यस्य परत्वादेतदुपन्यासः । **परत्वेति** । 'तक्रकौण्डिन्य'न्यायेन तु न सर्वबाध्यत्वमस्य, 'अतिशदन्ताया' इत्यनेन सञ्ज्ञिनोस्तेन तदभावज्ञापनात् । **बाधेति** । सञ्ज्ञाद्वयप्रयुक्तकार्याश्रययोर्भेदाद्विरोधाभावेन समावेशस्तु नापादितः, षान्तस्य षट्सञ्ज्ञाकरणेन तदभावज्ञापनात् । 'आकाडरा'दिति नियमात् । अन्यत्र स उचित इति तु न युक्तं, सञ्ज्ञाया एकत्वात् । सञ्ज्ञिनोश्च भेदादिति । 'एका सञ्ज्ञे'तिहि सूत्रं, नत्वेकः सञ्ज्ञी इति च । अस्य परत्वेपि प्रतिपदोक्तत्वात्ताः स्युरेवाऽत आह—**शङ्केति** । **कर्मसञ्ज्ञादेरिति** । आसां परत्वेप्यन्तरङ्गत्वादियमेव स्यादिति भावः । तासां

❀ विषमपदविवृतिः ❀

व्यतिरेकौ कल्पिताविति भावः । **ई हल्यघोरिति** । नात्र शब्दस्य रूपग्रहणसम्भवः, तस्याकारासम्भवात् । **प्रकारतया भासमानस्येति** । 'न सो ऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते' इत्यभियुक्तोक्त्या शाब्दबोधेऽर्थे शब्दस्वरूपस्य प्रकारतया भानाभ्युपगमात् ।

'ऽशब्दसञ्ज्ञे'त्यपि व्यर्थमित्युक्तम् । अत एव जनपदा-ऽपत्य-पशु-देवतादिशब्देषु न दोषः । अत एव च वृक्षादिषु विशेषाणां ग्रहणं 'स्वे पुष' इत्यत्र—पर्यायाणां, विशेषाणां, स्वरूपस्य च ग्रहणं, 'सभा राजे'त्यत्र पर्यायाणामेव ग्रहणं, 'पक्षि-मत्स्यमृगान्हन्ती'त्यादौ मृगपक्षिणोः पर्यायाणां, विशेषाणां, स्वरूपस्य च ग्रहणं, मत्स्यपदेन—स्वरूपस्य, विशेषाणां, मीनरूपपर्यायस्य च ग्रहणं—सिद्ध्यति । अन्यथा तदर्थं यत्नः कर्त्तव्यः । 'परेश्च घाङ्क्यो'रित्यत्र 'घ'शब्देन स्वरूपग्रहणं, 'नदी-पौर्णमासी'त्यत्र 'नदी'पदेन च स्वरूपग्रहणं सिद्ध्यति । लक्ष्यानुसारिव्याख्यानेन च मम सर्वेष्टसिद्धिः । ज्ञापकपक्षेऽपि ज्ञापकसिद्धस्यासार्वत्रिकत्वान्न दोषः । अत एव भगवता ज्ञापकेन सिद्धं वचनं प्रत्याख्यातमिति दिक् ।

❀ अभिनव-चन्द्रिका ❀

शङ्काया अवसर इति दिक् । **इति दिगिति** । दिगर्थस्तु—प्रत्याख्यानमिदमेकदेश्युक्तिः । शक्य-लक्ष्यभेदेन अर्थानामानन्त्येन यावन्तोऽर्थास्तावदावृत्तेरावश्यकत्वेनातिगौरवात् । 'अणिञोः' 'केण' इत्यादौ प्रकृत्यसमभिव्याहारे प्रत्ययैरर्थानामनुपस्थित्या अनर्थकेपि प्रवृत्त्यापत्तेश्च । 'प्रत्ययाप्रत्यय'-परिभाषाया अभावेन च राकेत्यादौ 'केण' इति ह्रस्वो दुर्वार एव स्यादिति दिक् ।

❀ चिदस्थिमाला ❀

अपिना—विधिः । अत एव=सूत्राभावादेव । अर्थे कार्याबाधात् । अत्र द्वन्द्वोत्तरपदद्वन्द्वोत्तरपदो द्वन्द्वः । नन्वयं दोषः—सूत्रमतेऽप्यत एव नेति प्रागुक्तमेवात आह—**अत एव चेति** । उक्तोऽर्थः । 'सिद्ध्यति'द्वयेऽस्या-न्वयः । सर्व**ग्रहणानां—सिद्ध्यतीत्य**त्रान्वयः । वृक्षादिषु=विभाषा वृक्षमृगे'तिसूत्रपठितेषु । विशेषाणां=तेषामेव । पक्षिणोरिति सप्तमी षष्ठी वा । ग्रहणं सिद्ध्यतीति पाठः । प्रत्येकमन्वयान्न **चः** । क्वचित्सचः पाठः । अन्यथा=सूत्रसत्त्वे । अर्थे कार्यस्य बाधसत्त्वेनोपस्थितस्वरूपस्यैव ग्रहणापत्तेरिति भावः । तदर्थं=प्रागुक्ताभीष्ट-सिद्ध्यर्थम् । यत्नः—झित्सिदित्यादिरूपो भाष्ये एव स्पष्टः । एवञ्च—गौरवं स्पष्टमेव । न केवलं तावदेव, किन्त्वन्यदपि गौरवमिति—पृथक् शब्दशास्त्रीयसञ्ज्ञास्थले आह—**परेश्चेति** । अन्यथात्राप्युपायान्तर-करणे गौरवमिति भावः । **ननु** सूत्राभावेऽपि कथमुक्तेष्टार्थसिद्धिः अर्थे कार्यबाधेऽपि तद्वाचकसर्व-शब्दस्योपस्थितशब्दस्यैव वा ग्रहणापत्तेः । किञ्च—'परेश्चे'त्यादौ प्रकरणज्ञापकाभ्यां सञ्ज्ञिग्रहणापत्तेः । यद्यपि सामर्थ्यात्परिशब्दात्तरतमपोः कल्पनेऽपि नदीपदेन शास्त्रीयसञ्ज्ञिग्रहणे पौर्णमास्यादिग्रहण-वैयर्थ्यापत्तिः । नियमार्थन्तु न नदीपदं, वैयर्थ्यापत्तेः,तथापि लौकिकनदीविशेषवाचकानां गङ्गादीनां ग्रहणापत्तिरत आह—**लक्ष्येति** । **च**स्त्वर्थे । नन्वेवमपि ज्ञापकपक्षे कथं तत्र निर्वाहोऽत आह—**ज्ञापकेति । अपि**:—प्रागुक्तमुख्यपक्षसमुच्चायकः । उक्तपरिभाषां समूलयति—**अत एवेति** । ज्ञापकसिद्ध-स्यासार्वत्रिकत्वादेवेत्यर्थः । तृतीयान्तस्य प्रत्याख्यानेऽन्वयः । **सिद्धम्**=विद्यमानं, वचनम्=। अशब्दसञ्ज्ञे'ति ।

❀ सदाशिवभट्टीयम् ❀

चारितार्थ्यन्तु 'कर्मणो रोमन्थे'त्यादावूहनीयम् । प्रत्यासत्तिसिद्धार्थानुवादकत्वेन यथाकथञ्चित्सूत्रसार्थक्येपि निषेधस्तु व्यर्थ एवात आह—**लक्ष्येति** । ननु लक्ष्यानुसारादिना सिद्धप्रत्याख्यानं न युक्तमत आह—**अत एवेति** । लक्ष्यानुसारस्य तवाप्यावश्यकत्वादेवेत्यर्थः । **अत एव भगवतेति** । तत्सिद्धस्यासार्वत्रि-कत्वादेवेत्यर्थः । सिद्धं विद्यमानं वचनम्—अशब्दसञ्ज्ञेति । अन्यथा प्रत्याख्यानपक्षेपि तद्दोषसत्त्वादसङ्गतिः स्पष्टैवेति दिक् ।

येन वि । 'येने'ति करणे तृतीया, 'विधि'रिति भावे किः । कर्मात्र विधेयं, कर्त्ता चाचार्यः प्रसिद्धत्वाल्लभ्यत एव । यत्तु 'करणं कर्तृपरतन्त्रमिति तृतीयया पारतन्त्र्यं लक्ष्यते, तच्च शब्दानां विशेषणत्वेनेति विशेषणमिति लब्ध'मिति, तन्न । 'सुब्विभक्तौ न लक्षणे'त्यस्य सर्वसम्मतत्वात् । किं बहुना—येषां प्रत्ययानामन्येषां वा शब्दानामर्थे विधानं

❀ **अभिनव-चन्द्रिका** ❀

येन विधि । येनेति करणे तृतीया, तेन परतन्त्रो लक्ष्यते । परतन्त्रश्च व्यापारवान्भवति, शब्दे चेतरव्यावृत्तिरूपो व्यापारः, तादृशव्यापारस्योद्देश्येऽभावादुद्देश्यतावच्छेदकं गृह्यते, स चेतरव्यावृत्तिरूपो व्यापारोऽन्तरङ्गत्वादभेदेनैव विवक्ष्यते । अभेदेन व्यावर्तकं विशेषणमेवेत्यत आह—मूले—**विशेषणमिति** । एतदेवाऽभिप्रेत्य भाष्ये उक्तम्—'अन्येनान्यस्य विधिर्भवती'त्यादिना । न चा'नुदात्तौ सुप्पितौ' 'द्वितीयाटौस्स्वेन' इत्यादावभेदेनेतरव्यावृत्तिरूपव्यापारवत्त्वात्तदन्तविधिना 'अनुदात्तान्तौ सुप्पितौ भवतः' 'अनुदात्तान्त एनादेशो भवती'त्यर्थः स्यादिति वाच्यम्, अनुदात्तादेर्विधेयतावच्छेदकत्वेन विधेयस्यासिद्धत्वात्, वाक्यार्थबोधात्प्राग्विधेयविशेषणे अभेदेनेतरव्यावृत्तिरूपव्यापारवत्त्वस्याप्यसिद्ध्या तदन्तविध्यप्रवृत्तेः । जाते वाक्यार्थबोधे आकाङ्क्षाया अभावेन पुनरप्रवृत्तेश्चेति दिक् । **येषां प्रत्ययानामिति** । अपत्याद्यर्थे विहितानामित्यर्थः । **येषां शब्दाना-**

❀ **चिदस्थिमाला** ❀

अन्यथा प्रत्याख्यानपक्षेऽपि तद्दोषस्य तुल्यत्वात्तदसङ्गतिः स्पष्टैव, तथा च परिभाषायां ज्ञापकपदं न्यायस्याप्युपलक्षणं, न्यायज्ञापकसिद्धानामपि केषांचित्कथनमन्येषां तेषामनित्यत्वज्ञापनाय, यथा—'तत्स्थानापन्ने'तिन्यायसिद्धं स्थानिवत्सूत्रं, 'अदोजग्धि'रितिज्ञापकसिद्धञ्च तत्रा'नल्विधावि'ति । एवञ्च प्रकरणपक्षेऽपि न दोषः । किञ्च—परेश्चे'त्यादौ सामर्थ्यात्तदनित्यत्वा'त्परौ घ'इत्यादिशास्त्राच्च तत्पक्षे तदग्रहणं, 'नदी'त्यादौ प्रकरणाल्लौकिकनद्यग्रहणे सति पौर्णमास्यादिग्रहणात्स्वरूपग्रहणम् । किञ्च मृगपक्षिणोरिति प्रागुक्तं कैयटादिरीत्या न तु सिद्धान्तस्तत्र मृगांशे विशेषाणामेव ग्रहणं, पक्ष्यंशे मत्स्यवत्प्राय इति स्पष्टं **प्रभायामिति** तत एव बोध्यन्तदाह—**दिगिति** । **करणे** इति । न तु हेतौ, कारकविभक्तेर्न्याय्यत्वात्, नापि कर्तरि, कृद्योगे षष्ठ्या बाधात्, उभयोरप्रयोगा**दुभयप्राप्तावि**त्यस्याप्राप्तिः । **विधिरिति** । 'कर्मणि किरन्यथा तदनुपादानात्साकाङ्क्षतापत्तेरत एव 'नोभयप्राप्ति'रिति **दण्ड्यायुक्तिं** खण्डयति—**विधिरितीति** । तदुक्तहेतुं निराचष्टे—**कर्मेति** । अत्र शास्त्रे विधेयं कर्माचार्यः कर्ता चेत्युभयं प्रसिद्धत्वाल्लभ्यत एवेत्यर्थः । एवञ्च विधानस्य कर्तृकर्मणोः साकाङ्क्षत्वेऽपि प्रसिद्धत्वाद्विशेषलाभेन साकाङ्क्षतानिवृत्तिः, एवमपि यदि तथोच्येत तर्हि कर्त्रंशे सानुपपत्तिस्तदवस्थैव, अर्धजरतीयन्तु अनुचितमेव । तथा च विधेयकर्मकमाचार्यकर्तृकं यत्करणकं 'विधानं तत्तदन्तस्य सञ्ज्ञेत्यर्थ इति भावः ।

कौस्तुभदण्ड्यायुक्तिं खण्डयति—**यदि त्विति** । 'परतन्त्र'मिति कर्त्रधिष्ठितस्यैव तत्वात् । **पारतन्त्र्यमिति** । तच्च वैवक्षिकं न तु वास्यादीनामिव स्वरूपत इति भावः । अस्माकं न केवलं सुब्विभक्तावेवेदं किन्त्वन्यत्रापीत्याह—**किं बह्विति** । **अर्थेति** । यस्मिन्नित्यादिः । अपिः—शक्तिसमुच्चायकः । कथं तर्हि सिद्धान्ते

❀ **ज्योत्स्ना** ❀

'परश्च—पुंयोगादित्यादी'ति पाठः, 'प्रत्ययः पुंयोगा'दिति पाठेऽपि—'प्रत्यय'इत्यनेन साहचर्या-

❀ **सदाशिवभट्टीयम्** ❀

येन वि । अस्माकं न केवलं सुब्विभक्तावेवेदं, किन्त्वन्यत्रापीत्याह—**किं बहुनेति** ।

❀ **विषमपदविवृतिः** ❀

येन विधिः । **सर्वसम्मतत्वादिति** । उपलक्षणमेतत्—'विधि'रित्यस्यानन्वयापत्तेः ।

कृतं शास्त्रेण—तेषामन्यत्रार्थे, तदर्थे चान्येषां—लक्षणयाऽपि साधुत्वाभावस्य 'प्रत्ययः' 'पुंयोगा'दित्यादिभाष्यतो लाभात् । करणस्य व्यापारवत्त्वनियमादन्येषाञ्च व्यापाराभावाद्विशेषणमेवात्र करणतृतीयान्तेनोच्यते । तस्य चेतरव्यावृत्तिकरणमेव—व्यापारः । तदुक्तं भाष्ये—'येनेति करणे एषा तृतीयाऽन्येन चान्यस्य विधिर्भवति, यथा चैत्रस्य

※ अभिनव-चन्द्रिका ※

मिति । यथा 'अपरस्पराः क्रियासातत्ये' इति सातत्यार्थे विहितानामपरस्परादिशब्दानामित्यर्थः । **अन्यस्मिन्नर्थइति** । अपत्याद्यन्यस्मिन्नर्थे इत्यर्थः । **तदर्थे चान्येषामिति** । हितार्थप्रत्ययानामपरपरादिशब्दानां च अपत्य-क्रियासातत्याद्यर्थे इत्यर्थः । **व्यापारवत्त्वनियमादिति** । अयं भावः—शब्दे चेतरव्यावृत्तिरूपव्यापार इति-। सचान्तरङ्गत्वादभेदेनैवेति विशेषणमिति लभ्यते इति । एतदेवाभिप्रेत्य आह-**शब्दानां विशेषणत्वेनेति** । **इतरव्यावृत्तिकारणमेवेति** । 'अभेदेनैवे'ति शेषः ।

※ चिदस्थिमाला ※

विशेषणलाभोऽत आह—**करणस्येति** । अन्येषां=अत्रत्यशब्दरूपविशेषणरूपकरणभिन्नानां स्थान्यादीनाम् । **च व्यापेति** । व्यापाराभावाचेत्यर्थः । **एवेनोक्तिव्यवच्छेदः । वात्र**=प्रकृतसूत्रे उक्तहेतोरेवाह—**तृतीयान्तेनोच्यति** । गौणलक्षणयेति भाव । व्यापारवत्त्वमेवोभयसाधारणः सादृश्यप्रयोजको धर्मस्तदाह—**तस्य चेतरेति** । विशेषणस्य त्वित्यर्थः । नन्वयं विशेष्येपीत्यत आह—**तदुक्तमिति** । तथा च भाष्यप्रमाण्यात्तथैवेति भावः । **येनेतीति** । येनेत्येषा करणे इत्यर्थः । अन्यस्य सम्बन्धी विधिः=विधेयं विधत्ते देवदत्तः । विधत्ते पाणिनिः । यद्यपि 'अचो यदि'त्यादौ न तस्य कार्यं नापि तस्मिन्परत इति—'यस्मात्परत' इति तृतीयकोटिरपि वक्तुमुचिता, तथापि'परश्चे'त्यनेन प्रकृत्यवयवत्वस्य तेपु बोधनादन्यस्येति शेषषष्ठ्यैव सङ्ग्रहस्तदाह—**अन्येन चेति** । तत्र तावन्मात्रेण द्वितीयाऽलाभादाह-**अन्यस्येति** । तत्र=तेषां मध्ये । तादृशं=

※ ज्योत्स्ना ※

त्परश्चेति लक्ष्यते । तत्र 'परश्चे'ति सूत्रे भाष्ये—बभ्रोरपत्यमित्यर्थे 'बाभ्रव्य' इति यञो विधाने कृते तत्र बभ्रुशब्दस्य लक्षणया शक्त्या वा साधुत्वाभाव उक्तः,—यदाह हरिः—'सोयमित्यभिसम्बन्धात्तद्धितेन विना यदि । बभ्र्वादयः प्रयुज्यन्ते नापत्ये नियमो भवेत् ॥' इति । 'पुंयोगा'-दिति सूत्रभाष्येऽपि—'प्रष्ठादिशब्दानां प्रस्थानकर्तृत्वादेः प्रवृत्तिनिमित्तस्य प्रायेण पुंधर्मत्वात् स्त्रियां वृत्त्यभावात्सम्बन्धित्वविवक्षायां 'तस्येद'मित्यणो लुग्वक्तव्यः, ततश्च स्त्रीवृत्तित्वान्ङीष्, नह्यन्तरेण तद्धितस्य लुकं परार्थे शब्दो वर्त्तेत' इत्युक्तं, लक्षणया तद्धितान्तार्थे प्रष्ठादिशब्दानां साधुत्वे तु तदसङ्गतिः । **अन्येन चान्यस्य विधिर्भवतीति** । अन्यस्य सम्बन्धी यो विधिः=विधीयमानः—स अन्येन कृत्वा भवति,=सामान्यसम्बन्धित्वव्यावृत्तिपूर्वकं विशेषसम्बन्धित्वेन भवतीत्यर्थः । **यथा चैत्रस्येति** । चैत्रसम्बन्धी विधीयमानो यः सङ्ग्रामः स हस्त्यश्वरथपदातिभिः कृत्वा चित्राजातसामान्यसम्बन्धित्वव्यावृत्तिपूर्वकं हस्त्यश्वादिस्वामि-चित्राजात-सम्बन्धित्वेन भवतीति हस्त्यश्वादीनां सङ्ग्रामविधाने करणत्वमित्यर्थः । यद्वा—दार्ष्टान्तिके व्यापाराऽसम्भवादितरव्यावृत्तिकरणमेव व्यापारः,दृष्टान्ते तु समूहसम्पादनादिरूपः सः, हस्त्यश्वादिव्यापारस्य सम्भवात्तमा-

※ सदाशिवभट्टीयम् ※

अन्यत्रार्थे इति । अत्र मानं-'कर्तृकर्मणोः कृति' 'अर्यः स्वामी'त्याद्यर्थनिर्देशः, इतरत्र लक्षणया साधुत्वे तु तद्वैयर्थ्यं स्पष्टमेव । द्वितीये मानमाह—**प्रत्यय** इत्यादिना । उक्तहेतोरेव, अत आह—**तृतीयान्तेनेति** । गौणलक्षणयेति भावः । मम तु न तद्विरोधः, विशिष्टार्थानुशासकाभावात् । बोधस्य तत्प्रकारकस्यैवाङ्गीकाराच्च, नन्वयं विशेष्येपीत्यत आह—**तदुक्तमिति** । तथाच भाष्यप्रामाण्यात्तथेति भावः । **धातोर्य**-

सङ्ग्रामं हस्त्यश्वादिभिर्विधत्ते, एवम्—'अचो य'दिति—अचा धातोर्यतं विधत्ते' इति। 'अन्येन चान्यस्ये'त्यनेन यस्य कार्यं यस्मिन्परतश्च तयोरकरणत्वं दर्शितम्। 'अन्यस्ये'-त्य'न्यस्मि'न्नित्यस्याप्युपलक्षणम्। तत्र शब्दोपस्थितविशेष्यस्य तादृशं विशेषणमेव तदन्त-ग्राहकम्। क्वचित्सति गमके तादृशं शब्दरूपं विशेष्यमादायापि तदन्तविधिः। तच्चान्तरङ्गत्वात्समानाधिकरणमेव। तत्र तदन्तविधौ सति तथा विशेषणत्वयोग्यताप्येत-

❀ अभिनव-चन्द्रिका ❀

अकरणत्वं दर्शितमिति। अभेदेनेतरव्यावृत्तिरूपव्यापाराभावादित्यर्थः। **अन्यस्मिन्नित्यस्याप्युपलक्षणमिति**। अन्यस्मादित्यस्याप्युपलक्षणं बोध्यम्। एतत्तत्त्वं प्रागेवाऽवोचाम।

❀ चिदस्थिमाला ❀

शब्दोपस्थितम्। इदं प्रायिकमित्याह--**क्वचिदिति**। 'सर्वादीनी'त्यादावित्यर्थः। तत्र हि वार्तिकमेव गमकम्। तादृशं=शब्दानुपस्थितम्। शब्दानुशासनप्रस्तावादाह–**शब्देति**। तच्च=विशेषणाञ्च। अन्तरङ्गत्वात्=शीघ्रोपस्थितिकत्वात्। एवेन व्यधिकरणव्यच्छेदः। नन्वेव'मिनह'नित्यादाविनंशे तदन्तविधिर्न स्यात्, बाधादिनंगमित्यनन्वयेन तस्य तत्समानाधिकरणविशेषणत्वाभावादतआह–**तत्रेति**। समानाधिकरणानां मध्ये

❀ ज्योत्स्ना ❀

दायैव सङ्ग्रामविधाने तेषां करणत्वं, करणत्वसामान्येन च दृष्टान्तत्वमिति बोध्यम्। **अचा धातोरिति**। धातुसम्बन्धित्वेन विधीयमानस्य यतोऽचा कृत्वा धातुसामान्यसम्बन्धित्वव्यावृत्ति-

❀ सदाशिवभट्टीयम् ❀

तमिति। अवध्यवधिमद्भावः षष्ठ्यर्थः। अत एव यस्मात्पर इति तृतीयकोटिर्नोपलक्षिता, सम्बन्धसामान्यषष्ठ्यैव तल्लाभात्। **उपलक्षणमिति**। अत एव 'स्योन' इत्यस्यासिद्धिमाशङ्क्यैतदुक्तिः सङ्गच्छते। अन्यथा यणि ऊनशब्दानाश्रयणात्—तदसङ्गतिः स्पष्टैव। वार्तिकेपि 'येने'त्यस्य सम्बन्धात्तस्यापि विशेषणे एव प्रवृत्तिः। 'जराया जर'सित्यादावपि अङ्गान्युद्दिश्य जराशब्दादिभिर्जरसादेशविधानान्नासङ्गतिः। वस्तुतो जराशब्दस्यादेशेपि उद्देश्यतायाः शब्दमर्यादयाङ्गे एव सत्त्वात्। नन्वेवमपि इकोयणित्यादौ शब्दरूपं विशेष्यमादाय स्यादेवेति भाष्यासङ्गतिरत आह—**तत्रेति**। ननु यस्मिन्परतो विधिस्तस्याकरणत्वे

❀ विषमपदविवृतिः ❀

अचा धातोर्यतं विधत्त इति। अत्र–चैत्रसमशीलो धातुः,सङ्ग्रामसमशीलश्च यत्,हस्त्यादिसमशीलोऽच्, सेनापतिसमशीलश्चाचार्यः। 'हस्त्यश्वादिभिर्विधत्ते' इत्यत्र–सेनापतिः कर्त्ता। तत्र यथा चैत्रस्य सङ्ग्रामोत्पत्तौ हस्त्यश्वादयः करणमेवं धातोर्यदुत्पत्तावच्करणम्। यत्र धातावन्तेऽच्तत्रैवऽयत उत्पत्तेः। भाष्ये उदाहरणान्तरञ्च 'देवदत्तस्य समाशं (=भोजनं) शरावैरोदनेन च यज्ञदत्तः प्रतिविधत्त' इति। 'अन्येन चान्यस्ये'त्यस्याचा धातोर्विधिरित्यर्थः। नन्वन्येन चान्यस्येत्यनेन कार्यसम्बन्धिभिन्नस्यैव करणत्वसूचनेपि यस्मिन्परतः कार्यं तस्याकरणत्वं कथं दर्शितम्? **नचान्यस्येति** सम्बन्धसामान्यषष्ठ्या धातुप्रातिपदिकयोः पञ्चम्यन्तार्थयोरिव सप्तम्यन्तार्थस्यापि सङ्ग्रह इति वाच्यम्, **'अन्यस्ये'**त्यस्योद्देश्यत्वार्थकषष्ठ्यन्तत्वेन प्रत्ययविधौ पञ्चम्यन्तार्थस्योद्देश्यत्वेन तेन तस्य सङ्ग्रहेपि सप्तम्यन्तार्थस्याऽसङ्ग्रहादित्यत आह—**अन्यस्मिन्नित्यस्यापीति**। **ननु** सप्तम्यन्तार्थस्याकरणत्वे एतदपवादो 'यस्मिन्विधि'रित्यपि सप्तम्यन्ते न प्रवर्त्तेतेति चेन्न, सप्तम्यन्तं विना तस्या विषयाभावात्, साक्षात्कार्यिनिमित्तस्य विशेष्यस्यैवाकरणबोधनाच्च।

अन्ये तु—''विधि'रिति कर्मणि किः, तदन्तस्येति सम्बन्धिन उपादानात्तस्येत्यध्याहारः। तथाचायं सूत्रार्थः—'यत्सम्बन्धी यो विधिर्यत्कार्यं यत्करणकं तदन्तस्य तस्य बोध्य'मिति। 'अचोय'दितिधातुसम्बन्धी यद्विधिरच्करणक इति तदन्तस्य धातोः सम्बन्धी स बोध्यः। तदन्त-

प्रवृत्तौ निमित्तम्। अत एव 'इनह'न्नित्यादौ इनंशे तदन्तविधिः। न हि 'इन्-अङ्ग'-मित्यन्वयो भवति। 'तदन्तस्ये'त्यस्य-तदन्तशब्दस्येत्यर्थः। नन्वेवम् 'एरजि'ति 'अय' इत्यत्र न स्यादत आह-**स्वस्य चेति**। 'स्व'मित्यनुवृत्तं षष्ठ्या विपरिणम्यते इति भावः। 'स्वं रूप'मित्यस्य प्रत्याख्याने तु-'तस्य-तदन्तस्य चे'ति पाठ्यमिति बोध्यम्।

❀ अभिनव-चन्द्रिका ❀

विशेषणत्वयोग्यतापीति। अभेदसम्बन्धावच्छिन्नप्रकारताप्रयोजकत्वेन सम्भावितं, सम्बन्धानवच्छिन्नप्रकारताप्रयोजकत्वेन सम्भावितं वा स्वबोध्यार्थनिष्ठचरमावयवतानिरूपकपरं बोध्यमिति 'येन विधिस्तदन्तस्ये'त्यस्य वाक्यार्थबोधस्वीकारादिति भावः। **पाठ्यमिति**। चिन्त्यमिदम्— 'व्यपदेशिव'दितिपरिभाषयैव सिद्धेः तदन्तस्य चेतिपाठेऽपयोगाभावात्।

❀ चिदस्थिमाला ❀

इत्यर्थः। **तथेति**। तत्समानाधिकरणेत्यर्थः। **भवतीति**। बाधात्। अत एव 'स्वस्य चे'त्यंशस्येद्दशेविषयेऽप्रवृत्तिः। 'तदन्तस्ये'ति न तत्पुरुष इत्याह-**तदन्तेति**। 'स्वं रूप'मित्यतोऽनुवृत्त्या शब्दानुशासनप्रस्तावाद्वा शब्दस्येति लब्धम्। अत एव यच्छब्देन तस्य ग्रहणम्। **अय इति**। इणो रूपम्। **चेति पाठ्यमिति**। अन्यथा

❀ ज्योत्स्ना ❀

पूर्वकमजन्तधातुसम्बन्धित्वेन विधानं भवतीत्यस्त्यचस्तत्र करणत्वमिति भावः। **तच्चान्तरङ्गत्वादिति**। एतेन 'यस्य कार्यं यस्मिन्परतश्च तयोरकरणत्व'मित्युक्तौ हेतुरुक्तः। 'तदन्तस्य तस्य

❀ सदाशिवभट्टीयम् ❀

'वान्तो यी'त्यादौ तदादिविधिर्न स्यात्, अत उभयस्यावधारणबीजमाह—**तच्चान्तरङ्गेति**। **पाठ्यमिति**।

❀ विषमपदविवृतिः ❀

स्येति—सम्बन्धसामान्ये षष्ठ्यन्तमिति—प्रत्ययविधौ प्रकृतेरादेशविधौ स्थानिन आगमविधावागमिनः सङ्ग्रहः। तथा च देवदत्तस्य समाशं शरावैरोदनेन च यथा यज्ञदत्तः प्रतिविधत्ते यथा धातोर्यतमचा शास्त्रं विधत्ते। 'इकोयणि'त्यादौ तु न तदन्तविधिः, यत्सम्बन्धी विधिर्यत्करणकः स तदन्तस्य, तस्येत्यनेन कार्यसम्बन्धिभिन्ने करण एव तदन्तविधिप्रवृत्तितल्लाभात्। इदञ्च कार्यसम्बन्धिनो व्यधिकरणविशेषणे करणे न प्रवर्तते, कार्यसम्बन्धिनः करणत्वासम्भवात्। **एवं**—यत्र कार्यसम्बन्धिनि समानाधिकरणात्तत्त्वमसम्भवि तत्रापि न तदन्तविधिः। एवञ्च'तदन्तस्ये'त्युक्तिबलात् समानाधिकरणविशेषणरूपमेव करणं पर्यवस्यति। 'तयोरकरणत्वं दर्शित'मिति मूलोक्तं तु न युक्तम्, 'इक' इत्यनेनानिकोऽचीत्यनेन हल्परकेकश्च व्यावृत्तिकरणत्वसम्भवात्। 'तच्चान्तरङ्गत्वात्समानाधिकरणमेवे'त्यपि न, 'शब्दतो विशेषण'मित्युक्तौ ह्यन्तरङ्गत्वात्समानाधिकरण एवेति कथञ्चिल्लभ्येत। 'येने'ति शब्देन हि करणमेवात्रोपात्तम्, अन्तरङ्गत्वमपि। अन्तरङ्गत्वञ्च यत्र द्वयोर्ग्रहणासम्भवः, किन्त्वन्यतरस्यैव, तत्र ह्यन्यतरस्य ग्रहणं नियामकं, प्रकृते तु द्वयोरपि ग्रहणसम्भवेनान्तरङ्गत्वनियामकसकृदुच्चारितशब्दस्यैकार्थकत्वेऽपि प्रतिलक्ष्यं तस्य प्रवृत्तेः। समानाधिकरणत्वे प्रायेण तदन्तविध्युत्तरकालिकसम्भावनासमधिगम्यत्वाविशेषणत्वस्याचो यदित्यादेरनेकास्वपि प्रवृत्तेः। तदन्तत्वसम्बन्धित्वं चात्र परम्परयापि बोध्यं, तेनोतश्च प्रत्ययादित्यत्र हेरेव साक्षात्कार्यसम्बन्धित्वेप्यङ्गस्य परम्परया तथात्वान्न दोषः। एवं 'तथा विशेषणत्वयोग्यतापी'त्यसङ्गतम्,—समानाधिकरणविशेषणत्वस्य तदन्तविधिप्रयोजकतायाः सूत्राक्षरास्पर्शनादिति दिगित्याहुः। **तस्यचेति पाठ्यमिति**। ननु व्यपदेशिद्भावेन सिद्धेरिदं व्यर्थमिति चेन्न।

समासप्रेति । विशेषणविशेष्यभावव्यत्यासे तात्पर्यग्राहकमिदम्, एवञ्च 'द्वितीयाश्रित' इत्यादौ श्रितादयोऽधिकारप्राप्त'समर्थे'रित्यस्य विशेष्यभूता इति न तदन्तविधिः। तस्य तत्प्रकृतिके लक्षणया 'सुपे'त्यनेनान्वयः। तेन 'कृष्णं परमाश्रित' इत्यत्र न समासः। 'नडादिभ्यः फगि'त्यादावपि नडादि–विशेष्यं, प्रातिपदिकं–विशेषणमिति 'सौत्रनाडि'रित्यत्र न फक्। **उगिदिति** । तेना'तिभवती'त्यत्र 'उगितश्चे'ति ङीप्, 'दाक्षि'रित्यत्र अत इञ्च सिद्धः। एवञ्चोक्तनिषेधः प्रत्ययांशे गृह्यमाणप्रातिपदिकविषये, प्रत्ययविधिविषयेण–'गृह्यमाणप्रातिपदिकेन तदन्तविधिर्नास्ती' त्यनेनैकवाक्यत्वलाभात्।

❀ अभिनव-चन्द्रिका ❀

विशेष्यभूता इति । वस्तुतस्तु श्रितादिपदस्य स्वप्रकृतिकसुबन्तलाक्षणिकतया नास्ति विशेष्यविशेषणभावस्य व्यत्यास इति बोध्यम्। स्वयमेवाग्रे तथैव वक्ष्यमाणत्वात्।

एकवाक्यत्वलाभादिति । परिभाषैकवाक्यतया वार्तिकस्य गृह्यमाणप्रातिपदिकविषयत्वम्, वार्तिकैकवाक्यतया परिभाषायाः प्रत्ययविधिविषयत्वम्, उगिद्वर्णग्रहणभिन्नत्वे सति प्रत्ययभिन्नत्वं गृह्यमाणप्रातिपदिकत्वमिति च लभ्यत इति भावः। अत एव

❀ चिदस्थिमाला ❀

लोकन्यायसिद्धव्यपदेशिवद्भावस्य वचनेनानेन बाधः स्यादिति भावः। वचनाङ्गीकारे गौरवादाह–**विशेषणेति** । **समर्थैरिति** । 'कृतविभक्तिवचनविपरिणामे'त्यादिः। नन्वेवं 'सुप' इत्यस्य कथमन्वय, न हि तेषां सुबन्तत्वसम्भवः। यद्यपि सम्बुद्धौ स्त्रियाञ्च तत्त्वसम्भवस्तथापि शास्त्रस्याल्पविषयत्वापत्तिरत आह–**तस्येति** । विशेष्यस्येत्यर्थः। एतेन सम्बुद्ध्यन्तं टाबन्तञ्चोदाहर्तव्यमिति **कैयटकौस्तुभा**द्युक्तमपास्तम्। व्यत्यासफलमाह–**तेनेति । न फगिति** । किन्त्वत इञिति इञ्, अनुशतिकादित्वादुभयपदवृद्धिः। **उगिदितीति** । मूले **वर्ज**मित्यत्र 'द्वितीयायाञ्चे'ति णमुल्। उगिता वर्णेन च यत्र किञ्चिद्विशिष्यते तत्र तेन तदन्तविधिर्भवत्येवेत्यर्थः। तस्य फलमाह–**तेनेति** । सूत्रे तु सर्वादिपठितभवतुशब्दे अस्यापत्यमिरित्यत्रापि सफलेञ्जित्वं तु बाह्वेत्युत्तरार्थम्। **एवञ्चोक्तेति** । व्यत्यासबोधकत्वे च। समासप्रेतीत्यर्थः। समासांशे गमकाभावादाह–**प्रत्येति** । विषये=तत्रैव। **प्रत्ययेति** । सपूर्वाचेतिधर्मिग्राहकमानादिति भावः। अस्याग्रेऽन्वयः। अनेन=न्यायेन। '**एकवाक्यत्वेति**।

❀ सदाशिवभट्टीयम् ❀

अन्यथा लोकन्यायसिद्धस्य व्यपदेशिवद्भावस्य वचनेन बाधः स्यादिति भाव इत्याहुः। वस्तुतस्त्विदं चिन्त्यं, तदन्ते कार्यबोधनेन सार्थक्येन बाधकत्वायोगात्, 'व्यपदेशिव'दितिपरिभाषावतरणस्थस्वग्रन्थविरोधाच्च। पृथग्योगस्य दृष्टफलाभावेन प्रत्याख्याततत्वेप्युत्तरत्रानुवृत्तौ बाधकाभावाच्च। **तस्यचेति**पाठफलन्तु 'व्यपदेशिवद्भावोऽप्रातिपदिकेने'त्यस्य विषये 'रोणी'त्यादौ बोध्यम्। **प्रत्ययांशे इति** । समासांशे तु न

❀ विषमपदविवृतिः ❀

'वनो रच' 'रोणी'त्यादौ व्यपदेशिवद्भावाप्रवृत्तेः, 'व्यपदेशिवद्भावोऽप्रातिपदिकेने'ति निषेधात्। **गृह्यमाणप्रातिपदिकेति** । ननु किमिदं गृह्यमाणत्वम्? न तावदानुपूर्वीविशेषरूपेणोपादीयमानत्वम्, 'ऋष्यन्धकवृष्णिकुरुभ्यश्च' 'वृद्धाच्छ': 'जनपदतदवध्योश्च' 'द्विगोर्ष्ठंश्च'त्यादौ तदन्तविधिनिषेधानापत्तेः। नापि यथाकथञ्चिदुपादीयमानत्वम्, उगिद्वर्णग्रहणेष्वपि निषेधापत्तेः। नाप्युगिद्वर्णग्रहणभिन्नत्वम्। 'उगिद्वर्णे' इति त्वेकदेशानुवाद इत्युत्तरग्रन्थासङ्गतेरिति

'उगिद्वर्णे'ति त्वेकदेशानुवाद इति बोध्यम् । अत एव 'वनो र चे'त्यादौ 'प्रत्ययग्रहणे तदन्तग्रहण'मित्यस्य नायं निषेध इति दिक् ।

विरामः । भावे घञ् । शब्दानुशासनप्रस्तावादाह—**वर्णानामिति** । उच्चारणाभाव इत्यर्थः । स च व्याख्यानात्किञ्चिद्वर्णोच्चारणानन्तरकालिक एव गृह्यते । प्रदेशाः—

❀ **अभिनव-चन्द्रिका** ❀

'यञिञोश्चे'त्यनेन निषेध इति दिक् । **उच्चारणाभाव इति** । ननु यत्र देवदत्तेन 'रामा'दित्युच्चरितं, यज्ञदत्तेन च 'घट'इत्युच्चरितं, तत्रावसानसञ्ज्ञा न स्यात्, उच्चारणाभावस्याभावादिति चेन्न, वर्णविशिष्टोऽभावोऽत्रसानसञ्ज्ञो भवतीत्यर्थेनादोषात् । वै० 'स्वकर्मकोच्चारणकर्तृपुरुषोच्चरितवर्णप्रति-

❀ **चिदस्थिमाला** ❀

'सम्भवतीति'न्यायादिति भावः । नन्वेवमु**गिद्वर्णे**ति व्यर्थमेव, तत्र प्रातिपदिकग्रहणाभावादत आह— **उगिदिति । एकदेशेति** । अगृह्यमाणप्रातिपदिककसूत्रसमूहैकदेशेत्यर्थः । **अत एवेति** । तदेकवाक्यतया 'प्रत्ययाविधा'वित्यस्य गृह्यमाणप्रातिपदिकविषयत्वादेवेत्यर्थः । नायं=प्रत्ययविधावितीति । अत एव प्रत्ययविधिभिन्नेऽप्यत्रनित्यादौ तेनापि तदन्तविध्युक्तिः, परमस्वसेत्यादिलक्ष्यञ्च प्रकृतसूत्रभाष्ये सङ्गच्छते । अतएवोक्तनिषेधवत्तस्य निषेधस्य न कथनं वार्तिककृता । एवञ्च वार्तिकतः परिभाषाभिन्नेति प्राचोक्तमयुक्तं । गृह्यमाणेत्यस्य च विशिष्य तत्तद्रूपेणोच्चार्यमाणेत्यर्थस्तदाह—**इति दिगिति** । करणघञ्पक्षे बाहुलकमाश्रयणीयं, प्रदेशे विषयभेदात्सप्तमीभेदापत्तिश्चात आह—**भावे इति** । नित्यत्वाविभुत्वपक्षे तदभावस्य बाधाजन्यत्वपक्षेऽपि कारणतः पूर्वं तत्सत्वादतिप्रसङ्गापत्तिरत आह—**उच्चारणेति** । उत्पत्तेराभिव्यञ्जनस्यवोच्चारणस्याभाव इत्यर्थः । स च=तदुच्चारणाभावस्तु । 'अवसान इत्यन्वर्थसञ्ज्ञया तल्लाभ' इति **रत्नाकरोक्ति**रयुक्ता, अस्या लौकिकत्वादत आह—**व्याख्यानादिति** । लक्ष्यविरोध-तत्तच्छास्त्रानर्थक्योभयमूलकादित्यर्थः । **कालिकएवेति** । एवेनोभयव्यवच्छेदः । तेन दत्तः रसो रथः अन्धः इत्यादौ चर्त्वविसर्गानुनासिकादि न ।

❀ **ज्योत्स्ना** ❀

चे'ति पाठः । **उक्तनिषेध** इति । 'समासप्रत्ययविधौ प्रतिषेध' इत्येषः । **इत्यस्य नायमिति** । अन्यथा वन्प्रत्ययमात्रस्य ङीष्प्रकृतित्वं स्यात्, 'प्रातिपदिका'दित्यस्य तु विरोधात्तत्रासम्बन्ध एव स्यादिति भावः । यदितूत्तरसूत्रेषु प्रातिपदिकादित्येतत्सम्बन्धस्यावश्यकत्वा 'द्वनोरचे'त्यत्रापि सम्बन्धः, तत्सामानाधिकरण्यानुरोधाच्च 'वन' इत्यनेन शब्दस्वरूपविशेष्यमादाय तदन्तविधिर्न त्वयं निषेध इत्युच्यते तदा वन्नन्तेन प्रातिपादकस्य विशेषणात्पुनस्तदन्ताविधिरिष्टोऽप्युक्तव्याख्यानाश्रयणेऽस्मान्निषेधान्न स्यादिति बोध्यम् ।

शब्दानां नित्यत्वादाह—**उच्चारणेति । वर्णवदिति** । उच्चारितप्रध्वंसिनां नित्यविभूनां वा वर्णानामिवेत्यर्थः ।

❀ **सदाशिवभट्टीयम्** ❀

मानमिति भावः । शब्दानां नित्यत्वादाह—**उच्चारणेति** । तच्च वर्णोत्पत्तितद्व्यञ्जनान्यतररूपम् । ननु तदभाववत्ताबुद्धिं प्रति॰ तद्वत्ताबुद्धिः—प्रतिबन्धिकेति हरिरित्यादावुच्चारणसत्त्वेन तदभावात्तदसिद्धिरत आह—**स चेति** । फलान्तरमपि दुर्बलं भाष्योद्योताभ्यामवगन्तव्यम् । **व्याख्येति** । सञ्ज्ञातत्तद्विधिवैयर्थ्यलक्ष्यासिद्धिमूलकादित्यर्थः । **परः संनिकर्षः । प्रायः परेणेत्यादि** । अयम्भावः—परनिरूपित-

❀ **विषमपदविवृतिः** ❀

चेन्न । 'प्रातिपदिकत्वव्याप्यधर्मपुरस्कारेणोपादीयमानत्व'मित्यर्थेनादोषात् । **प्रत्ययग्रहणेति** । सोप्येतन्मूल इति भावः । वाचनिकः स इत्यन्ये ।

विरामोऽवसानम् । वर्णानां नित्यत्वादभावासम्भवादाह—**उच्चारणेति** ।

"वाऽवसाने" इत्यादयः । अभावस्यापि बुद्धिकृतं पौर्वापर्यं–वर्णवत् । परशब्दो नान्यार्थोऽन्यत्वस्याव्यभिचरितत्वादत आह–**अतिशयित इति** । स्वभावसिद्धार्धमात्रातिरिक्तकालव्यवायेन रहितः । तेन तद्व्यवायेन वाक्योच्चारणे सञ्ज्ञा न । सन्निकर्षश्च प्रायः परेण । क्वचित्पूर्वेणापि । अत एवावसानकार्याणां संहिताधिकारे पाठः । न चावसान-

---

❀ अभिनव-चन्द्रिका ❀

योगिकत्व' 'अर्धमात्राधिककालाव्यवायेन—स्वकर्मकोच्चारणकर्तृपुरुषोच्चरितवर्णावधिकपूर्वत्वाभाववत्त्वै'तदुभयसम्बन्धेन । प्रकृते च अर्धमात्राधिककालाव्यवायेन यज्ञदत्तोच्चरितवर्णावधिकपूर्वत्वेपि देवदत्तोच्चरितवर्णावधिकपूर्वत्वाभावान्न दोषः । यत्र देवदत्तेन 'घटा'दित्युच्चरितं, तेनैवार्धमात्राधिककालव्यवायेन 'पटा'दित्युच्चरिन्तत्र अवसानसञ्ज्ञासिद्धये अर्धमात्राधिककाल-

❀ चिदस्थिमाला ❀

नन्वेवममूर्त्तत्वेन तत्र परत्वव्यवहारः कथमत आह—**अभावेति । वर्णवदिति** । उच्चरितप्रध्वंसिनां नित्यविभूनां वा वर्णानामिवेत्यर्थः । **अव्यभीति** । यत्किञ्चिदपेक्षयान्यत्वस्य सार्वत्रिकत्वादितिभावः ।

तस्यार्थमाह—**स्वभावेति** । तथाच परग्रहणमवग्रहादिनिवृत्तये । मात्राकालो ह्यवग्रहः । अन्यथा सन्निकर्षस्य पुरुषभेदेनाव्यवस्थितत्वात्तत्रापि स्यात् । परग्रहणे तु तत्सामर्थ्यात्सर्वापेक्षया न्यूनस्यार्धमात्राकालव्यवायकस्य सन्निकर्षस्य ग्रहणान्न दोषः । अतएव पदे न दोषः, तत्र तस्यानित्यत्वात् । तद्ध्वनयन्नाह—**तद्व्यवायेन वाक्योच्चेति** । तदन्यार्धमात्राकालव्यवायेनेत्यर्थः । एतेन पुरुषभेदेन सन्निकर्षस्याव्यवस्थिततया सूत्रारम्भसामर्थ्यादेवोक्तसन्निकर्षलाभे परग्रहणसामर्थ्यात्पूर्वपरयोः सन्निकर्ष एव संहितेत्यवसानविषये नेयमित्यपास्तं, तदाह—**सन्नीति** । परेण=तेनैव । प्रायःपदस्वारस्यमाह—**क्वचिदिति** । कार्याणां

❀ ज्योत्स्ना ❀

क्वचित्पूर्वेणाऽपीति । अवसानविषय इत्यर्थः । अवसानकार्याणां='वाऽवसाने' इत्यादीनां,

❀ सदाशिवभट्टीयम् ❀

मनान्तरीयककालाव्यवायेन पूर्वत्वं संहिता, तथैव पूर्वनिरूपितञ्च परत्वं, विनिगमनाविरहात् । संहितायामिति च प्रदेशे—कार्यिविशेषणं तदाश्रयत्वमेवञ्च तद्विषयतदुभयमपि निमित्तोपादाने तन्निरूपितमेव प्रत्यासत्तेः, अनुपादाने तु यत्किञ्चिन्निरूपितं कस्याप्यप्रत्यासन्नत्वात् । तदुपादाने यथा—'इको यणचि' 'झयो हो' । आद्ये अज्निरूपितं इग्निष्ठं पूर्वत्वं सा, द्वितीये हनिष्ठं झय्निरूपितं परत्वं सा । अनुपादाने तु यथा–'वावसाने' इति । तत्र सप्तमीनिर्देशानां बहुत्वादुक्तं—**प्राय इति** । पञ्चमीनिर्देशानामवसानकार्याणां चाल्पत्वादुक्तं—**क्वचिदिति** । न्यायसिद्धेर्थे लिङ्गमप्याह—**अत एववावसाने इति** । अत एव वासुदेववाचकाकारस्य संबुद्धाव इत्यत्रानुनासिकः, र इत्यत्र न विसर्गः, द इत्यत्र चर्त्वंन्न । ननु 'विसर्जनीयस्य स' इति—सूत्रभाष्यपर्यालोचनया पूर्वत्र तानीष्यन्त एव, तथाच तत्र भाष्यं–संहितासंज्ञाया प्रकर्षगतिर्विज्ञायते–साधीयो यः परः सन्निकर्ष इति, कश्च साधीयः ? यः पूर्वपरयोरिति । तस्यायं भावः–उपात्तपूर्व-

❀ विषमपदविवृतिः ❀

वर्णवदिति । 'यावद्ब्रह्म विष्ठितं तावती वा'गिति श्रुत्या वर्णानां सर्वदेशकालवृत्तित्वेन दैशिककालिकक्रियासम्भवादिति भावः । **परः सन्निकर्ष इति** । वर्णाद्वर्णान्तरोच्चारणेऽर्धमात्राकालव्यवायस्य नित्यत्वेन तदधिककालव्यवायराहित्यमेव—परः सन्निकर्ष इत्यभिप्रेत्याह—**स्वभावसिद्धेति** । **संहिताधिकार इति** । 'तयोर्य्वावचि संहिताया'मित्यधिकार

सञ्ज्ञया परसत्त्वे सावकाशायाः संहितासञ्ज्ञायाः 'सत्यपि सम्भवे बाधनं भवती'ति न्यायेन विषयभेदेऽपि बाधः स्यादिति तदसङ्गतिरेवेति वाच्यं, तदधिकारे तेषां

❀ अभिनव-चन्द्रिका ❀

व्यवायेने'ति विशेषणमिति दिक्। **बाधःस्यादिति।** नच'अ'इत्यादौ बहूनां वर्णानामभावेन संहितासञ्ज्ञायाअप्राप्त्यावसानसञ्ज्ञायाश्चारितार्थ्यादियमाशङ्का असङ्गतेति वाच्यम्, एतच्छङ्कापरभाष्यप्रामाण्येन संहितासञ्ज्ञाया अविषयाणामवसानसञ्ज्ञाविषयाणां लक्ष्याणामनभिधानेनादोषात्। वर्णावयवानामतिशयितः सन्निधिः संहितासञ्ज्ञः स्यादितिसूत्रार्थेन केवलम्-अ इत्यादावपि वर्णावयवानां सान्निध्यसत्त्वात्संहितासञ्ज्ञायाः प्राप्तिरस्त्येवेति शङ्का नासङ्गता। वर्णेषु च वर्णावयववत्त्वं व्यपदेशिवद्भावेनेत्यन्ये।

नन्वेवमपि गुरुलघ्वादिसञ्ज्ञाभिर्भिन्नघ्यादिसञ्ज्ञाभिस्समावेशार्थं समानावधिकसञ्ज्ञयोरेव बाध्यबाधकभाव इत्यवश्यमङ्गीकर्तव्यलम्, तथा च-प्रकृते वर्णानामतिशयितसन्निधेस्संहितासञ्ज्ञा, वर्णाभावस्यावसानसञ्ज्ञेति समानावधित्वाभावाच्छङ्कासमाधाने निर्दले इति चेन्मैवं, यत्किञ्चिच्छास्त्रीयोद्देश्यतावच्छेदकदलप्रविष्टधर्म्मविशिष्टे धर्म्मे एका सञ्ज्ञा तिष्ठतीत्यर्थेन सर्वदोषनिरासात्। वै०'स्वतादात्म्य''स्वप्रतियोगिकविधेयानुयोगिकसंसर्गघटकनिरूपितत्वतुल्यसङ्ख्याकनिरूपितत्ववत्संसर्गप्रतियोगित्वै' तदुभयसम्बन्धेन। प्रकृते अवसानसञ्ज्ञाशास्त्रीयोद्देश्यतावच्छेदकं यद्वर्णत्वं तस्य यः संसर्गः'स्वनिष्ठावच्छेदकतानिरूपितावच्छेदकतानिरूपितोद्देश्यतानिरूपितविधेयतावत्त्वं' तद्घटकनिरूपितत्वत्रयवत्संसर्गप्रतियोगित्वस्य,स्वतादात्म्यस्य च संहितासञ्ज्ञाशास्त्रीयोद्देश्यतावच्छेदकवर्णत्वे सत्त्वेन शङ्कासमाधाने सङ्गते।

❀ चिदस्थिमाला ❀

'खरवसानयो''र्वावसाने''ऽणोऽप्रगृह्यस्ये'तेषाम्। भाष्यरीत्येयं शङ्केत्याह—**सत्यपीति**। इदञ्चावसानसञ्ज्ञायाः सूत्रद्वयविषयायास्तथासत्त्वेन सर्वत्र निरवकाशत्वमभ्युपेत्य, यदि तु भगवद्वाचकाऽऽशब्दस्य सम्बोधनेऽ'णोप्रगृह्ये'त्यनुनासिकविधानेनावसानसञ्ज्ञापि सावकाशेत्युच्येत तर्हि परत्वाद्बाधो बोध्यः। **तदसमिति**। तेषां तदधिकारपाठासङ्गतिरेवेत्यर्थः। एवञ्च प्रायः पदं व्यर्थमेवेति भावः। उक्तहेतो-

❀ सदाशिवभट्टीयम् ❀

परोभयनिरूपितमनान्तरीयककालव्यपेतं त नान्तरीयककालगतं पौर्वापर्यं समूहः संहिता, तद्विषयत्वं च तत्परत्वमेव, संहितायामिति च प्रदेशे पञ्चम्यन्तोपादाने तद्विशेषणं, सप्तम्यन्तोपादानेऽनुपादाने च कार्यिविशेषणम्, उभयोपादाने तूभयोर्विशेषणं, उपात्तोभयेत्यनेन निरूपकोभयमध्ये अन्यतरोपादानसत्त्वमिति विवक्षितं, तेन सादेशस्य नावसाने प्रवृत्तिरिति। एवञ्च पूर्वत्वं संहितेति पर्यवसितम्। तथाचावसानकार्येऽसम्भवात्—संहितापदासम्बन्धेन पूर्वत्र तेषां इष्टत्वादिति चेन्न, उत्तरभाष्ये तस्य दूषितत्वाद्गौरवादुक्तसाधीयस्त्वस्य निर्मूलत्वाच्च—तस्यैकदेश्युक्तित्वात्। नचैवमपि संहितायामिति सूत्रे भाष्यकैयटयोः संहिताधिकारः, संहितासञ्ज्ञा च प्रत्याख्याता, उक्तेषु तेषामनिष्टत्वे तु तत्र तद्वारणाय तदावश्यकत्वेन तद्विरोधःस्पष्ट एवेति वाच्यं, तावन्मात्रफलकत्वेऽवसानकार्येऽल इति पञ्चम्यन्तं पदद्वयं कर्त्तव्यं तावतैवेष्टसिद्धेरित्याशयात्। **सावकाशायाः संहिताया इति**। अ इत्यत्रापि नावसाने सञ्ज्ञासाफल्यमवसानकार्याणां संहिताधिकारे पाठात्तदप्राप्त्या सञ्ज्ञायाः फलाभावेनाचिरादेशस्यैवानवकाशस्य वक्तुं शक्यत्वात्। प्रतिवर्णमवसानत्वे तस्याऽव्यभिचारात्सञ्ज्ञावैयर्थ्यं तत्र तत्रावसानपदवैयर्थ्यमनूद्य भाष्ये बाध्यबाधकभावविचारकरणाच्चास्यैकदेश्युक्तित्वम्। इदमेवाभिप्रेत्या'ऽथवे'त्यादिग्रन्थप्रवृत्तेश्च। **न्यायेन विषयभेदेपि बाधः स्यादिति**। तदनुवादकाकडारसूत्रेणेत्यर्थः। तस्य न्यायस्य सञ्ज्ञाविषयेऽप्रवृत्तेस्तत्सूत्रे वक्ष्य-

❀ विषमपदविवृतिः ❀

इत्यर्थः। **विषयभेदे इति**। इदमयुक्तं–तदुद्देश्यतावच्छेदकव्याप्योद्देश्यतावच्छेदकत्वं बाधकत्वे तन्त्रं, तदुद्देश्यतावच्छेदकव्यापकोद्देश्यतावच्छेदकत्वञ्च बाध्यत्वे तन्त्रम्। यथा–द्वितीयैका-

पाठेनाकडारसूत्रस्य स्वशास्त्रीयसञ्ज्ञामात्रविषयत्वकल्पनात् । एते तु न तथा, लोकेऽपि सत्त्वात् । तदुक्तं वार्त्तिककृता–'संहितावसानयोर्लोकविदितत्वात्' इति । न चावसानकार्येषु संहिताधिकारासम्बन्ध एवास्तु, अग्रे च मण्डूकप्लुतिरस्त्विति वाच्यं, सत्यामुपपत्तौ मण्डूकानुवृत्तेरयुक्तत्वात् । ध्वनितञ्चेदं–'विसर्जनीयस्य सः' इति सूत्रे भाष्ये । सन्निकर्षः सामीप्यम् ।

❀ चिदस्थिमाला ❀

रेवाह—**तदधीति**—शास्त्रीयमात्रसञ्ज्ञेत्यर्थः । मात्रपदव्यवच्छेद्यमेवाह—**एते तु न तथेति** । संहितावसानसञ्ज्ञे तु न स्वशास्त्रीये एवेत्यर्थः । फलाभावात्तत्र तदसम्बन्धेन परेणैव सर्वत्र सन्निकर्षो न क्वचित्पूर्वेणापीत्याशयेनाशयान्तरमेव—तस्याशङ्कते **न चेति** । **सत्यमिति** । पूर्वोक्तरीत्येति भावः । **ध्वनितमिति** । तत्र हि अनवकाशत्वाद्बाधपक्षे परग्रहणात्पूर्वपरविषयसन्निकर्षे संहितासञ्ज्ञेति पक्षे

❀ ज्योत्स्ना ❀

तदधिकारे=संहिताधिकारे । **अग्रे चेति** । 'तोर्लि'त्यादौ । **मण्डूकप्लुतिरस्त्विति** । 'अग्निचिल्लुनाती'त्यादौ परसवर्णाद्यभावायेत्यर्थः । **अयुक्तत्वादिति** । एतेन वर्णानां विरामे 'वृक्ष' इत्यादौ संहितावसानसञ्ज्ञयोः समावेश इत्युक्तम् । किन्तु प्रकृतसूत्रस्थभाष्यकैयटाविरुद्धमिदं, तत्र हि–'वर्णाद्वर्णोच्चारणे प्रतिवर्णं विरामसद्भावादवसानसञ्ज्ञया परत्वात्संहितासञ्ज्ञाया बाधः प्राप्नोती' त्याशङ्क्य–'वृक्ष' इत्यादौ वर्णान्तरानुच्चारणे 'सावकाशामनवकाशा संहितासञ्ज्ञा बाधते' इत्युक्तं, त्वदुक्तन्यायेन सञ्ज्ञयोः समावेशे तद्विरोधः स्पष्ट एव । **ध्वनितञ्चेदमिति** । तत्र हि 'वृक्षः' 'प्लक्षः' इत्यादौ विसर्जनीयस्य सकारः कस्मान्न भवती'त्याशङ्क्य–'संहिताया'मित्यनुवृत्त्या

❀ सदाशिवभट्टीयम् ❀

माणत्वात्, अत एव समाधौ सूत्रस्यैव सङ्कोचः । नन्वेकस्यैव सञ्ज्ञेतितदर्थात्—कथं तस्यापि प्राप्तिरिह सञ्ज्ञिनोर्भेदादिति चेत्सत्यम्, सञ्ज्ञाद्वयप्रयुक्तकार्यस्यैकवर्णवृत्तित्वेन सञ्ज्ञिनोरप्यैक्यमभिप्रेत्य भाष्ये बाध्यबाधकभावोक्तिरिति कैयट एव स्पष्टत्वात् । वस्तुतस्तु न तत्प्राप्तिरिति सिध्यत्येवायासं विनैव समावेश इति बोध्यम् । शङ्कित्रभिमानानुसारेणैवोत्तरयति—**तदिति** । **अयुक्तत्वादिति** । इदमुपलक्षणं,—पूर्वोक्तलक्ष्यासिद्धेरपि । **एतेन** सादेशे खरीत्यस्य मण्डूकानुवृत्तिरेकदेशे स्वरितत्वप्रतिज्ञा च तव, मम तु सूत्रद्वये संहितायामित्यस्य मण्डूकगतिरिति सममेवेत्यत्य**पास्तम्** । **परेणैव संहितेति** बहुतरगौरवप्रदर्शितत्वाच्च । **केचित्तु** पूर्वोक्तप्रत्याख्यानेन तेषामनभिधानकल्पनाद्यथाश्रुतं साध्वित्या**हुः** ।

❀ विषमपदविवृतिः ❀

ज्द्विर्वचनोद्देश्यतावच्छेदकमजादिधातुत्वं, प्रथमैकाच्द्विर्वचनोद्देश्यतावच्छेदकं–धातुत्वमात्रम् । न च तथा प्रकृते, अवसानसञ्ज्ञोद्देश्यतावच्छेदकं वर्णोच्चारणाभावत्वं, संहितासञ्ज्ञोद्देश्यतावच्छेकं तु वर्णयोरर्धमात्राधिककालकृतव्यवधानराहित्यमिति कथमनयोर्बाध्यबाधकभावः ? किञ्चास्तु सञ्ज्ञाभिन्नस्थले यथातथाभूतयोरपि बाध्यबाधकभावः, सञ्ज्ञयोस्त्वेकसञ्ज्ञिकत्व एव बाधकत्वम्–अत एव 'राजपुरुष' इत्यादौ समुदायगतभसञ्ज्ञया राजञ्शब्दे पदत्वबाधो न । अत एवो'त्तरपदत्वे चे'ति वार्तिकप्रत्याख्यानावसरे 'ऽजादिस्वादिषु पूर्वं भसञ्ज्ञं भवत्येतद्घटकं यदस्ति तदपि भसञ्ज्ञक'-मित्याकरे उक्तम् । किञ्चाऽशब्दात्सम्बुद्धौ 'वाक्यैकदेशे वाक्यप्रयोग' इति न्यायेन प्रयुज्यमानेऽवसानसञ्ज्ञा चरितार्था, एकवर्णात्मकत्वेन वर्णद्वयासत्त्वेन संहितासञ्ज्ञाया अप्रवृत्तेः । तत्रावसानसञ्ज्ञाफलन्त्व'णोप्रगृह्यस्ये'त्यनुनासिकप्रवृत्तिरिति दिक् । **स्वशास्त्रसञ्ज्ञामात्रेति** । इदमप्ययुक्तम्—एवं सति गुरुलघुसञ्ज्ञयोरपि बाध्यबाधकभावानापत्तेः, तयोरपि तच्छब्दशास्त्रादिप्रसिद्धत्वेन लोकविदितत्वात् । नचेष्टापत्तिः, बन्धुशब्दस्य शब्दान्तरेण द्वन्द्वे 'लघ्वक्षरं पूर्व'मिति पूर्वनिपातस्याचिक्षणदित्यादौ 'दीर्घो लघो'रिति दीर्घस्य चानापत्तेरिति दिक् ।

सुप्तिङ् । सुपिति–सुपः पकारेण प्रत्याहारो-व्याख्यानात् । यद्यपि 'प्रत्ययग्रहेण तदन्तग्रहण'मित्युक्तेः शब्दरूपं विशेष्यमादाय तदन्तग्रहणं सिद्धम्, 'प्रत्ययेन स्वप्रकृत्यवयवकसमुदायस्याक्षेपात्तद्विशेषणत्वेन तदन्तविधि'रिति न युक्तम्। 'इया'नित्यादौ

❀ अभिनव-चन्द्रिका ❀

अत्र चैतच्छङ्कासमाधानपरम्भाष्यमेव मानमिति दिक्। **व्याख्यानादिति** । ङीप्ङीषोः पृथक्करण-सामर्थ्यात्, ङीनिति नित्करणात्, 'सितिचे'तिसूत्रकरणात्, प्राग्दिशोविभक्तिकरणात्, प्रथमोपस्थित-त्यागे मानाभावाच्चेतिभावः । **शब्दरूपमिति** । 'तदादी'ति शब्दरूपमित्यर्थः । **समुदायेनेति** । प्रति-

❀ चिदस्थिमाला ❀

चा'णो प्रगृह्यस्ये'त्यत्रोभयानुवृत्त्या दोष उक्तः । सन्निकर्षश्च न संयोगसमवायादिसम्बन्धः, गुणानां मिथस्तद-भावात् । नित्यविभुद्रव्यतापक्षेऽपि न, अजसंयोगनिराकरणात्, अत आह––**सामीप्यमिति** । **ननु** सुपिति न सप्तमीबहुवचनं, तिङ्साहचर्यात्, नापि कपः पकारेण प्रत्याहारः, स्वादिष्वित्यादिपदानर्थक्यापत्तेः अन्यथा 'सुपी'त्येव वदेत् । नापि टाबादिपकारेण, ङ्याप्प्राती'त्यत्र ङ्याब्ग्रहणवैयर्थ्यापत्तेः । पट्वीत्यादौ 'घेङिती'तिगुणापत्तेश्चात आह––**सुपितीति** । **उक्तेरिति** । परिभाषाप्रकरणे इति भावः । विशेष्या-सत्त्वादाह–**शब्देति** । तत्प्रस्तावादिति भावः । एतेन वाचनिकत्वं परिभाषार्थस्य निरस्तम् । **कौस्तुभायुक्ति**-

❀ ज्योत्स्ना ❀

परिहृत्य,–'इको यणची' त्यादौ कार्यिनिमित्तयोरुभयोरुपादानं तयोरेव संहिताया ग्रहणवत्प्रकृते निमित्तानुपादानेऽपि कार्यिमात्रोपादानात्पूर्वेणापि संहिताया ग्रहणाद्दोषतादवस्थ्यमुक्त्वा––एवं तर्हि––अनवकाशाऽवसानसञ्ज्ञा,––संहितासञ्ज्ञां बाधिष्यते, संहितासञ्ज्ञायां वा परग्रह-णात्प्रकर्षावगमात्परेण साकं पूर्वसन्निकर्षस्य संहितात्वलाभात्तदभाव—इति प्रकारद्वयेन पुनः परिहृत्य—भाष्ये उक्तं,—यद्येवानवकाशाऽवसानसञ्ज्ञा—संहितासञ्ज्ञां बाधते, तथापि संहितासञ्ज्ञायां प्रकर्षगतिर्विज्ञायते, उभयथा दोषो भवति, इष्यन्ते इत उत्तरमवसाने संहिताकार्याणि, तानि न सिध्यन्ति,—'अणोऽप्रगृह्यस्यानुनासिक—' इतीति । व्याख्यातञ्च–सञ्ज्ञयोः समावेशाभिप्रायकतया तदिदं प्रदीपेनेति–, न प्रागुपदर्शितसंहितासञ्ज्ञासूत्रस्थभाष्य-विरोधः । वृक्ष इत्यादौ वर्णान्तरानुच्चारणे परेण संहिताया अभावेऽपि पूर्वेण तस्याः सद्भावाभ्युपगमात्सञ्ज्ञाद्वयेऽनवकाशत्वतौल्यात्तस्यैकदेश्युक्तित्वादित्याशयात् । वस्तुतस्त्वाष्ट-मिकभाष्यमेकदेश्युक्तिः,—अततेर्डः—अइत्यत्रावसानसञ्ज्ञावकाशस्य प्रदर्शयितुं शक्यत्वेन प्राथमिकभाष्यविरोधस्य दुष्परिहरत्वात्, अवसाने संहिताकार्यसिद्धेर्मण्डूकप्लुत्योपाध्यायैः प्रदर्शितत्वाच्च । वृक्ष इत्यादौ दोषवारणार्थं 'विसर्जनीयस्य स' इत्यत्र खरीत्यनुवृत्तये मण्डूकानुवृत्तिं विना तवापि गत्यन्तराभावाच्च, अस्मन्मते तु परेणैव संहितेत्याश्रयणात्सत्वप्राप्त्यभावात्खरीत्य-नुवृत्तेर्नापेक्षेति दिक् । अन्तग्रहणस्यार्थविशेषज्ञापकत्वोपपादनायाह—**यद्यपीति** । कैयटोक्तं दूषयति—**प्रत्ययेनेत्यादि** । कैयटमतोज्जीवनं तु तन्मतश्रद्धालुभिः परिभाषाप्रदीपार्चिष्युपपादित-

❀ सदाशिवभट्टीयम् ❀

सुप्तिङन्तम् । सुप्तिङित्यस्य प्रत्याहारत्वे तिङ्साहचर्यस्य, 'न ङिसम्बुद्ध्यो'रिति ज्ञापकस्य चोद्योतो-क्तस्य सम्भवेपि टाप्डाप्ङीप्चाप्ल्यप्पाशप्कल्पप्सुच्कप्तमप्पकारेणेत्यत्र तदसम्भवात्, तदपहायोभय-साधारणमाह—**व्याख्येति** । 'स्वादि'ष्वित्यादिग्रहादित्येके । नच तिङ्साहचर्यादेकसूत्रोपात्त एव सुबपीति वाच्यम्, क्यङ्ष्यङूङां सत्त्वात्तत्रापि व्याख्यानस्य शरणीकरणीयत्वात् । सुब्ग्रहात्तिङेकसूत्रोपात्त एवेत्यपि **केचित्** । **यद्यपीति** । **उक्तेरिति**—पञ्चम्यन्तस्य शब्दरूपविशेष्याध्याहारे हेतुत्वम् । **शब्देति**

❀ विषमपदविवृतिः ❀

सुप्तिङन्तम् । **सुपः पकारेणेति** । न तु टापः कपो वा—पकारेणेत्यर्थः ।

तस्य तादृशसमुदायेन व्यभिचारेणाक्षेपासम्भवात्, आक्षिप्तस्य शाब्देऽनन्वयाच्च। तथापि सञ्ज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणाभावज्ञापनार्थमन्तग्रहणम्। तेन घसञ्ज्ञा तरप्तमपोरेव न तदन्तस्य। तेन 'गौरीब्राह्मणितरे'त्यत्र न ह्रस्वः। एतन्निषेधसामर्थ्यादेव

❀ अभिनव-चन्द्रिका ❀

योगित्वं तृतीयार्थः, तस्य च व्यभिचारपदार्थतावच्छेदकेऽभावेऽन्वयः। **अनन्वयाच्चेति**। शक्त्या लक्षणया व्यञ्जनया सादृश्यज्ञानेन वा उपस्थितस्यैव शाब्दबोधविषयत्वस्वीकारादिति भावः। **ज्ञापनार्थमिति**। सञ्ज्ञानिष्ठविधेयतानिरूपिता या प्रत्ययमात्रवृत्तिसाक्षादुद्देश्यता तत्प्रयोजकं पदं यत्र तत्र तदादिविषयकतदन्तग्रहणाभावज्ञापनार्थमित्यर्थः। **गौरीब्राह्मणीतरेति**। न च 'पुंवत्कर्म-

❀ चिदस्थिमाला ❀

खण्डयति—**प्रत्ययेनेति**। सुप्तिङ्रूपेणेत्यर्थः। **स्वप्रकृतीति** द्वन्द्वः। **तद्विशेषेति**। सुप्तिङोस्तादृशसमुदायविशेषणत्वेनेत्यर्थः। इति त्विति पाठः। व्यातिसे इतिप्रयोगस्याभावादाह—**इयानिति**। आदिना इरित्यादिपरिग्रहः। **तस्य**—प्रत्ययस्य। ननु प्रक्रियायां तत्सत्त्वेन न व्यभिचारोऽत आह—**आक्षिप्तेति**। 'प्राय' इत्यादिः। **न ह्रस्व इति**। 'गौरीशब्दस्ये'ति शेषः। ब्राह्मणीशब्दस्य तु भवत्येवेति भावः। नन्वेवमपि

❀ सदाशिवभट्टीयम् ❀

तदादीत्यत्राऽन्यपदार्थजिज्ञासायां तदध्याहारस्यावश्यकत्वात्, गुणानाञ्चेति न्यायाच्चेति भावः। **एतेन**—तदादेरिति विशेष्यमादायैव तत्सिद्धौ तदध्याहारो मुधेत्य**पास्तम्**। पूर्वं सामानाधिकरण्यासम्भवेन तद्विशेषणतया तत्कल्पने क्लेशाच्च। किञ्च प्रत्ययग्रहणे तदादीति विशेष्यमादाय तदन्तविध्यङ्गीकारेऽपञ्चम्या इत्यस्यापूर्वत्वं स्यात्, तस्य प्रत्ययविशेषणतयाऽन्वयासम्भवात्। शब्दरूपस्य तु तस्योभयरूपेणाऽन्वयसम्भवेन विशेषणविशेष्यभावे कामचारेण तत्रैवं तात्पर्यग्राहकं तन्मतेपि नापूर्वम्। नन्वलौकिकेऽव्यभिचारात्सम्भव एवात आह—**आक्षिप्तस्येति**। अनुमितस्येत्यर्थः। शब्दरूपाविशेष्यस्य त्वध्याहारादन्वयो भवत्येव, तव तु प्रत्ययेनेति हेतूपादानादाक्षेपपदेनानुमितिरेवाभिमतेति भावः। **तेन गौरीति**। षष्ठीतत्पुरुषोऽयमतो न पुंवदिति **केचिदाहुः**। **वस्तुतो** घसञ्ज्ञासूत्रे स्त्रीलिङ्गे समानाधिकरणे ह्रस्व इत्युक्तेर्बहुव्रीहिरेवायम्। गौरीत्यत्र 'सञ्ज्ञे' ति न पुंवत्त्वम्, अथवा 'कन्या कुमारी गौरी तु नग्निकानागतार्तवे'ति कोशाद्वयोवाचकोयम्, तत्र जातिकार्यं विकल्पेनेष्यतेऽतो जातेश्चेति निषेधान्न पुंवत्त्वम्। 'प्रत्ययग्रहणे चापञ्चम्या' इति वार्तिके कैयटेऽपञ्चम्या इत्यस्य दृषत्तीर्णेति प्रयोजनमुक्त्वा सञ्ज्ञाविधौ तर्हि तदन्तविधि

❀ विषमपदविवृतिः ❀

शब्दादुपस्थितस्यैव शाब्दबोधे ऽन्वयात्, अन्यथा 'घटमानये'त्युक्ते समवायसम्बन्धेन घटशब्दसम्बन्धितयोपस्थितस्याकाशस्य शाब्दबोधेऽन्वयापत्तेः। 'द्वार'मित्यादौ तु 'पिधेही'ति शब्दस्यैवाध्याहारः। नन्वेवं 'ल्यब्लोपे'त्यस्य निर्विषयत्वम्, अन्विताभिधानवादाङ्गीकारात्। स्पष्टं चेदं 'सर्वादीनि सर्वनामानी'ति सूत्रे भाष्ये, तथाहि,"—नेदं सञ्ज्ञाकरणं पाठविशेषणमिदं सर्वेषां यानि नामानि तानि सर्वादीनि सञ्ज्ञोपसर्जनेति विशेषणेऽवतिष्ठते। यद्येवं सञ्ज्ञाश्रयं यत्कार्यं तन्न सिध्यति, 'सर्वनाम्नः स्मै'—अन्वर्थग्रहणं तत्र विज्ञास्यते सर्वेषां यन्नाम तदन्तस्य 'ङेः स्मै' इति। यद्येवं—'सकलं कृत्स्नं जग'दित्यात्रापि प्राप्नोति,—एतेषां च शब्दानामेकैकस्य स स विषय इति कैयटश्चैतेषां चापीति। ततश्च 'सर्वस्मिन्नोदन' इत्यादौ ओदनशब्दस्यापि सर्वनामकार्यं प्राप्नोति, सामानाधिकरण्यादनयोरिति। **गौरीब्राह्मणीतरेति**। नेदं परिनिष्ठितं, किन्तु ह्रस्वापादनाय

प्रदेशेष्वपि न तदन्तविधिः । न च ज्ञापितेऽपि व्यर्थं, पदप्रदेशे प्रत्ययग्रहणे

❀ अभिनव-चन्द्रिका ❀

धारये'ति पुंवद्भावे उक्तं रूपं न स्यादिति वाच्यं, गौरी ब्राह्मणितरा इति स्थिते पुंवत्त्वं बाधित्वा 'घरूपे'तिह्रस्वापत्तिरित्यर्थेनादोषात् । 'दशवर्षा भवेद्गौरी'ति यमस्मृतेर्गौरीशब्दस्य वयोवाचकत्वेन वयोवाचकानां वैकल्पिकजातिवाचकत्वस्योक्तत्वेन बहुव्रीहिसमासस्वीकारे 'जातेश्चे'ति-पुंवत्त्वनिषेधेनोक्तरूपसिद्धेश्च। यत्तु षष्ठीतत्पुरुष इति, तन्न, घरूपसूत्रे 'समानाधिकरणे'इत्यनुवृत्त्या तत्र दोषकथनासङ्गत्यापत्तेः । स्पष्टञ्चेदं 'तरप्तमपौ घ' इति सूत्रे भाष्ये । **एतन्निषेधसामर्थ्यादिति** । न च घरूपेत्यत्र उत्तरपदविशेष्यकतदन्तविधे'रुत्तरपदाधिकार' इतिपरिभाषया निषेधात्तदादि-विशेष्यकतदन्तविधेश्च 'प्रत्ययग्रहणेचे'तिनिषेधात् 'गौरीब्राह्मणीतरे'त्यादौ ह्रस्ववारणाय निषेधस्सार्थक इति वाच्यम्, रात्रेः कृती'त्यादौ 'उत्तरपदाधिकार' इति निषेधाप्रवृत्तये प्रत्ययवृत्त्यानुपूर्व्य-वच्छिन्नविषयताप्रयोजकं यत्र तत्रैव तत्प्रवृत्तेरावश्यकत्वेन 'घरूपे'त्यत्रोत्तरपदविशेष्यकतदन्त-विधिनिषेधस्य एतन्निषेधसामर्थ्यादेव वक्तव्यत्वात् । न च 'रदाभ्यां निष्ठातो न' इत्यत्र 'प्रत्ययग्रहणे चापञ्चम्या, इति निषेधात्, क्तान्ततदादेः क्तवत्वन्तदादेः निष्ठासंज्ञाऽभावाय सञ्ज्ञाविधाविति निषेध-स्सार्थक इति वाच्यम्, प्रत्ययमात्रग्रहणाभावेन तदन्तविधेः प्राप्तिविरहात् । न चैवमपि 'षः प्रत्ययस्ये'त्यत्र तदन्तविध्यभावाय निषेधस्सार्थक इति वाच्यं, तत्र प्रत्ययपदस्य प्रत्ययबोधकत्वा-

❀ चिदस्थिमाला ❀

'घरूपे'त्यत्र तदन्तविधावुक्तदोषस्तदवस्थ एवात आह–**एतदिति** । सञ्ज्ञाविधावित्यर्थः । **पदेति** । 'प्रत्ययोरेव पदसञ्ज्ञायामपी'त्यादिः । यस्मिन्ज्ञापिते तस्य चारितार्थ्यं तत्तेन ज्ञाप्यमिति सिद्धान्तादिति भावः । **प्रकृतीति** । 'स्वादिष्वसर्वे'त्युक्तेरिति भावः । **प्रत्ययेति** । तन्मात्रेत्यर्थः । ननु प्रकृते तदभावे तदन्तांश-

❀ ज्योत्स्ना ❀

मनुसन्धेयम् । **गौरीब्राह्मणीतरेति** । समासार्थप्रदर्शकवाक्यप्रदर्शकमिदम् , समासे तु पुंवद्भावेन गौरब्राह्मणितरेति भवितव्यमिति प्राहुः । **एतन्निषेधेति**–कर्मधारयः, 'सञ्ज्ञाविधा'विते-तन्निषेधेत्यर्थः । प्रदेशेषु=घरूपेत्यादिषु । **न तदन्तविधिरिति** । इदञ्च 'प्रत्ययग्रहणे चापञ्चम्या' इति वार्त्तिकस्थितप्रदीपेन, प्रदीपोद्योते—स्वकृतव्याख्यानेन च विरुध्यत इति परिभाषा-प्रदीपार्चिषि विस्तरः । **पदप्रदेशे इति** । अस्य—'प्रत्यययोरेव पदसञ्ज्ञायामपी'त्यादिः ।

❀ सदाशिवभट्टीयम् ❀

निषेधस्य किं फलमित्याशङ्कितम् , एवञ्च तत्सामर्थ्यात्–प्रदेशेषु तदभावे दृष्टत्तीर्णेति सिद्धौ नेदमसाधारण-मस्य प्रयोजनमिति च तदाशयः । ततश्च यदि सञ्ज्ञाविधौ प्रत्ययग्रहणे तदन्तस्य सञ्ज्ञा स्यात्, प्रदेशेषु पुनस्तदन्तविधिः स्यादिति प्रत्ययान्तङ्गृह्येतेति समाहितं, घादिभिरुत्तरपदस्य विशेषणादिति भावः । एवं च कुमारीगौरब्राह्मणितरेत्यत्र कुमार्या ह्रस्वः प्रसज्येतेति तद्व्यावृत्त्या चरितार्थमितिसङ्गतमेव प्रयोजनमिति तदाशयस्तत्र समाधिः फल्गुत्वात्—कैयटङ्कटाक्षयन्सिद्धान्तत्वेन शङ्कां नाटयति—**एतन्निषेधेति** । पूर्वोक्तप्रयोजनन्तु न सति सम्भवे उत्तरपदेत्यस्य विशेषणत्वात् । अत एव तदधिकारे प्रत्ययग्रहणे एव निषेध आरब्धस्तस्य प्रत्ययविशेषणत्वासम्भवात् । **नचेति** । यद्यपि 'सामर्थ्यान्न भविष्यती'ति–समाधिरनुपद-

❀ विषमपदविवृतिः ❀

कल्पितमलौकिकमेव, परिनिष्ठितत्वे गौरीशब्दे पुंवद्भावापत्तेः । ननु घसञ्ज्ञायां तदन्तविध्यभावेपि प्रदेशेषु तदन्तविधौ पुनरुक्तदोषतादवस्थ्यमित्याशङ्क्याह–**एतन्निषेधेति** । इदमप्ययुक्तम्—सञ्ज्ञाविधौ तदन्तविध्यभावे'घरूपे'त्यत्रापि न तदन्तविधिः । 'हृदयस्य हृल्लेख' त्यत्राण्ग्रहणेन

तदन्तग्रहणेनैव सिद्धेरिति वाच्यं, पदत्वस्य प्रकृतिसाधारणतया पदग्रहणे प्रत्ययग्रहणस्यैवाभावात् । 'यस्मात्प्रत्ययविधि'रित्याद्यनुवृत्तेः पदसमुदायस्य न पदत्वम् । 'इया'नित्यादौ यस्मात्प्रत्ययविधिस्तदादितद्धितान्तत्वं व्यपदेशिवद्भावेन बोद्ध्यम् ।

❀ अभिनव-चन्द्रिका ❀

भावेन तदन्तविधेः प्राप्त्यभावादिति दिक् । **न पदत्वमिति** । वस्तुतस्तु 'अदग्धदहने' तिन्यायेन तदादीत्यनुवृत्तेः प्रयोजनं चिन्त्यम् । **व्यपदेशिवद्भावेनेति** । इयानित्यादौ मुख्यधर्मवदघटकत्वमुख्यधर्मवदसमभिव्याहृतत्वरूपासहायत्वस्य सत्वात् । वस्तुतो व्यपदेशिवद्भावेन घटकत्वघटितत्वातिरिक्तधर्मानतिदेशेन प्रकृते स्थानिवद्भावेनैव तद्धितान्ततदादित्वस्यानेयतया चिन्त्यमिदम् ।

❀ चिदस्थिमाला ❀

निषेधे प्राप्ते तद्ग्रहणेन तल्लाभेऽपि तदादीत्यंशस्यालाभेनानिष्टं स्यात्परिभाषासञ्चाराभावादत आह— **यस्मादिति** । 'अत्र सूत्र' इत्यादिः । आदिना तदादिपरिग्रहः । यद्यपि भिन्नमूले द्वे ते परिभाषेऽसंनियोगशिष्टे इति तन्मात्रनिषेधेऽपि तदुपस्थितिः सम्भवत्येव, तथापि लाघवादत्र सम्भवात्तन्मूलावम्बनमेव कृतम् । **न पदत्वमिति** । ततोऽविहितत्वादिति भावः । नन्वेवमन्यत्र तदावश्यकत्वे कार्यकालपक्षे इयानित्यादौ कथं प्रातिपदिकत्वमत आह—**इयानिति** । नन्वस्याशास्त्रीयत्वात्कथं तेन तत्त्वमत आह—**तेनेति** ।

❀ ज्योत्स्ना ❀

प्रकृतिसाधारणतयेति । स्वादिष्वित्यनेन प्रकृतेरपि तद्विधानादिति भावः । **इत्यादीति** । 'यस्मात्प्रत्ययविधिस्तदादि प्रत्यय' इति भाष्योक्तयोगविभागलभ्यस्य 'प्रत्यये गृह्यमाणे यस्मात्प्रत्ययविधिस्तदादीत्युपतिष्ठत' इत्यर्थस्यानुवृत्तेरुपस्थितेरित्यर्थः । नन्वेवं 'कृत्तद्धिते'ति सूत्रेऽपि प्रत्ययग्रहणाद्यस्मात्प्रत्ययविधिस्तदादीत्येतदुपस्थित्या इयानित्यत्र प्रातिपदिकसञ्ज्ञा न स्यादत आह— **इयानित्यादाविति** । **तदादितद्धितान्तत्वमिति** । तत्फलञ्च प्रातिपदिकसञ्ज्ञेति बोध्यम् ।

❀ सदाशिवभट्टीयम् ❀

मुक्तो वक्तव्यस्तथापि तत्प्राप्तिरेव नेति न्याय्यं समाधिमाह–**पदत्वेति** । तत्रत्योद्योतस्य'भाव'इत्युक्त्या प्रदीपाशयप्रतिपादकत्वान्न तद्विरोधः । **अन्ये तु**—'स्वरूपव्याक्रियैव पराक्रिये'ति न्यायेन शङ्कात्वेनैवानुवादोऽत एव तदव्यवधानेनैव शङ्कासमाधानान्तरं च सङ्गच्छत इत्याहुरिति दिक् ।

यद्वा–"**ननु** सञ्ज्ञाविधावित्यत्र सम्बन्धसामान्यषष्ठ्या समासेन प्रदेशेपि तन्निषेधः परिभाषयैव सिध्यतीति सामर्थ्येन तद्वारणांविफलङ्कर्मषष्ठ्या समासविशिष्टज्ञापने त्वन्तग्रहणसार्थक्यं दुर्वचमित्याशयेन शङ्कते— **नच ज्ञापितेपी**"**ति । अन्येतु**–"नन्वलोत्तरपदाधिकारे प्रत्ययग्रहणे तदन्तविधिर्नास्तीति तदन्तविधेः प्राप्तिरेव न, नचद्वितीयतदन्तविधेरभाव एव तया कल्प्यस्तथा सत्यणन्ते उत्तरपदे इत्यर्थापत्तौ हार्द इत्यस्यासिद्धिरिति चेन्न, 'रात्रेः कृती'त्याद्यर्थं यत्र प्रत्ययस्य विशिष्योक्तिस्तत्रैव तत्प्रवृत्तेर्वाच्यतया तदप्रवृत्तेः । नन्वेवमपि रदाभ्यामित्यादौ प्रत्ययग्रहणे चापञ्चम्या इति तदन्तविधेरप्राप्तेश्चारितार्थ्यान्न सामर्थ्यमिति चेन्न, रदाभ्यामित्यस्य प्राधान्यात्तकारविशेषणतया निषेधाप्रवृत्तेरत एव चरितमित्यादौ न नत्वं, नच'स्फायःस्फीनिष्ठाया' मित्यत्र निष्ठान्ते इत्यर्थवारणाय पञ्चम्यन्तावध्याक्षेपेण प्रत्ययग्रहणेनेति तदन्तविध्यभावात्तत्र चारितार्थ्यमिति वाच्यम् । अनयैव रीत्या तदन्तविध्यभावे सिद्धे आक्षेपे मानाभावात् । न च 'क्लिशः क्त्वानिष्ठयो'रित्यत्र क्त्वांशे प्रत्ययग्रहणेनेति निषेधात्तदभाववन्निष्ठांशेपि तदभावात्तत्र चारितार्थ्यम्, उक्तरीत्यैव निष्ठांशे तदभावेतत्साहचर्यात्—क्त्वांशेपि तदभाव–"**इत्याहुः** । **इत्याद्यनुवृत्तेरिति** । सनाद्यन्तेत्यादावुक्तरीतिरसम्भवात्—परिभाषैकदेशोपस्थितेरावश्यकत्वेन स्वरितत्वप्रतिज्ञानं मुधेत्याहुस्तन्न, अङ्गमितियोगविभक्ते तत्सम्बन्धाय तत्त्वस्यावश्यकत्वात्, **बृहत्युपस्थितेरप्युक्तत्वाच्च** न क्षोदः । नन्वेवमप्यत्र तदावश्यकत्वे कार्यकाले इयानित्यादौ कथम् प्रातिपदिकत्वमत आह—**इयानिति** ।

तेनाशास्त्रीयस्याप्येकाच्त्वादेरतिदेशात् । 'विशिष्टनिष्ठव्यवहारनिमित्तकार्याणि असहायेऽपि कर्त्तव्यानी'ति तदर्थात् । अत एवे'यन्मात्र'मित्यादौ वत्वन्तात्स्वार्थे इति मात्रच्सिद्धिः ।

❀ चिदस्थिमाला ❀

व्यपदेशिवद्भावेनेत्यर्थः । इयायेत्यादाविति भावः । 'एकस्मि'न्निति परिभाषान्तर्गतमिति सूचयितुं तदर्थमाह— **विशिष्टेति । व्यवहारेति** । न तु शास्त्रीयधर्म एवेत्यर्थः । अत एव तदतिदेश इति भावः । अपिर्विशिष्टसमुच्चायकः । अत एव=तदादित्वादेस्तेन लाभादेव । एकस्मिन्नित्यस्य व्यावर्त्यं सूचयन् तदन्तर्गतत्वस्य

❀ सदाशिवभट्टीयम् ❀

इदञ्चान्यथासिद्धंसुब्लुगर्थं पूर्वं प्रवृत्तायाःसञ्ज्ञायाः एकदेशविकृतन्यायेनात्रातिदेशात् । नहि कार्यकाले उपदेशेनैवैकवाक्यता नातिदेशेनेत्यत्र मानमस्तीति, स्पष्टं चादोऽत्रैव **बृहति**, क्षोदिष्यते चास्माभिरप्युपरिष्टात् ।

❀ विषमपदविवृतिः ❀

सप्तम्यन्ते प्रत्ययग्रहणे तदन्तविध्यभावज्ञापनात् । सञ्ज्ञाविधौ तु 'घरूपे'त्यत्र पुनस्तदन्तविधिर्दुर्वारः, सप्तम्यन्ते प्रत्ययग्रहणाभावेनोक्तनिषेधाप्रवृत्तेः । किञ्च प्रगृह्यत्वस्य प्रत्ययाप्रत्ययसाधारणतया प्रदेशे तदन्तविध्यभावेने'**दूदेद्द्विवचनमि**'त्यादौ सञ्ज्ञाविधाविति निषेधश्चरितार्थ इति क्व सामर्थ्यमित्येषा दिक् । **इत्याद्यनुवृत्तेरिति** । यद्यपि तदन्तांशाप्रवृत्तावपि 'प्रत्यये गृह्यमाणे यस्मात्प्रत्ययविधिस्तदादी'त्युपतिष्ठते इति परिभाषाबलेनापि पदसमुदायस्य पदत्वं वारयितुं शक्यम्, तथाप्यनुवृत्त्याऽपि निर्वाहप्रदर्शनपरमेतत् । 'सर्वस्य द्वे' इति सूत्रे कैयटेऽप्येवमेवोक्तम् । ननु इयानित्यत्रैकदेशविकृतन्यायेन स्थानिवद्भावेन वा प्रातिपदिकत्वं सुलभमत आह—**अत एवेति** । इदं सर्वमयुक्तं—प्रकृतिसत्त्वघटितस्य यस्माद्विहितस्तदादित्वस्य व्यपदेशिवद्भावसाध्यत्वात् । अवयवत्वतद्व्याप्यान्तत्वादित्वव्यवहारमात्रस्य तदतिदेशसाध्यत्वात् । अत एवासिद्धवत्सूत्रे भाष्ये 'प्रस्तनय्य गत' इत्यादावल्लोपस्यासिद्धत्वादयादेशाभावमाशङ्क्य व्याश्रयत्वेन समाहितम् त्वद्रीत्या त्वसिद्धत्वेपि स्वात्मगतलघुपूर्वत्वमादायायादेशसिद्ध्या तदसङ्गतिः । अत एव च हरिशब्देनादन्तत्वम् ।

नन्वेवं 'पूर्वादिनिः' 'सपूर्वाच्चे'ति सिद्धे योगविभागो 'व्यपदेशिवद्भावोऽप्रातिपदिकेने'ति परिभाषाज्ञापनार्थ इत्याकारासङ्गतिरिति चेन्न, सपूर्वादिति पूर्वशब्दस्य पूर्वावयववाचित्वात्, सपूर्वादित्यस्य प्रातिपदिकविशेषणत्वात् । एवमे'कगोपूर्वा'दित्यत्रापि पूर्वादित्यस्य सामर्थ्यात्पूर्वान्तादित्यर्थः । अन्यथा व्यस्तेऽप्यापत्तेः । 'इयन्मात्र'मित्यादौ त्व'न्तरङ्गानपि विधीन्बलिरङ्गो लुग्बाधत' इति न्यायेन 'यस्ये'ति लोपं बाधित्वा पूर्वं मात्रच्प्रत्ययस्ततो लोप इति न कश्चिद्दोषः । एवमस्यापत्यमिरेयुवापत्यमायन इत्यादौ 'यञिञोश्चे'ति फक्सिद्धिरपि बोध्या । नन्वस्य मात्रचः फकश्चान्तरङ्गनिमित्तविनाशकलुक्प्रयोजकत्वाभाव इति चेत्सत्यम्, प्रक्रियायामुपसर्गसमानाकार इत्येतद्व्याख्यावसरे 'यस्माद्विहित' इत्यनेनाधिकव्यावृत्तिरेव न तु न्यूनव्यावृत्तिरिति शेखरोक्तस्थलेषु दोषाभावात् ।

नन्वेवं हरिष्वित्यादौ सोः पदत्वापत्तिः, 'हलि सर्वेषा'मिति निर्देशेन 'सात्पदाद्यो'रित्यत्र सातिग्रहणेन चाधिकस्य यस्माद्विहितस्तदादेः सङ्ग्रहसम्भवे न्यूनस्यापि व्यावृत्तिकल्पनात् । 'सुमनायत' इत्यादौ तु पृथक्करणेन स्वादेः क्यङ्प्रकृतिघटकत्वासम्भवादधिकस्य सङ्ग्राह्यत्वासम्भवेन न्यूनव्यावृत्त्यभावः । एतेन व्यतिस इत्यादौ 'तिङ्ङतिङः' इति निघातो व्याख्यातः, 'असे' इत्यस्य स्थाने से इत्यादेशकल्पनाद्वाऽर्थवत एवादेशत्वादभावस्यानर्थकत्वेनादेशत्वासम्भवात् । हरिष्वित्यादावेकस्मिन्नित्यस्याभावेपि सोः पदत्वमुक्तरीत्या वारयितुं शक्यमित्येकस्मिन्निति व्यर्थमिति चेन्न,

१. बृहति=बृहच्छब्देन्दुशेखरे । क्षोदः=तत्त्वनिर्णयाय विचारः ।

'हरिषु' इत्यादौ सोऽस्तु नैवं पदत्वं, 'हलि सर्वेषामि'ति निर्देशेन ससहाये तदप्रवृत्तेः। 'निजौ चत्वार एकाचः' इति भाष्यन्त्वभ्युपेत्यवादेन। ध्वनितञ्चेदम्–'आदेच उपदेशे' 'तास्यनुदात्ते'दित्यादौ भाष्ये। तत्र हि—'ढौकते' इत्यौकारस्य 'हत' इत्यादावकारस्यैजन्तोपदेशत्वमकारान्तोपदेशत्वं व्यपदेशिवद्भावेनाशङ्क्य 'अर्थवता व्यपदेशिद्भाव' इत्युक्तम्।

❀ अभिनव-चन्द्रिका ❀

अभ्युपेत्यवादेनेति। इदं भाष्यं यथा सङ्गच्छते, मूलोक्तं च सर्वमसङ्गतमिति च—विस्तरेण परिभाषेन्दुचान्द्रिकायां निरूपितम्। न च 'ढौकत'इत्यादावौकारे एजन्तोपदेशत्वस्य हतइत्यादावकारेऽदन्तोपदेशत्वस्य व्यपदेशिवद्भावेनाशङ्कापरम्—'आदेच उपदेश'सूत्रस्थं भाष्यं विरुध्यते इति वाच्यं, तस्यैकदेशयुक्तित्वेनादोषात्। 'ढौ'इत्यत्रैजन्तत्वस्य, 'ह' इत्यत्रादन्तत्वस्य सत्त्वेन उपदेशत्वस्य व्यपदेशिवद्भावेनानियतया तद्विहाय केवलौकारे अकारे च उभयधर्मातिदेशाशङ्काकरणेन तस्य

❀ चिदस्थिमाला ❀

समूलत्वमाह–**हरीति**। नैवं=व्यवदेशिवदित्यंशेन। यद्यपि लोकन्यायसिद्ध एवायमप्यर्थस्तथापि ज्ञापकमपि तदंशेऽस्तीत्याह–**हलीति**। निर्देशेन=तेनापि। नन्वेवं'निजौ चत्वार'इति भाष्यासङ्गतिरिकारस्यासहायत्वाभावेन तत्रैकाच्त्वानुपपादनादत आह–**निजाविति**। 'एकस्मि'न्नित्यस्यापर्यालोचनेन ससहाये तत्प्रवृत्तिमभ्युपेत्येत्यर्थः। **दित्यादाविती**तिनोभयपरामर्शः। तत्र हि=सूत्रद्वये हि। यथासङ्ख्यमन्वयः। प्रत्येकमन्वयात्र **चः**। **चस्त्वर्थे**। **तदर्थ इति**। तथाचार्थवत्पदेनासहायत्वमेवोपलक्ष्यते, बोध्यबोधकभावसम्बन्धे मतुप्।

❀ सदाशिवभट्टीयम् ❀

ध्वनितञ्चास्य तत्त्वम्वत्वन्तात्स्वार्थे इति प्रयोजनान्तरं वदता ग्रन्थकृता। न्यायसिद्धमप्यर्थं प्रमाणयति–**हलि सर्वेति**।

❀ विषमपदविवृतिः ❀

सभासन्नयनशब्दस्य वृद्धत्वाभावाय, दरिद्रातेरिवर्णान्तत्वाभावाय च तदावश्यकत्वात्। **ससहाये इति**। असहायत्वं=मुख्यव्यपदेशभागघटकत्वं। नन्वेवं 'कुम्भकारेभ्य' इत्यादौ 'कृन्मेजन्त' इति सूत्रे भाष्येऽव्ययत्वमापाद्य सन्निपातपरिभाषया समाहितं—तदेतदसङ्गतम्, एकारस्य मुख्यैजन्तत्वव्यपदेशभागघटकत्वादिति चेन्न, कृत्त्वसमानाधिकरणमुख्यैजन्तत्वव्यपदेशभागघटकत्वेनासहायत्वस्य सूपपादत्वात्। अत एव खट्वेइत्यादौ व्यपदेशिवद्भावेन द्विवचनस्यैदन्तत्वात्प्रगृह्यत्वम्, द्विवचनत्वसमानाधिकरणे तदन्तत्वं व्यपदेशभागघटकत्वस्य तत्र सत्त्वात्। एतेन 'निजौ चत्वार एकाच' इति भाष्यमपि योजितं वेदितव्यम्। धात्ववयवत्वविशिष्टैकाच्त्वव्यपदेशस्य निजावप्यमुख्यत्वेन तद्घटकेकारे मुख्यधात्ववयवत्वविशिष्टैकाच्त्वव्यपदेशभागघटकत्वस्य सत्त्वात्।

ध्वनितञ्चेदमिति। ससहाये व्यपदेशिवद्भावाप्रवृत्तिरित्येतत्प्रमेयमित्यर्थः। **असहाय एवेति**। यद्यपीयायेत्यादावपि प्रत्ययः सहायोऽस्त्येव, तथापि प्रकृतिघटकः स्वसजातीयः सहायो नास्ति—एतावतैवासहायत्वव्यपदेशः। 'एकाकी हयमारुह्य जगामे'त्यादौ विजातीयहयरूपसहायसत्त्वेपि तथा व्यपदेशदर्शनात्। तथाचार्थवता व्यपदेश इत्यत्रार्थवत्पदमर्थवत्सहचरितासहायत्वे लाक्षणिकमिति भावः।

२२

'यो वर्णोऽर्थवांस्तेन व्यपदेशिवद्भावः, वर्णस्यार्थवत्त्वञ्चेयायेत्यादावसहाये एव, न तु प्रकृते—इति तदर्थः। एवञ्चैकस्मिन्नित्यस्यार्थवतेत्यनेनोक्त इति दिक्।

हलोऽनन्तराः। 'गर्गाः शतं दण्ड्यन्ता'मित्यत्र समुदाये शतदण्डनवदत्र समुदायस्यैव सञ्ज्ञा, न प्रत्येकम्। 'अनन्तरा' इत्युक्तेश्च। तस्य विशेषणताया एवौचित्यात्।

❀ **अभिनव-चन्द्रिका** ❀

तत्त्वस्यावश्यकत्वाच्चेति दिक्। **समुदाये शतदण्डनवदिति**। उद्देश्यतावच्छेदकप्रतियोगिकपर्याप्त्यनुयोगितावच्छेदकधर्मावच्छिन्नानुयोगिताकपर्याप्तिकविधेयतावत्त्वस्य सञ्ज्ञासु नियतत्वेन,–प्रकृते सञ्ज्ञाशास्त्रीयोद्देश्यतावच्छेदकसाहित्यपर्याप्त्यनुयोगितावच्छेदकं यद्द्वित्वं तदेव संयोगसञ्ज्ञापर्याप्त्यनुयोगितावच्छेदकमिति द्वयोरेव संयोगसञ्ज्ञेति भावः। **अन्तरा इत्युक्तेश्चेति**। अयं भावः—'अनन्तरा

❀ **चिदस्थिमाला** ❀

अर्थबोधकशब्देन व्यपदेशिसदृशो भावः कार्यं लभ्यते इति तदर्थ इति बोध्यम्। तदाह–**एवञ्चेति**। **स्यार्थवतेति**। एतेन 'योऽर्थवान् तत्रार्थस्य त्यागोपादानाभ्यामेकाज्व्यपदेशो यथेयायेत्यादावर्थवतो धातोरयं वर्णरूप एका'जिति **कैयटाद्युक्तमपास्तं**, तस्य भाष्यरीत्या मूख्यव्यवहारत्वात्। एवञ्चार्थवतेतिपरिभाषान्तरमित्यपास्तं तदाह–**इतिदिगिति**। **दण्डनदवत्रेति**। तत्र यथा समुदाये शतदण्डनं तत्तात्पर्यविषयस्तथा प्रकृतसूत्रेऽपि समूहस्यैव सञ्ज्ञा तथेत्यर्थः। ननु 'ब्राह्मणभोजन'न्यायेन प्रत्येकमेव विनिगमनाविरहात्कुतो नात आह–**अनन्तेति**। नच समूहसत्त्वे एव प्रत्येकं यथा स्यान्न तदभावे इत्येतदर्थमनन्तरा इति वाच्यं, बहुवचनेनैवोक्तार्थसिद्धेः,अन्यथा हलित्येव ब्रूयात्। नन्वेवमपि कदाचिदानन्तर्यस्य समूहे सत्त्वेन तमादायान्यत्रातिप्रसङ्गस्तदवस्थ एवात आह–**तस्येति**। आनन्तर्यस्येत्यर्थः। **एवेनो**पलक्षणत्वव्यवच्छेदः। सम्भवतीति न्यायादिति भावः। **कैयटकौस्तुभदण्ड्याद्यु**क्तिं खण्डयति—

❀ **ज्योत्स्ना** ❀

औचित्यादिति। अविद्यमानमन्तरं वर्णशून्यकाल एषामिति वा, अविद्यमाना अन्तरा मध्ये वा एषामिति—समासद्वयेऽपि संसर्गवद्विप्रयोगस्यापि विशेषावगतिहेतुत्वात्—येषां वर्णशून्यकाल-

❀ **सदाशिवभट्टीयम्** ❀

हलोन। ननु ब्राह्मणभोजनन्यायेन प्रत्येकमेव किं न स्यादत आह—**अनन्तरेति**। अयम्भावः—हलित्येकवचनेनैव वर्णग्रहणे जातिग्रहणात् हलन्ताच्चेत्यत्रेवाजव्यवहितहल्समुदायस्य सिद्धौ समूहबोधकैकशेषबोधकं बहुवचनं ब्राह्मणभोजनन्यायेन प्रत्येकं सञ्ज्ञायामनर्थकं स्यात्। ननु वर्णग्रहणे जातिग्रहणेपि लिडित्वासमुदायेपि प्राप्नोत्यतः समुदाये एव प्रत्येकं यथा स्यात् केवले माभूदित्येवमर्थं बहुवचनमिति चेत्तत्राह—**अनन्तरेति**। बहुवचनेन केवलव्यावृत्तावनन्तरग्रहणं व्यर्थमेव स्यात्, अतोऽनन्तरग्रहणेनैव केवलव्यावृत्तावतिरिच्यमानं बहुवचनं प्रकृतार्थसाधकमेव। ननु केवलेपि कदाचिदानन्तर्यस्य दृष्टत्वेन कथमनन्तरा इत्यनेन तद्वारणमत आह—**तस्य विशेषणतेति**।

❀ **विषमपदविवृतिः** ❀

हलोनन्तराः। नन्वानन्तर्यस्योपलक्षणत्वे एकस्यापि हलो हलन्तरानन्तर्योपलक्षितस्य स्यादेव सञ्ज्ञा, उपलक्षणत्वञ्च सञ्ज्ञिकोट्यप्रविष्टे सति सञ्ज्ञिव्यावर्तकत्वमित्याशङ्क्याह–**विशेषणताया एवेति**। विशेषणत्वञ्च सञ्ज्ञिकोटिप्रविष्टत्वम्। यथोक्तं **मधुसूदनेन** ''–सर्पज्ञानस्य भयकम्पादिजनकत्वे सर्पस्यापि तज्जनकत्वम्। सर्पादेर्ज्ञानविशेषणत्वसम्भवे उपलक्षणत्वायोगा''दिति। तत्रोपलक्षणत्वञ्च—भयादिजनकव्यावर्तकत्वे सति भयादिजनककोट्यप्रविष्टत्वं, **वस्तुतस्त्वे**'तदनन्तरो ब्राह्मणो भोज्यता'मित्युक्ते आनन्तर्यस्य तत्प्रतियोगिनश्च कार्यान्वयादर्शनात्,

यत्तु 'संयुज्यन्ते वर्णा यत्रेत्यन्वर्थसञ्ज्ञाबलान्न प्रत्येकं संज्ञा' इति, तन्न । 'घटपटौ संयुज्येते यत्रे'त्यादौ संयुज्यमानपदार्थातिरिक्तस्यैवान्यपदार्थतया प्रतीतेर्व्युत्पन्नत्वेन तदतिरिक्ततद्घटितपदवाक्यरूपसमुदायस्य सञ्ज्ञापत्तावनिष्टापत्तेः । महासञ्ज्ञा तु प्राचा-

❀ अभिनव-चन्द्रिका ❀

इत्यस्य अव्यवहिता इत्यर्थः । तत्र—व्यवहितत्वं—यत्किञ्चित्पदार्थविशिष्टद्वित्वाश्रयत्वम् । वै० 'स्वावधिकाव्यवहितोत्तरत्वसामानाधिकरण्य' 'स्वावधिकाव्यवहितपूर्वत्वसमानाधिकरण्यो'भयसम्बन्धेन, तथा च तादृशव्यवहितत्वं द्वित्वनिष्ठमेवेति 'संयोगवद्विप्रयोगोपि विशेषावगतिहेतु'रिति न्यायेन 'अवत्सा आनीयता'मित्यत्रेवाव्यवहितभिन्नौ द्वावेव गृह्येते इति द्वयोरेव संयोगसञ्ज्ञेति ।

❀ चिदस्थिमाला ❀

यत्त्विति । यत्र=समुदाये । **सञ्ज्ञेति** । संयोग इति सञ्ज्ञेत्यर्थः । **कस्यैवेति** । समूहस्यापि प्रकारतया वर्तिपदार्थत्वादिति भावः । शुद्धतदन्याकाशग्रहणे बाधादाह—**तद्घटितेति** । परमार्थतः पदस्यासत्त्वादाह—**वाक्येति** । नन्वेवं महासञ्ज्ञाकरणा व्यर्थमत आह—**महेति** । यद्यपि संयोगान्तौ यस्येत्येवं व्याख्यानेन लोपः सुवारस्तथापि वृत्तावुपसर्जने सङ्ख्याभानाभावेन तथा व्याख्यानमेव

❀ ज्योत्स्ना ❀

सम्भावना, मध्यवृत्तिवर्णसम्बन्धित्वे सम्भावना वा, तेषां वर्णशून्यकालाभावे मध्यवृत्तिवर्णसम्बन्धित्वाभावे वा सञ्ज्ञेति समुदायस्य सा विज्ञायत इति भावः । **कैयटाद्युक्तं** दूषयितुमुपन्यस्यति—**यत्त्विति** । **अनिष्टापत्तेरिति** । वस्तुतस्तु 'द्रष्टृदृश्ययोः संयोगो हेयहेतु'रिति योगसूत्रादौ सम्पूर्वस्य युजेः सम्बन्धमात्रार्थकत्वदर्शनात्समुदायसमुदायिनोः सम्बन्धः संयोगपदेनेह विवक्षितः, स च समुदायातिरिक्तसमुदायिप्रतीतिं नान्तर्भावयति, 'व्रीहयः संयुज्यन्तेऽस्मिन्राशा'वित्यत्र यथेति

❀ सदाशिवभट्टीयम् ❀

अतिरिक्तस्यैवेति । अत एवैकाजित्यादिव्यवहारोऽसहाये भेदारोपेण कृतो भाष्ये, तदेतन्मन्यते 'व्यपदेशिवदेकस्मि'न्निति । प्रकृते तु ससहायत्वान्न सः, अन्वर्थत्वे चाभेदबाधादनन्तरहल्समुदायवतिविशिष्टलक्षणेतिभावेनाह—**पदेति** । ननु बाधात्ससहाये व्यपदेशिवद्भाव एवाङ्गीक्रियते न लक्षणेति चेन्न, लिडित्यत्रापि व्यपदेशिवद्भावेन सञ्ज्ञापत्तेः, मन्मतापेक्षयाऽधिकमात्राणां दृष्टार्थकत्वकल्पने गौरवाच्च ।

वाक्येति । पदभिन्नपदघटितसमुदायोऽत्र वाक्यशब्देन विवक्षितस्तेन पाहि माधव उपेक्षसे किं मामित्यादौ वोपेक्षस इत्यादेः संयोगत्वे धकाराकारस्य गुरुत्वे प्लुतापत्तिरिति भावः । यद्वाऽत्र बहुवचनेन समूहस्य सञ्ज्ञाविधानान्न ब्राह्मणभोजनन्यायावसर इति सम्भवेदुत्प्रेक्षा, यदि तद्बहुत्वे स्यात्, प्रकृते जात्याख्यायामित्यनेनैकस्मिन्नपि तस्य सम्भवादत आह—**अनन्तरा इत्युक्तेश्चेति** । जातौ चानन्तर्यबाधात्तस्य वैयर्थ्यमिति भावः । ननूपलक्षणत्वेन तत्सार्थक्यमत आह—**विशेषणेति** । **अनिष्टेति** । 'व्रीहयः संयुज्यन्तेऽस्मिन्राशा'वित्यत्र वर्त्तिपदार्थस्यैवान्यपदार्थत्वाङ्गीकारेपि विनिगमकाभाव इति भावः ।

❀ विषमपदविवृतिः ❀

आनन्तर्यविषयविषयिभावस्वस्वामिभावादिप्रतियोगिनामुपलक्षणत्वमेव । यत्र हि विशेषणत्वोपलक्षणत्वयोर्दर्शनं तत्र विशेषणत्वमेव न्याय्यमिति **न्यायविदः** । न हि आनन्तर्यादिप्रतियोगिनां विशेषणत्वं कुत्रापि तान्त्रिकाणां सम्मतम् । एतेन—सर्पादेर्भयजनकत्वोक्तिरप्यपास्ता ।

व्युत्पन्नत्वेनेति । इदमप्ययुक्तं—'व्रीहयः संयुज्यन्ते यत्र राशा'वित्यादावुक्तनियमव्यभिचारात् । यद्यपि 'घटपटौ संयुज्येते यत्रे'त्यत्र घटपटातिरिक्तस्यैवान्यपदार्थतया प्रतीतिः,

मनुरोधादेव । तेन 'सुदृषद्भ्राती'त्यत्र संयोगान्तलोपो नेत्यन्यत्र विस्तरः ।

'हल'इति बहुवचनं सौत्रम् । यद्वा—हलौ च हलश्चेत्येकशेषः—'स्वरितात्संहितायामि'-ति सूत्रे'ऽनुदात्ताना'मिति पदे तथैकशेषस्य भाष्ये करणात् । तेन द्वयोरपीति—'शिक्षे' इत्यादौ'गुरोश्च हलः' इति अप्रत्ययः सिद्ध्यति । यत्रापि बहवः श्लिष्टास्तत्रापि द्वयोर्द्वयोरेव

❀ अभिनव-चन्द्रिका ❀

सौत्रमिति—वस्तुतस्तु हलौ च हलौ च हलौ चेत्येकशेषेण द्वयोरेव संयोगसञ्ज्ञेति पक्षेपि

❀ चिदस्थिमाला ❀

दुर्वचं, तदाह—**अन्यत्रेति** । भाष्यादावित्यर्थः । नन्वेवं बहूनामेव स्याद्द्वयोर्न स्यादत आह—**हल इतीति** । यत्तु जातौ बहुवचनमिति**दण्ड्या**दयस्तन्न । तथा सति प्रत्येकापत्तेरवारणात्, विशेषणान्वयासम्भवाच्च,व्यक्तिद्वारा तदन्वये तदाश्रयणवैयर्थ्याच्च, सूत्रस्य प्रत्याख्यानाच्चात आह-**सौत्रमिति** । अनेकत्वार्थकमित्यर्थः । तथाचान्यत्रैवं प्रयोगो नेति भावः । सौत्रत्वकल्पने गौरवादाह—**यद्वेति** । यद्यपि तत्रैकस्याप्युल्लेखस्तथाप्यनन्तरा इत्यादिबलात्तथा प्रकृते नेष्टं तदाह—**हलौ चेति** । **द्वयोरिति** । 'शुद्धे'-त्यादिः । अपिर्बहुस्थलीयद्विसमुच्चायकः । **कैयटकौस्तुभदण्ड्या**द्युक्तिं खण्डयितुमाह—**यत्रापीति** ।

❀ ज्योत्स्ना ❀

शक्यत एव **कैयटोपाध्यायप्रभृ**तीनामाशय इति सदसद्विवेकिभिर्विचारणीयम् । 'हल इति जातौ बहुवचनं, जात्याख्यायामिति वचना'दित्युपाध्यायाः, एवं तु लाघवादेकवचनेनैव निर्देश उचित इत्यस्वरसं तत्र मत्त्वाह—**बहुवचनं सौत्रमिति** । व्यक्तिपक्षे प्याह—**यद्वेति** । नन्तु 'संस्वर्यते' 'गोमान् करोति''निर्ग्लान' इत्यादौ बहूनामपि संयोगसञ्ज्ञायाः फलं द्वयोः सा माभूदिति गुणादिकमेषु

❀ सदाशिवभट्टीयम् ❀

किञ्च समूहस्यैव प्रकारतया वर्त्तिपदार्थत्वेन व्यपदेशिवद्भावे तथा व्यवहारेपि प्रकृते ससहायत्वान्न तथेति बोध्यम् । ननु द्वयोर्न स्यादत आह-**हल इति** । आश्रयगतं बहुत्वं धर्मे आरोप्य जात्याख्येत्यस्य प्रत्याख्यानात् । प्रकृते आरोपेण तत्त्वाङ्गीकारेपि पुनरपि द्वयोर्न स्यादतः—**सौत्रमिति** । अनर्थकमिति भावः । एकहलस्तु न, आनन्तर्यमित्युक्तेः । **यद्वा हलौ च हलश्चेति** । उभयोरेकशेषः, प्राचामनुरोधात् । स्वमते-बहूनां संयोगत्वे फलाभावस्य वक्ष्यमाणत्वादुभयोरेकशेषे न फलम् । किन्तु हल्च हल्च हल्च हल इत्येव, तत्र त्रयाणां समूहे फलाभावात्तदवयवेऽवतरन्ती द्वयोः समूहे पर्यवस्यति, नत्वेकस्मिन्—अनन्तराइत्युक्तेः । हलावित्येव सिद्धे बहुवचनं तु व्यर्थमेव, मात्रालाघवार्थं वा, 'हलावनन्तरा'वित्युक्तेरेकमात्रागौरवादिति

❀ विषमपदविवृतिः ❀

'व्रीहयः संयुज्यन्ते यत्रे'त्यत्र व्रीहीणामेव तथा प्रतीतिस्तथापि प्रकृते हलां विशेष्यत्वेन व्रीहयः संयुज्यन्ते यत्रेतिवदेव व्यवस्था युक्ता । **तद्घटितेति** । हल्पदस्योक्तव्युत्पत्त्यनुरोधेन हल्पदं तद्घटिते लाक्षणिकं स्यादिति भावः । **हलौ च हलश्चेति** । 'स्वरितात्संहिताया'मिति सूत्रस्थभाष्यप्रामाण्येन द्विवचनबहुवचनान्तयोरेकशेषः, शिष्यमाणं च द्वित्वविशिष्टहलोर्बहुत्वविशिष्टहलां च बोधकमिति भावः । **फलाभावादिति** । भूयादित्यत्र तु 'स्को'रिति सुटो निवृत्तौ पश्चात्तेनैव यासुटस्सस्य निवृत्तिरिति भावः । इदमप्ययुक्तं—मङ्क्त्वेत्यादौ संयोगादिलोपानापत्तेः, अन्त्यात्पूर्वो मस्जेर्मिदिति वार्तिकेन जकारात्पूर्वं नुम्प्रवृत्तेः। नच जकारे झलि परतो द्वयोः संयोगमाश्रित्य सलोपः सुलभः, सडीत्यधिकारेण झलादौ प्रत्यय एव तत्प्रवृत्तेः । 'भूयास्ता'मित्यादौ तु द्वयोः सकारयोः

न बहूनाम्, झलि परे संयोगादिलोपविधानात्। 'बहूनामपी'ति चिन्त्यमेव, फलाभावात्। तत्र-तत्राङ्गपदधात्ववयवसंयोगस्यैवाश्रयणेन तादृशस्य च त्रयाणां संयोगस्याभावादिति भाष्ये स्पष्टम् । आनन्तर्यं—व्यवधानाभावो, व्यवधानञ्च विजातीयेनैवेत्याशयेनाह—

❀ अभिनव-चन्द्रिका ❀

बहुवचनमुपपद्यते। फलाभावादिति। न च मग्न इत्यादौ 'मस्जिनशो'रिति नुमि बहूनां संयोगसञ्ज्ञाभावे 'स्को'रिति लोपो न स्यादिति वाच्यं, सकारजकारयोर्मध्ये नकारसत्त्वेपि अच्कर्तृकव्यव-

❀ चिदस्थिमाला ❀

एवव्यवच्छेद्यमेवाह—**न बह्विति**। आनर्थक्यापत्तेरिति शेषः। एतदेवव्यवच्छेद्यत्वं द्वयोर्बोध्यम्। तत्र हेतुमाह—**झलीति**। यदि तत्र बहूनामेव स्यात्तदा झलि परे संयोगादिलोपविधानं व्यर्थ, नहि तत्र परे तत्सम्भवः, तत्सहितस्यैवैतत्प्रवृत्तेरिति भावः। नन्वेवं तर्हि बहूनामेवेति न वाच्यं, बहूनामपीति तु वाच्यं, पदान्तसंयोगमादायैव तत्र फलसम्भवादत आह—**बहूनामपीति**। तदुक्तिरेवेयम्। अपिरन्वर्थत्वादिसमुच्चायकः। ननु फलमुक्तमेव, न च झलीत्येव तत्र सिद्धं, तदन्यत्र तदावश्यकत्वादत आह—**तत्रेति**। 'वान्यस्ये'त्यादिः। कार्याणां तत्तदधिकारस्थत्वा'त्संयोगादे'रित्यादावाद्यन्तशब्दयोरवयववाचितया बहुव्रीहिणा तदवयवसंयोगस्यैवाश्रयणमित्यङ्गादेरादावन्ते वा व्यञ्जनत्रयाद्यभावात्तत्र फलाभावात्तत्प्रवृत्तौ द्वयोःकथं न स्यादिति

❀ ज्योत्स्ना ❀

न स्यादत आह—**तत्र तत्रेति**। 'ऋतश्च संयोगादेर्गुणः' 'संयोगान्तस्य लोपः' 'संयोगादेरातो धातोर्यण्वतः' इत्यादावित्यर्थः। **तादृशस्येति**। 'संस्खर्यत' इत्यादौ मकारसकारवकारप्रभृतिसंयोगाश्च नाङ्गाद्यवयवा इति सत्यामपि बहूनां सञ्ज्ञायां फलाभावः स्पष्ट एव। न च बहूनामपीतिसामर्थ्यादुक्तलक्ष्येषु स माभूत्, 'स्खर्यत' इत्यादावुपसर्गयोगाभावे तत्तद्विधीनां चारितार्थ्यात्, 'बहूना'मित्यस्य चायमर्थः,—केषुचिल्लक्ष्येषु बहूनामेव केषुचिल्लक्ष्येषु द्वयोरेवेतीति वाच्यम्, विध्यस्पृष्टस्य प्रयोजनत्वाभावात्, अङ्गपदधातुभिः संयोगस्य विशेषणात्, सामार्थ्यात्तथा कल्पनात्तदाह—**भाष्ये स्पष्टमिति**। एतेन—'षस सस्ति स्वप्ने' इत्यदादौ पठ्यमानस्य 'संस्ति, सस्ति, संस्तः'—इत्यादौ 'स्को'रितिलोपाभावार्थं बहूनां सञ्ज्ञेत्यपास्तम्। नचैवमपि वव्रयत्यादिभ्यः क्विपि संयोगादिलोपः प्रयोजनं स्यादिति वाच्यम्, अल्लोपणिलोपयोः स्थानिवद्भावात्, 'पूर्वत्रासिद्धे न स्थानिव'दित्यस्य संयोगादिलोपे प्रतिप्रसवात्, 'क्वौ लुप्त' मित्यस्य चासार्वत्रिकत्वादित्याहुः। **शेषनारायणस्तु**[1]—'बहूनां समवाये बहूनामेव संयोगसञ्ज्ञा, भाष्येऽविद्यमानमन्तरमेषां, अविद्यमाना अन्तरा एषा'मिति विग्रहद्वयेन बहूनां द्वयोश्च सञ्ज्ञायाः सूत्रेण कोडीकारमुक्त्वा–'एवमपि बहूनामेव प्राप्नोति, यान् हि भवानत्र द्वयोरिति षष्ठ्या प्रतिनिर्दिशति एषामन्येन व्यवायेन भवितव्य'मिति व्यवस्थापनात्, संस्खर्यत इत्यादौ तूक्तरीत्या सामर्थ्याद्द्वयोरेवे'त्याह।

❀ सदाशिवभट्टीयम् ❀

बोध्यम्। **चिन्त्यमेव फलाभावादिति**। ननु मङ्क्ता मङ्क्तुमित्यत्रान्त्यात्पूर्वमिति संयोगादिलोपः फलमस्त्येव, न च जकारे झलि सः, सङीतिवार्तिकेन झलादौ प्रत्यये तद्विधानादिति चेन्न। मस्जोपि मिदन्त्यात्पर एवास्तु, नचैवं मग्न इत्यादौ नलोपानापत्तिरिति वाच्यं, नलोपविधायके एव मङ्क्तेत्युक्त्या दोषाभावात्। यद्वा नुम विधायके एव योगविभागोस्तु, नशो झलि मस्जेः स इति। मस्जेः सकारस्य नुमादेश

❀ विषमपदविवृतिः ❀

श्रवणमिष्टमेव। एवञ्च सति 'त्र्यादिषु वर्णेषु संयुक्ते'ष्वित्याद्यभियुक्तव्यवहारा अपि सङ्गच्छन्ते इत्येषा दिक्। **इति तूचितेति**। अग्भिरित्युक्तावक्प्रत्याहारसंशयापत्तिरिति भावः। वस्तुतस्तु-

१. महाभाष्यटीका-(सूक्तिरत्नाकर-) कर्त्ता।

अज्भिरिति । अत्र कुत्वं न्याय्यम् । अत एव हयवरट्सूत्रे—'अचोऽक्षु' इति भाष्यप्रयोगे कुत्वं दृश्यते । 'स्वैरव्यवहिता' इति तूचिता वृत्तिः । हलः किम् ? तितउदेव । अत्र 'गुरो'रिति प्लुतः स्यात् । अनन्तराः किम् ? द्रप्सम् ? अत्र सकारमकारयोः संयोगत्वे 'स्को'रिति लोपः स्यात् ।

❀ **चिदस्थिमाला** ❀

भावः । चोऽभावादित्यग्रे योज्यः । द्वयोरकरणे तु गोमान्करोतीत्यादौ संयोगान्तलोपो न स्यादित्यादि बोध्यम् । अत्र प्रयोगे अकः प्रयोगभ्रमवारणायाह—**त्रेचेति** । **तितउदेवेतीति** । तितउना दीव्यतीत्यर्थः । अत्र हल्ग्रहणाभावे इति अनन्तरा इति आवश्यकं बहुव्रीहिणा च समूहस्यैव ग्रहणे मानाभावादज्झल्समूहस्य 'तउ' इत्यस्यापि संयोगसञ्ज्ञायां तत्र परे तीतिकारस्य 'गुरो'रिति प्लुतापत्तिस्तदाह—**अत्रेदि** । यदि तु अच एवान्यपदार्थत्वेन गृह्यन्ते इति दुराग्रहस्तर्हि 'तितउभ्या'मित्यादौ संयोगान्तलोपापत्तेर्झल्ग्रहणापकर्षपक्षेऽभावेन कौस्तुभाद्युक्ततत्त्यागेऽपि 'राम अइउणं पश्ये'त्यादौ दोषो बोध्यः। कौस्तुभदण्ड्याद्युक्ते 'पनस' मित्यादौ 'स्को'रित्यत्र 'झलो झली'त्यतो झलीत्यनुवृत्तिपक्षेऽपि सिद्धान्ते तयोर्झलः परयोर्लोपविधानेन दोषाभावादाह—**द्रप्समिति** । सिद्धान्ते तु तत्र तदसम्बन्धेन तदपि प्रत्युदाहरणं बोध्यम् । इदं यथाश्रुते बोध्यं, यदि तु बहुवचनेनैवोक्तार्थलाभस्तदा समूहसञ्ज्ञार्थमेवे-

❀ **ज्योत्स्ना** ❀

अत्र पक्षे तु वक्ष्यतेः क्विपि 'क्वौ लुप्त'मिति स्थानिवत्त्वनिषेधात्सकारस्य संयोगादिलोपो बहूनां सञ्ज्ञायाः फलं बोध्यमित्यलम् । **कुत्वं न्याय्यमिति** । अत्र वदन्ति—'न मुन' इत्यत्र 'ने' ति योगविभागात्क्वचित्पूर्वत्रासिद्धत्वाभावात्परत्वाज्जश्त्वेनेह कुत्वबाधः, जश्त्वोत्तरं तु न कुत्वं, सकृद्गतिन्यायात् । यद्वा-गव्यूतिशब्दे वलोपाभावार्थं स्वप्रदर्शितरीत्या सञ्ज्ञात्वभङ्गापत्तेर्न कुत्वं, सति तस्मिन्सञ्ज्ञान्तरत्वप्रतीतेस्तत्प्रच्छादनात् । अत एवा'ल्पाच्तर'मित्यादिनिर्देशाः सङ्गच्छन्ते । 'अचोऽक्षु' इति भाष्ये तु तुल्यजातीयांस्तुल्यजातीयेषूपदिशतीति पूर्वं प्रक्रान्तत्वात् हलो हल्ष्वित्युत्तरग्रन्थेनैकधर्मावच्छिन्नानां तेषां ग्रहणौचित्याच्च सञ्ज्ञान्तरप्रतीत्यभावेन तदप्रच्छादनात्कुत्वमिति । केचित्तु सञ्ज्ञापूर्वकस्य विधेरनित्यत्वादेवमादौ कुत्वं नेति व्याचक्षते ।

प्लुतः स्यादिति । प्रत्येकं संयोगसञ्ज्ञापक्षे उकारे संयोगे परतः पूर्वतकारस्येत्यर्थः। समुदितानां संज्ञेति पक्षे त्वत्रैव संयोगान्तलोपस्योपलक्षणमिति बोध्यम् । यत्तु 'हल्ग्रहणाभावेऽज्झल्समुदायस्य संयोगसञ्ज्ञाविधानात्तस्मिन्परतस्तिशब्देकारः प्लुतः स्यादिति समुदितानामिति पक्षेपीदं चोद्यं सम्यगेवे'ति, तन्न, अनन्तरा इत्युक्तेर्विजातीयव्यवधौ तदनिष्टेः, विजातीयेनाव्यहिता अचो हलो वा संयोगसञ्ज्ञाः स्युरिति सूत्रार्थादिति दिक् । **द्रप्समिति** । 'द्रप्सं दधि घनेतर' दित्यमरः । भाष्ये तु 'पनस' मित्युदाहृतं तदिह किमर्थमुपक्षितमिति चिन्त्यम् । यत्तु बृहच्छेखरे 'स्कोरिति

❀ **सदाशिवभट्टीयम्** ❀

इत्यर्थः, भ्रस्जो रोपधेत्यत्रेव सकारस्य निवृत्तिरिति बोध्यम् । **प्लुतः स्यादिति** । यत्तु **पाठकः**—'समुदितानामिति पक्षेपीदञ्चोद्यंसम्यगेवे' त्यन्तमनूद्य तत्रानन्तरा इत्युक्तेर्विजातीयव्यवधौ तदनिष्टेरिति, तच्चिन्त्यं, तकाराकारोकारयोर्व्यवधानाभावात् । तितउ इन्द्र इत्यादावसंहितया निर्देशे 'अउ' इत्यनयोः संयोगसञ्ज्ञावारणेनानन्तरा इत्यस्य सार्थक्याच्च । **द्रप्समिति** । भाष्ये तु 'पनस'मित्युदाहृतं, झलपदानुवृत्त्या झलन्तसंयोगादे-

❀ **विषमपदविवृतिः** ❀

'अल्पाच्तरं' 'नाज्झलौ' 'अजादी गुणवचनादेव' 'ऊकालोज्झस्व''उपदेशे ऽजनुने'त्यादिनिर्देशेनाचपदेन पदान्ते कुत्वाभावकल्पनेनादोषात्, सुप्प्रत्ययपरतस्तु कुत्वं भवत्येव, 'अक्षि्व'ति भाष्यप्रयोगात् । अत एवाचसन्धिग्रहणेन ग्रहणमच्कार्याणि यथा स्युरित्यादयो भाष्यकाराणामभियुक्तानां च प्रयोगा उपपद्यन्ते । **तितउदेवेति** । इदं प्रत्येकं सञ्ज्ञापक्षे, समुदाये संयोगसञ्ज्ञायां तु

संयोगे गुरु। 'भेत्ते'त्यादौ गुणस्तु क्नोः कित्त्वसामर्थ्येन भूतपूर्वलघूपधग्रहणाद्बोध्यः। **इति सञ्ज्ञेति**। प्रथमाध्यायस्थानां सन्धिकार्योपयोगिनीनां सञ्ज्ञानां प्रकरणमिति=समाप्तमित्यर्थः। तेनाम्रेडितप्रगृह्यभसञ्ज्ञालोपसञ्ज्ञाद्यनुपन्यासेऽपि न क्षतिः।

❀ अभिनव-चन्द्रिका ❀

धानशून्यत्त्वस्य सत्त्वेन तयोः संयोगसञ्ज्ञायां बाधकाभावात्। **भूतपूर्वलघूपधेति**। **स्यादेतत्**–, भूतपूर्वेति लघौ विशेषणमुत लघूपधांशे? नाद्यः, गुतेत्यादौ गुणापत्तेः। नाप्यन्त्यः, इन्दाञ्चकारेत्यादौ गुणापत्तेरिति चेन्मैवं, क्नोः कित्वेन प्रकृत्यवयवप्रत्ययावयवोभयारब्धसंयोगनिमित्तिका गुरुसञ्ज्ञा लघुसञ्ज्ञां न बाधत इति कल्पनेनादोषात्। अन्येतु क्नोः कित्त्वेन प्रत्ययोपदेशकाले यो लघूपधस्तस्यैको गुण इति भेत्तेत्यादौ न दोषः। न च तोतोर्ति-मोमोर्तीत्यादौ 'राल्लोप' इति

❀ चिदस्थिमाला ❀

तत्, वस्तुतत्वं तु **प्रभातो**ऽवगन्तव्यमिति बोध्यम्। ननु भिद् तेत्यवस्थायां गुरुत्वात्कथं गुणोऽत आह—**भेत्तेत्येति**। ननु अन्यत्र साम्प्रतिके सति अत्र तदाश्रयणमयुक्तमत आह—**क्नोरिति**। **लघूपधेति**। भूतपूर्वलघूपधस्यापि ग्रहणादित्यर्थः। **सन्धीति**। आद्यव्यावर्त्यमाह—**आम्रेडितेति**। द्वितीयव्यावर्त्यमाह—**प्रगृह्येति**। क्रमस्य विवक्षितत्वान्न भस्य पूर्वनिपातः। 'अष्टाध्यायीसूत्रविहिते'त्यादिः। उभयसन्धानप्रयुक्तविलक्षणानन्यथासिद्धकार्यासाधारणकारणानामित्यर्थः। यत्तु लोपसञ्ज्ञा नोपन्यस्ता, अन्वर्थत्वादेवार्थबोधेन शक्यग्राहकत्वात्, सूत्रन्तु प्रसक्तादर्शनस्यैव सा यथा स्यादित्येतदर्थमिति, तन्न, अतिप्रसङ्गापत्तेरतः पृथगाह–**लोपेति**। आदिना वृद्धसञ्ज्ञादिपरिग्रहः। न क्षतिः=न न्यूनता। तथा च सञ्ज्ञा-

❀ ज्योत्स्ना ❀

सूत्रे पञ्चम्यन्तस्य झल इत्यनुवृत्तिपक्षे झलः परयोः स्कोर्लोप इत्यर्थात्पनसमित्यत्र तदप्राप्तेर्द्रप्समित्युदाहरण' मित्युक्तं, तन्न, 'भ्रष्टः' 'शक्ते'त्यादौ लोपाप्रसङ्गात्, फलाभावाच्च। 'संयोगान्तस्य लोप' इति सूत्रे भाष्यकैयटानुरोधात्तु झल इति षष्ठ्यन्तानुवृत्तिस्तत्रेति लभ्यते। फलन्तु 'काक्यर्थं, वाश्यर्थमित्यत्र संयोगादिलोपाभावः, संयोगादिलोपलत्वे'त्यत्र च संयोगादिलोपग्रहणं न कर्त्तव्य मिति पक्षे परं 'पनसा'दित्युदाहरणीयमिति तु वक्तव्यम्। **भूतपूर्वलघूपधग्रहणादिति**। वस्तुतः समप्रवृत्तया गुरुसञ्ज्ञया लघुसञ्ज्ञाया बाधेऽप्यन्तरङ्गायास्तस्या बाधे मानाभावो 'ऽपवादो

❀ सदाशिवभट्टीयम् ❀

लोपविधानेन प्रकृते तद्वारणे तु सदित्यादौ तदापत्तिर्बोध्या। **कित्वेनेति**। 'अपवादोपी'ति न्यायस्य तु नायं विषयः, अपरनिमित्तकत्वेन सर्वत्रैवान्तरङ्गत्वादन्यत्र चारितार्थ्याभावात्। **भूतपूर्वलघूपधेति**। भूतपूर्वो यो लघुस्तदुपधेत्यर्थः। धर्मिग्राहकमानेन लघुत्वांशेप्युपधात्वेपि तदाश्रयणे मानाभावात्। **एतेन** कुण्डति व्युच्छतीत्यादावागमप्रवृत्तेः पूर्वं लघुत्वसत्त्वादङ्गविशेषणत्वेनुमितस्य गुणापत्तिरित्य**पास्तम्**। नचैवमपि हरिमेतीति हरीत्, स इवाचरति हरीततीत्यादावतिप्रसङ्ग एवेति वाच्यं, हलन्तेभ्य आचारक्विपोऽनभिधानात्, भौतपूर्विकलघुत्वाश्रयणेपि स्थानिद्वारकतदाश्रयणे मानाभावाच्च। **सन्धिकार्येति**। टिसञ्ज्ञा तु न तथा, तत्र

❀ विषमपदविवृतिः ❀

वाच्ये संहिताया अविवक्षायां तितउ आगच्छेत्युदाहर्तव्यम्। न च संहिताया अविवक्षायां सन्निकर्षाभाव इति वाच्यम्, एवमपि 'तितओ इती'त्युदाहरणसम्भवात्। अत्र हि 'सम्बुद्धौ शाकल्यस्ये'ति प्रगृह्यत्वम्। **लोपसञ्ज्ञेति**। यद्यपि (लोपसञ्ज्ञा) 'एतत्तदो' 'रोरी'त्यादिसन्धिकार्योपयोगिनी लो०-

'अ अ' इत्याद्युपन्यासस्तु प्रासङ्गिकः ॥ इति सञ्ज्ञाप्रकरणम् ॥

❀ अभिनव-चन्द्रिका ❀

लोपे प्रत्ययोपदेशकाले लघूपधत्वाभावाद्गुणो न स्यादिति वाच्यं, यङ्लुकश्छान्दसत्वेन छन्दस्यापाद्यमानरूपाभावात् । न चैवमपि तुर्विधातोर्वनिपि 'लोपो व्यो'रिति लोपे तोर्वेत्यादौ गुणो न स्यात्प्रत्ययोपदेशकाले लघूपधत्वाभावादिति वाच्यं, 'लोपो व्यो'रिति सूत्रे वकारप्रत्याख्यानपरभाष्यप्रामाण्येन एतेषामनभिधानादित्याहुः । 'भूतपूर्वो यो लघुस्तदुपधस्येत्येवार्थः' न च गुतेत्यादौ गुणश्शङ्क्यः, 'गाङ्कुटादिभ्य'इत्यत्र विहितविशेषणस्वीकारेण डादेशस्य ङित्वात्क्ङिति चे'ति निषेधादिति **परे** । ❀ **इति सञ्ज्ञाप्रकरणम्** ❀

❀ चिदस्थिमाला ❀

नामैवेदं प्रकरणमित्यर्थो न तु सञ्ज्ञानामिदमेवेतीति बोध्यम् । एतेन 'अइउणि'त्याद्युपन्यासोऽयुक्त इत्यपास्तं, तेषां सञ्ज्ञासूत्रत्वस्य प्रागुक्तत्वाच्चेति दिक् । ❀ **इति सञ्ज्ञाप्रकरणम्** ❀

❀ ज्योत्स्ना ❀

यद्यन्यत्रे' ति न्यायादन्तरङ्गस्य परेण बाधनाच्च न परत्वेनापि स इति तत्त्वम् । **न क्षतिरिति** । सौत्रसन्ध्युपयोगिनीनामित्यपि विशेषणीयम् , एतेन शकन्ध्वादिपररूपोपयोगिन्याम्रिसञ्ज्ञाया अनुक्त्या दोष तादवस्थ्यमिति प्रत्युक्तम् । ❀ **इति सञ्ज्ञाप्रकरणम्** ❀

❀ सदाशिवभट्टीयम् ❀

टिपदानुक्तेरिति शिवम् । ❀ **इति शेखरविवृत्तिसंग्रहे सञ्ज्ञाप्रकरणम्** ❀

❀ विषमपदविवृतिः ❀

सञ्ज्ञा । यदि च सन्धिकार्ये कार्यितया निमित्ततया वा नोपयोगिनी सा सञ्ज्ञेति ब्रूषे, तर्हि वृद्धिसञ्ज्ञापि न तथेति वक्तव्या, भवति च 'सोचि लोपे चेत्' 'ढ्रलोप'इत्यनयोर्लोपसञ्ज्ञापि निमित्ततयोपयोगिनी । किञ्च—लघुसञ्ज्ञा न कथञ्चिदपि सन्धिकार्योपयोगिनी । यदि च गुरुसञ्ज्ञाबाध्यतया तदुपन्यासस्तर्हि पदसञ्ज्ञाबाधकतया भसञ्ज्ञाऽप्युपन्यस्यताम् । किञ्च—'स्वादि'ष्विति पदसञ्ज्ञापि माभ्यामित्यादौ सन्धिकार्योपयोगिनीति तदनुपन्यासान्न्यूनता, एवं टिसञ्ज्ञाया अनुपन्यासेनापि न्यूनता, एवं निपातसञ्ज्ञापि न सन्धिकार्योपयोगिनीति सापि न वक्तव्या स्यात् , एवं सम्प्रसारणसञ्ज्ञा—'संप्रसारणाच्चे'ति सन्धिकार्योपयोगिनीति—वक्तव्या, तथापि 'प्रायेण सन्धिकार्योपयोगिनीनां सञ्ज्ञानां प्रकरणं प्रायेण समाप्त'मित्यर्थान्न कश्चिद्दोषः । शेखरोक्तविशेषणे तु व्यर्थ एव तद्दानेप्यननुगमादिति सर्वेष्टसिद्धिः ।

❀ **इति विषमपदविवृतौ शेखरव्याख्यायां सञ्ज्ञाप्रकरणम्** ❀

इको गुण । परिभाषेयं—व्याख्यानात् । **गुणवृद्धिशब्दाभ्यामिति** । गुणवृद्धिग्रहणानुवृत्त्यैव सिद्धे पुनर्गुणवृद्धिग्रहणसामर्थ्यादिति भावः । अनुवर्त्तमानञ्च सञ्ज्ञिपरमेव स्यात्; सञ्ज्ञाकरणेनान्यत्र सञ्ज्ञिपरत्वात् । यद्वा—तदप्यनुवर्त्य गुणो वृद्धिरिति

❀ अभिनव-चन्द्रिका ❀

अथ परिभाषाप्रकरणम् । **व्याख्यानादिति** । 'नापि तच्छेषो नापि तदपवादो अन्यदेवेदं परिभाषान्तरमसम्बद्धमनया परिभाषये'ति प्रकृतसूत्रस्थभाष्यादिति भावः । **सामर्थ्यादिति** । तेन च अदेङ्निष्ठविधेयताप्रयोजकगुणपद—आदैज्निष्ठविधेयताप्रयोजकवृद्धिपदै—तदन्यतरघटिते शास्त्रे 'इक' इति षष्ठ्यन्तपदमुपतिष्ठत इत्यर्थः स्वीक्रियते । विधेयतायामदेङ्निष्ठत्व-आदैज्निष्ठत्वविशेषणदानाद्गुणवृद्धिसञ्ज्ञासूत्रयोर्नास्याः प्रवृत्तिः । विधेयत्वनिवेशा'दतो गुणे'वृद्धिर्यस्याचा'मित्यादौ नास्याः प्रवृत्तिः, पदनिवेशा'त्त्यदादीनामः, 'पथिमथ्यृभुक्षामात्' इत्यादौ नास्याः प्रवृत्तिः ।

सञ्ज्ञिपरमेव स्यादिति । यस्मात्तदनुवर्तते तदीयविधेयतावच्छेदकरूपेतररूपावच्छिन्न-

❀ चिदस्थिमाला ❀

इको गुण । नेदं सञ्ज्ञासूत्रं, सञ्ज्ञयोः कृतत्वात्, असम्भवाच्च । नापि विधिः, तत्तद्विधिवैयर्थ्यापत्तेः, पूर्वोत्तरसाहचर्येण परशास्त्रोपकारकत्वनिर्णयाच्च । नापि नियमः, वाक्यभेदापत्तेस्तथा सति तत्प्रकरणे पाठौचित्याच्च । नाप्यतिदेशः, असम्भवात् । नाप्यधिकारः, तथा सती'क्को गुणवृद्धी ने'ति पाठौचित्यात्, 'प्रत्ययः' 'परश्चे'त्यादौ तु विधेयभेदायुक्तो विभागः, 'एकाचो द्वे'इत्यादावुद्देश्यभेदाद्यथा, अतः पर्यवसितमाह—**परीति** । **व्याख्येति** च । **गुणवृद्धिग्रहणसामर्थ्यादिति** । भाष्यानुरोधेनाह—**गुणेति** । **सामर्थ्यादिति** । 'शब्दव्यापाराश्रयणमिति मूलोक्तं फलित'मिति शेषः । नन्वनुवृत्त्या न सिद्धिस्तयोस्तत्र शब्दपरत्वादत आह—**अनुवर्तेति** । शब्दाधिकारादिति भावः । **करणेनान्यत्रेति** । तद्धेतोस्तत्सूत्रादन्यत्रेत्यर्थः । मन्दमत्यनुग्रहायाग्रिमभाष्यानुरोधेनासताप्यवयवार्थेन व्युत्पादनवदाह—**यद्वेति** । तदपि=गुणवृद्धिग्रहणम् । **गुणो वृद्धिरितीति** । 'इत्येव'मित्यध्याहृत्य गुणो वृद्धिरित्येवं ये गुणवृद्धी

❀ ज्योत्स्ना ❀

परिभाषेयमिति । न तु विधिः, तत्तद्विधीनां वैयर्थ्यापत्तेरिति भावः । **इति भाव इति** । अस्मिन्पक्षे गुणवृद्धिपदस्य गुणवृद्धिशब्दबोध्याकारादिषु लक्षणेति भावः । ननु पूर्वसूत्रयोर्गुणवृद्धिपदस्य सञ्ज्ञापरत्वादनुवृत्तावपि सञ्ज्ञिबोधनार्थमुपक्षीणस्येहत्यगुणवृद्धिपदस्य सामर्थ्याभावात्कथं लक्षणेत्यत आह—**अनुवर्त्तमानञ्चेति** । **यद्वेति** । अस्मिंस्तु पक्षेऽनुवर्त्तमानगुणवृद्धिपदस्य वाक्येऽन्वयप्रवेशसिध्यर्थं 'हन्तीति पलायत'इत्यादौ हेत्वर्थकतया दृष्टस्येतिशब्दस्याक्षेपपूर्वकमर्थ-

❀ सदाशिवभट्टीयम् ❀

इको गुण । विधित्वेपि 'मिदेर्गुण' इत्यादीनामनिकि विधानेनो**र्गुण** इत्यादीनां नियमार्थत्वेन च चारितार्थ्यसम्भवादाह—**व्याख्यानेति** । **सामर्थ्यादिति** । तेन तत्पदविहितयोर्लक्षणा बोध्या । स्वबोध्ये तु नेयं, 'त्यदादीनाम'इत्यादौ दोषात् । **सञ्ज्ञिपरमेवेत्यादि** । शब्दाधिकार इति भावः । इदञ्च गुणवृद्धिपदा-

❀ विषमपदविवृतिः ❀

इको गुण । **सञ्ज्ञाकरणेनेति** । 'वृद्धिरादै'जिति सूत्रे'ऽदेङ् गुण'इति सूत्रे च वृद्धिगुणसञ्ज्ञयोः सञ्ज्ञिविशेषे सङ्केतकरणेनान्यत्रोच्चारिताभ्यां ताभ्यां सञ्ज्ञिन एव प्रतीतेरित्यर्थः । पूर्वं सञ्ज्ञाशास्त्राप्रणयनात्—सञ्ज्ञासूत्रे सञ्ज्ञाशब्दस्य शब्दस्वरूपपरत्वेपि ततोऽन्यत्र सञ्ज्ञित्वमेव, सञ्ज्ञिविशेषे ततः पूर्वं शक्तिग्रहात् । **तदप्यनुवर्त्येति** । गुणवृद्धिग्रहणमनुवर्त्येत्यर्थः । अनुवर्तमानञ्च

२३

योजनयैतल्लाभः । 'स्वादिषु' इति सूत्रेऽनुवृत्त'पद'पदस्य सञ्ज्ञापरताया एव दृष्टत्वात् । 'ष्णान्ते'ति सूत्रे सङ्ख्यापदस्य तदन्तत्वासम्भवादर्थपरतेति बोद्ध्यम् । लक्षणप्रतिपदोक्त-

ॐ अभिनव-चन्द्रिका ॐ

विधेयताके सञ्ज्ञिपरमेव स्वादिरित्यर्थः । तेन 'स्वादिष्वि'तिसूत्रेऽनुवर्तमानपदपदस्य सञ्ज्ञा-शब्दपरत्वेपि न क्षतिः । तत्र 'सुप्ति'ङितिशास्त्रीयविधेयतावच्छेदकरूपेतररूपावच्छिन्नविधेयताकत्व-

ॐ चिदस्थिमाला ॐ

इति शब्दयोजनयेत्यर्थः । एतल्लाभः=तृतीयान्तघटितमौलवाक्यार्थलाभः । ननूक्तरीत्या तयोरत्रानुवृत्तयोरर्थपरत्वात्कथमयं वाक्यार्थोऽत आह—**स्वादीति** । उचितार्थाधिकारानुरोधादिति भावः । तथा चोक्तनियमस्तत्त्वावच्छिन्नादन्यत्रोपात्ततज्जातीयशब्दान्तरविषयक इति बोध्यम् । नन्वेवं क्वचिद्दोषापत्तिरप्यत आह—**ष्णान्तेतीति । तदन्तत्वेति** । षान्तत्वनान्तत्वेत्यर्थः । एतेनानुवृत्तयोस्तयोरसमस्तयोरेकवचनान्तयोर्द्विवचनान्तसमस्तैकदेशभूतगुणवृद्धिविशेषणत्वासम्भवेन शाब्दमूलोक्तपक्षासम्भवः, 'न हि भवति चैत्र-मैत्रौ दण्डी स्रग्वी'ति चिन्त्यमिदमित्यपास्तम् । अत्रत्यं तत्त्वं **छायातो** बोध्यम् । यत्तु—'विभाषा दिक्समास' इति सूत्रव'ल्लक्षणे'तिन्यायेन निर्वाह इत्यनुवृत्त्यैव सिद्धे गुणवृद्धिग्रहणं चिन्त्यप्रयोजनमिति प्राञ्चः, तत्खण्डयति—**लक्षणेति** । तत्र=परिभाषायां । 'गातिस्थे'त्यादौ 'पै'इत्यस्याग्रहणायाह—**साक्षादुच्चेति** । 'विभाषा दिक्-

ॐ ज्योत्स्ना ॐ

पदार्थकेहत्यगुणवृद्धिपदेनान्वय इति विशेषः । गुणवृद्धिपदहेतुकार्थोपस्थितिविषये गुणवृद्धी इत्येवं हि तदार्थः । **गुणो वृद्धिरिति योजनयेति** । इतिशब्दस्य गुणवृद्धिपदाभ्यामुभाभ्यामन्वयः, गुण इति, वृद्धिरिति च योजनयेत्यर्थः । भाष्योक्तं व्यवस्थापयितुं परानुसारिबृहच्छेखरोक्तिं दूषयति—**लक्षणप्रतिपदोक्तपरिभाषयात्विति** । 'साक्षादुच्चरितस्ये'त्यर्थकरणे प्रयोजनं—'गातिस्थाघुपे'त्यत्र साक्षाद्धातुपाठपठितस्य 'पा पाने' इत्यस्य ग्रहणं भवति न तु 'पै शोषणे' इत्यस्य कृतात्वस्य । 'साक्षात्तत्तच्छब्दानुवादेन विहितस्ये'त्यर्थकरणस्य फलं—'विभाषा दिक्समासे बहुव्रीहा'-

ॐ सदाशिवभट्टीयम् ॐ

नुवृत्तिमभिप्रेत्य । अदेङादैच्पदानुवृत्तिकरणे त्वर्थाधिकारेणापीष्टसिद्धिरिति बोध्यम् । **योजनयेति** । इतेः प्रत्येकमन्वयः, उच्चार्येति शेषः, तस्य च विधानेऽन्वयः । अतो न द्वन्द्वाऽसाधुत्वं, गुणो गुणो वृद्धिर्वृद्धिरिति योजने तु तत्त्वं स्यात् । एतल्लाभः=तृतीयान्तघटितमौलवाक्यार्थलाभः। ननूक्तरीत्या तयोरत्रानुवृत्तयोरर्थपरत्वात्कथमयं वाक्यार्थोऽत आह—**स्वादीति** । उचितार्थाधिकारानुरोधादिति भावः । तथा चोक्तनियमस्तत्त्वावच्छिन्नादन्यत्रोपात्ततज्जातीयशब्दान्तरविषयक इति बोध्यम् । नन्वेवं क्वचिद्दोषापत्तिरप्यत आह—**ष्णान्तेतीति । तदन्तत्वेति** । षान्तत्वनान्तत्वेत्यर्थः । **एतेनानुवृत्तयोरसमस्तयोरेकवचनान्तयोर्द्विवचनान्तसमस्तैकदेशभूतगुण-वृद्धिविशेषणत्वासम्भवेन शाब्दमूलोक्तपक्षासम्भवः, नहि 'भवति चैत्रमैत्रौ दण्डी स्रग्वी'तीति—चिन्त्यमिदमित्य**पास्तम्** । अत्रत्यं तत्त्वं छायातो बोध्यम् । यत्तु 'विभाषा दिक्समास'इति सूत्रवल्लक्षणेति न्यायेन निर्वाह इत्यनुवृत्त्यैव सिद्धे गुणवृद्धिग्रहणं चिन्त्यप्रयोजनमिति **प्राञ्चस्**तत्खण्डयति—**लक्षणेति** । तत्र=परिभाषायाम् ।

ॐ विषमपदविवृतिः ॐ

शब्दस्वरूपपरमर्थाधिकारानुरोधादिति भावः । पूर्वं गृहीतशक्तिकस्य न शब्दस्वरूपपरत्वं, किन्तु यत्रार्थे सङ्केतस्तत्परत्वमेवेति नियमादिदमप्ययुक्तमित्याशङ्क्य स नियमोऽप्यसिद्ध इत्याह—**स्वादिष्विति** । नियमस्तु सञ्ज्ञाशास्त्रायत्र सञ्ज्ञापदमनुवर्तते तद्भिन्नस्थल एवेति भावः । ननु सञ्ज्ञासूत्रादनुवर्त्तमानसञ्ज्ञापदस्यार्थाधिकारानुरोधाच्छब्दस्वरूपपरत्वाङ्गीकारे 'ष्णान्ते'ति सूत्रे—

परिभाषया तु नात्र निर्वाहः। तत्र 'प्रतिपदोक्तस्ये'त्यस्य–साक्षादुच्चारितस्येति, साक्षात्तत्तच्छब्दानुवादेन विहितस्येति वाऽर्थात्। ध्वनितञ्चेदमत्रैव भाष्ये। अस्याश्चविधेयसमर्पक-

❀ अभिनव-चन्द्रिका ❀

स्याभावात्। **सन्निपरत्वादिति**। अत्रापि पूर्ववदेवार्थः। **दृष्टत्वादिति**। वस्तुतस्तु पूर्वोक्तदिशा अनुपपत्तेरभावेन पूर्वकल्प एव ज्यायान्। **अर्थादिति**। अयं भावः—प्रतिदोक्तत्वेनाभिमतं यच्छास्त्रं, लाक्षणिकत्वेनाभिमतं च यच्छास्त्रं तादृशशास्त्रद्वयीयविधेयतावच्छेदकरूपावच्छिन्नोद्देश्यताकत्वरूपलक्षणप्रतिपदोक्तपरिभाषालिङ्गस्याभावात्। यत्किञ्चिच्छास्त्रविशिष्टत्वरूपप्रतिपदोक्तत्वस्य चाभावाद्वेति भावः। वै० 'स्वीयोद्देश्यतावच्छेदकरूपावच्छिन्नविधेयताकत्व''स्वीयोद्देश्यतावच्छेदकसमर्पकज्ञानविषयीभूतानुपूर्वीविशिष्टविधेयताकत्वो'भयसम्बन्धेन। वै० 'स्वावच्छिन्नत्व' 'स्वावच्छिन्नप्रयोज्योद्देश्यतानिरूपितत्वै'तदन्यतरसम्बन्धेन। प्रकृते च—'इकोगुणे'तिशास्त्रीयोद्देश्यतावच्छेदकरूपावच्छिन्नविधेयताकत्वस्य 'मिदेर्गुण'इत्यादावभावान्न लक्षणप्रतिपदोक्तपरिभाषया निर्वाह इति ध्येयम्। **विधेयसमर्पकेति**। 'अदेङ्' 'आदैच्'एतदन्यतररूपविधेयसमर्पकेत्यर्थः।

❀ चिदस्थिमाला ❀

समासे''तत्पुरुषे तुल्यार्थे'त्याद्यनुरोधेनाह–**साक्षात्तत्तदिति**। शीघ्रोपस्थितिकत्वेन द्वयोरनुगम इति भावः। **अत्रैव**=इको गुणेत्यत्रैव, गुणवृद्धिग्रहणसामर्थ्यादित्यनेन, अन्यथा तत्रैव निर्वाहे तावत्पर्यन्तगमनं निर्बीजमिति भावः। परिभाषाया लिङ्गवत्त्वनियमादाह—**अस्याश्चेति**। चेना'चश्चे'तिसूत्रसमुच्चयः। तत्रापि तथा वक्ष्यमाणत्वात्। **समर्पकेति**। तत्त्वेन गृहीतेत्यर्थः। एतेन विधीयेते इत्यधिकमित्यपास्तम्।

❀ ज्योत्स्ना ❀

वित्यत्र साक्षाद्दिक्शब्दानुवादेन 'दिङ्नामान्यन्तराल'इत्यनेन विहितस्यैव दक्षिणपूर्वेत्यस्य दिक्समासस्य ग्रहणं, न तु या दक्षिणा सा पूर्वा यस्योन्मुग्धस्येत्यर्थकदक्षिणपूर्वेत्यस्याप्य'नेकमन्यपदार्थे' इत्यनेन विहितस्येति। **इति वार्थादिति**। एवञ्च 'त्यदादीनाम'इत्यादावकारस्य साक्षादुच्चारणेन लाक्षणिकत्वाभावात्परिभाषानुपस्थानमिति भावः। ननु शास्त्रे प्रतिपदोक्तत्वं नाम शास्त्रमात्रसङ्केतितधर्मेण साक्षादुपात्तत्वं, तदभावे तु यथाकथञ्चिदित्याश्रयणादस्तीह परिभाषासञ्चारोऽत आह—**ध्वनितञ्चेदमिति**। अयं भावः-यद्युक्तप्रकारेणेह परिभाषा प्रवृत्त्या 'त्यदादीनाम'इत्यादावति-

❀ सदाशिवभट्टीयम् ❀

गातिस्येत्यादौ पै इत्यस्याग्रहणाय 'साक्षादुच्चरिते'ति।'विभाषा दिक्समासे' 'तत्पुरुषे तुल्यार्थे'त्याद्यनुरोधेनाह—**साक्षात्ततदिति**। शीघ्रोपस्थितिकत्वेन द्वयोरनुगम इति भावः। **साक्षादुच्चारितस्येति**। नन्वेवं सखीमतिक्रान्तोऽतिसखिरित्यादावनङादिकं स्यात्, प्रातिपदिकस्य कुत्रापि साक्षादुच्चारणाभावादिति वाच्यं, 'साक्षादुच्चारितस्ये'त्यस्य गुणैरप्रापितस्येत्यत्र तात्पर्यात्। **इति वार्थादिति**। नचैवं गणयतीत्यादौ 'दीर्घे न स्थानिव'दिति निषेधः स्यात्, वृद्धेरपि दीर्घत्वादिति वाच्यम्, 'अनुस्वारदीर्घज'शित्यत्र पूर्वोत्तरसाहचर्येण तच्छब्दविहितस्यैव तस्य ग्रहणात्, 'ण्यल्लोपा'वितिवार्तिकेऽचीयङादिसाहचर्यादन्यतरोपादाने उभयत्र न स्यादित्युभयोपादानम्। एवं वृद्धौत्वेत्यत्रापि बोध्यम्। **ध्वनितमिति**। अत एव

❀ विषमपदविवृतिः ❀

ऽनुवर्त्तमानसञ्ज्ञापदस्यापि तथात्वापत्तिरित्याशङ्क्याह—**ण्यान्तेति**। **इति वार्थादिति**। 'इति चार्था'दिति युक्तः पाठः। आद्यस्योदाहरणं—'विभाषाप' इति, अन्त्यस्योदाहरणं—'विभाषादिक्समासे'—इति। तत्र हि—दिक्शब्देन दिग्वाचकशब्दाननूद्य विहितसमासस्यैव ग्रहणं, प्रकृते तु 'मिदेर्गुण'इत्यादावपि गुणशब्देन गुणसञ्ज्ञकाननूद्य न कश्चिद्विहित इति न प्रतिपदोक्तपरिभाषावसर इति भावः। ननु लाक्षणिकत्वं विलम्बोपस्थितिकत्वं, प्रतिपदोक्तत्वं च झटित्युपस्थितिकत्वम्, 'त्यदादीनाम' इति च न झटित्युपस्थितिकं, गुणशब्देनाकारादेरविधानादित्युक्तपरिभाषायैवोक्तार्थिकया निर्वाहे तस्या भवदुक्तार्थो नोचित इत्याशङ्क्याह—**ध्वनितञ्चेति**। तत्र

गुणवृद्धिपदश्रुतिर्लिङ्गं तदाह—**विधीयेते इति**। अत एव 'अतो गुणे' 'वृद्धिर्यस्ये' त्यादौ न दोषः । एतेन—'शब्दपरयोः पूर्वयोर्गुणवृद्धिपदयोरनुवृत्त्या यत्र ते पदे तत्रेदमुपतिष्ठते इत्यर्थेन 'त्यदादीनामः' इत्यादिव्यावृत्तौ सिद्धायामिह गुणवृद्धीति

❀ **अभिनव-चन्द्रिका** ❀

अत एव 'वृद्धिरादैजदेङ्गुण'इत्यादौ नास्याः प्रवृत्तिः। न चैवमपि 'ओर्गुण'इत्यादौ एतत्प्रवृत्तिर्दुर्वारैवेति वाच्यं,'अचो ञ्णिती'त्यत्र अज्ग्रहणसामर्थ्येन वर्णरूपस्थानिनो यत्र निर्देशस्तत्र नेयमुपतिष्ठत इति कल्पनेनादोषात्। न चैवं 'पुगन्तलघूपधे'त्यत्र एतत्परिभाषानुपस्थितिप्रसङ्गः, भिनत्तीत्यादौ गुणवारणाय पुकि अन्तः पुगन्तः, लघ्वी चासौ उपधा च लघूपधा, पुगन्तश्च लघूपधा च पुगन्तलघूपधं, तस्य पुगन्तलघूपधस्येत्यर्थस्य शेखरे भाष्ये च कृतत्वेन वर्णरूपस्थानिनोनिर्देशादिति चेन्न । 'अचो ञ्णिती'त्यत्राऽज्ग्रहणसामर्थ्येन अच्त्वव्याप्यधर्मपुरस्कारेण यत्र वर्णरूपः स्थानी निर्दिश्यते तत्र नेयमुपतिष्ठत इति कल्पनेनोपधात्वस्याऽच्त्वाव्याप्यत्वाभावात्। पुगन्ते'तिसूत्रे बहुव्रीहिस्वीकारात्, समाहारद्वन्द्वस्य तच्छेषपक्षोपपादनावसरे एव भाष्ये उक्तत्वेनादोषाच्च।

न चैवं 'वाह ऊठि'तिसूत्रस्थज्ञापकपरभाष्यासङ्गतिः 'नाजानन्तर्ये'इतिनिषेधेन स्वांशे चारितार्थ्याभावादिति वाच्यं, व्यञ्जनव्यवधानेऽपि अन्यानन्तर्याभावेन 'नाजानंतर्य'इत्यस्याप्रवृत्तेरिति दिक्। 'विधौ परिभाषोपतिष्ठते नानुवादे' इति परिभाषाया प्रधानविधिसंस्कारे कर्तव्ये यावती परम्परा नाप्राप्ता ततोऽधिकपरम्परा परिभाषाप्रवृत्तिं न प्रयोजयतीति यावत्। ननु '**मिदेर्गुण**'इत्यादि-

❀ **चिदस्थिमाला** ❀

इत्यादावितिस्यानुवादे इति शेषः। एतेन=अनुवादनिरासार्थं तत्त्वेन गृहीतस्यैव लिङ्गत्वेन तदर्थमर्थपरयोस्तयोः सूत्रे आवश्यकत्वेन तत एव हि तदध्याहारः, अन्यथा स एव न स्यादिति भावः। **पूर्वयोः**=तत्सूत्रस्थयोः । तत्रेदम्=इक इति पदम्। **वृद्धीतीति**। शब्दपरत्वात्प्रगृह्यत्वादि न। 'प्रकृति-

❀ **ज्योत्स्ना** ❀

व्याप्तिपरिहारः कृतः स्यात्स्यादेव भाष्यकृत्कृतगुणवृद्धिपदानुवृत्तिवैयर्थ्यमिति साक्षादुच्चारणं यथा

❀ **सदाशिवभट्टीयम्** ❀

'क्तोऽधिकरणे चे'त्यादि विहिते क्ते निष्ठाप्रयुक्तकार्यं, 'लटःशतृ'विहितयोः सत्कार्यं, शालादौ वृद्धकार्यं, 'पचन्ती'त्यादौ गुणकार्यम्। तत्रादिशब्देन 'यणो मय'इति रेफस्य द्वित्वं, दीर्घपदाविहितेपि शालादीनामाकारे 'दीर्घं चे'ति गुरुत्वं, ह्रस्वपदाविहितेपि देवदत्तादिपदघटकह्रस्वे 'संयोगे गु'र्विति गुरुत्वञ्च

❀ **विषमपदविवृतिः** ❀

चेत्थं भाष्यं—'सञ्ज्ञाविधाने नियमः, सञ्ज्ञया ये विधीयन्ते तेषु नियमः, किं वक्तव्यमेतत्? न हि कथमनुच्यमानं गंस्यते ?, गुणवृद्धिग्रहणसामर्थ्यात्,तथाच द्यौः, पन्था, स, इममित्यादौ न दोष'इति। यदि चोक्तपरिभाषया निर्वाहः स्यात्तदा सञ्ज्ञया विधाने इत्युक्तप्रकारोऽनर्थकः स्यात्, तेन मन्यामहे लक्षणप्रतिपदोक्तयोर्भेदुक्त एवार्थौ भाष्यकृतोऽभिप्रेत इति। **तदाहेति**। 'गुणवृद्धिशब्दाभ्यां यत्र गुणवृद्धी विधीयेते' इत्यस्य 'गुणवृद्धी भवत इत्यर्थके गुणवृद्धिपदे यत्र श्रूयेते' इत्यर्थ इति भावः। एवमचश्चेत्यत्रा'प्य ज्भवतीत्यर्थकानि ह्रस्वदीर्घपदानि यत्र श्रूयन्ते'इत्यर्थः। **एतेन**-गुणवृद्ध्योर्लक्ष्ये विधाने न तत्रेक्पदोपस्थितिः स्यादित्यपास्तम्। **अत एवेति**। तथा च

व्यर्थम्' इत्यपास्तम् । एतन्मूलक एव 'विधौ परिभाषोपतिष्ठते नानुवादे' इत्युद्घोषः । एवञ्च पदोपस्थापकपरिभाषाविषये 'विधीयते' इत्यस्यैवाध्याहारो बोद्ध्यः। एवञ्च 'तस्मिन्निति निर्दिष्टे' 'षष्ठीस्थाने' इत्यादेरनुवादेऽपि प्रवृत्तिः । तेन 'प्रत्ययस्थात्कात्पूर्वस्य' 'उदात्तस्वरितयोर्यणः' इत्यादौ न दोषः । 'उदीचामातः स्थाने' इति स्थानेग्रहणन्तु स्पष्टार्थ-

ॐ अभिनव-चन्द्रिका ॐ

वाक्यार्थबोधमन्तरा 'इकोगुणवृद्धी' इतिशास्त्रीयोद्देश्यतावच्छेदकधर्मप्रकारकज्ञानं न सम्भवति । एतत्परिभाषावाक्यार्थबोधमन्तरा च विधिवाक्यार्थबोधो न सम्भवतीत्यन्योन्याश्रय इत्याशङ्क्याह—**विधेयसमर्पकत्वनिर्णय इति** ।

ॐ चिदस्थिमाला ॐ

व' दिति त्वनित्यमिति भावः । ननु विधाविति तन्न्यायेनैव निर्वाहे इदं व्यर्थमत आह—**एतदिति** । तत्त्वेन गृहीतायास्तस्या लिङ्गत्वेत्यर्थः । एतेन तस्याः स्वातन्त्र्येण परिभाषात्वनिरासः, अत एव उद्घोष इति विशेष्यमुक्तम् । नन्वेव'मचश्चे'त्यादौ दोष एवात आह—**एवञ्चेति** । तस्य तन्मूलकत्वेनानतिरिक्तत्वे चेत्यर्थः । एवमग्रेऽपि । **परीति** । तद्रूपपरिभाषाविषये इत्यर्थः। **प्रत्ययस्थादिति** । आपीति ककारविशेषणमिति भावः । कात्पूर्वस्येत्यत्राव्यवहितत्वांशसञ्चारोपि बोध्यः । द्वितीयस्य लक्ष्यमाह—**उदात्तेति** । 'तयात्र विधीयते इत्यस्य लाभः, स्थानेग्रहणं च तज्ज्ञापकमिति **दण्ड्याद्युक्त**प्रसङ्गतमिति ध्वनयन्नाह—**उदीचामिति** ।

ॐ ज्योत्स्ना ॐ

कथञ्चिदेव भगवतोऽभिप्रेतमिति । **इत्यपास्तमिति** । एतेन 'विधीयते' इति पदाध्याहारेण वाक्यार्थबोधे इहत्यं गुणवृद्धिग्रहणमेव लिङ्गमिति सूचयति । तदाह—**एवञ्चेति** । अचश्चेत्यत्र तु ह्रस्वदीर्घप्लुत-इत्यनुवृत्त्यैव सिद्धेऽजित्यनुवृत्तिस्तथाध्याहारे लिङ्गमिति बोध्यम् । **स्पष्टार्थमेवेति** । वस्तु-

ॐ सदाशिवभट्टीयम् ॐ

सिध्यति । **अपास्तमिति** । 'विधीयते'इत्यध्याहारे च पुनर्गुणवृद्धिग्रहणमेव मानमिति भावः । नचैवमपि सम्पूर्णपूर्वसूत्रद्वयाऽनुवृत्तिः क्रियते तत्रोभयानुवृत्तिसामर्थ्यादपेक्षितार्थो भविष्यतीति तद्वैयर्थ्यमेवेति वाच्यं, 'विधीयते' इत्यस्याध्याहारेपि यत्र गुणपदमस्ति 'मिदेर्गुण'इत्यादाव'तोगुण'इत्यादौ च,—यत्र चादेङस्ति 'त्यदादीनाम'इत्यादावुभयत्रापि प्रवृत्तिसम्पादनेनोभयानुवृत्तेः सार्थक्यात् । 'अचश्चे'त्यत्र व्याख्यानेन निर्वाहेपि प्रकृते तदाश्रित्य सिद्धप्रत्याख्याने 'नासूये'ति 'पङ्क्तिविंशती'तिसूत्रभाष्योक्त्या न चमत्कारकारी ।

विधौ परीति । लिङ्गस्य विधेयविशेषणत्वे इत्यर्थः । पदस्यापि प्रकारतया भानात्प्रकृते न दोष इतिबोध्यम् । **अनुवादेपि प्रवृत्तिरिति** । कर्मणि घञ् । अनूद्यमानविशेषणविशेषणत्वे स्वस्य लिङ्गस्येत्यर्थः । **तेनेति** । पदोपस्थापकप्रकृतपरिभाषाद्वयाऽतिरिक्तपरिभाषाणामनुवादेपि प्रवृत्त्यङ्गीकरणेनेत्यर्थः । **प्रत्ययस्थेति** । 'आपी'त्यस्य ककारविशेषणत्वेपीत्यर्थः । **इत्यादौ न दोष इति** । आदिना 'अल्लोपोन' इति । तत्र यजादिनानकारं विशेषयित्वाऽऽद्याकारस्य लोपवारणं भाष्योक्तं विरुध्येत परिभाषासत्त्वे इति बोध्यम् । **स्पष्टार्थमेवेति** । परिभाषामङ्गीकुर्वतस्तव मते 'विधीयते' इत्यध्याहारे तात्पर्यग्राहकं प्रकृत-

ॐ विषमपदविवृतिः ॐ

भवन्ति शालीय इत्यादौ च न दोषः, अन्यथा एधे औपगवीय इत्यादावेव तौ स्यातामिति भावः । **इत्यपास्तमिति** । नन्व'तो गुण'इत्यत्र गुण इति प्रथमान्तं पदं न श्रूयत इति न दोष इति चेन्न, वृद्ध्यंश एव दोष इत्यभिप्रायात् । **प्रत्ययस्थादिति** । आपि परे इदं ककारस्य विशेषणमिति भावः । **तदन्तस्येति** । 'वृद्धिर्यस्ये'त्यादौ तु यच्छब्दसमभिव्याहाराद्वृद्धमिति विधेयनिर्दे-

मेव । तत्र विधिवाक्ये प्रथमाया विधेयविभक्तित्वेन तदन्तस्य विधेयसमर्पकत्व-निर्णयः । अत एव गुणादिपदानामिक्पदोपस्थापनेन चरितार्थानामपि वाक्यार्थान्वयिता। तदर्थस्य तदनन्वयित्वे विधेयत्वाभावेन उपस्थापकत्वस्यैव भङ्गापत्तेः । इयञ्चैधितेत्यादौ

❀ चिदस्थिमाला ❀

नन्वेवमप्यनुवादे इव विधावपि पदश्रवणकाले कथं तत्त्वेन ग्रह इति समतैव विध्यनुवादयोरत आह—**तत्रेति ।** तेषां मध्ये इत्यर्थः । तदन्तस्य=गुण इत्यादेः । **निर्णय** इति । यद्यपि 'वृद्धिर्यस्ये'त्यादावपि सास्ति, तथापि यच्छब्दस्य तत्र तत्प्रतिबन्धकत्वमेवञ्च सामान्यतो लक्ष्यासंस्कारकबोधस्तावदस्त्येवेति भावः। **पदानामिति** बहुवचनं सूत्रभेदाभिप्रायम् । **अन्वयितेति** । अर्थद्वारेति भावः । तदेतद्धनयन्—'अत एवे'त्यस्यार्थमाह—**तदर्थेति** । गुणादिपदार्थस्य वाक्यार्थानन्वयित्वे इत्यर्थः, **नोपेति** । तद्वाचकस्येति भावः।

नन्विदं सूत्रं नात्सन्ध्यक्षरनिवृत्त्यर्थं, ज्ञापकेन तत्र तदप्रवृत्तेः, नचोत्तरार्थं योगविभागानर्थक्यादत आह—**इदञ्चैधीति ।** इक इति परिभाषासूत्रञ्चेत्यर्थः । **इयञ्चे**ति पाठे प्रकृतपरिभाषा चेत्यर्थः, 'स्वीक्रियते' इति

❀ ज्योत्स्ना ❀

तत्तु परिभाषाज्ञापनार्थं स्थानेग्रहणमावश्यकं—उक्तसूत्रयोरुक्तरीत्या दोषाभावेपि प्रतिदीन्न इत्यादौ व्यवहिताकारस्य स्थानिवत्वाद्वलोपाद्यभावार्थमचः परस्मिन्नित्यादेः संस्कारस्यानया परिभाषयावश्यापेक्षणात् । अतएवाचःपूर्वात्वमपि तत्र व्यवहितसाधारण्येन गृह्यते इति सिद्धान्तः । एवं 'द्विर्वचने चीत्यादावचि पूर्वत्वमित्यादि । किंलिको गुणेत्यत्र गुणवृद्धिग्रह-णेनुवर्तमाने पुनर्गुणवृद्धिग्रहणमचश्चेत्यत्र ह्रस्वदीर्घप्लुतग्रहणेनुवर्तमानेज्ग्रहणञ्च तदनित्यत्वे ज्ञापकं भवतीत्युदात्तस्वरितयोर्यण इत्यादौ न दोष इति परिभाषाप्रदीपार्चिषि विस्तरः ।

❀ सदाशिवभट्टीयम् ❀

सूत्रे गुणवृद्धिग्रहणमेवेत्यर्थः । न च मम 'विधा'विति परिभाषाऽनित्यत्वबोधनार्थन्तत्, तेनो'दात्तस्वरितयो'-रित्यादौ न दोष इति वाच्यं, एवं सति तामनङ्गीकृत्यैव स्थानेग्रहणेन परिभाषासामान्यस्यैव चानित्यत्व-ज्ञापनेन स्वाभीष्टस्य साधयितुमुचितत्वात् । नन्वेवं पदोपस्थापकत्वे 'मिदेर्गुण' इत्यादौ दोष एव स्थान-षष्ठीनिर्णयस्येव गुणवृद्धिपदे विधेयसमर्पकत्वग्रहस्यापि वाक्यार्थबोधादनन्तरभावित्वेना**लोन्त्य**परिभाषाप-क्षयाऽस्याप्यन्तरङ्गत्वाभावादित्याशङ्क्याह—**तत्रेति** । वाक्यार्थबोधपर्यालोचनेपि विधेयत्वग्रहे प्रतिबन्धका-भावविशिष्टप्रथमान्तपदमात्रदर्शनेन तत्त्वज्ञानं सुलभमिति भावः । 'वृद्धिर्यस्ये'त्यादौ च यच्छब्दयोगस्य प्राथम्यस्य च प्रतिबन्धकत्वं बोध्यं, प्राथम्यञ्च प्रथमान्तपदापेक्षयैव, तेन 'गुणो यङ्लुको'रित्यादौ न दोषः । तेन 'चेच्छिद्यते' इत्यादावनन्त्येको गुणासिद्धिः । 'परस्त्री परशुञ्चे'त्यादौ तु प्राप्तत्वादिपर्यालोचनं प्रतिबन्धकम् । प्रथमायास्तत्त्वमेवेत्यर्थः, न तु प्रथमायामेव तत्त्वमिति । तेन परशुमित्यादौ न दोष इति

❀ विषमपदविवृतिः ❀

शाच—वृद्धिपदस्य प्रथमान्तत्वेऽपि यद्विधेयसमर्पकत्वनिर्णय इति । **एतेन**—गुणवृद्ध्योर्विधेयत्वस्य वाक्यार्थबोधोत्तरकालिकत्वेन तदुत्तरमेवास्योपस्थित्याऽलोन्त्यस्येत्यस्यापि तदुत्तरमेवोपस्थित्या तस्यानेन बाधः स्यादित्य**पास्तम्** । वाक्यार्थबोधात्पूर्वमपि यच्छब्दासमभिव्याहृतप्रथमान्तत्वेन 'मिदेर्गुण'इत्यादौ गुणपदस्य विधेयसमर्पकत्वनिश्चयसम्भवेनास्यालोन्त्यपरिभाषातः पूर्वमेव प्रवृत्तेः ।

व्यञ्जनानां गुणव्यावृत्त्यर्थं, 'भिन्न'मित्यादौ निषेधप्रवृत्तये इग्लक्षणत्वसम्पत्त्यर्थञ्चेति दिक्।

प्लुतशब्दैरिति। 'ऊकाल' इति सूत्राद्ध्रस्वदीर्घप्लुत इति अजिति चानुवर्त्तते। ह्रस्वेत्यादिपदञ्च तृतीयया विपरिणतमिति भावः। तेन 'दिव उत्' 'अष्टन आ विभक्तौ'वित्यादावेतदनुपस्थितिः। शेषं प्राग्वत्।

❀ अभिनव-चन्द्रिका ❀

इति दिगिति। दिगर्थस्तु—'जनेर्ड'इत्यादौ डित्त्वविधानसामर्थ्येन एधितेत्यादौ व्यञ्जनस्य गुणो न भवति, क्नोः कित्करणेनाऽनिग्लक्षणस्यापि निषेधो भवतीति भिन्नमित्यादौ न दोष इतीयं परिभाषा न कर्तव्या। न च 'लैगवायन'इत्यादावपि निषेधः स्यादिति वाच्यं, गित्साहचर्येण धातुविहितप्रत्यययोरेव क्ङिङ्तोर्ग्रहणेनादोषात्। वस्तुतस्तु कमेर्णिङि कामयते, पच्छब्दाण्णिङ्वा पाययते इत्यादौ (?) वृद्धिनिषेधाभावायेग्लक्षणत्वसम्पत्तयेचेयं परमावश्यकी।

अचश्च। अज्निष्ठविधेयताप्रयोजकह्रस्वदीर्घप्लुतान्यतमपदघटिते शास्त्रे अच इति पदमुपतिष्ठत इत्यर्थः। विधेयतायामज्निष्ठत्वदानादूकालोजित्यादौ नास्योपस्थितिः। विधेयत्वनिवेशात्–'ह्रस्वस्य पिति' 'दीर्घादि'त्यादौ नास्याः प्रवृत्तिः। पदनिवेशात्–'पथिमथ्यृभुक्षामात्' 'दिव उत्' 'अष्टन आ'इत्यादौ नास्योपस्थितिः।

❀ चिदस्थिमाला ❀

शेषः। नन्वत्रापि **कौस्तुभरत्नाकरा**दिरीत्या ज्ञापकेन निर्वाहोऽत आह—**भिन्नमिति**। आदिनान्यनुवीदित्यादिपरिग्रहः। अत एव तस्या'दिग्ग्रहणङ्कर्तव्यमिग्लक्षणवृद्धिरेषितव्येति' भाष्यं सङ्गच्छते। किञ्चामार्ट् इत्येतत्सिध्यर्थमिदमवश्यं वक्तव्यं परिभाषात्वेन, यथा चैतत्तथा भावप्रकाशादौ प्रतिपादितम्। किञ्च व्यञ्जनस्य निवृत्त्यर्थमप्यावश्यकम्,उणादीनामव्युत्पत्तिपक्षस्य भाष्यसिद्धान्तितत्वेन उओर्डित्वस्य डित्स्वनेर्मुट्चइत्यादेश्च ज्ञापकत्वासम्भवात्। एतेन **कौस्तुभरत्नाकराद्युक्तं** सर्वमपास्तम्। अत एव भाष्ये व्यञ्जनार्थमिदं स्थापितम्। निर्दिष्टस्थानिकत्वा'दचो ञ्णिती'त्यादावप्रवृत्तिः, विधिष्वत्र पक्षे यथान्वयस्तथा स्पष्टमन्यत्र, तदाह–**दिगिति**। 'ह्रस्वादीनामावृत्ति'रिति **रत्नाकरोक्ति**निरासायाह–**अजिति चेति**। तेषामुक्तरीत्या सञ्ज्ञापरत्वादाह–**ह्रस्वेत्या**दीति। स्पष्टप्रतिपत्त्यर्थञ्चेदं, तेन न **पूर्वग्रन्थविरोधः**। पूर्वसूत्राविषयवारणार्थत्वेनैवं व्याख्यानं सफलमित्याह–**दिव इति**। यद्यप्याकारो वृद्धिरिति तद्विषयत्वं, तथापि असम्भवात्तत्र तदप्रवृत्तिरिति भावः। **शेषमिति**। विधीयते इत्यस्य लाभः, अच इति षष्ठ्यन्तं पदमित्यस्योपपत्तिः, 'निर्दिष्टस्थानिकेऽनुपस्थितिः' 'सम्भवती'ति न्यायेन'ह्रस्वो नपुंसके'इत्यत्र सामानाधिकरण्येनान्वयः, तेन 'सुवाक् ब्राह्मणकुल'मित्यादौ नातिप्रसङ्गः। 'शमामष्टाना'मित्यादौ तदसम्भवाद्वैयधिकरण्येनैवान्वयः, 'वाक्यस्य टे'रित्यत्र सामानाधिकरण्यसम्भवेपि टिग्रहणसामर्थ्याट्टेरच इत्यर्थलाभः। अन्यथाऽलोन्त्यपरिभाषया सिद्धे तदानर्थक्यं स्पष्टमेव, तेनायुष्मानेधीन्द्रवर्मन्नित्यादिसिद्धिरिति सर्वमित्यर्थः।

❀ सदाशिवभट्टीयम् ❀

बोध्यम्। **अचश्च**। **शेषमिति**। पदोपस्थापकत्वं शब्दव्यापाराश्रयणं विधीयते इति पदाध्याहारश्च, तेन 'ह्रस्व' इति सूत्रे 'त्यदौदीनाम' इत्यादौ 'च्छे चे' त्यादौ च न दोषः, अन्यथा परत्वादलोन्त्यस्य प्रवृत्तौ चिच्छेदेति न सिध्येत्, 'त्यदादीनाम' इत्यत्वमन्त्यस्य न स्यात्, 'श्रीपच्छत्र'मित्यत्रैव तुक् स्यात्,

आद्यन्तौ । यद्यप्यत्र मिलितस्य नैकत्रान्वय इति द्वन्द्वो न प्राप्नोति तथापि समूहयोरन्वयबोधोत्तरं 'यथासङ्ख्य'मितिसूत्रारम्भसामार्थ्यात्पुनः प्रत्येकान्वयः । लोके त्वेवं रीत्या प्रयोगोऽसाधुरेवेति भाष्ये स्पष्टम् । अत्रैव यथासङ्ख्यसूत्रोपन्यासो युक्तः ।

❀ अभिनव-चन्द्रिका ❀

असाधुरेवेतीति । वस्तुतस्तु एकरूपावच्छिन्नस्य एकरूपावच्छिन्नसंसर्गेण एकरूपावच्छिन्नेऽन्वयबोधेच्छाया एव सहविवक्षापदार्थत्वेन टित आद्यवयवे कित अन्तावयवेऽन्वयेपि अन्वयितावच्छेदकीभूतत्वस्यैक्येन सहविवक्षाया अबाधितत्वेन द्वन्द्वः साधुरेव । अत एवाजाविधनौ देवदत्तयज्ञदत्तावित्यादौ 'न ज्ञायते कस्य अजाधनंकस्य अविधन'मित्येवोक्तम् , न त्वसाधुत्वम् । अत एव एकद्विदारगुः, एकद्वित्रिकलत्रपुत्रपशुमान् , वानप्रस्थयतिब्रह्मचारिणां भागिनः—क्रमेणाचार्यसच्छिष्यधर्मभ्रात्रेकतीर्थिन इत्यादिनिर्देशास्सङ्गच्छते । किञ्च मूलोक्तदिशा मिलितानामेकत्रान्वयबोधेच्छा यदि सहविवक्षा तर्हि धवखदिरौ छिन्धि घटपटौ नीलावित्यादौ द्वन्द्वानापत्तिः । धवनिष्ठविभागस्य खदिरनिष्ठविभागभिन्नतया पटनिष्ठनैल्यस्य घटनिष्ठनैल्यभिन्नतया एकत्र मिलितानामन्वयाभावात् ।

ननु यथासङ्ख्यसूत्रसहकारेण 'आद्यन्तौटकिता'वित्यादेः कीदृशो वाक्यार्थ इति चेच्छृणु । 'स्वनिष्ठा-

❀ चिदस्थिमाला ❀

नैकत्रेति । प्रत्येकान्वयस्य लक्ष्यसंस्कारकतयेष्टत्वेन सम्भावितस्यापि लक्ष्यासंस्कारकत्वेनानिष्टत्वात् । तथाच सहविवक्षा नेति भावः । इतरेतरद्वन्द्वेपि साहित्यं विशेष्यमित्याह—**समूहेति** । एवञ्च मिलितस्येत्यत्र भावे क्तो बोध्यः, एवञ्च सहविवक्षासत्त्वात् द्वन्द्वोपपत्तिरिति भावः । नन्वेवं कथं लक्ष्यसंस्कारोऽत आह—**बोधोत्तरमिति** । व्यस्तस्थले स्थानाख्यलौकिकप्रमाणेनैव क्रमान्वयस्य सिद्धत्वादाह—**यथासङ्ख्यमिति** । शास्त्रीयप्रयोगे एवेति भावः । अत एवाह—**लोके त्विति** । गमकाभावात् , तथाच 'विकृताविकृता देहं घ्नन्ति ते वर्द्धयन्ति चे'ति वाग्भट्टप्रयोगादिकं चिन्त्यमिति भावः । अत एवाह—**अत्रैवेति** । इतः प्रागेवेत्यर्थः,

❀ ज्योत्स्ना ❀

असाधुरेवेति ।'लोचनाधरकृताहृतरागे' त्यादौ तु साहित्यावच्छिन्नान्वयमात्रेण साधुत्वं, विवक्षितार्थप्रतीतिस्तुपार्ष्णिकी प्रकरणादिना भविष्यति,एवं विकृताऽविकृता देहं घ्नंति तेवर्तयंति चेति वाग्भटश्लेकादौ चशब्दबोधितसाहित्यावच्छिन्नत्वस्य तत्रापिसद्भावात् । चशब्दाप्रयोगेत्वयुक्तमेवेति भावः ।

❀ **सदाशिवभट्टीयम्** ❀

न देवच्छत्रमित्यादाविति बोध्यम् । **आद्यन्तौ टकितौ** । **नैकत्रान्वय इति** । विशेषणतया विशेष्यतया चेत्यर्थः । आद्ये सविशेणत्वाद्द्वन्द्वो न स्यात् , अन्त्ये साहित्याभावादेकशेषो न स्यादिति बोध्यम् । **द्वन्द्वो न प्राप्नोतीत्यत्र**,—द्वन्द्वपदमेकशेषस्याप्युपलक्षणम् । **परत्वादमुं बाधत इति** । न च कित्प्रत्यये

❀ विषमपदविवृतिः ❀

आद्यन्तौ । **सूत्रारम्भसामर्थ्यादिति** । न च 'हलो यमा'मित्यादौ तच्चरितार्थम् , लोके उपस्थितिक्रमेणान्वयस्य क्लृप्ततया तेनैव निर्वाहात् । सञ्ज्ञाया निर्देशेषु लोकन्यायेन सिद्धेर्यथासङ्ख्यसूत्रे भाष्ये उक्तत्वेन सञ्ज्ञया द्वन्द्वेन च निर्देशे एतत्सूत्रारम्भसामर्थ्येनैव क्रमेणान्वयस्य वक्तव्यत्वात् ।

लोके त्वेवमिति । समूहयोरन्वयबोधोत्तरं पुनः प्रत्येकान्वयविवक्षया प्रयोगोऽसाधुरिति भावः । तथा च 'तीर्णदग्धाब्धिलङ्क' इति प्रयोगोऽसाधुरिति **केचित्** । **अन्ये** त्वत्रा'जाविधनौ देवदत्तयज्ञदत्तावित्युक्तेर्न ज्ञायते कस्याजाधनं कस्याऽवय' इति भाष्यस्वरसात्-द्वन्द्वगर्भबहुव्रीह्यर्थस्य समूहस्य द्वन्द्वार्थसमूहेनान्वयोत्तरं न प्रत्येकमन्वयः । परस्य द्वन्द्वार्थयोस्तु प्रत्येकमन्वयो भवत्येवेत्याहुः । **भाष्ये स्पष्टमिति** । तथा च भाष्ये-'यद्यपि तावल्लोके एष दृष्टान्तो, दृष्टान्तस्यापि

द्वन्द्वान्ते श्रूयमाणस्येच्छब्दस्य प्रत्येकं सम्बन्धः। 'पुरस्तादपवाद'न्यायेन स्थानेयोगत्वस्यायमपवादः । प्रत्ययपरत्वन्तु परत्वादमुं बाधते । तेन चरेष्टादयः परा एव भवन्ति। अत एव यत्रैतदभावे स्थानषष्ठीसम्भावना तत्रैवेदं प्रवर्त्तते, तदाह—**यस्योक्ताविति** ।

❀ अभिनव-चन्द्रिका ❀

पेक्षाबुद्धीयविषयता-सजातीयाऽपेक्षाबुद्धिविषयता-वत्त्व'-'स्वप्रतियोगिकसंसर्गमर्यादाप्रयोज्यससर्गवत्त्वो'भयसम्बन्धेन यथासङ्ख्यस्थले सर्वत्र विशेषणत्वं, विषयतासाजात्यञ्च विषयतायां-स्वनिरूपकापेक्षाबुद्धिनिष्ठजनकतानिरूपितजन्यतावच्छेदकसङ्ख्यात्वव्याप्यजात्यवच्छिन्नजन्यतानिरूपितजनकतावच्छेदकत्व, 'स्ववृत्ति—यत्स्वनिरूपकापेक्षाबुद्धीयैकत्वनिष्ठप्रकारतानिरूपितैकत्वविशिष्टत्वावच्छिन्नधर्मिताल' 'स्ववृत्ति स्वनिरूपकाऽपेक्षाबुद्धीयैकत्वनिष्ठप्रकारतानिरूपितैकत्वानवच्छिन्नधर्मितात्वैतदन्यतरवत्त्वैतदुभयधर्मेण । प्रकृते च टिन्निष्ठापेक्षाबुद्धिविषयतासजातीयापेक्षाबुद्धिविषयता आदिनिष्ठैवापेक्षाबुद्धिविषयता भवति, न त्वन्तनिष्ठा, तथा हि—टिन्निष्ठा यापेक्षाबुद्धिविशेषविषयता—'टिदेकः एतद्विशिष्टः किदेकः' इत्याकारकापेक्षाबुद्धीया, तन्निरूपकापेक्षाबुद्धिः प्रागुक्ता, तन्निष्ठा या जनकता तन्निरूपिता या जन्यता द्वित्वे, तादृशजन्यतावच्छेदिका सङ्ख्यात्वव्याप्यजातिः द्वित्वत्वं, तदवच्छिन्नजन्यता आद्यन्तवृत्तिद्वित्वनिष्ठा जन्यता, तन्निरूपितजनकता-'आदिरेकस्तदेकत्वविशिष्टोन्त एक'इत्याकारकापेक्षाबुद्धिनिष्ठजनकता, तादृशजनकतानवच्छेदकत्वस्य; एवं स्वं पूर्वोक्तिपेक्षाबुद्धीयविषयता तन्निरूपकापेक्षाबुद्धीयैकत्वनिष्ठप्रकारतानिरूपितएकत्वानवच्छिन्नधर्मिता'यमेक'इत्याकारकापेक्षाबुद्धीयाऽयम्पदार्थनिष्ठाधार्मिता, तादृशधार्मितात्वस्य, स्ववृत्तित्वस्य च आदिनिष्ठापेक्षाबुद्धिविषतायां सत्त्वात् ।

अन्तनिष्ठापेक्षाबुद्धिविशेषविषयतायां टिन्निष्ठापेक्षाबुद्धिविशेषविषयतानिरूपकापेक्षाबुद्धिनिष्ठजनकतानिरूपितजन्यतावच्छेदकसङ्ख्यात्वव्याप्यजात्यवच्छिन्नजन्यतानिरूपितजनकतावच्छेदकत्वस्य सत्त्वेऽपि,टिद्वृत्ति यत्स्वनिरूपकापेक्षाबुद्धीयैकत्वप्रकारतानिरूपितैकत्वानवच्छिन्नधर्मितात्वंतस्यासत्त्वात्। [स्वनिष्ठापेक्षाबुद्धिविशेष्यतानिरूपकापेक्षाबुद्धिनिष्ठजनकतानिरूपितजन्यतानिरूपितजन्यतावच्छेदकद्वि-

❀ चिदस्थिमाला ❀

प्रथमोपस्थितत्वादिति भावः। टितो लाभायाह—**द्वन्द्वान्त** इति । तस्यात्र प्रत्येकपर्याप्तार्थवाचकत्वाद्व्यासज्यवृत्तिधर्मावच्छिन्नवाचकस्य तु तादृशस्य न तथा, यथा'ग्नीषोमौ देवते'त्यादाविति बोध्यं, 'नासिका वचन'मित्यादिनिर्देशात् । बाध्यविशेषचिन्ताश्रयणेनाह—**पुरस्तादिति** ।' स्यादयं=योगः। एवमग्रेऽपि ।

ननु 'गापोष्टक्' 'व्रीहिशाल्योर्ढ'गि त्यादौ प्रत्ययत्वागमत्वयोः समावेशेऽपि तत्प्रयुक्तकार्यस्य इनम्वदबाधितत्वेन सामगो व्रैहेय इत्यादौ न दोषोऽत आह—**चरेष्टादय इति** । आदिना ल्युडादयः। अत एव=स्थानेयोगत्वमात्रापवादत्वादेव।यत्र=सूत्रे। वस्तुतस्तदभावाज्जातायास्तस्या निवारणासम्भवाच्चाह—**सम्भेति। तत्रैवेदमिति** । एतेन षष्ठीत्यपकर्षेण षष्ठ्यन्तस्य निर्दिश्यमानस्याद्यन्तावित्यर्थादस्य लाभ इत्यपास्तं,

❀ सदाशिवभट्टीयम् ❀

उभयोरपि समावेशसम्भवाद्विरोधाऽभावेन विप्रतिषेधसूत्राप्रवृत्तावन्त्यत्वेन धातुत्वे 'आधिं प्रधिं पश्ये'त्यादावेरनेकाच इति वाच्यं, तेन तस्यैवावध्यवधिमद्भावस्यावयवावयविभावस्य च लोकतन्त्रविरुद्धत्वात्, प्रकृतसूत्रभाष्यन्त्वेकदेश्युक्तमिति बोध्यम् । नन्ववयविनः सूत्रेऽनुपादानादाद्यन्तपदाकाङ्क्षितोऽन्वयी-

❀ विषमपदविवृतिः ❀

पुरुषारम्भो निवर्त्तको भवति, कः? सङ्ख्यातानुदेशो नामे'ति । **परत्वादिति** । इदमयुक्तं-'प्रत्ययः' 'परश्चे'त्यस्य पदैकवाक्यतयाऽन्वयस्य वक्ष्यमाणत्वेन वाक्यार्थबोधात्पूर्वमेव प्रवृत्तेः । अस्य च 'टकितौ यमुद्दिश्य विहितौ तदाद्यन्तौ भवत'इत्यर्थेन वाक्यार्थबोधोत्तरमेव प्रवृत्तेरुभयोर्यौगपद्या-

२४

आद्यन्ताक्षिप्तोऽवयवी यच्छब्दार्थः । यथासङ्ख्यसिद्धमर्थमाह—**क्रमादिति** । इताविति किम् ? टुक् पर्यायेणाद्यन्तयोर्मा भूत् ।

❀ अभिनव-चन्द्रिका ❀

त्वरूपजात्यवच्छिन्नजन्यतानिरूपितजनकतावच्छेदकत्वस्याभावादिति ? दिक् ।] एतत्सर्वमभिप्रेत्याह—**यथासङ्ख्यसिद्धमर्थमिति** ।

❀ चिदस्थिमाला ❀

तत्र मानाभावात् । नन्वेवमपि प्रकृत्यर्थलाभः कथमत आह—**आद्यन्तेति** । **टुगिति** । ङ्णोरिति विहितः। एतेन'टगिति बुध्वा 'पूर्वापरविरोधाच्चिन्त्यमिद'मिति **मन्दोक्तमपास्तम्** । यद्यपि'नित्यः परयणादेश' इति भाष्यसिद्धान्तरीत्यानिष्टमेव स्यात्तथापि 'क'सामर्थ्यादिष्टमपि इत्याशयेनाह—**पर्यायेणेति** । यद्यप्येवं सति कुकः ककारेण ज्ञापकेनेतोरेतयोस्तदर्थत्वं, न तु श्रूयमाणयोरिति सुवचं, तथापि तस्य विशेषापेक्षत्वं सम्भाव्येतेतीद्ग्रहणमावश्यकम् । एतेन 'नित्यः परेति रीत्या शब्दपरविप्रतिषेधेन निर्वाहात्पर्यायो न, किन्नोक्तज्ञापकेन निर्वाहे इद्ग्रहणं चिन्त्यप्रयोजनमेवे'ति **मन्दोक्तमपास्तम्** । इयं परिभाषा सञ्ज्ञा चेति पक्षद्वयं, तत्राद्यपक्षेणात्रोपन्यासः । ननु पूर्ववद्विशेषचिन्तैवात्रास्त्विति सामान्यचिन्ताङ्गीकारे किं मानं ?, न च श्नमो मित्वं मानमिति **रत्नाकरदण्ड्या**द्युक्तं युक्तं, तस्य श्रवणार्थत्वात् । न च 'श्नान्न'ेति सूत्रं तथेति

❀ सदाशिवभट्टीयम् ❀

कस्तत्राह—**आद्यन्ताक्षिप्त इति** । तदाकाङ्क्षित इत्यर्थः । **यच्छब्दार्थ इति** । 'यत्र टित्कितौ तत्राद्यन्तपदोपस्थिति'रिति सूत्रार्थेन तत्र तत्र षष्ठ्यन्तस्य सत्त्वेन तदन्वयेन नैराकाङ्क्ष्यमिति भावः । **इताविति-किमिति** । मत्वर्थीयेनिना 'टकिना'विति वक्तव्यं, कुकश्च ककारो न कार्य इति लाघवं, पदलाघवञ्च, धुडादौ टोच्चारणेनोपदेशे टकारवान् ककारवांश्चेत्यर्थ इति प्रश्नः । **पर्यायेणेति** । टुकि[२] टकारवत्त्वककारवत्त्वोभयसत्त्वादित्यर्थः । इदमुपलक्षणम्—अप्रतिपत्तेरपि । तत्रोक्तप्रेष्यदृष्टान्तेन सत्वेनोभयोरपि प्राप्त्या विरोधात्समावेशाऽसम्भवेन विप्रतिषेधसूत्रभाष्योक्ततृजादिदृष्टान्तेन तस्या अपि प्राप्तेः । बहिरङ्गेण सिध्यतीत्य'चः परस्मि'न्निति सूत्रभाष्योक्तरीत्याऽनिष्टमेव तु नापादितम्, उभयोरपि विशिष्टापेक्षत्वेन तत्त्वाभावात् । शब्दपरविप्रतिषेधाश्रयणे तु न मानमिति भावः । तदाश्रयणे तु 'शुषः क' 'आदेश्च कः' 'धान्तस्य टः' ? 'राज्ञः क च' 'खरि च' 'वावसाने' 'वाक्' 'ष'डित्यादौ दोषो बोध्यः । यद्वा—तदपि मास्तु, टकावाद्यन्तयोः सञ्ज्ञेत्येवार्थः, धुडादौ च धु इति पृथक्पदं, ट इति च । आद्यं स्वरूपपरं नपुंसकं, धुट् भवति धकार आद्यावयव इत्यर्थः, यत्र चाट्सकारादावुच्चारणार्थष्टकारस्तत्राद्यादेशापत्त्या पृथक्पदत्वासम्भवस्तत्र कर्मधारयो बोध्यः । परनिपातस्तु अनित्यत्वात्प्रकरणस्य । पूर्वोक्तैर्जश्चरादिपदैर्विहिते तु नातिप्रसङ्गः, उच्चारितस्यैव प्रत्यायकत्वात् । यत्र चादौ मध्ये च 'तवकममकौ' 'ठस्येकः' 'क्तान्तात्क' इत्यादौ तत्रापि जश्त्वाभावेन समासाभावनिर्णयेन न दोषः, यत्र चा'देश्च क'इत्यादावुच्चारणार्थवर्णरहितस्तत्रापि विशेष्यानुक्त्या आदिर्भवतीत्याद्यर्थासम्भवेन 'परश्च घे'त्यादाविव व्याख्यानेन च स्वरूपपरत्वमेवेति न दोष इति प्रश्नाशयः । **पर्यायेणेति** । विशेष्यानुपादानेपि प्रकारतयोपस्थितस्वरूपस्यैव तत्त्वं स्यात् ।

❀ विषमपदविवृतिः ❀

भावात् । **यथासङ्ख्यं सिद्धमिति** । ननु 'गुणानां च परार्थत्वादसम्बन्धः समत्वात्स्या'दिति न्यायविरोध इति चेन्न, एतत्सूत्रभाष्यप्रामाण्येनो'भयनिर्देशे पञ्चमीनिर्देशो बलवानन्तरङ्गत्वा'दिति तत्र भाष्योक्त्या'ऽऽदेः परस्ये'ति सूत्रे'ऽपवादविप्रतिषेधात्सर्वादेशो भविष्यती'ति भाष्येण च तन्न्यायस्यैतच्छास्त्रेऽनाश्रयणबोधनात् । अत'एवो 'रणरपर' 'इग्यणः सम्प्रसारण'मित्यादौ 'षष्ठीस्थाने' इत्यादेः प्रवृत्तिः । **पर्यायेणेति** । इदमप्ययुक्तम्—इताविल्यस्याभावे 'टकावाद्यन्तौ भवत' इत्यर्थेऽनुबन्धविनिर्मुक्तपदार्थोपस्थितेः स्वसिद्धान्तत्वेनाद्यवयवस्यैवापत्तेः, इडादौ टकारोच्चारणासामर्थ्ये-

१. अत्रायं ग्रन्थस्त्रुटितो विपर्यस्तश्च भाति । २. 'टुकि टकारवत्वककारवत्वोभयसत्वेनोभयोरपि प्राप्त्या विरोधात्समावेशासम्भवेन विप्रतिषेधसूत्रभाष्योक्ततृजादिदृष्टान्तेनेत्यर्थः । इदमुपलक्षणम्—अप्रतिपत्तेरपि । तत्रोक्तप्रेष्यदृष्टान्तेन तस्या अपि प्राप्तेः'—इति पाठान्तरम् ।

मिदचो । अयं बाध्यसामान्यचिन्तया स्थानेयोगत्व-प्रत्ययपरत्वयोरपवादः । 'तृणह' इति निर्देशात् । **निर्धारणे इति** । 'यस्य समुदायस्य मिद्विहितस्तस्याचां मध्ये' इत्यर्थः । सौत्रमेकवचनमिति भावः । **तस्यैवेति** । यस्य विहितस्तस्यैवेत्यर्थः । अत एव

❀ अभिनव-चन्द्रिका ❀

निर्धारण इति । निर्धारणषष्ठ्यर्थश्च—यथा 'नृणां द्विजः श्रेष्ठ' इत्यादौ श्रैष्ठ्ये नृसमुदायस्य—'स्वघटकवृत्तित्वं' 'स्वघटकद्विजेतरयावद्वृत्तित्वं'चैतदुभयसम्बन्धेन वैशिष्ट्यम्, तथा प्रकृतेपि अन्त्यत्वे अच्समुदायस्य—स्वघटकवृत्तित्वं स्वघटकान्त्याजितरयावद्वृत्तित्वञ्चेति ।

यत्तु कारकशेखरे 'नृणां द्विज' इत्यादौ नृसमुदायस्य द्विजे'स्वघटकवृत्तित्व''स्वघटकद्विजेतरयावद्वृत्तित्वो'भयसम्बन्धेन स्वविशिष्टश्रैष्ठ्यवत्त्वमिति, तन्न, 'अचोन्त्यादिटी'तिसूत्रस्थस्वग्रन्थविरोधात्, तथाहि तत्रहि अन्त्यादी'ति गमकत्वात्समास इत्युक्तं, भवन्मते चान्त्यत्वे अन्वयाभावेन निर्धार्यमाणाच्येवान्वयेन गमकत्वादित्यस्यासङ्गत्यापत्तेः । निर्धारणहेतोः श्रैष्ठ्यादेः सम्बन्धघटकत्वेन श्रेष्ठादिपदानां निरर्थकत्वापत्तेश्च, उद्देश्यविधेयभावानुपपत्तेश्च, विधेयश्रैष्ठ्यादेः उद्देश्यतावच्छेदकसंसर्गघटकत्वात्पुरुषोत्तम इत्यादौ 'न निर्धारणे'षष्ठीसमासनिषेधमाशङ्क्य'यतो, निर्धार्यते यश्च निर्धारणहेतुः, यश्च निर्धार्यमाणस्तद्बोधकपदत्रयसन्निधान एव 'यतश्च निर्धारण'इति सूत्रं प्रवर्तत इत्युक्त्वा 'उत्तमः पुरुषस्त्वन्य'इत्यादिगीतासहकारेण कर्मधारयसमासपरकैयटादिग्रन्थविरोधाच्च । भवन्मते निर्धार्यमाण एव निर्धारणषष्ठ्यर्थान्वयेन सामर्थ्याभावादेव षष्ठीसमासाप्राप्तेरिति दिक् । **एकदेशे**

❀ चिदस्थिमाला ❀

रत्नाकरोक्तं युक्तं, सामर्थ्यात्तस्य व्यवधानेऽपि प्रवृत्तेरत आह—**तृणेति** । 'तस्यैवे'त्यस्य योन्त्यइत्यनेनान्वयस्यैकाच्स्थलेऽव्याप्तेरनेकाच्स्थले यत्किञ्चित्समुदायमादायातिव्याप्तेश्च निरासायाह—**यस्येति** ।

यत्तु 'जातावेकवचन'मिति **रत्नाकरदण्ड्याद्यस्तन्न**, तथा सत्यन्यत्रापि तथा प्रयोगापत्तेरत आह—**सौत्रमिति** । उक्तहेतोरेव व्याचष्टे—**यस्येति** । समुदायस्येत्यर्थः । ननु यथाश्रुते 'अवयवावयव' इति न्यायेन निर्वाहे तथा व्याख्याने किम्मानमत आह—**अत एवेति** । समुदायावयवत्वाङ्गीकारादेवे-

❀ सदाशिवभट्टीयम् ❀

तथा च टुकि आद्यन्तत्वस्य यौगपद्यासम्भवेन टस्यैव पर्यायेण तत्त्वापत्तिः, संज्ञिभेदान्न शब्दपरविप्रतिषेध इत्युत्तराशयः ।

मिदचोऽन्त्यात्परः । मस्य श्रवणार्थत्वेनापि सार्थक्यसम्भवादाह—**निर्देशेति** । नन्वक्षरसमाम्नायेऽचां मध्येऽन्त्य औकार एवेत्यतिप्रसङ्गोऽव्याप्तिश्चेत्यत आह—**यस्य समुदायस्येति** । एतेन तस्यैवेति द्वितीयतच्छब्देन परामर्शात् प्रथमस्य प्रक्रान्तत्वं बोधितम् । **सौत्रमिति** । निर्धारणविभक्तेः समूहवाचकादुत्पत्तेर्वक्ष्यमाणतयाऽच्पदे एकशेषावश्यकत्वेन तस्य च समाहारद्वन्द्वविषयेऽप्राप्त्या बहुवचनं द्विवचनं च तत्र न्याय्यं, 'कारके' इति सूत्रस्थवक्ष्यमाणभाष्यमपि न्यायसिद्धे एवार्थे लिङ्गम् । समाहारद्वन्द्वे तु निर्धारणविभक्तेरिष्टापत्तिस्तु न, भाष्यस्यापूर्वार्थकल्पकत्वे मानाभावात् । एतेन तत्र तत्र सौत्रकल्पनापेक्षया प्रकृतनिर्देशेन तद्भाष्यस्य सप्तमीसङ्कोचकत्वमेवोचितम् । 'षष्ठी शेष' इत्यस्यापि सङ्कोचकल्पने मानाभावादित्यपास्तम्। **यस्य विहितस्तस्यैवेति** । अन्त्याचस्तु न परामर्शः, ततः परत्वस्य तदवयवत्वस्य चैकत्र विरुद्धत्वात् । न्याय्येऽर्थे लिङ्गमप्याह—**अत एवेति** । परग्रहणं कुर्वतः सूत्रकृतोपि समुदायभक्तत्वमेव

❀ विषमपदविवृतिः ❀

नेत्सञ्ज्ञकटकारादिसम्बन्धिनष्टकारान्तस्य वाऽऽदित्वादिबोधनं तु क्लिष्टमितीद्ग्रहणं सार्थकमिति बोध्यम् । **मिदचोन्त्यात्** । **निर्देशादिति** । उपलक्षणमेतत्—श्नमो मित्त्वस्य । **सौत्रमेकवचनमिति** । 'कारके' इत्यत्र 'निर्धारणसप्तम्यन्तत्वे कारकेष्विति वदे'दिति भाष्येण निर्धारणार्थकविभक्तेर्बहुवचनरूपाया एव विभक्तेः साधुत्वबोधनादिति भावः । **इति भाष्यमिति** । 'मिदचोन्त्या'दिति

'समुदायभक्तो नोत्सहतेऽवयवस्येगन्ततां विहन्तुमि'ति भाष्यं सङ्गच्छते । **अन्तावयव इति** । पूर्वसूत्रात्समस्तमप्यन्तपदमेकदेशे स्वरितत्वप्रतिज्ञाबलादनुवर्त्तते इति भावः । 'मुञ्चती'त्यादिविषये तु फलाभावादयोग्यत्वाच्चान्तावयव इत्यंशाप्रवृत्तिः ।

❀ अभिनव-चन्द्रिका ❀

स्वरितत्वप्रतिज्ञानादिति । वस्तुतस्तु एकदेशे स्वरितत्वप्रतिज्ञाने न मानं, नापि फलं,'मिदचोन्त्या'दित्यत्र परशब्दस्य अवयवत्वविशिष्टपरत्वावच्छिन्नवाचकत्वेन परत्वेऽत्रधितयान्त्याचोऽवयवत्वेन च निरूपितत्वसम्बन्धेन यस्य मिद्विहितस्तस्य च अन्वयस्वीकारेण मुञ्चतीत्यादावनुपपत्त्यभावात् ।

❀ चिदस्थिमाला ❀

त्यर्थः । एवञ्च 'पञ्चारत्नीनी'त्यादा'विगन्तकाले'ति स्वरसिद्धिरन्यथोत्तरपदस्यापि नान्तत्वापत्त्या स न स्यादिति भावः । 'कोसौ नुम् ? अन्त्यादचः पर' इति प्राचां व्याख्यानमसदिति ध्वनयन्नाह— **मुञ्चतीति** । ननु समुदायान्तावयवत्वसम्पत्तिरेव फलमत आह—**अयोग्यत्वादिति** । तेषां अन्त्यादचः परस्मिंस्तदन्तावयवत्वस्य बाधितत्वादित्यर्थः । **अंशेति** । परत्वांशप्रवृत्तिस्त्वस्त्येव, अन्यथान्त्यस्य

❀ ज्योत्स्ना ❀

इति भाष्यमिति । पञ्चारत्नीनीत्यादाविगन्तेति स्वराभावमाशङ्क्येदमुक्तम् । **इत्यंशाप्रवृत्तिरिति** । इदमन्त्याजवयवनुमादेर्नास्ति समुदायावयवत्वमित्यभिप्रेत्य । तदाश्रयणे तु सङ्घातभक्तोसा'विति भाष्यस्यान्यथापि व्याख्यातुं शक्यत्वात्तस्यैवेत्यस्यान्त्याच एवेत्यर्थो व्यर्थकल्पनानाश्रयणञ्च । नचावयवावयवस्यसमुदायावयवत्वे घटादेः स्वावयवेष्विव स्वावयवावयवेष्वपि समवेतत्वाच्चाक्षुषाभावप्रसङ्गः

❀ सदाशिवभट्टीयम् ❀

सम्मतम्, अन्यथा 'मिदचोऽन्त्यस्ये' त्येव वदेत् । ननु तथैवास्तु किमन्त्याजवयवत्वेऽसाधारणं दूषणमिति चेत्, अज्निष्ठधर्मस्य विशिष्टेऽतिदेशेन तत्तत्कार्यापत्त्या तत्र तत्र परिभाषानित्यत्वप्रयुक्तं गौरवमिति गृहाण । **इति भाव इति** । तथा वक्तुर्मूलकृत इति भावः। वस्तुतस्तु'उरण्रपर' इति सूत्रे स्वयं वक्ष्यमाणरीत्या परशब्दस्यैवावयववाचकत्वेन 'पूर्वं नाभेः कायस्ये'त्यत्रेवान्त्याजवधिकपरत्ववान् समुदायाऽवयवो मिदिति सूत्रार्थः, तदनुवृत्तिप्रतिपादकसूत्रद्वयस्थभाष्यन्त्वेकदेश्युक्तमिति बोध्यम् । यद्वान्त्यपर्याय एकः परशब्दः, पञ्चमीप्रयोजको दिग्वाचकश्चापरो, नत्वेकस्यैवोभयार्थकत्वम्,उक्तभाष्यात् । प्रकृते च पञ्चमीनिर्देशाद्दिग्वाकत्वनिर्णयेनानुवृत्तेरावश्यकत्वमिति प्रकृतसूत्रस्थसकलग्रन्थतात्पर्यम् । परशब्दे तु अन्तपर्याये बाधकाभावात्तथैव वक्ष्यते । तत्सूत्रस्थभाष्यन्त्वेकदेशे स्वरितत्वप्रतिज्ञायाः क्लृप्तत्वादुपायान्तरपरमितिबोध्यम् । वस्तुतस्तु अनुवृत्तिपरसूत्रद्वयस्थभाष्यविरोधान्मानाऽभावाच्च पूर्वपरशब्दयोर्नावयवत्वांशेपि शक्तिः, 'उरण्रपर' इति सूत्रस्थावयववाचिनेत्यस्य वस्तुतस्तद्वाचिनेत्यर्थः, न तु तत्त्वेनेति, अत एवाग्रे 'अनुनासिकात्पर' इति विहितस्यावयवत्वे मानाभाव इति वक्ष्यते, ऐचोरपि **हरदत्त**मतेनावयवत्वं वक्ष्यते। 'पूर्वं नाभे' रित्यादौ तु षष्ठीवाच्योऽवयवावयविभाव इति बोध्यमिति सर्व**वदातम्** ।

ननु समुदायनिरूपितत्वचरमत्वोभयविशिष्टावयवत्वस्यान्तपदार्थत्वेन विशिष्टस्यायोग्यत्वेपि अवयवत्वमात्रबोधकस्य योग्यत्वात्तत्राह—**फलाभावादिति** । तन्मध्यपातितन्यायेनैव तत्त्वसिद्धेरिति भावः । विशिष्टाभिप्रायेणाह—**अयोग्यत्वादिति** । **इत्यंशाऽप्रवृत्तिरिति** । ननु विनिगमकाभावादन्त्याऽचः परत्वांशस्यैव प्रवृत्तिरस्त्विति चेन्न, तद्बोधनवैयर्थ्यस्यैव गमकत्वात् । न च हलन्तेऽप्रवृत्तिरेव तद्बोधनफलम्, तावन्मात्रफलकत्वे 'मिदजन्तस्ये'त्येव ब्रूयादिति भावः ।

परिभाषाणामनियमे नियमकारिणीत्वादाह—**अनिर्धारितेति**। तेन'ऊदुपधाया गोहः' इत्यत्र स्थानेयोगत्वं न, उपधापदसन्निधानेनावयवषष्ठीत्वनिर्णयात् ।

❀ अभिनव-चन्द्रिका ❀

निर्णयादिति।'स्वघटकत्व''स्वघटकान्त्यालवधिकाव्यवहितपूर्वत्वो'भयसम्बन्धेन यत्किञ्चित्समुदायविशिष्टत्वमुपधात्वमेवञ्च उपधात्वस्य निरूपकांशे नित्यसाकाङ्क्षत्वेन येन सम्बन्धेन निरूपकांशे नित्यसाकाङ्क्षं यद्रूपं तद्रूपावच्छिन्नबोधकपदसमभिव्याहृतषष्ठ्याः तद्रूपानुयोगिकतत्सम्बन्धेतरसम्बन्धाबोधकत्वादिति

❀ चिदस्थिमाला ❀

स्यादिति भावः। अनुवृत्त्याद्यभावात्तल्लाभोपायमाह—**परीति**। **इत्यत्रेति**। इत्यादावित्यर्थः, तेन 'शास इद'ङ्त्यिादिपरिग्रहः। **योगत्वं नेति**।'गोह इति षष्ठ्या' इति शेषः।'उपधाया' इत्यत्र तु तत्त्वमस्त्येवेति भावः। तदेवाह—**उपधेति**। अन्यथा तस्य, सर्वधातूपधायाश्च स्थाने स्यादिति भावः। 'स्थानरूपसम्बन्धः

❀ ज्योत्स्ना ❀

वायुवनस्पतिसंयोगचाक्षुषवारणार्थं स्वाश्रयसमवेतत्वसम्बन्धेन चाक्षुषाभावस्य तच्चाक्षुषे प्रतिबन्धकत्वकल्पनावश्यकत्वादिति वाच्यं, त्रसरेणोरचाक्षुषप्रसङ्गात्, त्रसरेण्वन्यसच्चाक्षुषं प्रति प्रतिबन्धकत्वकल्पने तु गौरवं, तादृशचाक्षुषाभावस्य संयोगचाक्षुषे प्रतिबन्धकत्वकल्पनामात्रेणापि वायुवनस्पतिसंयोगचाक्षुषवारणस्य सुशकत्वात् ।

न च'टघुटघुलौ तुट्च'ति तुटष्टित्त्वेन सिद्धे टघुटघुलोष्टित्करणाज्ज्ञापकादवयवावयवस्य समुदायावयवत्वाभावः, तत्फलं तु 'पठिता विद्ये'त्यत्र ङीबभाव इति वाच्यम्, धेटष्टित्वमादाय जायमानस्य स्तनन्धयीतिङीपोऽप्रसङ्गात्। न च धेटष्टित्वसामर्थ्यात्सः, कल्पनागौरवात्। टघुटघुलोष्टित्करणात्तु साक्षादवयविनि स्वप्रयुक्तकार्यसम्पादनेन चरितार्थस्यावयवव्यवयविनि स्वप्रयुक्तकार्यप्रयोजकत्वाभावज्ञापनेनापि 'पठिता विद्ये'ति ङीबभावस्य वक्तुं शक्यत्वात् । अत एव यासुटो ङिद्वचनस्य समुदायविशेषकत्वादुच्यादुप्यादित्यादौ सम्प्रसारणम्, तत्र साक्षादवयविनि स्वप्रयुक्तकार्यस्य कस्याप्यभावात्। न ह्यत्र सामर्थ्यं वक्तुं शक्यते, 'भिद्या'दित्यादौ क्ङितीति परसप्तमीपक्षे गुणनिषेधेन चरितार्थत्वात्। ध्वनितश्चेदं 'क्ङिति चे'त्यत्र भाष्यकैयटयोः । नुमोऽन्त्याजवयवत्वं तदवयवमकारस्य प्रयोजनं, नकारस्तु साक्षादवयविनि स्वावयवत्वप्रयुक्तकार्यस्यासम्पादकत्वात्समुदायावयवो भवत्येव । नन्वेवमपि पञ्चारत्निशब्दावयवत्वमिवारत्निशब्दावयवत्वमपि नुमः स्यादितीगन्तोत्तरपदकत्वाभावात् स्वराप्रसङ्गाद्भाष्यविरोधस्तदवस्थ इति चेन्न, यत्सङ्घातावयवत्वेनोपात्तस्यावयवस्य योऽवयवः स तत्सङ्घातस्याप्यवयव इति विज्ञानादङ्गावयवान्त्याजवयव-

❀ विषमपदविवृतिः ❀

सूत्रस्थ'मिति शेषः। **परिभाषाणामिति**। इदमप्ययुक्तम्—'अलोन्त्यस्यादेः परस्ये'त्येतयोरनियामकत्वात्। तयोरभावे इत्यस्यानन्त्यस्यादेरनादेश्चाप्राप्तेः सन्देहे ऽनियमः। 'नचावयवषष्ठ्यादिषु सन्देह' इति प्रकृतसूत्रस्थं भाष्यं तु सामान्येनार्थोपदेशस्य संशयस्थल एव प्रवृत्तिरित्यभिप्रायकम्। "लौकिकोयं दृष्टान्तः—तद्यथा,—लोके कश्चित्कञ्चित्पृच्छति 'ग्रामान्तरं गमिष्यामि पन्थानं मे भवानुपदिश'त्विति, स तमाचष्टे'ऽमुष्मिन्नवकाशे हस्तदक्षिणो गृहीतव्य'इति 'यस्तत्र तिर्यक्पथो भवति न तत्र सन्देह इति नासावुपतिष्ठते, एवमिहापि सन्देहे नियम" इति भाष्येण तथैव लाभात्। यद्वा—पाक्षिकप्राप्तिकबाधेनोपपत्तौ नियतप्राप्तिकबाधो न न्याय्य इत्याभिप्रायकं भाष्यम्। **निपातनात्साधुत्वस्येति**। स्थानत्वस्यैव सम्बन्धत्वे तु स्थानं योगोऽस्या इति वदेदिति भावः । सम्बन्धस्य प्रतियो-

'स्थानेयोगे'त्यस्य स्थानपदार्थनिरूपितसबन्धार्थिकेत्यर्थः। 'स्थानेन योगो यस्या' इति विग्रहे निपातनात्साधुत्वस्य भाष्ये उक्तत्वात्। 'अस्तेरनन्तरे'इत्यादेरपि अनन्तरादिनिरूपित-सम्बन्धे इत्येवार्थः। षष्ठीमात्रोच्चारणे स्थानपदाद्यध्याहार इत्यन्यत्र विस्तरः।

प्रसङ्ग इति। 'दर्भाणां स्थाने शरैः प्रस्तरितव्य'मित्यादौ तथा दर्शनात्। भावे ल्युट्—

❀ अभिनव-चन्द्रिका ❀

भावः। **तन्निरूपितसम्बन्धार्थिकेति**। स्थानपदार्थानुयोगिकसम्बन्धार्थिकेत्यर्थः। एवमग्रेपि।

तथा दर्शनादिति। स्थानपदार्थश्च 'वृत्तिविशेष्यतावच्छेदकतावच्छेदकताकेष्टसाधनत्वप्रकारकभ्रम-विषयत्वप्रकारकज्ञानीयविशेष्यतावच्छेदकावच्छिन्नविशेष्यताकेष्टसाधनत्वप्रकारकप्रमाविषयत्वप्रकारक-ज्ञानीयविशेष्यतावच्छेदकतावच्छेदकता'। स्थानपदार्थतावच्छेदकवृत्तित्वान्वयिनिरूप्यनिरूकभावः षष्ठ्यर्थः। तथा च 'दर्भाणां स्थाने शरैः प्रस्तरितव्य'मित्यादौ दर्भनिरूपितवृत्तित्ववती या विशेष्यतावच्छेदकतावच्छेदकता तादृशावच्छेदकताकं यत्—'दर्भकरणकं प्रस्तरणमि-ष्टसाधनत्वप्रकारकभ्रमविषयः' इत्याकारकं ज्ञानं, तादृशज्ञानीयविशेष्यतावच्छेदकं यत्—प्रस्त-रणत्वं, तदवच्छिन्नविशेष्यताकं—इष्टसाधनत्वप्रकारकप्रमाविषयत्वप्रकारकं यज्ज्ञानं—'शरक-रणकप्रस्तरणमिष्टसाधनत्वप्रकारकप्रमाविषय'इत्याकारकं ज्ञानं, तादृशज्ञानीयविशेष्यतावच्छे-दकतावच्छेदकता शरेष्विति लक्षणसमन्वयः। 'एव'मिको यणची'त्यादावपि—इग्निरूपित-वृत्तित्ववती या विशेष्यतावच्छेदकतावच्छेदकता 'इकर्मकोच्चारणं इष्टसाधनत्वप्रकारकभ्रमविषय'इत्या-

❀ चिदस्थिमाला ❀

षष्ठ्यर्थः' इति **रत्नाकराद्युक्तिं** खण्डयति—**स्थाने योगेत्यस्येति**। **निरूपितेति**। आदेश्यादेशभावादिरूपे-त्यर्थः। **साधुत्वेति**। एत्व-व्यधिकरणबहुव्रीह्योरित्यादि। अन्यथा समानाधिकरणबहुव्रीहिणैव निर्वाहे तदसङ्गतिः स्पष्टैवेति भावः।

नन्वेव'मस्तेरनन्तरे'इत्यादिभाष्यासङ्गत्यापत्तिस्तेन तेषां तत्त्वालाभादत एव तत्र समीपाद्यनेक-सम्बन्धसम्भावनायां तत्स्थाने स इत्यर्थलाभ इति **रत्नाकरोक्तं** सङ्गतमत आह—**अस्तेरिति**। **अनन्तरा-दीति**। अनन्तरादिपदार्थनिरूपिताव्यवहितवृत्तित्वरूपास्धातुसम्बन्धे षष्ठीत्यर्थः। एवेन तदभिमत-व्यावृत्तिः। एतेन मतुप्सूत्रभाष्यप्रामाण्येन सामीप्यादेरषष्ठ्यर्थत्वादिदं चिन्त्यमित्यपास्तम्। **नन्वेवमिको यणित्यादौ** स्थानपदाभावात्कथमुक्तार्थलाभोऽत आह—**षष्ठीति**। 'अनिर्धारितसम्बन्धविशेषे'त्यादिः। अध्याहारे चेदमपि तात्पर्यग्राहकम्। आदिनानन्तरादिपदपरिग्रहः। तदाह—**अन्यत्रेति**। उद्योतादावित्यर्थः।

अप्रसिद्धत्वात्तत्र मानमाह—**दर्भाणामिति**। आभिचारिके कर्मणीदमुक्तम्। तेषां प्रसङ्गे इत्यर्थः। यत्तु तिष्ठन्त्यस्मिन् शब्दा इति व्युत्पत्त्या स्थानमर्थः, 'अस्तेर्भू' रित्यादेरस्तेरर्थे भूः प्रयोक्तव्य इत्यादिवाक्यार्थ इति तन्न, 'इको यणची' त्यादावव्याप्तेस्तद्धनयन्नाह—**भावे इति**। 'अर्थवत्येव स्थान्यादेशभावः' इति

❀ ज्योत्स्ना ❀

नुमोऽङ्गावयवत्वेऽप्यङ्गावयवारात्निशब्दावयवत्वे प्रमाणाभावादिति दिक्। **भाष्ये उक्तत्वादिति**।

❀ सदाशिवभट्टीयम् ❀

षष्ठीस्थाने योगा। **निरूपितसम्बन्धेति**। स च विषयविषयिभावादिः। **उक्तत्वादिति**। स्थानस्य सम्बन्धत्वे तत्र व्यधिकरणविग्रहप्रदर्शनमफलं स्यादिति भावः। **अध्याहार इति**। **जगन्नाथ-पण्डितराजस्तु**—अस्यैव सप्तम्यन्तस्य स्थानेपदोपस्थापकत्वमाह—**'योगेति**—कर्मणि घञ्, सप्तम्यन्तं स्थाने इत्यनुकृष्य स्थाने या युज्यत इत्यर्थ' इत्यादिना। तदा न निपातनक्लेश इति बोध्यम्। **प्रसङ्ग इतीति**। स

❀ विषमपदविवृतिः ❀

गितानुयोगितान्यतरसम्बन्धेन द्विष्ठत्वनियमात्स्थानस्य चातथात्वादिति भावः। **दर्भाणां स्थाने इति**। इष्टिविशेष इदम्। **शराश्च**-स्थूलास्तृणविशेषाः। **प्रस्तरो**-मुष्टिविशेषः।

स्थानशब्दे । प्रसङ्गश्च सति सम्भवेऽर्थवत एव, अर्थप्रत्यायनार्थं शब्दप्रयोगात् । 'इको य'णित्यादेरच्परेकारघटितशब्दस्यार्थबोधनाय प्रसङ्गे तत्परयकारघटितः प्रयोक्तव्य-

❀ अभिनव-चन्द्रिका ❀

कारकज्ञानीया, तादृशज्ञानीयविशेष्यतावच्छेदकं यदुच्चारणत्वं, तदवच्छिन्नविशेष्यताकं यदिष्टसाधनत्वप्रकारकप्रमाविषयत्वप्रकारकं ज्ञानं–'यण्कर्मकोच्चारणमिष्टसाधनत्वप्रकारकप्रमाविषयः' इत्याकारकं ज्ञानं, तादृशज्ञानीयविशेष्यतावच्छेदकं यदुच्चारणत्वं, तदवच्छिन्नविशेष्यताकं यत् 'यण्कर्मकोच्चारणमिष्टसाधनत्वप्रकारकप्रमाविषयः' इत्याकारकमिष्टसाधनत्वप्रकारकप्रमाविषयत्वप्रकारकज्ञानं, तादृशज्ञानीयविशेष्यतावच्छेदकतावच्छेदकतावान्यणित्यादिबोधः। नच 'जराया' इत्यादिविकल्पस्थले स्थानपदार्थत्वानुपपत्तिः, विकल्पस्थले स्थानिनोऽपि साधुत्वेन 'जराकर्मकोच्चारणमिष्टसाधनत्वप्रकारकभ्रमविषयः' इत्याकारकज्ञानस्याभावादिति वाच्यम्, स्थानपदस्य वृत्तिविशेष्यतावच्छेदकतावच्छेदकताकेष्टसाधनत्वप्रकारकप्रमाविषयत्वप्रकारकज्ञानीयविशेष्यतावच्छेदकतावच्छेदकतायाम्, इष्टसाधनत्वप्रकारकभ्रमविषयत्वप्रकारकत्वे च खण्डशक्तिस्वीकारेण विकल्पस्थले चेष्टसाधनत्वप्रकारकभ्रमविषयत्वप्रकारकत्वरूपखण्डस्य मोषस्वीकारेणादोषात् । अत एवा'नेन महामूर्खेण यण्स्थाने इक्प्रयुक्तः' 'शराणां स्थाने

❀ चिदस्थिमाला ❀

सिद्धान्तस्य सम्भवाभिप्रायकत्वमित्याशयेनाह—**प्रसङ्गश्चेति** । नन्वेव'मिको य'णित्यादौ का गतिरत आह—**इको यणिति** । न च यः कश्चित्तद्घटितः स्यात्, विधेयान्यश्रूयमाणवर्णत्यागे मानाभावात्, तस्य तदर्थबोधनासमर्थत्वाच्च । **इतीति** । 'अर्थे' इत्यस्यानुषङ्गः ।

❀ ज्योत्स्ना ❀

स्थानं=योगस्तद्रूपः सम्बन्धो यस्या वाच्य इति समानाधिकरणबहुव्रीहिणा सिद्धे स्थानेन योगो यस्या इति व्यधिकरणबहुव्रीहिप्रदर्शनं 'षष्ठ्या वाच्यः स्थानादिरर्थो नान्यो'ति सूचयतीति भावः ।

सति सम्भवे इति।'इको यणची'त्यादौ त्वगत्यानर्थकस्यापि प्रसङ्गः। वस्तुतस्तत्रापि न दोष इत्याह–**इको यणित्यादेरिति । इकारबुद्धिप्रसङ्ग इति** । अस्मिन्पक्षेत्वनर्थकस्यापि प्रसङ्गो ज्ञेय इति विशेषः ।

❀ सदाशिवभट्टीयम् ❀

चाहार्यज्ञानरूपापत्तिरूपः, **स्थानित्वञ्च** तद्विषयतापर्याप्त्यधिकरणत्वम्, आदेशत्वञ्च तत्सत्ताज्ञाप्यसत्तापर्याप्त्यधिकरणत्वम् । यद्वाऽऽपत्तिविषयबुद्धिविषयतापर्याप्त्यधिकरणत्वं—**स्थानित्वम्** । आपत्तिसत्ताज्ञाप्यसत्ताश्रयबुद्धिविषयतापर्याप्त्यधिकरणत्व**मादेशत्वम्** । अतएवाऽपवादे उत्सर्गकृतमतिदेशेन प्राप्यय प्रकारान्तरेण वारितं भाष्ये । अथवा–स्थानपदान्वितत्वं–स्थानपदार्थनिरूपितसम्बन्धवाचकप्रत्ययप्रकृत्यर्थत्वमिति यावत्। स्थानपदान्वितसत्ताज्ञाप्यसत्तान्वयित्वमादेशत्वम् । अत एव स्थानिवत्सूत्रे कैयटे-'ऽपवादप्रसङ्ग'स्त्विति प्रतीकमुपादाय बुद्धिविपरिणाममात्रं यदि स्थान्यादेशभाव इति भाव इत्युक्तं, तत्र 'यदी'त्युक्त्याऽन्यथोत्सर्गकृतप्रसङ्गो नास्तीति सूचितं, तच्च तयोरुक्तलक्षणत्वे एव सङ्गच्छते ।

प्रसङ्गश्चेति। 'इह शास्त्रे गृह्यते' इति शेषः। **सतिसम्भवेइति**। 'सार्थक्यस्ये'ति शेषः। 'अचः परस्मि'न्नित्यादौ तु तदसम्भवादनर्थकप्रसङ्गोपि गृह्यते इति भावः । बीजमाह—**अर्थप्रत्यायनार्थमिति** । अयं भावः—नित्यत्वानुरोधेन तस्यैव सोऽन्तस्यापि तस्य स्वीकारे तत्त्वं स्यात्, पदस्य वाक्यस्य च

❀ वरवर्णिनी ❀

प्रसङ्गश्चेति। इदमत्र तत्त्वम्–'इको यणची'त्यादौ यत्र स्थान्यादेशभावस्तत्र 'इक्कर्मकमुच्चारणमिष्टसाधनत्वप्रकारकभ्रमविषयतावत्' 'यण्कर्मकमुच्चारणमिष्टसाधनत्वप्रकारकप्रमाविषयताव'दिति च ज्ञानद्वयम्, आद्यज्ञानीया विशेष्यता च- इक्कर्मकोच्चारणनिष्ठा, विशेष्यतावच्छेदकता च–कर्मत्वनिष्ठा, तदवच्छेदकता च इक्निष्ठा । स्थानपदार्थतावच्छेदकवृत्तित्वे च निरूपितत्वसम्बन्धेनेगादेरन्वयः, वृत्तित्वञ्च–विशेष्यतावच्छेदक-

इत्यर्थः । 'एरु'रित्यादेश्च 'तेस्तु'रिति, अतो न शब्दनित्यताहानिः ।

❀ अभिनव-चन्द्रिका ❀

दर्भाः प्रस्तरिता' इत्यादावपि स्थानपदार्थोपपत्तिरिति दिक् । अन्ये तु अभाव एव स्थानपदार्थः, प्रतियोगितयाऽभावान्वयि प्रयोज्यत्वं षष्ठ्यर्थः, अभावस्य च स्यादितिलिङर्थेष्टसाधनत्वेन्वयः, तथा च इकोयणचीत्यादौ इक्प्रयोज्यत्वाभाववदिष्टसाधनत्ववान् यणिति बोधः । विकल्पस्थले स्थानपदार्थोऽभावस्य विकल्पपदार्थाभावेन्वयः । तथा जराया जरसित्यादौ जराप्रयोज्यत्वाभावाभाववदिष्टसाधनत्ववान् जरसिति बोधः । तथा च अभावाभावस्य प्रतियोगिरूपत्वेन विकल्पस्थले स्थान्यपीष्टसाधनमादेशोपीष्टसाधनमित्युभयोरपि साधुत्वं सिध्यतीत्याहुः ।

तेस्तुरिति । 'भवती'त्यस्य स्थाने भवत्वित्यादिप्युपलक्षणम्, अन्यथा शब्दानित्यत्वं

❀ चिदस्थिमाला ❀

अत इति ।'तत्प्रसङ्गे'इत्युक्तेरित्यर्थः । अत एव 'सर्वे सर्वपदादेशा' इति सिद्धम् । च्लिसिजादिसङ्ग्रहाय 'सति सम्भवे' इति । नन्वेवं साक्षादवयवानामेव षष्ठीनिर्दिष्टत्वस्य विधेयत्वस्य चानर्थक्यापत्तिरत आह—

❀ सदाशिवभट्टीयम् ❀

नित्यत्वं, तदवयवस्य प्रसङ्गस्वीकारेऽनित्यत्वं स्पष्टमेव । **तेस्तुरिति** । इदञ्च न शाब्दं, किन्तु फलितं, सर्वत्र स्थानिवाचकादेशवाचकयोस्तद्घटिते लक्षणयेकारघटितस्योकारघटित इत्येवं क्रमेणैकरूप एव शाब्दोऽर्थ इति बोध्यम् । **अतो नेति** । तद्घटितं लक्षणाङ्गीकारादेवेत्यर्थः, तेस्तुरितिकल्पनादेवेति तु नार्थस्तेन पचत्वित्यादेः समुदायस्यानित्यत्वावारणात्, तत्कल्पनन्तु प्रत्ययादेरपि कल्पितार्थत्वेन तन्नित्यत्वसंरक्षणद्वारा प्रक्रियानिर्वाहमात्रफलकं न त्वन्यथासिद्धमन्यत्फलमस्ति, पचतेः पचतु रित्यनेनैव तदनित्यत्वस्यापि परिहारात् ।

❀ वरवर्णिनी ❀

तावच्छेदकतायामन्वेति । स्थानपदार्थघटकीभूतचरमविशेष्यतावच्छेदकतावच्छेदकताया आश्रयत्वेनादेशेऽन्वयः । तथा च इन्निरूपितवृत्तितावती या 'इक्कर्मकमुच्चारणमिष्टसाधनत्वप्रकारकभ्रमविषयताव'दिति ज्ञानीया—**उच्चारण**निष्ठविशेष्यतानिरूपित—**कर्मत्व**निष्ठावच्छेदकतानिरूपिता इन्निष्ठा विशेष्यतावच्छेदकतावच्छेदकता, तादृशविशेष्यतावच्छेदकतावच्छेदकतानिरूपकं यत्—'इक्कर्मकमुच्चारणमिष्टसाधनत्वप्रकारकभ्रमविषयताव'दिति ज्ञानं, तादृशज्ञानीयां या उच्चारणनिष्ठा विशेष्यता, तदवच्छेदको धर्मः—उच्चारणत्वं, तादृशोच्चारणत्वावच्छिन्नविशेष्यतानिरूपकञ्च यत्—'यण्कर्मकमुच्चारणमिष्टसाधनत्वप्रकारकप्रमाविषयताव'-दितिज्ञानं, तादृशज्ञानीया—विशेष्यता—**उच्चारण**निष्ठा, तदवच्छेदकता—**कर्मत्व**निष्ठा, तदवच्छेदकता (विशेष्यतावच्छेदकतावच्छेदकता)—यण्निष्ठेति लक्षणसमन्वयः ।

विकल्पस्थले 'जराया जर'सित्यादौ तु—'वृत्तिविशेष्यतावच्छेदकतावच्छेदकतानिरूपक—(प्रथमज्ञानीय)—विशेष्यताविशिष्ट—(द्वितीयज्ञानीय—)—विशेष्यतावच्छेदकता'प्रसङ्गपदार्थः । वै०**'स्वावच्छेदको**च्चारणत्वावच्छिन्नत्व' 'स्वप्रयोजकशास्त्रप्रयोज्यत्व' 'स्वनिरूपितप्रकारताविशिष्टप्रकारतानिरूपित्वै'तन्त्रितयसम्बन्धेन । प्रकारतावैशिष्ट्यञ्च—'स्वावच्छेदक—साधुत्वप्रकारकभ्रमात्मकज्ञानीयविशेष्यतात्व-—घटक—साधुत्व—प्रकारकप्रमात्मकज्ञानीयविशेष्यतात्वा—ऽवच्छिन्नत्व' 'स्वावच्छेदक—साधुत्वप्रकारकप्रमात्मकज्ञानीयविशेष्यतात्वा—ऽवच्छिन्नत्वै'तदन्यतरसम्बन्धेन । 'इको यणची'त्यादौ पूर्वोक्तप्रथमज्ञानीया उच्चारणत्वावच्छिन्ना विशेष्यता—इन्निष्ठावच्छेदकतानिरूपितकर्मत्वनिष्ठावच्छेदकतानिरूपिकैव, तद्वैशिष्ट्यञ्च तादृशद्वितीयज्ञानीयोच्चारणत्वावच्छिन्नविशेष्यतायामक्षतं—द्वयोरेकशास्त्रप्रयोज्यत्वादुच्चारणत्वावच्छिन्नत्वाच्चेति—(प्रकारतविशिष्टप्रकारतानिरूपितत्वस्यापि सत्त्वाच्च)—लक्षणसमन्वयः । 'जराया' इत्यादिना—'जराकर्मकं जरस्कर्मकञ्चोच्चारणमिष्टसाधनत्वप्रकारकप्रमात्मकज्ञानीयविशेष्यताव'दित्येव बोध्यत इति प्रकारताविशिष्टैव प्रकारतेति तत्रापि समन्वय इत्यस्मत्पितृचरणा न्यायाचार्याः **श्रीशिवनारायणशास्त्रिणः** । विस्तरस्त्व**भिनवराजलक्ष्म्या**मनुसन्धेयः ।

किञ्चेकारबुद्धिप्रसङ्गे यकारबुद्धिरित्यर्थः। अत 'एवाचः परस्मिन्नि'त्यादि सङ्गच्छते। स्पष्टञ्चेदं 'दाधा घ्वि'तिसूत्र-स्थानिवत्सूत्रयोर्भाष्ये।

स्थानेऽन्त। 'षष्ठी'त्यनुवृत्त्या 'यत्र स्थानषष्ठी तत्रेदमुपतिष्ठते' इति विध्येकवाक्यतयैवास्य नियामकत्वं, न तु विहितानां नियमः, 'भुक्तवन्त'मितिन्यायविरोधात्। फलितमाह—**प्रसङ्गे इति। सदृशतम इति।** अर्थात्प्राप्यमाणानां मध्ये एव। अत एव **'गङ्गोदक'**मित्यादौ त्रिमात्रो न। तमप्किम्? 'वाग्घरि'रित्यादौ महाप्राणत्वसाम्येन जायमानः पूर्वसवर्णो—वर्गद्वितीयो मा भूत्, किन्तु नादवान्महाप्राणश्चतुर्थो 'घ' एव यथा स्यादिति। 'स्थानेऽन्तरतमे' इति सप्तम्यन्तपाठस्तु—दीर्घेषु यणसिद्ध्या दुष्ट इति

❀ अभिनव-चन्द्रिका ❀

दुर्वारं स्यात्। **सदृशतम इति**। तत्त्वञ्च—'स्ववृत्तित्व', 'स्वस्थानिकादेशवृत्तित्व' 'स्वस्थानिकादेशत्वेनाभिमततरयावदादेशावृत्तित्वै'तन्त्रितयसम्बन्धेन स्वविशिष्टत्वम्। स्वपदेनात्र स्थानी। अत एव 'इको यणची'त्यादिना ऌकारस्य बकारो न। **दीर्घेषु यणसिद्ध्येति**। सप्तम्यन्तपाठे हि—'स्ववृत्तित्व' 'स्वघटितदलभिन्नदलीयवृत्तित्व' 'स्वघटितदलभिन्नदलीयस्वस्थानित्वेनाभिमतस्थानीतरस्थान्यवृत्तित्वै'

❀ चिदस्थिमाला ❀

किञ्चेकेति। स्पष्टञ्चेदमिति। तत्राद्ये हि 'प्रनिदारयतीत्यादौ णुत्वाभावाय कृतं 'समानशब्दप्रतिषेध' इति वार्तिकमर्थवत्परिभाषया खण्डयित्वा 'प्रणिदापयती'त्यत्र तयैवाप्यासिमाशङ्क्य-'न वार्थवतो ह्यागमस्तद्गुणीभूतस्तद्ग्रहणेन गृह्यते'इत्याद्युक्त्वा नित्येष्वागमशासनमयुक्तमित्याशङ्क्य नित्येष्वादेशशासनं यथाबुद्धिविपरिणामेन तथात्रापीत्याशयेना'देशास्तर्हीमे भविष्यन्ति अनागमकानां सागमकास्तत्कथं सर्वे सर्वपदे'त्याद्युक्तम्। एवमन्त्येऽपि।

लघुभूतं शाब्दार्थमाह—**षष्ठीति। स्थाने षष्ठीति**। तदर्थनिरूपितसम्बन्धे षष्ठीत्यर्थः। अत्रेदम्=अन्तरतम इति पदम्। **एकेति**—पदैकेत्यर्थः। एवव्यवच्छेद्यमेवाह—**न त्विति**। स्थाने=स्थितौ सत्यामन्तरतम इत्यर्थादिति भावः। तथा च वाक्यैकवाक्यतेति बोध्यम्। ननु न विहितानां नियमः, उक्तयुक्तेः, किन्तु 'उरणि'तिवत्प्रसङ्गावस्थायामेवानेन वाक्यैकवाक्यतया'ऽलोन्त्यस्ये'त्यादिवन्नियम इति मूलं शाब्दार्थपरमेवास्त्विति चेन्न, 'गङ्गोदक'मित्यादौ दोषापत्तेस्तदेतद्धनयन्नाह—**अर्थादिति। अत एव**=तेषां मध्यस्थकरणादेव। तथानुक्तौ तु तत्प्रसङ्गेऽप्राप्यमाणेऽपि सदृशतमः स्यादिति भावः। **दीर्घेषु**='सुद्ध्युपास्य' इत्यादिस्थलेषु। एतेन—तन्त्रादिनो-

❀ ज्योत्स्ना ❀

सङ्गच्छत इति। समुदायादेशत्वे त्वजादेशत्वाभावात्तदसङ्गतिरिति भावः। **स्पष्टञ्चेदमिति**। 'दाधा-

❀ सदाशिवभट्टीयम् ❀

तदनित्यत्वस्यापि परिहारात्। **बुद्धिप्रसङ्ग इति**। स्थान्यादेशसमर्पकयोः स्वबुद्धिलक्षकत्वमिति भावः। **इत्यप्यर्थ इति**। अपिना लक्ष्यार्थबोधात्पूर्वभाविन 'इकारस्योकार' इत्यादेः शक्यस्य सङ्ग्रहः, अतो न किञ्चिति चेन पौरुक्त्यम्। इदन्तु बोध्यं—प्रक्रियायै आवश्यकतद्घटितलक्षणयैव नित्यत्वस्यापि संरक्षणे सिद्धे बुद्धिलक्षकत्वस्य निष्फलत्वात्, नहि बुद्धिलक्षणया पचत्वित्यादेः पदत्वं साधयितुं शक्यत इति। **अत एवेति**। शक्यार्थाङ्गीकारादेवेत्यर्थः। आदिना 'न पदान्त' सूत्रपरिग्रहः।

स्थानेऽन्तरतमः। विरोधादिति। तुल्यन्यायात्तसिन्नित्यादेरपि सम्भवात्पदोपस्थापकस्य तत्त्वं सूचितम्। **तमप्किमिति**। येन केनचित्सादृश्यस्य केवलान्वयित्वादन्तग्रहणसामर्थ्यात्प्रकर्षलाभे सिद्धे तद्यर्थमिति प्रश्नाशयः। **यथा स्यादिति**। यथा—ज्ञापिते चारितार्थ्याभावेप्यणुदित्सूत्रीयाप्रत्ययपदस्य

❀ विषमपदविवृतिः ❀

किञ्चेति। अस्मिन्पक्षे शब्दानित्यत्वं रेखागवयन्यायेन समाधेयम्।

भाष्ये स्पष्टम् । **यत्रानेकेति** । स्थानेग्रहणे एकदेशानुवृत्त्याऽनुवर्त्तमाने पुनः स्थानेग्रहणं तृतीयया विपरिणामेन वाक्यभेदमाश्रित्य प्रसङ्गे—सति सम्भवे—स्थानत एवान्तरतम इत्यर्थमिति भावः । **स्थानत इति** । स्थानेनेत्यर्थः । तत्र स्थानतः—'इको यणचि' इति । अर्थतः—'तृज्वत्क्रोष्टुरि'ति । इह क्रोष्टुशब्दस्थाने पक्तृशब्दो नादेशः । गुणतस्तु—'वाग्घरि'रित्यादौ । प्रमाणतः 'अदसो ऽसे'रित्यादौ ।

तस्मिन्निति। अत्र 'तस्मिन्नि'ति उत्तरत्र 'तस्मा'दिति च सप्तम्यन्तपदपञ्चम्यन्तपदार्थकः स्वतन्त्रस्य सर्वनाम्नो—निर्देशो व्याख्यानात्, बहुलक्ष्यसंस्कारानुरोधाच्च;

❀ अभिनव-चन्द्रिका ❀

तत्त्रितयसम्बन्धेन आदेशविशिष्टत्वमन्तरतमत्वम् । तथा च प्रकृते अर्धमात्राधिककालशून्यत्वमेव तादृशं स्यादिति दीर्घे यण्न स्यादिति भावः ।

तृज्वत्क्रोष्टुरिति । वस्तुतस्तु तृज्वद्विधायकत्रिसूत्र्याः प्रयोगनियमार्थत्वेन अर्थत इत्यस्योदाहरणम्। आनुमानिकस्थान्यादेशकल्पे 'इको यणची'त्यादि बोद्धव्यम् । इह 'सुधी उपास्य' इत्यस्य स्थाने 'मध्वरि'रिति नादेशः । **अदसोऽसेरितीति** । ह्रस्वव्यञ्जनयोश्चान्तरतम्यं सार्धमात्रान्यूनकालिकत्वमिति

❀ चिदस्थिमाला ❀

भयमपीत्यप्यपास्तम् । **भाष्ये स्पष्टमिति** । एतेन 'त्वादिभ्य'इत्यादिज्ञापकात्सोप्यदुष्ट इति **रत्नाकरोक्त**मपास्तम्।

(अत्र[1] मानमाह—**स्थाने इति** । वृत्त्या=अन्यत्र दृष्ट्या । तृतीयया=तदन्तेन ।) ननु ततस्तन्मात्राङ्गीकारे द्वितीयवाक्यार्थ एव स्यान्न तु पूर्ववाक्यार्थः, 'सकृदुच्चरित'इति न्यायात्, अत आह—**वाक्येति** । आवृत्त्येति भावः । तत्रानुवृत्तार्थमाह—**प्रसङ्गे इति** । 'आदेशानां''स्थानिनो जायमान' इत्याद्यन्तौ । सति सम्भवे इत्यनेना'सम्भवेऽन्यस्यापि ग्रह'इति सूचितं, यथा वाग्घरिरित्यादौ । अत्रत्यविपरिणतार्थमाह—**स्थानत इति** । अयञ्च सामर्थ्यात्ताल्वादिस्थानपरः, एवेनान्यान्तर्यव्यावृत्तिः । **इत्यर्थकमिति** । इत्यर्थनिष्पत्तिजनकमित्यर्थः । अत एव क्त्वोपपत्तिः । न चानेकविधान्तर्ये सत्त्वे एव मानाभावेन किमर्थं वाक्यभेदः ? तथा चाननुवृत्तौ मौल एवार्थोनुवृत्तौ प्रसङ्गे स्थानकृतान्तर्यवानित्येवार्थस्तत इति वाच्यम्, तमप्ग्रहणस्यैव मानत्वात्, अन्यथोक्तफलासम्भवेन तदानर्थक्यं स्पष्टमेव । पञ्चम्यन्तत्वेन विपरीतार्थभ्रमनिरासायाह—**स्थानेनेत्येति । सप्तेति** । इष्ट्यावदित्यादिः । स्वतन्त्रस्येत्यनेनानुकरणत्वस्य **दीक्षिताद्युक्त**स्य निरासः । **व्याख्यानादिति** । 'एङ्ह्रस्वा'दित्यादाविवाङ्गाक्षेपे तत्र चाक्षेपकखञणोःसम्बन्धेन 'हे यौष्माकीण! अस्मभ्यं देही'त्यादौ खञः परस्यादेशनिवृत्तिसिद्धौ स्वरूपग्रहणे फलाभावेन 'न ह्येक'मिति न्यायेन तत्रैव पूर्वस्येत्यादेः सुकरत्वेन चास्य वैय्यर्थ्यापत्तेरित्यर्थः । ननूत्तरसूत्रे नेदं सम्भवति, तत्र बहुषु फलसत्त्वात्तत्र सर्वत्राक्षेपकाभावात्तेनानिर्वाहाच्च, अत आद्यसाधारणायाह—**बहुलक्ष्येति** । अत एव

❀ सदाशिवभट्टीयम् ❀

भाव्यमानपरिभाषाज्ञापकत्वं तथास्य तमपोप्यनेकविधान्तर्यसत्ताबोधकत्वमित्युत्तराशयः । 'तृज्वत्क्रोष्टु' रिति सूत्रे क्रोष्टुरिति षष्ठ्यन्तमिति भावः । 'स्त्रीपुंवच्चे'त्यादौ तु षष्ठ्याः स्थाने प्रथमा, स्पष्टञ्चेदं स्थानिवत्सूत्रे कैयटे । 'तुन्नन्तात्प्रथमे'त्यादिवक्ष्यमाणग्रन्थास्तु प्रकृतसूत्रप्रत्याख्याने लोकन्यायेन सिद्धिरित्यभिप्रायेण, नहि तत्रापि 'यत्र स्थानेषष्ठी'त्यर्थोस्ति । सूत्रारम्भे पूर्वविप्रतिषेधवार्तिकस्थतृज्वद्भावग्रहणस्य यथा साफल्यं तथा तत्रैव वक्ष्येत । **तस्मिन्निति । पदार्थक इति** । इदञ्च इतिशब्दमपर्यालोच्य, तत्पर्यालोचने तु यथार्थस्तथा वक्ष्यति। **स्वतन्त्रस्येति**। अनुकरणस्येतिशब्दपारतन्त्र्यात्,अस्य तत्त्वं तत्र तत्र तथार्थेन तत्तद्रूपेण शक्ति-

❀ विषमपदविवृतिः ❀

तृज्वत्क्रोष्टुरिति । यद्यपि नात्र स्थानषष्ठी, तथापि वर्तिं विहाय प्रथमायाः षष्ठ्यर्थत्वमङ्गीकृत्य

१. () एतदन्तर्गतः पाठः—'आवृत्त्येति भाव' इत्यनन्तरं क्वचित्पठ्यते ।

न तु तत्तत्पदपरम्,—अन्यथा 'तस्मिन्नणि च' 'तस्मान्नुडचि' 'तस्माच्छसो न' इत्यत्रैव प्रवर्त्तेयाताम्। सप्तमी तु 'सप्तम्यन्तानामेव तच्छब्दार्थत्व'मिति बोधनाय, तद्बोध्यार्थस्य 'निर्दिष्टे' इत्यनेन सामानाधिकरण्याय च। 'इति'शब्दः पुनस्तस्य तदर्थपरत्वं बोधयति। निःशब्दो नैरन्तर्ये, दिशिरुच्चारणे। एवञ्च 'सप्तम्यन्तार्थेऽव्यवहितोच्चारिते उपश्लिष्टस्य पूर्वस्य कार्य'मिति वाच्योऽर्थः। एवञ्चैतत्परिभाषाद्वयोपस्थितौ सप्तम्यन्त-

❀ अभिनव-चन्द्रिका ❀

बोध्यम्। **पूर्वस्य कार्यमिति**। न च 'सप्तम्यन्तार्थेऽव्यवहितोच्चारिते उपश्लिष्टस्य पूर्वस्य कार्य'मिति वाक्यार्थबोधस्वीकारे हि—अव्यवहितोच्चारितसप्तम्यन्तार्थोपाश्लिष्टमुद्दिश्य पूर्वत्वं विधीयते इति प्रतीयेत, तच्चानुपपन्नम्, अव्यवहितोच्चारितसप्तम्यन्तार्थोपश्लिष्टस्य केनाप्यसिद्धत्वादिति वाच्यं, तदुद्देश्यान्यथानुपपत्त्यार्थापत्तिमूलक-सप्तम्यन्तार्थे उपश्लिष्टस्य कार्यमव्यवहितोच्चारिते पूर्वस्य बोध्यमित्येवमुद्देश्यविधेयभाववाक्यान्तर—कल्पनेनादोषात्।

परे तु—'तस्मिन्निती'त्यादौ तस्मिन्नित्यौपश्लेषिकाधिकरणबोधकसप्तम्यन्तानामनुकरणं, तथा चौप-

❀ चिदस्थिमाला ❀

स्वं रूपमित्युक्तेस्तत्परमन्यथा नेत्याह—**न तु तत्तत्पदेति**। तत्रासम्भवं वारयति—**अन्यथेति**। **शसो न इति**। 'तस्मान्नुड्द्विहलः' इत्यपि बोध्यम्। फलं तु आद्ये उक्तमेव, अन्यत्र तु अर्थमनर्थं, चैत्रानश्वः, चैत्राऽऽनृजे, उच्चरत आनुपलभते गौरित्यादि बोध्यम्। नन्वेवं सप्तमी व्यर्था, साधुत्वार्थं सोरेवौचित्यात्, अत आह—**सप्तमी त्विति**। तेषामेव पाणिनिबुद्धिस्थत्वमित्यत्र तात्पर्यग्राहकत्वेनानुवादिकेयमित्यर्थः। एवमुत्तरसूत्रेऽपि बोध्यम्। यत्र सप्तम्यर्थबोधस्तत्रैव तदुपस्थितिरिति बोधायापि सा,—अत एव 'नेड्वशि 'तस्मान्नुडचि' 'ङसि' इत्यादौ नोपस्थितिः। 'वशी'त्यादिसप्तम्याः षष्ठ्यर्थत्वात्। एतेन 'सप्तमीनिर्दिष्टे-पूर्वस्ये'ति सूत्रं युक्तमित्यपास्तम्। 'सप्तमीशब्देन यो निर्दिष्ट'इत्यापत्तेश्च,—तदेतद्ध्वनयन्नाह—**तद्बोध्येति**। अत्रत्यतत्पदबोध्याचीत्याद्यर्थस्येत्यर्थः। अन्यथा भिन्नविभक्तित्वात्तन्न स्यात्। एवञ्च निर्दिष्टे इति विशेषणे इवात्रापि विशेष्येऽधिकरणत्वबोधार्थं सावश्यकेति भावः। नन्वेवमितिर्व्यर्थेति आह—**इतीति**। तस्य=अचीत्यादेः। एवं पदार्थमुक्त्वा मूलानुक्तं वाच्यवाक्यार्थमाह—**एवञ्चेति**। ननु किं परिभाषा लिङ्गमतः सर्वलब्धमाह—**एवञ्चैतदिति**।

❀ ज्योत्स्ना ❀

च्वि'ति सूत्रे भाष्ये 'सर्वे सर्वपदादेशा' इति न्यायादाद्यः पक्षः, स्थानिवत्सूत्रे 'कार्यविपरिणामाद्वे'ति द्वितीयः पक्षः किञ्चेत्यादिनात्रोपन्यस्तः, (स्पष्टमुक्तमिति भावः।) **तदर्थपरत्वं बोधयतीति**।

❀ सदाशिवभट्टीयम् ❀

ग्राहकानपेक्षणेन वा। **इत्यत्रैवेति**। 'तस्मिन्' 'तस्मा'त्पदघटित एवेत्यर्थः। **बोधनायेति**। तत्सत्त्वे उपस्थित्या तस्यैव प्रकृत्यर्थत्वनिर्णय इति भावः। **समानेति**। इदञ्च न फलं पदोपस्थापकत्वे, किन्त्वाद्यमेवेति बोध्यम्। **पुनस्तस्येति**। त्वर्थे पुनरिति, विशेषे वा, इतिशब्दाभावे सप्तम्या उपस्थिततरत्वेन प्रकृतेस्तदर्थकत्वमेव गृह्यतेऽतस्तस्य तदर्थपरत्वे तात्पर्यग्राहक **इतिः**। एतेन 'शब्दपरस्यार्थपरत्व'मित्यस्य शब्दतात्पर्येणोच्चारितस्यार्थतात्पर्यकत्वमित्यर्थः, तच्च विरुद्धम्, एकशब्दोच्चारणविलम्बे तात्पर्यभेदाऽसम्भवादिति परास्तम्।

दिशिरुच्चारण। इति। अवसानकार्ये प्रत्ययलोपे प्रत्ययलक्षणविषये चास्य बाधादेतदंशविकलैवेय-

❀ विषमपदविवृतिः ❀

क्रोष्टुशब्दस्थाने तृजन्त आदेश इत्यभिप्रेत्येदम्। **इतिशब्द इति**। इदमयुक्तम्, इतिशब्दस्य—स्वसमभिव्याहृतपदे पदार्थविपर्यासकारित्वं स्वभावो, न तु तद्बोध्यस्य शब्द-

पदस्य पञ्चम्यन्तपदस्य चार्थो लिङ्गम् । अत्र सूत्रे उपश्लिष्टपदाध्याहारेण 'निर्दिष्टे' इति औपश्लेषिकेऽधिकरणे सप्तम्येवोचिता—'उपपदविभक्ते'रिति न्यायात्, न तु सति-

❀ अभिनव-चन्द्रिका ❀

श्लेषिकाधिकरणबोधकसप्तम्यन्तपदघटिते शास्त्रे 'निर्दिष्टे पूर्वस्ये'त्युपतिष्ठते । एवं 'तस्मादिति' इत्यत्रापि तस्मादिति दिग्योगलक्षणपञ्चम्यन्तानामनुकरणं,तदेवं दिग्योगलक्षणपञ्चम्यन्तपदघटिते शास्त्रे'निर्दिष्टे उत्तरस्ये'त्युपतिष्ठते । 'निर्दिष्टे' इत्युभयत्र सतिसप्तमी । अथवा 'तस्मिन्निति'परिभाषायामितिपदमौपश्लेषिकाधिकरणबोधकसप्तम्यन्तार्थोपश्लिष्टसम्बन्धिकार्यपरम् ,एवं'तस्मा'दितिपरिभाषायामपि इतिपदं दिग्योगलक्षणपञ्चम्यन्तार्थान्वयिसम्बन्धिकार्यपरं, 'तस्मि'न्निति 'तस्मा'दिति च निरुक्तार्थतात्पर्यग्राहके । तथा चौपश्लेषिकाधिकरणबोधकसप्तम्यन्तार्थोपश्लिष्टं कार्यमव्यवहितपूर्वसम्बन्धि बोध्यम् । एवं दिग्योगलक्षणपञ्चम्यन्तार्थान्वयिसम्बन्धि कार्यमव्यवहितोत्तरसम्बन्धि बोद्धव्यमिति क्रमेण परिभाषयोर्वाक्यार्थबोधः । न च 'इको यणची'त्यत्र अचि इत्यौपश्लेषिकाधिकरणबोधिका सप्तमी, एवम् 'उदः स्थे' त्यादौ 'उद' इति दिग्योगलक्षणा पञ्चमीत्यत्र नियामकाभावादेतत्परिभाषाद्वयीयोद्देश्यासिद्धिरिति वाच्यम्, एतदुद्देश्यान्यथानुपपत्त्या 'असति प्रमाणान्तरेऽस्मिञ्छास्त्रे यानि सप्तम्यन्तानि तानि सर्वाण्यौपश्लेषिकाधिकरणबोधकानि, यानि च पञ्चम्यन्तानि तानि सर्वाणि दिग्योगलक्षणानी'ति कल्पनेनादोषात् । एतन्मूलकमेव पठ्यते—'तस्मिन्नितिपरिभाषायां जागरूकायां सतिसप्तम्याश्रयणमयुक्त'मिति । एतन्मूलिकैवो'पपदविभक्त्यर्थे कारकविभक्त्यर्थे च यत्र तात्पर्यं प्रसक्तं तत्र कारकविभक्त्यर्थे एव तात्पर्यं कल्पनीय'मित्येतदर्थिका–'व्याख्यानत' इति परिभाषाशेषभूता—'उपपदविभक्तेः कारकविभक्तिर्बलीयसी'ति परिभाषा 'तत्र च दीयते' इति कैयटे पठ्यते इति प्राहुः ।

औपश्लेषिकाधिकरण इति । वस्तुतस्तु 'निर्दिष्टे' इति सतिसप्तम्येव । 'निर्दिष्टे' इति विधेयकोटिप्रविष्टत्वेन तस्मिन्नित्यनेन सामानाधिकरण्यासम्भवात् । 'उपपदविभक्ते'रितिन्यायस्तु अनित्यत्वान्न प्रवर्तते । 'सतिसप्तम्याश्रयणमशक्य'मित्येतत्तत्त्वन्तु प्रागेवावोचाम ।

❀ चिदस्थिमाला ❀

ननु वाच्यार्थे उपश्लिष्टस्येत्यधिकमत आह—**अत्रेति** । एवव्यावर्त्यमेवाह—**नत्विति** ।

❀ ज्योत्स्ना ❀

एवन्तु तस्मिन्नित्येतावन्मात्रस्यैव सप्तम्यन्तार्थबोधकत्वमस्तु कृतमधिकेनेतिशब्देनेति चिन्त्यमेतत् ।

तस्मात्तस्मिन्नित्येतस्माच्छब्दपरादुत्तर इतिशब्दो हेतुपरः, सप्तम्यन्तशब्देन निर्दिष्टे निरन्तरोच्चारणविषयत्वेन बोधिते उपश्लिष्टस्य पूर्वस्य कार्यं भवतीत्यर्थः । यद्वा तस्मिन्निति

❀ सदाशिवभट्टीयम् ❀

मुपातिष्ठते । वस्तुतस्तूच्चारणार्थकत्वे फलाभावात्समानार्थकत्वेपि न क्षतिः । 'जनपदे लु'बित्यादौ च

❀ विषमपदविवृतिः ❀

स्वार्थपरत्वव्यवस्थापनं, तस्मादितिशब्दः कार्यिकार्योभयस्थापको निपातानामनेकार्थत्वात् । तच्छब्दः सप्तम्यन्तार्थपरामर्शकः । तथा च सप्तम्यन्तार्थोपश्लिष्टस्य कार्यिणो यत्कार्यमिति—तस्मिन्नितीत्यस्यार्थः । 'निर्दिष्ट' इत्यादेश्च–सप्तम्यन्तार्थेऽव्यवहितोच्चारितपूर्वस्य तद्बोध्यमित्यर्थः । एवं 'तस्मा'दित्यस्याप्यर्थो बोध्यः । यद्वा–इतिशब्दः प्रकारे, एवं प्रकारेण वर्तमानं कार्यमिति । **अर्थो लिङ्गमिति** । न तु स्वरूपसती सप्तमी पञ्चमी च निमित्तम् । 'यस्मिन्विधि'रित्यादेस्तु–स्वरूपसती सप्तमी निमित्तं, तेन 'नेड्वशी'त्यादौ तदुपस्थितिः, एतदुपस्थितिश्च । **'उपपदविभक्ते'रिति** । कारकविभक्तिसम्भवे उपपदविभक्तिर्न न्याय्येत्यपि तन्न्यायार्थ इति भावः ।

सप्तमीति 'तत्र च दीयते' इति सूत्रे कैयटे स्पष्टम् । 'स्नुक्रमो'रिति सूत्रे कैयट आह—'तस्मिन्निति परिभाषायां सत्यां सत्सप्तम्याश्रयणमशक्य'मिति । उपश्लेषः—समीपवृत्तित्वं, तच्च वर्णयोर्बौद्धं द्रष्टव्यम् । एवम्—'इको यणची'त्यादावपीयमेवेति 'संहिताया'मिति सूत्रे भाष्ये ।

तत्रोपश्लेषः पूर्वस्येव परस्याव्यवहितस्येव व्यवहितस्य चेति—पूर्वस्यैवेति नियमार्थमिदम्, अव्यवहितस्यैवेति च । अत एव लक्ष्यानुसारात्क्वचित्सतीत्यध्याहारात्सत्सप्तम्याश्रयणे नास्याः प्रवृत्तिरिति—'श्नान्नलोप' इत्यत्र भाष्ये उक्तम् ।

अत एव 'कर्तृकर्मणोः कृती' त्यत्र नास्याः प्रवृत्तिः, 'कृति सति प्रत्यासत्त्या तत्प्रकृत्यर्थकर्तृकर्मणोः षष्ठी'ति तदर्थात् । 'तस्मा'दिति सूत्रे—'निर्दिष्टे' इति निर्दिष्टादित्यर्थकं, विभक्तिविपरिणामात् । सा चोत्तरस्येतिदिग्योगलक्षणा इति—दिग्योगलक्षणपञ्चम्यामेव

❀ अभिनव-चन्द्रिका ❀

निर्दिष्टादित्यर्थकमिति । इदं चिन्त्यमिति पूर्वमेव निरूपितम् ।

❀ चिदस्थिमाला ❀

मानान्तरमाह—**स्नुक्रमोरिति** । तथा च तदनुरोधेनात्रापि तथेति भावः । **बौद्धमिति** । उत्पत्त्यादेः क्रमिकत्वादिति भावः । **एवमिति** । अत्रैवेत्यर्थः । इयमेव=औपश्लेषिकाधिकरणसप्तम्येव । **भाष्ये इति** । 'स्पष्ट'मिति शेषः । तत्र=तदङ्गीकारे । नियमद्वयस्यैकवाक्यत्वाऽलाभाद्भेदेनाह—**अव्यवेति** । अत एव=अत्र तत्सप्तम्यङ्गीकारादेव । एवमग्रेऽपि । ननु प्राक्कैयटोक्तरीत्या दुर्लभमिदमत आह—**अलक्ष्येति** । अत एवाह—**क्वचिदिति** । 'अयं सप्तम्यर्थ' इति भ्रमनिरासायाह—**सतीत्येति** । 'क्वचि'दित्युक्तस्थलं निरूपयन्नाह—**अत एवेति** । 'इती'त्यग्रे'ऽनुवृत्त'मिति शेषः । अत एव तस्मादित्यनेन सामानाधिकरण्यमिति भावः । सा च=निर्दिष्टादित्यादिघटकपञ्चमी चेत्यर्थः । **रस्येतीति**। 'श्रुते'रिति

❀ ज्योत्स्ना ❀

शाब्दज्ञानानुकरणं, तस्य च निर्दिष्टपदबोध्ये निरन्तरोच्चारणविषयत्वेन बोधेऽभेदेनान्वयः । ततश्चाचीत्याद्याकारकसप्तम्यन्तपदतदर्थोभयविषयं यत्तदभिन्नं निरन्तरोच्चारणविषयत्वेन यज्ज्ञानं

❀ सदाशिवभट्टीयम् ❀

औपश्लेषिकसप्तम्यभावादानन्तर्यबाधाच्च न दोषः । **बौद्धमिति** । अयम्भावः—सामीप्यं पौर्वापर्यं च कालिकं दैशिकञ्चेति द्विविधम्, तच्च युगपदवस्थितानामेवेति शब्दे यौगपद्यासम्भवेन द्वयोरप्यसम्भवेप्येकबुद्धौ विषयतयाऽनेकेषामपि यौगपद्यसम्भवः । यद्यपि लोके 'चैत्रात्पूर्वः फाल्गुन' इति भिन्नकालिकयोरपि कालिकं पौर्वापर्यमस्ति तथापि शास्त्रे न तथा वक्तुं शक्यं, प्रत्ययनिमित्तककार्याणां प्रत्ययोत्पत्तेः पूर्वमपि कालिकतत्परत्वमादाय प्रवृत्त्यापत्तौ बहूपप्लवापत्तेरिति । स्पष्टञ्चेदं संहितासञ्ज्ञासूत्रे भाष्यकैयटोद्योतेषु । **कर्तृकर्मणोरिति** । 'प्रत्ययलोपे प्रत्ययलक्षण'मित्यत्राप्येवम् । तत्र परसप्तमीत्वे व्यवहितस्य ततः परस्य च कार्यं न

❀ विषमपदविवृतिः ❀

बौद्धमिति । वर्णानां सर्वदेशकालवृत्तित्वादिति भावः । **इयमेवेति** । औपश्लषिकेऽधिकरणे सप्तम्येवेत्यर्थः । ननु 'प्रत्ययः', 'परश्च', 'ङ्याप्प्रातिपदिकात्' 'गाङ्कुटादिभ्य'इत्यदावंशविशेषविकल्पपरिभाषोपस्थितौ परिभाषाणां नियमत्वं न सम्भवति, प्रत्ययार्थान्वितप्रकृत्यर्थबोधासम्भवेन षष्ठ्यर्थांशविकलनियमशरीर-

तत्प्रवृत्तिः । 'उदः स्था' इत्यादौ च 'उद' इति दिग्योगलक्षणा पञ्चमी । तत्रानियत-दिक्शब्दाध्याहारे प्रसक्ते परशब्दस्यैवाध्याहार इति—'तस्मा'दित्यनेन नियम्यते । 'अव्य-वहितोच्चारितात्पञ्चम्यन्तात्परस्ये'ति तदर्थः । तत्फलितमाह—**सप्तमीनिर्देशेनेत्यादि** ।

यदि तु अर्धमात्राधिककालेन वर्णान्तरेण वा व्यवधाने उपश्लेष एव नेत्युच्यते तदा निर्दिष्टपदं संहिताधिकारश्च विफल इति 'संहिताया'मिति सूत्रे भाष्ये स्पष्टम् ।

'अवग्रहे च सम्प्रदाय एव शरण'मिति आनङादिविषये आदेशोत्तरमेवावग्रहोऽन्यत्र ततः प्राक् । अकृतव्यूहपरिभाषा त्वनित्या, नास्त्येव वा । 'न लक्षणेन पदकारा अनुवर्त्याः, पदकारैर्नाम लक्षणमनुवर्त्य'मिति भाष्येण—तदनुरोधेन शास्त्रासङ्कोचस्य शास्त्रकरणा-भावस्य च स्पष्टमुक्तत्वाच्च । एतेन संहिताधिकारस्तद्बहिर्भूतानामर्धमात्राधिककाल-व्यवाये प्रवृत्तिज्ञापनार्थः, तेनाग्नाविष्णू इत्यादाववग्रहे आनङादिसिद्धिरित्यपास्तम् ।

❀ अभिनव-चन्द्रिका ❀

अव्यवहितोच्चारितात्पञ्चम्यन्तात्परस्येतीति । अत्रापि पूर्ववदर्थापत्त्या दिग्योगलक्षणपञ्चम्य-न्तार्थान्वयिनो यत्कार्यं तदव्यवहितसम्बन्धि बोद्धव्यमिति वाक्यन्तरकल्पनेन नोद्देश्यासिद्धिः, एतत्परिभाषाविधेयन्तु परसम्बन्धित्वमेवेतिभावः ।

❀ चिदस्थिमाला ❀

शेषः । नन्वेवमपि लक्ष्ये न तथात आह—**उदः स्थेत्यादाविति** । चोऽप्यर्थे । कारकविभक्तेर्हि न सम्भव इति भावः । सा चाध्याहारं विना नेत्याह—**तत्रेति** । तस्यां सत्यामित्यर्थः । द्वितीयनियममपि सूचयन्नाह—**अव्येति** । तदर्थः=तद्वाच्योऽर्थः । **तदिति** । उक्तार्थेत्यर्थः । 'अनेन व्यवधानं वर्णकृतमेव हेयं संहिताधिकारादत एव मूले ' वर्णान्तरेणेत्युक्तम् '—इति **रत्नाकरदण्ड्या**द्युक्तिरसङ्गतेति ध्वनयितुमाह—**यदि त्विति** । नन्वेवमवग्रहे संहिताधिकारस्थानामप्रवृत्तिस्तद्भिन्नानां प्रवृत्तिरिति व्यवस्था कथमत आह—**अवग्रहे चेति** । **आनङादीति** । तद्बहिर्भूतत्वात् । अन्यत्र=तदधिकारस्थकार्ये । ततः=आदेशात् ।

नन्वाद्येऽकृतव्यूहपरिभाषयादेशो न स्यादतो **दीक्षित**मतेनाह—**अकृतेति** । सिद्धान्तमाह—**नास्त्येव वेति** । आनङादिकं तत्राभ्युपेत्येदं, वस्तुतस्तदेव नेति नार्द्धजरतीयमित्याह—**न लक्षणेनेति** । तदनुरोधेन=पदकारानुरोधेन । **कौस्तुभकृद्दण्ड्या**द्युक्तिं खण्डयति—**एतेनेति** । अवग्रहे उक्तरीत्या निर्वाहात्संहिताधिकाराभावस्य भाष्ये स्पष्टत्वेनेत्यर्थः । वैय्यर्थ्यन्तु तस्योक्तरीत्यैव बोध्यम् । **नार्थ इति** । 'कृत' इति शेषः । आदिभ्यां तेनोरासन्तामित्यादौ नसादिपरिग्रहः । **विकलेति** । तस्योपादानात्, अत एव

❀ ज्योत्स्ना ❀

तद्विषये उपश्लिष्टपूर्वस्येत्यादि, शेषं पूर्ववदिति व्याख्येयम् । तत्फलितमाह—**सप्तमी-निर्देशेनेत्यादीति** । 'सप्तमीनिर्दिष्टे पूर्वस्ये'ति तु नोक्तं, सप्तमीशब्देन निर्दिष्टे इत्यर्था'त्सप्तम्यां जनेर्ड'इत्यादावेवैतत्प्रवृत्त्यापत्तेः । एतेन—वर्णान्तरेणाव्यवहितस्य पूर्वस्येति वृत्तिरयुक्ता, निर्दिष्ट इति सप्तम्या वर्णान्तरेणाव्यवहितोच्चारिते पूर्वस्येति हि वक्तुं युक्तमित्यपास्तम् । आदिपदात्तस्यापि फलितार्थकथनपरत्वेन विवक्षितत्वात् । ननु परिभाषाणां नियमव्यवहारोऽनुपपन्नः, विध्यङ्गभूत-

❀ सदाशिवभट्टीयम् ❀

स्यादिति बोध्यम् । **निर्दिष्टपदमिति** । उत्तरसूत्रे एव निर्दिष्टादितिकर्त्तव्यमिति भावः । यद्वा—इहाध्याहृतोपश्लिष्टस्येत्यस्यैवानुवृत्त्या विपरिणामः । **अधिकारश्चेति** । तदधिकारत्रयम्, सञ्ज्ञासूत्रं चेति । **एतेनेति** । प्रत्याख्यानभाष्येण बहिर्भूतानामधिककालव्यवाये प्रवृत्तेरनिष्टत्वानुमानेनेत्यर्थः । **आनङादीति** ।

'प्रत्ययः' 'परश्च'इत्यादौ तूत्तरांशविकला तस्मादिति परिभाषा प्रवर्त्तते। तेन न प्रत्यया व्यवहिताः । अत एव 'छन्दसि परेऽपि, व्यवहिताश्चे'ति सूत्रं सार्थकम्। आगमविधावपि 'आने मुगि'इत्यादौ तस्मिन्निति परिभाषया पूर्वसम्बन्धित्व-निर्णयः। अत एवात्र 'पूर्वस्ये'त्यादि न स्थानषष्ठी। तत्तद्विधिभिरेव सम्बन्धस्य निर्णीतत्वेन 'षष्ठी स्थाने' इत्यस्याप्रवृत्तेः । 'गाङ्कुटादिभ्य' इत्यादावपि षष्ठ्यंशविकलैतत्परिभाषाप्रवृत्तिर्बोद्ध्या। परिभाषाणां नियमत्वन्तु—यदि परिभाषासूत्रं न स्यात्तदा व्यव-

❀ अभिनव-चन्द्रिका ❀

उत्तरांशविकलेति । तस्मिन्निति तस्मादिति परिभाषाद्वयविषये यावानंशः सिद्धो बाधितो वा भवेत्तमंशं विहायान्यांशोपस्थापकत्वस्वीकारादिति भावः। अत्रैव प्रमाणमाह—**व्यवहिताश्चेतिसूत्रं सार्थकमिति** । अन्यथा 'ते प्राग्धातो'रित्यत्र प्राक्पदसत्त्वेनोत्तरत्वांशानुपस्थितौ 'सन्नियोगशिष्ट'न्यायेनेतरांशस्याप्यनुपस्थितौ व्यवहितप्रयोगः सिद्ध एवेति तद्वैयर्थ्यं स्पष्टमेव। तस्मिन्निति तस्मादिति परिभाषाद्वयस्याप्यव्यवहितत्वं पूर्वत्वम्,(विधेयान्वयि)षष्ठ्यर्थः, अव्यवहितत्वमुत्तरत्वं तादृशः षष्ठ्यर्थश्चेति प्रत्येकमंशत्रयं विधेयम्। तत्र 'शि तुक्' 'पदान्ताद्वे'-त्यादौ तस्मिन्नितिपरिभाषया अंशत्रयोपस्थितिः । 'इको यणची'त्यादौ षष्ठ्यंशस्य सिद्धत्वेन तद्रहितांशद्वयोपस्थितिः । एवन्तस्मादिति परिभाषया-'ङमो ह्रस्वादची'त्यादावंशत्रयोपस्थितिः, 'उदः स्थे'त्यादौ षष्ठ्यंशस्य सिद्धत्वादंशद्वयोपस्थितिः । प्रत्ययाधिकारे षष्ठ्यंशस्य बाधितत्वादुत्तरांशस्य सिद्धत्वात्केवलाव्यवहितांशोपास्थितिरिति दिक्। **अत एवेति**। अल्समुदायबोधकपदोत्तरं

❀ चिदस्थिमाला ❀

तुः प्रयुक्तः । तत्र मानमाह—**अत एवेति**। परादिशब्दोल्लेखे तदंशरहितैतत्प्रवृत्त्यङ्गीकारादेवेत्यर्थः।

तत्रैतत्प्रवृत्तिस्थलमनुवृत्त्यर्थमाह—**छन्दसीति**। ज्ञापकमाह—**व्यवेति**। यद्यप्याने इत्यादावुभय-निर्देशस्तथापि सप्तम्या अचारितार्थ्येन पञ्चम्याश्च पूर्वत्र चारितार्थ्येन मूलवैपरीत्यात्तद्वैपरीत्यमित्याह—**तस्मिन्नितीति**। अत एवात्र=तत्र तन्निर्णयेष्टत्वादेवानयोः। आदिनोत्तरस्येत्यस्य परिग्रहः । ननु सत्यं तथेष्टत्वं, तथापि 'षष्ठीस्थाने' इत्यस्य प्रवृत्तिः केन वारणीयाऽत आह—**तत्तदिति** । 'गुणाना'मिति-न्यायेनाप्रवृत्तेश्चेत्यपि बोध्यम्। **षष्ठ्यंशेति**। उत्तरस्येति षष्ठीमात्रांशे इत्यर्थः। तथा च परत्वाव्यवहित-त्वयोर्लाभः। अन्यथा पञ्चमीसत्त्वेनार्थान्तरासम्भवेनानिष्टमपि पक्षे स्यादिति भावः । एतेन तत्राञ्णितः प्रत्ययस्य परस्यैव सम्भवेन प्रत्यासत्त्या गाङादिप्रकृतिकस्यैव तस्य ग्रहणेन चानियमाप्रसक्त्यैतदप्रवृत्ति-रेवेष्टेत्यपास्तम्। ननु परिभाषाणां कथं नियमत्वं, तासां विध्यङ्गत्वेन तदुपस्कृतविधेर्लक्ष्यसंस्कारकत्वेन व्यवहितादौ प्रवृत्तेरेवाभावादत आह—**परीति**। 'सूत्र'मिति जातावेकवचनम्। आदिना परादिग्रहणम्। अपिनाऽव्यवहितादिसमुच्चयः। **स्यादिति**। केवलविधेरेवेति भावः। **एतावतेति**। अनेन प्रसिद्धनियमत्व-

❀ ज्योत्स्ना ❀

त्वेन ताभिरुपस्कृतस्य निष्पन्नमूर्त्तेर्लक्ष्यसंस्कारकत्वस्वीकारेण व्यवहितादौ प्रवृत्तेरेवाभावादत आह-**परिभाषाणां नियमत्वे त्विति**।

❀ सदाशिवभट्टीयम् ❀

आदिना पदात्परस्य युष्मदाद्यादेशादयः। **छन्दसीति** । एतेन परत्र व्यवहितार्थत्वं व्युदस्यति।

❀ विषमपदविवृतिः ❀

स्योपपादयितुमशक्यत्वादुक्तविषयद्वये परिभाषायां नियामकत्वासम्भवादित्यत आह—**परिभाषाणा-मिति**। यद्वा—'पतिः समास एवे'त्यादिनियमाविषये हरिशब्दादौ चरितार्थाया घिसञ्ज्ञायाः

हितादावपि प्रवृत्तिः स्यादित्येतावतेति दिक् ।

अलोऽन्त्यस्य । 'षष्ठी स्थाने'इत्यनुवर्त्तते, तदाह—**षष्ठीत्यादि** । स्थाने विधीयमानः स्थानषष्ठीनिर्दिष्टान्त्यस्येत्यर्थः । स्थान इत्यादि किम् ? इट् तृच ऋकारात्पूर्वो मा भूदिति । अन्त्यस्येति साहचर्यादल इति षष्ठ्यन्तम्, अन्त्यस्याल इत्यर्थः । अल इति किम् ? 'पदस्ये'ति विधीयमानं 'वसुस्रंसु' इति दत्वं—स्वनडुद्भ्यामित्यादावन्त्यस्य पदस्य मा भूत् । 'स्थाने विधीयमान' इति प्रत्यासत्तिलब्धम्; एवञ्चाल एवेति, अन्त्यस्यैवेति नियमद्वयमत्र । अल्समुदायबोधकपदोत्तरं स्थानषष्ठी अस्या लिङ्गम् । अत एव 'इतोऽ'-दित्यादौ नास्याः प्रवृत्तिः । 'पथ्यादीना'मित्यस्यावयवषष्ठीत्वादित इत्यस्याल्समुदायोत्तरत्वाभावाच्च ।

❀ चिदस्थिमाला ❀

व्यवच्छेदः । आसाञ्च न परिसङ्ख्यारूपं नियमत्वमपि तु—आर्थनियमत्वं,—'व्रीहीनवहन्ती'त्यादिवत्तदाह—**इति दिगिति** । **इत्यनुवर्त्तत इति** । इत्युभयमित्यर्थः । सूत्रद्वयादिति भावः । **निर्दिष्टान्त्येति** । निर्दिष्टेत्यध्याहारलभ्यं, तया निर्दिष्टो यस्तदन्त्यस्येत्यर्थः । एतेन 'षष्ठीनिर्दिष्टान्त्यस्ये'ति मूले पाठः सूचितः । षष्ठीनिर्दिष्टो यस्तदन्त्यस्येत्यर्थः । 'षष्ठीनिर्दिष्टोऽन्त्यस्ये'ति तु अपपाठः । एतेन—स्थानषष्ठीनिर्दिष्टस्य य उच्यते सोऽन्त्यस्यालः स्थाने स्यादित्यर्थः इति **दण्डयुक्त**मपास्तम् । **स्थानेत्यादि किमिति** । स्थाने इत्यस्यानुवृत्तिः किमर्थमित्यर्थः । न चाल इतिसौत्रत्वाज्जसन्तमादेशविशेषणं, लोपानामन्त्यादेशत्वानापत्तेः । तथा च 'लोपःपिबते'रित्यादौ दोषः, अन्त्यस्येतिसाहचर्याच्च, स्वनडुद्भ्यामित्यादौ दोषाच्च । तदेतद्ध्वनयन्नाह—**अन्त्यस्येत्यादि** । **पदस्ये**तीत्यस्याधिकृत्येति शेषः । अनेन तदन्तविधिः सूचितः । नन्वनुवृत्त्यादिना—स्थानेत्यादिलाभेऽपि—'स्थाने विधीयमान' इति कुतो लब्धमत आह । **स्थाने इति** । **वेति** । चेति पाठः । परिभाषाणामनियमे नियमकारिणीत्वादाह—**अलिति** । यथा'त्यदादीनामः' इत्यादाविति भावः । **लिङ्गमिति** । एवञ्च—'तदुत्तरं यत्र स्थाने षष्ठी तत्रान्त्यस्याल इत्युपतिष्ठत' इति वाच्योऽर्थः । एवमन्यत्रापि यथासम्भवं बोध्यम् । मूलं तु फलितार्थ-

❀ सदाशिवभट्टीयम् ❀

अलोन्त्यस्य । स्थाने विधीयमान इति । 'अलोन्त्यस्ये'त्यनेन तस्यावयवषष्ठीत्वकल्पनात् कथमिदं ? तस्मात्पूर्वसूत्रे षष्ठीपदस्य सम्भावितस्थानयोगकस्य सत्वात्तत्रापि तस्यैवानुवृत्त्या फलतीदम् ।

❀ विषमपदविवृतिः ❀

पतिशब्दे तेन नियम उपपद्यते, प्रकृते तु तस्मिन्निति परिभाषार्थं विना 'इको य'णित्यादीनां वाक्यार्थबोधमात्रेण लक्ष्यसंस्कारकत्वमेव नेति कथं नियामकत्वमित्यत आह—**परिभाषाणामिति** । अथवा—साक्षाल्लक्ष्यसंस्कारकयोः 'शेषो घ्यसखि' 'पतिः समास' इत्येतयोर्भवतु नियम्यनियामकभावः, परिभाषाणां तु विधिवाक्येन सह वाक्यार्थबोधमन्तरा न लक्ष्यसंस्कारकत्वमिति न नियामकत्वसम्भव इत्यत आह—**परिभाषाणामिति** । यद्वा परिभाषाणामङ्गत्वेनाङ्गीभूतप्रधानविधिसङ्कोचकत्वे लक्षणनियामकत्वासम्भव इत्यत आह—**परिभाषाणामिति** ।

अलोन्त्य । ऋकारात्पूर्व इति । 'आद्यन्तौ टकिता''वलोन्त्ये'त्यनयोः समावेशः स्यादिति भावः । **नियमद्वयमिति** । इदमयुक्तं—सिद्धे सत्यारम्भाभावात् । **अन्ये** त्व'नेकाल्शित्सर्वस्ये'त्यस्यारम्भसामर्थ्यादेकालादेशस्य स्थानषष्ठीनिर्दिष्टावयवस्थानकत्वं कल्पयित्वा नियामकत्वं वर्णयन्ति, तन्न

ङिच्च । अनेकाल्र्थमिदम् । **आदेरिति** । आदेरल इत्यर्थः । तेन 'द्वीप'मित्यादौ पान्तसमुदायस्य नेत्वम् । अत्र 'परस्ये'त्यावर्त्तते, तेन परत्वबोधकशब्देन यत्र परस्य स्थाने विधानं तत्रैवेदम् । तेन 'नित्यं ङित' इत्यादौ न दोषः । तत्र विकरण-व्यवधाने प्रवृत्तये—'धातो'रित्यस्य विहितविशेषणत्वात् ।

❀ अभिनव-चन्द्रिका ❀

स्थानषष्ठी अस्या लिङ्गमिति स्वीकारादेवेति भावः । **न दोष इति** । नच 'नित्यं ङित'इत्यादौ विकरणव्यवधानेऽपि प्रवृत्तये 'धातो' रिति विहितविशेषणं, वस्तुतो धातोः परो ङिन्नास्तीति नावृत्त्युपयोग इति वाच्यम्, 'क्सस्याची'त्यादावेतदप्रवृत्तये 'परस्ये'त्यस्यावृत्तेरावश्यकत्वात् ।

❀ चिदस्थिमाला ❀

परमेवात एवात्र तदनुवृत्तिरावश्यिकेति भावः । 'अत एवे'त्यस्यार्थमाह—**यथेति** । एतद्घटकविभक्ते-रित्यर्थः । **इत**इत्यस्य—एतद्घटकङसः । एतेन **रत्नाकरादि** ग्रन्थे न्यूनता ध्वनिता । पूर्वेण सिद्धत्वादाह—**अनेकालिति** । तद्धनयन्नाह—मूले-**सर्वस्येत्यस्येति** । अल इत्यनुवृत्तेराह—**आदेरिति** । **नेत्वमिति** । ईकारो नेत्यर्थः । अन्यथान्त्यालिभिन्नस्यादित्वेन ग्रहणे समूहस्यापि ग्रहणादपस्तदापत्तिरिति भावः । विशेष-माह—**अत्रेति** । **आवर्तत इति** । तृतीयान्तेन विपरिणमते चैकमित्यपि बोध्यम् । तदाह—**तेनेति** । प्रागुक्तरीत्या परादिशब्दस्यार्थपरत्वात् सूत्रद्वये भिन्नशब्दोक्त्याऽन्यशब्दसङ्ग्रहायाह—**बोधकेति** । स्थानपदस्यैकदेशस्य मण्डूकप्लुत्याऽनुवर्तनादाह—**परस्य स्थाने इति** । ननु 'धातो'रित्यधिकारात्तेन विधिस्तत्राप्यस्त्येवेत्येवमप्यतिप्रसङ्ग एवात आह—**तत्रेति** । यथा च तस्य तत्रावश्यकत्वं तथा स्पष्टी-भविष्यति । यद्यपीत्सञ्ज्ञायोग्यशकारवत्त्वमेव शित्त्वम्, अनुबन्धत्वयोग्यत्वमेव च तत्र तत्त्वमिति,—इत्याद्य-प्युदाहरणमिति दूरधावनं व्यर्थं, तथापि शङ्काद्यर्थमाह—**इदमिति** । **कौस्तुभा**द्युक्तिरसङ्गतेति ध्वन-

❀ ज्योत्स्ना ❀

धातोरित्यस्य विहितविशेषणत्वादिति । यदि तु फलाभावाद्धातोरित्यस्यानुवृत्तिस्तत्र न क्रियते, कृतायामपि वा व्याख्यानात्सम्बन्धसामान्यषष्ठी साश्रीयते तदा परस्येत्यावृत्तेरत्र

❀ सदाशिवभट्टीयम् ❀

को भवतीत्याशङ्क्याह—**विधीयेति** । परिभाषाणां फलविशेषसत्त्व एव प्रवृत्तिरित्येतल्लभ्यमाह—**अल्समुदायेति** । षष्ठीसमासेनाल्बोधकसमुदायेत्यर्थः । न त्वस्य फलेऽभिनिवेशः कार्य्यः । **परस्य स्थाने इति** । परत्वविशिष्टस्य स्थाने इत्यर्थः । **विहितविशेषणत्वादिति** । यद्यपि विहितपदाध्याहारे

❀ विषमपदविवृतिः ❀

युक्तम् । इतः पूर्वं नियमेनानेकालित्यस्य वाक्यार्थबोधकल्पने तद्वैयर्थ्यमूलकोक्तार्थकल्पने चाति-गौरवेण लघुभूतविधित्वस्यौचित्यात्, परिभाषाणामनियमे नियमकारिणीत्वप्रवादस्तु यदि परि-भाषात्वसामानाधिकरण्येन तदोमिति ब्रूमः । यदि तदवच्छेदेन तदुक्तिस्तदा निर्युक्तिकः प्रवादो न प्रेक्षावद्भिरादर्त्तव्य इति ब्रूमः । **परस्येत्यावर्तत इति** । इदमप्ययुक्तं, 'विभाषा दिक्समास' इत्या-दाविव परशब्देन परत्वबोधकशब्देन वा परस्य यद्विहितं तत्रैवैतत्प्रवृत्त्याऽऽवृत्तिवैयर्थ्यात् । 'तस्मात्प-रस्ये'ति लघुन्यासासम्भवात् 'तस्मादित्युत्तरस्ये'ति न्यासाभिप्रायेणेदं कथञ्चिद्योज्यम् । 'भूतपूर्वानेकाल्त्व

अनेकाल्शित् । शित उदाहरणम्—'इदम इश्' । ननु शकारोच्चारणसामर्थ्याद्भूतपूर्वानेकाल्त्वमादाय सर्वादेशत्वे सिद्धे शिदिति व्यर्थ, किञ्च सानुबन्धकनिर्देशे यथा नालः स्थानिवं 'भोभगो' इति सूत्रे भाष्ये उक्तं, तथाऽऽदेशत्वमपि सूत्रोपात्तस्यैवेति तद्यर्थम् । 'विधौ निर्दिष्टो योऽनेकाल्स सर्वस्ये'ति सूत्रार्थः । उद्देश्यत्वविधेयत्वा-

❀ अभिनव-चन्द्रिका ❀

आवृत्त्या च परत्वावच्छिन्नोद्देश्यताश्रयस्य यत्कार्यं तदादेरल इत्यर्थः । **भूतपूर्वानेकाल्त्वमिति** । अनुबन्धघटितबोधकवृत्तिधर्माणां बोध्ये आरोपस्य स्वीकारात्, अनेकाल्वृत्तिधर्मावच्छिन्नविधेयताश्रयः सर्वस्य स्थाने भवतीत्यनेकाल्सूत्रार्थस्वीकाराद्वा, औश्वृत्त्यनेकाल्त्वस्य स्थानिवद्भावेन औ इत्यत्रानयनाद्वेत्यन्यत्र विस्तरः । **नालः स्थानित्वमिति** । 'अल' इत्यस्याल्त्वव्याप्यधर्मस्येत्यर्थः । 'स्थानित्व'मित्यस्य स्थानितावच्छेदकत्वमित्यर्थः । **आदेशत्वमपीति** । आदेशतावच्छेदकत्वमित्यर्थः । **सूत्रोपात्तस्यैवेति** । सूत्रोपात्तवृत्तिधर्मस्यैवेत्यर्थः । अन्यथाऽनुबन्धविनिर्मुक्तपदार्थोपस्थितिस्वीकारेणादेशत्वं स्थानित्वञ्चानुबन्धविनिर्मुक्तस्यैवेति यथाश्रुतशेखरोऽसङ्गतः स्यात् । अन्ये तु'बोधकावयवेष्वनुबन्धेषु बोध्यावयवत्व'मिति स्वीकारेण सानुबन्धकादेशस्थले स्थानित्वादेशत्वयोर्व्यासज्यवृत्तित्वेन 'नालः स्थानित्व'मित्यस्य—नाल्पर्याप्तं स्थानित्वमित्यर्थः । 'आदेशत्वं सूत्रोपात्तस्यैवे'त्यस्य—आदेशतापर्याप्तिः—सूत्रोपात्तानुबन्ध—तद्बोध्यादेशैतदुभयत्रेत्यर्थ इत्याहुः । **विधौ निर्दिष्टो योऽनेकालिति** । 'विधा'वित्यस्य—विधिशास्त्रे इत्यर्थः । 'निर्दिष्टोऽनेका'लित्यस्य—

❀ चिद्स्थिमाला ❀

र्थितुं शङ्कते—**नन्विति** । इशः शस्य कार्याभावादित्सञ्ज्ञायाः अभावेनानेकाल्त्वात्सिद्धिरिति, तन्न, तथा सति शस्य श्रवणापत्तेरत आह—**शकारोच्चेति** । **भूतेति** । साम्प्रतिकाभावादिति भावः ।

ननूच्चारणार्थतया प्रत्ययत्वशङ्कानिरासार्थतया च तत्साफल्यं, विभक्त्युच्चारणे लाघवाभावो'ऽशोकवनिका' न्यायेन 'तकार एव कार्यं' इति शङ्काऽभावश्चात आह—**किञ्चेति** । **निर्देशे इति** । सानुबन्धकस्थानिनिर्देशे इत्यर्थः । प्रकृताशयेनाह—**अल इति** । एवञ्चान्यत्रापि तथा बोध्यम् । **स्थानित्वमिति** । 'इती'ति शेषः । **तत्**=शिदिति । नन्वेवमपि प्रयोगे जायमानो नानेकालत आह—**विधाविति** । विधेयकवाक्यतयाऽध्याहारेण च लब्धमिदम् । नन्वेव'मणुदि'त्सूत्रे भाष्ये उक्तम्—''अत्यल्पमिदमुच्यते—अप्रत्ययटित्किन्मिदादेशा इति वक्तव्यम् । आदेश–इदम इश्, इत–इति'' तद्विरुध्येत । नहि तस्याण्त्वं–येनातिप्रसङ्गः

❀ विषमपदविवृतिः ❀

मादाये'त्युक्तमुपपादयति—**विधाविति** । ननु किमिदं विधौ निर्दिष्टत्वं ? न तावदनेकाल्पदबोध्यत्वं, 'खरवसानयोर्विसर्जनीय'इत्यादिविहितविसर्जनीयलोपानुनासिकोदात्तादीनामपि सर्वादेशत्वापत्तेः । नापि—इशादिपदजन्यप्राथमिकोपस्थितिविषयत्वं, तथा सति सानुबन्धस्यैव विधेयत्वापत्तेः, पदार्थोपस्थितिशाब्दबोधयोः समानविषयकत्वेनैव कार्यकारणभावादिति चेन्न, द्वितीयपक्षाङ्गीकारेणादोषात् । न च तत्पक्षोक्तदोषः 'गङ्गायां घोष'इत्यादावपि गङ्गापदेन प्रथमोपस्थितप्रवाहस्य शाब्दबोधे भानवारणाय—शाब्दबोधस्य प्राथमिकपदार्थोपस्थित्या समानविषयकत्वानङ्गीकारात् । यदि च प्रवाहोपस्थितिर्न शाब्दबोधकारणं, या च कारणं–तीरोपस्थितिः–सा शाब्दे शाब्दबोधेन समानविषयैवेति ब्रूषे–तर्हि प्रकृतेपि या सानुबन्धकोपस्थितिर्न सा शाब्दबोधकारणं, या च कारणं साऽनुबन्धविनिर्मुक्तविषयिणी पदार्थोपस्थितिरनुबन्धविनिर्मुक्तस्यैवेति ग्रन्थोऽपि शाब्दबोधकारणो-

ख्यविषयतया बोधविषयता तु अनुबन्धविनिर्मुक्तस्येति नाणुदित्सूत्रभाष्यविरोधः। 'ध्वसो'-रिति लोपस्य—'लोपो यी'ति प्रकृते पुनर्लोपग्रहणसामर्थ्यात्सर्वादेशत्वसिद्धिः । 'अनुबन्धानामेकान्तत्वमेव न्याय्यमित्युक्त'मिति चेन्न, 'नानुबन्धकृतमनेकाल्त्व'मिति ज्ञापनेन चारितार्थ्यात् । तेन 'दिव औ'दित्यादीनां न सर्वादेशत्वम् । अस्य च यथेत्सञ्ज्ञा तथा वक्ष्यते । 'नानेकाल्शि'दिति तु नोक्तम्, 'अनन्तरस्ये'ति न्यायेन 'आदेः परस्ये'त्यस्यैव निषेधापत्तेः । **परत्वादिति** । आदेः परस्येत्यस्यावकाशः—

❀ अभिनव-चन्द्रिका ❀

निर्दिष्टवृत्तिरनेकाल्वृत्तिर्यो धर्मस्तद्धर्मावच्छिन्नविधेयताश्रय इत्यर्थः । **उद्देश्यत्वविधेयत्वाख्यविषयतयेति** । 'धान्येन धनवा'नितिवदभेदस्तृतीयार्थः, तस्य च बोधविषयतायामन्वयः, अन्यथा शाब्दबोधे उद्देश्यतानिरूपकत्वविधेयतानिरूपकत्वयोस्सत्त्वेऽपि उद्देश्यताविधेयताविषयकत्वे मानाभावाद्यथाश्रुतमसङ्गतं स्यात्, उद्देश्यत्वविधेयत्वयोरपदार्थत्वेन शाब्दबोधासम्भवात् ,पदजन्यपदार्थोपस्थित्यभावे शाब्दबोधानङ्गीकाराच्चेति दिक्।

परे तु—यथा मीमांसकनये ज्ञानमात्रे मितिमातृभासकत्वं मितिविषयकमात्रविषयकसंशयस्य कदाप्यनुदयात्स्वीक्रियते, तथा विषयत्वविषयकस्य संशयस्य कदाप्यनुदयाद्विषयताविषयकत्वमपि ज्ञानमात्रे स्वीक्रियते, तथाच उद्देश्यत्वविधेयत्वाख्यविषयतयेत्यत्र तृतीयार्थो विषयत्वम् । तस्य निरूपितत्वसम्बन्धेन शाब्दबोधेऽन्वयः, प्रकृत्यर्थस्य च निष्ठत्वसम्बन्धेन तृतीयार्थविषयतायामन्वयः। तथाच—उद्देश्यत्वविधेयत्वाख्यविषयत्वनिष्ठाविषयतानिरूपकबोधीयविषयताऽनुबन्धविनिर्मुक्तपदार्थे एवेति यथाश्रुतमेव सङ्गतमित्याहुः । **चारितार्थ्यादिति** । अनुबन्धघटितबोधकवृत्तयो ये अनुबन्ध-

❀ चिदस्थिमाला ❀

स्यादत आह—**उद्देश्येति** । एतेपि तद्विशेषरूपे इति ध्वनयन्नाह—**विषेति** । नन्वेवमपि 'ध्वसो'-रितिलोपस्य सर्वादेशत्वार्थं शित्त्वमावश्यकमत आह—**ध्वसोरिति**। **लोपो यीति** । इत्यतो लोपपदे प्रकृते इत्यर्थः । नन्वेवमप्यनुबन्धानामनेकान्तत्वात्कथमनेकाल्त्वमत आह—**अनुबन्धानामिति** । **नानुबन्धेति** । अनुबन्धत्वयोग्यकृतमित्यर्थः । इत्सञ्ज्ञायोग्यशकारवत्त्वमेव च शित्वं सूत्रे, एवञ्च 'जसः-शी'त्याद्यप्यस्यैव लक्ष्यमित्यन्यत्र स्पष्टम् । नन्वौतस्त उच्चारणार्थो नानुबन्ध एवेति कथमत आह—**अस्य चेति** । वक्ष्यते=तत्रैव सूत्रे । **नारायण**गुरूक्तं खण्डयति—**नानेकालिति** । पदालाघवेऽपि मात्रालाघवमिति भावः । यत्तु **रत्नाकरः**–अन्त्यस्यादेरित्युभयानुवृत्त्योभयनिषेधेन यद्यपि तथा सुकरं, तथापि पारिशेष्यान्मध्ये अल्यनुपसंहारापत्तौ जश्भिसाद्यकारिकारादौ औशैसादेरापत्तिरिति तथा दुर्वचमिति तन्न, उभयानुवृत्तौ मानाभावात् । उभयत्र स्वरितत्वे मण्डूकप्लुतौ च गौरव च। निर्दिश्यमाने'ति न्यायेन निर्वाहाच्च, षष्ठीबोधितसमूहनिष्ठस्थानित्वत्यागे मानाभावाच्च । तद्ध्वनयन्नाह—**अनन्तरेति** ।

❀ विषमपदविवृतिः ❀

पस्थितिपर इति समानम् । तदेतदभिप्रेत्याह—**उद्देश्यत्वविधेयत्वाविषयतयेति** । 'धान्येन धनवा'नित्यादिव'त्प्रकृत्यादिभ्य' इत्यभेदे तृतीया । शित्त्वस्य प्रयोजनान्तरमाशङ्क्य निराकरोति—**ध्वसोरिति** । नन्वनुबन्धानामनेकान्तत्वे इशादेरनेकाल्त्वाभावेन सर्वादेशत्वासिद्ध्या शिदिति सार्थकमित्याशङ्क्याह—**अनुबन्धानामिति** । **ज्ञापनेनेति** । ननु ज्ञापितेपि शकारोच्चारणसामर्थ्यादनुबन्धकृतमप्यनेकाल्त्वमादाय सर्वादेशत्वं भविष्यतीति पुनः शिद्ग्रहणं व्यर्थमिति चेन्न, अनुबन्धकृताऽनेकाल्त्वस्य सर्वादेशत्वप्रयोजकत्वे सिद्धे शकारोच्चारणसामर्थ्येनाद्यादेशत्वस्यापि कल्पनापत्तेः, इत्सञ्ज्ञकशकारस्याद्यादेशत्वे सर्वादेशत्वे च निमित्तत्वाभावविशेषादिति दिक्। **इत्यादीनामिति** ।

'द्व्यन्तरुपसर्गेभ्यो'—द्वीपम् । 'शित्सर्वस्य'—'इदम इश्' । एवम् 'अतो भिस' इत्यादिविषये 'अनेका'लित्यनेनादेः परस्येति परत्वाद्बाध्यते । एतेन 'ङिच्चे'त्यत्र 'ङिदेवानेकाल्न्त्यस्ये'ति नियमेन सिद्धेऽनेकाल्ग्रहणं व्यर्थमित्यपास्तम् ।

स्वरितेन । इत्थम्भूतलक्षणे तृतीया । स्वरितत्वज्ञाप्योऽधिकारो विनियोग इत्यर्थः । स्वरितत्वञ्चेदं दोषविशेषरूपमज्झल्साधारणं स्वररूपमाधिक्रियमाणपदघटकाज्निष्ठं वा । तच्चानुनासिक्यवत्प्रतिज्ञागम्यम् । विनियोगश्च प्रायेणोत्तरत्रोपस्थितिः, क्वचित्पूर्वत्रापि । 'कियद्दूरमधिकार' इत्यत्रासति गमके व्याख्यानमेव शरणम् । किञ्च स्वरितेनाधिकारगतिः,—तेन 'गोस्त्रियो'रित्यादौ स्त्र्यधिकारस्थप्रत्ययग्रहणमित्याद्याकरादवसेयम् । एतेन 'व्याख्यानादेव निवृत्तिवदनुवृत्तिरपि भविष्यति, आकाङ्क्षायान्तु सत्यामश्रुतकल्पनाया अन्याय्यत्वाच्छ्रुतापेक्षणस्य

❀ अभिनव-चन्द्रिका ❀

घटितातिरिक्ता आनुपूर्व्यव्यतिरिक्ताश्च धर्मास्तन्निमित्तके विधौ कर्तव्ये अनुबन्धा अविद्यमानवद्भवतीति कल्पनेन चारितार्थ्यादिति भावः । **तृतीयेति** । वैशिष्ट्यं तृतीयार्थः, तथा च स्वरितत्वविशिष्टमधिक्रियते इति सूत्रार्थः, तत्फलितमाह—**स्वरितत्वज्ञाप्य इति** । 'स्वरितत्वं—स्वरविशेष' इति पक्षेऽप्याह—**अज्निष्ठं वेति** । **बहिरङ्गशास्त्रीयेति** । अत्र बहिरङ्गत्वमुपलक्षणं, न विशेषणम् । एवमुत्तरसूत्रेऽन्तरङ्गत्वमप्युपलक्षणमतो नान्योन्याश्रय इति भावः ।

❀ चिदस्थिमाला ❀

शिति तदुक्त्वाऽनेकालिति मौलादिसङ्ग्राह्यं तदाह—**एवमिति** । एतेन=आदेरिति बाधकतयाऽनेकालित्यस्येष्टत्वेन । एतदभावेऽन्यथा तस्य साफल्याभावादाह—**ङिदेवेति** । **इत्थमिति** । अत्रेत्यादिः । तदर्थश्च ज्ञाप्यत्वं, स्वरितशब्दश्च धर्मपरस्तदाह—**स्वरितत्वेति** । अधिकारपदार्थमाह—**विनीति** । **साधारणमिति** । तथा च विशिष्टनिष्ठमत एव दोषेतिविशेषणमुक्तमिति भावः । 'क्लृप्तकल्पनात्'इति न्यायेनाह—**स्वरेति** । अत्र पक्षे मूले युक्तत्वं परम्परया बोध्यम् । ननु साम्प्रतं तथा पाठाभावेन कथं तज्ज्ञानमत आह—**तच्चेति** । तथा च 'प्रतिज्ञानुनासिक्या' इतिव'त्प्रतिज्ञास्वरिताः पाणिनीयाः' इत्यपि प्राचोक्तमिति बोध्यम् । अपकर्षसङ्ग्रहायाह—**प्रायेणेति** । तत्फलमाह—**क्वचिदिति** । **असतीति** । 'अङ्गस्ये'त्यादौ । 'प्राग्दीव्यत' इत्यादौ तु गमकमेवेति भावः । अत एव सूत्रस्यार्थान्तरमाह—**किञ्चेति** । अर्थः प्राग्वत् । अधिकारशब्दो लाक्षणिकः, अधिकारगतिः=अधिकारज्ञानम् । किञ्चाधिकः कारः=कृतिर्यत्पूर्वं सत्परं बाधते, तथा च पूर्वविप्रतिषेधाः सर्वे सङ्गृहीतास्तत्र स्वरितपाठात् । किञ्चाधिकः कारोऽधिकं कार्यं,—गौणेऽपि शास्त्रप्रवृत्तिस्तेन गौणाधारादेप्यधिकरणादिसञ्ज्ञासिद्धिरिति स्पष्टमत्रैव सूत्रे भाष्ये, तदाह—**इत्याद्याकरादिति** । एतेन=किञ्चेत्यादिना अर्थान्तरकथनेन । सप्तम्यन्तच्छेदेन व्याख्यानं तु (भाष्यीय ?) मूलव्याख्यानतुल्यमित्याह—**व्याख्येति** । नन्वेमप्यन्यसम्बन्धनिवृत्त्यर्थमावश्यकमेवेदं सूत्रमत आह—**आकाङ्क्षायामिति** । अन्यतराकाङ्क्षायामुभयाकाङ्क्षायाञ्चेत्यर्थः । ननु परत्वादेर्बाधकत्वे एव मानाभावेना-

❀ ज्योत्स्ना ❀

प्रयोजनाभावः । **क्वचित्पूर्वत्रापीति** । एतेन तत्र तत्तत्पदापकर्षा व्याख्याताः ।

❀ विषमपदविवृतिः ❀

'आदि'पदेना'र्वणस्तृ''ससजुषोरु'रित्यादेः सङ्ग्रहः । **एतेनेति** । ऐसि 'आदेःपरस्ये'त्यस्य प्राप्तत्वेनेत्यर्थः ।

न्याय्यत्वाच्च किं सूत्रेणे' त्यपास्तम् । स्पष्टञ्चेदं भाष्ये। **परनित्येति**। परं विप्रतिषेधसूत्राद्बलवत्। नित्यं=कृताकृतप्रसङ्गि,तद्विपरीतमनित्यम्। तत्राक्लृप्ताभावकस्याभावकल्पनापेक्षया क्लृप्ताभावकस्यैव तत्कल्पनं युक्तमिति तस्य बलवत्त्वे बीजम्।

अन्तर्मध्ये–बहिरङ्गशास्त्रीयनिमित्तसमुदायमध्येऽन्तर्भूतान्यङ्गानि–निमित्तानि यस्य तदन्तरङ्गम्। तदीयनिमित्तसमुदायाद्बहिर्भूताङ्गकं–बहिरङ्गम्। तस्य बलवत्त्वेबीजमाह– **असिद्धमिति**। इयञ्च–'वाह ऊडि'ति सूत्रेण ज्ञापिता। यद्यपि 'प्रत्यङ्गवर्त्ती लोको दृश्यते, मनुष्योऽयं प्रातरुत्थाय प्रथमं शरीरकार्याणि करोति, ततः सुहृदां, ततः सम्बन्धिनामि'तिन्यायमूलकत्वमस्या 'अचः परस्मिन्नि'ति भाष्ये उक्तं,तथापि तेन न्यायेन युगपत्प्राप्तिविषयतैव स्यात्, ज्ञापकेन तु सर्वविषयता बोध्यते इति 'वाह ऊठ्' इति सूत्रे कैयटे स्पष्टम्।

॥ अभिनव-चन्द्रिका ॥

इयञ्चेति। न च 'ऊडिद'मित्यादिना'विश्वौह'इत्यादौ स्वरार्थमूठ्ग्रहणमावश्यकमिति वाच्यं, 'वाहष्ठित्' 'वाहष्ठ्' इति न्यासेन वा सिद्धे ऊठ्ग्रहणस्य ज्ञापकत्वात्, 'ठिदिद'मिति न्यासेन विश्वौह इत्यादौ स्वरसिद्धेश्च। यत्तु—'ह्रस्व एव उठि विधातव्ये दीर्घोठ्ग्रहणं ज्ञापकं, स्वरविधायकेऽपि ह्रस्व एव पाठ्यः, 'ज्वरत्वरे'त्यत्र 'उ-उठ्'इति प्रश्लिष्य उठ् ह्रस्व एव विधातव्य इति 'जूर' इत्यादौ न दोषः। 'एत्येधत्यूठ्'स्वि इत्यत्र ह्रस्व एव पठ्यते इति जनानवतीति जनौरित्यादौ न दोषः। एवं च्छ्वोरित्यादिना प्रश्लेषेण ह्रस्व एव विधीयते इति मव्यधातोः क्विपि 'मौ'रित्यादौ न दोष इति, तन्न। आवयतेः क्विपि औरित्यस्यासिद्धत्वापत्तेः, वार्णपरिभाषया सवर्णदीर्घगुणवृद्ध्योरापत्तेः। नच 'नाजानन्तर्य' इति परिभाषया निषेधात्स्वांशे चारितार्थ्यं नास्तीतिवाच्यं, व्यञ्जनव्यवधानेन 'नाजानन्तर्य'इति परिभाषाया अप्रवृत्तेः।

॥ चिदस्थिमाला ॥

पवादः परत्वाद्बाध्यते इत्युभयमयुक्तमत आह–मूले—**परनित्यान्तरङ्गेत्यादि**। 'विप्रे'ति सूत्रं विध्यर्थं नियमार्थं वेत्यपरिभाषात्वादत्र न लिखितं, तदेतद्ध्वनयन्परस्य बलवत्त्वे बीजमाह—**परमिति**। 'पूर्वा'दित्यादिः। पूर्वस्य परं बाधकमित्यर्थः। नित्यस्वरूमाह—**कृतेति**। प्रतियोगिज्ञानायाह—**तद्विपेति**। तस्य तत्त्वप्रयोजकत्वं न वाचनिकं किन्तु युक्तिसिद्धमिति कथयंस्तस्य तत्त्वे बीजमाह—**तत्रेति**। नित्यानित्ययोर्मध्ये इत्यर्थः। **तदिति**। अभावेत्यर्थः। **युक्तमिति**। उपस्थितिलाघवादिति भावः। इति=इदम्। तस्य=नित्यस्य। तथा चावश्यकत्वं तद्बीजमितिसिद्धम्। वाक्यार्थबोधे पदार्थज्ञानस्य हेतुत्वादादौतमाह– **अन्तरिति**। अन्तःशब्दार्थमाह—**मध्ये इति**। कस्येत्याकाङ्क्षयामाह—**बहिरिति**। उपस्थितात्वादिति भावः। **शास्त्रीयेति**। तद्घटकेत्यर्थः। साकाङ्क्षत्वात् शेषपूरणेनाह—**अन्तर्भूतेति**। अङ्गशब्दः सन्निविशेषस्य शरीरावयवस्य वा न वाचकः, किन्तूपकारकवाचीत्याह—**निमित्तेति**। बहुवचनं लक्ष्याभिप्रायं, शब्दस्वरूपाणीत्यर्थः। शब्दशास्त्रे तस्य प्राधान्यात्। तेनार्थादिनिमित्तकस्य न बहिरङ्गत्वादीति भावः। उक्तरीत्यैवाह—**तदीयेति**। अन्तरङ्गशास्त्रघटकेत्यर्थः। इदं शेषपूरणलब्धं,बहिः–बहिर्भूतान्यङ्गानि यस्येत्यर्थः। तदाह—**अन्तर्भूताङ्गेति**। तत्त्वं चोक्तवैपरीत्येन, तथा च 'परस्परापेक्षया व्याप्यनिमित्तकमन्तरङ्गं व्यापकनिमित्तकं बहिरङ्ग'मित्युत्सर्गः,अल्पनिमित्तकं बहुनिमित्तकमिति यावत्। विस्तरस्तु गदायां बोध्यः। तस्य=अन्तरङ्गस्य अस्याः। समूलत्वमाह—**इयञ्चेति**। **ज्ञापितेति**। ऊठ्ग्रहणेत्यादिः।

न्यायसिद्धेऽर्थे ज्ञापकानुपयोगो भाष्यस्य भाष्यान्तरविरोधश्चेत्याशङ्कते—**यद्यपीति**। **प्रत्यङ्गेति**। अन्तरङ्गेत्यर्थः। **शरीरेति**। तस्य सुखादिसाक्षात्कारायतनत्वात्। **सुहृदामिति**। सुहृत्त्वस्य प्रथमोपस्थितिहेतुत्वात्। **सम्बन्धिनामिति**। अवश्यकर्तव्यत्वात्। **स्यादिति**। तत्र तथैव सत्त्वादिति भावः। **सर्वेति**। तथाचान्तरङ्गे कार्ये जातं तत्कालप्राप्तञ्च बहिरङ्गमसिद्धमित्यर्थः। तस्य तत्त्वमुपपाद-

अन्यथा वाहः सम्प्रसारणे पूर्वरूपे च कृते ण्याश्रये गुणे 'वृद्धिरेचि'इति वृद्धौ प्रष्ठौह इत्यादिसिद्धावूठ्विधानं व्यर्थं स्यात् । नाजानन्तर्यपरिभाषा तु नास्त्येवेति—न 'अयजे इन्द्र' मित्यादौ दोष इति परिभाषेन्दुशेखरे विस्तरः । अपवादस्तु वचनप्रामाण्याद्बलवान् ।

अकृतेति । न कृतो विशिष्ट ऊहस्तर्को—निमित्तविनाशेऽपि कार्यस्थितिरूपः,—यथा दण्डविनाशेऽपि—घटस्थितिः,—स यैस्ते इत्यर्थस्तदाह—**निमित्तमित्यादि** । तत्प्रयुक्तं कार्यं जातमपि न कुर्वन्ति=नोच्चारयन्तीत्यर्थ इति कैयटादयः ।

अन्ये तु व्यूहोऽन्तरङ्गशास्त्रं, बहिरङ्गापोहनरूपत्वात् ,तत्—निमित्तविनाशं दृष्ट्वा—

ॐ अभिनव-चन्द्रिका ॐ

नचैवमपि सम्प्रसारणास्यासिद्धत्वेऽपि पूर्वरूपस्य तत्त्वाभावान्न स्वांशे चारितार्थ्यमिति वाच्यम्, 'हल' इति ज्ञापकेन सम्प्रसारणस्थानिककार्ये सम्प्रसारणत्वातिदेशेन सम्प्रसारणस्थानिकपूर्वरूपस्याप्यसिद्धत्वादिति दिक् ।

निमित्तविनाशेऽपीति । निमित्तविशिष्टविनाशे इत्यर्थः । वै० च'स्वप्रतियोगिकत्व'—'स्वस्थानिकादेशप्रतियोगिकत्वै'तदन्यतरसम्बन्धेन । अत एव 'समर्थाना'मिति सूत्रे समर्थग्रहणं स्वांशे चरि-

ॐ चिदस्थिमाला ॐ

यति—**अन्यथेति** । अस्या अभावे इत्यर्थः । **गुण इति** । 'लघूपधे'त्यादिः । सत्यां त्वेतस्यां बहिरङ्गसम्प्रसारणस्यासिद्धत्वाल्लघूपधगुणो न स्यादिति तदावश्यकत्वमिति भावः । नन्वस्या एव सर्वविषयत्वेऽस्याः सापवादत्वादयजे इन्द्रमित्यादौ दोषोऽत आह—**नाजेति** । **नान्तर्येति** । 'परी'ति पाठः । तज्ज्ञापकेनासिद्धमित्यस्या अनित्यत्वमेव ज्ञाप्यते, लाघवादत एव 'विप्रे'तिसूत्रादन्यत्र भाष्ये क्वापि तस्या अनुल्लेखः । एतेना'न्तरङ्गबहिरङ्गयोरन्तरङ्गं बलीय' इति परिभाषान्तरं निरपवादं तत्साधकमित्यपास्तम् । उक्तरीत्या सिद्धेरेनामाश्रित्य **विप्रे**तिसूत्रे भाष्ये तस्याः प्रत्याख्यानाच्च । तदाह—**परीति** । **वचनेति** । तथा च तदप्राप्तियोग्येऽचारितार्थ्यमेव तस्य बाधकत्वे बीजमिति भावः । आदौ सयुक्तिकत्वात्कैयटादिरीत्याऽर्थमाह—**न कृत इति** । वेरर्थमाह—**विशिष्ट इति** । वैशिष्ट्यमेवाह—**निमित्तेति** । निमित्तकारणेत्यर्थः । अत एवात्र दृष्टान्तं मध्ये आह—**स इति** । तर्क इत्यर्थः । **यैरिति** । पाणिनिप्रभृतिप्रोक्ताध्येतृभिरित्यर्थः । तदनुरोधेनैवान्यथा भासमानं मूलमन्यथा व्याचष्टे—**तत्प्रयुक्तमिति** । विनाशोन्मुखत्ववन्निमित्तप्रयुक्तमित्यर्थः । अपिरजातसमुच्चायकस्तस्योच्चारणस्यैवाप्राप्तेः, कृतमपि कार्यं निवर्तयन्तीत्यर्थः । 'निमित्तापाये 'नैमित्तिकस्याप्यपायः' इति यावत् । यद्यपि द्वितीयपक्षे—न कृतो विशिष्टः—शास्त्रप्रवृत्तिविषय ऊहो—निश्चयो यैरित्यन्यत्र व्याख्यातं, तथापि लाघवादाह—**व्यूहोऽन्तरङ्गेति** । यद्यपि विशिष्ट ऊहो येषु तानि व्यूहानि=अन्तरङ्गशास्त्राणि, ऊहस्तर्कः, स च बहिरङ्गेणान्तरङ्गस्य निमित्तविनाशरूपः, तानि न कृतानि यैरित्यर्थ इत्यन्यत्र व्याख्यातन्तथापि लाघवादाह—**बहिरङ्गापोहनेति** । बहिरङ्गेण तच्छास्त्रणापोह्यते, दूरीक्रियते निमित्तविनाशद्वारा यत्तद्रूपत्त्वादित्यर्थः । तथा चात्र 'कर्मणि ल्युट्,व्यूह इत्यत्र च कर्मणि घञिति भावः । **तदिति** । अन्तरङ्गशास्त्रमित्यर्थः । 'भाविनिमित्तविनाशे सती'त्यध्याहारः । बहिरङ्गेणान्तरङ्गस्य निमित्तविनाशे पश्चात्सम्भावितेऽन्तरङ्गं नेत्यर्थः । तदाह—**निमित्तेति** । भाविनमपीति भावः । अत एवाह—**पूर्वमपीति** । **अपि**रनन्तरसमुच्चये । तदानीं तस्य प्राप्तेरेवाभावात् । **अन्ये**त्वित्यनेनारुचिः सूचिता, तद्बीजन्तु आद्यपक्षस्य लोकसिद्धत्वेनानपूर्वत्वेन ज्ञापकानपेक्षत्वेन लाघवाद्युक्तत्वं, नास्य—तद्वैपरीत्यात् । लोके हि द्विविधं निमित्तं दृष्टं,—स्वस्थितौ कार्यस्थितिसम्पादकम्, स्वास्थिता-

ॐ ज्योत्स्ना ॐ

परिभाषेन्दुशेखरे विस्तर इति।'अचः परस्मि'न्निति सूत्रकैयटादौ तु'नाजानन्तर्य'परिभाषापवादभूतन्यायसिद्धान्तरङ्गबलीयस्त्वमवश्याश्रयणीयमिति लभ्यते, तन्मतपरिष्कारः परिभाषाप्रदीपा-

पूर्वमपि न कुर्वन्तीत्यर्थ इत्याहुः । इयं परिभाषा निष्फला निर्मूलेति परिभाषेन्दुशेखरे निरूपितम् ॥ **इति परिभाषाप्रकरणम्** ॥

❀ अभिनव-चन्द्रिका ❀

तार्थमिति परिभाषेन्दुशेखरे स्पष्टमिति दिक् । **निष्फलेति** । वस्तुतस्तु 'वैभाजित्रं घटसेदुषो' रित्याद्यर्थं साऽत्यन्तमावश्यकीति परिभाषेन्दुचन्द्रिकायां विस्तरः । ❀ **इति परिभाषाप्रकरणम्** ❀

❀ चिदस्थिमाला ❀

वपि तत्स्थितिसम्पादकञ्च । तत्राद्यं यथा न्यायनयेऽपेक्षाबुद्धिः स्वस्थितौ द्वित्वरूपकार्यस्थितिनियामिका, तन्नाशे-द्वित्वनाशाभ्युपगमात् । तथा वेदान्तिनये प्रारब्धसत्त्वस्य संसारस्थितिनियामकत्वं, तन्नाशेन तन्नाशात् । तथोपाधिसत्त्वस्य स्फटिकलौहित्यादिभासनियामकत्वं । द्वितीयं यथा—दण्डादि, तन्नाशेऽपि घटनाशा-दर्शनात् । शास्त्रे तु लक्ष्यानुरोधाद्व्यवस्था । भाविनि यथाकथंचिन्निमित्तविनाशे पूर्वमनुत्पत्तौ तु न कश्चिन्न्यायो, नापि सम्प्रतिपन्नो दृष्टान्तः । समर्थग्रहणस्यापि लोकसिद्धार्थज्ञापनेन चरितार्थ्यसम्भवे लोकसिद्धापूर्वतादृशार्थज्ञापकत्वे मानाभाव इति । वस्तुतस्तु पदावधिकेऽन्वाख्याने सेद्वस् असितिस्थिते इट्सम्प्रसादणयोः प्राप्तौ—प्रतिपदविधित्वेन शीघ्रोपस्थितिकत्वेन पूर्वं सम्प्रसारणे–वलादित्वाभावादिटः प्राप्तिरेव न, लक्ष्यानुरोधाच्च—तत्र पदावधिकमेवान्वाख्यानमिति तत्सिद्धिरत एव भाष्ये क्वाप्यस्या अनु-ल्लेखः—इतीयं नास्त्येव । एतज्ज्ञापकानि प्राग्वत् । विस्तरस्तु परिभाषेन्दुशेखरे द्रष्टव्य इति बोध्यं, तदाह—**इयमिति । मूले—इति परिभाषाप्रकरणमिति** । अष्टाध्यायीस्थपरिभाषाणां प्रकरणमिति=समाप्त-मित्यर्थः । परनित्यान्तरङ्गेत्यादि तु—प्रासङ्गिकं, तेन परिभाषाप्रकरणस्थपरिभाषाणामत्रानुपन्यासेऽपि न क्षतिः । ❀ **इति परिभाषाप्रकरणम्** ❀

❀ ज्योत्स्ना ❀

र्चिषि विस्तरेण निरूपितः । **परिभाषेन्दुशेखरे निरूपितमिति** । इयमपि परिभाषा यथा भाष्य-सम्मतावश्यकर्तव्या च तथा परिभाषाप्रदीपार्चिर्द्रष्टव्यः । ❀ **इति परिभाषाप्रकरणम्** ❀

❀ सदाशिवभट्टीयम् ❀

पञ्चम्युपपत्तये परशब्दस्याप्यध्याहार इत्यङ्गसञ्ज्ञासूत्रे उद्योते उक्तम्, तथापि तत्र परो यो विहित इत्यर्थादुप-लक्षणपरत्वम् । प्रकृतसूत्रस्य तु मुख्यविशेषणत्वे प्रवृत्तिरिति न विरोधः । ❀ **इति परिभाषाप्रकरणम्** ❀

❀ विषमपदविवृतिः ❀

इतिपरिभाषेति । ननु 'रणपरो', 'यथासङ्ख्य'मित्यादिपरिभाषाणामनुक्त्या न्यूनता, तासामपि प्रथमाध्यायस्थत्वात् सन्धिकार्योपयोगित्वाच्च, किञ्च ज्ञापकन्यायसिद्धानां वाचनिकीनां च कासाञ्चि-त्त्यागः, कासाञ्चिदुपादानमर्धजरतीयं, 'इको गुणवृद्धी'इत्यादीनां सन्धिकार्यानुपयुक्तानां चात्र कथनं व्यर्थमिति चेन्न । प्रथमाध्यायस्थानां प्रायेण सन्धिकार्योपयोगिनीनां सञ्ज्ञानां प्रायेण कथनस्य प्रक्रान्तत्वे तथाभूतानां परिभाषाणामपि प्रायेण कथनं कर्तव्यमित्यभिप्रायेण तासां कथनस्य कृत-त्वात् । 'परनित्यान्तरङ्गाना'मिति तु 'परत्वादनेन बाध्यत' इत्येतदुपपादनायेत्यादि क्रमेण सूत्रभिन्न-परिभाषाकथनस्योपपत्तिः कथञ्चिच्चिन्त्या । ननु किमिदं परिभाषात्वं ? न तावत्स्वोत्तरत्वनैरपेक्ष्येण विध्युपकारकत्वं, सञ्ज्ञाशास्त्रेष्वतिव्याप्तेः, नापि–शक्तिग्राहकभिन्नत्वे सति तत्त्वम्, 'षष्ठीस्थाने योगा', 'यस्मिन्विधिः' 'प्रत्ययग्रहणे यस्मात्स' इत्यादिष्वव्याप्तेः, किञ्च–'स्थानिवदादेश' इत्या-द्यतिदेशेष्वतिव्याप्तेः । यदि चातिदेशभिन्नत्वे सति तत्त्वं तत्, तदा'ऽसिद्धं बहिरङ्गमन्तरङ्गे' इत्यादिष्वव्याप्तिरिति चेन्न । सञ्ज्ञातिदेशयोरपि परिभाषात्वस्याङ्गीकारात् उक्तपरिष्कारस्य निर्दुष्ट-त्वात् । तथाचाहुः—परितो व्यापृतां भाषां परिभाषां प्रचक्षते' इति । 'सञ्ज्ञा च परिभाषा च विधिर्नियम एव च । अतिदेशोऽधिकारश्चे'त्यभियुक्तोक्तौ सञ्ज्ञातिदेशयोः पृथगुक्तिर्ब्राह्मणवसिष्ठ-न्यायेनेत्येषा दिक् । ❀ इति प्रथमाध्यायस्थानां **परिभाषाणां** प्रायेण **प्रकरणं** समाप्तिमियात् ❀

॥ अथ अच्सन्धिप्रकरणम् ॥

स्यादिति । कार्यशब्दवादे इदम् । **संहितायां विषये इति** । कार्यिनिमित्तयोः संहितायां विषयभूतायामित्यर्थः । **स्थानत इति** । इदं यथासङ्ख्यसूत्रे भाष्ये स्पष्टम् । 'जातिपक्षे यथासङ्ख्येनापि निर्वाह' इति स्थानेऽन्तरतमसूत्रे भाष्ये स्पष्टम् ।

अनुनासिकस्थानेऽपि निरनुनासिक एव, विधीयमानत्वेन सवर्णाग्राहकत्वात् । गुणाभेदकत्वपक्षेऽपि न विधेयाण्विषये । दीर्घादीनामिगादिपदैरुपस्थितये प्रत्याहारेषु जातिपक्ष एवेत्यणुदित्सूत्रे भाष्ये स्पष्टम् । अत एव सर्वतकारादीनां झल्त्वादिसिद्धिः ।

❀ चिदस्थिमाला ❀

इको यणचि । सिद्धान्तेऽसम्भवादाह—**कार्येति** । ननु संहितायामित्यत्र विषयसप्तमीति संहिताविषये इति वाच्ये पुनरुक्तिरयुक्ताऽतः सम्बन्ध्याकाङ्क्षाशान्तये सशेषपूरणमाह—**कार्यीति** । तयोरभेदेनान्वय इति भावः । मूलं समूलयति—'**इदमिति** । इदमपि व्यक्तिपक्षे' इति सूत्रनद्वारा **मनोरमादण्ड्यादि**-ग्रन्थासाङ्गत्यसूचनायाह—**जातीति** । अपिस्तस्यैव समुच्चायकः । एतेन 'लाकृति'रित्यादौ वकारवारणाय प्राथमिकबोध एव परिभाषाद्वयस्याप्यङ्गीकारः, एतदाशयकमेवोक्तसूत्रद्वयभाष्यमिति **रत्नाकरोक्त**-मपास्तम्, उक्तहेतोः, अन्यूनानतिरिक्तस्थानकादेशलाभे ताधिकस्थानकस्य प्रवृत्य तत्र दोषाभावाच्च । नन्वेवं सानुनासिकानुकरणे कृते 'दधि अत्रे'त्यादौ 'स्वौज'सित्यादौ चानुनासिकस्थाने सानुनासिको न स्यात्, शुद्धस्योपादानादत आह—**अनुनेति** । नन्वेवमपि गुणाभेदकत्वं दुर्वारमेवात आह—**गुणेति** । प्रतिपादितमिदमधस्तात् । एतेन सानुनासिकप्रतिपादनपराः सर्वेषां ग्रन्थाः परास्ताः । **मनोरमारत्नाकर-दण्ड्या**दिग्रन्थासाङ्गत्यध्वननायाह—**दीर्घादीनामिति** । एतेन व्यक्तिपक्षनिरासस्तत्र कथमपि सर्वत्रा-निर्वाहस्तदेवाह—**अत एवेति** । जातिपक्षाश्रयणादेवेत्यर्थः । तत्फलन्तु—'अवात्ता'मित्यादौ सलोपः । सूत्रन्त्व'भित्था' इत्यादौ सावकाशम् । अन्यैथैकव्यक्तेरुपादानादन्यतरस्यैव तत्त्वं स्यादिति भावः । ननु मास्तु

❀ ज्योत्स्ना ❀

नन्व'णो प्रगृह्यस्ये'त्यवसानेऽनुनासिकस्य दधिशब्दस्यानुकरणे 'दधि अत्रे'त्यत्रानुनासिकयण्प्रवृत्तये जातिपक्षे स्थानत आन्तर्यस्यावश्याश्रयणीयत्वान्न यथासङ्ख्यसूत्रेण निर्वाहोऽत आह—**अनुनासिकस्थानेऽपीति** ।

❀ सदाशिवभट्टीयम् ❀

इको यणचि । संहिताया अविवक्षया न णुट् । ननु पूर्वेणापि संहिताया उक्तत्वात् 'दधि आनये'ति-प्रयोगानापत्तिरेकपदे तन्नित्यत्वेन धकारेण तस्याः सत्त्वात्, 'संहितायां'मित्यस्य विषयसप्तमीत्वेन विषये इति पुनरुक्तञ्चात आह—**कार्येति** । **विषयभूतेति च** । अधिक्रियमाणविषयसप्तम्यन्तत्वस्फुटीकरणाय समानाधिकरणं सत्सप्तम्यन्तद्वयमिति भावः । विषयशब्दोऽजहल्लिङ्गः ।

❀ विषमपदविवृतिः ❀

इको यणचि । ननु यथासङ्ख्यशास्त्रेण न निर्वाहः, 'स्वौज'सित्यत्रानुनासिकस्य स्थाने तादृश-यण्प्रवृत्तये स्थानत आन्तर्यस्यावश्याश्रयणीयत्वादित्याशङ्क्याह—**अनुनासिकस्थानेपीति** । ननु तिबादिसूत्रेण 'लस्योच्चारणप्रसङ्गे तिब्घटितस्साधु'रिति बोधयितुमशक्यं, तत्स्थानिककार्यान्तराणा-

'ल्वादय' इत्यादिनिर्देशादयश्च जात्याश्रयणे मानमिति दिक् । व्याकरणस्य साध्वनुशासनत्वन्तु शब्दनित्यतापक्षे शब्दानां सिद्धत्वेन शास्त्रवैयर्थ्यापत्त्या 'मृजिप्रसङ्गे मार्जिः साधुर्भवती'त्यादिवृद्धिसञ्ज्ञासूत्रस्थभाष्यप्रामाण्येन 'यदिह परिनिष्ठितत्वेनं ज्ञाप्यं तत्साध्वि'त्यर्थापत्तिकल्प्यवाक्येन बोद्ध्यम् । कार्यशब्दवादे तु पूर्वभाष्योन्नीतानादितात्पर्यवशात्तत्कल्पनं बोद्ध्यम् । एतेन—स्थानत आन्तर्यादितिकथनेन स्थानप्रमाणोभयान्तरतमे ह्रस्वेकारे चरितार्थो यण् दीर्घे कथं स्यादित्यपास्तम् । स्थानत आन्तर्यस्य सर्वतो बलवत्त्वात् 'स्थानेऽन्तरतमे' इति सप्तम्यन्तपाठस्य चैतद्दूषणेनैव भाष्ये दूषितत्वादिति भावः ।

❀ अभिनव-चन्द्रिका ❀

अनादितात्पर्यवशादिति । वस्तुतस्तु कार्यशब्दवादेऽपि शास्त्रस्य शब्दोत्पादकत्वासम्भवात्ताल्वादेरेव शब्दोत्पादकत्वेन साधूनामसाधूनाञ्च शब्दानां सिद्धतया शास्त्रस्य साधुत्वपर्यन्तं तात्पर्यकल्पनेन नित्यशब्दवाद इव मृजिप्रसङ्गे मार्जिः साधुर्भवति इत्यवश्यं वक्तव्यम् । **स्थानत आन्तर्यस्येति** । स्थानशब्द अर्श आद्यजन्तः, तथा च स्थानिप्रतियोगिकान्तर्यस्य सर्वतो बलवत्त्वादित्यर्थः । **एतद्दूषणेनैवेति** । सप्तम्यन्तपाठे'स्ववृत्तित्व''स्वघटितदलभिन्नदलीयवृत्तित्व' 'स्वघटितदलभिन्नदलीयस्वस्थानित्वेनाभिमतस्थानीतरस्थान्यवृत्तित्वै'तत्रितयसम्बन्धेनादेशविशिष्टधर्मवत्यादेश इत्यर्थ

❀ चिदस्थिमाला ❀

दीर्घादिषु यणत आह—**ल्वादेति** । दिगर्थस्तु शब्दरत्नादौ स्पष्टः । ननूक्तसूत्रार्थाङ्गीकारे शास्त्रस्य साध्वनुशासनत्वमिति सिद्धान्तभङ्गापत्तिरत आह—**व्याकेति** । करणे ल्युट् । **पत्त्येति**—वाक्यकल्पने हेतुत्वेनान्वेति । ननु प्रकारान्तरेण शास्त्रसार्थक्यमास्तामत आह—**मृजीति** । वाक्यस्वरूपमाह—**यदिहेति** । शास्त्रे इत्यर्थः । **परीति** । नित्यविध्युद्देशतावच्छेदकानाक्रान्तेनानुपूर्वीरूपेणेत्यर्थः । ज्ञाप्यं=बोधकं स्वरूपम् । **अर्थेति** । तद्रूपप्रमाणकल्प्येत्यर्थः । ननु भवत्वेवं तत्पक्षे, मूलोक्तपक्षे तु का गतिरत आह—**कार्येति** । तत्र पक्षेऽपूर्वकार्यकरणेन साफल्येन शास्त्रस्यावैयर्थ्यादाह—**पूर्वेति** । पाणिनेरिति भावः । **तदिति** । उक्तवाक्येत्यर्थः । जात्याश्रयणस्य फलान्तरं ध्वनयन्प्राचोक्तं खण्डयति—**एतेनेति** । अस्याऽर्थमाह—**स्थानत इति** । यत्तु यत्र स्थानप्रमाणभेदे कार्यभेदश्चेत्यादौ तत्रैव तस्य बलवत्त्वं न तु समुचिते इति चिन्त्यमेतदिति **मन्दस्तत्र**, प्रथमान्तपाठे कार्यभेदलाभेऽपि सप्तम्यन्तपाठे स्थानिभेदलाभेन तत्प्रवृत्तेः सत्त्वाद्दोषान्तरमाह—**स्थानेन्तरेति** । चोन्ते योज्यः । **विध्यर्थ इति** । वाक्यभेदेन विधिः

❀ ज्योत्स्ना ❀

परिनिष्ठितेन=परिनिष्ठित्या । ननु कार्यशब्दवादे कार्यसम्पादनेन चरितार्थस्य शास्त्रस्य कथं साध्वनुशासनत्वं, परिनिष्ठितस्यैव हि साधुत्वव्यवहारेण यणादीनां तत्तदभावादत आह—**कार्यशब्दवादे त्विति** । **एतेनेति** । यथासङ्ख्याश्रयणेनेत्यर्थः । आन्तरतम्याश्रयणेपि न दोष इत्याह—**स्थानत आन्तर्यस्येति** । तथा च तस्यान्यादृशान्तर्यानपेक्षेति भावः ।

❀ सदाशिवभट्टीयम् ❀

परिनिष्ठितेन=रेखागवयन्यायेन । बोध्यम्=बोधकं शब्दस्वरूपमित्यर्थः । **एतेनेति** । मुख्यजातिपक्षे यथासङ्ख्यसूत्रेण परत्वाद्बाधात् 'स्थानेन्तरतम'इत्यस्याप्रवर्तनेनेत्यर्थः । व्यक्तिपक्षेप्याह—**स्थानत इति** । अन्यानपेक्षस्वप्रयुक्तकार्यप्रवर्तकतयेतरबाधकत्वेनैव हि तस्य प्राबल्यं वाच्यम्, तथा सति तत्त्वं भज्येतेति भावः । नन्वेकत्र स्थानेऽनेकान्तर्यतोऽनेकप्राप्तौ यत्रानेकविधमित्यस्य विषयोऽत आह—**सप्तम्यन्तेति** ।

❀ विषमपदविवृतिः ❀

मपि सत्त्वादित्यत आह—**यदिह परिनिष्ठितमिति** । इह=लक्ष्ये–, प्रवृत्तियोग्यसकलशास्त्रविषये । एतेन=यथासङ्ख्यशास्त्रेण स्थानेन्तरतमसूत्रापेक्षया परेण व्यवस्थाङ्गीकारेण । **सर्वत इति** । यत्र

१. 'परिनिष्ठितेने'त्यपि पाठः—२. नैयायिकानां मते शब्दानामनित्यत्वेन योग्यविभुविशेषगुणानां

चो विध्यर्थः । ध्वनितञ्चेदमेओङ्सूत्रे भाष्ये तदाह—**द्वे वा स्त इति।** सूत्रकृता शाकल्यमते सर्वत्र द्वित्वाभावोक्तेरिति भावः । अवसाने द्वित्वसिद्धयेऽनचीति प्रसज्यप्रतिषेधस्तदाह—**न त्वचीति** । इदं द्वित्वं षाष्ठद्वित्ववद्भिःप्रयोग एव, यर इत्यादेरध्याहृतोच्चारणक्रियानिरूपितकर्मषष्ठीत्वस्यौचित्यात् । **इति धस्येति।**

❀ अभिनव-चन्द्रिका ❀

स्वीकारेण प्रकृते एकमात्राधिककालशून्यत्वविशिष्टतालुस्थानजन्यत्वरूपतादृशधर्मस्य दीर्घेऽभावाद्यणाद्यनापत्तेतिभावः ।

कर्मषष्ठीत्वस्यौचित्यादिति । 'उपपदविभक्ते'रिति न्यायादिति भावः ।

❀ चिदस्थिमाला ❀

शब्दत्वसूचक इत्यर्थः । **ञ्चेदं हयवट्सूत्रे भाष्ये इति।** तत्रत्यायोगवाहानामविशेषेण पाठपक्षे पञ्चफलानां मध्ये द्वित्वफलोपपादनावसरे 'उरःकः उरःपः, अनचि च—अच उत्तरस्य यरो द्वे भवत इति द्विर्वचनं सिद्धं भवती'त्युक्तम् । अन्यथा तथोक्त्यसङ्गतिः स्पष्टैव । **एओङ्सूत्रे** इत्यपपाठस्तत्र तदप्रसङ्गात् । अत्रैव द्विर्वचने 'यणो मय' इति वदता वार्तिककृता तद्व्याख्यात्रा भगवतापीदं ध्वनितम् । यर इत्यतो वानुवृत्तौ मानमाह—**सूत्रेति।** तस्य निषेधप्रकरणे पाठादाह—**द्वित्वाभेति।** एवञ्च निषेधविधिविकल्पः फलित इति सा त्रिसूत्री एतत्तात्पर्यिकैव स्वस्वमतप्रसक्तदोषपरिहारार्थेति तत्वम् । **अवसाने इति** । वाक्क् वागिति भाष्योदाहृते । अन्यथा लाघवाद्धलीत्येव वदेदिति भावः । **प्रसज्येति** । तथा च प्रसिद्धदोषेष्टापत्तिरेवेति भावः।

'स्थाने द्विर्वचनपक्षे लक्ष्यभेद' इति खण्डनकाराद्युक्त्यसाङ्गत्यध्वननायाह—**इदमिति।** अष्टमिकवर्णद्वित्वमित्यर्थः । तत्रत्यपदद्वित्वे स्थाने द्विर्वचनत्वस्यैव युक्तत्वादाह—**षाष्ठेति।** 'उपपदविभक्ते'रितिन्यायेनाह—**यर इति।** आदिना यण इत्यादिपरिग्रहः । **षष्ठीत्वेति**—बहुव्रीहिः । 'सर्ववाक्यं सावधारण'मिति

❀ सदाशिवभट्टीयम् ❀

अनचिच। 'चेदमेओङ्सूत्रादा'विति पाठः। तत्र हि सन्ध्यक्षरेषु तपरोपदेश इति पक्षे प्लुतादिष्वज्विधिरिति वार्तिकम् ।अनचि च—अच उत्तरस्य यरो द्वे भवत इति द्विर्वचनं न प्राप्नोतीत्युक्तम् । आदिना हयवरट्सूत्रं, तत्राप्ययोगवाहानामविशेषेण पाठपक्षे पञ्चफलीमध्ये द्वित्वरूपफलोपपादनावसरे, 'उरःक इत्यत्रानचि च—अचः परस्य यरो द्वे भवत इति द्वित्वं सिद्धं भवती'त्युक्तम् । प्रकृतसूत्रेपि 'यणो मय' इति वदता वार्त्तिककृतापीदं ध्वनितमिति व्याचख्युः । ननु शाकल्यमते द्वित्वनिषेधादेव रूपद्वयसिद्धौ वापदानुवृत्तिर्व्यर्थेत्यत आह—**शाकल्येति।** एवञ्च तन्मतेऽभावघटितस्य साधुत्वेपि अन्यमते न स्यादतोऽनुवृत्तिरिति भावः । **अन्ये त्वनुवृत्तिमपेक्ष्य** लाघवादाहेत्यवतारयन्ति । **प्रसज्येति** । 'अच परस्मि'न्निति सूत्रशेषे उद्योते तु पर्युदासपक्षोपि समर्थितः । 'स्थाने द्वित्वपक्षे लक्ष्यभेद' इति खण्डनकाराद्युक्तिं खण्डयति—**इदमिति** । आष्टमिकं वर्णद्वित्वमित्यर्थः । **पद इति** । आदिना 'यणो मयः''शरः खय' इति । **षष्ठीत्वेति** । बहुव्रीहेस्त्वः । **न्यत्रवीति** । अत्र यथा 'ह्रस्वो नपुंसक' इति सूत्रस्थभाष्यविरोधो न तथा तत्रैवोद्योते स्पष्टम् ।

❀ विषमपदविवृतिः ❀

प्रमाणकृतमादेशान्तरं यथा 'चेते'त्यादौ यकार एकारश्च, तत्र स्थानत आन्तर्यं बलवत् । यत्रापि स्थानप्रमाणोभयकृतमेकं केवलस्थानकृतं चापरं स्थान्यादेशान्यतरत् तत्राऽपि स्थानकृतान्तर्यमेव व्यवस्थापकमिति स्थानेन्तरतमसूत्रस्यार्थ इत्यभिमानः । **सूत्रकृतेति** । वस्तुतो 'यरोऽनुनासिक'

स्वोत्तरगुणनाश्यत्वादच्परत्वासम्भवेन साधुत्वकल्पनमप्राप्तमिति विचार्याह—**पूर्वेति।** तत्पक्षे निमित्तसन्निपातनासम्भवान्मृजिप्रसङ्ग इति भाष्यासङ्गत्या पूर्वापरीभावकल्पनद्वारा 'इकारोच्चारणे यकार उच्चारणीयः, पूर्वपूर्वदृष्टप्रयोगात्' इत्यनुमानेन साध्वनुशासनं विधेयमित्यस्मत्पितामहचरणाः **श्रीस्नेहिरामशास्त्रिणः** ।

न तु द्वित्वे पूर्वधस्थाने जश्त्वनिष्पन्नदस्यापि, 'लक्ष्ये लक्षण'मिति न्यायात् । विकारान्यत्वेन न लक्ष्यभेद इत्यन्यत्र प्रपञ्चितम् ।

स्थान्यादेशयोर्भेदात्स्वंरूपमित्युक्तेश्च—'तत्स्थानापन्नस्तद्धर्मं लभते, यथा गुरोः स्थाने शिष्यो याज्यकुलानि गत्वाऽग्रासनादीनि लभते' इति लोकन्यायेन

❀ अभिनव-चन्द्रिका ❀

न लक्ष्यभेद इति । 'स्वीयप्राथमिकप्रवृत्तौ उपयोगित्वेनाऽऽश्रीयमाणो यावाञ्शब्दसमुदायः-तदघटको यस्तद्घटकमात्रोद्देश्यकविकारागमातिरिक्तस्तदघटितत्वे सति स्वीयप्राथमिकप्रवृत्त्युत्तरकालिकप्राप्ति-भिन्नप्राप्तिविषयाऽघटितत्वं' तल्लक्ष्यत्वमिति स्वीकारादिति भावः । प्रकृते च—जश्त्वनिष्पन्नदकारस्य निरुक्तसमुदायाघटकत्वेऽपि निरुक्तसमुदायघटकमात्रोद्देश्यकविकारभिन्नत्वस्याभावात्तल्लक्ष्यत्वमेवेति दिक् ।

स्थान्यादेशयोर्भेदादिति । लौकिकस्थान्यादेशापेक्षया शास्त्रीयस्थान्यादेशयोर्वैलक्षण्यादित्यर्थः । तथाहि—यदर्थं यो यस्य स्थाने नियुज्यते स तत्कार्यमेव करोति, यथा याजनार्थं गुरोः स्थाने नियुक्तः शिष्यो याजनं करोति, तथाऽर्थबोधनाय शब्दप्रयोगात्स्थानिना योऽर्थो बोध्यते तत्स्थाने प्रयुक्त आदेशस्तदर्थमेव बोधयेन्नान्यत्कार्यमिति स्थानिवत्सूत्रम् । **स्वं रूपमित्युक्तेश्चेति** । अयं भावः—गुरोः स्थाने शिष्यो याज्यकुलानि गत्वा अग्रासनादीन्येव लभते, नतु स्वरूपाश्रितोच्छिष्ट-भोजनसंवाहनादि, एवं प्रकृतेऽपि 'आवधिष्ट'त्यादौ स्वरूपाश्रितमात्मनेपदं न स्यात् ।

❀ चिदस्थिमाला ❀

न्यायेन लब्धावधारणव्यवच्छेद्यं खण्डनकृद्रत्नाकरादिग्रन्थासाङ्गत्यध्वननायाह—**नत्विति** । धस्येति शेषः । तस्यासिद्धत्वं तु न, 'पूर्वत्रासिद्धीय'मित्युक्तेः । बहिरङ्गपरिभाषायास्तु त्रैपादिकेऽप्रवृत्तिरेव । अपिर्धस्यैव समुच्चायकः । ननु विकारतो व्यक्तिभेदेन कथं लक्ष्यैक्यमत आह—**विकारेति** । तत्कृतान्यत्वेनेत्यर्थः । अन्यथोदवोढामित्यादावुद्वह् स् तामित्यवस्थायां सिज्लोपादेरसिद्धत्वाद्धलन्तेति वृद्धावोकारे 'उक्तन्यायेन न वृद्धिः पुन'रिति—सिचि वृद्धिरिति सूत्रभाष्यविरोधापत्तेः, पूर्वमकारस्य तत ओकारस्येति लक्ष्यभेदसत्त्वात्, तस्मात्तदनङ्गीकारः । एतेन ततो दस्य द्वित्वमिति तदुक्तमपास्तं, तदाह—**अन्यत्रेति** । शब्दरत्नादावि-त्यर्थः । लक्षणप्रतिपदोक्तपरिभाषया स्थानिकार्यमादेशे नेति न युक्तमतिदेशविषये तदप्रवृत्तस्तोद्धनय-न्नाह—**स्थान्यादेशेति** । स्वरूपभेदादित्यर्थः । नन्वेवमपि 'तत्स्थानापन्न' इति न्यायेन स्यादेवात आह—**स्वंरूपमिति** । तत्प्रत्याख्यानपक्षेऽत्रापि तत्प्रकारो बोध्यः । अस्य 'न स्यादि'त्यत्रान्वयः । तमेव प्राप्ति-प्रकारमाह—**तत्स्थानेति** । स्थाने=प्रसङ्गे । आदिना पूजादि । **न्यायेनेति** । 'प्राप्त'मिति शेषः ।

❀ ज्योत्स्ना ❀

न लक्ष्यभेद इति । 'उदवोढा'मित्यादौ उद वह् स् तामिति स्थिते सिज्लोपादेरसिद्धत्वाद्धलन्त-लक्षणायां वृद्धौ 'सहिवहोरो'दित्योत्वे लक्ष्ये लक्षणस्येतिन्यायेन पुनर्वृद्धिर्नेति 'सिचि वृद्धि'रिति सूत्र-भाष्यविरोधादिति भावः । **स्थान्यादेशयोर्भेदादिति** । स्थान्यादेशयोर्भेदात्स्थानिकार्यमादेशे न स्यात् । लोकन्यायाश्रयणे तु स्वं रूपमित्युक्तेर्न स्यादिति योज्यं, स्पष्टञ्चेदं भाष्ये ।

❀ सदाशिवभट्टीयम् ❀

स्थानिवदा । 'अन'लित्यस्य पर्युदासत्वे स्थान्यल्भिन्नाश्रयविधावित्यर्थे 'व्यूढोरस्केने'त्यादौ दोषः, विशेषणन्तु खट्वाभिरित्यादौ ह्रस्वत्वानतिदेशैनसादिव्यावृत्या चरितार्थं, प्रकृतसूत्रे 'प्रतिषेध' इति

स्थानिकार्यमादेशे न स्यादतः स्थानिवत्सूत्रम् । **न तु स्थान्यलेति** । प्रत्यासत्तिन्याय-लब्धमिदम् ।

आदेशस्य स्थानिभूतो योऽल्,—तत्स्थानिसबन्धी च योऽल्,—तद्वृत्तिधर्माश्रये नेत्यर्थः।

❀ अभिनव-चन्द्रिका ❀

प्रत्यासत्तिन्यायलब्धमिदमिति । न च 'स्थानिवदादेश'इत्यत्र स्थानिपदापेक्षया आदेशपदस्यैव प्रत्यासन्नत्वेनेदमसङ्गतमितिवाच्यम्,'अग्निहोत्रं जुहोति' 'यवागूं पचती'त्यत्रेव पाठक्रमादर्थक्रमस्य बलीयस्त्वेन अर्थक्रमे स्थानिपदस्यैव सन्निहितत्वात् । **आदेशस्य स्थानिभूतो योऽलिति** । स्यादेतत्–'रामाये' त्यादौ स्थानिभूतो योऽल् एकारस्तद्वृत्ति सुप्त्वं, तन्निमित्तकत्वाद्दीर्घस्यानल्विधाविति निषेधः स्यादिति चेन्मैवम्। स्थानिशब्दस्य सम्बन्धिशब्दत्वेन आदेशलाभे पुनरादेशपदोपादानं स्थानितायामल्त्वव्याप्यधर्मावच्छिन्नत्वलाभार्थमित्यदोषात् । तथाचाल्त्वव्याप्यधर्मावच्छिन्नस्थानितासमानाधिकरणधर्मनिमित्तके विधौ न स्थानिवदित्यर्थः पर्यवसन्नः । 'ङेर्य'इत्यादौ स्थानितावच्छेदकं ङेत्वं तच्च नाल्त्वव्याप्यमिति रामायेत्यादौ न दोषः । नन्वेवमपि वाक्यसंस्कारपक्षे 'राम ए अत्रे'त्यत्र अल्त्वव्याप्यो धर्म एत्वं, तदवच्छिन्नस्थानितासमानाधिकरणो धर्मः सुप्त्वं, तन्निमित्तको विधिः—यादेशविधिरिति पुनरप्यनल्विधाविति निषेध इति चेन्न, अल्त्वव्याप्यधर्मावच्छिन्नस्थानितानिरूपितादेशताश्रयधर्मिकारोपप्रकारीभूत-

❀ चिदस्थिमाला ❀

अनल्विधाविति–प्रसज्य प्रतिषेधो न पर्युदासः,स्थान्यलभिन्नालाश्रयविधावित्यर्थे 'व्यूढोरस्केन''तन्वन्ती'त्याद्यसिद्ध्यापत्तेः, स्थान्यलाश्रितविध्यन्यविधावित्यर्थे बभूविवेत्याद्यसिद्ध्यापत्तेस्तदाह—**न त्विति** । यद्यपि 'कष्टाये'-ति ज्ञापकलब्धमिदं, तथापि ततो लाघवादाह—**प्रत्यासत्तीति** । तदर्थमाह—**आदेशेति** । इदमपि प्रत्यासत्त्यैव लब्धम् । **तदिति** । आदेशेत्यर्थः । 'तद्वृत्तिधर्माश्रयेनेत्यर्थः' इति पाठः । तदन्यतरवृत्तीत्यर्थः । अत एवादे-

❀ ज्योत्स्ना ❀

प्रत्यसत्तीति । आदेशः स्थानिवदनल्विधाविति वाक्यार्थप्रत्यासत्तिरिह विवक्षिता, शब्दतस्त्वादेश एव प्रत्यासन्नः—'स्थानिवदादेशोऽनल्विधा'विति ।

❀ सदाशिवभट्टीयम् ❀

भाष्याऽसङ्गतिश्चात आह—**न तु स्थानीति** । **प्रत्यासत्तीति** । तत्स्वरूपन्तु प्रकृतसूत्रस्थभाष्यप्रदीपोद्योतेषु स्पष्टम् । वस्तुतः फलानुरोधाल्लाघवाच्च पर्युदासोऽयं, भाष्यन्तु फलितार्थकथनपरमत एव शास्त्रीये कार्ये एव तत्प्रवृत्तिः, तथा च तस्य तत्त्वेऽयं सूत्रार्थः पर्यवसितः—'अनल्वृत्तिधर्मत्वेन स्थानितावद्वृत्तिकः,अल्मात्रावृत्तिः,अनल्मात्रावृत्तिधर्माऽघटितश्च यो धर्मस्तदाश्रये तद्वृत्तिनिरुक्तेतरधर्मानाश्रये च विधौ कर्त्तव्ये स्थानिवद्भवतीति। मूर्द्धाभिषिक्तव्यावृत्तय इत्थम्—'वृक्षस्तत्रे'त्यादावतिव्याप्तिवारणायाद्यं धर्मविशेषणम्, अत्र मानन्तु 'भोभगो'इति सूत्रस्थं भाष्यम् । अग्रहीदित्यत्रेकारस्येट्त्वेन स्थानिता, तस्य चेट्शब्देपि सत्त्वादनल्वृत्तित्वमिति तदतिदेशो भवत्येव । ग्रहोऽलिटीत्यत्राऽनियमत्वे मानाभावेनाचश्चेत्यस्य परिभाषात्वेनानुपस्थितेः,उपस्थितावप्य-

❀ विषमपदविवृतिः ❀

इत्यतो वाग्रहणानुवृत्तिर्बोध्या । **प्रत्यासत्तीति** । ननु स्थान्यपेक्षयाऽऽदेश एव प्रत्यासन्न इति चेन्न, सूत्रे आदेशस्य प्रत्यासन्नत्वेपि शाब्दबोधाय कल्प्यमाने 'आदेशः स्थानिव'दिति वाक्ये

❀ वरवर्णिनी ❀

आदेशस्य स्थानीति । स्थानिभूताल्वृत्तिधर्माश्रये आदेशस्य विधौ कर्त्तव्ये स्थानिवद्भावो न भवतीत्यर्थः । एतदर्थफलन्तु–'धिन्वन्ती'त्यत्रेडभावः, वकाररूपादेश-स्थानिभूतोकारवृत्त्यार्द्धधातुकत्वरूपधर्माश्रयीभूतत्वादिड्विधेरनल्विधाविति निषेधात् । न चैवमनुबन्धविनिर्मुक्तपदार्थोपस्थित्या–स्थानिभूतोऽल–एका-

❀ अभिनव-चन्द्रिका ❀

धर्मनिमित्तके स्थानिवन्नेत्यर्थेन एत्वावच्छिन्नस्थानितानिरूपितादेशताश्रयत्वस्य यादेशे अभावेनादोषात्। नन्वेवं हल्ङ्याबितिसूत्रविरोधः, ङ्याब्ग्रहणेऽदीर्घइति वार्तिकविरोधः, हल्ङ्यादिसूत्रीयदीर्घग्रहणप्रत्याख्यानपरभाष्यविरोधः, 'कृन्मेजन्त' इतिसूत्रस्थभाष्यवार्त्तिकविरोधः, 'ग्रहोलिटी'तिसूत्रस्थभाष्यविरोधश्च। तथाहि—अतिखट्वो निष्कौशाम्बिरित्यादौ 'गोस्त्रियो'रितिसूत्रे अच-इत्यस्योपस्थित्या अल्त्वव्याप्याच्त्वावच्छिन्नस्थानितानिरूपितादेशताश्रयधर्मिको य—आरोपः'ह्रस्व आत्त्ववान् ङीत्ववान्' इत्याकारकस्तत्प्रकारीभूताप्त्वङीत्वनिमित्तकत्वाद्धल्ङ्यादिलोपस्य स्थानिवत्त्वनिषेधात्, दीर्घग्रहणस्य, ङ्याब्ग्रहणेऽदीर्घ इति वार्तिकस्य, ङी ई आ आप्—इति प्रश्लेषस्य चोपयोगाभावात्।

एवमाधये चिकीर्षवे कुम्भकारेभ्यो नगरकारेभ्य इत्यादौ 'घेर्ङिति' 'बहुवचने झल्येत्'-इत्यत्रालोन्त्यस्योपस्थित्याल्त्वव्याप्याल्त्वावच्छिन्नस्थानितानिरूपितादेशताश्रयगुणैकारधर्मिकारोपप्रकारीभूतकृत्त्वनिमित्तकत्वेनाव्ययसञ्ज्ञायामनल्विधावितिनिषेधात्—'अनिकारोकारप्रकृति'रितिवार्तिकस्य, सन्निपातपरिभाषया तत्प्रत्याख्यानस्य चासङ्गत्यापत्तेः। एवमग्रहीदित्यादौ 'ग्रहो लिटी'त्यत्राच्परिभाषोपस्थित्याल्त्वव्याप्याच्त्वावच्छिन्नस्थानितानिरूपितादेशताश्रयधर्मिकारोपप्रकारीभूतेट्निमित्तकत्वेन 'इट ईटी'ति सलोपस्य स्थानिवत्वाप्रवृत्त्या स्थानिवद्भावेन तत्र लोपकथनस्यासङ्गत्यापत्तेरिति चेन्नैवम्, अल्त्वव्याप्यधर्मावच्छिन्नस्थानितानिरूपितादेशताश्रयधर्मिकारोपप्रकारीभूत

❀ चिदस्थिमाला ❀

शिन्यलि आश्रीयमाणे प्रतिषेध इति भाष्यं सङ्गच्छते। वस्तुतोऽत्र लाघवात्पर्युदास एवोचितस्तत्स्पष्टीकृतमत्रैव भावप्रकाशे। मूलन्तु मूलाद्यनुरोधेन। एतेन 'प्रसज्यप्रतिषेध एवाय'मिति **रत्नाकरोक्त**मपास्तम्। भाष्यादिग्रन्थास्त्वत्रोदासीनाः। पर्युदासेप्यार्थिकनिषेधमादाय प्रतिषेधव्यवहाराङ्गीकार इति बोध्यम्। अत एव शास्त्रीयकार्ये एवायं स्थानिवद्भाव इत्यत्र सूत्रे शास्त्रीयकार्यस्याभावातिदेशो नेति नायक इत्यादिसिद्धिरत एव 'किरतौ लवने'इत्यादिनिर्देशसङ्गतिरत एव यथेष्टं वाक्यशेषाध्याहारो नेति बोध्यम्।

❀ सदाशिवभट्टीयम् ❀

जभिन्नस्येट इडभिन्नस्याच इति वाऽर्थादिट्त्वेन स्थानिता भवत्येव। अत्र चात्रत्यं भाष्यं मानम्। एवं 'साम्नी इमे' इत्यादावप्यौकारस्याङ्त्वेन सा, तस्य चौट्इत्यत्र सत्त्वादनल्वृत्तित्वं, तेन कार्यकालपक्षे स्वादित्वातिदेशेन भत्वेऽल्लोपः, द्विवचनत्वातिदेशे प्रगृह्यत्वञ्च। एवं रामायेत्यादावेकारस्य ङेशब्दवृत्तिङेत्वेन सेति सुप्त्वातिदेशः। अतिखट्वो निष्कौशाम्बिरित्यत्राकारेकारयोः स्त्रीप्रत्ययत्वेनाप्त्वादिना वा सा, गोस्त्रियोरिति ह्रस्वविधौ प्रतिलक्ष्यं वाक्यभेदात् प्रतिप्रत्ययविधायके विषयेऽनियमेपि टाबादिविषयकेषु तदभावेनाचश्चालोन्त्यस्येत्यनयोरनुपस्थितेः, उपस्थितावप्युक्तरीतेर्वा तेनाप्त्वादेरतिदेशः। अत एव 'हल्ङ्या'बित्यत्र दीर्घग्रहणं, 'ङ्याब्ग्रहणेऽदीर्घ' इति वार्तिकञ्च सङ्गच्छते। आकारादिप्रश्लेषश्च। अतिखट्वायेत्यत्राकारस्य 'सुपि चे'ति दीर्घविधावत्वेन स्थानित्वात्तस्य'चाच्छब्देपि सत्त्वादनल्वृत्तित्वं। तपरसूत्रस्य तु तपरबोध्य इत्यर्थ इति—तद्वृत्त्याप्त्वातिदेशे 'याडाप'इति स्यादतो 'ङ्याब्ग्रहणेऽदीर्घ' इति वक्तव्यमित्यत्रत्यं भाष्यं सङ्गच्छते।

❀ वरवर्णिनी ❀

रस्तद्वृत्तिसुप्त्व-धर्माश्रयतया'रामाये'त्यादौ'सुपि चे'ति दीर्घानापत्तिरिति वाच्यं,'स्थानिभूताल्वृत्त्यल्त्वव्याप्यधर्मावच्छिन्नस्थानितासमानाधिकरणधर्माश्रये विधौ न स्थानिव'दित्येवमनल्विधावित्यास्याऽर्थस्वीकारेण 'ङेर्य'इतिशास्त्रीयस्थानितायाश्च ङेत्वावच्छिन्नतया ङेत्वस्य चाऽल्त्वव्याप्यधर्मत्वाभावेनादोषात्। [एत्वन्तु न स्थानितावच्छेदकं, स्थानषष्ठीप्रकृत्यर्थतावच्छेदकङेत्वधर्मस्यैव प्रकृते स्थानितावच्छेदकत्वात्]। न चैवमपि वाक्यसंस्कारपक्षे 'राम-ए-अर्पये'त्यत्र यादेशस्थानिभूतो योल् एकारस्तद्वृत्तिरल्त्वव्याप्यो धर्म-एत्त्वं-

❀ अभिनव-चन्द्रिका ❀

धर्मेण साक्षावच्छिन्ना या उद्देश्यता तदुद्देश्यताके कार्ये कर्तव्ये स्थानिवन्नेत्यर्थेन हल्ङ्यादिलोपे ङीत्वाप्त्वयोरव्ययसञ्ज्ञायां कृत्त्वस्य सलोपे इट्त्वस्य चोद्देश्यताया परम्परयावच्छेदकत्वेन तत्र कर्त्तव्येऽनल्विधावित्यस्याप्राप्त्याऽदोषात्। नचैवं स्थानितायामल्त्वव्याप्यधर्मावच्छिन्नत्वनिवेशोऽनुपयुक्तः। रामायेत्यादौ एकाररूपाल्निष्ठस्थानितानिरूपिताऽऽदेशताश्रयधर्मिकारोपप्रकारीभूतसुप्त्वेन 'सुपि चे' ति दीर्घीयोद्देश्यतायाः साक्षादनवच्छिन्नत्वादिति वाच्यं, 'रमाया'मित्यादौ याडर्थं तन्निवेशस्यावश्यकत्वात्। तथाहि—इकाररूपाल्निष्ठस्थानितानिरूपिताऽऽदेशताश्रयाम् धर्मिकारोपप्रकारीभूतङ्ङिद्वचनत्वेन 'याडाप' इतिशास्त्रीयोद्देश्यतायाः साक्षादवच्छिन्नत्वात्। नचैवमपि दाम्नी इत्यादौ द्विवचनत्वातिदेशो न स्यात्। 'औङ आपः' इत्यत्र औङित्यस्यौकारविभक्तेः सञ्ज्ञात्वेन अल्त्वव्याप्यो य औत्वरूपो धर्मस्तद्धर्मावच्छिन्ना या औकारनिष्ठा स्थानिता तादृशस्थानितानिरूपिता या ईकारनिष्ठाऽऽदेशता तादृशादेशताश्रयधर्मिको य आरोपः 'ईकारः द्विवचनत्ववा'नित्याकारकस्तादृशारोपप्रकारीभूतो यो द्विवचनत्वरूपो धर्मस्तद्धर्मेण साक्षादवच्छिन्ना या 'ईदूदेद्विवचन'मिति शास्त्रीयोद्देश्यता तदुद्देश्यताके विधौ स्थानिवत्त्वस्य निषिद्धत्वादिति वाच्यम्, अल्त्वव्याप्यधर्मेण साक्षादवाच्छिन्ना या स्थानिता तादृशस्थानितानिरूपितादेशताश्रयधार्मिकारोपप्रकारीभूतधर्मेण साक्षादवच्छिन्ना योद्देश्यता तदुद्देश्यताके विधौ न स्थानिवदिति अनल्विधावित्यस्यार्थेन 'औङ आप' इत्यत्र—तस्मादिति परिभाषोपस्थाप्यं विशेष्यम्, औङ इति विशेषणमिति स्वीकारेण अल्त्वव्याप्यौत्वधर्मेण 'औङ आपः' इतिशास्त्रीयस्थानितायाः साक्षादनवच्छिन्नत्वेनदोषाभावात्।

❀ सदाशिवभट्टीयम् ❀

एतेनाद्यविशेषणे 'ह्रस्वो नपुंसके' 'कृन्मेजन्तः' 'स्थानिवदादेशे'इतिसूत्रभाष्यविरोधः, तथाहि—आद्ये चातिखट्वाय, अतिखट्वार्थं, अतिखट्वेभ्य इत्यत्र दीर्घैकदेशैत्वेषु सत्सूपसर्जनह्रस्वत्वमाशङ्क्य बहिरङ्गासिद्धत्वात्समाहितम्।त्वद्रीत्याकारवृत्तित्वात्स्त्रीप्रत्ययत्वातिदेश एव नेति। द्वितीये तु—'आधये' 'चिकीर्षवे' 'कुम्भकारेभ्य' इत्यत्र सन्निपातपरिभाषयाऽव्ययसञ्ज्ञा वारिता, त्वद्रीत्या कृत्त्वाऽन्ततिदेशात्प्राप्तिरेव नेति। तृतीये 'ङ्याब्ग्रहणेऽदीर्घ'इति वार्तिकेऽदीर्घ इत्युक्तं, तद्धि खट्वा इत्यत्र सुलोपार्थमाप्त्वातिदेशाय, त्वद्रीत्या कृतेपि प्राप्तिरेव नेतीत्यपास्तम्। आतिखट्वार्थम्, अतिखट्वा—उभयत्राप्यकाराऽऽकारयोः सवर्णदीर्घविधौ पूर्वत्वेन परत्वेन च स्थानित्वात् तस्य चानल्वृत्तित्वात्, आद्ये पूर्वान्तत्वेनाप्त्वस्य सुलभत्वाच्च, अन्त्ये परादित्वेन आप्त्वाच्चातिदेशस्य निषेधो मा सम्भाव्यतामित्यदीर्घ इति विशेषणमित्युद्योते स्पष्टमुक्तेश्च। स्वं रूपमित्यस्याविषये तत्स्थानेति लौकिकन्यायेन सिद्धेर्वक्ष्यमाणतया कृत्त्वातिदेशस्य सुलभत्वात्। पूर्वस्मादपि विधौ स्थानिवत्वप्रवृत्त्या स्थानिनि भवन्त्याः कृत्सञ्ज्ञाया आदेशे एव प्रवृत्तेश्च। अन्तरङ्गे कृत्वे बहिरङ्गगुणादेरसिद्धत्वेनाम्नी इत्यादौ प्रगृह्यत्वस्येव तद्वुच्यादेशे सुलभत्वाच्च। एवमन्यदप्यूह्यम्। अन्यच्चेदं-नन्वाद्यविशेषणेऽतो लोप इति सूत्रस्थभाष्यविरोधः,तत्र हि 'ण्यल्लोपयोरियङादिभ्यः पूर्वविप्रतिषेधो वक्तव्यो न वक्तव्यः सन्त्वत्रैते विधयः, एतेषु कृतेषु स्थानिवद्भावाण्णिग्रहणेन ग्रहणाल्लोपो भविष्यतीति, नैवं शङ्क्यम्, इयङि अन्तलोपः प्रसज्येते'त्युक्तम्। तव त्वियङादिविधावल्त्वेन स्थानितेतिप्राप्तिरेव नेतीति चेन्न। पञ्चमीसमासाभिप्रायकत्वादस्य, इदमेकदेश्युक्तमित्युद्योते स्पष्टमुक्तत्वाच्च। नन्वेवमपि कुमारीमिच्छन् कुमारीत्यत्रा-

❀ वरवर्णिनी ❀

तद्धर्मावच्छिन्नस्थानिता,—एकारे, तदधिकरणम् एकारस्तद्वृत्तिर्धर्मः सुप्त्वं, तदाश्रयो विधिः 'सुपि चे'ति दीर्घविधिस्तस्मिन्कर्तव्ये स्थानिवत्त्वं न स्यादिति वाच्यं, 'स्थानिभूताल्वृत्त्यल्त्वव्याप्यधर्मावच्छिन्नस्थानितानिरूपितादेशताश्रयधार्मिकारोपप्रकारीभूतधर्मनिमित्तके विधौ न स्थानिव'दित्यर्थेन—अल्त्वव्याप्यैच्त्वावच्छिन्न-

ॐ वरवर्णिनी ॐ

स्थानितानिरूपितादेशताया अयादेश एव सत्त्वेन तदाश्रयधर्मिको य आरोपः 'अयादेश एत्वत्वा'निति तत्प्रकारीभूतधर्मस्य सुप्त्वे विरहेण क्षत्यभावात्। 'यकारः सुप्त्ववा'नित्यारोपे सुप्त्वस्य प्रकारत्वेपि यकारेऽल्त्वव्याप्यधर्मावच्छिन्नस्थानिताया अभावेन तादृशारोपस्य ग्रहीतुमशक्यत्वात्। अथैवमर्थस्वीकारे भूयाननर्थ आपद्यते, तथाहि–अतिखट्व'इत्यत्र स्थानिवद्भावेनाप्त्वमादाय प्राप्तस्य सुलोपस्य वारणार्थं 'हल्ङ्याब्भ्योदीर्घा'दिति दीर्घग्रहणं व्यर्थम्, 'अतिखट्वाये'त्यत्र स्थानिवत्त्वाभावार्थं 'ङ्याब्ग्रहणे दीर्घभिन्न-आदेशो न स्थानिव'दित्यर्थकं 'ङ्याब्ग्रहणेऽदीर्घ' इति वार्तिकञ्च निष्फलं, 'ङी-ई, आ-आ'विति प्रश्लिष्य दीर्घग्रहणस्य तद्वार्तिकस्य च प्रत्याख्यानपरं भाष्यञ्चासङ्गतम्, 'गोस्त्रियोरुपसर्जनस्ये'ति ह्रस्वविधा'वचश्चे'ति परिभाषयाऽच्पदोपस्थित्या 'अतिखट्व'इत्यादौ ह्रस्वस्थानी–आकारस्तद्वृत्तिरल्त्वव्याप्यो धर्मः अच्त्वं, तदवच्छिन्ना स्थानिता आकारनिष्ठा, तन्निरूपितादेशता ह्रस्वनिष्ठा, तदाश्रयधर्मिक आरोपः 'ह्रस्व आप्त्ववान् स्या'दित्यादिः, तत्प्रकारीभूतो धर्म आप्त्वङीत्वादिरूपः, तादृशधर्मावच्छिन्नोद्देश्यताकत्वस्य हल्ङ्यादिलोपे सत्त्वेनानल्विधाविति निषेधेन स्थानिवत्त्वाप्राप्तेः [एवञ्च दीर्घग्रहणादेः प्रश्लेषादिरूपोपायादेश्च वैयर्थ्यं स्पष्टम्]।

किञ्च आधिशब्दाच्चिकीर्षुशब्दाच्च चतुर्थ्येकवचने 'आधये' 'चिकीर्षवे' इत्यत्र 'घेर्ङिती'त्यत्रालोन्त्य-परिभाषोपस्थित्या स्वस्यापि स्वव्याप्यत्वत्य स्वीकारादल्त्वव्याप्याल्त्वावच्छिन्नस्थानितानिरूपितादेशताश्रयगुण-धर्मिक–'गुणः कृत्त्ववा'नित्यकारका–ऽऽरोपप्रकारीभूतकृत्त्वनिमित्तक'कृन्मेजन्त'इति शास्त्रविहिताव्ययसञ्ज्ञायां कर्त्तव्यायां स्थानिवद्भावस्यानल्विधाविति निषेधादेवाव्ययसञ्ज्ञाप्राप्तिरूप दोषाभावेन 'आनिकारोकारप्रकृति'रिति वार्तिकस्य सन्निपातपरिभाषया तत्खण्डनपरभाष्यस्याप्यसङ्गतिः, एवं 'कुम्भकारेभ्य'इत्यादावपि 'बहुवचने झल्ये'त्वेत्वे कृते प्राप्ताया अव्ययसञ्ज्ञाया वारणपरभाष्यवार्तिकादिवैयर्थ्यमपि, एवमग्रहीदित्यत्र स्थानिवत्त्वेन सिज्लोपसाधनमपि भाष्यकृतोऽसङ्गतं—'विशिष्टं ह्येषोऽनलमाश्रयत इटं नामे'ति। किञ्चौ'ङः इयां प्रतिषेधो वाच्य' इति वार्तिकवैयर्थ्यं, 'ज्ञाने' इत्यादौ इयादेशविधायक–'नपुंसकाच्चे'तिशास्त्रीयस्थानिताया अल्त्वव्याप्यौङ्त्वधर्मावच्छिन्नतया स्थानिवत्त्वाप्राप्त्या इयादेशे सुप्त्वविरहेण 'यचि भ'मिति भत्वाप्राप्त्या 'यस्येति चे'ति लोपप्राप्तेरेवाभावात्। किञ्च,—यण्शास्त्रीयोद्देश्यताया इक्त्वेनावच्छेदात्स्थानिवत्त्वाप्रवृत्त्या 'वैयाकरण'इत्यत्रेकारवृत्तिपदान्तत्वनिमित्तक ऐजागमो न स्यात्। किञ्च कार्यकालपक्षे 'राम'इत्यादौ विस-र्गोऽपि न स्यात्, ससजुषो'रिति शास्त्रीयस्थानितायाः तादृशधर्मेण सत्वेनावच्छेदात्स्थानिवत्त्वाप्रवृत्त्या रुसम्बन्धिरेफे सुप्त्वाभावेन कार्यकालपक्षे पदत्वाभावादिति चेन्नैवम्। 'स्थान्यवयवाल्वृत्त्यल्त्वव्याप्यधर्मा-वच्छिन्नस्थानितानिरूपितादेशताश्रयधर्मिकारोपप्रकारीभूतधर्मेण साक्षादवच्छिन्ना या उद्देश्या तदुद्देश्यताके विधौ न स्थानिव'दित्यर्थस्वीकारणे—तादृशाप्त्वङीत्वादिधर्मेण हल्ङ्यादिशास्त्रीयोद्देश्यतायाः परम्पर-यैवावच्छेदेन साक्षादनवच्छेदाद'तिखट्व' इत्यादाव'नल्विधा'वित्यस्य प्राप्त्यभावेन स्थानिवद्भावेनाप्त्वा-द्धल्ङ्यादिलोपादिप्राप्तौ तद्वारणाय दीर्घग्रहणादेरावश्यकतया तद्वैयर्थ्याभावात्।

एवमेव—'कृन्मेजन्त' 'इट इटी'त्यादावपि कृदन्तत्वसत्वादिधर्मैरेव साक्षादवच्छेदेन कृत्त्वेट्त्वादि-तादृशधर्मैस्तदुद्देश्यतायाः परम्परयैवावच्छेदेनानल्विधावित्यस्याप्रसङ्गेन न तत्तद्ग्रन्थासङ्गतिरित्यवधेयम्। 'यचि भमिति'सुप्तिङन्त'मितिशास्त्रीयोद्देश्यतायाः (कप्प्रत्ययावधि—) स्वादित्व—सुप्त्वादिधर्मेण परम्परयै-वावच्छिन्नतया न 'ज्ञाने'इत्यादावुक्तदोषः। वैयाकरण इत्यत्रापि लक्ष्यानुरोधात्—यत्ववत्वादिधर्मेणैव-तदुद्देश्यतायाः साक्षादवच्छिन्नत्वेन—अल्त्वव्याप्यधर्मावच्छिन्नस्थानिता निरूपितादेशताश्रय—पदान्तत्व-धर्मेण साक्षादवच्छिन्नत्वाभावेन क्षत्यभाव इति **जटाजूटकृद्–श्रीबालशास्त्रि—दण्डिभट्टाद्यभिप्रायः**।

'आरे'त्यत्र शङ्कासमाधानपरोऽग्रिमशेखरग्रन्थस्तु साक्षात्पदनिवेशमबुध्वैव प्रवृत्तः, उपायस्योपायान्तरा-दूषकत्वादिति न पूर्वापरविरोधः। एतेन—'हलादिः शेष'इतिशास्त्रीयोद्देश्यताया आदिहल्त्वेनैव साक्षाद-

❀ अभिनव-चन्द्रिका ❀

परे तु अल्पर्याप्तस्थानितानिरूपिताऽऽदेशताश्रयधर्मिकारोपप्रकारीभूतधर्मेण साक्षादवच्छिन्ना या उद्देश्यता तदुद्देश्यताके विधौ स्थानिवन्नेत्येवार्थः स्वीक्रियते। नचैवं 'रमायां' 'सर्वस्या'मित्यादौ याट्स्याटौ न स्याताम्, 'अनुबन्धविनिर्मुक्तपदार्थोपस्थिति'रिति सिद्धान्तेन स्थानिताया अल्पर्याप्तत्वा-

❀ सदाशिवभट्टीयम् ❀

'कृत्सावें' तिदीर्घे 'हल्ङ्याबि'ति सुलोपो न स्यात्, अच्त्वेन स्थानितेति ङीप्त्वाऽनतिदेशादिति चेन्न। अपरनिमित्तकत्वेनान्तरङ्गे लोपे दीर्घस्यासिद्धत्वात्। पञ्चमीसमासेन स्थानिवत्वाच्च। नन्वेवमप्यपश्यो- ऽधावन् मृग इत्यादौ सिपो रुत्वे उत्वे गुणे पूर्वरूपे च कृते तिङ्ङतिङ इति निघातः स्यात्, सकारवृत्ति-

---

❀ वरवर्णिनी ❀

वच्छिन्नत्वादभ्यासत्वेन परम्परयैवाऽवच्छिन्नतयाऽनल्विधावितिनिषेधाप्रवृत्तेः स्थानिवत्त्वेनैव सिद्धौ शङ्का-समाध्योरसङ्गतिरिति परास्तम्।

न चैवं साक्षात्त्वनिवेशेऽल्त्वव्याप्यधर्मावच्छिन्नत्वस्य स्थानितायां निवेशो व्यर्थः, तादृशनिवेशाभावे-ऽपि 'रामाये'त्यादावेकाररूपाल्निष्ठस्थानितानिरूपितादेशताश्रययकारधर्मिकारोपप्रकारीभूतधर्मेण सुप्त्वेन 'सुपि चे' तिशास्त्रीयोद्देश्यतायाः परम्परयैवावच्छिन्नत्वेनानल्विधावित्यस्याप्राप्त्या दोषाभावादिति वाच्यं, 'रमाया'मित्यत्रेकाररूपाल्निष्ठस्थानितानिरूपितादेशताश्रयाऽऽम्धर्मिक—'आम् ङित्ववान्स्या'दित्याकारका-रोपप्रकारीभूतङित्त्वधर्मेण साक्षादवच्छिन्नोद्देश्यताके याटि कर्त्तव्ये स्थानिवद्भावानिषेधापत्तेः। 'अल्त्वव्या-प्यधर्मावच्छिन्नत्व'निवेशे तु न दोषः, ङित्त्वस्याल्त्वव्याप्यत्वाभावादिति**चन्द्रिकायां** स्पष्टम्।

न चैवमपि 'लोम्नी अत्रे'त्यत्र'दूदे'दितिप्रगृह्यसञ्ज्ञाशास्त्रीयोद्देश्यतायास्तादृशारोपप्रकारीभूताद्विवचनत्व धर्मेण साक्षादवाच्छिन्नतया**ऽनल्विधा**वितिनिषेधेन द्विवचनत्वातिदेशो न स्यादिति वाच्यम्, औङ्त्व-स्यौङ्यपि सत्त्वेन तस्याल्त्वव्याप्यधर्मत्वाभावेन 'नपुंसकाच्चे'तिशास्त्रीयस्थानिताया अल्त्वव्याप्यधर्मावच्छिन्न-त्वाभावेन निषेधाप्रवृत्तेः। **चन्द्रिकाकारास्तु**—एतद्दोषपरिहाराय स्थानितायामपि साक्षात्त्वं न्यवीविशन्।

परे तु—स्थानितायामेव साक्षात्त्वानिवेशेनैव पूर्वोक्तसकलदोषनिरासे 'उद्देश्यतायां'तन्निवेशो मुधैव, तथाहि—'अतिखट्व'इत्यादौ 'गोस्त्रियो'रिति सूत्रे निर्दिश्यमानपरिभाषाप्रवृत्त्योपसर्जनस्त्रीप्रत्ययान्ततदाद्यन्त-निर्दिश्यमानस्य ह्रस्व इत्यर्थेनानियमाभावादनियमे नियमकारिण्या अलोन्त्यपरिभाषाया अप्रवृत्त्याऽल्त्व-व्याप्यधर्मेण साक्षादवच्छिन्नस्थानिताया अभावेन स्थानिवत्त्वप्रसक्त्या सूत्रभाष्यवार्तिकादिसङ्गतेः। 'गोस्त्रि-यो'रित्यत्रालोन्त्यसूत्रप्रवृत्तावपि तदुपस्थाप्यालो निर्दिश्यमानविशेषणतयाऽल्त्वेन साक्षादवच्छिन्नस्थानिताया अभावादनल्विधावितिनिषेधाप्रवृत्त्या स्थानिवद्भावप्रसङ्गादुक्तभाष्यादिसङ्गतेश्च।

एवमेव 'बहुवचने झली'त्यत्रापि अल्त्वप्याप्यधर्मेण साक्षादवच्छिन्नस्थानिताया अभावान्न पूर्वोक्त-भाष्यासङ्गतिरित्याहुः। विस्तरस्त्व**भिनवराजलक्ष्म्या**मनुसन्धेयः। 'धिन्वन्ती'त्याद्यर्थमाद्यार्थस्वीकारेऽपि 'प्रदीव्ये'त्यत्र स्थानिवद्भावादिडापत्तिरतः प्राचीनाभिमतमर्थमप्याह—**तत्स्थानिसम्बन्धी चेति**। एवञ्च स्थानिघटकाल्वृत्त्यल्त्वव्याप्यधर्मघटितधर्माश्रये विधौ न स्थानिवदित्यर्थेन 'प्रदीव्ये'त्यत्र वलादित्वलक्षणे इटि तन्निषेधान्न दोषः।

तदेवं स्थान्यल्विशिष्टे विधौ न स्थानिवदित्यर्थः, वै० 'स्ववृत्त्यल्त्वव्याप्यधर्मावच्छिन्नस्थानिरू-पितादेशताश्रयधर्मिकारोपप्रकारीभूतधर्मेण साक्षादवच्छिन्नोद्देश्यताकत्व' 'स्ववृत्त्यल्त्वव्याप्यधर्मघटितादिदिक्षि-तधर्मावच्छिन्नोद्देश्यताकत्वै'तदन्यतरसम्बन्धेनेति नागेशमते निष्कृष्टोऽर्थः, सम्बन्धविधयाऽर्थद्वयस्यानिवेशान्न-सकृदुच्चरितन्यायभीत्याऽऽवृत्त्यादिक्लेशः। आद्यस्य फलं—धिन्वन्ति। द्वितीयस्य तु—प्रदीव्येति। स्पष्टञ्चेदम-**भिनवचन्द्रिकायामिति** सङ्क्षेपः। प्राचीनाभिमतार्थपरिष्कारप्रकारो**ऽभिनवराजलक्ष्म्या**मनुसन्धेयः।

ॐ अभिनव-चन्द्रिका ॐ

दिति वाच्यं, बोधकावयवेषु अनुबन्धेषु बोध्यावयवत्वमारोप्यते इति 'एकान्ता अनुबन्धा' इत्यस्य तात्पर्येण प्रकृते च ङकारैकारोभयपर्याप्तत्वेन स्थानिताया अल्पर्याप्तत्वाभावात् । नचैवं 'साम्नी' 'लोम्नी'इत्यादौ दोषो दुरुद्धरः, स्थानिताया अल्पर्याप्तत्वादिति वाच्यं, 'सञ्ज्ञाविधा'विल्यस्याऽनित्यत्वेन ईदूदेदित्यस्य ईदूदेदन्तं यद्विवचनं तदन्तं यत्तदादि तत् प्रगृह्यमित्यर्थेन 'साम्नी' इत्यादौ स्थानिताया अल्पर्याप्तत्वेऽपि तादृशस्थानितानिरूपिताऽऽदेशताश्रयधर्मिकाऽऽरोपप्रकारीभूतद्विवचनत्वस्य प्रगृह्यसञ्ज्ञीयोद्देश्यतायाः साक्षादनवच्छेदकत्वात् । एवञ्च स्थानितायामल्त्वव्याप्यधर्मावच्छिन्नत्वनिवेशो विफल एवेत्याहुः ।

तत्स्थानिसम्बन्धी च योऽलिति । [२१२पृष्ठे] स्थानिसम्बन्ध्यल्वृत्तिधर्मनिमित्तके कार्ये स्थानिवत्त्वं नेति यावत् । न च रामायेत्यादौ 'सुपि च' इति दीर्घानापत्तिः । स्थानी एकारस्तत्सम्बन्धी योऽल् व्यपदेशिवद्भावेन स एव, तद्वृत्तिर्यो धर्मः—सुप्त्वं तन्निमित्तकत्वाद्दीर्घे कर्तव्ये स्थानिवत्त्वनिषेधादिति वाच्यम्, अल्वृत्तिधर्मे अल्त्वव्याप्यत्वस्य विशेषणेनादोषात् । नचैवमपि 'प्रपठ्य'त्यादौ वलादित्वस्यातिदेशापत्तिः, वल्त्वे स्थानिसम्बन्ध्यल्वृत्तित्वस्याल्त्वव्याप्यत्वस्य च सत्त्वेऽपि इटो वलादित्वनिमित्तकत्वेन वल्त्वनिमित्तकत्वाभावेन निषेधाप्राप्तेरिति वाच्यं, स्थानिसम्बन्धी योऽल् तद्वृत्तिर्योऽल्त्वव्याप्यो धर्मस्तद्घटितधर्मनिमित्तके कार्ये कर्त्तव्ये स्थानिवन्नेति द्वितीयार्थस्वीकारेणादोषात् ।

नचैवमपि बभूविवेत्यादाविडनापत्तिः, स्थानी यो वस्, तत्सम्बन्धी अल् वकारस्तद्वृत्तिर्यो धर्मो वलादित्वं—तन्निमित्तक इडितिस्थानिवत्त्वनिषेधादार्द्धधातुकत्वस्यातिदेष्टुमशक्यत्वादिति वाच्यम्, अल्त्वव्याप्यधर्मघटितधर्मे 'अतिदिदिक्षित' इति विशेषणदानेन अतिदेष्टव्यार्द्धधातुकत्वे अल्त्वव्याप्यधर्मघटितत्वाभावेनादोषात् । यश्चाल्त्वव्याप्यधर्मघटितो धर्मो—वलादित्वं, न सोऽतिदिदिक्षित इति । ननु 'स्थानिसम्बन्धी'तिविशेषणदानं विफलमिति चेदिष्टापत्तिरेवेति दिक् ।

ॐ सदाशिवभट्टीयम् ॐ

तिङ्त्वस्य त्वन्मते रेफेऽनतिदेशादग्रे प्ररोहासम्भवेनातिङन्तात् परत्वादिति चेन्न । रुत्वस्यासिद्धत्वेन रेफ एव मध्यगसादृश्यबुद्ध्या तिङ्सञ्ज्ञाया—अग्नी इत्यत्र प्लुते प्रगृह्यत्वस्येव—पुनः प्रवृत्याऽग्रे प्ररोहसम्भवात् । एवमतृणेडित्यादौ हल्ङ्यादिलोपविषये हल्त्वेन तत्त्वेपि सुप्त्वादिनापि स्थानितेति स्थानिवत्त्वं प्रवर्ततएवेति बोध्यमिति दिक् ।

रमाभी रामायेदमित्यादावत्वैच्त्वयोस्तथात्वादातिदेशे ऐस अयादिश्च स्यादतो **द्वितीयं धर्म**विशेषणम् । अत्र च मानमाकारप्रश्लेषेण ङ्याब्ग्रहणेऽदीर्घ इति वार्तिकप्रत्याख्यानपरं भाष्यञ्च । अन्यथाऽऽप्त्वादेरिवात्वेत्वयोरप्यतिदेशः प्राप्नोत्येवेति तदसङ्गतिः स्पष्टैव । **अल्वृत्ति**रित्येवोक्तौ त्वाप्त्वेट्त्वयोरातिदेशो न स्यादत**स्तन्मात्र** इत्युक्तम् । अत्र मानम्पूर्वोक्तं भाष्यमुन्नेयम् ।

प्रदीव्येत्यादौ वलादित्वातिदेशः स्यादत**स्तृतीयं धर्म**विशेषणम् । अत्र मानं विधिग्रहणं भाष्यञ्च, प्रदीव्येत्यत्रैव तथाविधार्द्धधातुकत्वाश्रयत्वादिड्विधेरतिदेशः स्यादतस्त**द्वृत्ती**त्यादिना विधिर्विशेषितः, अत्र मानं भाष्यप्रयोगादिकं यथायथमूह्यम् । क्षोदिष्यते चेदं यथाध्यापनम् । अत्रेदमवधेयम्—लस्येत्यधिकृत्य विहितेषु तिबादिषु लकारवृत्तिलिट्त्वादेरतिदेशो भवत्येव, उच्चारणार्थत्वेपि लत्वस्यानल्वृत्तित्वानपायात्, तेन चक्र इत्यादावादेशोत्तरं द्वित्वसिद्धिः, रैवतिकादौ यस्येतिलोपसिद्धिश्च, 'ठस्येक'इत्यत्र वर्णनिर्देशस्यैव सिद्धान्तात् । अत एव किति लिटि विधीयमानावित्वाऽभ्यासलोपौ कृतार्थौ । नचैवं 'वर्णनिर्देशेत्वल्विधित्वान्माथितिकेकादेशो ने'ति ठस्येक इति सूत्रस्थभाष्यविरोध इति वाच्यम्, विशिष्टनिर्देशेपि ठमात्रस्यैवोद्देश्यताबोधविषयत्वेन तस्य चाल्मात्रवृत्तित्वादतिदेशाभावेन कादेशाऽप्राप्तेरिति । **स्थानिभूत इति** । व्यपदेशिवद्भाव-

अत एव रेफस्थानिकविसर्गस्य रुशब्दत्वं न स्थानिवत्त्वेनेति 'भोभगो' इत्यत्र भाष्ये स्पष्टम् । ऋधातोर्द्वित्वेऽभ्यासस्योरदत्त्वेऽरित्यस्य हलादिःशेषस्तु—अरित्यस्य पुनः 'पूर्वोऽभ्यासः' इत्यनेनाभ्यासत्वात् । तस्यापि द्विरुक्तधातुपूर्वभागत्वात् । प्रक्रियाज्ञानवतां तथा ज्ञानस्य सुलभत्वात् ।

❀ अभिनव-चन्द्रिका ❀

द्विरुक्तधातुपूर्वभागत्वादिति । ननु 'देवदत्तौ पेचतु'रित्यादौ देवदत्तावित्यादेरपि द्विरुक्तपूर्वभागत्वेनाभ्याससञ्ज्ञापत्तिः, न च 'देवदत्ता'वित्यादेरभ्याससञ्ज्ञायामपि न दोषः, अभ्यासकार्याणामभ्याससञ्ज्ञाप्रयोजकप्रत्ययनिमित्तकत्वेन—'ह्रस्वः' इत्यादेरभ्याससञ्ज्ञाप्रयोजकप्रत्ययनिमित्तकाङ्गावयवाभ्यासस्याचो ह्रस्वो भवतीत्यर्थेन प्रकृतेरभ्यासकार्यप्राप्त्यभावादिति वाच्यम्, एवमपि ऊर्णुनाव ऊर्णुनुविषतीत्यादौ ऊर्णु इत्यस्य अभ्याससञ्ज्ञायां ह्रस्वाद्यापत्तेरिति चेन्न । द्विर्वचनीयविधेयताश्रय—द्विवचनीयोद्देश्यताश्रयैतदुभयमात्रारब्धसमुदायघटको यो द्विर्वचनीयविधेयताश्रयावधिकपूर्वत्वविशिष्टः सोऽभ्याससञ्ज्ञको भवतीत्यर्थेनादोषात् । प्रकृते च 'अर्—ऋ' इत्यत्र एकदेशविकृतन्यायेन तादृशसमुदायत्वं बोध्यम् । अथवा द्विर्वचनीयविधेयताश्रय-द्विर्वचनीयोद्देश्यताश्रयैतदुभयमात्रारब्धसमुदायसमभिव्याहृतवर्णाघटितो यो द्विर्वचनीयविधेयताश्रयावधिकपूर्वत्वविशिष्टः सोऽभ्याससञ्ज्ञको भवतीति 'पूर्वोऽभ्यास' इत्यस्यार्थेन 'अर्—ऋ' इति समुदाये एकदेशविकृतन्यायेन तत्त्वानयनाभावेऽपि न क्षतिरिति दिक् ।

❀ चिदस्थिमाला ❀

तत्राद्यार्थं समूलं सफलमाह—**अत एवेति** । आद्यार्थाङ्गीकारादेवेत्यर्थः । तथा च तत्राल्पग्रहणं व्यर्थमेवेति भावः । नन्वेवमोरत्यादावरादेशे यथोद्देशपक्षेऽपि सम्पूर्णविकारत्वेनैकदेशेतिन्यायाप्रवृत्त्याऽभ्यासत्वं दुर्लभमिति हलादिः शेषो न स्यादत आह—**ऋधातोरिति** । **त्वादिति** । 'बोध्य' इति शेषः । ननु ययोर्द्वित्वं तत्पूर्वभागस्यासत्त्वात्कथं तत्त्वमत आह—**तस्यापीति** । 'एकदेशे'तिन्यायेनोच्चारितयोर्द्वयोः शब्दस्वरूपयोः सत्त्वमित्याह—**द्विरुक्तेति** । ननु येषां न तथा ज्ञानं तेषां का गतिरत आह—**प्रक्रियेति** । तस्य

❀ सदाशिवभट्टीयम् ❀

सिद्धमिदं स्पष्टप्रतिपत्त्येय उक्तं, स्पष्टञ्चेदमत्रैव**वोद्योते** । **अत एव रेफेति** । आद्यार्थाङ्गीकारादेवेत्यर्थः । एवमेवाग्रे । **पुनःपूर्वेति** । 'लक्ष्ये लक्षणस्ये'ति नात्र, सञ्ज्ञाविषये तदप्रवृत्तेः प्रगृह्यसञ्ज्ञाप्रकरणे भाष्ये स्पष्टत्वात् । **तस्यापीति** । अभ्यासस्यानर्थकत्वादृ ऋ इत्यस्याऽर् ऋ इत्यादेशे स्थानिवद्भावेन द्विरुक्तधातुत्वम्, पूर्वभागत्वन्त्वार्थसमाजग्रस्तम् । **तथाज्ञानेति** । स्थान्यादेशभावज्ञानस्य इत्यर्थ इत्याहुः । परेत्वत्र अशास्त्रीयातिदेशो भवति । अन्ये तु तत्स्थानापन्नेति लौकिकन्यायेनाल्वृत्तेरपि पूर्वभागत्वस्यातिदेश इत्याहुः । एवं ह्यभ्यासत्वमेव कुतो नातिदिष्टमिति ।

❀ विषमपदविवृतिः ❀

स्थानिनः प्रत्यासन्नत्वमित्याशयात् । **अत एवेति** । 'तन्मात्रवृत्ती'त्यनिवेश्य 'तद्वृत्ती'त्येवं निवेशादेवेत्यर्थः । **पुनरिति** । सञ्ज्ञासु लक्ष्ये लक्षणस्येति न्यायानाश्रयणादिति भावः । **तस्यापीति** ।

❀ वरवर्णिनी ❀

द्विरुक्तधातुपूर्वेति । वस्तुतस्तु 'पूर्वोऽभ्यास'इत्यस्य द्वित्वशास्त्रविशिष्टोऽभ्याससञ्ज्ञः इत्यर्थः । वै० 'स्वप्रयोज्यविधेयताश्रयावधिकपूर्वत्वं' 'स्वप्रयोज्योद्देश्यताविशिष्टत्वै'तदुभयसम्बन्धेन । वै० 'स्वाश्रयत्व' 'स्वाश्रयनिष्ठोद्देश्यतानिरूपितविधेयताश्रयत्वै'तदुभयसम्बन्धेनेति न 'देवदत्तौ देभतु'रित्यादौ कोपि दोष इत्यसद्गुरवस्त्रिपाठिपादाः ।

अत एव धिन्वन्तीत्यादाविण्न, उकारवृत्त्यार्धधातुकत्वस्य वकारेऽनतिदेशात् ।

❀ अभिनव-चन्द्रिका ❀

इण्नेति । ननु धिन्वन्तीत्यादौ न दोषः, इटोऽपरनिमित्तकत्वेनान्तरङ्गतया तस्मिन्कर्तव्ये यणो बहिरङ्गत्वेनासिद्धत्वात् । न च परनिमित्तकापरनिमित्तकशास्त्रयोराश्रीयमाणसमुदायो यत्रान्यूनातिरिक्तस्तत्रैवापरनिमित्तकमन्तरङ्गमित्यस्य विषयः । अत एव 'सुस्यूषति' 'दुद्यूषति इत्यादौ यणः पूर्वं द्वित्वं न भवतीति वाच्यम्, अन्तर्भूतनिमित्तकत्वान्तरङ्गत्वस्य यणि सत्त्वेनापरनिमित्तकत्वरूपान्तरङ्गत्वस्य द्वित्वे सत्त्वेनोभयोस्समानलबलतया परत्वाद्यणि द्वित्वे च रूपसिद्धेरिति चेन्मैवम्। 'अचोऽन्यानन्तर्यनिमित्तककार्यप्रवृत्त्युत्तरं यदन्तरङ्गं प्राप्नोति तत्र कर्तव्ये बहिरङ्गासिद्धत्वं ने'त्यर्थकनाजानन्तर्य इतिपारिभाषया निषेधात्। अत एवाक्षद्यूरित्यादौ 'लोपो व्यो' रिति लोपो न ।

किञ्च एः अजः–यजस्तस्यापत्यं याजिरित्यादौ 'न य्वाभ्यां पदान्ताभ्यां पूर्वौ तु ताभ्यमैं' जिति ऐजभाव आद्यार्थकानल्विधावित्यस्य प्रयोजनम् । तथाहि—'न य्वाभ्या'मिति सूत्रे पूर्वाविति विधेयविशेषणम् । तथाचाल्त्वव्याप्यधर्मावच्छिन्नस्थानितानिरूपितादेशताश्रययण्धर्मिको य आरोपः 'यण्पदान्तत्ववा'नित्याकारकः, तादृशारोपप्रकारीभूतपदान्तत्वेन ऐच्शास्त्रीयोद्देश्यता साक्षादवच्छिन्नेति निषेधप्रवृत्तिः स्पष्टैव । न च 'धिन्वन्ती'त्यादौ पञ्चमीसमासेन स्थानिवद्भावादिटः प्राप्तिरेव नेति वाच्यम्, पञ्चमीसमासेनापि स्वविधौ स्थानिवत्त्वाप्रवृत्तेः । अत एव 'भवती'त्यादाववादेशः सिध्यति । अन्यथाऽवादेशप्रतिबन्धार्थं पञ्चमीसमासेन गुणस्य स्थानिवत्त्वं स्यादिति दिक् ।

अत्रेदमवधेयम्—आरेत्यादौ पुनरभ्याससञ्ज्ञायाः प्रयोजनं चिन्त्यम् । न च अल्त्वव्याप्यधर्मावच्छिन्नस्थानितानिरूपितादेशताश्रयधर्मिकारोपप्रकारीभूताभ्यासत्वनिमित्तकत्वाद्धलादिःशेषस्यानल्विधाविति निषेधः स्यादिति वाच्यं, 'हलादिः शेष' इत्यत्राभ्यासादेरेव हल उद्देश्यत्वेन तादृशप्रकारीभूताभ्यासत्त्वेन उद्देश्यतायाः साक्षादनवच्छिन्नत्वात् । अभ्यासत्वावच्छिन्नमुद्दिश्य आदिर्हल् शिष्यते इत्युक्त्वा दोषदानस्य 'पूर्वोऽभ्यास' इत्यस्य निरुक्तार्थकरणस्य चानुचितत्वात् । अत एव 'चेच्छिद्यते' इत्यत्र हलादिःशेषो न । अन्यथा पूर्वोक्तदिशा तुग्विशिष्टस्याभ्याससञ्ज्ञायाः सत्त्वेन स दुर्वारः स्यात् । मम तु द्विर्वचनीयोद्देश्यताश्रयस्यैवाभ्याससञ्ज्ञेति तुग्विशिष्टे सा नेति न दोषः । दीर्घस्यैव तुगिति यदागमपरिभाषायाः प्राप्तिरेव नेति तयापि न दोषः । अवयवावयवन्यायस्य लौकिकत्वेनानित्यत्वादप्रवृत्त्या तेनापि न दोषः । अवयवावयवस्यानङ्गीकारे यदागमपरिभाषाया अनित्यत्वान्न दोष इति परे ।

किञ्च अनल्विधावित्याद्यार्थस्योपयोगोऽपि न । नच धिन्वन्तीत्यत्रेडभावाय स आवश्यक इति वाच्यम्,अन्तरङ्गपरिभाषया गतार्थत्वात्। न च'नाजानन्तर्ये'इति निषेध इतिवाच्यम्, अचोऽन्यानन्तर्यनिमित्तकं यदन्तरङ्गम्प्राप्नोति तदुत्तरकालिकान्तरङ्गप्राप्त्यभावेन तदप्रवृत्तेः। तस्या असत्त्वाच्च। सत्त्वे वा तस्या अनित्यत्वाच्च । अत एव'जगदम्बात्रे'त्यादौ ह्रस्वो न । नचैवमपि'याजि'रित्यत्रैजागमाभावाय सोऽर्थ आवश्यक इति वाच्यम्।'न य्वाभ्या'मित्यत्र पदान्तयकारवकारयोरुद्देश्यत्वेनाल्त्वव्याप्यत्वावच्छिन्नस्थानितानिरूपितादेशताश्रयधर्मिकारोपप्रकारीभूतपदान्तत्वधर्मस्यैजागमीयोद्देश्यतायाः

❀ चिदस्थिमाला ❀

द्वितीयं प्रयोजनमाह—**अत एवेति** । उक्तोर्थः । तत्फलमाह—**उकारेति** । अन्यथासिद्धिखण्डनेनेदं

❀ विषमपदविवृतिः ❀

इदं चिन्त्यं—द्विरुक्तोत्तरभागात्पूर्ववृत्तित्वस्य 'देवदत्तयज्ञदत्तौ देभतु'रित्यादौ सत्त्वाद्देवदत्तादेरप्यभ्याससञ्ज्ञापत्तिः । अभ्यासकार्येऽङ्गाधिकारेण तद्दोषवारणे तु ऊर्णुनावेत्यत्र'ह्रस्वो' 'हलादिः

यत्त्वत्रेण्णिवृत्तये स्वविधावपि स्थानिवत्त्वमपरविधाविति न्यासेन साधितं भाष्ये, सा त्वेकदेश्युक्तिः, असिद्धवत्सूत्रेण सिद्धस्याऽऽयन्नासन्नित्यादेस्तत्फलत्वेनोपन्यासात्। अस्यापि 'अचः पूर्वत्वविज्ञाना'दिति वार्त्तिके पञ्चमीसमासेन सिद्धेः कैयटेनोक्तत्वाच्च। प्रदीव्येत्यादौ च वलादिलक्षण इण्न। 'स्थान्य'लित्युक्तेर्बभूविवे-

❀ अभिनव-चन्द्रिका ❀

साक्षादनवच्छेदकत्वेन ऐयजिरितिरूपस्यैवेष्टत्वात्। न चैवमपि 'भोभगो' इति सूत्रस्थभाष्यविरोध इति वाच्यम्। तस्य भाष्यस्य र इत्यनुवृत्तिपरतया कथञ्चिद्योजयितुं शक्यत्वात्। तस्यैकदेश्युक्तित्वनादोषाच्च। अत एव 'साम्नी' इत्यादौ प्रगृह्यत्वं सिध्यति, अन्यथा 'सञ्ज्ञाविधा'विति निषेधात्प्रगृह्यसञ्ज्ञायां द्विवचनत्वस्य साक्षादुद्देश्यतावच्छेदकत्वेन दोषो दुरुद्धर एवेति दिक्।

स्थान्यलित्युक्तेरिति। स्थान्यल्विशिष्टधर्मघटितधर्मनिमित्तके विधौ कर्तव्ये स्थानिवन्नेत्यर्थः। वै० 'स्ववृत्तित्व' 'स्ववृत्त्यल्त्वव्याप्यत्व'–'स्वस्थानिकादेशावयवाल्वृत्तित्वै'तत्त्रितयसम्बन्धेन। यत्तु 'स्ववृत्तित्व' 'स्वस्थानिकादेशावयवाल्वृत्तित्व' 'स्ववृत्त्यल्त्वव्याप्यत्व' एतत्त्रितयसम्बन्धेनाल्विशिष्टत्वमिति—तन्न। बभूवतुरित्यादौ आदेशावयवे तकारे वल्त्वस्य सत्त्वेनानल्विधाविति निषेधाप्रवृत्त्या इडापत्तेः। एतत्सर्वमभिप्रेत्याह—**बभूविवेत्यादाविति**। वस्तुतस्तु अल्त्वव्याप्यधर्मघटितधर्मे 'अतिदिदिक्षित' इति-

❀ चिदस्थिमाला ❀

द्रढयति—**यत्त्वत्रेण्णिवृत्तये इति**। अपिः–पूर्वविधिसमुच्चायकः। ननूपायस्योपायान्तरादूषकत्वात्कथं तत्त्वमत आह—**अस्यापीति**। तन्वन्तीत्यादेरपीत्यर्थः। **वार्तिके**=तत्प्रतीके। न चैवं तेनैव निर्वाहः, अत एव कौस्तुभसङ्गतिरेवञ्च नेदमाद्यर्थासाधारणफलमिति वाच्यं, तदनङ्गीकर्तृमूलमते दोषध्रौव्यात्, एतदर्थमेव तदङ्गीकारे यूष्ण इत्यत्रत्यमनोरमविरोधापत्तेः। कथं तर्हि तन्वन्तीति पञ्चमीसमासलक्ष्यं प्राग्दत्तमिति चेद्धरदत्तमतेनेत्यवेहीति। **कौस्तुभ**सिद्धान्तविरोधापत्तेस्तदङ्गीकर्तृमतेऽपि अनित्यतया, अपीपचन्नित्यादिलक्ष्यविशेषमात्रपरत्वाद्वात्रानिर्वाहाच्च। न चात एव बहिरङ्गस्य यणोऽसिद्धत्वान्निर्वाहः **कौस्तुभा**दावुक्त एवेति वाच्यम्, अङ्गात्परस्य वलाद्यार्धधातुकस्येडित्यर्थेन तस्यापि तत्त्वादिति भावः।

द्वितीयार्थफलमाह—**प्रदीव्येत्यादौ चेति**। चोन्ते योज्यः। प्रत्यासत्तिलब्धार्थफलमाह—**स्थान्यलिति**। अतिदेशेनार्द्धधातुकत्वादिति भावः। यद्यपि रामायेत्यादावेव फलं तथापि तत्र कष्टायेति ज्ञापकात्सिद्धिरि-

❀ ज्योत्स्ना ❀

कैयटेनोक्तत्वाच्चेति। स्थानिभूतादच उकारात्पूर्वं यदङ्गं तस्मान्निमित्तत्वेनाश्रितादित्यर्थाश्रयणेनेत्यर्थः। 'स्थानिसम्बन्धी योऽ'लिति द्वितीयार्थाश्रयणे प्रयोजनमाह—**प्रदीव्येत्यादौ चेति**।

❀ सदाशिवभट्टीयम् ❀

कैयटेनोक्त्वाच्चेति। नन्वेतत्त्वया फलत्वेन कथमुक्तमिति चेन्न, पञ्चमीसमासानङ्गीकारकर्तृमूलमते तत्सत्त्वात्। भविष्यतीत्याद्यसिद्धान्तरङ्गासिद्धत्वमिड्विधौ नेति तेनाप्यस्या सिद्धिः। अन्त्यफलमाह—**प्रदीव्येति**। अन्यथा'न ल्यपीति'लिङ्गादशास्त्रीयस्य कित्त्वस्येव वलादित्वस्याप्यतिदेशः स्यादिति भावः। अत एव न प्रपठ्येतीत्युक्तम्। **बभूविवेति**। यन्निमित्तेति प्रत्यासत्तिफलं दातुङ्कष्टायेत्यस्य

❀ विषमपदविवृतिः ❀

शेष' इत्यनयोरनापत्तिः। एवमेधामासेत्यादावेधामित्यस्य तत्त्वापत्तिः। **अस्यापीति**। 'धिन्वन्ती'त्यस्यापि। एतेन—'धिन्वन्ती'ति प्रयोजनमपि शिथिलमिति सूचितम्। नव्यानां त्वयं भावः—'क्काचित्कपञ्चमीसमासं विनैव धिन्वन्तीत्यस्य सिद्धौ गुरुभूततन्मात्रवृत्तिधर्माश्रय इत्यर्थो नोचित इति।

त्यादौ वलादिलक्षणेट्सिद्धिः । न हि तत्र वलादित्वं स्थानितो लभ्यं, किन्तु स्वाश्रयमेव । यन्निमित्तवैकल्यप्रयुक्तोपदेशाप्रवृत्तावतिदेशो मृग्यते तस्य निमित्तस्य स्थान्यलसाधारणधर्मत्व एव निषेधप्रवृत्तेः । प्रकृते चाऽऽर्द्धधातुकत्ववैकल्यप्रयुक्ताऽप्राप्तिर्न तत्स्थान्यलसाधारणं, यच्च तादृशवल्त्वघटितं वलादित्वं—न तद्वैकल्यप्रयुक्ताऽप्राप्तिरिति बोद्ध्यम् ।

प्रत्यासत्त्या च शास्त्रीयकार्ये एव स्थानिवत्त्वं, तेन—नायकसिद्धिः ।

❀ अभिनव-चन्द्रिका ❀

विशेषणदानेन सर्वसामञ्जस्येनेदं सर्वं विफलमेवेति बोध्यम् । **स्थान्यलसाधारणधर्मत्व एवेति** । धर्मे स्थान्यलसाधारण्यञ्च—स्थान्यल्वृत्तित्वे सति अल्मात्रवृत्तित्वम् ।

नायकसिद्धिरिति । स्यादेतत्—अचः परस्मिन्नित्यत्रेवात्रापि अशास्त्रीयस्यातिदेशो भवतु,

❀ चिदस्थिमाला ❀

त्याशयेनाह—**बभूविवेति** । आदिना रुदितमित्यादिपरिग्रहः । अत एव आह—**वलादीति** । तदेवाह—**नहीति** । यत इत्यर्थः । तत्र स्थान्यसम्बन्धे तु अत्रापि निषेधः स्यादिति भावः । नन्वेमपि स्थान्यलाश्रयविधौ नेत्यर्थेन बभूविवेत्याद्यसिद्धिरेव द्विविधनिमित्तत्वस्य तत्र सत्त्वादत आह—**यन्निमित्तेति** । 'प्रत्यासत्त्ये'त्यादिः । **चार्धेति** । स्थानिवद्भावेन वादेस्तिङ्त्वेन ततो भिन्नत्वाभावा'दार्धधातुक'-मित्यस्याप्राप्त्या'लिट्चे'त्यस्य तिङ्येव प्रवृत्त्या तत्रातिदेशेनैव तस्य लभ्यत्वं नान्यथेति भावः । तादृशं स्थान्यलसाधारणं हेतुगर्भं विशेषणमाह–**वल्त्वेति** । **न तदिति** । आदेशेऽपि तस्य सत्त्वात् । अत्रेदं बोध्यं–यैः **कैयटकौस्तुभ**कृदादिभिः पञ्चसमासादिनाऽन्यथासिद्धिस्तन्वन्तीत्यादेरुच्यते, रामायेत्यादौ च सुप्त्वस्याल्वृत्तित्वमूरीक्रियते तेषां मतेनासाधारणत्वनिवेशो, न सिद्धान्तेन, सा रीतिस्त्वन्यत्र दृष्टत्वादृषिसम्मतत्वाच्चावश्यकी । अत एव पूर्वं रेफेत्याद्यादावुक्त्वा धिन्वन्तीत्याद्युक्तं, स्पष्टञ्चेदमन्यत्र, अत एव नोद्योतादिविरोधो नापि पूर्वापरविरोध इति । **केचित्तु** द्वितीयव्याख्यानाव्यवहितोत्तरमेतदुक्तेस्तत्रैवासाधारणत्वनिवेशो नाद्यव्याख्याने इति न कोपि विरोध इत्याहुः । विशेषमाह—**प्रत्यासत्या चेति** । प्रतिपादितमनुपदमेव । **नायकेति** ।

❀ ज्योत्स्ना ❀

न तत्स्थान्यलसाधारणमिति । स्वाश्रयघटकत्वेन स्थान्यवयवाल्वृत्तेरपि समवायेन तादृशाल्घटितसमुदायवृत्तित्वादार्धधातुकत्वस्येत्यर्थः । वल्त्वं तु नैतादृशमिति भावः । एवन्तु रेफवृत्तिरुत्वस्य-ऋशब्देऽपि सत्त्वेन तस्य स्थान्यलसाधारणत्वादतिदेशो न प्राप्नोतीति प्रागुक्तस्वसिद्धान्तविरोधाच्चिन्त्यमेतदिति परिभाषाप्रदीपार्चिषि विस्तरः ।

नायकसिद्धिरिति । आयादेशप्रतिबन्धकत्वरूपस्याशास्त्रीयस्य स्थानिकार्यस्यानतिदेशेनेति भावः ।

❀ सदाशिवभट्टीयम् ❀

त्यागः । **ननु** वलादित्वस्य वस्यापि सत्त्वात्स्यादेव निषेधोऽतः प्रत्यासत्त्या प्रतिपादयति—**नहीति** । **स्थान्यलिति** । स्थानिनोऽल् तदसाधारणो धर्मो यस्मिन् तस्य भावे इत्यर्थः । असाधारणेत्युक्ती रेफस्थानिकेति पूर्वग्रन्थविरोधात्प्राचामनुरोधेनेत्येके । द्वितीयार्थाभिप्रायेणेत्यन्ये । वस्तुतस्तु 'शब्दत' इति वक्ष्यमाणत्वेन तद्विरोधाभावात्, समानफलकत्वाच्च युक्तैव सेत्यवोचाम । अत एव प्रकृतसूत्र उद्योते 'यत्र शास्त्रे विशेष्यतया विशेषणतया वा ऽऽदेशस्य स्थानिभूतोयोऽल् तत्स्थानसम्बन्धी च योऽलत्तन्मात्रवृत्तिधर्माश्रयणं तत्र विधौ निषेध' इत्युक्तिः सङ्गच्छते । न हि तत्र द्वितीयार्थाभिप्रायकता वक्तुं शक्या । ननु 'भोभगो'रिति सूत्रस्थभाष्यविरोध इति, तन्न, अनुनासिकोकारघटितरुत्वस्य रेफमात्रवृत्तित्वेन रेफस्थानिक-

❀ विषमपदविवृतिः ❀

'स्थानिसम्बन्धी च योऽ'लित्यस्य फलमाह—**प्रदीप्येति** । उपदेशाप्रवृत्तौ=शास्त्राप्रवृत्तौ । 'यच्च तादृशवल्त्वघटित'मिति समस्तपाठः । तादृशेति च वल्त्वविशेषणम् । **कार्य एवेति** । न तु कार्या-

प्रधान्यात्कार्यातिदेशोऽयम् । 'शास्त्रातिदेशस्तु कार्यातिदेशादभिन्नरूपः'

❀ अभिनव-चन्द्रिका ❀

शब्दाधिकाराश्रयणे गौरवात् । 'स्थानिव'दित्यस्यादेशे स्थानिवृत्तिधर्मसम्भावनायां यद्भवति तद्भवति यन्न भवति तन्न भवतीत्यर्थः । अत एव देवयतेः क्विपि दयूरित्यत्रायादेशप्रतिबन्धार्थमुत्तरसूत्रेण स्थानिवत्वं न । नच 'एषो गमयती'त्यस्यासिद्धिः, गमादेशे स्थानिवृत्तिधर्मसम्भावनायामपि गकारे हल्त्वानपायादेतत्तदोरिति लोपापत्तेरिति वाच्यम्, 'एष गमयती'तिरूपस्यैवेष्टत्वात् । अत एव 'सम्प्रसारणादसम्प्रसारणे'इति न्यासेन 'न सम्प्रसारणे सम्प्रसारण'मितिसूत्रप्रत्याख्यानं सङ्गच्छते । अन्यथा सूत्रसत्त्वे'एष यूनः पश्ये'ति प्रत्याख्याने च यणः स्थानिवत्त्वात्सुलोपाभावे उत्त्वे च 'एषो यूनः पश्ये'ति फलभेदेन प्रत्याख्यानासङ्गत्यापत्तेः । मम तु 'एतत्तदो'रिति लोपप्रतिबन्धाथमचः परस्मिन्निति स्थानिवत्त्वं नेति कल्पनान्न दोषः । नचैवमपि 'इयायेत्यादौ स्थानिवत्त्वे इयङ् न स्या'दिति परिभाषेन्दुशेखरस्थशङ्काया असङ्गतिरिति वाच्यम्, इष्टापत्तेरिति चेन्मैवम्, एकविंश इत्यादौ 'तिविंशते'रिति लोपस्य पररूपप्रतिबन्धार्थं स्थानिवत्त्वापत्तेरिति दिक् ।

प्राधान्यादिति । स्यादेतत्—'राम ङे' इत्यस्यां दशायां 'सुपि चे'ति शास्त्रस्य तद्विहितदीर्घरूपकार्यस्य वा प्राप्त्यभावेन शास्त्रकार्यातिदेशयोरसम्भवादिदमसङ्गतम् । किञ्च पूर्वापरविरुद्धश्चायं ग्रन्थः । शास्त्रातिदेशमुपक्रम्य—'रामायेत्यादौस्थानिवद्भावेन सुप्त्वात्सुपि चेति दीर्घ' इत्यनेन निमित्तातिदेशस्यैवोक्तत्वादिति चेत्—अत्र केचित्—'प्राधान्यात्कार्यातिदेशोय'मित्यतः प्राग् 'यद्यपी'ति पूरणीयम् । 'अभिन्नरूपत्वं सूचित'मित्यनन्तरं—'तथापि एतदुभयं न, असम्भवा'दिति पूरणीयम् । 'तत्रानपेक्षितार्थसंन्निधान' इत्यत्र 'किन्त्वि'त्यादिः । 'अनपेक्षितार्थे'त्यत्र अर्थपदेन—सामग्री गृह्यते । तथा च यत्कार्यं प्रति या सामग्री तदभावेऽपि तत्तन्निमित्तमेवानेनातिदिश्यते इति निमित्तातिदेश एवात्रेत्याहुः । **अन्ये तु** यथाश्रुतोऽपि ग्रन्थः सङ्गत एव । नच 'राम ए' इत्यस्यां दशायां 'सुपि चे'ति शास्त्रस्य दीर्घरूपकार्यस्य वा प्राप्त्यभावेन कथं ग्रन्थसङ्गतिरिति वाच्यम्, 'आदिरन्त्येने'ति शास्त्रस्य, तद्विहितसुप्सञ्ज्ञारूपकार्यस्य वा प्राप्त्या ग्रन्थस्य सङ्गतत्वात् । प्रधानकार्यातिदेशासम्भवेऽप्रधानकार्यस्याप्रधानशास्त्रस्य वाऽतिदेष्टुं शक्यत्वात् । अत एव 'तत्तन्निमित्तरूपकार्यव्यवहार एवानेन' इतिग्रन्थेनाप्रधानकार्यातिदेश एवोक्तः । अत एव च 'रामाये' त्यत्र 'स्थानिवद्भावेन सुप्त्वांत्सुपि चेति दीर्घ' इति ग्रन्थेन सुप्सञ्ज्ञारूपं कार्यमेवातिदेक्ष्यते इत्याहुः ।

परे तु स्थानिनि आदेशवृत्तिधर्मसम्भावनया यच्छास्त्रं यत्कार्यं वा प्राप्नोति तदादेशेऽपि भवतीति स्थानिवदित्यस्यार्थः । आदेशवृत्तिधर्मप्रकारकस्थानिविशेष्यकसम्भावनाप्रयोज्यप्रवृत्तिसम्भावनाविषयीभूतं शास्त्रं कार्यं वा आदेशे प्रवर्तते इति यावत् । तथा च 'राम ए 'इत्यस्यां दशायाम्—'अयम् एशब्दो यदि यञादिः स्यात्तर्हि सुपिचेति शास्त्रस्य तद्दीर्घस्य वा प्रवृत्तिः स्यादितिसम्भावनाऽस्तीति यथाश्रुतमेव सम्यक्' । अत एवा'नपेक्षितार्थसन्निधाने' इत्यग्रिमः ग्रन्थः सङ्गच्छते । न च 'तत्तन्निमित्तरूपकार्यव्यवहार एवे'त्युत्तरग्रन्थासङ्गतिरिति वाच्यम्, तत्तन्निमित्तं यस्य तादृशं यद्दीर्घादिरूपं कार्यं तद्व्यवहार इत्यर्थकरणेनादोषात् । 'कार्यन्तु स्वशास्त्रेणैवे'त्यस्य कार्यज्ञानं स्वशास्त्रेणैवेत्यर्थः । न चैवमपि रामायेत्यादौ **'स्थानिवत्त्वेन सुप्त्वात्सुपि चेति दीर्घ'** इत्यग्रिमग्रन्थासङ्गतिरिति वाच्यम्, 'स्थानिवत्त्वेने'त्यस्य 'सुपि चेति दीर्घ' इत्यत्रा-

❀ चिदस्थिमाला ❀

तदादीत्यर्थः । विशेषान्तरमाह—**प्राधान्यादिति** । अत्र शास्त्रातिदेशेऽपि न बाधकमित्याह—

तस्यापि कार्यफलकत्वा'दिति तृज्वत्सूत्रे कैयटः। भाष्येऽपि 'तत्राऽऽङ्गशास्त्रातिदेशात्सिद्धम्, आङ्गं यत्कार्यं तदतिदिश्यते' इत्युक्त्या तयोरभिन्नरूपत्वं सूचितम्। तत्रानपेक्षितार्थसन्निधानस्तत्तन्निमित्तरूपकार्यव्यवहार एवानेन, कार्यं तु स्वशास्त्रेणैवेति।

अत एव रामायेत्यादौ 'स्थानिवत्त्वेन सुप्त्वात्सुपि चेति दीर्घ' इति सङ्गच्छते। 'परिवी'रित्यादौ 'परत्वाद्दीर्घ' इति च सङ्गच्छते।

यद्वा किञ्चिन्निमित्तवैकल्येऽपि दीर्घादिकार्यमनेन क्रियते। तच्च कार्यं किमित्याकाङ्क्षायां तत्स्वरूपनिर्णयस्य विधिशास्त्रमूलकत्वेन तद्देशेनैव परशास्त्रविहितत्वरूपं परत्वं तेषां बोद्ध्यम्। एतदेवाभिप्रेत्या'ऽतिदिश्यमानकार्याणामुपदेशदेश एव देश'इत्यभियुक्ताः।

ॐ अभिनव-चन्द्रिका ॐ

न्वयः, 'सुप्त्वा'दित्यस्य—सुप्त्वं विहायेत्यर्थः, ल्यब्लोपे पञ्चमीत्याहुः। वस्तुतस्तु 'प्राधान्यात्कार्यातिदेशोऽय'मित्येतदारभ्य—'यद्वे'त्येतत्पर्यन्तो ग्रन्थो'ऽन्येतु'मतरीत्या योजनीयः। 'यद्वे'त्येतदारभ्य ग्रन्थश्च—'परे तु'मतरीत्या योजनीय इति दिक्।

ॐ चिदस्थिमाला ॐ

शास्त्रेति। सर्वत्रेति भावः। **तुर्य्य**पदेशाद्यतिदेशवैलक्षण्ये। अपिः—कार्यातिदेशसमुच्चये। तं समूलयति—**भाष्येति**। तत्रैव सूत्रे इति भावः। **तत्राङ्गेति**। चिण्वद्भावे इत्यर्थः। **अङ्गस्येति**। प्रकरणादिति भावः। **सिद्धमिति**। इष्टं सिद्धमित्यर्थः। कथमित्याशङ्कायामाह—**आङ्गमिति**। कार्यञ्च न दीर्घादिरूपं किन्तु शास्त्रविहितसुप्त्वादि, वक्ष्यमाणभाष्यादित्याह—**तत्रेति**। तयोर्मध्ये इत्यर्थः। कार्यन्तु=प्रधानकार्यन्तु। **वृत्ति**रेतन्मतसमाप्तौ। अत **एवे**त्यस्योभयत्रान्वयः। अत एव **चः**। 'सङ्गच्छते'**इत्यस्य** स्पष्टार्था पुनरुक्तिः।

परिवीरिति। व्येञः क्विबन्तस्य रूपं, तुकः परत्वा'द्धल' इति दीर्घः। नन्वेवं रामायेत्यस्य सिद्धावपि 'परिवी'रित्यस्यासिद्धिरुभयोरनेनैव प्रापणादत आह—**तच्चेति**। पूर्वं सामान्येनैव बोधो विशेषबोधसामग्र्यभावादिति भावः। **एवे**नैतद्देशव्यवच्छेदः। एवमग्रेऽपि। तथापि पाठकृतपरत्वासम्भवादाह—**परेति**।

ॐ ज्योत्स्ना ॐ

परिवीरितीति। अत्र व्येञः क्विपि सम्प्रसारणे तुग्दीर्घयोः प्राप्तिः।

ॐ सदाशिवभट्टीयम् ॐ

विसर्गस्य रुशब्दत्वन्नेति भाष्य उक्तमिति न तद्विरोध इति दिक्। **स्वशास्त्रेणैवेति**—इत्यन्तस्य 'बोध्य'मिति वक्ष्यमाणेनान्वयः। **अत एवेति**। अन्यथा'नेन दीर्घ'इत्येव ब्रूयात्। **परत्वादिति**। तुगपेक्षयेति बोध्यम्। **कार्यमनेनेति**। अथात्रायं सूत्रार्थः-'आदेशः स्थानिवद्भवति, सादृश्यं कार्यभाक्त्वेन, कार्यभाक्त्वञ्च प्रयोगित्वनिमित्तत्वोभयरूपम्। पूर्वपक्षे तु तन्निष्ठव्यवहारवत्त्वेन सादृश्यमिति। नचान्त्यपक्षे रामो रामस्येत्यादावतिदेशेन दीर्घः स्यात्, तथा तिसृणामित्यादौ त्रयादेशादिः स्यादुपदेशाऽप्रवृत्तेः—सुप्त्वय-ञादित्व-आम्परत्व-त्रित्वरूपनिमित्तवैकल्यप्रयुक्तत्वेन तन्निमित्तातिरिक्तनिमित्तत्वादतिदेशस्येति वाच्यम्, यन्निमित्तवैकल्यप्रयुक्ता उपदेशस्याप्रवृत्तिस्तस्य तस्य निमित्तस्य वतिप्रकृत्यर्थवृत्तित्व एवातिदेशप्रवृत्तेः स्वभाव-

ॐ विषमपदविवृतिः ॐ

भाव इत्यर्थः। **व्यवहार एवेति**। 'अतिदिश्यत'इति शेषः।

अत्राऽऽद्यपक्ष[1] एव भाष्यसम्मतः । अत्रैव 'स्थान्यल्विधिप्रतिषेधे कुरुवधपिबां प्रतिषेधो वक्तव्य' इत्येतदुपपादनावसरे—'स्थानिवद्भावादङ्गसञ्ज्ञा' स्वाश्रयं च लघूपधत्वादि, तत्र लघूपधगुणादिः प्राप्नोती'त्यादिभाष्योक्तेरिति बोद्ध्यम् ।

एवं यन्निमित्तवैकल्यप्रयुक्तोपदेशाप्रवृत्तिस्तन्निमित्तातिरिक्तसर्वनिमित्तकत्वमतिदेशस्यापि । अत एवेष्टवद्भावेनातिदिष्टभत्वस्य 'वर्णाश्रयत्व'मित्यादिव्यवहारः । सर्वातिदेशेष्विदं तुल्यम् । यन्निमित्तवैकल्यप्रयुक्तोपदेशाप्रवृत्तिस्तन्निमित्तं—शास्त्रीयमेव, प्रत्यासत्तेः ।

❀ अभिनव-चन्द्रिका ❀

यन्निमित्तवैकल्यप्रयुक्तोपदेशाप्रवृत्तिरिति । यन्निमित्ताभावप्रयोज्यशास्त्राप्रवृत्तिरित्यर्थः । न च 'पड्भ्यों'[2]मित्यादौ णिलोपे स्वादित्वाजादित्वोभयाभावप्रयुक्ता 'यचि भ'मित्युपदेशाप्रवृत्तिरिति तदतिरिक्तनिमित्तकत्वेनेष्ठवद्भावे वर्णाश्रयत्वाभावाद्भसञ्ज्ञा स्यादेवेति कथं जश्त्वमिति वाच्यम्, 'यन्निमित्तवैकल्ये'त्यत्र निमित्तपदेन सादृश्यप्रतियोगितावच्छेदकधर्मव्यापकधर्मस्य ग्रहणेनादोषात् । तथाहि—णिरिष्ठवद्भवतीत्यतिदेशीयसादृश्यप्रतियोगितावच्छेदकीभूतो य इष्ठत्वरूपो धर्मस्तद्व्यापकीभूतो धर्मः–स्वादित्वरूपो धर्मो–न त्वजादित्वरूपो भूयिष्ठ इत्यादौ तदभावेन व्यभिचारादिति न दोषः ।

नचैवमपि 'यचि भ'मित्यत्र यचीति द्वन्द्वनिर्देशेन भसञ्ज्ञायां यकारादित्वाजादित्वैतदन्यतरत्वेन

❀ चिदस्थिमाला ❀

तेषां=दीर्घादिकार्याणाम् । **अत्रेति** । अनयोर्मध्ये इत्यर्थः। **अत्रैवेति** । प्रकृतसूत्रे एवेत्यर्थः । 'अत एवे'त्यपपाठः, असम्बद्धत्वात् । **स्थान्यलिति** । तत्र पक्षे इत्यर्थः । तत्र हि किं स्थान्यलाश्रये कार्ये निषेधोऽथालमात्राश्रये इति संशयः कृतः । आदिनाऽदुपधत्वपरिग्रहः । अग्रे—**आदिना** वृद्धिपरिग्रहः । स्थानिवत्वात्सुप्सञ्ज्ञा, स्वाश्रयश्च यजादित्वमित्यादिपरिग्रहः । किञ्चिदित्युक्तिं सफलयन्विशेषान्तरमाह—**एवमिति** । उक्तवदित्यर्थः । **अपिनो**पदेशसमुच्चयः । अस्य फलमाह—**अत एवेष्टेति** । न केवलमत्रैवेदमित्याह—**सर्वेति** । विशेषान्तरमाह—**यन्निमित्तेति** । अत एव तासौ नित्यानिट्त्वादेर्नो-

❀ ज्योत्स्ना ❀

वर्णाश्रयत्वमित्यादिव्यवहार इति । तेनान्तर्वर्तिविभक्त्या प्रवृत्तस्य पदत्वस्य लुप्ते णिचि प्रत्ययलक्षणेन भत्वेन बाधकमिति 'न पदान्त'सूत्रे मनोरमायां स्पष्टम् । **तन्निमित्तं शास्त्रीयमेवेति** । तेनादेर्घस्लादेशे जघसिथेत्यत्र स्थानिनि दृष्टस्य तासौ नित्याऽनिट्त्वस्याशास्त्रीयस्यानेनानतिदेशा 'दुपदेशेऽत्वत'इतीण्निषेधाभावे क्रादिनियमान्नित्यमिडिति भावः ।

❀ सदाशिवभट्टीयम् ❀

सिद्धत्वात् । **अत एवेति** । 'अत्रैवे'ति पाठः । 'उक्ते'रिति पञ्चम्यन्तस्याग्रे सत्त्वात् । **शास्त्रीयमेवेति** ।

❀ विषमपदविवृतिः ❀

इदं तुल्यमिति । तन्निमित्तातिरिक्तेत्युक्तमित्यर्थः । **शास्त्रीयमेवेति** । अत एव स्थानिभूतादचः पूर्वत्वेन दृष्टत्वं, तासौ नित्यानिट्त्वं च नातिदिश्यते । वस्तुतस्त्वशास्त्रीयमप्यतिदिश्यत एव, कथमन्यथा 'प्रदीव्ये'त्यादौ वलादित्वस्यातिदेशप्रसक्तिः । नचैवम् उवयिथेत्यादौ तासौ नित्यानिट्त्वमादायेड्विकल्पापत्तिरिति वाच्यम्, 'वस्तुतस्तासि सत' इत्यर्थाश्रयणेनादोषात् । अन्यथा 'तास्व'दित्यनेनैव सिद्धौ 'तासी'त्यस्यानुवृत्तिवैयर्थ्यं, नचैवं 'कण्डूति'रित्यत्र ऊडनापत्तिरिति वाच्यं, स्थानिभूतादचः पूर्वत्वस्य वलादित्वस्यैव विशेषणतयाऽघटितत्वेनादोषात् ।

१. आद्यः=अप्रधानातिदेशपक्षः । २. पट्शब्दादाचक्षाणण्यन्तात्क्विपि णिलोपे भ्यामि रूपमेतत् ।

स्थानिवदित्युक्तेः सम्बन्धिशब्दमहिम्नैवाऽऽदेशलाभे आदेशग्रहणं—श्रौतस्थान्यादेशभावस्यैव ग्रहणमितिशङ्कावारणद्वारा 'एरु'रित्यादौ शब्दानित्यत्ववारणाय 'सर्वे सर्वपदादेशा' इति न्यायेन कल्प्यमानस्य 'तेस्तु'रित्यानुमानिकादेशस्यापि सङ्ग्रहार्थम्। तेन 'पच'त्वित्यादेः पदत्वसिद्धिरिति भाष्ये स्पष्टम्।

ननु तोस्तित्वमपि छिन्नपुच्छे शुनि श्वत्वव्यवहारवल्लोकन्यायेनैव सिद्धम्, तदुक्तं 'प्राग्दीव्यतोऽ'णिति सूत्रे भाष्ये—'दीव्यतिशब्दैकदेशदीव्यच्छब्दानुकरणमिद'मित्युक्त्वा–'किमर्थं विकृतनिर्देशः? एतदेव ज्ञापयत्याचार्यो भवत्येषा परिभाषा

❀ अभिनव-चन्द्रिका ❀

निमित्तत्वादन्यतरत्वे सादृश्यप्रतियोगितावच्छेदकेष्टत्वव्यापकत्वमस्त्येवेति पुनरपि तद्दोषतादवस्थ्यमेवेति वाच्यम्, यचीत्यत्र 'य्' इति लुप्तसप्तम्यन्तं पृथक्पदमिति स्त्रीकारेणादोषात्। अत एव 'द्वन्द्वाच्चुदषहान्तात्समाहारे' इति समासान्तष्टजत्र न कृतः। अथवा 'यन्निमित्तवैकल्ये'त्यत्र निमित्तपदेन—सादृश्यानुयोगितावच्छेदकधर्मव्यापकीभूताभावप्रतियोगिधर्मस्यैव ग्रहणमिति—न कोऽपि दोषः। तथा हि—'णिरिष्टवद्भवती'त्यत्र सादृश्यानुयोगितावच्छेदकं णित्वं, तद्व्यापकीभूताभावप्रतियोगि स्वादित्वमेव नत्वजादित्वयादित्वैतदन्यतरत्, णावजादित्वस्य सत्त्वादिति दिक्।

सम्बन्धिशब्दमहिम्नैवेति। सम्बन्धिशब्दत्वञ्च–निरूपकांशे नित्यसाकाङ्क्षं यद्रूपं तद्रूपावच्छिन्नबोधकत्वम्। प्रकृते च स्थानिपदस्य स्थानित्ववति शक्तत्वेन स्थानिता च निरूपकांशे नित्यसाकाङ्क्षेति आदेशलाभ इति भावः। **तेस्तुरिति।** इदमुपलक्षणम्—'भवती'त्यादेः स्थाने भवत्वित्यादेशादेरपि। 'एरु'रित्यस्य–इवर्णान्तस्य उवर्णान्त आदेशो भवतीत्यानुमानिकस्थान्यादेशभावकल्पेऽर्थः, अन्यथा शब्दानित्यत्वं दुरुद्धरं स्यादिति दिक्।

एतदेव ज्ञापयत्याचार्य इति। न च दीव्यतिशब्दत्वस्याक्तपरिमाणसमनियतत्वेन तस्यातिदेशासम्भवात्कथं ज्ञापकत्वमिति वाच्यम्, दीव्यतिशब्दवृत्तिबोधजनकत्वस्य तान्तेऽतिदेशसम्भवेन ज्ञापकत्वस्य सुस्थत्वात्। एकदेशविकृतत्वं च—यादृशसमुदायैकदेशावच्छेदेन

❀ चिदस्थिमाला ❀

तिदेश इति वयेरित्यादिपरग्रन्थसङ्गतिः (?)। **वारणायेति।** यद्यपि समुदायविकारे सुतरां नित्यत्वहानिस्तथापि अर्थवत्वेव स वाच्यस्तस्यैव प्रसङ्गसम्भवादिति बुद्धिविपरिणाम एवेति विकार एव नेति तात्पर्यं, तदाह—**सर्वे सर्वेति।** पदमिहार्थवत्,–यौगिकत्वात्। कल्प्यमानत्वादेवाह–**अनुमानिकस्थान्यादेशभावस्येति।** घटकादे**शस्यापीति।** अपिना मुख्यसमुच्चयः। अन्यथा तु तस्यैव ग्रहणं स्यान्न तु तस्यापि, प्रत्यक्षत्वेन प्राबल्यात्। तेन=तिङ्त्वातिदेशेन। तथा च निघातसिद्धिः। अत्र पाठान्तरं न युक्तमिति बोध्यम्। आदेशग्रहणं व्यर्थमेवेति शङ्कते–**नन्विति।** 'पुच्छे शुनि श्वत्वे'ति पाठः। **वल्लोकेति।** तद्विशिष्टलोकेत्यर्थः। हेतुगर्भमिदं विशेषणम्।

न्यायेनैवेति। 'एकदेशविकृतमनन्यव'दिति न्यायेनेत्यर्थः। अत एव भाष्ये पठ्यते 'एकदेशविकृतस्यानन्यत्वात्सिद्ध'मिति। एवेनादेशग्रहणव्यवच्छेदः। नन्वस्यात्राश्रयणे न मानमुक्तभाष्यन्तु शास्त्रीयन्यायाश्रयतयापि सुयोजमत आह—**तदुक्तमिति।** **विकृतेति।** इकाराभावरूपविकारविशिष्टनिर्देश इत्यर्थः। **एतदेवेति।** लोकसिद्धार्थाश्रयणमेवेत्यर्थः। एतेनायं न्यायोऽपि स्थानषष्ठीनिर्दिष्ट एवेत्यपास्तम्, तत्रैव प्रवृत्तौ मूलशैथिल्येनोक्तभाष्यासङ्गत्यापत्तेः। **भवत्येवेति।** एवञ्चैकदेशविकृतोप्यर्थबोधकः।

एकदेशविकृतमनन्यव'दिति । अत एवात्र विकारोऽप्यशास्त्रीयोऽपि । अत एव श्रायसशब्दादण्णन्ताद्द्विवचने श्रायसावित्यत्र वृद्धौ कृतायां सान्तस्योगित्त्वेनानेन न्यायेनाङ्गतया प्राप्तो नुम्-पूर्वसम्बन्धिविधित्वेनाचः परस्मिन्निति स्थानिवत्त्वेन वारितो-'ऽचः परस्मि'न्निति सूत्रे भाष्ये । एतन्न्यायानाश्रयणे त्वङ्गत्वमेव दुर्लभम् ।

अन्तादिवत्सूत्रे भाष्यकैयटयोरपि-'गुडोदक'मित्यादावेकादेशे कृते दकशब्दस्यानेन

❀ अभिनव-चन्द्रिका ❀

विकारो जातस्तत्समुदायविशिष्टत्वम् । समुदायवै०-'स्वघटकोद्देश्यकविकारप्रतियोगीतरयावद्घटितत्व'-'स्वघटकोद्देश्यकविकारप्रतियोग्यघटितत्व'-'स्वघटकोद्देश्यकविकारघटित्व'-'स्वविशिष्टाघटितत्वै'तच्चतुष्टयसम्बन्धेन । सम्बन्धघटकवैशिष्ट्यञ्च 'स्वाघटकत्व'—'स्वघटकमात्रोद्देश्यकविकाराघटकत्वे' तदुभयसम्बन्धेन । विस्तरस्तु परिभाषेन्दुचन्द्रिकायां द्रष्टव्य इति दिक् । **अत एवेति** ।'प्राग्दीव्यत'

❀ चिदस्थिमाला ❀

अन्यथा न्यायेन शब्दस्वरूपाभेदप्रतिपादनेऽपि उक्तरीत्यार्थावबोधकत्वेनार्थस्यावधित्वं न स्यादिति तात्पर्यम् ।

अत एवेति । लोकसिद्धार्थस्य तेन ज्ञापितत्वादेवेत्यर्थः । तत्रोभयोरभावादिति भावः । **रोप्यशेति** । **अपिना** कार्यसमुच्चयः । अग्रिमापिना शास्त्रीयसमुच्चयः । उक्तन्यायाश्रयणे मानान्तरमप्याह—**अत एवेति** । तत्र पूर्वस्येति सम्बन्धसामान्ये षष्ठी, न तु स्थानषष्ठीति सूचयन्नाह—**पूर्वसम्बन्धित्वेनेति** । 'अत एवे'त्यस्यार्थसूचयन्नाह—**एतदिति** । एवञ्च तत्रोभयासङ्गतिः स्पष्टैव । शास्त्रीयन्यायेन यथा न निर्वाहस्तथान्यत्र स्पष्टम् । एतदेव ध्वनयन्नन्यदपि तत्र मानमाह—**अन्तादीति** । 'उक्त'मित्यत्राग्रिमस्यान्वयः । पूर्वान्तवत्त्वेनैाकारान्ते पूर्वपदत्वादाह—**दकेति** । इदञ्च तत्र पूर्वान्त-

❀ ज्योत्स्ना ❀

अत एवात्रेति । लोकन्यायसिद्धत्वादशास्त्रीयस्यातिदेशादित्यर्थः । आनुमानिकादेशस्थानिवत्त्वेनैतदर्थक्रोडीकारे तु शास्त्रीयकार्य एव प्रत्यासत्त्या तत्प्रवृत्त्यौचित्येनैतदसङ्गतिरिति भावः ।

ननु भूयोऽवयवदर्शनं न जातिव्यञ्जकं, वस्त्राद्यावृतकायत्वेन वैरूप्यं प्रापितस्य मुखमात्रदृश्यस्याध्यात्मिकवायुसंयोगिश्वात्मनस्तावदवयवमात्रादपि श्वत्वजातेर्व्यञ्जनात्, प्रकृते च तेरिकारस्योकारेणाच्छादनात्सत्यपि वैरूप्ये पचदित्यादौ सङ्ख्याकारकाद्यवगमादिकारापगमे तकारमात्रादपि तित्वजाते-

❀ सदाशिवभट्टीयम् ❀

तत्त्वं च शास्त्रबोध्यतापर्याप्त्यधिकरणत्वं, त्रित्वादेरतिदेशाय 'विधियते'ति नोक्तम् । **दुर्लभमिति** । नचाण्निमित्तिका सान्ते सुलभेति वाच्यं, प्रत्यासत्या सर्वनामस्थाननिमित्तिकायाश्चाश्रयाणान्नुम्विधौ । न च कार्यकाले अग्नी इत्यत्रेव यथोद्देशेपि औ इत्यत्र पूर्वान्तवत्त्वेनाण्त्वे परादिवत्त्वेन सर्वनामस्थानत्वेन पुनःसञ्ज्ञाप्रवृत्त्या तन्निमित्तिकापि सुलभैव सेति वाच्यम्, एवमप्यण्विधानावधित्वस्य श्रेयसित्यत्र सत्त्वेन श्रायसमित्यत्र न्यायं विना दुर्लभत्वात्, न वानुमानिकेन स्थानिवत्त्वेन तल्लाभः, 'श्रे'त्यस्याप्यर्थवत्त्वेन तस्य स्थानिधर्मत्वाभावादिति दिक् ।

❀ विषमपदविवृतिः ❀

दकशब्दस्येति । तत्र भाष्ये 'पूर्वोत्तरपदनिमित्तककार्यात्प्रागन्तरङ्गोप्येकादेशो ने'त्यपि समाधानान्तरमुक्तम् ।

न्यायेनोदकशब्दत्वमाश्रित्य 'उदके केवले' इति पूर्वपदान्तोदात्तत्वमुक्तम्। शब्दानित्यत्वन्तु रेखागवयन्यायेन समाधेयम्। 'अनन्यव'दित्यस्य-अन्यवन्नेत्यर्थः। तत्रान्यसादृश्यानिषेधेऽन्यत्वाभावः सुतरामिति चेन्न। अर्द्धस्यान्यत्वे जातिव्यञ्जकभूयोऽवयवदर्शनाभावेन तौ तित्वप्रतीतेर्न्यायेनानुपपादनात्। किञ्च तिङ्सञ्ज्ञायास्तिबादिसूत्रोपात्तपरिच्छिन्नपरिमाणनिष्ठतया परिच्छिन्नपरिमाणार्थवाचकशब्दानां न्यूनेऽधिके वा शास्त्रव्यापारं

❁ अभिनव-चन्द्रिका ❁

इत्यत्र शास्त्रीयविकाराभावेऽपि एकदेशविकृतन्यायस्वीकारादेवेत्यर्थः। **उदकशब्दत्वमाश्रित्येति**। वस्तुतस्तु उदकशब्दत्वस्योक्तपरिमाणसमनियतत्वेनेदं भाष्यमेकदेश्युक्तिः। 'गुडोदक'मित्यादौ 'पूर्वोत्तरपदनिमित्तककार्यात्पूर्वमन्तरङ्गोऽप्येकादेशो न' इति परिभाषया स्वरात्पूर्वं गुणाप्रवृत्तेश्च। **अन्यसादृश्यनिषेध इति**। 'सादृश्यं न भेदघटित'मिति प्रकृते नासङ्गतिरित्यन्यत्र विस्तरः।

परिच्छिन्नपरिमाणनिष्ठतयेति। परिच्छिन्नपरिमाणत्वञ्च-सङ्ख्यात्व-परिमाणत्वैतदन्यतरव्याप्यधर्मप्रकारकसंशयसामान्यनिष्ठप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकविषयताश्रयत्वम्। यद्धर्मावच्छिन्नज्ञानोत्तरं सङ्ख्यात्वव्याप्यधर्मप्रकारकः परिमाणत्वव्याप्यधर्मप्रकारको वा संशयो नोदेति तत्त्वमिति यावत्। वस्तुतस्तु तिङ्त्वस्य परिच्छिन्नपरिमाणनिष्ठत्वेऽपि परिच्छिन्नपरिमाणसमनियतत्वाभावाच्चिन्त्यमेतत्, परिच्छिन्नपरिमाणनिष्ठत्वधर्माणामनतिदेशे न्यायस्य निर्विषयत्वापत्तेरिति दिक्।

❁ चिदस्थिमाला ❁

वत्त्वफलकथनावसरे उक्तम्। नन्वेवं शब्दानित्यत्वापत्तिरत आह—**शब्दानामिति**। रेखागवयादिनिष्ठलाङ्गूलादेर्वास्तपश्वलक्षणत्वेऽपि यथा तद्बोधकत्वं तथा प्राक्रियादशायां क्रियमाणविकारस्य तदलक्षणत्वेऽपि पारमार्थिकनित्यतद्बोधकत्वमिति भावः। नन्वनन्यवदित्यस्यान्यभिन्नवदित्यर्थेऽसम्भवो वैयर्थ्यञ्चास्या अत आह—**अनन्येति**। नन्वेवमन्यसादृश्यनिषेधेऽप्यन्यत्वसत्त्वादन्यदोषस्तदवस्थ एवात आह—**तत्रेति**। एकदेशविकृते इत्यर्थः। अन्यत्वाभावः=अन्यत्वनिषेधः। फलितान्यत्वाभावादेव विकृतादर्थबोधः। अन्यथा शक्ततावच्छेदकानुपूर्व्यज्ञानात्ततो बोधो न स्यादिति मञ्जूषायां स्पष्टम्। प्रकृताशयेना-'र्द्धस्यान्यथात्वे' इति न्यायमूलमाह—**जातीति**। दोषान्तरमाह—**किञ्चेति**। **परिमाणेति**। आनुपूर्वीविशेष इत्यर्थः। **परिमाणेति**। परिच्छेदकमात्रेत्यर्थः। अत एव द्रोणादिवत्सङ्ख्याया अपि भाष्ये

❁ ज्योत्स्ना ❁

व्यञ्जनस्य दृष्टत्वात्तुशब्देऽपि तेनैव तादृशजातिर्व्यज्यत इति वक्तुं शक्यते इत्यस्वरसादाह—**किञ्चेति**।

❁ सदाशिवभट्टीयम् ❁

परिच्छिन्नेति। प्रातिस्विकरूपेण बोधितं परिमाणमानुपूर्वीविशेषो यस्यार्थस्य तद्वाचकेत्यर्थः।

❁ विषमपदविवृतिः ❁

परिच्छिन्नपरिमाणेति। गुडोदक'मित्युक्तं भाष्यं तु अभ्युपेत्योक्तिरिति भावः। लौकिकन्यायानाश्रयणे पूर्वपक्षस्योत्थानमेव न स्यादिति पूर्वग्रन्थाशयः।

विनाऽप्रवृत्तेर्येन विधिरिति सूत्रेऽङ्गसञ्ज्ञासूत्रे च भाष्ये उक्ततया तदभावात्। न्यूनाधिकत्वञ्च—वैरूप्यस्योपलक्षणम्।

न च 'तण्डुला'नित्यादौ स्थानिवद्भावेन प्रत्ययान्तत्वेऽपि स्वतः प्रत्ययान्तभिन्न-

❀ चिदस्थिमाला ❀

दृष्टान्तत्वेनोल्लेखः। **भाष्य इति**। तत्र हि पञ्चद्रोणादिदृष्टान्तेन सर्वकादौ जातिव्यञ्जकभूयोऽवयवदर्शनस्य सत्त्वेऽपि सर्वाद्यानुपूर्वीविशेषोपादनेन क्रियमाणसर्वनामसञ्ज्ञायास्तत्र तत्त्वतदन्तत्वयोरभावेनाभाव-माशङ्क्य 'तदेकदेशभूतं तद्ग्रहणेने'तिपरिभाषया समाहितम्। यदि तत्र तत्प्रकृतिस्तदधिकगङ्गादिसत्त्वेऽपि शुनः श्वत्ववदकजधिकस्य सर्वकस्य सर्वशब्दत्वमक्षतमेवेति भाष्यासङ्गतिरतस्तथेति तदाकूतमिति भावः।

तदभावादिति। 'प्रकृते' इत्यादिः। शास्त्रव्यापाराभावेन तिङ्त्वासम्भवादित्यर्थः। समसङ्ग्रहायाह-**न्यूनेति**। विशेषान्तरं वक्तुं शङ्कते-**न चेति**। 'अन्तादिवच्चे'तिसूत्रं स्थानिवत्सूत्रेण गतार्थमिति मतेन पूर्वसङ्गतिमाह—**स्थानीति**। एरुरितिवदत्रापि स्थान्यादेशाभाव इति आदेशग्रहणेन तद्वदत्रापि स इति भावः। अत्रापिना सूचितं—वस्तुतो नानेन तस्य गतार्थत्वमिति—तस्यैव विषयो नास्य। किञ्च पूर्वपरयो-रिति द्विवचननिर्देशेन प्रत्येकमुभयोः स्थानित्वेऽपि प्रत्ययत्वस्य तत्स्थानिवर्णाधर्मत्वम्, अनुमानिकस्थान्यादेश-भावकल्पनेऽपि प्रत्येकं तयोः समुदाययोः स्थानित्वे मानाभावेनान्यत्र दोषापत्तेश्च तथा दुर्वचत्वात्। तस्य स्थानिवत्त्वेन प्रत्ययत्वमित्यपि न, अव्यवृत्तित्वादिति बोध्यम्। यद्यपि लान्ते 'एकदेशे'ति न्यायेन यस्माद्वि-हितस्तत्त्वं, तथापि शास्त्रीयकार्याभावेन परादिवत्त्वेनानित्यस्य प्रत्ययत्वम्, अप्रत्यय इति हि पर्युदासोऽन्यथा प्रसिद्धदोषापत्तेः। न च प्रत्ययत्वावच्छिन्नप्रतियोगिताकभेदवत्त्वं दुर्वचमिति न तत्त्वं, प्रातिपदिकत्वाभावस्य अशास्त्रीयत्वेनात्राभावातिदेशाभावेन च तत्र स्थानिवत्त्वस्य दुर्वचत्वात्। किञ्च विरोधाभावेनातिदिश्यमानधर्म-मादाय भेदाभावो दुर्निरूपः। अन्यथा ब्राह्मणवत्त्वेऽतिदिष्टक्षत्रियस्याब्राह्मणत्वानापत्तेरित्याशयेनाह-**स्वत इति**।

❀ ज्योत्स्ना ❀

भाष्ये उक्ततयेति। एवं हि तत्र भाष्यं-"या एताः सर्वाद्युपादानेन परिच्छिन्नपरिमाणाः सञ्ज्ञाः कृतास्ताः कथमकजादिविशिष्टे भविष्यन्ति? यथा लोके द्रोणादिसञ्ज्ञाधिके न्यूने वा न सम्भवतीति।

❀ सदाशिवभट्टीयम् ❀

तदभावादिति। ननु गङ्गाप्रविष्टनदीदृष्टान्तसिद्धत्वेनाकोरिति प्रतिषेधज्ञापितेन 'यन्मध्ये'ति-न्यायेनाक्तपरिमाणानां धात्वादिशब्दानां सश्मश्रुके साकच्के यथा प्रवृत्तिस्तथाऽश्वपुच्छदृष्टान्तसिद्धेन प्राग्दीव्यदितिज्ञापितेनानेनापि तिङ्त्वातिदेशः कुतो नेति चेन्न, वैषम्यात्, अक्तपरिमाणानामधिके प्रवृत्तिमन्तरा-ऽकोरित्यादेर्न सार्थक्यं, प्राग्दीव्यदित्यस्यार्थबोधकत्वाद्यतिदेशेन सार्थक्यमिति। नन्वेवमङ्गसञ्ज्ञा चाप्यक्तप-रिमाणानामित्यङ्गसञ्ज्ञासूत्रस्थभाष्यादङ्गत्वस्याक्तपरिमाणनिष्ठतयाऽनतिदेशे श्रायसाविति पूर्वं भाष्यं विरुध्येत, तथा जरात्ववदुदकत्वाऽनतिदेशे द्वितीयं भाष्यं विरुध्येत, तथा 'प्राग्दीव्यतोऽ'णितिसूत्र उक्तपरिभाषां ज्ञापयित्वा तेनैव पदत्वे सिद्धे पचत्वित्यादौ स्थानिवत्सूत्रोक्तमेकदेशविकृतोपसङ्ख्यानञ्चोदितं तन्न कर्त्तव्य-मिति भाष्यकैयटादिकमपि विरुध्येतेति चेन्न। श्रायसाविति भाष्येणाद्यस्यैकदेश्युक्तत्वात्। पूर्वोत्तरेति-परिभाषया पूर्वमेव स्वरप्रवृत्त्या द्वितीयस्यापि तथात्वात्। रूपान्यत्वाच्चेतिप्रकृतसूत्रे भाष्य एव प्रत्याख्यानस्य दूषितत्वेन तृतीयस्यापि तथात्वात्। अक्तपरिमाणे उक्तन्यायाऽप्रवृत्त्यसाधारणफलन्तु—सजुषमाचष्टे सग् इत्यत्र रुत्वाभावः। आनुमानिकस्तु न, जुषोऽप्यर्थवत्त्वेन सजुष्टस्य स्थानिधर्मत्वाभावादित्याहुः। इदुदुप-धेभ्यो णिच्तु परमनभिहितोऽन्यैरिति दिक्।

तण्डुलेति। सति तत्त्वे न लोपः स्यात्। ननु नादेशविधेर्न स इत्यत आह—**आदाविति**। तेन स्निन्नन्तसङ्ग्रहः, अत्र हि 'सर्वसिञ्श्य'इत्यत्रालुकि नलोपेपि सञ्ज्ञाविधौ तस्यासिद्धत्वेन संयोगगुरु-

त्वात्प्रातिपदिकत्वापत्तिरिति वाच्यम्, अतिदेशस्वभावेनातिदिश्यमानधर्मविरुद्धस्वाश्रयकार्याभावात्। अत एव 'जही'त्यादौ जादेशस्यासिद्धत्वे स्वाश्रयो हेर्लुङ्न। सिद्धत्वासिद्धत्वयोर्विरोधात्। असिद्धवत्सूत्रं तु 'शाधी'त्यादौ स्थानिप्रयुक्तधिभावसम्पादनेन चरितार्थम्।

न चाप्रत्यय इत्यस्य पर्युदासत्वे—शास्त्रीयकार्याभावात्स्थानिवत्त्वं दुर्लभमिति

❀ अभिनव-चन्द्रिका ❀

प्रातिपदिकत्वापत्तिरिति । ननु तण्डुलानित्यादौ 'तस्माच्छसो न' इति नकारादेशस्य विधानसामर्थ्यादेव नलोपो न भवतीति को दोषः ? न च 'सर्वस्मि'न्नित्यादौ स्थानिवद्भावेन प्रत्ययान्तत्वेऽपि स्वतः प्रत्ययान्तभिन्नत्वात्प्रातिपदिकत्वे नलोपापत्तिः,स्मिन्निनिनकारोच्चारणन्तु 'सर्वस्मिन्शय' इत्यादौ 'शयवास' इति सप्तम्या अलुकि सञ्ज्ञाविधौ नलोपस्यासिद्धत्वात्संयोगसञ्ज्ञायां 'संयोगे गुरु' इति गुरुसञ्ज्ञायां 'गुरोरनृत' इति प्लुतार्थञ्चरितार्थमिति वाच्यम्, 'इकोऽचिविभक्ता'विति सूत्रस्थभाष्यप्रामाण्येन नलोपस्यासिद्धत्वात्संयोगसञ्ज्ञा न भवति, संयोगसञ्ज्ञायां वा तन्निमित्तकगुरुसञ्ज्ञामादाय 'गुरोरनृत' इति प्लुतो न भवतीति वा कल्पनेनादोषात्। अन्यथा 'त्रपुणुशय' इत्यत्र नुमि नलोपे तस्यासिद्धत्वात्संयोगसञ्ज्ञायां गुरुसञ्ज्ञायां 'गुरो'रिति प्लुताभावायाचीत्यस्यावश्यकत्वेन भाष्योक्तज्ञापकता भज्येतेति चेन्मैवम्। नकारोच्चारणसामर्थ्येन शास्त्रबाधकल्पनापेक्षयाऽतिदिश्यमानधर्मविरुद्धस्वाश्रयकार्याभावज्ञापनस्यैवौचित्यात्।

अतिदिश्यमानधर्मविरुद्धेति । अत्र विरुद्धत्वञ्च तदभाववत्तानिश्चयमुद्रया ग्राह्यम्, न तु तदभावव्याप्यवत्तानिश्चयमुद्रया । अन्यथाऽधुरित्यादौ 'विभाषा घ्राधे'ङितिलुगर्थमातिदिश्यमानं यद्वेद्यत्वं तदभावव्याप्यं यत्स्वाश्रयमादन्तत्वं तत्प्रयुक्त 'आत' इति जुस् न स्यादिति दिक्।

स्थानिवत्त्वं दुर्लभमिति । वस्तुतस्तु शास्त्रीयत्वं-शास्त्रस्थपदप्रतिपाद्यत्वमिति प्रत्ययान्तभिन्नत्वस्य शास्त्रस्थाऽप्रत्ययपदप्रतिपाद्यत्वेनेयमाशङ्का न सङ्गतेति दिक्।

❀ चिदस्थिमाला ❀

पत्तिरिति । तथा सत्युक्तरीत्या पदत्वान्नलोपापत्तिरिति भावः । **स्वाश्रयेति** । आदेशनिष्ठधर्मप्रयुक्तकार्याभावाङ्गीकारादित्यर्थः । अत एव 'ब्राह्मणव'दित्यादौ तद्विरुद्धप्रयुक्तमद्यपानादेर्निवृत्तिर्न युद्धादेः । उक्तमेव विशदयति—**अत एवेति** । उक्तार्थस्य तत्स्वभावसिद्धत्वादेवेत्यर्थः । नन्वेवं तदान-

❀ ज्योत्स्ना ❀

पर्युदाससत्त्वे इति । अयं भावः-पर्युदासे हि प्रत्ययान्तत्वरूपनिमित्तान्तर्गतस्य प्रत्ययत्वस्य शास्त्रीयत्वेऽपि तत्कार्यस्य प्रातिपदिकत्वाभावरूपस्य सूत्रेणाविधानादशास्त्रीयत्वं, प्रसज्य प्रतिषेधे तु प्रत्ययान्तस्य प्रातिपदिकत्वाभावः सूत्रेणैव विधीयते इति तस्य शास्त्रीयत्वं स्यात्। ननु वाच्यवृत्त्या प्रातिपदिकत्वाभावस्य मास्तु शास्त्रीयत्वं, तात्पर्यतस्तथात्वं तु पुनस्तस्य केन निवर्त्तनीयम्। अत एव पर्युदासे प्रतिषेधोगम्य इति शास्त्रकृतां व्यवहार इति चेद्धन्तैवमचीत्यादिविशेषणद्वारा हल्यायाद्यभावस्यापि शास्त्रतात्पर्य-

❀ सदाशिवभट्टीयम् ❀

सम्बन्धयोः 'सी'तीकारस्य प्लुतत्वेन नोच्चारणस्य सार्थक्यमिति । **प्रत्ययान्तत्वेपीति** । कृतपूर्वसवर्णे आसित्यादावादिवत्त्वेन प्रत्ययत्वं, तत अनुमानिके आनादौ स्थानिवत्त्वेन प्रत्ययत्वं, तदन्तत्वन्त्वर्थसमाजग्रस्तमिति बोध्यम् । विशिष्टातिदेशस्तु न, अशास्त्रीयत्वात् । **त्वापत्तिरिति** । एवमच्चिनवमित्यादौ पित्त्वाऽतिदेशेपि ङित्वापत्तिरिति बोध्यम् ।

वाच्यं, 'वेः स्कन्देरनिष्ठाया' मिति षत्वविधायके तिङन्तेषु षत्वाभावायाऽऽवश्यकेन, न्याय्येन चानिष्ठायामिति पर्युदासेन वृत्त्यादिसम्मतेन—पर्युदासलभ्याशास्त्रीयेऽपि शास्त्रतात्पर्यविषये शास्त्रीयवदतिदेशबोधनात् । 'विस्कन्न' इत्यादौ हि निष्ठानत्वस्य नित्यतया स्थानिवत्त्वेनैव निष्ठात्वस्य वक्तव्यत्वात् । तस्य प्रसज्यप्रतिषेधत्वे तु लक्ष्यानुसारिव्याख्यानादेवोक्तार्थसिद्धिरिति बोद्धयम् ।

❀ चिदस्थिमाला ❀

ऐक्यमत आह—**असिद्धेति** । वत्त्वं=वत्त्वमेव । तत्र विवादादाह—**न्याय्येनेति** । भाष्याद्यसम्मतत्वादाह—**वृत्त्यादीति** । एतेनाप्रामाण्यनिरासः । स्त्रीयेऽपि=कर्तव्ये । **देशेति** । तत्प्रवृत्तीत्यर्थः । वाच्यवृत्या प्रातिपदिकत्वाभावस्य शास्त्रबोध्यत्वाभावेऽपि तात्पर्यतः शास्त्रविषयत्वेन शास्त्रीयत्वमेवात एव 'पर्युदासे प्रतिषेधो गम्य' इति शास्त्रकृतां व्यवहार इति भावः । तस्य तत्त्वमाह—**विस्कन्न इति** । हि=यतः । पूर्वत्वात् । पक्षे साफल्यभ्रमनिरासायाह—**नित्येति** । अनुमानिकादेशमादायाह—**स्थानीति** । वृत्त्यादीत्यनेनारुचिः सूचिता, तद्बीजन्तु तत्र न भाष्यानुग्रहः । अत एवा'नुविपरिभ्य' इति सूत्र इव तत्र भगवता पर्युदासप्रसज्यप्रतिषेधयोः फलभेदो न विचारितस्तस्माद्विपूर्वस्यास्य तिङ्प्रयोगः,-सषत्वो वा प्रयोग इति तदेतद्धृदि निधायाह—**तस्येति** । उक्तहेतोरेव तुः । 'पक्षिमत्स्यमृगा'नित्यादिनिर्देशानां सौत्रत्वेनोपपत्तेराह—**लक्ष्येति** । एतेनाचीत्यादिविशेषणेन हलि अयाद्यभावस्यापि शास्त्रतात्पर्यविषयत्वेन तस्यापि शास्त्रीयत्वात्लवन इत्यादिनिर्देशासङ्गतिरिति परास्तं, पर्युदासस्थले एव तथाङ्गीकारात् । **कौस्तुभ**कारादिमतमुक्तार्थस्य

❀ ज्योत्स्ना ❀

विषयत्वेन शास्त्रीयत्वान्नायकादौ दोषतादवस्थ्यमिति । **तिङन्तेषु षत्वाभावायेति** । **अनिष्ठायामिति** । पर्युदासान्निष्ठाभिन्ने कृत्यप्रत्यय एव तत्प्रवृत्तेरिति भावः । ज्ञापकशरीरे पर्युदासलभ्येति विशेषणान्नायकादौ न दोषः । अचीत्यादिविशेषणाद्धल्यायाद्यभावस्य शास्त्रतात्पर्यविषयत्वेऽपि पर्युदासालभ्यत्वादिति बोध्यम् । **स्थानिवत्त्वेनैव निष्ठात्वस्येति** । निष्ठात्वरूपनिमित्तस्य शास्त्रीयस्य सत्त्वेऽपि तत्कार्यस्य षत्वाभावरूपस्याशास्त्रीयत्वात्स्थानिवत्त्वाप्रवृत्तेर्विस्कन्न इत्यादौ दोषस्य पुनरपि सत्त्वादनिष्ठायामिति ज्ञापकमुक्तार्थे भवति । ननु किञ्चिन्निमित्तवैकल्येऽपि यथा स्थानिवत्त्वेनैव तत्तत्कार्यं विधेयमिति पक्षस्तदास्तु ज्ञापकं, यदा तु तत्तन्निमित्तरूपं कार्यमात्रं स्थानिवद्भावो विधत्ते तदा पुनर्निष्ठात्वरूपनिमित्तस्य षत्वाभावप्रयोजकस्य शास्त्रीयत्वादतिदेशसम्भवात्कथं ज्ञापकम् ? एवञ्च तण्डुलानित्यादावपि प्रत्ययत्वरूपं निमित्तमात्रमतिदिश्यते, प्रत्ययान्तत्वं त्वार्थसमाजग्रस्तम्,एवं प्रातिपदिकत्वाभावोऽपीति चेन्न । निमित्तातिदेशपक्षेऽपि निमित्तं कस्येति विधेयाकाङ्क्षायां निमित्तस्येव तस्यापि शास्त्रीयस्यैव ग्रहणौचित्यादित्याशयात् ।

लक्ष्यानुसारिव्याख्यानादेवेति । इयमगतिकगतिरभ्युपगमवादेन । वस्तुतस्तु तण्डुलानित्यादौ

❀ सदाशिवभट्टीयम् ❀

स्थानिवत्त्वेनैवेति । निष्ठात्वस्याक्तपरिमाणनिष्ठतया श्वपुच्छदृष्टान्तसिद्धिनासिद्धेरिति भावः । न चानिष्ठायामित्यस्य न निष्ठाव्यावृत्तिः फलं किन्तु कृत्त्वेन सादृश्यग्रहणात्तिङन्तव्यावृत्तिरेवेति कथं ज्ञापकतेति वाच्यं,तन्मात्रफलकत्वे कृतीत्येव वक्तव्यत्वात् । **प्रसज्येति** । अस्य बीजमाख्यातशेखरतोवसेयम् । **लक्ष्यानुसारीति** । न च भृशादिसूत्रेऽच्वेरिति पर्युदासो ज्ञापक इति वाच्यम् , अभूततद्भावे प्रवर्तनेन सार्थक्यात् । नह्यत्र तदेव वक्तुं युक्तं, गौरवात् । नन्विदुदुपधेति सूत्रेऽप्रत्ययपर्युदासो ज्ञापकः, न हि प्रत्ययावयवत्वं स्थानिवत्वाद्वारकं विसर्गेऽस्तीति । नच भिसि एकदेशविकृतन्यायेन, अक्तपरिमाणत्वात् । नापि तत्स्थानापन्नेति लौकिकेन, प्रकृतसूत्रीयोद्योतोक्तरीत्या विभक्तित्वस्येव प्रत्ययत्वस्यापि स्वं रूपमित्येतद्विषयत्वाविशेषात् । न च तदविषयः प्रत्ययावयवत्वमेवातिदिश्यतां, तथा सति तथैव फलानां सिद्धा

के चित्तु भाष्ये 'तत्स्थानापन्ने तद्धर्मलाभस्य तत्कार्यस्य च लोकन्यायेनैव सिद्धे-रयमतिदेशः स्वं रूपमित्येतच्छास्त्रसत्त्वाद्धन्तेः कार्यं वधौ न स्यादिती'त्युक्तम् । एवञ्च 'स्वं रूप'मितिशास्त्राविषये तेन सिद्धिरिति सूचितम् । एवञ्चाशास्त्रीयस्यापि धर्मस्याति-देशो भवत्येव । अतिप्रसङ्गस्तु लक्ष्यानुसारेण क्वचिल्लोकन्यायानाश्रयणेन परिहरणीयो-

❀ चिदस्थिमाला ❀

स्वारसिकत्वेन न ज्ञापकाद्यपेक्षेति । लाघवादाह—**केचिदिति । भाष्ये इति ।** 'उक्त'मित्यत्रान्वयः । वधौ=तद्विषये । इतीत्युक्तमिति=एतदर्थ इत्युक्तमित्यर्थः। एवञ्च=तथोक्तौ च। सिद्धावन्वयः। तेन=लोकन्यायेनैव

❀ ज्योत्स्ना ❀

न दोषः,'येन विधि'रिति शास्त्रात्प्रत्ययशब्दसङ्केतितत्वस्य प्रत्ययान्तस्य शास्त्रीयत्वावगमात्। उक्तरीत्या प्रत्ययत्वरूपशास्त्रीयनिमित्तमात्रातिदेशेन दोषाभावाच्च।निमित्तनिमित्तिनोरुभयोरपि शास्त्रीययोरेव ग्रहणे तु न प्रमाणम्, शास्त्रीयनिमित्तमात्रातिदेशेन सकललक्ष्यसौष्ठवात्। अत एव लाघवाद्भाष्यकृताङ्गीकृतो-ऽयं पक्षः । निमित्तवैकल्येऽपि तन्निमित्तं कार्यं शास्त्रीयमतिदेशेन क्रियते इति पक्षे तासौ नित्याऽ-निट्त्वरूपाशास्त्रीयनिमित्तकस्य शास्त्रीयेण्निषेधस्य '**जघसिथे**'त्यादावप्रवृत्तये तत्रासतोऽपि निमित्तस्या-शास्त्रीयस्यैवापेक्षणेन गौरवात् । न चैवं '**निराद्ये**'त्यत्र जग्धेर्घात्यादित्यत्र वधेश्चैकदेशविकृतन्यायेन प्राप्त्या तन्निवृत्तयेऽपेक्षितस्याचःपरस्मिन्निति शास्त्रीयातिदेशस्य 'स्थानिभूतादचः पूर्वत्व'रूपाशास्त्रीय-निमित्तस्य स्थानिवत्त्वेनेष्यमाणेऽतिदेशो न स्यात्, स्थानिभूतादचःपूर्वत्वस्य तन्निमित्तस्याशास्त्रीय-त्वादिति वाच्यम्। न हि स्थानिभूतादचः पूर्वत्वमतिदेशे निमित्तं किन्तु पूर्ववृत्तिधर्मः, स्थानिभूतादचः पूर्वत्ववद्वृत्तिधर्मावच्छिन्नोद्देश्यके विधाविति क्ङितिङितिसूत्रभाष्यकृता ध्वनितसूत्रार्थाश्रयणात्। स च धर्मोऽदित्वहतित्वरूपः—शास्त्रीयोदेर्हन्तेश्च प्रकृतित्वेनोपदेशात्। एतेन न धातुलोपसूत्रप्रत्याख्यानपक्षे लोलुवादौ लघूपधगुणवारणमशक्यं, यङ्कारसत्त्वे उवङो भावादकारलोपे उवङः स्थानिभूतादचः पूर्वत्वाभावेनाकारलोपस्य स्थानिवत्त्वाभावादिति **हरदत्तोक्तं** दूषणमपास्तम् । उवङन्तस्थानिलोलू-इत्यूकारान्तवृत्तिधर्मस्याङ्गत्वस्य स्थानिभूतादचः पूर्वत्ववद्वृत्तेः शास्त्रीयस्यातिदेशेनादोषात्। अत एव 'नपदान्त'सूत्रे 'शिण्ढि'इति परसवर्णोदाहरणं सङ्गच्छते, स्थानिभूतादचः पूर्वत्ववति श्नम्नकारे वर्त्तमानस्य प्रकृत्यवयवत्वस्य मिदचोन्त्यादितिशास्त्रगम्यस्या'वयवावयवः समुदायावयवो भवती'ति-न्यायात्पदावयवत्वप्रयोजकस्यानुस्वारेऽवश्यापेक्षणात् । अनुस्वारविधौ परसवर्णविधौ च पदस्ये-त्यवयवषष्ठ्यन्तानुवृत्तेः सिद्धान्तात् । तर्हि 'ब्राह्मणकण्डूति'रिति'नपदान्त'सूत्रे भाष्ये कथमुदाहृतम्, अल्लोपस्योक्तरीत्या स्थानिवद्भावादुवङि कृते ऊठोऽप्रसङ्गात्, उच्यते,—ऊठो दीर्घत्वात्तस्मिन् कर्त्तव्ये निषेधात्, न हि दीर्घशब्देन तद्भावितग्रहणं, मानाभावात्, लोलुवे गुणो दीर्घ एवेति चेन्न, दीर्घत्ववन्मात्रवृत्तिधर्माश्रयविधौ निषेधाङ्गीकारात्, गुणत्वस्यैकमात्राकारसाधारणत्वेनाऽग्रहणात् । अत एव 'पापचक' इत्यादौ न निषेधः, वृद्धित्वस्याऽर्द्धतृतीयमात्रासाधारणत्वेन दीर्घग्रहणेनाग्रहणात् । ननु च दीर्घग्रहणं प्रत्याचक्षाणेन वार्त्तिककृता त्रैपादिक एव दीर्घस्तत्र गृहीतः, न, 'चिण्णमुलो' रितिसूत्रे सपादसप्ताध्यायीस्थदीर्घग्रहणमङ्गीकृत्य भाष्यकृता तत्प्रत्याख्यानात्। यद्वा—'अङ्ग-

❀ सदाशिवभट्टीयम् ❀

ज्ञापकानुपयोगादिति चेन्न, उक्तार्थो ज्ञाप्यतामसमर्थसमासो वेति सन्देहे लक्ष्यस्यैवानुसर्त्तव्यत्वादिति भावः।

अशास्त्रीयेति । प्रत्ययान्तत्वेत्यर्थः । यातिरिति सिद्ध्यर्थं वरेग्रहणज्ञापितसम्भावितप्रत्ययत्वादिक-

यदि प्राप्नोति । एवञ्च न कश्चिद्दोषः । 'न पदान्ते'ति सूत्रे 'ब्राह्मणकण्डूति'रित्युदाहरणाच्च क्वचित्तदनाश्रयणम् । तत्र हि कण्डूयतेः क्तिचि तस्य स्थानिवत्त्वादुवङि यणि वाऽनादिष्टादचः पूर्वत्वे स्थानिद्वारके गृह्यमाणे ऊठ् न स्यादित्याहुः ।

अत एवार्थवत्सूत्रशेषेऽप्रत्यय इत्यस्य पर्युदासत्वमेवोक्तं भाष्ये । तत्र पक्षे च 'काण्डे' इत्यत्र पूर्वान्तवद्भावेन प्रत्ययान्तभिन्नत्वादोषः शङ्कितो, न तु स्वाश्रयाप्रत्ययान्तत्वेन

❀ अभिनव-चन्द्रिका ❀

यणि वेति । द्विधा हि कण्ड्वादय इत्युक्त्या धातुत्वकल्पे उवङ्, प्रातिपदिकत्वकल्पे यणिति विवेकः । **अत एवेति** । पर्युदासलभ्याशास्त्रीयेऽपि शास्त्रीयवदतिदेशस्वीकारादेवेत्यर्थः । **काण्डे इत्यत्रेति** । न च लक्ष्ये लक्षणन्यायेन पुनर्ह्रस्वाप्राप्त्या इयमाशङ्काऽयुक्तैवेति वाच्यम् । **गुणस्य** स्वीयप्राथमिकप्रवृत्तौ उद्देश्यतावच्छेदकत्वेनाश्रीयमाणसमुदायघटकमात्रोद्देश्यकविकारभिन्नत्वेन तल्लक्ष्य-

❀ चिदस्थिमाला ❀

प्रागुक्तेन । एवञ्च=अत्र तेन सिद्धौ च । **न कश्चिदिति** । प्रागुक्त इत्यर्थः । अनाश्रयणस्थलमाह—**न पदान्तेति** । **इत्युदेति** । यलोपस्येति भावः । **चः** 'क्षत्रियकण्डूति'रितीत्युदाहरणसमुच्चायकः । तत्र हि=यत उक्तलक्ष्ये । न स्यादित्यत्रान्वयः । कण्डूयतेः=यगन्तात्क्यजन्ताद्वा । क्तिचि=तस्मिन्परतः । अल्लोपे तन्निषेधेन यलोपे चेत्यपि बोध्यम् । **माणे इति** । अचः परेतिस्थानिवत्त्वादकारेण व्यवधानादिति शेषः । तथा च वलोपस्यापि तत एव प्राप्त्या हलि चेति दीर्घे कण्डूवूतिः कण्डूतिरिति वा स्यादिति भावः । अत्रारुचिबीजन्तु स्वं रूपमित्यस्य प्रत्याख्यातत्वेन तथा दुर्वचं, तदतिदेशे न पदान्तेति सूत्रातिरिक्ते फलाभावश्च, तस्य तन्मात्रविषयकत्वेनासार्वत्रिकत्वञ्चात एवान्यत्रातिप्रसक्तिरपीति बोध्यम् । प्रागुक्तार्थं द्रढयति—**अत एवेति** । तत्रातिदेशप्रवर्तनादेवेत्यर्थः । अन्यथा प्रसज्यप्रतिषेधे वाच्ये तदसङ्गतिः स्पष्टैव । अस्याग्रेप्यन्वयः । अत एव च, अन्यथा तावत्पर्यन्तधावनासङ्गतिः स्पष्टैव । एवं तस्य तत्स्वभावसिद्धत्वे

❀ ज्योत्स्ना ❀

वृत्तेः पुनर्वृत्तावविधिर्निष्ठितस्ये'ति परिभाषया लोलुवादीनामुवङि परिनिष्ठितानां लघूपधगुणेन भविष्यति, ब्राह्मणकण्डूतेरुवङि परिनिष्ठितत्वाभावादूङ्भविष्यति, निरायेत्यादौ तु वृद्धौ कृतायां णिलोपे दोषाभावः, ण्यल्लोपाविति वचनस्य णिस्थानिकवृद्धिमात्रबाधकत्वात्, अत्र पक्षे शिण्ढीति सवर्णग्रहणे नोदाहरणं, किन्तु हरितशब्दादाचख्याणणिजन्ताद्धिचि हरिल्लुनातीति, क्विप्तु नोदाहर्त्तव्यः, 'क्लिगुपधात्वे'ति निषेधादिति दिक् ।

❀ सदाशिवभट्टीयम् ❀

मादाय—**उवङीति** । प्रकृते तदनाश्रयणेपि यणेष्टसिद्ध्यतीत्याशयेनाह—**यणिति** । अन्यथेतिमात्रनिवेशे तु भोगभो इति भाष्ययोजनैव तत्फलं बोध्यम् ।

❀ विषमपदविवृतिः ❀

एवञ्च न कश्चिद्दोष इति । 'न चाप्रत्यय इत्यस्ये'त्युक्तदोषो नेत्यर्थः । क्वचित्तदनाश्रयणं=लौकिकन्यायानाश्रयणम् । **उवङि यणि वेति** । 'कण्डूये'त्यस्य यगन्तत्वे उवङ्, क्यजन्तत्वे यणिति विवेकः । 'द्विधा हि—कण्ड्वादयो—धातवः, प्रतिपदिकानि चे'त्यभियुक्तोक्तेः ।

अतएवार्थवत्सूत्रेति। अतिदिश्यमानधर्मविरुद्धेत्युक्तशास्त्रार्थाङ्गीकारादेवेत्यर्थः। अत्र च='इट ईटी'त्यत्र । नन्वग्रहीदित्यत्र दीर्घे इट्त्वं दुर्लभं, 'प्रदीव्ये'त्यादाविव शब्दतः स्थानितयोपात्तसमुदाय इडिति तदवयवेकाररूपात्वृत्तीट्त्वरूपधर्माश्रये दीर्घविधौ स्थानिवत्त्वस्य दुर्लभत्वादिति चेन्न, स्थान्यवयवात्वृत्तित्वमित्यत्र मात्रपदनिवेशेनादोषात् । यद्वा—समुदायसत्तादशायां तदवयवात्वृत्तित्वं विवक्षितमिति न कश्चिद्दोषः ।

'क्षियो दीर्घा'दिति सूत्रे भाष्येऽपि अतिदिश्यमानधर्मविरुद्धस्वाश्रयकार्याभाव इति स्फुटम् । तत्र हि क्षिय इत्यत्रेयङर्थं प्रकृतिवदतिदेशे स्वाद्यनुत्पत्तिमाशङ्क्य-'एवं तर्हि आतिदेशिकानां स्वाश्रयाणि न निवर्त्तन्ते' इति समाधायातिदिश्यमानधर्मविरुद्ध-स्वाश्रयनिवृत्तेरावश्यकत्वाभिप्रायेण-'अथाप्येतन्ने'त्याशङ्क्य 'निर्देशसामर्थ्याद्विभक्ति'रित्युक्तम् । असिद्धवत्सूत्रे च कैयटे स्फुटमेतत् ।

यत्तु गाङ्कुटादिसूत्रे भाष्ये-'सृजिदृशो'रित्यत्राकितीति पर्युदासात्सिसृक्षतीत्यत्र 'हलन्ताच्चे'ति कित्त्वातिदेशेऽपि अमागममाशङ्क्य—प्रसज्यप्रतिषेधाश्रयणेन समाहितं, तत्तु वार्त्तिककृदुक्तमुपायान्तरं बोद्धयम् । 'अनल्विधा'विति विधिग्रहणादलाश्रये विधावित्यर्थाद्यत्र विधौ शब्दतः स्थानि-स्थान्यवयवान्यतराल्वृत्तिधर्मवतस्तेन तस्मात्तस्य तस्मिंस्तदादेरित्यादिप्रकारेण विशेष्यतया विशेषणतया वा अलाश्रयणं तत्र निषेधः । व्यूढोरस्केन, द्यौः, द्युभ्यां, क इष्टः, प्रपठ्येत्युदाहरणानि ।

❀ अभिनव-चन्द्रिका ❀

त्वाभावात् । **अलाश्रये विधावित्यर्थादिति** । अल्विशिष्टविधावित्यर्थः । वै० 'साक्षात्स्व-वृत्त्यल्त्वव्याप्यधर्मावच्छिन्नस्थानितानिरूपितादेशताश्रयधर्मिकारोपप्रकारीभूतधर्मावच्छिन्नोद्देश्यताक-त्व'-'स्ववृत्त्यतिदिदिक्षिताल्त्वव्याप्यधर्मघटितधर्मनिमित्तकत्वै' तदन्यतरसम्बन्धेन । ['साक्षा'दित्यस्य-'अवच्छिन्ने'त्यत्रान्वयो बोध्यः ।]

शब्दतः स्थानीति । अल्त्वव्याप्यधर्मावच्छिन्नस्थानिताश्रय इत्यर्थः, अल्पर्याप्तस्थानिताश्रय इत्यर्थो वा । **अन्यतराल्वृत्तिधर्मेति** । 'तादृशस्थानितानिरूपितादेशताश्रयधर्मिकारोपप्रकारीभूतधर्मेण-साक्षादवच्छिन्नोद्देश्यतासामानाधिकरण्य'—'स्ववृत्त्यल्त्वव्याप्यत्व'-एतदन्यतरसम्बन्धेन धर्मेऽन्य-

❀ चिदस्थिमाला ❀

भाष्यमपि मानमित्याह—**क्षिय इति** । 'तत्र ही'त्यस्योक्तमित्यत्रान्वयः । दोषे स्वीक्रियमाणे सति । **कानां**=शब्दानाम् । **निवृत्तेरिति**। अन्यार्थमिति शेषः। स्फुटं=स्फुटतरम्। अत एवाग्रेऽस्योल्लेखः।नन्वेवं सृजि-दृशोरित्यत्र पर्युदासेऽपि प्रोक्तरीत्यागमाप्राप्तौ सिसृक्षतीत्यादौ तदाशङ्का न युक्ता, तस्या अज्ञानेन कृतत्वेऽप्यन्यथासिद्धान्तोक्तिरयुक्तैवात आह—**यत्त्विति** । कुटादीतिसूत्रे इत्यर्थः । अपिर्विरोधे । उक्तहेतोरेवाह—**प्रसज्येति** । तस्य प्रसिद्धदोषेणासिद्धान्तत्वसूचनायाह—**वार्तिकेति** । एवञ्च तदप्यज्ञानविलसितमेवेति भावः । नन्वनल इत्युक्त्वैव सम्बन्धसामान्यषष्ठ्या समासचतुष्टयफललाभे विधिग्रहणं व्यर्थमत आह—**अनल्विधावितीति** । 'उत्तरपदलोपिसमासाङ्गीकारा'दिति शेषः । **अलाश्रये इति** । अलाश्रितविधि-मात्रे इत्यर्थः । तेन तद्द्वारा सकलाल्विधिपरिग्रह इति । प्रधानन्यायबाधाङ्गीकारेण यथाकथञ्चिदाश्रयस्यैव तस्यापि लाभस्तदाह—**तेनेति** । विशेष्यतयाऽऽश्रयणप्रकारमुक्त्वा विशेषणतयाऽऽश्रयणप्रकार-माह—**तदादेरिति** । आदिना 'तदा'वित्यादिपरिग्रहः । तया चेति पाठः । **वेति** पाठे-वा समुच्चये ।

उद्देशक्रमेणोदाहरणमाह—**व्यूढोरस्केनेति** । **अतिदिश्यमानेति** । प्रागुक्तरीत्या सकारे स्वतोऽभिन्नत्वात्कथं णत्वप्राप्तिर्निषेधादिति शङ्का नेति भावः । **द्युभ्यामिति** । अत्र सूत्रे विशेषातिदेशस्यापि वक्ष्यमाणत्वान्नात्र दोष इति भावः । **क इष्ट इति** । यद्यपीदं रूपं स्थानिवत्त्वेनोत्वे गुणाऽवादेशे पाक्षिकलोपेन सिध्यति, तथापि पक्षे कविष्टः स्यात्कयिष्ट इति लिख्यते इति भावः । **प्रपेति** । तत्र वलादिलक्षणेण्न ।

'शब्दत' इत्युक्तेरग्रहीदित्यादौ 'इट ईटी'ति सिद्ध्यति । दीर्घविधावत्र च 'इट' इति समुदायाश्रयणात् । अन्यथा टस्यानुबन्धत्वादिकारस्यैवोभयत्राश्रयणमित्यल्विधित्वं स्यात् । अत्र सूत्रे विशेषातिदेशोऽपि । अन्यथा इडादेरपि क्त्वः सत्त्वाद्धलादित्वस्य तद्विशेषधर्मत्वादुपस्थितधर्मैस्तद्व्यापकधर्मैश्च विध्याकाङ्क्षापूरणे सति तदतिरिक्तविशेषग्रहणे मानाभाव इत्येतन्न्यायमूलकेन सामान्यातिदेशे विशेषानतिदेशेन सिद्धौ–विशेषणतयाऽलाश्रयणे निषेध–इत्येतत्प्रतिपादकस्यानल्लित्येव सिद्धे कृतस्य विधिग्रहणस्य वैयर्थ्यं स्यात् । हलादिक्ङिन्निमित्तकेत्त्वप्रतिषेधका'न्न ल्यपी'ति लिङ्गाच्च

❀ अभिनव-चन्द्रिका ❀

तराल्वृत्तित्वं विवक्षितमिति भावः । **इट ईटीति सिध्यतीति** । 'ग्रहोऽलिटी'तिसूत्रीयस्थानिताया इट्त्वावच्छिन्नत्वेन स्थानितावच्छेदकेऽल्त्वव्याप्यधर्मत्वस्य, अल्पर्याप्तस्थानितावच्छेदकत्वस्य वाऽभावात्, तादृशस्थानितानिरूपितादेशताश्रयधर्मिकारोप्रकारीभूतेट्त्वस्य च इट इटीतिशास्त्रीयोद्देश्यतायाः साक्षादनवच्छेदकत्वाच्चेति भावः ।

विशेषानतिदेशेनेति । सादृश्यप्रतियोगितावच्छेदकधर्मव्यापकधर्मस्यैवातिदेशो भवति न तु सादृश्यप्रतियोगितावच्छेदकधर्माव्यापकधर्मस्येत्यर्थः । **न ल्यपीति लिङ्गाच्चेति** । वस्तुतस्तु विशेषा-

❀ चिदस्थिमाला ❀

देवाः सन्तीत्यत्रेव नात्राल्त्वेन स्थानितेति सूचनायाह–**दीर्घेति** । अन्यथा=शब्दत इत्यस्याभावे । विधिग्रहणं विनिगमनाविरहाद्विशेषातिदेशमपि बोधयतीत्याह—**अत्र सूत्रे इति** । नान्यत्र, तन्न्यायादिति भावः । अपिना सामान्यातिदेशसमुच्चयः । **अन्यथेति** । तदनङ्गीकारे इत्यर्थः । 'यत' इत्यादिः । अपिना तच्छून्यपरिग्रहः, **मान्याद्यनुरोधेनाह—उपस्थितेति** । उपस्थितसामान्यधर्मैरित्यर्थः । **तद्व्यापकेति** । तदाक्षिप्ततद्व्यापकसामान्यधर्मैश्चेत्यर्थः । तिदेशे=तत्सम्भवे । अन्यथा तु तस्याप्यतिदेश इति बोध्यम् । देशेन= इति न्यायेन । सामान्योपस्थापकसामग्रीकाले नियमेन विशेषोपस्थापकसामग्र्यभावोऽस्य बीजमिति तत्त्वम् । तया=तयापि । प्रधानन्यायबाधेनेति भावः । तस्योक्तरीत्या सिद्धिरित्याह–**स्यानल्लित्येवेति** । नल्यपीति लिङ्गात्स न्यायोऽनित्यस्तेनात्र विशेषातिदेशोपीत्याह—**हलादीति** । 'प्रदाये'त्यादावित्यादिः । कित्त्वं-

❀ ज्योत्स्ना ❀

शब्दत इत्युक्तेरिति । इदं व्यर्थ, स्थान्यल्साधारणधर्माश्रयणे निषेधप्रवृत्तेरवश्यवक्तव्यतया, उपस्थापके–इट्शब्दे, तदुपस्थाप्ये–प्रयोगस्थेकारमात्रे वर्त्तमानस्य–टकारोपलक्षितेत्त्वरूपस्येट्त्वस्यालसाधारणत्वाभावेन निषेधाप्रवृत्तेरिति **परिभाषाप्रदीपार्चिषि** विस्तरः । नन्वेवमपि दीर्घविधावच्परिभाषोपस्थानादच एव स्थानित्वमिट्त्वजन्तराणां व्यावर्त्तक इति विशेषकार्यत्वादिण्न प्राप्नोति, सामान्यातिदेशे विशेषानतिदेशात् । तथा 'प्रदीव्ये'त्यत्र गुणनिषेधो न प्राप्नोति, 'देवित्वे'त्यादावकितोऽपि क्त्वः सम्भवात्कित्त्वस्यापि न स्यादतिदेशोऽत आह—**अत्रेत्यादि** । **सामान्यातिदेश इति** । लोकेऽपि ब्राह्मणवदस्मिन् क्षत्रिये वर्त्तितव्य'मित्युक्ते–सामान्यं यद्ब्राह्मणकार्यं तदतिदिश्यते, न यद्विशिष्टं,–माठरे कौण्डिन्ये वा—। **लिङ्गाच्चेति** । 'प्रदाये'त्यादौ क्त्वाविशेषधर्मस्य कित्त्वस्यानतिदेशाद्देवित्त्वाऽप्राप्तौ विशेषातिदेशज्ञापकत्वं तस्येति

❀ विषमपदविवृतिः ❀

लिङ्गाच्चेति । कित्त्वस्य क्त्वाविशेषधर्मत्वात् । अस्माल्लिङ्गादेवाशास्त्रीयधर्मातिदेशोऽपि । कित्त्वस्याशास्त्रीयत्वात् ।

अनुबन्धकार्ये त्वनल्विधाविति निषेधो न, अनुबन्धानामनेकान्तत्वात् । एकान्तत्वेऽपि शिद्ग्रहणेन तेषामल्व्यवहाराभावज्ञापनात् । "नानुबन्धकृतमनेकाल्त्व'मिति ज्ञापयती"ति भाष्ये'ऽल्त्वव्यवहाराभावबोधनद्वारे'ति शेषः ।

❀ अभिनव-चन्द्रिका ❀

नतिदेशेऽपि न क्षतिः । 'स्थानिवदादेशे' इत्यस्य सङ्ग्रहवाक्यतया 'तदादेशस्तत्स्थानिवद्भवती' त्यतिदेशवाक्यकल्पनाया आवश्यकत्वेन 'प्रदाये'त्यादौ 'अयं ल्यबेतत्क्त्वावद्भवती'त्यतिदेशवाक्ये सादृश्यप्रतियोगितावच्छेदकैतत्क्त्वात्वव्यापकत्वस्य कित्त्वे सत्त्वेन न ल्यपीत्यस्य वैयर्थ्याभावात्, फलाभावाच्च । अत एव जजागरतुरित्यादौ गुणः सिध्यति । अन्यथाऽऽहतुरित्यादावतुसः स्थानितसो ङितोऽपि सत्त्वेन त्वन्मतेऽतुस् तस्वद्भवतीत्यतिदेशवाक्यकल्पनया विशेषधर्मातिदेशस्वीकारेण च 'अविचिण्णल्ङित्स्वि'त्युक्त्या गुणनिषेधो दुर्वारः स्यात् ।

अल्त्वव्यवहाराभावज्ञापनद्वारेति । अनुबन्धघटितबोधकत्वत्तयो येऽनुबन्धत्वघटितातिरिक्ता आनुपूर्व्यव्यतिरिक्ताश्च धर्मास्तन्निमित्तके कार्ये अनुबन्धा अविद्यमानवद्भवन्तीतिज्ञापनद्वारेत्यर्थः । तथा च प्रकृते कित्त्वस्यानुबन्धत्वघटितत्वेन तद्व्यतिरिक्तोऽल्त्वव्याप्यधर्मघटितो धर्मोऽल्विधित्वरूपो धर्मस्तद्धर्मनिमित्तकेऽनल्विधाविति निषेधे कर्तव्येऽनुबन्धककारस्याविद्यमानत्वान्नदोष इत्यर्थः । वस्तुतस्तु—'नल्यपी'ति लिङ्गेनाल्त्वव्याप्यधर्मे–इत्पदार्थनिष्ठविशेष्यतानिरूपितप्रकारतावच्छेदकातिरिक्तत्वेन विशेषणान्न दोष इति दिक् ।

❀ चिदस्थिमाला ❀

क्त्वाविशेषधर्मः, सेटः क्त्वस्तदभावात् । नन्वेवमप्येवं विधिग्रहणसाफल्ये'ऽनुबन्धकार्येप्यनल्विधा'विति निषेधः स्यात्तेषां कितीत्यादिना सर्वत्र विशेषणतयाश्रयणात्तथा च तत्र स्थानिवत्त्वाप्रवृत्त्येत्त्वाप्राप्त्या 'न ल्यपी'ति व्यर्थमेवात आह—**अनुबन्धेति** । **तुरुक्तवैलक्षण्ये** । यत्तु तेन तत्र तदप्रवृत्तेरपि ज्ञापनाद्वैलक्षण्यं, किञ्चानुबन्धानामेकान्तत्वेऽन्तरङ्गत्वादित्सञ्ज्ञादिनापहारात्तदप्रवृत्तिरनेकान्तत्वे तु दोषसम्भावनैव नेति **कैयटदण्डिकृष्णकौस्तुभरत्नाकरादयस्तन्न**, सानुबन्धकनिर्देशे पक्षद्वये तद्रहितस्य न स्थानिता, किन्तु समुदितस्येत्यर्थस्यान्यत्र प्रतिपादितत्वेन तथोक्तेर्दुवचत्वात् । तस्य तज्ज्ञापकत्वेन वक्ष्यमाणरीत्या साफल्यात्तथोक्तेरनन्यगतित्वाच्च, तस्य तत्त्वस्य तत्र भाष्यानुक्तत्वाच्च, वक्ष्यमाणज्ञापकेनैकार्थज्ञापनेनैवोभयसिद्धिरिति ततो गौरवाच्च । तदेतद्ध्वनयन्नाह—**अनुबन्धानामनेकान्तत्वेपीति** । अपिना–सिद्धान्तभूतैकान्तत्वपरिग्रहः । यथा स्थानिता सूत्रोपात्ते तथादेशतापीति शिद्ग्रहणं व्यर्थमनेकाल्त्वेनैव सिद्धेरित्यर्थस्य प्रागुक्तत्वेन तदाशयेनाह—**शिदिति** । तेषाम्=अनुबन्धानां । नन्वेवं भाष्यविरोधोऽत आह—**नानुबन्धेति** । शिद्ग्रहणेनेत्यादिः । एतेन प्रागुक्तस्वग्रन्थविरोधोपि परिहृतः । तत्र निषेधाप्रवृत्तौ भाष्याभिमतत्वमाह—

❀ ज्योत्स्ना ❀

भावः । नन्वेवमपि कित्त्वस्य विशेषणत्वेनाल्विधित्वा'दनल्विधा'विति निषेधप्रवृत्तौ तद्वैयर्थ्यमेवेत्यत आह—**अनुबन्धकार्ये त्विति** । 'अनुबन्धानामनेकान्तत्वात्, एकान्तत्वेऽपी'तिपाठः, अनुबन्धानामनेकान्तत्वे एकान्तत्वेऽपी'त्यपपाठः । तत्र शिद्ग्रहणस्य ज्ञापकत्वाभावात्,

❀ सदाशिवभट्टीयम् ❀

अल्व्यवहारेति । नचात्र पक्षेऽशितीत्यत्र कर्मधारये तदादिविधिर्न स्यादिति वाच्यम्, असत्यपि तत्रेति शकारेऽव्यवहिते पर इत्यर्थेन शबादौ तस्य लोप इत्यस्य स्थानिवत्वात्तत्परत्वेन एशादौ त्वेकारादिनाऽव्यवधानेनेष्टसिद्ध्या बाधकाऽभावात् । अत्र पक्षे आदेच इति सूत्रस्थस्यात्रापि शश्शिद्भवतीति भाष्यस्य

❀ विषमपदविवृतिः ❀

अल्त्वव्यवहाराभावेति । इदं चिन्त्यं । नदटष्टकारमादाय 'नद' इत्यत्र हल्ङ्यादिलोपप्रसङ्गात् ।

ध्वनितञ्चेदं—'क्ङिति च' 'गाङ् लिटि' 'हलः श्नः' इति सूत्रेषु भाष्ये । तत्राऽऽद्ये—'यासुटो ङिद्वचनान्ङिदादेशा ङितो न इति ज्ञाप्यते'इत्युक्तम् । द्वितीये—गाङो ङित्त्वस्य सानुबन्धकादेशे इत्कार्याभावज्ञापकतोक्ता, तिबाद्यादेशेषु पित्त्वासिद्ध्या दूषितञ्च ज्ञापकम् । अन्त्ये—शानचः शित्त्वस्य सार्वधातुकादेशेऽनुबन्धास्थानिवत्त्वज्ञापकत्वमुक्तम्, उक्तदूषणैरेव दूषितञ्च । अन्यथाऽनल्विधाविति निषेधेन तत्त्वाप्राप्त्या ज्ञापकत्वासङ्गतिः, तिबाद्यादेशेषु पित्त्वाद्यसिद्धिश्चेति बोद्ध्यम् ।

❀ चिदस्थिमाला ❀

ध्वनितमिति । तत्र तदप्रवर्तनमित्यर्थः । **भाष्येति**—जातावेकवचनं, ङिद्वचनादिति हेतौ पञ्चमी, तेनेत्यर्थः । **कादेशेति** । तस्यादेशे इत्यर्थः । एवमग्रेपि । **सिद्ध्येति** । प्रयोजनाभावाच्चेत्यपिबोध्यम् । **नुबन्धेति** । स्थानिवत्त्वेनानुबन्धप्रयुक्तकार्याभावज्ञापकत्वमित्यर्थः । **उक्तेति** । उक्तप्रभृतिदूषणैरेवेत्यर्थः । बहुवचनेन प्रयोजनाभावस्य हेरपित्त्ववैयर्थ्यस्य तातङो ङित्त्ववैयर्थ्यस्य'पिच्च ङिन्ने'त्यादेश्च परिग्रहः । एवेन दोषान्तरनिरासः । **दूषितञ्चेति** । उक्तज्ञापकमितिशेषः । ध्वनितत्वमुपपादयति—**अन्यथेति** । तत्र तदप्रवृत्त्यनङ्गीकारे इत्यर्थः । **तत्त्वेति** । ङित्त्वादीत्यर्थः ।

नन्वेतानि ज्ञापकानि वार्तिककृदुक्तानि न सिद्धान्तभाष्याभिमतानि, सूत्रद्वये भगवतैव द्वयोर्दूषितत्वादसाधारणफलाभावाच्च । आद्यं यद्यपि तत्र न दूषितमत एव तावन्मात्रमेव प्रागुक्तं, तथापि तृतीये सिद्धान्तभूतेनावश्यकेन चरमोक्तेन 'पिच्च ङिन्ने'त्यादिना दूषितमेवेति यासुटो ङित्त्वं पिदर्थं सावकाशमिति तस्य न ज्ञापकता, गाङो ङित्त्वं शानचः शित्त्वं च भाष्ये एव तत्र प्रत्याख्यातमिति तयोरपि न ज्ञापकतेत्येकदेश्युक्तित्वेन तदसङ्गतिर्नानिष्टात आह—**तिबाद्येति** । तेषां तदनिष्टत्वे तदसिद्धिदोषेण वत्खण्डनासङ्गतिः स्पष्टैवेति भगवतस्तदभिमतमिति भावः । आदिना उक्तसर्वपरिग्रहः । स्थानिपद-

❀ ज्योत्स्ना ❀

स्पष्टं चेद'मनेकाल्शि'दिति सूत्रे, 'स्थानिव'त्सूत्रे च **शब्दकौस्तुभे** । **इति बोध्यमिति** । वस्तुतस्तु 'नानुबन्धकृतमनेकाल्त्व'मिति भाष्यस्य शेषपूरणेन व्याख्याने प्रमाणाभावः, अनुबन्धकार्येऽनल्विधाविति निषेधाऽप्रवृत्तौ ज्ञापकन्तु—'न ल्यपी'त्येव, अन्यथा क्त्वादेशे ल्यपि कित्त्वस्याल्विधित्वादेवाऽप्राप्तौ तद्वैयर्थ्यापत्तिरिति स्पष्टं **शब्दकौस्तुभे** । यद्वा—स्थानिवत्सूत्रीयप्रदीपोक्तदिशैकान्तत्वपक्षेऽप्यन्तरङ्गत्वादुपदेश एवानुबन्धलोपादादेशे प्रवृत्तिकाले तदसन्निधानात्तद्वृत्तिधर्मस्य स्थान्यल्वृत्तित्वाभावादुक्तज्ञापने प्रयोजनाभावः, न च शब्दतः स्थान्यवयवाल्वृत्तिधर्मवत आश्रयणेऽनल्विधाविति प्रतिषेधात्, क्त्वः कित्त्वस्य च तथात्वादस्ति प्रयोजनमिति वाच्यं, प्रमाणा-

❀ सदाशिवभट्टीयम् ❀

शववयव इतसञ्ज्ञकशकार इत्यर्थो बोध्यः । 'आदेच'इति सूत्रस्थशेखरस्तूपाध्यायानुरोधी । नन्वेवं देवश्चोर इत्यादौ टिलोपस्य स्थानिवत्त्वाद्धल्ङ्यादिलोपः स्यात्, तथा 'विमलदिवी'त्यादौ शलोपस्य तत्त्वाद्धलि लोपः स्यात् । प्राचां मते त्वनुबन्धमात्रवृत्तिधर्मवदुद्देश्यकेऽनल्विधाविति निषेधो न प्रवर्त्तते ज्ञापकसाजात्यादिति न दोष इति चेन्न । ममापि हल्ङ्यादिसूत्रादिषु ङ्याबादिग्रहणेनानुबन्धमात्रावृत्तिधर्मप्रयुक्तं कार्यमनुबन्धादेशे नेत्यर्थज्ञापनेनादोष इत्याशयात् । **अन्ये** तूक्तज्ञापकेन क्वचिदव्यवहारोपीतीत्येव ज्ञाप्यते, लक्ष्यानुसाराच्च व्यवस्था, एवं ह्युत्तरग्रन्थविरोधोपि न, अत एवौङ आप इत्यत्र भाष्ये ङितीत्यत्र यस्मिन्विधिरित्यस्य सञ्चार इत्याहुः । नन्वेवं प्राचीनमतात्किं लाघवमितिचेत्—शृणु, 'प्राचा हि' 'नानुबन्धे'ति 'अनुबन्धकार्ये'ति 'लाश्रयमनुन्धकार्ये'ति 'क्वचिन्निषेधप्रवृत्ति'रिति वा वचनत्रयी ज्ञापनीया, मया तद्द्वयीति । ननु भाष्यस्य शेषपूरणेन व्याख्याने किं मानमत आह—**ध्वनितमिति** । अन्यथाऽऽदेशे तत्कार्यमप्राप्य तत्परिहारयत्नविचारोऽसङ्गतः स्यात् । मम त्वनेकाल्सूत्रे कृतत्वान्नासङ्गतिरिति भावः ।

अचः पर । आदेशग्रहणमनुवर्त्तते, तदनुरोधादच इति स्थानषष्ठी, परस्मिन्नि-त्यादेशविशेषणन्तदाह—**परनिमित्त इत्यादि** । अच एवादेश इत्यर्थः ।

❀ अभिनव-चन्द्रिका ❀

अच एवादेश इति । अच्त्वपर्याप्त्यनुयोगितावच्छेदकधर्मावच्छिन्नानुयोगिताकपर्याप्तिक-स्थानिताक आदेश इत्यर्थः । अच्त्वप्रतियोगिका या पर्याप्तिस्तदीया याऽनुयोगिता तदवच्छे-दकीभूतो यो धर्मस्स एव–स्थानिताप्रतियोगिका या पर्याप्तिस्तदीयानुयोगितावच्छेदकोऽप्यपेक्षित इति यावत् । यथा 'निगाल्यते' 'कथयती'त्यादौ अच्त्वप्रतियोगिकपर्याप्त्यनुयोगितावच्छेदकीभूतो धर्म इकारवृत्तितद्व्यक्तित्वम्–अकारवृत्तितद्व्यक्तित्वञ्च, तदेव, णिलोपीयस्थानितापर्याप्त्यनुयोगितावच्छेदक-मल्लोपीयस्थानितापर्याप्त्यनुयोगितावच्छेदकमिति लक्षणसमन्वयः । यत्तु–अच्त्वव्याप्यधर्मावच्छि-न्नस्थानितानिरूपितादेशताश्रय इति 'अच एव आदेश' इत्यस्यार्थ इति, तन्न । 'निगाल्यते' इत्यादौ णिलोपस्य स्थानिवत्त्वानापत्तेः । अत एवाच इति चरितार्थम् । अन्यथा 'यायावर'इत्यादौ यलोपस्य स्थानिवत्त्वेनैव 'आतो लोप इटि चे'ति आतो लोपानापत्त्या वरे–ग्रहणवैयर्थ्येन,'धिन्विकृण्व्यो-रिति सूत्रे लोपेनैव सिद्धे अकारविधानेन च हलादेशो न स्थानिवदिति कल्पनेन सर्वसामञ्जस्ये तद्वैयर्थ्यं स्पष्टमेव । यत्तु पिस्धातोरिगुपधलक्षणे के तदन्तादाचारक्विपि तदन्तात्कर्तरि क्विपि तस्मादाचारक्विपि, तस्मात् 'स्थेशभास' इति वरचि गुणार्थमतो लोपस्य स्थानिवत्त्वाभावाय वरे इति चरितार्थमिति, तन्न, हलन्तेभ्य आचारक्विपोऽनभिधानात् । यदपि हत इत्यादौ नलोपस्य स्थानिवत्त्वेनैव अतो लोपाप्राप्त्या तत्रातो लोपवारणाय कृतस्यार्द्धधातुके इत्यस्यावृत्त्याऽऽर्द्ध-धातुकोपदेशे यदकारान्तमित्यर्थस्य वैयर्थ्येन 'हलादेशो न स्थानिव'दित्युक्त्यैव सामञ्जस्ये अज्ग्रहण-सामर्थ्यादेव निरुक्तार्थलाभ इति तन्न, राधातोः क्ते तस्माण्णिचि चङि अरीरतदित्यादौ लोपवारणायार्द्धधातुकोदेशकाले यदकारान्तमित्यर्थस्यावश्यकत्वात् । अत एव नाग्लोपीतिसूत्रे प्रत्याहारग्रहणं चरितार्थम्, अन्यथाऽज्झलादेशस्यापि स्थानिवद्भावेनैव ह्रस्ववारणे तद्वैयर्थ्य

❀ चिदस्थिमाला ❀

लभ्यत्वे गौरवादाह—**आदेशेति** । गुणानामिति न्यायेन तदप्राप्तेराह—**तदन्विति** । तद्योगे तस्या एव सम्भवादिति भावः । उक्तहेतोरेव तस्मिन्नितीत्यस्याप्रवृत्त्या सतिसप्तमी, तेन 'सिद्धसाध्ये'ति न्यायेन तस्या ज्ञापकत्वार्थकत्वेन ज्ञापकत्वस्य सम्बन्धं विनाऽनुपपत्त्या विधिशास्त्रकॢप्तनिमित्तत्वमादाय पर्यवसानेन वा निमित्तत्वं फलतीत्याशयेनाह—**परेति** । आदिसञ्ज्ञाद्याजादेश इत्यस्यार्थः । सर्वं वाक्य-मितिन्यायेनाह—**अच एवेति** । एवेनाज्झलादेशव्यावृत्तिस्तत्फलमाह—**तेनेति** । पूर्वसूत्रतो विशेषमाह—

❀ ज्योत्स्ना ❀

भावेन तस्य परिभाषाप्रदीपार्चिषि दूषितत्वादिति दिक् । **अच एवेति** । न त्वज्झलसमुदा-

❀ सदाशिवभट्टीयम् ❀

अचः पर । **अच एवेति** । इदञ्च प्रकृतसूत्रे भाष्ये स्पष्टम् । 'नाग्लोपी'ति सूत्रभाष्यन्त्वेक-

❀ विषमपदविवृतिः ❀

अचःपरस्मिन् । **परनिमित्त इति** । 'परस्मि'न्नित्यस्यौपश्लेषिकसप्तम्यन्तस्याज्विशेषणत्वे तु 'न पदान्ते'ति सूत्रे चर्ग्रहणवैयर्थ्यं, 'जक्षतु'रित्यत्र स्थानिवत्त्वाप्राप्तेः । स्थानिवत्त्वं सिद्ध्यतीत्यु-

❀ वरवर्णिनी ❀

अच एवेति । नन्वत्रा'च एवादेश' इत्यस्य–पर्याप्तिनिवेशपरतया व्याख्याने–एकादेशे स्थानिवद्भावाना-

१. 'सिद्धसाध्यसमभिव्याहारे सिद्धः साध्यायोपयुज्यते' इति हि न्यायः ।

तेन मरुतमाचष्टे मारयतीत्यादौ वृद्धिः । अत्र सूत्रे प्रयोगे योऽच्स्थानिक इत्यर्थः । न तु

ॐ अभिनव-चन्द्रिका ॐ

स्पष्टमेवेति । नच चङ्परनिर्ह्रासे स्थानिवत्त्वस्य प्रतिषिद्धत्वात्प्रत्याहारग्रहणं व्यर्थमितिवाच्यम्, एवं तर्हि—चङ्परनिर्ह्रासे—स्थानिवत्त्वनिषेधस्यैव प्रकृतार्थज्ञापकत्वसम्भवात् । न चापीपटदित्यादौ ह्रस्ववारणाय तन्निषेधसार्थक्यमिति वाच्यं, नाग्लोपीति सूत्रे प्रत्याहारग्रहणकरणेन स्थानिवत्त्वेनैव सर्वत्र दोषवारणात् । 'अवीवद'दित्यादावच्त्वव्याप्यधर्मावच्छिन्नस्थानिताकत्वाभावेन स्थानित्वाप्राप्त्या च 'चङ्परनिर्ह्रास'इत्येतद्वैयर्थ्यस्य स्पष्टत्वात् । वस्तुतस्तु पर्याप्तेरौत्सर्गिकत्वेन निरुक्तार्थलाभे तत्र तत्र ज्ञापकानुसरणं वृथैवेति दिक् ।

प्रयोगे योऽच् तत्स्थानिक इति । अच्त्वपर्याप्त्यनुयोगितावच्छेदकधर्मावच्छिन्नानुयोगिताक-

ॐ **सदाशिवभट्टीयम्** ॐ

देश्युक्तिरिति तत्रैवोद्योते स्पष्टम् । **मारयतीति** । इदुदुपधेभ्यो णिचोऽनभिधानन्तु लुङ्येवेति णौ चङीति सूत्रस्थोद्योतरीत्या इदम् । सामान्येन णिजत्र नेति **प्रदीप**रीत्या तु—भवन्तमाचष्टे भावयतीति बोध्यम् ।

ॐ **वरवर्णिनी** ॐ

पत्तिः,तत्रपूर्वत्वपरत्वोभयत्वावच्छिन्नस्थानिताया व्यासज्यवृत्तित्वेनाच्पर्याप्तत्वाभावादिति चेन्न । 'अच्त्वप्रतियोगिकपर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगिताकपर्याप्तिप्रतियोगिभूतधर्मावच्छिन्नस्थानिताकादेशो न स्थानिव'दित्यर्थस्वीकारेण,—एकादेशस्थले अच्त्वप्रतियोगिकपर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगिताकपर्याप्तिप्रतियोगिभूतपूर्वत्वपरत्वावच्छिन्नैव स्थानितेति-दोषावसरविरहात् ।

एतेन—"श्रायसावित्यत्र नुममाशङ्क्य स्थानिवद्भावेन वारणपरप्रकृतसूत्रभाष्यविरोधात्, 'प्लायते' इत्यत्र—'उपसर्गस्यायता'वित्यस्य—'अयतिपरो य उपसर्गस्तदवयवरेफस्य लत्व'मित्यर्थे स्थानिवद्भावेनोपसर्गस्यायतिपरत्वसम्पादनपरतत्सूत्रभाष्येण च विरोधा—'दच एवादेश' इति शेखरोऽसङ्गतः,—" इत्यपास्तम् । **केचित्तु** "—वर्णग्रहणे जातिग्रहणेन—'तद्वर्णत्वव्याप्यधर्मावच्छिन्नमात्रारब्धसमुदायवृत्तिधर्मे तद्वर्णत्वव्याप्यधर्मप्रतियोगिकपर्याप्त्यनुयोगितावच्छेदकत्वमारोप्यते, एवञ्च—एकादेशीयस्थानिताप्रतियोगिकपर्याप्त्यनुयोगितावच्छेदकसमुदायत्वेऽच्त्वप्रतियोगिकपर्याप्त्यनुयोगितावच्छेदकत्वारोपेण स्थानिवद्भावो निर्बाधः—"इत्याहुः ।

न च ध्वनेरनुकरणादटिच्छब्दाड्डाचि द्वित्वे—'नित्यमाम्रेडिते डाची'तिवार्तिकेन—'डाच्परं यदाम्रेडितं तस्मिन्परे पूर्वपरयोर्वर्णयोः पररूप'मित्यर्थकेन तकाराकारयोः पररूपे 'अटि-अटाकरोती'ति जाते यणि 'अट्यटाकरोती'ति रूपं भवति, तत्रेदानीं यण्न स्यात्, त्वदुक्तार्थेऽत्रापि पररूपस्य स्थानिवद्भावापत्तेरिति वाच्यं, तत्र 'अटि-अटाकरोती'त्यस्यैवेष्टत्वात् । यद्वा अज्मात्रादेश इत्यर्थः, अज्वृत्तिस्थानितानिरूपिता, अजितरवृत्तिस्थानित्वानिरूपिता च याऽऽदेशता तदाश्रयः स्थानिवदिति यावत् । एवञ्च न तत्र तत्र स्थानिवद्भाव इति 'अट्यटाकरोती'त्यत्र न दोषः ।

'अच एवादेश' इत्येवमर्थस्वीकारे प्रमाणन्तु—प्रकृतसूत्रेऽज्ग्रहणमेव, तथाहि—'चेक्रियः' 'लोलुव' इत्यादौ यङ्लुकः स्थानिवत्त्वेनैव गुणनिरासे पुनर्न धातुलोप इति गुणनिषेधविधानमेव ज्ञापयति—'परनिमित्तो हलादेशो न स्थानिव'दिति । एवञ्चा'चः परस्मि'न्नित्यत्राऽज्ग्रहणं व्यर्थं सदेव पर्याप्तिघटितेदृशार्थे मानम् । ईदृशार्थे स्वीकृते तु यङ्लुकोऽज्झलादेशतया स्थानिवद्भावाप्राप्त्या गुणनिषेधाय 'न धातुलोप'इति सफलम् ।

यत्तु'—लोलुव इत्यादौ स्थानिवद्भावादेव गुणाप्राप्तौ 'न धात्वि'ति सूत्रं व्यर्थं सद'च एवादेश' इत्यर्थे ज्ञापकमिति, तन्न । जीवेरदानुप्रत्यये 'जीरदानु'रित्यत्र वलोपे प्राप्तस्य गुणस्य निषेधाय 'न धातुलोप' इत्यस्य चारितार्थ्यात्, वलोपस्य स्थानिवद्भावेन तत्र गुणनिषेधसम्भावना तु न, तस्याच्स्थानिकाऽऽदेशाभावादिति **परे** ।

❀ वरवर्णिनी ❀

केचित्तु-क्ष्मायिर्वनिपि यलोपे-क्ष्मावेत्यत्र, क्नूयेर्विचि यलोपे क्नूरित्यत्र वा गुणनिषेधाय 'न धातुलोप' इति चरितार्थमतो नेदृशार्थे तज्ज्ञापकत्वं सम्भवति, अतो 'न धात्वि'ति सूत्रं–'हलादेशो न स्थानिव'दित्यत्रैव ज्ञापकम्, तथा ज्ञापिते तु प्रकृतसूत्रेऽज्ग्रहणं व्यर्थमिति तदेव पर्याप्तिघटितार्थे ज्ञापकमिति **प्राहुः**।

केचित्तु—काममाख्यत्—अचकामत्, भानुमाख्यत्—अबभानत्, वारि आख्यत्–अववारत्, राममाख्यत्—अररामदित्यादौ—णौ लुप्तस्याऽकारादेः स्थानिवद्भावादेव 'णौ चङी'ति ह्रस्वाप्राप्तौ 'नाग्लोपी'ति सूत्रेऽग्लोपिग्रहणं व्यर्थं सद'च एवादेश' इत्यर्थे ज्ञापकं, ज्ञापिते तु–राजानमाख्यत्—अरराजदित्यत्राज्झलादेशस्य स्थानिवत्त्वाप्राप्तौ तत्र ह्रस्वनिषेधार्थमग्ग्रहणं चरितार्थमित्याहुः,—तन्न। तितउशब्दादाचक्षाणण्यन्ताल्लुङि टिलोपे, वृद्धौ, पुकि, चङ्णिलोपादिषु च—अततापदित्यत्र ह्रस्वाभावायाग्ग्रहणस्य चारितार्थ्येन तस्य ज्ञापकत्वासम्भवात्। अत्र हि–स्थानिभूतादुकारात्पूर्वत्वेन दीर्घाकारस्याऽदृष्टत्वात्स्थानिवद्भावप्राप्तिरेव नेति। एवं 'देव ऋ'शब्दाण्णिचि 'अत उपधाया'इति वृद्धौ टिलोपेन ऋकारलोपे लुङि अदिदेवदित्यत्रापि 'नाग्लोपी'त्यस्य सार्थक्यं द्रष्टव्यम्। किञ्च राश्च मश्चेति द्वन्द्वनिष्पन्नरामशब्दाण्णिचि लुङि—अररामदित्यत्र ह्रस्वनिषेधार्थमग्ग्रहणं चरितार्थं, स्थानिवद्भावेन तु न निर्वाहः, पदान्तविधित्वेन ह्रस्वे कर्त्तव्ये 'न पदान्ते'ति निषेधादिति **जटाजूटे–श्रीबालशास्त्रिचरणाः। अन्ये तु**–'धिन्विकृण्व्यो'रिति सूत्रेण लोपे विधातव्ये अकारविधानमेव हलादेशो न स्थानिवदित्यत्र ज्ञापकम्, अकारविधानं हि तत्र गुणाभावाय, हलादेशस्यापि स्थानिवद्भावे तु लोपविधानेऽपि तस्य स्थानिवत्त्वाद्गुणाभावे सिद्धेऽकारविधानं व्यर्थं स्यादिति। 'हलादेशो न स्थानिव'दिति ज्ञापिते च प्रकृतसूत्रेऽज्ग्रहणं व्यर्थमिति तत्सामर्थ्याद'च एवादेश' इत्यर्थो लभ्यते'—इत्याहुः।

वाचालास्तु ''—'ठाजादावूर्ध्वं'मित्यत्राज्ग्रहण'मच एवादेशो न स्थानिव'दित्यत्र ज्ञापकं, तद्धि 'षडिक'इत्यादौ षडङ्गुलिदत्तशब्दघटक'ङ्गुलिदत्त'मात्रलोपेऽकारस्य 'यस्येति चे'ति लोपे तस्य स्थानिवत्त्वादकारान्ते भत्वेपि षकारान्ते पदत्वेन जश्त्वसम्पत्तये। अज्झलादेशस्य स्थानिवत्त्वे तु—अङ्गुलिदत्तलोपेऽपि स्थानिवत्त्वाज्जश्त्वसिद्धौ तद्व्यर्थमेव–''इत्याहुः। अत्रत्यं तत्त्वमस्म**त्पितामह**चरणविरचितायां **लघुशब्देन्दुशेखरत्रिपुरसुन्दर्यां, श्रीबालशास्त्रिकृते बृहज्जटाजूटे,** मत्कृतशब्देन्दुशेखरा**भिनवराजलक्ष्म्याञ्च** निरूपितन्तत एवावधारणीयमिति **सङ्क्षेपः**।

नन्व'च एवादेशो न स्थानिव'दित्यर्थस्य 'मरुतमाचष्ट मारयती'ति फलं न सम्भवति, इदुदुपधेभ्यो णिचोऽनभिधानेनेदृशरूपस्यैवासम्भवात्। तत्र णिजनभिधाने मानन्तु''–'नाग्लोपी'तिसूत्रेऽगिति प्रत्याहारग्रहणा'द्वृद्धेर्लोपो बलीया'निति ज्ञाप्यते'' इति भाष्यमेव। [इकारोकारान्तवारिभान्वादिशब्दाण्णिचि हि–परत्वादचो ञ्णितीति वृद्धावैकारौकारयोरेव लोपेनाऽग्लोपाभाव एव, अकारान्तादृकारान्ताल्लृकारान्ताच्च णिचि परत्वाद्वृद्धौ टिलोपेऽकारलोप एव, एवञ्चाकारमात्रलोपे एव निषेधप्रवृत्त्याऽगिति प्रत्याहारग्रहणं व्यर्थमेवेति 'वृद्धेर्लोपो बलीया'नित्यत्रार्थे ज्ञापकं भवति। ज्ञापिते तु भान्वादिशब्देभ्य आचक्षाणणिचि उकारादिलोपेनागिति प्रत्याहाराश्रयणं सफलमेवेति भाष्याशयः]। यदि मरुदादिशब्देभ्य इदुदुपधेभ्योऽपि णिच्स्यात्तदा तत्र गुणवृद्ध्यादेरभावेनागिति प्रत्याहाराश्रयणे निषेधः, अकारमात्रोक्तौ तु न निषेध इति फलभेदाद्भाष्योक्ता 'वृद्धेर्लोप'इत्येतज्ज्ञापकता भज्येतेति [तदेवं–मरुतमाचष्टे–मारयतीत्यादि लक्ष्याभाव इति]।

'उक्तभाष्यप्रामाण्यात्तादृशणिजन्ताल्लुङ एवाभावः कल्प्यते न णिजभाव, इति तु न युक्तं, लुङ्विधायकनानाशास्त्रेषु तादृशसङ्कोचापेक्षया 'प्रतिपादकाद्धात्वर्थे' इति णिज्विधायके एव सङ्कोचकल्पने लाघवात्। न च सामान्यत इदुदुपधेभ्यो णिचोऽनभिधाने—'स्रग्विणमाचष्टे–स्रजयती'ति भाष्योक्तिविरोधस्तस्येदुपधतया णिचोऽसम्भवादिति वाच्यं, विनो लुकि 'अङ्गवृत्ते पुनर्वृत्तावविधि'रिति परिभाषया वृद्धेरप्राप्त्या लुङि–ह्रस्वे तदभावे वा विशेषाभावेन तत्र णिजनभिधानकल्पनस्य निष्फलतया दोषाभावादिति

सूत्रे स्थानित्वेनोपात्तात्स्थानिक इत्यर्थस्तेन गिलेपादेरनेन स्थानिवत्त्वं सिद्ध्यति। अत एव चङ्परनिर्ह्रासे ण्यन्ताण्णिचि—'अवीवद'दित्यादिसिद्ध्यर्थो निषेधः सार्थकः। अच इति किम्? आगत्य। मलोपस्य स्थानिवत्त्वात् 'ह्रस्वस्ये'ति तुग्न स्यात्।

❀ अभिनव-चन्द्रिका ❀

पर्याप्तिकस्थानिताक इत्यर्थः। **न तु सूत्रे स्थानित्वेनोपात्ताजिति**। अच्त्वव्याप्यधर्मावच्छिन्नस्थानिताक इत्यर्थो नेत्यर्थः। **आगत्येति**। नच सूत्र आदेशपदश्रवणात्स्थानिभूतादचः पूर्वत्वेन दृष्टस्याऽऽदेशविधौ स्थानिवदित्यर्थ इति वाच्यं, 'बेभिदि ब्राह्मणकुलानी'त्यादौ नुमापत्तेः।

❀ चिदस्थिमाला ❀

अत्रेति। ननु तथार्थस्योक्तफलसत्त्वेऽपि तत्रैव किं मानमत आह—**अत एवेति**। उक्तार्थाङ्गीकारादेवेत्यर्थः। निर्ह्रासे कर्त्तव्ये एकस्य णिचो निमित्तत्वादाह—**ण्यन्तादिति**। **निषेध इति**। **मलोपस्येति**।

❀ ज्योत्स्ना ❀

यस्येत्यर्थः। **णिलोपादेरिति**। 'णेरनिटी'ति सूत्रे। णेरज्रूपेणानुपादानादिति भावः। 'अनेन

❀ वरवर्णिनी ❀

चेदत्र **के चित्**—'मरच्छब्दादाचक्षाणणिजन्ताल्लटि मारयतीत्यादौ फलं बोध्यं, मूले 'मरतमाचष्टे'इत्येव पाठ्य'मित्याहुः। **अन्ये तु**—'यश आचष्टे याशयति, भवन्तमाचष्टे भावयतीत्यादौ वृद्धिरिति फलं, मूलन्तु तदुपलक्षण'मित्याहुः। अथ 'वृत्रहणमाचष्टे वृत्रहयती'ति भाष्योदाहरणे वृद्धेरकरणेन, 'दूरमाचष्टे दवयती'त्यादौ भाष्यकृता वृद्ध्यकरणाच्च—'प्रातिपदिकप्रकृतिकणिजिनिमित्तककार्यप्रयोज्योपधात्ववतोऽत उपधाया इति वृद्धिर्ने'ति कल्पनान्मारयतीत्यादौ वृद्धिरसाधुरेव, ऊरुं—वरयति, स्रग्विणं—स्रजयति 'अल्पं—कनयतीत्यादौ सञ्ज्ञापूर्वकविधित्वादनित्यतया न वृद्धिरिति **दीक्षितोक्तम्**, 'अङ्गवृत्तपरिभाषया न वृद्धि'रिति कैयटोक्तमपि उपायस्योपायान्तरादूषकत्वान्नास्माकं मते विरुणद्धीति चेत्—'मृ'शब्दस्योच्छब्देन समासे यणि 'म्रुच्छब्दाण्णिचि—म्रुतमाचष्टे मारयतीत्यादावचोञ्णिती'ति वृद्धेः फलत्वेनादोषात्। मूलेऽपि 'म्रुतमाचष्टे'इत्येव पाठः, 'मरुतमाचष्टे'इति तु—लेखकप्रमादादिति—**जटाजूटे** स्पष्टम्।

मैथिलास्तु—ऋच्छतीति ऋट्, ततः पूर्वं बहुचि—बहु-ऋडित्यत्र 'ऋत्यक' इति प्रकृतिभावे आचक्षाणणिचि टिलोपे वृद्धौ 'बाहयती'त्यत्रा'चोञ्णिती'ति वृद्धिः फल'मच एवादेश'इत्यर्थस्येति प्राहुरिति सङ्क्षेपः। विस्तरस्त्व**भिनवराजलक्ष्म्या**मनुसन्धेयः।

पर्वतीयास्तु—'णिजिनिमित्तककार्यप्रयोज्ये'त्यादिनैव वृद्धिनिषेधे सिद्धेऽलोपस्य स्थानिवत्त्वेन वृद्धिवारणपरभाष्यासङ्गत्या 'णिजिनिमित्ते'तिवचने कार्यपदेन लोपेतरकार्यग्रहणमिति—मरुतमाचष्टे मारयति, मरमेतीति मरेत्, तमाचष्टे वा मारयतीत्यत्र न दोष इत्याहुः। तन्न रोचयामहे, कथयतीत्यत्राल्लोपस्य स्थानिवत्त्वेन वृद्धिवारणपरभाष्यस्योपायान्तरमात्रपरत्वेन तद्बलेन तथाकल्पने मानाभावात्। विपरीतं 'स्रजयति''वृक्षवयति''वृत्रहयती'त्यादौ तथाकल्पने वृद्ध्यापत्तेः। तद्वारणाय नानाक्लेशकल्पनायान्तु—'तदिदं महतो वंशस्तम्बाल्लट्वानुकर्षण'मित्याभाणकविषयापत्तिर्दुरुद्धरा। तस्मान्म्रुतमाचष्टे मारयतीत्यत्राचो ञ्णितीति वृद्धिरेव 'अच एवादेश' इत्यर्थाश्रयणस्य—फलं **श्रीबालशास्त्रि**चरणोक्तं निर्दुष्टमाश्रयणीयमिति **गौडाः**।

मैथिलास्तु—'वृद्धेर्लोपो बलीया'निति भाष्योक्तं('नाग्लोपी'त्यत्र प्रत्याहारग्रहणज्ञापितं)नापूर्व-वचनं, किन्तु लोपस्य नित्यत्वमूलकमेव बलवत्त्वमनेन बोध्यते,(न तु लोपस्य परिभाषिकं बलवत्त्वं भाष्याभिप्रेतं) तदेवं 'वृत्रहयती'त्यादौ कृताकृतप्रसङ्गित्वमात्रेण वृद्धिलोपयोरुभयोरपि नित्यतया समबलतया परत्वाद्वृद्धौ टिलोपे लक्ष्ये लक्षणन्यायेन पुनर्वृद्ध्यप्राप्त्या न दोष इति। मरुतं मरातं वाचष्टे इत्यादौ तु पूर्वं वृद्धेरप्राप्त्या नित्यत्वाल्लोपे कृते पश्चाद्वृद्धौ रूपसिद्धिरप्रत्यूहैव, अत एव श्रीशब्दादणि श्रायमित्यत्र यस्येतिलोपात्परत्वादादिवृद्धिरेव। 'वृद्धे'रिति वचनस्य नित्यत्वमूलकत्वेपि तत्र ज्ञापकोपन्यासस्तु भाष्ये—क्वचित्कृताकृतप्रसङ्गित्वेऽप्यनित्यतेति स्वीकारमात्रेणेति **प्राहुः**।

परस्मिन्निति किम् ? युवजानिः । निङः स्थानिवत्त्वेन यलोपो न स्यादिति ।
पूर्वविधाविति किम् ? नैधेयः। निपूर्वाद्धाञः क्विप्रत्यये आतो लोपे तस्य स्थानिवद्भावाद्यच्त्वव्यपदेशविरोधात्स्वाश्रयद्यच्त्वनिवृत्तौ ढगनापत्तेरिति दिक् । अत्र स्थानिनि

❀ अभिनव-चन्द्रिका ❀

अच एवादेश इत्यर्थे प्रमाणमाह—**अत एवेति** । **युवजानिरिति** । नच निङादेशे स्थानिवद्भावेनाऽऽकारबुद्धावपि नकारे वत्वानपायाल्लोपो निर्बाधः । किञ्च 'जायाया यो नि'रितिन्यासेनादोषः, जायाशब्दघटकयाशब्दस्य निरित्यादेशः स्यादित्यर्थेन न्यादेशस्याच्पर्याप्तस्थानिताकत्वाभावादिति वाच्यम्, वैयाघ्रपद्य इत्यादौ पदादेशप्रतिबन्धार्थं लोपस्य स्थानिवत्त्वापत्तेरिति दिक् ।

द्यच्त्वव्यपदेशविरोधादिति । सङ्ख्यात्वव्याप्यकिञ्चिद्धर्मप्रकारकनिश्चयस्य सङ्ख्यात्वव्याप्यधर्मान्तरप्रकारकसंशयसामान्यप्रतिबन्धकत्वादित्यर्थः । **यन्न भवतीति** । स्यादेतत् । देवयतेः क्विपि दयूरित्यादौ स्थानिनि वकारे सति अभवतोऽप्यादेशस्य लोपादेशेऽप्यभावापत्तिः । नचादेशे

❀ चिदस्थिमाला ❀

'वा ल्यपीती'त्यादिः । स्वाश्रयनिवृत्तेरप्यत्रेष्टत्वादिति भावः । ननु'युवजानि'रित्यत्र न फलं, यलोपे निषेधात्, प्रकारान्तरेण भाष्ये दूषितत्वाच्च, अत आह—**वैयाघ्रेति** । व्याघ्रस्येव पादावस्येति बहुव्रीहौ 'पादस्य लोप' इति लोपे गर्गादित्वाद्यञि 'पादः पदि'ति पद्भावे 'न य्वाभ्या'मित्यैच् । अत्र तस्य स्थानिवत्वात्पद्भावो न स्यात्। इदमेवाग्रे आदिसङ्ग्राह्यम् । **द्यच्त्वेति** । गौणी मुख्या वेतिभाष्योक्तेर्न हि त्रिपुत्रो द्विपुत्रं व्यपदेशं लभते इति भावः । **ढगिति** । 'इतश्चानिञ' इतीत्यादिः । 'अनापत्ति'रिति पाठः । 'अनापत्ते'रिति पाठे—प्राग्वद्योज्यम् । नन्वेवमपि विधिग्रहणं व्यर्थं, पूर्वस्येत्युक्त्यैव कार्यं इत्यस्याक्षेपेण निर्वाहादिति चेन्न, पञ्चमीसमासार्थं, वक्ष्यमाणफलद्वयार्थं च तदावश्यकत्वात्, तदाह—**दिगिति** । अत्र=प्रकृतसूत्रे । अतिदेशेऽन्वयः ।

ननु यलोपादिग्रहणाज्ज्ञापकाद्यथेष्टं वाक्यशेषाध्याहारेण स्थानिसम्बन्धिभावाभावोभयातिदेशाङ्गीकारेऽपि कथमादेशप्रयुक्तवारणमत आह—**स्थानीति** । अजादेशोऽज्वत्कार्यं लभते न, लभते चेति वाच्यार्थः ।

❀ सदाशिवभट्टीयम् ❀

यलोपो न स्यादिति । यलोपे निषेधस्तु लोपाजादेश एवेति बोध्यम् ।

❀ विषमपदविवृतिः ❀

तरम् । अत एव 'चङ्परनिर्ह्रासे' इति पाठः । अग्रिमदेशेऽस्य पाठस्त्वसङ्गतः । **यलोपो न स्यादिति** । 'यलोपे न स्थानिव'दिति निषेधस्तु न, 'स्वरदीर्घयलोपेषु लोपाजादेश एव न स्थानिव'-

❀ वरवर्णिनी ❀

केचित्तु ''—'जायाया जानि'रिति न्यस्यन्ति, तन्न । जायाशब्दादाचक्षाणण्यन्तात्क्विपि टिलोपणिलोप-यलोपेषु निष्पन्नस्य 'जा' शब्दस्य सुन्दरीशब्देन बहुव्रीहिसमासे 'एकदेशविकृत'न्यायेन तस्य जायाशब्दतया निङादेशे 'सुन्दरीञि'रिति, जान्यादेशे 'सुन्दरीजानि'रिति फलभेदेन तथा न्यासस्य कर्तुमशक्यत्वात् । यद्यपि णिलोपस्य स्थानिवद्भावेन जायान्तोत्तरपदकबहुव्रीह्यभावेन तत्र निङादेशः सिद्धान्तेऽपि नेष्यत इति न फलभेदस्तथापि तथा निष्पन्न'जा'शब्दस्य ईशब्देन समासे गुणे एकादेशस्य पूर्वान्तवद्भावेन 'जे' शब्देऽपि जायाशब्दत्वेन ततो बहुव्रीहौ स्थानिभूतणिजिकारात्पूर्वत्वेन दृष्टस्य विधेरभावेन स्थानिवद्भावविरहेण फलभेदस्य तादृशन्यासे दुरुद्धरत्वा''-दिति वदन्ति । **परे**'त्वर्धविकारेऽक्तपरिमाणे च 'एकदेशविकृत'न्यायप्रवृत्तेर्दुर्वचतया तादृशस्थले जायाशब्दत्वस्यैवाभावात्फलभेदविरहेण तथान्यासे न दोष इति वैयाघ्रपद्योऽस्य प्रत्युदाहरण'मित्याहुः। **केचित्तु**—'हरिणे'त्यत्र नादेशस्य 'स्थानिवद्भावेन यणापत्तिरिति परस्मिन्निती'त्याहुः, 'सन्धिकार्ये सन्निपातपरिभाषाऽनित्या, 'तेने'त्यादिनिर्देशा'दिति तेषामाशयो बोध्यः । तेन तया परिभाषया 'हरिणे'त्यादौ न यणादिरिति वदन्तः समाहिताः—इति **गौडाः** ।

सति यद्भवति तदादेशेऽपि भवति, स्थानिनि यन्न भवति तदादेशेऽपि नेति भावाभावयोरुभयोरप्यतिदेशः। तत्र भावोदाहरणं—निगाल्यते इति। अन्त्योदाहरणं पटयतीत्यादि। स्थानिनिमित्तकं भवत्यादेशनिमित्तकं नेति च तदर्थः। लघूपधत्वसम्पादनद्वारा लोपनिमित्तिका वृद्धिरित्याहुः।

स्थानिभूतादच इति। सूत्रे श्रवणाद्व्याख्यानाच्च तस्यैव पूर्वत्वेऽवधित्वमिति भावः। 'पूर्वविधा'वित्यस्य—पूर्वसम्बन्धिन्येव शास्त्रविधेये कर्त्तव्ये इत्यर्थः, तेन पूर्वपरयो-

---

❀ अभिनव-चन्द्रिका ❀

स्थानिवृत्तिधर्मसम्भावनायां यद्भवति तद्भवति यन्न भवती तन्न भवतीत्यर्थेन न दोषः, अत एव प्रकृतसूत्रस्थं 'परस्मिन्निति किं? युवजानिः, नैतदस्ति प्रयोजनं, न्यादेशघटकं नकारमादाय लोपो भविष्यति' इति भाष्यं सङ्गच्छते इति वाच्यम्, 'एषो गमयती'त्यादावेतत्तदोरिति सुलोपापत्तेरिति चेन्नैवम्। 'स्थानी न निवृत्त आदेशो न जात इति सम्भावनायां यद्भवति, तद्भवति, यन्न भवति तन्न भवती'त्यर्थेनादोषात्।

परेतु—आदेशे स्थानिवृत्तिधर्मसम्भावनायां यद्भवति, तद्भवति, यन्न भवति तन्न भवति इत्येवार्थः। अत एव परस्मिन्निति किं युवजानिरित्येतत्फलखण्डनपरभाष्यं सङ्गच्छते। नच 'एषो गमयती'त्यादौ सुलोपापत्तिरिति वाच्यम्, इष्टत्वात्। अत एव 'एष यूनः पश्ये'त्यादौ 'न सम्प्रसारणे' इति सूत्रसत्त्वे 'सम्प्रसारणादसम्प्रसारणे' इति कल्पे च न फलभेदः। नचेयायेत्यादौ स्थानिवद्भावेनेयङ् स्यादिति शङ्काया असङ्गतिरिति वाच्यम्, युक्तिबलाद्वस्तुसिद्धौ कस्य चिद्ग्रन्थकृतो विपरीतलेखनस्याबाधकत्वेनेष्टापत्तेरित्याहुः।

❀ चिदस्थिमाला ❀

चस्त्वर्थे। नन्वेवं कथमन्त्ये निर्वाहः, वृद्धेर्लोपानिमित्तकत्वादत आह—**लघूपधत्वेति**। ह्रस्वाकारोपधत्वेत्यर्थः। ननु परस्मिन्नित्यस्यापि सूत्रे श्रवणमत आह—**व्याख्येति**। 'किरतौ लवने' इत्यादिनिर्देशमूलकादित्यर्थः। अन्यथा गुणनिमित्तकल्युडपेक्षया पूर्वस्य गुणस्य स्थानिवत्त्वादवादेशो न स्यादिति भावः। पूर्वत्वमुपलक्षणं, न तु विशेषणमिति तात्पर्यम्। विधिग्रहणफलमाह—**पूर्वेति**। सम्बन्धसामान्ये षष्ठी, 'गुणाना'मिति न्यायेन तदप्रवृत्तेः, अत एव 'श्रायसा'वित्यत्र नुम्न, 'एकदेशे'ति न्यायेन

❀ ज्योत्स्ना ❀

स्थानिवत्त्वं सिध्यती'त्येतदनन्तरम्—'अत एव चङ्परनिर्ह्रासे ण्यन्ताण्णिचि अवीवददित्यादि सिद्ध्यर्थो निषेधः सार्थक' इति,—ततो'ऽच इति किम्? आगत्य मलोपस्य स्थानिवत्त्वाद्ध्रस्वस्येति तुङ् न स्या'दिति पाठः। 'तुङ्न स्या'दित्यस्यानन्तरम्—'अत एवे'त्यादिपाठस्तु अशुद्धः, सङ्गत्यभावादिति **शेषश्रीशिवरामपण्डिताः**। वयन्तु कल्पयामः—'अन्त्योदाहरणं पटयतीत्यादी'त्युत्तरग्रन्थानन्तरम'त एवे'त्यादिः 'सार्थका'न्तः पाठो, बृहच्छेखरे तथा दर्शना'दिति। **लघूपधत्वसम्पादनद्वारेति**। अत्र लघूपधशब्दोऽदुपधपरः, वृद्धेर्लघूपधनिमित्तकत्वाभावादित्याहुः। **तस्यैवेति**। अच इत्यर्थः।

❀ विषमपदविवृतिः ❀

दित्युक्तेः। **निगाल्यत इति**। इदं 'वव्रश्चे'त्यादेरुपलक्षणम्। 'पूर्वविधा'वित्यत्र 'षष्ठी स्थानेयोगे'ति न प्रवर्तते, षष्ठ्या अश्रवणात्। अत एव 'अचः किमागत्ये'ति भाष्यं सङ्गच्छते। सवर्ण-

विधौ न । तेनाऽऽरतुरित्यादौ 'ऋच्छत्यृता'मिति गुणस्य सवर्णदीर्घे न स्थानिवत्त्वम् । वस्तुतोऽत्र पूर्वविधिशब्दे तन्त्रम् । एकस्योक्तोर्थः । द्वितीये भावे किः । सम्बन्धसामान्यषष्ठयन्तपूर्वशब्देन समासः । विधिर्भावः, पूर्वसम्बन्धिभावे=तत्स्थितौ स्थानिवदित्यर्थः । अत एवैनेय इत्यादौ 'यस्येति चे' ति लोपे तस्य स्थानिवत्त्वात्सन्नियोगशिष्टन्यायप्राप्तनिवृत्तिप्रतिबन्धेन नकारस्थितिः । अत एव नपदान्तसूत्रे पञ्चेन्द्राण्यो देवता

❀ अभिनव-चन्द्रिका ❀

आरतुरित्यादाविति । ननु पूर्वस्यैव विधावित्यर्थेऽपि प्रकृते न दोषः । तथाहि—ऋ अतुस् इत्यस्यां दशायां द्वित्वं बाधित्वा पूर्वं गुणे पश्चाद्द्वित्वे स्थानिभूतादचः पूर्वत्वेन दृष्टत्वाभावेन स्थानिवत्त्वाप्राप्तेः । नच 'द्विर्वचनेऽची'ति निषेधात्कथं द्वित्वात्पूर्वं गुणप्रवृत्तिरिति वाच्यम्, द्वित्वनिमित्ततापर्याप्त्यधिकरणीभूतसमुदायघटकाच्पर्याप्तनिमित्तताकत्वस्य गुणेऽभावेन 'द्विर्वचनेऽची'ति निषेधस्याप्राप्तेः । नच चिकीर्षामीत्यादौ चिकीर्ष—अ—मि इति स्थिते वार्णपरिभाषया दीर्घे पूर्वस्यैव विधावित्यर्थाभावे 'अतो गुणे' इतिपररूपापत्तिरिति वाच्यम्, 'नहि रजतत्वभ्रमप्रयुक्ता प्रवृत्तिः शुक्तिं न गोचरयती'ति न्यायेन पररूपेऽपि आकारस्यैव जायमानत्वादिति चेन्मैवम्, अन्धातोर्विचि पट्टशब्देन समासे तस्माच्छसि पट्वन इत्यादौ 'अचः परस्मिन्नि'ति स्थानिवद्भावेन संयोगसञ्ज्ञाया अभावेन 'न संयोगाद्वमन्तादि'ति निषेधानापत्तेः । 'पूर्वस्यैव विधा'वित्युक्तौ तु न दोषः । 'पूर्वस्यैव विधा'-वित्यस्य हि—पूर्वत्वपर्याप्त्यनुयोगितावच्छेदकधर्मावच्छिन्नानुयोगिताकपर्याप्तिकोद्देश्यताके विधावित्यर्थेन संयोगसञ्ज्ञायाः पूर्वपरोभयोद्देश्यकत्वादिति दिक् ।

❀ चिदस्थिमाला ❀

सान्तस्य सुब्निरूपिताङ्गत्वात् । कर्मणि किप्रत्यय इति भावः । तस्यैव फलान्तरमाह—**वस्तुत इति । तन्त्रमिति** । बोद्धुः श्रोतुश्च शब्दतन्त्रमित्यर्थः । विधाननिरासायाह—**भाव इति** । भाव इत्यन्तार्थमाह—**तदिति** । अस्य फलमाह—**तदिति** । द्वितीयार्थाङ्गीकारादेवेत्यर्थः । एवमग्रेऽपि । पञ्चम्यन्तार्थः प्रतिबन्धेऽन्वेति । उक्तार्थे सफले मानमाह—**अत एवेति । पञ्चेन्द्र इतीति** । अन्यथा 'सास्य देवते'-त्यणो 'द्विगोर्लुगनपत्ये' इति लुकि'लुक्तद्धिते'ति ङीषो लुकि तस्य स्थानिवत्त्वेन तथाप्राप्तनिवृत्तिप्रति-

❀ सदाशिवभट्टीयम् ❀

दीर्घे न स्थानिवत्त्वमिति । दीर्घविधौ निषेधस्तु लोपाजादेश एवेति भावः । **पूर्वविधिशब्द इति** । सूत्रघटकविधिशब्द इत्यर्थः । **सम्बन्धसामान्येति** । कर्मप्रत्ययान्तस्य तेनैव तत्सम्भवात् । कर्तृषष्ठ्यन्तेन तदभ्युपगमे तु पूर्वस्य व्यावृत्तिप्रसङ्गः। कर्मषष्ठ्या तु न तत्सम्भवः। भावम्प्रतीति तद्विवरणेनाकर्मकत्वात् । षष्ठीस्थाने इत्यस्य तु न प्रवृत्तिः, एकार्थीभावापन्नत्वात्, 'षष्ठ्यन्तस्य गुणाना'मिति न्यायाच्चेति भावः ।

❀ विषमपदविवृतिः ❀

दीर्घ इति । इदं प्रयोजनमन्यथासिद्धम्, 'अभ्यासकार्यप्रतिबन्धकस्तदुत्तरखण्डस्याजादेशः स्थानिवद्भावो ने'त्यनेन सिद्धेः । उक्तार्थफलं तु'श्लेष्म३घ्ने'त्यत्र संयोगसञ्ज्ञायां स्थानिवत्त्वाभावः । नकारस्थितिरिति । वस्तुतस्तु धर्मिग्राहकमानात्सन्नियोगशिष्टन्यायो लुग्विषय इति नात्र दोष

१. 'वस्तुतस्तु'इत्यस्य 'किञ्चे'त्यर्थः, ननु पूर्वोक्तेऽरुचिरिति **परे** ।

अस्य पञ्चेन्द्र इति लुकि न स्थानिवदित्यस्योदाहरणं दत्तं भाष्ये। अन्यथा तत्र पूर्वत्वेन दृष्टस्य सम्बन्धिनः कस्य चिद्विधेयस्याभावात्स्थानिवत्त्वाप्राप्तिरेवेति तदसङ्गतिःस्पष्टैव।

प्रकृतसूत्रेऽपि भाष्ये 'कर्मसाधनस्य विधिशब्दस्योपादाने न सर्वमिष्टं सङ्गृहीतमिति भावसाधनो विज्ञास्यते, पूर्वस्य—विधानं प्रति=पूर्वस्य भावं प्रति—स्थानिव'दित्युक्तम्।

तत्र 'भावसाधन' इत्यस्य—सोऽपीत्यर्थः। पूर्वत्वञ्च—व्यवहिताऽव्यवहितसाधारणम्,

❀ अभिनव-चन्द्रिका ❀

सोऽपीत्यर्थ इति। वस्तुतस्तु स्थानिभूतादचः पूर्वत्वेन दृष्टस्य विधौ=स्थितौ कर्तव्यायामित्यर्थास्वीकारेऽपि न क्षतिः, नच 'लुकि न स्थानिवत्' पञ्चेन्द्राण्यो देवता अस्य पञ्चेन्द्रः' इति भाष्यासङ्गतिः, स्थानिभूतादचः पूर्वत्वेन दृष्टस्याऽऽनुकः कस्यापि विधेरभावात्, किञ्च ऐनेयः, श्यैनेय इत्यादौ स्थानिभूतादचः पूर्वत्वेन दृष्टस्य नकारस्य कस्यापि विधेरभावेन स्थानिवत्त्वाप्रवृत्त्या तन्निवृत्त्यापत्तिरिति वाच्यं, स्थानिभूतादचः पूर्वत्वेन दृष्टयोरानुग्नकारयोः 'सन्नियोगशिष्टानामन्यतरापाये' इति न्यायेन लोपे कर्तव्ये तत्प्रतिषेधार्थं स्थानिवद्भावप्रवृत्तेः सूपपादत्वात्। अत एव 'कर्मसाधनस्य विधिशब्दस्योपादानेन सर्वमिष्टं सङ्गृहीतमिति भावसाधनो विज्ञास्यते' इति भाष्ये—अपिशब्दो न श्रूयत इति बोध्यम्।

❀ चिदस्थिमाला ❀

बन्धेन तत्सन्नियुक्त आनुक् श्रूयतेति भावः। **लुकि नेति**। 'क्लिु'गिति वार्तिकव्याख्यावसरे इति भावः। अन्यथा=उक्तार्थानङ्गीकारे। तत्र='पञ्चेन्द्र'इत्यत्र। स्पष्टङ्गमकान्तरमाह—**प्रकृतेति**। 'उक्त'मित्यत्रान्वयः। आदेशस्यावधित्वेन सम्बन्धपक्षे स्वविधौ स्थानिवद्भावप्रयोजनानामायनादीनां साधनार्थमिदमुक्तं, तत्र न निषेधे एवं सति एवकारघटितयथाश्रुतकैयटासाङ्गत्यं ध्वनयन्प्रागुक्ते न्यूनतया प्राप्तभाष्यविरोधं परिहरति—**तत्रेति**। भाष्ये इत्यर्थः। एतेन प्रथमार्थमात्रप्रतिपादक**रत्नाकरादि**ग्रन्थाः परास्ताः।

❀ ज्योत्स्ना ❀

सोऽपीत्यर्थ इति। 'अपरविधाविति वक्तव्य'मिति वार्तिकस्य—स्वविधावपि स्थानिवद्भावफलकस्य—प्रत्याख्यानाय भावसाधनविधिशब्देन कर्मषष्ठ्या समासं व्याख्याय आयन्नासांन्नत्यादाविणस्त्योर्यण्लोपयोः कृतयोर्धिन्वन्तीत्यादौ विकरणोकारस्य यणि च कृते क्रमादाड्भविष्यति, इण्न भविष्यतीति भाष्यकृतोपसंहृतं, न तु सम्बन्धसामान्यषष्ठ्यन्तेनापि, तादृशानामनुपक्रमात्, सम्बन्धसामान्यषष्ठ्या स्थानेयोगत्वस्य स्वमतेऽनुवादेऽपि प्रवृत्त्यङ्गीकारेण तस्य दुर्वारत्वाच्चेति चिन्त्यमेतत्। ऐनेयः, पञ्चेन्द्र इत्यादौ तु न दोषः, अकृतव्यूहपरिभाषया नकाराऽऽनुकोर्निवृत्त्या तयोः कर्त्तव्ययोः स्थानिवद्भावप्रवृत्तेः सुसङ्गतत्वादित्याहुः।

❀ सदाशिवभट्टीयम् ❀

कस्य चिद्विधेयस्याभावादिति। न च यस्येति लोपस्तथा, स्पष्टश्चेदं तत्रैव प्रदीपोद्योतयोरिति वाच्यं, वार्तिकमते कतीत्यादौ स्थानिवत्त्वेन प्राप्तगुणादिवारणाय नलुमतेति सूत्रे बाध्यसामान्यचिन्तावश्यम्भावेनाचः परस्मिन्नित्यस्यापि निषेधात्। आनुकि तु न सः, प्रत्यये परतः पूर्वकार्याभावात्। वार्तिकोदाहरणस्य तद्रीत्यैव दातव्यत्वात्। नियमत्वमिति भाष्यमतेपि निषेधमुखेन प्रवृत्तिरिति पक्षे तस्या आवश्यकत्वाच्च, विधिमुखेन प्रवृत्तिरिति पक्षेपि श्रविष्ठादिपरित्यागेनानुक्पर्यन्तं धावतो भगवत आनुक एवाभिप्रायविषयत्वात्। एवं स्थिते चिन्त्यमिति ब्रुवन्तोऽमान्याः। इत एवारुचेराह—**प्रकृतसूत्रेपीति**। **सोपीति**। ननु कर्तृषष्ठ्यन्तपूर्वशब्देन भावार्थकविधिशब्देन समासे

❀ विषमपदविवृतिः ❀

इति तत्रावैयर्थ्यम्। **विधेयस्याभावादिति**। इदं चिन्त्यं-'यस्ये'ति लोपस्य विधेयस्य सत्त्वात्। **भावसाधन इति**। इदं भाष्यमेकदेश्युक्तिः, फलाभावात्।

अव्यवहितग्रहणे मानाभावात्, स्वरे निषेधाच्च। तेन 'पटयती'ति सिद्धम्। प्रकृते च द्वित्वनिषेधे स्थानिवत्त्वप्राप्तिः।

न पदान्त। अत्र द्विर्वचनसवर्णादिग्रहणं–'वतिघटितान्यातिदेशानां त्रिपाद्यामपि

❀ अभिनव-चन्द्रिका ❀

अन्यातिदेशानामिति। इदं फलितार्थकथनं, ज्ञाप्यांशस्तु–'वतिघटितातिदेशास्त्रिपाद्यां प्रवर्तन्ते' इत्येव। अन्यथाऽन्यातिदेशानां वतिघटितानां त्रिपाद्यां प्रवृत्तावपि स्वांशे चारितार्थ्यं दुर्निरूपं

❀ चिदस्थिमाला ❀

मानाभावादिति। अनुवादत्वात्सन्नियोगशिष्टत्वाच्च 'तस्मा'दित्यव्यवधानांशाप्रवृत्तेरिति भावः। ननु अनुवादेऽपि परिभाषाप्रवृत्तिस्वीकारादुत्तरांशविकलाऽव्यवधानांशस्याप्यन्यत्र प्रवृत्तिस्वीकाराच्चेदमयुक्तमत आह—**स्वरे इति**। 'तीती'त्यादीत्यर्थः। द्वित्वाऽभ्रमायाह—**प्रकृते चेति**। 'सुद्ध्युपास्य' इत्यादावित्यर्थः। स प्रसज्यप्रतिषेध इति प्रागुक्तमेव। **चस्त्वर्थे**।

न पदान्त। नञत्र द्विर्वचनसवर्णादिग्रहणं व्यर्थमेषां त्रिपादीस्थत्वेन तत्र कार्ये स्थानिवत्त्वस्यैवाऽप्रसक्तेरसिद्धत्वादतः सूत्ररीत्याऽऽह—**अत्रेति**। पदान्त-वरे-यलोप-स्वरग्रहणस्यात्रैपादिकत्वेनावश्यकत्वादाह—**द्विर्वचनेति**। 'गाङ्कुटे'त्यादिनिरासायाह—**वतीति**। प्रकृते चारितार्थ्याय क्रियमाणेन तेन निषेधसत्त्वात्तत्फलितमाह—**न्यातीति**। 'अचः परे'तिभिन्नेत्यर्थः। त्रयाणां कर्मधारयः,। **अपिना-**

❀ ज्योत्स्ना ❀

वतिघटितान्यातिदेशानामिति। वतिघटिताना'मचःपरस्मि'न्नित्येतस्मादन्येषां-स्थानिवदादेशोऽन्तादिवच्चेत्यादीनामित्यर्थः। अन्यग्रहणा'दचः परस्मि'न्नित्यस्य त्रिपाद्यां प्रवृत्त्यभाव इति

❀ सदाशिवभट्टीयम् ❀

पूर्वत्वस्य विधानोत्तरकालिकस्य चाश्रयणे सञ्ज्ञायां भाविपूर्वत्वस्याप्यभावात्तत्र कर्त्तव्येऽयं न स्यादिति सम्बन्धसामान्यषष्ठ्या समासो विज्ञायते इति षडिकादेरपि सिद्धिरिति**प्रदीपो**क्तरीत्या सर्वेष्टसिद्धौ मास्तु तन्त्रादिः, भाष्यञ्च यथाश्रुतमेवास्त्विति चेन्न, अनाश्रीयमाणायामपि प्रकृतावतिदेशज्ञापनाय द्वितीयस्यावश्यकत्वात्। स्पष्टञ्चेमत्रैव भाष्यप्रदीपोद्योतेषु। ध्वनितञ्चेदं विधिग्रहणं स्वाश्रयनिरासार्थमिति प्रतीके--'एवोऽप्यर्थ'इति वदता **उद्योते**। ज्ञापकान्तरेण तत्साधने तु मास्तु तन्त्रादिर्ध्वनितञ्चेदं केचिदिति वदता तत्रैवोद्योते। इदन्तु चिन्त्यम्,–अस्तु कर्मसाधन एव, ऐनेयेऽपि सान्नियोगेति परिभाषया पूर्वसम्बन्धिनी निवृत्तिर्विधेयेति न दोषः। परिभाषायामातिदेशप्रवृत्तिस्तु–वेतस्वानित्यत्रैकदेशविकृतन्यायेन स्त्वाभावायावश्यिका। अपरविधावित्यादिभाष्यन्त्वेकदेश्युक्तिरित्युक्तमेव, वैयाकरणे आयादेशापत्तेश्च तस्य तत्त्वमिति। यत्त्वत्र पञ्चमीसमासेनातिदेशप्रसक्तिमाशङ्क्य समाहित**मुद्योते**–'ऐज्विधानसामर्थ्यान्न भवति स्थानिवत्त्वमिति परे'इति। तस्यायं भावः—सति स्थानिवत्त्वे पदान्तयकारवकारासम्भवेन विधिवैयर्थ्यात्—ऐज्विषये तदप्रवृत्तिरिति। एतेनादेशे पठनीय इत्यर्थं बुध्वा गौरवादुत्तरत्र चारितार्थ्यादिदमसङ्गतमिति यद्दूषयांचक्रुस्तदपास्तम्।

न पदान्त। घटितान्येति। इदञ्च फलकथनम्, न तु ज्ञाप्यशरीरम्,'अन्यत्र धातुग्रहणे' इत्यादि-

❀ विषमपदविवृतिः ❀

न पदान्त। वतिघटितान्येति। 'असिद्धं बहिरङ्ग'मित्यस्य व्यावृत्तये–'वतिघटितेति। 'अचः परे'त्यस्य व्यावृत्तये–'ऽन्ये'ति। वतिघटिता ये'ऽचः परे'त्यतोऽन्येऽतिदेशास्तेषामित्यर्थः। इदं

प्रवृत्तिबोधनार्थम् । तेन 'राम' इत्यादौ विसर्गादिसिद्धिः। अत्र—विधिशब्दो भावसाधनः ।

ॐ अभिनव-चन्द्रिका ॐ

स्यात् । **भावसाधन इति** । वस्तुतस्तु कर्मसाधनत्वेऽपि कर्मधारयसमासस्वीकारेण पदचरमावयवादि-रूपविधेये कर्तव्ये इत्यर्थे न कोऽपि दोष इति बोध्यम् । **परपदस्थाजादेशस्यैवेति** । अत एव प्रत्यैषिषन्देवदत्ता इत्यादौ जुस्प्रतिबन्धार्थं पररूपस्य न स्थानिवत्त्वनिषेध इति बोध्यम् ।

वेतस्वानित्यादाविति । नच 'तसौ मत्वर्थे' इति भसञ्ज्ञाया बाधात्पुनरपि रुत्वशङ्का भाष्योक्ताऽसङ्गतेति वाच्यम्, अस्मादेव भाष्यप्रामाण्यात्परम्परया पदचरमावयवसाधकस्य स्थानिवत्त्वस्यानेन न निषेध इति कल्पनेनादोषात् । तथाहि—'तसा'विति भसञ्ज्ञायां कर्त्तव्यायां टिलोपस्थानिवद्भावस्य भसञ्ज्ञाप्रतिबन्धद्वारा पदसञ्ज्ञासम्पादनद्वारा रुत्वसम्पादकत्वेन परम्परया पदचरमावयवसाधकत्वेन निषेधाऽप्रवृत्त्या स्थानिवत्त्वेन भसञ्ज्ञाया अप्रवृत्तिः । पदसञ्ज्ञा-प्रतिबन्धार्थं स्थानिवत्त्वन्तु न भवति । अस्मादेव भाष्यप्रामाण्यात्परम्परया पदचरमावयव-प्रतिबन्धकस्याप्यनेन निषेध इति कल्पनेन पदसञ्ज्ञाप्रतिबन्धद्वारा रुत्वप्रतिबन्धकत्वेनानेन निषेधात् । अत एव षडिक इत्यादौ जश्त्वसिद्धिः । तथाहि—षडङ्गुलिदत्तशब्दाट्ठचि 'ठाजादा-वूर्ध्वं द्वितीयादचः' इति 'ङ्गुलिदत्त'स्य लोपे 'यस्येति चे'ति अल्लोपे भसञ्ज्ञाप्रतिबन्धार्थमल्लोपस्था-निवद्भावस्य पदसञ्ज्ञासम्पादनद्वारा जश्त्वसाधकत्वेनानेन निषेधाभावे स्थानिवत्त्वेन भसञ्ज्ञाया

ॐ चिदस्थिमाला ॐ

तदन्यसमुच्चयः । अन्यत्वेन 'अन्तादि'वित्यादिवत्प्रथमसूत्रस्यापि सङ्ग्रह इति ध्वनयन्नाह—**तेनेति** । यथा चैतत्तथा मनोरमादौ स्पष्टम् । **आदिभ्यां** 'राम'मित्यादावनुस्वारादे'रमी क्षीरपेणे'त्यादावीत्वणत्वादेश्च परिग्रहः । ननु 'विधिशब्दः कर्मसाधनः, शेषषष्ठ्या समास'इत्येवास्त्विति चेन्न, द्विर्वचनादिभिरनन्व-यापत्तेः, तदनुरोधात्कर्मधारये 'विधि'शब्दस्य पूर्वनिपातापत्तेः, 'पदान्ते'त्यत्र दोषापत्तेश्च, एकेन विधिशब्देन समासद्वयासम्भवाच्च, वैरूप्यापत्तेश्च, लक्ष्यासिद्धेश्च, तदेतद्ध्वनयन्नाह—**अत्रेति** । चरन्तानां

ॐ ज्योत्स्ना ॐ

'पूर्वत्रासिद्धे न स्थानिव'दित्यस्यार्थतः सिद्धिरुक्ता। यद्यप्येवं सति ज्ञापके चारितार्थ्यं दुर्निरूपं, तथापि द्विर्वचनादिग्रहणं 'पूर्वत्रासिद्धे न स्थानिव'दित्येतस्यैकदेशानुवाद इतीह तात्पर्यार्थः। यद्वा—अन्यातिदेशानां त्रिपाद्यां सर्वथा प्रवृत्तिः 'अचः परस्मि' न्नित्येतस्य तु क्वचिदप्रवृत्तिः क्वचित्प्रवृत्ति-

ॐ सदाशिवभट्टीयम् ॐ

वदिति बोध्यम् । **विसर्गादिसिद्धिरिति** । अन्यथा रुत्वे कृत एकदेशविकृतन्यायाऽप्रवृत्त्याऽपदत्वा-द्विसर्गो न स्यात्, कार्यकालमाश्रित्येदम्, अन्यत्र तु रान्ते एव रुत्वासिद्ध्योपदेशप्रवृत्त्या सिद्धमिष्टम् ।

ॐ विषमपदविवृतिः ॐ

फलितार्थकथनं, न ज्ञाप्यांशकथनं; स्वस्मिंश्चारितार्थ्याभावप्रसङ्गात् । ज्ञाप्यांशस्तु—'वतिघटिताति-देशानां त्रिपाद्यां प्रवृत्ति'रिति; तेन'स्थानिवदादेशः', 'अन्तादिवच्चे'त्यनयोस्त्रिपाद्यां प्रवृत्तिः। 'अचः परे'त्यस्य तु न प्रवृत्तिः, द्विर्वचनादिग्रहणस्य त्रैपादिकोपलक्षणत्वात् । **भावसाधन इति** । 'विधि-

ॐ वरवर्णिनी ॐ

भावसाधन इति । विपूर्वकधाधातोर्विधेयत्वमर्थः, प्रयोजकत्वं सप्तम्यर्थः, तस्य स्थानिवद्भावेऽन्वयः । पदान्तस्य विधिरिति समासात्कर्मषष्ठ्याऽत्र वृत्तित्वमर्थः, तदेवं पदचरमावयववृत्तिविधेयताप्रयोजकः स्थानिवद्भावो न भवतीति भावसाधनेत्यर्थः । कर्मसाधने तु विधेयत्वं धात्वर्थः, आश्रयत्वं प्रत्ययार्थः, पदान्तपदोत्तरशेषषष्ठ्या निरूपकांशे साकाङ्क्षविधेयतानिरूपितोद्देश्यत्वमर्थः, एवञ्च—'पदान्तनिष्ठोद्देश्यता-निरूपितविधेयताश्रय[वृत्तिविधेयता]प्रयोजकः स्थानिवद्भावो न' इत्यर्थो लभ्यते ।

पदान्तेत्यत्रान्तशब्दश्चरमावयववाची । कर्मषष्ठया समासः । तेन 'एषो यन्हसती'त्यादा– 'वेतत्तदो'रिति सुलोपो न । इणः शतरि यन्निति रूपम् । तत्र यणः स्थानिवत्वात् । उत्वे च न स्थानिवत्, अनेन निषेधात् । स्पष्टञ्चेदं भाष्ये इति—भाष्यप्रदीपोद्द्योते निरूपितम् ।

ॐ चिदस्थिमाला ॐ

द्वन्द्वेन'द्वन्द्वान्ते' इति न्यायेन विधिशब्दस्य प्रत्येकं सम्बन्धादाह—**कर्मेति** । मनोरमाद्यसाङ्गत्यं ध्वनयन्लक्ष्यसिद्धिमाह—**नैष इति** । स्पष्टार्थमाह—**इण इति** । यनितीति भावः । तत्र=लोपे कार्ये । यणः='इणो य'णिति विहितस्य । तथा चाहल्परत्वान्न लोप इति भावः । **आदिना** 'एषो वश्चः' राजानो यन्ती'त्यादि परिग्रहः । नन्वत्र पदसंस्कारपक्षेऽनादिष्टादचः पूर्वत्वेनाऽदृष्टत्वात्स्थानिवत्त्वस्यैवा-प्राप्तिरिति कथमिदं व्याख्यानफलमिति चेन्न, 'वाक्यादपोद्धृत्य पदानि संस्क्रियन्ते' इति पक्षे तत्त्वस्य सत्त्वात । न हि पदान्तरनिरपेक्षमेव पदमिह शास्त्रे संस्क्रियते इति नियमः, 'युष्मद्युपपदे' इत्याद्यसङ्ग-त्यापत्तेरत एवोत्वघटितप्रयोगोऽन्यथा विसर्गघटितप्रयोगापत्तिः, 'अकृते'ति तु नास्त्येव, तदेतद्ध्वनय-न्नाह—**उत्वे चेति** । इदञ्च पदचरमावयवप्रतिबन्धकस्थानिवद्भावनिषेधोदाहरणम् । अन्यथा तु यथात्र

ॐ सदाशिवभट्टीयम् ॐ

स्पष्टञ्चेदमिति । प्रकृतसूत्रे तु भावसाधनत्वमात्रं, न तु प्रकृतं फलं । ननु वेतस्वानित्यत्र रुः प्राप्नोति, यथोद्देशेऽन्तर्वर्तिविभक्त्या स्वादिष्विति वाऽकारान्ते प्रवृत्तस्य पदत्वस्यैकदेशविकृतन्यायेन सान्ते सत्त्वात् । कार्यकालपक्षेप्युक्तन्यायेन तदादित्वमतिदिश्योपदेशद्वयेन सान्ते तत्त्वमिति—तत्र कर्त्तव्ये स्थानिवत्त्वं तु ना-ऽनेन निषेधात्, अनेन च साक्षात्परम्परया या सूत्रोपात्तप्रतिबन्धकं तत्प्रापकञ्च प्रतिषिध्यते स्थानिवत्त्वम् । तत्र च साक्षात्प्रतिबन्धकम्—एषो यन्निति । साक्षात्प्रापकं—कानि सन्तीति । परम्परया प्रतिबन्धकं द्वेधा, साधकप्रतिबन्धात् प्रतिबन्धकप्रवर्तनाद्वा, आद्ये वेतस्वानित्यत्र पदसञ्ज्ञाप्रतिबन्धकः । सिद्धान्ते तु एतदुदाहरणं मृग्यम् । द्वितीये रलावित्यत्र प्रकृतिभावप्रवर्तनात्परम्परया प्रापकं प्रतिबन्धकत्वात् । यथा सिद्धान्ते वेतस्वानित्यत्र मत्वरूपप्रतिबन्धप्रतिबन्धकस्य सान्ते प्रतिवन्धाद्रुत्वप्रापकत्वमतिदेशस्य । नचैवं षडिकासिद्धिः, लोपविधानादिति पञ्चमेत्र चोद्योते स्पष्टम् । अत्र मानन्तु रुत्वापादकं 'भसञ्ज्ञात्र

ॐ विषमपदविवृतिः ॐ

ष्वि'ति बहुवचनन्तु विधेयभेदेन विधिभेदात् । वस्तुतः कर्मणि किः, कर्मधारयः समासः । तत्र= सुलोपे । 'स्थानिवत्त्वा'दित्यस्य 'सुलोपो ने'त्यनेनान्वयः । **उत्वे चेति** । इदं चिन्त्यं-रोः स्थानिभूतादचः पूर्वत्वेन दृष्टत्वाभावात्तस्योत्वे स्थानिवत्त्वाप्रसक्तेः । परे तु–पदान्तस्य स्थाने इत्यर्थः शङ्कितुमशक्यः, पदान्तस्य स्थाने विधौ द्विवचनादेश्च विधौ इत्यर्थाश्रयणे वैरूप्यापत्तेः,'एषो य'न्नित्यसाधुः, परत्वा-

ॐ वरवर्णिनी ॐ

एषो यन्निति । इदं वाक्यसंस्कारपक्षे एव भावसाधनफलं, पदसंस्कारपक्षाङ्गीकारे तु–'षडिक' इत्यादौ जश्त्वसिद्धिः फलम् । किञ्च—भानोरः–भान्वः, तत आचारक्विबन्तात्कर्त्तरि क्विपि अल्लोपे 'भान्व' इत्यादौ 'लोपो व्यो'रिति वलोपे कर्त्तव्ये स्थानिवद्भावनिषेधो नेत्यपि फलं बोध्यम् । एवं–नाव उः–नावुः, ग्लाव उः–ग्लावुः, तयोरोसि 'ग्लाव्वोः' 'नाव्वो'रित्यादौ वलि लोपो न, यणः स्थानिवत्त्वात् । कर्म-साधने तु तन्निषेधाल्लोपापत्तिः, अन्तरङ्गपरिभाषा तु वलि लोपे नैव प्रवर्त्तते । किञ्च—सुपथिन्छब्दा-ण्णिचि टिलोपे 'सुपथ्'इत्यस्य अशब्देन समासे पुनर्णिचि टिलोपेनाकारलोपे तस्य स्थानिवत्त्वात्पुनष्टिलोपो न भवति, कर्मसाधने तु —स्थानिवत्त्वनिषेधे पुनष्टिलोपो दुर्वार इत्यवधेयमिति **श्रीबालशास्त्रि**चरणाना-माशयमस्मत्**पितामह**चरणाः **श्रीस्नेहिरामशास्त्रिण** आहुः ।

अत्र पदेऽन्त इति सप्तमीसमासो भाष्ये उक्तस्तेन प्रत्यासत्त्या पदे परतः चरमावयवे कार्ये कर्तव्ये परपदस्थाजादेशस्यैवानेन स्थानिवत्त्वनिषेध इति 'वेतस्वा'नित्यादौ न दोषः। न चैवमपि 'पूर्वत्रासिद्धीये न स्थानिव'दिति निषेधोऽत्र दुर्वारः। 'पदेऽन्त' इत्यर्थेन तत्र स्थानिवत्त्वनिषेधव्यावृत्तिपरभाष्यप्रामाण्येन पूर्वत्रासिद्धे इत्यत्र

❀ अभिनव-चन्द्रिका ❀

अप्रवृत्तेर्जश्त्वम्। पदसञ्ज्ञाप्रतिबन्धकस्थानिवत्त्वन्तु न, तस्य पदसञ्ज्ञाप्रतिबन्धद्वारा जश्त्वप्रतिबन्धकत्वेनानेन निषेधादिति दिक्।

❀ चिदस्थिमाला ❀

न निर्वाहस्तथा स्पष्टम् **भावप्रकाशे। भाष्ये इति।** प्रकृतसूत्रस्थ एवेति भावः। सिद्धान्तमाह—**अत्रेति।** तथा च पदे परतश्चरमावयवस्य पदसम्बन्धिन एव प्रत्यासत्त्या ग्रहणेन पदचरमावयवकर्मकविधौ कर्त्तव्येऽर्थात्परपदस्थाऽजादेशो न स्थानिवदित्यर्थस्यैव तत्र पक्षे लाभेन तदेकवाक्यतया षष्ठीतत्पुरुषपक्षेऽपि तथैव बोध्यं, तदाह—**तेनेति।** अन्यथान्तर्वर्तिविभक्तिमाश्रित्य पदत्वाद्रुत्वं स्यात्, स्थानिवत्त्वं तु न, तत्पक्षे निषेधात्, तथा च 'कानि सन्ती'त्याद्येव 'पदान्तविधा'वित्यस्योदाहरणं, नेदृशानीति गूढाकूतम्। **चैवमपि**=उक्तार्थेनोक्तनिषेधाप्रवृत्तावपि। यद्यपि 'पूर्वत्रासिद्धे ने'त्येव वार्तिकं तथापि तत्तधिकारभवशास्त्रपरमित्याशयेनाह—**पूर्वत्रासिद्धीये नेति।** तथा च भगवत उक्तप्रयासनैष्फल्यमेवेति भावः। अत एव अन्यथा समाधत्ते—**पदेन्तमिति।** तत्र='वेतस्वा'नित्यादौ। उक्ताशयेनैवाह—

❀ ज्योत्स्ना ❀

रपि, तेन 'तस्य दोष' इतिवचनस्यापि सङ्ग्रहः। क्वचित्प्रवृत्तिसम्भावनानिराकरणार्थञ्च द्विर्वचनादिग्रहणस्य चारितार्थ्यमित्याहुः।

❀ सदाशिवभट्टीयम् ❀

बाधिका भविष्यती'ति 'अथवे'त्यादि च भाष्यमिति यथायथमूहनीयम्। स्पष्टञ्चेदमत्रैवोद्योते इति चेत्तत्र सिद्धान्तरीत्या समाधत्ते—**अत्र पदे इति। प्रत्यासत्येति।** पद इत्यत्र परपदस्योपस्थितत्वात्तत्स्थ एवादेशो गृह्यते इति भावः। अत्र चाभ्यस्तसञ्ज्ञासूत्रस्थं भाष्यं लिङ्गमपि, तत्र हि यत्र खण्डद्वयश्रुतिस्तत्रैव सञ्ज्ञार्थमुभे ग्रहणं कुतो न, अत एव ऐर्त्सन्नित्यादौ जुस्त्वेत्याशङ्क्य—स्थानिवत्वाज्जुस्त्व भविष्यतीति न तदर्थन्तदित्युक्तम्। अन्यथा ऐर्त्सन्नित्यत्र स्थानिवत्त्वनिषेधाज्जुस्स्यादिति तद्वारणाय तत्स्यादिति तद्वारणाय तस्यावश्यकत्वेन तदसङ्गतिः स्पष्टैव। एतेनात्र पदान्तसाधकस्यापि पदान्तग्रहणेन ग्रहणमित्यत्र किं फलमिति प्रश्ने दिवितिप्रातिपदिकादाचक्षाणण्यन्ताद्विच्वि अश्वशब्देन समासे पदत्वेपि प्राप्तस्थानिवत्त्वनिषेधे उत्वेद्यश्वसिद्धिरिति फलं परं प्रदर्शयन्तः स्वयं परमपदयन्तः परास्ताः। **वेतस्वानिति।** इदञ्च प्रत्यासत्तिमन्तरापि

❀ विषमपदविवृतिः ❀

न्नित्यत्वाच्च सुलोपस्य न्याय्यत्वात्। न च तत्र स्थानिवद्भावः—'पादस्य लोप' इति लोपस्येव सुलोपस्यापि पदचरमावयवत्वात्, लक्ष्यानुरोधेन पदसंस्कारपक्षस्यैवात्राश्रयणाच्च। अत एव 'य एवास्मि स सन्यजे'ति श्रौतप्रयोगः 'एष य'न्निति छान्दोग्यप्रयोगश्च सङ्गच्छते। लोकेपि 'स स'न्नित्येव प्रयुज्यते नतु सः सन्निताीत्याहुः। **न दोष इति।** ननु पदेऽन्त इति सप्तमीसमासे ड्मतुपः पदत्वाभावेनैव'वेतस्वा'नित्यत्र दोषवारणे परपदस्थाजादेश इत्यस्य नोपयोग इति चेन्न, 'वेतस्वा' नित्यादावित्यादिपदेनाऽ'पीपचन् देवदत्तयज्ञदत्तविष्णुमित्रा' इत्यस्य ग्रहणेन तत्रोक्तार्थस्योपयोग-

पदचरमावयवविधायकातिरिक्तस्यैव त्रैपादिकस्य ग्रहणात् । अत एव 'महिष्मा'नित्यत्र जश्त्वं न । सूत्रे जश्पदेन 'झलां जश् झशी'त्यस्यैव ग्रहणं, चर्सन्निहितस्यैव ग्रहणौचित्यात् ।

❀ अभिनव-चन्द्रिका ❀

पदचरमावयवविधायकातिरिक्तस्यैवेति । ननु 'पिपठीर्भ्या'मित्यादौ रुत्वप्रतिबन्धकस्थानिवत्त्वस्य निषेधो न स्यात्, 'ससजुषो रु'रित्यस्य पदचरमावयवविधायकत्वेन 'पूर्वत्रासिद्धीये ने'त्यस्याप्रवृत्तेः । नच 'वेतस्वा'निति भाष्यप्रामाण्येन तद्धितनिमित्तकपदसञ्ज्ञावच्चरमावयवविधायकातिरिक्तत्वेन 'पूर्वत्रासिद्धीये न स्थानिव'दित्यत्र सङ्कोचान्नायं दोष इति वाच्यं, पिपठीष्ट्वमित्यादौ तद्धितनिमित्तकपदसञ्ज्ञाया एव सत्त्वेन रुत्वप्रतिबन्धार्थं स्थानिवत्त्वप्रवृत्तौ 'र्वो'रिति दीर्घानापत्तेरितिचेन्न । प्रत्ययविशिष्टपदसञ्ज्ञावच्चरमावयवविधायकातिरिक्तत्वेन सङ्कोचस्य विवक्षणीयतया दोषाभावात् । वै०—'स्वप्रयोज्यत्व'—'स्वप्रयोज्यकार्यप्रयोज्यत्वो'भयसम्बन्धेन । अस्ति च 'वेतस्वा'नित्यादौ पदसञ्ज्ञायां ड्मतुप्प्रयोज्यत्व—ड्मतुप्प्रयोज्यटिलोपप्रयोज्यत्वोभयसम्बन्धेन वैशिष्ट्यमिति न दोषः । पिपठीर्भ्या पिपठीष्ट्वमित्यादौ तु पदसञ्ज्ञायां भ्याम्प्रयोज्यत्वस्य सत्त्वेऽपि तत्प्रयोज्यकार्याप्रयोज्यत्वास्याभावात्, क्विप्प्रयोज्यातोलोपरूपकार्यप्रयोज्यत्वस्य सत्त्वेऽपि क्विनिमित्तकत्वस्याभावान्न दोषः । मूलन्तु लोपनिमित्तप्रकृत्ययनिमित्तकपदसञ्ज्ञावत्परं–'पदचरमावयवे'ति 'पद'पदमिति रीत्या योज्यमिति दिक् ।

लोपनिमित्तप्रत्ययनिमित्तकपदसञ्ज्ञावच्चरमावयवविधायकातिरिक्तत्वेन 'पूर्वत्रासिद्धीये' इत्यत्र सङ्कोचे फलमाह–**महिष्मानिति** । ननु महिष्मानित्यादौ 'न पदान्त'सूत्रेण जश्विधौ स्थानिवत्त्वनिषेधइत्याशङ्क्याह-**'झलां जश् झशी'त्यस्यैवेति** । ननु अतद्धित इति वार्तिकारम्भतत्प्रत्याख्यानयोःफलैक्याय

❀ चिदस्थिमाला ❀

पूर्वत्रासिद्धे इति । अस्यावश्यकतामाह–**अत एवेति** । तदन्यस्यैव तस्य ग्रहणादित्यर्थः । उक्तरीत्या हि 'झलां जशोऽन्त'इत्यस्यात्र प्राप्तिरिदानीं तस्याऽप्राप्तिः, 'पदान्तविधा'वित्यस्य तु प्राग्वद्विषय एवायं नेति, स्थानिवत्वाज्जश्त्वं नेति भावः । नन्वेवमपि जश्त्वं जश्विधाविति निषेधो दुर्वार एवेति स्यादेवान आह–**सूत्रे इति** । **'प्रकृते**'त्यादिः । **चर्सन्नीति** । अत्र सूत्रे सान्निध्यपाठेन यस्य चर्विधिसान्निध्यं तस्यैव ग्रहणमिति 'झलां

❀ ज्योत्स्ना ❀

जश्त्वं नेति । वस्तुतो 'झलां जशोऽन्त' इत्यत्र झला पदस्य विशेषणाज्झलन्तपदस्यालोन्त्यस्य जशि-

❀ सदाशिवभट्टीयम् ❀

सिद्धम्, तथापि 'पिपठीरत्रे'ति 'प्रत्यौषिषन्निवे'त्यादौ तु तत्फलं बोध्यम् । **अतिरिक्तस्यैवेति** । धात्वनवयवो यः पदचरमावयवस्तद्विधायकानिरिक्तेत्यर्थः । तेन 'पिपठी'रिति सिद्धः, यद्वा पदशब्देनात्र यस्य स्थानिवद्भावः प्रतिषिध्यते तादृशादेशहेतुभूतप्रत्ययनिमित्तकपदसञ्ज्ञावत् गृह्यते, तेन 'तिरश्चा' 'पिपठीःकल्प'मित्यत्रापि न दोषः, अन्रत्योत्तरग्रन्थविरोधश्च नेत्याहुः । **शीत्यस्यैवेति** । अत एव पदान्तविधिं प्रति न स्थानिवदि-

❀ विषमपदविवृतिः ❀

सत्त्वात् । तत्र हि पदे परतोऽन्ते जुस्, अजादेशस्तु न परपदस्थः । **पदचरमावयवविधायकातिरिक्तस्येति** । नचैवं 'पिपठी'रित्यत्र रुत्वं न स्यादिति वाच्यं, 'पूर्वत्रासिद्ध' इत्यस्याप्रवृत्तावपि 'क्वौ लुप्त'मित्यस्य प्रवृत्त्या दोषाभावात् । एतेन 'पिपठीर्भ्या'मित्यादिप्रयोगा उपपादिता विज्ञेयाः ।

नचैवमपि 'गर्दभमाचष्टे गर्दभयति, ततः क्विपि गर्ध'बित्यत्र जश्त्वाद्यनापत्तिः, न हि तत्र 'क्वौ लुप्त'मित्यनेन निर्वाहः, अल्लोपस्य क्विनिमित्तत्वाभावादिति वाच्यं, 'न पदान्त'सूत्रस्थभाष्यप्रामाण्येन ड्मतुपि त्रैपादिके कर्त्तव्ये 'पूर्वत्रासिद्धे ने'त्यस्याऽप्रवृत्तिरित्यर्थाश्रयणेन सर्वसामञ्जस्यात् ।

'वेतस्वान्' 'महिष्मा'नित्यनयोः पूर्वत्रासिद्धेत्यस्याप्रवृत्तावपि 'जशि न स्थानिव'दित्यस्य प्रवृत्त्या जश्त्वं दुर्वारमित्याशङ्क्याह—**सूत्रे जश्पदेनेति** । इदं चिन्त्यं, 'गर्धब्भ्या'मित्यत्र जश्त्वानापत्तेः ।

'कार्यकालपक्षेऽपि त्रिपाद्यामन्तरङ्गपरिभाषा न प्रवर्त्तेत'इति वक्ष्यते इति—**न तयाऽस्य सिद्धिः।** 'गोचे'त्यादौ 'गतिकारकोपपदाना'मित्यस्यानित्यत्वेन सुबुत्पत्त्यनन्तरमेव समासः। 'उत्तरपदत्वे चे' ति प्रत्ययलक्षणप्रतिषेधश्च प्रत्यासत्त्योत्तरपदस्य कार्यित्वे एवेति न दोषः। 'पदे' इति पदत्वयोग्योपलक्षणं वा। अत्रेदं भाष्यमपि मानम्।

अत्र पदचरमावयवादिसाधकः प्रतिबन्धकश्च स्थानिवद्भावो निषिद्ध्यते,

---

❀ अभिनव-चन्द्रिका ❀

'पदव्यवायेऽपी'त्यत्र पदपदं पदत्वयो-ग्यप्रातिपदिक-परमित्यवश्यं वक्तव्यत्वेन 'माषकुम्भवापेने'-त्यादौ दोषाभावेन 'उत्तरपदत्वे चे'त्यत्र कार्यित्वनिवेशो विफलः। तथाच 'गोचे'त्यादौ सुबुत्पत्त्य-नन्तरं समासेऽपि 'उत्तरपदत्वे चे'ति निषेधात्कथं 'न पदान्ते'ति निषेध-इत्याशङ्क्याह—**पदत्वयोग्यो-पलक्षणं वेति। साधक इति।** अत्र साधकत्वं साक्षाद्विवक्षितम्, अत एव 'वेतस्वा'नित्यादौ रुत्व-शङ्का भाष्योक्ता सङ्गच्छते। अन्यथा भसञ्ज्ञाप्रतिबन्धकस्य तत्प्रतिबन्धद्वारा पदसञ्ज्ञासम्पादनेन परम्परया रुत्वसाधकस्य स्थानिवत्त्वस्याप्यनेन निषेधे तदसङ्गतिः स्पष्टैव। **प्रतिबन्धकश्चेति।** अत्र च प्रतिबन्धकत्वं साक्षात्परम्परया च ग्राह्यम्। अत्रापि 'वेतस्वा'नित्यत्र रुत्वशङ्का-परभाष्यमेव मानम्। अन्यथा पदसञ्ज्ञाप्रतिबन्धकस्य तत्प्रतिबन्धद्वारा पदचरमा-

❀ चिदस्थिमाला ❀

जशोऽन्त' इत्यस्याग्रहणमिति भावः। **कौस्तुभाद्युक्त्यसाङ्गत्यं** ध्वनयन्नाह—**कार्येति।** अपिना यथो-द्देशपक्षसङ्ग्रहः। अस्य='वेतस्वान्' 'महिष्मा'नित्यादेः। नन्विदमयुक्तं 'गतिकारके'ति सुबुत्पत्तेः पूर्वं समासेऽसुबन्तत्वेनोत्तरस्यापदत्वाद्गोचेत्यादावल्लोपस्य स्थानिवत्वेनावङापत्तेरत आह—**गोचेत्यादाविति।** 'न दोष' इत्यत्रान्वयः। नन्वेवमप्ययुक्तमेवो'त्तरपदत्वे चे'ति प्रत्ययलक्षणप्रतिषेधेन तस्यापदत्वस्य तदवस्थत्वादत आह—**उत्तरपदेति।** तस्य नित्यत्वेऽप्याह—**पदे इति।** सप्तमीसमासे इति भावः।

अत्रेदमिति। अर्थत्रये सप्तमीसमासपरं प्रागुक्तमपीत्यर्थः। **अपिना**—प्रागुक्तयुक्तिसमुच्चयः। सिद्धान्ता-न्तरमाह—**अत्रेति।** 'साक्षात्परम्परया वे'ति शेषः। आदिना द्विर्वचनादिपरिग्रहः। **प्रतीति।**

❀ ज्योत्स्ना ❀

त्यर्थेन सिद्धे अन्तग्रहणात्पदान्तस्यैव झलो जश् भवति न तु लोपे कृते पदान्तस्यापीत्यस्यार्थस्य क्रोडीकाराज्जश्त्वप्राप्तिरेव न, नतरां तत्र कर्तव्ये-स्थानिवद्भावनिषेधो, नापि 'पूर्वत्रासिद्धे'चेति। यत्र तु पूर्वत्रासिद्धं प्राप्तं—यथा वेतस्वानित्यत्र रुत्त्रापि प्रागुक्तरीत्या संयोगादिलोपादाविव क्वचित्कार्य-कालपक्षे त्रिपाद्यामपि 'अचः परस्मि'न्नित्येतत्प्रवृत्तिसम्भावनया तं निषेधमविचार्य 'पदेऽन्तः पदान्त' इति सप्तमीसमासाभ्युपगमेन निषेधो भाष्य उक्त इति दिक्।

❀ सदाशिवभट्टीयम् ❀

त्युपक्रम्य 'ब्रह्मबन्ध्वि'त्यत्र जश्त्वं प्राप्नोतीत्युक्तम्। अन्यथा जश्पदेन निषेधस्य दुर्वारत्वात् प्रकृते विचारो निष्फलः स्यादिति बोध्यम्।

❀ विषमपदविवृतिः ❀

ननु पदचरमावयवसाधकस्थानिवद्भावस्यैव 'न पदान्ते'ति निषेधः,-यथा 'गोचे'त्यादौ, तथा च 'वेतस्वा'नित्यत्र स्थानिवद्भावो न तत्साधकः, किन्तु रुत्वप्रतिबन्धक इति—न तस्य 'न पदान्ते'-त्यनेन निषेध इति 'पदेऽन्त' इत्यर्थाश्रयणेन तत्र दोषवारणपरभाष्यं न सङ्गच्छत एवेत्याशङ्क्याह—**प्रतिबन्धकश्चेति।**

विनिगमनाविरहात् । एतत्सूत्रभाष्य-कमोर्णिङित्यादिसूत्रभाष्यैः 'पूर्वत्रासिद्धे न स्थानिव'-दित्यवष्टभ्य वरे-यलोप-स्वर-दीर्घग्रहणवर्जं द्विर्वचनादि प्रत्याख्यातमिति लभ्यते ।

❀ अभिनव-चन्द्रिका ❀

वयवरुत्वप्रतिबन्धकस्थानिवत्त्वस्यानेन निषेधाभावे पदसञ्ज्ञाया एवाभावेन तदसङ्गतिः स्पष्टैव ।

अत्रेदं बोध्यं—साक्षात्पदचरमावयवसाधकः, परम्परया पदचरमावयवसाधकः, साक्षात्पदचरमावयवप्रतिबन्धकः, परम्परया पदचरमावयवप्रतिबन्धकश्चेति चतुर्विधः स्थानिवद्भावः प्राप्तः । तत्र साक्षात्पदचरमावयवसाधकः, साक्षात्पदचरमावयवयप्रतिबन्धकः, परम्परया पदचरमावयवप्रतिबन्धकश्च स्थानिवद्भावोऽनेन निषिध्यते न तु परम्परया पदचरमावयवसाधकः स्थानिवद्भावः, तत्र साक्षात्पदचरमावयवसाधकस्थानिवत्त्वनिषेधे सध्रीच इत्युदाहरणम् । अत्र हि 'अचः' इत्यल्लोपस्य स्थानिवद्भावः साक्षात्पदचरमावयवयवसाधकः । साक्षात्पदचरमावयवप्रतिबन्धकस्थानिवत्त्वनिषेधस्य फलम्–'एषो यन् हसती'ति । अत्र 'इणो य'णिति यणादेशस्य स्थानिवत्त्वं साक्षात्पदचरमावयवोत्वप्रतिबन्धकम् ।

ननु पदसंस्कारपक्षे तत्र स्थानिभूतादचः पूर्वत्वेन दृष्टत्वाभावात्स्थानिवत्त्वाप्राप्तिः । नच देवदत्तस्य नः–देवदत्तनः, तस्मादाचारक्विबन्तात्क्विपि तस्मादौप्रत्यये देवदत्तन् औ इति स्थिते साक्षात्पदचरमावयवदीर्घप्रतिबन्धकस्थानिवत्त्वस्य निषेधः फलमिति वाच्यम्, दीर्घविधौ तन्निषेधात्, 'क्वौ लुप्तं न स्थानिव'दिति निषेधाच्च । नच दीर्घपदेन त्रैपादिकदीर्घस्यैव ग्रहणादिदं फलं सम्यगेवेति वाच्यम्, मानाभावादिति चेन्मैवम् । पयस् ऋ इत्यस्मादाचारक्विबन्तात् 'अप्रत्ययात्' इत्यनेन अप्रत्यये गुणे तस्य स्थानिवद्भावः साक्षात्पदचरमावयवोत्वप्रतिबन्धक इति पयोऽरा इति फलस्याभिप्रेततयाऽदोषात् । परम्परया पदचरमावयवप्रतिबन्धकस्थानिवत्त्वनिषेधस्य फलं'दध्यारः' 'दध्यर्च' इति । अत्र हि 'कर्मण्य'णिति अणिनिमित्तकवृद्धिगुणयोः स्थानिवद्भावः 'ऋत्यक' इति प्रकृतिभावसम्पादनद्वारा यण्प्रतिबन्धकः । 'परम्परया पदचरमावयवसाधकस्थानिवत्त्वस्य निषेधो न भवती'त्यस्य फलं–'षडिक' इति । अत्र हि भसञ्ज्ञाप्रतिबन्धार्थं स्थानिवद्भावः पदसञ्ज्ञासम्पादनद्वारा पदचरमावयवरुत्वसम्पादकः । नच 'पूर्वत्रासिद्धीये ने'ति निषेधः शङ्क्यः, लोपनिमित्तप्रत्ययनिमित्तकपदसञ्ज्ञावचरमावयवविधायकातिरिक्तत्वेन सङ्कोचस्योक्तत्वेनादोषात् । नचैवमपि वागाशीर्दत्तो वाचिक इत्यादौ जश्त्वापत्तिरिति वाच्यम्, 'एकाक्षरपूर्वपदानामुत्तरपदलोपो वक्तव्यः' इति 'आशीर्दत्त'-शब्दस्य लोपेनादोषात् । 'षडिक' इत्यादौ 'षषष्ठाजादिवचनात्सिद्धमि'ति 'ङुलिदत्त'स्य लोपे जश्त्वम्भवत्येवेति दिक् ।

दीर्घग्रहणवर्जमिति । नच जनावित्यादौ दीर्घविधौ स्थानिवद्भावनिषेधात् 'सर्वनामस्थाने च'

❀ चिदस्थिमाला ❀

'त'दित्यादिः । तत्राद्यस्योदाहरणं–'कानी'त्यादि । द्वितीयस्य तु प्रागुक्तमेव । अथ भाष्यमतेनाह—**एतदिति** । 'भाष्यै'रिति हेतौ तृतीया, 'लभ्यते' इत्यत्रान्वयः । यद्यपि–भाष्ये 'वरेयलोपस्वरवर्ज'मित्येवोक्तं तथापि दीर्घोऽपि तत्रोपलक्षणत्वेन बोध्य इत्यन्यत्र प्रतिपादितमित्याशयेनाह—**दीर्घेति** । **प्रत्येति** ।

❀ ज्योत्स्ना ❀

इति लभ्यत इति । अस्मिन्पक्षे स्थानिवत्सूत्रस्य त्रिपाद्यामपि प्रवृत्तौ ज्ञापकं 'भोभगो–इति सूत्रे-

❀ विषमपदविवृतिः ❀

कमोर्णिङित्यादीति । आदिपदेन–'चिण्णमुलो'रिति सूत्रस्थं भाष्यम् । इदञ्च दीर्घग्रहणवर्जमित्यंशे साधकम् । ननु 'द्विर्वचनग्रहणा'दित्ययुक्तं, द्विर्वचननिषेधस्यात्र कर्तव्यत्वा-

निषेध इति । द्विर्वचनग्रहणात्पूर्वत्रासिद्धे इति निषेधाद्वेति भावः ।

दकार इति । स्थानत आन्तर्यादिति भावः ।

अदर्शनम् । 'स्थाने' इति वर्त्तते, प्रसङ्गे सतीति तदर्थस्तदाह—**प्रसक्तस्येति ।** शास्त्रतोऽर्थतो वेति भावः । अत्र दृशिर्ज्ञानसामान्ये । तत्र ज्ञानस्यावर्जनीयत्वेन तत्सामाग्य-न्तर्गता उच्चारणकृता सत्ता निषिद्धयते । तत्र प्रत्ययलोपे शास्त्रतोऽर्थतश्च प्रसक्तो-

ॐ **अभिनव-चन्द्रिका** ॐ

इति दीर्घापत्तिरिति वाच्यम् । श्रायसावित्यत्रेवाङ्गसञ्ज्ञाप्रतिबन्धार्थं स्थानिवत्त्वेन नान्ताङ्गाभावेन दीर्घाप्राप्तेः । 'स्वरदीर्घयलोपेषु लोपाजादेश एव न स्थानिव'दिति वार्त्तिकाद्वा । अत एव ण्यन्ताण्णौ अहीडि अहेडीत्यादौ 'चिण्णमुलो' रिति दीर्घे कर्तव्ये स्थानिवत्त्वं नेति दिक् ।

सत्ता निषिध्यते इति । वस्तुतस्तु उच्चारणाभाव एव अदर्शनपदार्थः, सत्ताया अवर्जनीय-त्वात् । **अनुत्पत्तेरेवान्वाख्यानमिति** । नचाकृतेत्यादौ 'ह्रस्वादङ्गा'दिति सिचो लोपे च्लेः

ॐ **चिदस्थिमाला** ॐ

'भगवते'त्यादिः । यद्यप्यचः परेति दृष्ट्या त्रिपाद्या असिद्धत्वान्न तस्याप्युपयोगस्तथाप्यत्र पक्षे न्यायसिद्धानु वादः, प्रागुक्तफलसिद्ध्यर्थमिति बोध्यम् । मूलस्थेतिना सूत्रपरामर्शेऽपि तत्र केन निषेध इत्याशङ्कायामाह—**द्विरिति ।** भाष्यरीत्याह—**पूर्वत्रेति ।** ननु'द'एव कुतः ?, प्रयत्नसाम्येनान्यस्यापि प्रसङ्गादत आह—**स्थानत इति । स्थाने इति ।** 'स्थानेऽन्तरतम'इत्यतः । तदाह=तत्फलितमाह । 'ल्यब्लोपे'इत्यादि-सङ्ग्रहायाह—**अर्थत इति ।** लक्ष्यभेदेन विकल्पः । ननूक्तरीत्या शब्दस्यैव प्रसङ्गलाभेन तस्य चाक्षुष-त्वस्यावधित्वेन कथं तददर्शनस्य सञ्ज्ञात आह—**अत्रेति** । तथा च तस्य ज्ञानसामान्याभावो लोप इति फलितम्, अत एव ल्यबन्तपदस्याध्याहारविषये 'ल्यब्लोप'इत्यस्य न प्रवृत्तिः । नन्वेवं लोपविधिना तस्य तदभावो बोधनीयः, स च बाधितोऽत आह—**तत्रेति ।** लोपविधायके इत्यर्थः । तत्र शब्दज्ञानस्य श्रावणस्यैव प्रसिद्धत्वादाह—**तत्सामेति ।** तथा च तन्निषेधस्य तत्सामग्रीनिषेधपर्यवसानं, मानसं स्मरणा-

ॐ **ज्योत्स्ना** ॐ

ऽग्रहणम्, विसर्जनीयस्य त्रैपादिकत्वेन स्थानिवत्सूत्रदृष्ट्याऽसिद्धत्वात्स्थानिवत्वाप्रवृत्तौ यत्वाप्राप्ते-र्देवाः सन्तीत्यादेः सिद्धेरिति बोध्यम् । **अवर्जनीयत्वेनेति ।** विषयसन्निधाने 'ज्ञानं मे मा जायता'-मितीच्छायां सत्यामपि तदभावस्य कर्तुमशक्यत्वेनेत्यर्थः ।

ॐ **सदाशिवभट्टीयम्** ॐ

द्विर्वचनग्रहणादिति । तत्प्रतिबन्धकप्रवर्तकातिदेशस्याप्यनेन निषेधाङ्गीकारादिति भावः ।

अदर्शनम् । शास्त्रतोनुबन्धादीनाम्, अर्थतो ल्यबन्त इति बोध्यम् । उभाभ्यां प्रसक्ति

ॐ **विषमपदविवृतिः** ॐ

दित्यरुचेराह-**पूर्वत्रासिद्धे इति । अनुत्पत्तेरेवेति ।** 'प्रक्षालनाद्धि पङ्कस्ये'ति न्यायात् ।

ॐ **वरवर्णिनी** ॐ

शास्त्रतोर्थतो वेति । आद्योदाहरणं—वारि-राजेत्यादि, तत्र हि—स्वौजसित्यादिना सोः प्रसक्तिः । अन्त्योदाहरणं-'श्वशुराज्जिहेती'ति, अत्र हि 'वीक्ष्ये'त्यस्यार्थतः प्रसक्तिः । **तत्सामग्रीति** । ज्ञाने-विषयविधया कारणीभूता या तत्तच्छब्दोच्चारणप्रयोज्या सत्ता, तदभावो लोपपदार्थ इत्यर्थः । 'निषिध्यते' इति तु-'राजे'त्यादौ शब्दतः प्रसक्तोच्चारणाभिप्रायेण, श्वशुराज्जिहेती'त्यादौ तु-उच्चारणस्यैव प्रसङ्ग-विरहेणोच्चारणनिषेधासम्भव इति तत्त्वम् ।

च्चारणस्य लोपविधानेन तस्य तस्मिन्विषयेऽनुत्पत्तेरेवान्वाख्यानं प्रत्ययलक्षणार्थमिति बोद्धयम् । अर्थस्यैषा सञ्ज्ञा—व्याख्यानात् । यत्तु—'प्रसक्तस्येति किं? ग्रामे तिष्ठतीत्यादौ 'ल्यब्लोपे' इति पञ्चम्यापत्तेः । अस्ति चात्र ल्यपोऽदर्शनम् । शास्त्रतोऽर्थतश्च न तत्प्रसक्तिरिति न दोष'इति, तन्न । तेन प्रत्यासत्त्या ल्यबन्तार्थकर्माधिकरणयोरेव पञ्चमी-विधानेन तस्यात्राप्राप्तेः । तत्त्वे तु अस्त्येवार्थतो ल्यबन्तस्य प्रसक्तिः । तस्मात्त्रपु इत्यत्र

❁ अभिनव-चन्द्रिका ❁

श्रवणापत्तिरिति वाच्यं, 'च्लेः सिजि'त्यस्य—'च्लित्वावच्छिन्नस्य स्थाने झलादिप्रत्ययाव्यवहित-पूर्वत्वविशिष्टं यत् ह्रस्वान्तमङ्गं तदव्यवहितोत्तरत्वाभाववान्सिच्त्वावच्छिन्नो भवतीत्यर्थात् । 'ह्रस्वादङ्गा'दिति च तात्पर्यग्राहकमिति प्रागेवावोचाम । वस्तुतस्तु भावरूपादेश इव अभावरूपादेशेऽपि स्थानिघटितेऽसाधुत्वं आदेशघटिते साधुत्वमित्यन्यत्र विस्तरः । **त्रपु इत्यत्रेति** । नच प्रत्ययलक्षणेन पित्कृद्बुद्धावपि ह्रस्वान्ततदादित्वाभावात्कथं तुगापत्तिरिति वाच्यं, 'लिट्त्रपु' इत्यादौ प्रत्ययलक्षणेन कृत्परत्वस्य, स्वतश्च पित्कृन्निरूपिततदादित्वस्य सत्त्वेन प्रसक्तस्येति पदाभावे तुगापत्तेः । मूलन्तु लिट्-त्रपु इत्यादेरुपलक्षणतया योजनीयम् ।

विनिगमनाविरहादिति । चिन्त्यमिदं, विनिगमनाविरहेण तात्पर्यानिर्णये शाब्दबोधस्यै-वानुत्पत्तेः । किन्तु—भाष्ये उभयथा व्याख्याकरणेन आवृत्त्यार्थद्वयं स्वीक्रियत इति बोध्यम् ।

❁ चिदस्थिमाला ❁

त्मकं वा तज्ज्ञानं त्विष्टमेव, अत एव 'स्मृत एवानुबन्धः कार्यसाधक' इति ग्रन्थकृतां व्यवहारः । एतेन श्रवणस्य श्रोतृव्यापारत्वेन तस्यैव तत्र निषेधः स्यान्न प्रयोक्तृव्यापारस्योच्चारणस्येति**दण्डयुक्तमपास्त**मिति भावः ।

नन्वेवं शब्दानित्यत्वापत्तिर्भुक्तवन्तमितिन्यायेन जातानिवृत्त्या शास्त्राप्रामाण्यापत्तिश्चात आह—**तत्रेति** । उक्तोर्थः । 'प्रत्ययलोपे 'इत्यस्य 'प्रत्ययलक्षणार्थ'मित्यत्रान्वयः । सकललक्ष्याभिप्रायः समुच्चयः । एवेन जातनिवृत्तिव्यवच्छेदः । अवयवलोपशास्त्रैरपि तत्तदवयवरहितस्यैव तत्तद्विषये प्रत्ययत्वादि बोध्यत इति भावः ।

नन्विदमयुक्तं, स्वं रूपमितिवचनाच्छब्दस्य सञ्ज्ञाप्रसङ्गेन तदर्थस्याप्रसङ्गादत आह—**अर्थस्यैवेति** । महासञ्ज्ञाकरणसामर्थ्यात्, लोपनं लोप इति हि तदर्थः । नहि शब्दो लोपनक्रियेतिकैयटादयः । वस्तुतस्तु प्रसक्तादर्शनस्येत्यर्थलाभार्थं स्थानेपदस्येव नवेतीत्यत इतिशब्दस्याप्यनुवृत्तिः सुलभेति, तथा भाष्योक्तमेव युक्तं, लुप्ऌ छेदने इति धात्वर्थानुसारेणान्वर्थत्वासम्भवादिति बोध्यम् । किञ्च स्वं रूपमित्यस्य प्रत्याख्याने तदननु-वृत्तावपि यत्रार्थे कार्यबाधस्तत्र तच्छब्दग्रहणमत एव कर्मादीनामर्थसञ्ज्ञात्वं, लक्ष्यानुसारिव्याख्यानेन सर्वेष्टसिद्धिस्तदाह—**व्याख्यानादिति** । **कौस्तुभा**द्युक्तिं खण्डयति—**यत्त्विति** । ग्रामाधिकरणिका स्थितिरिति तदर्थः । **पत्तिरिति** पाठः । पत्तेरिति पाठे प्राग्वद्योज्यं । चो ह्यर्थे । तदुक्तौ तु नापत्तिरित्याह—**शास्त्रेति** । चः समुच्चये । तेन=ल्यब्लोपे इति वार्तिकेन । एवमग्रेऽपि । तदर्थनिरूपिताधिकरणत्वे तु इष्टापत्तिः पञ्चम्या इत्याह—**तत्त्वेत्विति** । एवञ्च तेनापि न वारणमिति भावः । ननु तर्हि किन्तस्य प्रत्युदाहरण-मत आह—**तस्मादिति** । तस्यायुक्तत्वादित्यर्थः । 'तदभावे' इति शेषः । ननु पित्कृता प्रकृत्या-

❁ सदाशिवभट्टीयम् ❁

दर्शयन् प्रत्ययलोपविषये निषेध एव कुतो नेत्याशङ्कां दूरीकुर्वन्नाह—**तत्रेत्यादिना** । यथाश्रुते त्वश्रवणाय लोपावश्यकत्वेन प्रत्ययलक्षणार्थमित्यस्यासङ्गतिः । **प्रसक्तस्येति किमिति** । 'इति तु ने'ति शेषः, कौस्तुभे पञ्चम्यापत्तेरित्येव पाठात् । **तत्त्वेत्विति** । ग्रामस्य ल्यबन्तार्थनिरूपिताधिकरणत्वे त्वित्यर्थः । **दिगिति** ।

क्विपोऽदर्शनसत्त्वेन प्रत्ययलक्षणेन तुगापत्तिर्दोषः । कृत्प्रत्ययेन प्रकृत्याक्षेपस्तु न, अत्रैव प्रकृतिं विनाऽतिदेशतः प्रत्ययज्ञानसत्त्वेन व्यभिचारात्तदाक्षेपासम्भवात् ।

इति पक्षे इति । विनिगमनाविरहादिति भावः । द्वित्वस्य त्रैपादिकत्वात्तत्र न यणो बहिरङ्गासिद्धत्वम् । अत एव दद्ध्यत्रेति भाष्ये उदाहृतम् । **धकारयकारयोरिति** । तेन विसर्गादिद्वित्वेनाधिक्ये ऽपि न क्षतिः । **द्विधमिति** । द्विधत्वं प्रक्रियायां बोद्ध्यम् ।

❀ अभिनव-चन्द्रिका ❀

ननु पूर्वधस्य जश्त्वेन दकारे द्विधमित्यनुपपन्नमित्यत आह—**प्रक्रियायां बोध्यमिति** । **तद्विषयत्वाच्चेति** । चो हेतौ । यतोऽन्याकृतिकरणे भिन्नार्थत्वसम्भावनाविषयोऽयं न्यायोऽतः सार्थकानेकव्यक्तिविषयोऽयं न्याय इति भावः ।

❀ चिदस्थिमाला ❀

क्षेपेणापि तुको वारणमत आह—**कृदिति** । उद्योतादिव्यक्तदोषान्तरसत्त्वेऽपि निष्कृष्टं दोषमाह—**अत्रैवेति** । यद्यपि पक्षद्वयस्य भाष्यारूढत्वं तथापि तत्रैव किं मानमित्याशङ्कायामाह—**विनीति** । कौस्तुभरत्नाकराद्युक्तिं खण्डयति—**द्वित्वस्येति** । पक्षद्वयेपि तत्र तदप्रवृत्तेर्भाष्यसिद्धान्तादिति भावः ।

अत्र मानान्तरमाह—**अत एवेति** । मयः परस्य यणो द्वित्वे इति भावः । पुनर्द्वित्वस्य कथमप्यप्राप्तेर्मनोरमादौ प्रतिपादितत्वेन **रत्नाकरदण्ड्या**दिग्रन्थासङ्गतिरितिध्वनयन्नाह—**तेन विसर्गादीति** । आदिना सपरिग्रहः । नन्वेकस्य जश्त्वेन दकारे प्रयोगे न द्विधत्वमत आह—**द्विधत्वमिति** । तथा भौतपूर्वकं प्रयोगे तत्त्वमिति भावः । **'द्विध'**मित्यग्रिमप्रतीकमिति

❀ सदाशिवभट्टीयम् ❀

एङ्ह्रस्वादित्यत्रैव प्रत्ययग्रहणपरिभाषोपस्थानेनैतद्वारणे तु सोमसुत्रपु इति प्रत्युदाहर्त्तव्यम् । अत्र हि सुनोतेः प्राप्तस्य क्विपोऽदर्शनस्य सुनोतेरग्रे इव त्रपुशब्दादग्रेपि सत्त्वेन तस्यापि लोपसञ्ज्ञायां प्रत्ययलक्षणेन त्रपुशब्दादग्रेऽपि क्विब्बुद्धिसत्त्वेन तद्बुद्ध्यवधित्वस्य सुनोतावविवादात् । तदादित्वस्य त्रपुशब्दान्ते सम्भवादक्षतिः । कृदातिङ्सूत्रभाष्योक्तरीत्या धातुपदानुवृत्त्या तद्वारणे तु 'सोमसुत्पुत्रीयती'त्यादौ दोषो बोध्यः । यत्तु **विवरणे**—नियमाभावान्न परिभाषोपस्थानन्तुग्विधावित्युक्तम् । तस्यायं भावः—सोमसुदाद्यर्थमावश्यके प्रसक्तानुवर्त्तनेऽनियमो नेति तेनैव त्रपुसिद्धिर्नान्यथेति भाष्याशय इति भाष्यानुयायित्वादुद्योतस्यासूया न विधेया । ननु प्रत्ययलक्षणस्य नियमार्थत्वात्स्थानित्वेन तुगापादनीयस्तच्चापवादे उत्सर्गकृतवारणाय षष्ठीनिर्दिष्टस्यैवेति न प्रकृते इति चेन्न । प्रसक्ताननुवृत्तावुक्तविषये एव विध्यर्थसम्भवेन नियमार्थत्वस्यैवायोगादित्यादि **दिगर्थो** बोध्यः । **विनिगमनेति** । भाष्यारूढत्वा·

❀ विषमपदविवृतिः ❀

प्रक्रियादशायामिति । परिनिष्ठिते तु जश्त्वेन दकार इति भावः ।

❀ वरवर्णिनी ❀

तुगापत्तिर्दोष इति । ननु त्रपु इत्यादौ प्रत्ययलक्षणेन क्विप्प्रत्ययातिदेशेऽपि त्रपु इत्यस्यातिदिष्टक्विप्तदादित्वविरहेण न तुगापत्तिरिति चेन्न । प्रत्ययसत्ताव्याप्यसत्ताकनिखिलधर्मातिदेशस्याभिप्रेततया तदादित्वातिदेशस्यापिलाभेन तुगापत्तेः सत्त्वात् । **सदाशिवभट्टास्तु**—'त्रपु' इति—'अग्निचित्रपु' 'सोमसुत्रपु' 'लिट्–त्रपु' इत्यादेरुपलक्षणं, तेन चित्सुदादिपदोत्तरवर्तमानस्य क्विपस्त्रपुपदोत्तरमतिदेशेन तन्निरूपिततदादित्वस्य चा'ग्निचित्रपु'इत्यादौ स्वतः सिद्धत्वेन तुगापत्तिरतः **प्रसक्त**पदम् । तुग्विधौ 'धातो' रित्यस्यानुवृत्तौ तु 'सोमसुत्–युति'रित्यस्योपलक्षणमेतदित्याहुः ।

'एकस्या आकृतेश्चरितः प्रयोगो न द्वितीयस्यास्तृतीयस्याश्च भविष्यती'ति 'कृञ्चानुप्रयुज्यते' इति सूत्रभाष्योक्तन्यायेनैकस्य द्वित्वे परस्य तदभावोऽनुचित इति न वाच्यम्। सार्थकानेकविषये तन्न्यायाङ्गीकारात्। यत्रान्याकृतिकरणे भिन्नार्थत्वसम्भावना तद्विषयत्वाच्च। 'हलो यमा'मिति लोपे द्वित्वाभावे चैकधमेव रूपम्।

नादिन्या। 'यरोऽनुनासिके' इत्यतो 'यर' इति वर्त्तते। 'पुत्रशब्दस्ये'त्यवयव-

---

❀ चिदस्थिमाला ❀

सूचयञ्शङ्कते—**एकस्या इति**। 'यतोऽत' इति शेषः। यत एकस्या आकृतेः=स्वरूपस्य प्रयोगश्चरितः= कृतोऽतो द्वितीयस्यास्तृतीयस्याश्च नेत्यर्थः। चश्चतुर्थ्यादिसमुच्चायकः। अत्र मानमाह—**कृञ्चेति**। तत्र हि रूपाभावेन्यपरप्रयोगमाशङ्क्यानया सन्दूष्यान्यथैव सिद्धातन्तिम्, अत एव 'गवां स्वामी अश्वानाञ्चे'त्याद्येव, न तु अश्वेषु चेत्याद्यपि। एवञ्च तथा प्रयोगेऽसाधुरिति तात्पर्यम्। कैयटेनास्य वेदप्रसिद्धकत्वमपि तत्रोक्तं तत्राप्येककर्मविषयशास्त्रविधेयसाधनानेकत्वे एवायम्। अत एव व्रीहिसाधनकप्रयोगे तन्नाशे न यवोपादानं, किन्तु तत्सदृशनीवाराद्युपादानमेव। तत्र हि सादृश्यात्तद्बुद्ध्युदयेन तत्प्रयोगनिर्वाहात्। अन्यथा तु तत्र तद्बुद्ध्यनुदयेन तदुपक्रान्तक्रियानिर्वाहो न स्यात्। एवं 'खादिरे बध्नाती'त्यादावपि बोध्यम्। भिन्नपदविषयोयं न्यायो नैकपदविषयः, वेदेप्यनेकद्रव्यविषये एव यज्जातीयेन प्रक्रमस्तज्जातीयादानमिति नियम इत्यन्ये। अत एव 'सर्वस्य द्वे' इत्यत्रादौ द्वित्वमिति पक्षे द्रोग्धा स्नेग्धेत्यत्र घत्वढत्वयोरापत्तिरिति भाष्यकारोक्तं दूषणं सङ्गच्छते। सर्वं चेदं प्रयोगपदेन सूचितमिति बोध्यम्।

इयं शङ्काग्रेऽपीति सूचयन्नाह—**नैकस्येति**। परशब्दोऽन्यार्थः। प्रयोगपदस्वारस्यादेवाह—**सार्थकेति**। साभिधेयानेकविषयत्वे सफलानेकत्वे, चेत्यर्थः। अर्थबोधनार्थं शब्दप्रयोगात्, फलार्थं प्रयोगानुष्ठानाच्चेति भावः। वास्तवं न्यायबीजं ध्वनयन्समाधितत्त्वमाह—**यत्रेति**। **भिन्नार्थत्वेति**। **भिन्नाभिधेयकत्वस्य** भिन्नफलकप्रयोगान्यत्वस्य चेत्यर्थः। अस्ति च तत्र 'गवां स्वामी अश्वेषु चे'त्युक्ते तत्स्वामी तत्र तिष्ठतीत्यर्थान्तरप्रतीतिः, तन्नाशे तदुपादाने तत्प्रतीतिश्च। तथाच लोकवेदसिद्धप्रतिपत्तिलाघवमूलकोऽयं न्याय इति तत्त्वम्। अत एवालङ्कारिका ईदृशे विषये क्रमभङ्गं दोषमाहुः। न चैवं प्रकृते इति भावः। उक्तार्थमेवाह—**हल इति**। **वर्त्तत इति**। निषेधस्य प्राप्तिपूर्वकत्वादच इत्यस्यानुवृत्तिर्नोक्ता। नन्वेवं वृत्त्यसङ्गतिरत आह—**पुत्रेति**। 'वृत्ता'वित्यादिः।

❀ सदाशिवभट्टीयम् ❀

दित्यपि बोध्यम्। **आकृतेरिति**। स्वरूपस्येत्यर्थः। चरितः=कृत इत्यर्थः। अधिक**मुद्योत**तोऽवसेयम्।

❀ विषमपदविवृतिः ❀

सार्थकेति। वस्तुतो'ऽभावो नाकृति'रिति तन्न्यायविषयो नात्र। **भिन्नार्थत्वसम्भावनेति**।

❀ वरवर्णिनी ❀

एकस्या इति। प्रकृते एकस्या द्वित्वाकृतेर्धकारविषये प्रयोगे यकारस्यापि द्वित्वमेवोचितन्न तु द्वित्वाभाव इति शङ्काशयः। **सार्थकेति**। योऽर्थो यया शब्दाऽऽकृत्या प्रतिपादयितुमुपक्रान्तस्तयैवासौ निर्वाह्यो न त्वन्यशब्दाकृत्येति कैयटोक्तेरिति भावः। तदेवं 'येन सम्बन्धेन यदर्थान्वितयदर्थबोधतात्पर्येण यादृशानुपूर्व्यवाच्छिन्नः पूर्वं प्रयुक्तस्तेन सम्बन्धेन तदर्थान्विततदर्थबोधतात्पर्येण तादृशानुपूर्व्यवच्छिन्नस्यैव पश्चात् प्रयोग' इति भाष्योक्तन्यायार्थो बोध्यः, अत एव 'स्वामीश्वरे'ति सूत्रेण षष्ठीसप्तम्योर्द्वयोरपि साधुत्वेपि 'गवामश्वानाञ्च स्वामी'त्येव प्रयुज्यते, न तु 'गवामश्वेषु च स्वामी'ति **गौडाः**।

षष्ठी । 'आदिनीशब्दे परे' इति च प्राधान्याद्यर एव विशेषणम् । सूत्रे 'आदिनी'ति ङ्यन्तानुकरणं लुप्तसप्तमीकम् । अत एव 'तत्परे चे'त्यस्या'ऽऽदिनीशब्दो यस्मात्परस्तत्र परे' इत्यर्थं हरदत्तो व्याख्यत् । अद्धातौ माधवोऽप्येवमेव—' । ईदृशाक्रोशस्य स्त्रीष्वेव

❀ चिदस्थिमाला ❀

अत एव तत्रैवाह—**आदिनीति** । अत एव चः । एतेन मूले तथैव पाठः सूचितः । 'उभयत आश्रयणे' इत्यस्य निर्मूलत्वेनासम्भवस्य दुर्वचत्वादाह—**प्राधान्यादिति** । एतेन पुत्रादिनीत्यादावुभयत इति निषेधात्तस्य तत्परत्वं दुर्लभमित्यपास्तम्, अत एव पुत्र्यादिनीत्यत्र लिङ्गविशिष्टेति प्राप्तोऽपि निषेधो न, तत्रैकरेफमात्रव्यवाये साफल्येनानेकव्यवायेऽप्रवृत्तेः । न च तत्राप्यचः परेति स्थानिवत्त्वे नानेकव्यवायः, यस्येतिलोपस्य स्थानिवत्त्वस्य तत्रापि तुल्यत्वात्पूर्वत्रासिद्धे इति निषेधाच्च । श्रौतं तदव्यवधानन्तु तत्रापि तुल्यमेव, रेफयकारयोस्तु तत्र रेफस्यैव प्राप्तिरेव नेति बोध्यम् । नन्वा-'दिनीशब्देपर'इति वृत्तिरयुक्ता, सूत्रे नान्तप्रकृतिकसप्तमीसत्त्वात्, अतएव 'तत्परे चे' **त्यत्ररत्नाकरदण्ड्या**दिभिस्तथा व्याख्यातमत आह—**सूत्रे इति** । 'छन्दोव'दितीष्टेरिति भावः । भाष्यादौ तथानुक्त्या तद्रूपगमकाभावादत्रान्यसम्मतिमाह—**अत एवेति** । न केवलं परसम्मत्यैव तथा, युक्तितोऽपीत्याह—**ईदृशेति** । आक्रोशमात्रन्त्वन्यत्रापीति भावः । 'प्रायेणे'ति शेषः । अत एव तथा भाष्योदाहरणसङ्गतिः । **तदाहेति** । तत्सर्वमाहेत्यर्थः । **पुत्रादिनीतीति** । 'सुप्यजाता'वितिणिनिः । एतेना'चो रहाभ्यां द्वे' 'नाचि च' 'आदिन्याक्रोशे पुत्रस्ये'ति वाच्ये नञ्द्वयोपादानेन नञ्घटितवाक्यस्यानित्यत्वकल्पनेन स्त्रियामेव प्रवर्त्तते नान्यत्र, न च वैपरीत्य कुतो न, उदाहरणपरभाष्यविरोधापत्तेरित्यपास्तम् । नञ्घटितमनित्यमित्यस्यासत्त्वाच्च, नञ्द्वयोपादानन्तु स्पष्टार्थमेव, यद्यपि प्रकृतसूत्रसाहचर्यादत्रोपसङ्ख्यातत्वाच्च 'वा हते'ति स्त्रियामेव प्रवर्त्तते इति सुवचं तथापि तत्र तत्साधकयुक्तेरत्रापि सम्भव इत्याशयेनाह—**तदाहेति** । वार्तिके लाघवादुक्तरीत्यानतिप्रसङ्गाच्च तथोक्तिः । पुत्रो हतो ययेत्यादिबहुव्रीहिः । आहिताग्न्यादिः । 'अस्वाङ्गपूर्वपदाद्वे'तिङीष् नादिन्येति

❀ सदाशिवभट्टीयम् ❀

नादिन्या । **प्राधान्येति** । अत एव पुत्र्यादिन्यां लिङ्गविशिष्टपरिभाषया नातिप्रसङ्गः । नान्यवहितातिरिक्तव्यवायात् । 'नाचि च, आदिन्याक्रोशे पुत्रस्ये'त्येव सिद्धे नञ्द्वयोपादानं स्पष्टार्थमित्याहुः ।

❀ विषमपदविवृतिः ❀

यथा 'गवामश्वेषु च स्वामी'त्यत्र । **पर एवेति** । तेन लिङ्गविशिष्टपरिभाषया 'पुत्र्यादिनी'त्यत्र न द्वित्वनिषेधः, 'येननाव्यवधान'न्यायेनैकवर्णव्यवधान एव तत्प्रवृत्तेः । किञ्च–पुत्रशब्दस्य विशेषणत्वे 'उभयत आश्रयणे नान्तादिव'दिति निषेधात्पुत्रशब्दस्यादिनीपरत्वमेकदेशविकृतन्यायेनोपपादनीयं स्यात्, एकदेशविकृतन्यायश्चात्तपरिमाणे न प्रवर्त्तते, यर्विशेषणत्वे तु पूर्वान्तवद्भावेन पुत्रशब्दत्वं, परादिवद्भावेन चादिनीशब्दत्वं, पौर्वापर्याश्रयणे एवोभयत आश्रयण इति निषेधः । 'अचः परस्मि-न्निति स्थानिवत्वं 'पूर्वत्रासिद्ध'मिति निषिद्धम् । न चादिनीशब्दस्य यर्विशेषणत्वे 'यणो मय' इति रेफस्य प्राप्तं द्वित्वमेव निषिध्येत, तस्यादिनीशब्दपरत्वात्, तशब्दस्य तदभावादिति वाच्यम्, अचः परस्य यर इत्यर्थाश्रयणेनादोषात् । 'नेमौ रहौ कार्यिणा'विति भाष्येण रेफस्य द्वित्त्वकार्यित्वाभावाच्च । **अतएव=ङ्यन्तानुकरणत्वादेव** । **आदिनीशब्दो यस्मादिति** । अन्यथा'ऽदिन्शब्दो यस्मा'दिति वदेत् ।

❀ वरवर्णिनी ❀

लुप्तसप्तमीकमिति । आर्थिकार्थकथनमेतत्, वस्तुतस्तु एवं सति—'ईदूतौ च सप्तमी'ति प्रगृह्यत्वापत्तिः, 'यः शिष्यते' इति न्यायेनादिनीतीकारान्तेन सप्तम्यर्थबोधनात्, अतोऽत्र 'सुपां सुलु'गिति ङेरादेश इत्येवोचितम् । आकारादेशे तु न प्रगृह्यत्वापत्तिः, सप्तम्या ईकारान्तत्वाभावात् ।

दर्शनाच्च । आक्रोशो निन्दा, तदाह—**पुत्रादिनीति** । तादृशाक्रोशस्य स्त्रीष्वेव दर्शनादाह–**पुत्रहतीति** । 'अनचि चे'ति सिद्धे—'पुत्रस्य क्तान्ते चेद्धतजग्धयोरेव, आक्रोश एवे'ति नियमार्थमिदम् ।

संयुक्तेष्विति । 'त्रिप्रभृति'ष्विति सूत्रे वर्णानां सजातीयानामेव ग्रहणं, परस्परसाहचर्यात् । न च तथाचः सम्भवन्ति । अत एव'अचो रहाभ्या'मिति सार्थकम् ।

❀ अभिनव-चन्द्रिका ❀

अचो रहाभ्यामिति सार्थकमिति । नचाग्रे त्रिप्रभृतिवर्णमध्येऽचः परस्य यरो द्वे वा न स्त इति वक्ष्यमाणत्वेन 'अचो रहाभ्या'मित्यनेन चाऽचः पराभ्यां रेफहकाराभ्यां परस्य यरो द्वित्वविधानेनोभयोरेकविषयत्वाभावेन सजातीयत्रिप्रभृतिवर्णाग्रहणेऽपि न 'अचो रहाभ्या'–मित्यस्य वैयर्थ्यमिति वाच्यम्, 'नेमौ रहौ कार्यिणौ' किन्तर्हि ? निमित्तं द्विर्वचनस्ये'ति भाष्यप्रामाण्येन निमित्तविषयत्वेतरद्विर्वचनीयविषयताश्रयत्वेन ग्रहणे कर्त्तव्ये रेफस्याविद्यमानवद्भावेनोभयोरेकविषयत्वसत्त्वेनादोषात् ।

❀ चिदस्थिमाला ❀

सूत्रसार्थक्यायाह–**क्तान्ते चेदिति** । अनेन पुत्रादिनीत्यादौ दोषाभावः सूचितः । एतेन'–'हतजग्धयोः परतः पुत्रशब्दस्यैवे'ति नियमः–' इति **दण्डयुक्तमपास्तम्** । अदुष्टहतीत्यादौ दोषापत्तेश्च, लाघवान्मतान्तरमाह—**आक्रोश एवेतीति** । ननु संयुक्तेष्वित्यस्य नानुवृत्त्यादीति कथं तल्लाभोऽत आह—**त्रिप्रेति** । प्रक्रमादाह—**वर्णानामिति** । **परस्परेति** । 'रामार्जुनगतिस्तयो'रितिवदिति भावः । ननु एवमपि हलामेव ग्रहणासिद्ध्या विशिष्य तदुक्तिः कथमत आह—**न चेति** । न हीत्यर्थः । तथा=द्वित्वप्राप्तियोग्ययर्विशिष्टाः । [निषेधाद्वित्वस्यायमसम्बन्धस्य क्लृप्तत्वात्, एतेनाच एवाप्राप्तेः, शाकटायनस्य नित्यानुवादकत्वेनान्यमते द्वित्वातात्पर्येण तत्र तत्सम्भव ? इत्यपास्तम् ।] अत्र ज्ञापकमप्याह—**अत एवेति** ।

❀ ज्योत्स्ना ❀

एकस्य द्वित्वे परस्येति यकारादेरित्यर्थः । **इति सार्थकमिति** । अच इत्यननुवृत्तिं शाकटायनग्रहणस्य च पूजार्थतामभिप्रेत्येदमुक्तम् । यद्वा–विकल्पार्थत्वेऽपि नञोऽननुवृत्तिरुभयत्र विभाषा चेत्याशयः ।

❀ सदाशिवभट्टीयम् ❀

आक्रोश एवेति । अत्राहुः—'श्रुत एव एवकारान्वय' इति 'ब्रह्मभ्रूणे'तिसूत्रस्थोद्योताद्युक्तरीत्याऽऽद्यनियम एव युक्तः,नोचेत्तयोस्तस्मिन्पुत्रस्यैवेति तृतीयः कुत उपेक्षित इति चिन्त्यमिदमिति । **त्रिप्रभृ** । **अत एवेति** ।

❀ विषमपदविवृतिः ❀

पुत्रहतीति । पुत्रो हतो ययेति विग्रहः । 'बहुव्रीहेश्चान्तोदात्तात्' 'अस्वाङ्गपूर्वपदाद्वे'ति ङीष् । **अत एवेति** । सजातीयानां ग्रहणादेवेत्यर्थः । इदं चिन्त्यं–विजातीयानां ग्रहणेऽप्यचः परस्य यर इत्यर्थस्य

❀ वरवर्णिनी ❀

त्रिप्रभृतिष्विति । 'त्रितयाद्यात्मकसमुदायघटकस्य अचः परस्य यरो द्वे वा न स्त'इत्यर्थः । एवं चतुष्टयात्मकसमुदायादावपि बोध्यम् । **परस्परेति** । 'सजातीयारब्धसमुदायस्य विजातीयारब्धसमुदायस्य च बोध्यत्वप्रसङ्गे सजातीयारब्धसमुदायस्यैव बोध्यत्वेन तात्पर्यविषयत्व'मित्यर्थकसहचरिताऽसहचरितयोः सहचरितस्यैवेति परिभाषान्तरादित्यर्थः । **नच तथेति** । यद्यपि–'तितउ अत्रे'त्यत्राचां सम्भवस्तथापि तत्सम्बन्ध्यचो यत्त्वाभावादचस्तथा न सम्भवन्तीत्यर्थः । **अत एव**=प्रकृतसूत्रे सजातीयारब्धसमुदायस्य

निर्धारणे सप्तमी, 'अच' इत्यनुवर्त्तते, 'त्रिप्रभृतिसंयुक्तवर्णमध्येऽचः परस्य यरो द्वे न स्त' इत्यर्थः । तेनेन्द्रः राष्ट्रमित्यत्र नकारषकारयोः प्राप्तद्वित्वस्यैव निषेधविकल्पः । 'अनचिच'

❀ चिदस्थिमाला ❀

सजातीयग्रहणादेवेत्यर्थः । अन्यथा तत्सूत्रविषये तदुपात्तसामान्यवर्णत्रयावश्यकत्वात्सर्वत्र तत्प्राप्तद्वित्वस्थानेन (त्रिप्रेतिसप्तम्यधिकरणसप्तम्या वा आदिषु वर्णमात्रेषु द्वित्वं वा नेत्यर्थकेन) निषेधे तदानर्थक्यं स्पष्टमेव, [मप्युक्तरीत्या । नन्वेएमनचीति निषेधस्य नित्यं यत्वेन न ज्ञापकत्वमिति भावः । अनेनापि 'निषेधविकल्प' इति न्यायेन द्वित्वं विकल्पेन विधीयते । सर्वत्रेत्यनेनैव सिद्धे तदानर्थक्यमेवातस्तत एवाह—**निर्धेति** । अस्य त्रितयविषयत्वात् । अपरे तु वृत्तिरेनेन गर्भिनेता । नन्वेमपि तन्मध्यस्थयरो द्वे वा नेत्यर्थेन इन्द्र इत्यादौ दकारादेरप्राप्तद्वित्वस्यापि उक्तरीत्या नकारादेरिव निषेधविकल्पापत्त्या पक्षे द्वित्वापत्तिरेवं बहून्जीत्यादौ नस्याचोरिति प्राप्तस्य निषेधापत्तिरत आह—**अच इति** । सूत्राणां षद्वित्वधत्वस्यैव सम्मतत्वात् । तच्च श्रुतत्वात् यर एव विशेषणमेवं सति वृत्तेः शाब्दार्थमाह—**त्रीति** । तेन अचीत्यनुवर्तते न द्वित्वे परसवर्णस्य सिद्धत्वादाह—**नकारेति** ?[1]] **प्राप्तेति** । अनचीतीत्यादिः । एतोनोक्त-

❀ सदाशिवभट्टीयम् ❀

विजातीयग्रहे त्रिप्रभृतीत्यस्यायमर्थः—अचः परस्य त्र्यादिषु वर्णेषु मध्ये यरो द्वित्वं वेति । ततश्च हर्य्नुभवेऽप्यनेन सिद्धौ किन्तेनेतीति भाव इत्याहुः । अत्र तिस्रोऽसङ्गतयः—अचः परस्यानेन प्रतिषेधस्तेन रहाभ्याम्परस्य विधि-

❀ वरवर्णिनी ❀

ग्रहणादेव, 'अच'इत्यस्यानुवर्त्तनादेव च । विजातीयारब्धसमुदायघटकयकारस्य 'त्रिप्रभृति'ष्वित्यनेनैव द्वित्वे सिद्धे'ऽचो रहे'ति व्यर्थं स्यादिति भावः । **परे तु**—''बाध्यसामान्यचिन्तया 'त्रिप्रभृति'ष्विति-सूत्रघटका(ऽनुवृत्ताऽ)ज्पदप्रयोज्यविषयतायाः—'अनचीचे'ति'अचो रहे'ति सूत्रद्वयघटकाच्पदप्रयोज्यविषयताऽन्यतरत्वेन व्यापिका 'वाक्क्'इत्यादाव'चो रहे'त्यस्याप्राप्तावपि 'अनची'त्यस्य प्राप्तेः सत्त्वात् । एवञ्च व्यापकविषयताश्रये व्याप्यविषयत्वाश्रयातिरिक्तत्वेन सङ्कोचे 'त्रिप्रभृति'ष्विति सूत्रघटकाच्पदप्रयोज्याविषयताश्रयत्वेन सङ्कोचः स्यादिति 'अचो रहे'तिसूत्रं व्यर्थं स्यात् । 'हर्य्नुभव'इत्यादौ त्रिप्रभृतिष्वित्यस्यैव प्रवृत्तेरतः सजातीयारब्धसमुदाय एव ग्राह्यः, । सजातीयानामेव ग्रहणे तु—'सजातीयत्रिप्रभृतिवर्णारब्धसमुदायघटकस्याचः परस्य यरो द्वे वा न स्त' इत्यर्थक'त्रिप्रभृति'ष्विति सूत्रघटकाच्पदप्रयोज्यविषयताया 'हर्य्नुभवो' 'नह्यस्ति' इत्यादिष्वभावेन'अचो रहे'ति सूत्रघटकाच्पदप्रयोज्यविषयतायाश्च सत्त्वेना'ऽचो रहे'ति सूत्रं सफल''मित्याहुः ।

केचित्तु—'नेमौ रहौ कार्यिणा'विति भाष्यप्रामाण्येन—'अचो रहाभ्या'मित्यस्य—अचः पराभ्यां रहाभ्यां परस्य यरो यथा द्वित्वं भवेत्तथा कर्त्तव्यमित्यर्थमेकं कल्पयित्वा द्वित्वविषये रहयोरविद्यमानवद्भावं प्रकल्प्य—'अचः परस्य यरो द्वे वा स्त' इत्येवमर्थान्तरेण '**हर्य्नुभवः**' इत्यादौ तेनैव 'अचोरहे'त्यनेन द्वित्वं विधीयते । 'अनची'ति निषेधस्तु—'च'प्राप्तद्विर्वचनस्यैवेति'हर्य्यनुभव'इत्यादौ न तेन निषेध इति रेफस्याविद्यमानवद्भावाद्यकारस्य द्वित्वं सिद्धम् । 'अचो रहे'तिसूत्रीयाच इति वाक्येन यत्र रहयोरविद्यमानवद्भावस्तत्रैव द्वित्वं नान्यत्रेति 'दधि' 'मध्वि'त्यादौ न धकारस्य तेन वचनेन द्वित्वापत्तिः, तदेवं स्थिते विजातीयारब्धप्रकृतसमुदायस्य ग्रहणे'ऽचो रहे'ति **सूत्रीयाच** इति द्वित्वविधायकवाक्यस्य वैयर्थ्यं, 'हर्य्नुभव'इत्यादौ रेफस्याविद्यमानवद्भावाद्यकारस्यैव द्वित्वमच इत्यनेन विधेयं, तस्य च 'त्रिप्रभृति'ष्विति द्वित्वनिषेधो वाच्य इति समानविषयत्वाद्बाधकतया निषेधस्यैव तत्र प्रवृत्तेरित्याहुरिति—**श्रीबालशास्त्रिचरणाः** ।

१. [ ] एतदन्तर्गतः पाठोऽसंलग्न इव भाति, असार्वत्रिकश्च ।

'सर्वत्र शाकल्यस्ये'त्येव सिद्धे इदं सूत्रद्वयं विकल्पस्य मतभेदप्राप्तव्यवस्थाबोधनार्थमिति बोद्धव्यम् । 'यरोऽनुनासिके' इत्यतो 'वे'त्यनुवृत्त्या'ऽनची'त्येव सिद्धे तु सूत्रत्रयमपि तथेति बोद्धव्यम् ।

अचो र । 'अच' इति श्रुतत्वाद्व्याख्यानाच्च रहाभ्यां सम्बध्यते । 'तस्मादित्युत्तरस्ये'त्येतल्लभ्यमाह–**अचः पराभ्यामिति** । **वा यमीति** । 'झयो ह' इत्यतो'ऽन्यतरस्या'मित्यनुवृत्तेरिति भावः । 'दीर्घादाचार्याणा'मित्युत्तरम्—'अनुस्वारस्य ययि' 'वा पदान्तस्य' 'तोर्लि' 'उदःस्था' 'झयो हो' 'शश्छोऽटी'ति षट्सूत्रीपाठोत्तरं–'झलां जश् झशि' 'अभ्यासे चर्च' 'खरि च' 'वावसाने' 'अणो प्रगृह्यस्ये'ति पञ्चसूत्र्याः पाठ इति—भाष्यसम्मताष्टाध्यायीपाठे तु–वावसाने इत्यतोऽनुवृत्तिर्बोद्ध्या । स्पष्टञ्चास्य वैकल्पिकत्वं लण्सूत्रे भाष्ये ।

आदित्य इति । आदित्यशब्दाच्छेषार्थण्यान्ताद्देवतार्थे ण्यः । 'यस्येति च'-

---

❀ अभिनव-चन्द्रिका ❀

भाष्यसम्मताष्टाध्यायीपाठ इति । अत एव 'उत्कन्दो रोग' इत्यादौ 'उदःस्थास्तम्भो'रिति सूत्रस्थेन 'उत्पूर्वस्कन्देरुपसङ्ख्यान'मिति वार्त्तिकेन पूर्वसवर्णे कर्त्तव्ये'खरि चे'ति चर्त्वसिद्धिः । अन्यथा चर्त्वं प्रति थस्यासिद्धत्वात्तद्दुर्लभं स्यादिति बोध्यम् । **शेषार्थण्यान्तादिति** ।

❀ चिदस्थिमाला ❀

दोषनिरासः । 'अनचिचे'त्यत्र विकल्पाननुवृत्तौ तल्लाभायाह—**सर्वत्रेति** । अत एव मनोरमायां तथोक्तम् । इदं=पूर्वोत्तरं, स्वस्वमतप्रच्युतिदोषपरिहारार्थमिति तत्त्वम्, एतेनोत्तरत्र शाकटायनग्रहणानुवृत्त्यैव सिद्धौ शाकल्यादिग्रहणं व्यर्थमित्यपास्तमिति सूत्राशयः । **श्रुतत्वादिति** । 'श्रुतानुमितयो'रिति न्यायादिति भावः । ननु तत्त्वेऽपि सान्निध्याद्रेत्यस्यैव विशेषणं स्यात्, किञ्चोत्तरसूत्रानुरोधेन यर एव विशेषणमुचितमत आह—**व्याख्येति** । अग्रेऽगत्या तदन्वयेऽप्यत्र प्रत्यासत्त्यादित्यागे मानाभावादित्यर्थः ।

अनुवादे इत्यस्यासार्वत्रिकत्वादाह–**तस्मादिति** । एतेन "परशब्दाध्याहारेणेदं लब्धं, न तु परिभाषया, 'नानुवादे' इत्यस्या जागरूकत्वात्"–इति **प्रकाशोक्तं**, "स्थानेग्रहणेन परिभाषाणामनित्यत्वमात्रं ज्ञाप्यते, न तु इति इष्टस्थले प्रवृत्तिरेवेति न दोष" इति **रत्नाकरोक्तम्**, " अचः परस्य रेफहकाराभ्यां परस्य यर इति वाच्योऽर्थः, न च पृथङ्निमित्तता स्यादिति वाच्यम्, चकाराभावेन स्पष्टप्रतिपत्तयेऽचो द्वेऽनचि, रहाभ्यामित्येव न्यासे कार्ये ईदृशन्यासेन च तदभावकल्पनात् । तत्र**ाणुर**पीतिन्यायेन विधेयसन्निहितत्वेन रहाभ्यामित्यत्रैव निर्दिष्टांशाबाधः । 'अचः' इत्यंशे तु सामर्थ्यात्तद्बाधः, व्यवधानञ्चोपस्थितरेफहकारकृतमेव गृह्यते, नान्यकृतं, तदेतत्फलितमाह—**अचः पराभ्यामिति** । एतेनानुवादे परिभाषाणामनुपस्थितेरिदमनुपपन्नमित्यपास्तम्—" इति **केनचिदुक्तञ्च** परास्तम् । 'इति भाव'इत्यनेन सूचितामरुचिं प्रकटयन्नाह—**दीर्घादिति** । अत एव तुः । यत्त्वत्राण्ग्रहणं ज्ञापकमिति, तन्न । तस्य प्रत्याख्यानात् । तथाच व्याख्यानमेव शरणम्, तद्ध्वनयन्नाह—**स्पष्टमिति** । अपत्यार्थे ण्ये 'आपत्यस्ये'ति सिद्धत्वादाह—**शेषार्थेति** । भवा-

❀ सदाशिवभट्टीयम् ❀

रिति क विषयैक्यमित्येका, शाकटायनमते प्रतिषेधादन्यत्र तत्सार्थक्यमित्यपरा, अनन्तरत्वा'दनचिचे'त्येव प्रतिषिध्येतेति तृतीया । तत्रानन्तरस्यापवाद्यत्वेपि परत्वादस्यापि बाध्यत्वमित्यन्ता शुद्धतरा, 'पूर्वत्रासिद्धीयमद्विर्वचने' इति निषेधात् । आद्ये त्वभिमानकल्पनमन्तरा दुरुद्धरे इति मन्यते । **भाष्यसम्मतेति** । 'उदःस्था' 'शश्छोटी'

❀ वरवर्णिनी ❀

न स्त इति । नादिन्येत्यतो नेत्यनुवृत्तेः । **प्राप्तद्वित्वस्यैवेति** । एवेन—'राष्ट्रशब्दे षकारोत्तरटकारस्य 'शरः खय' इति द्वित्वस्य न निषेधविकल्प' इति सूचयति ।

त्यल्लोपेऽनेन यलोपः । 'आपत्यस्ये'ति तु न । आपत्यत्वाभावात् । हल इति किं ? शय्या । यमामिति किं ? आर्ध्नोत् । यमीति किं ? रामाभ्याम् ।

एचोऽय । 'इचोऽचि यणयवायावः' 'अवावौ यि प्रत्यये' इति सूत्रयितुमुचितमित्याहुः । यथासङ्ख्यसूत्रलब्धमर्थमाह—**क्रमादिति** । उदात्तादिगुणयुक्तानामन्यगुणकव्यावृत्तिस्तु स्थानेऽन्तरतमपरिभाषया बोद्ध्या । एतदेवाभिप्रेत्य यथासङ्ख्यसूत्रे भाष्ये प्रकृतसूत्रे स्थानेऽन्तरतमसूत्रेण व्यवस्थोक्ता—'संवृतावर्णस्य संवृतावर्णो विवृता-

❀ अभिनव-चन्द्रिका ❀

अपत्यार्थण्यान्ताद्देवतार्थे ण्यप्रत्ययेतु 'आपत्यस्ये'ति यलोपे स्वतो द्वियकारकत्वं दुर्लभमिति भावः। **संवृतावर्णस्य संवृतावर्ण इति**। तालुस्थानिकेकारसदृशघटितसंवृतावर्णघटितस्य तालुस्थानिकघटितसंवृतावर्ण-

❀ चिदस्थिमाला ❀

द्यर्थेत्यर्थः । तदेवाह—**अपत्येति** । न च स्थानिवत्त्वं, पूर्वत्रेतिनिषेधात् । नन्वेवं हूहूयति तोष्टूयत इत्यादौ 'वान्तो यी'ति यण्प्रसङ्गो -यथासङ्ख्यसत्त्वादत आह—**अवावाविति** । मात्रालाघवस्यावान्तरपदत्वमादायापि पदलाघवस्य च सत्त्वेऽपि अपाणिनीयत्वादिरूपारुचिराहुरित्यनेन सूचिता । नन्वेवं यथासङ्ख्यसूत्रमत्रैवोचितं लिखितुमिति चेन्न । अन्यार्थमत्रैवावश्यकया'स्थानेऽन्तरतम' इत्यनयैव निर्वाह इति सूचनार्थं तदनुपन्यासात् । एवञ्च 'क्रमा'दिति फलितार्थकथनं, तद्धनयन्नाह—**उदात्तेति** । अत्र भाष्यसम्मतिं, तत्र तद्विरोधञ्चाह—**एतदिति** । **भाष्ये इति** । **उक्तावन्वयः** । 'प्रकृत सूत्रे'इत्यस्य 'व्यवस्थाया'-

❀ सदाशिवभट्टीयम् ❀

त्युत्तरम'भ्यासे चर्चे'ति प्रतीकधारणात्तस्य तत्सम्मतत्वमनुमीयत इति भावः। **हलो यमाम्**। अत्र पर्वयतेः पर्व्-वाति, शुक्रयतेः शुक्र् राति, शुक्लयतेः शुक्ल्-लाति, चर्मयते चर्म्-माति, वृङ्ं वृञ्ञ्ञाचष्टे, विच्, वर्ङ् ङ्वते वर्ञ्-ञुङ्वे इत्युदाहरणानि बोध्यानि। वर्णयतेर्वर्ण्-णिचमाहेत्यपि। तत्र'न पदान्ता''हलोऽण''इत्यनेन मोनुस्वारेण च केषां चिन्निराकरणेप्यन्यानि निराबाधानीत्याहुः। **अवावौ यीति**। वान्त इतिन्यासेनापि व्यपदेशिव-

❀ विषमपदविवृतिः ❀

वक्ष्यमाणत्वेनाचोरहाभ्यामित्यस्य वैयर्थ्याभावात् । 'शेषार्थे'त्यस्य फलमाह—**आपत्यस्येति** । **यमामिति किमिति** । 'हलः परस्य लोप' इत्युक्तावर्वध्यवधिमतोः साजात्याद्धल एव लोपो भविष्यतीत्याशयः । इतरांशे=इकारोकारांशे । नन्वयाद्यादेशे संवृतस्य श्रूयमाणस्यापि शास्त्रदृष्ट्याऽसिद्धत्वाद्विवृतत्वमेवेति चेन्न । एतद्भाष्यप्रामाण्येनासिद्धत्वाभावकल्पनात्। किञ्च सवर्णसञ्ज्ञादृष्ट्या 'अ अ' इति विहितस्य संवृतस्यासिद्धत्वेपि स्थानेन्तरतमसूत्रदृष्व्या नासिद्धत्वं, तस्य लोकन्यायसिद्धार्थानुवादकत्वस्य भाष्यसम्मतत्वात् । लौकिकन्याये च सञ्चारणीये नासिद्धत्वं, 'यस्मिन्विधि'

❀ वरवर्णिनी ❀

संवृतावर्णस्येति । एकारादिपूर्वभागेऽकारसदृशे संवृतत्वमित्यर्थः । अयमाशयः—संवृतप्रयत्नजन्यः संवृताकारो भिन्नः, विवृतप्रयत्नजन्यश्च स भिन्नः, तत्र 'अ अ' इति सूत्रसामर्थ्यात्संवृताकारजनकतावच्छेदकीभूते संवृतत्वे विवृताकारजनकतावच्छेदकत्वमारोप्यते, अत एवाकाराकारयोः सावर्ण्याद्दण्डाढकादौ दीर्घसिद्धिः, 'स्थानेऽन्तरतम'सूत्रे च तादृशाकारादिनिष्ठं संवृतत्वमेवोपयोगीति—'संवृताकारस्य संवृताकार' इति सङ्गच्छते । एतेनै'चो यवायाव' इति सूत्रदृष्ट्या 'अ अ' इति संवृतत्वविधायकशास्त्रस्याऽसिद्धतयाऽयाद्यादेशानां न संवृताकारघटितत्वमिति तादृशमान्तरतम्यं वक्तुमशक्यमित्यपास्तम्। **दण्डिभट्टा**स्त्वन्यथैव समादधुः ।

उपरागात्=आधिक्येन प्रतीयमानात् । ग्रहणं=ज्ञानम् । यथा पाञ्चभौतिके मनुष्यदेहे पार्थिवभागस्याधिक्येन मानमित्याशयः ।

वर्णस्य विवृतावर्ण' इति। एतद्भाष्यप्रामाण्येन ए-ओ इत्यनयोरकारांशे संवृतत्वम्, इतरांशे विवृततरत्वं, तदुपरागाच्च न संवृतत्वस्य पृथग्ग्रहणम् । ऐ-औ इत्यनयोस्त्वकारांशेऽपि विवृतत्वमेवेति बोद्ध्यम् ।

तस्य लो । 'उपदेशेऽ' जित्यत इदित्यनुवृत्त्या विभक्तिविपरिणामेन च सिद्धौ 'तस्य'ग्रहणं सर्वलोपार्थम् । तेन ञिटुडूनामन्त्यस्य लोपो न । 'नाऽनर्थके' इति परिभाषा तु भाष्ये प्रत्याख्यातैवेति दिक् । **न भवतीति** । फलाभावादिति भावः ।

❀ अभिनव-चन्द्रिका ❀

घटितः, ओष्ठस्थानिकोकारसदृशघटितसंवृतावर्णघटितस्य ओष्ठस्थानिकवकारघटितसंवृतावर्णघटित इत्यर्थः । एवं 'विवृतावर्णस्य विवृतावर्ण' इत्यस्य—तालुस्थानिकेकारसदृशघटितविवृतावर्णघटितस्य तालुस्थानिकघटितविवृतावर्णघटितः, ओष्ठस्थानिकघटितविवृतावर्णघटितस्य ओष्ठस्थानिकघटित-विवृतावर्णघटित इत्यर्थः । यथाश्रुतं तु न युक्तम् । केवल विवृतावर्णघटितत्वादौ खेतरयावदादेशावृत्तित्वस्याभावेन स्थानेऽन्तरतमसूत्रोक्ताऽऽन्तरतम्यस्यासम्भवात् । नच 'अ अ' इतिसूत्रविहित-संवृतस्यासिद्धत्वेन 'संवृतावर्णस्य संवृतावर्ण' इत्याद्यसङ्गतमिति वाच्यम्, संवृतस्यासिद्धत्वेऽपि संवृतप्रयत्नजन्यत्वस्यासिद्धत्वाभावात्, संवृतप्रयत्नजन्यत्वविशिष्टघटिततालुस्थानजन्यघटितस्य संवृत-प्रयत्नजन्यत्वविशिष्टघटिततालुस्थानजन्यघटित आदेशो भवतीत्यादिक्रमेणार्थेनादोषात् ।

❀ चिदस्थिमाला ❀

मन्वयः । नन्वकारस्य विवृतोपदेशस्यैव शास्त्रे करणात्संवृतावर्णस्येत्ययुक्तमतः कैयटाद्यसङ्गतिं ध्वनयन्नाह—**एतदिति** । प्रकर्षावधिमाह—**ऐ औ इत्यत इति** । संवृतत्वं=तत्त्वमेव । इतरांशे=इकाराद्यंशे एव ।

नन्वेवं लोके प्रयोगे तद्वत्तस्यापि स्पष्टमवभासः स्यादत आह—**तदुपेति** । चस्त्वर्थे, तस्य भूयस्त्वेन तेन तस्याभिभव इति भावः । **अपि**नेतरांशसमुच्चयः । अत एव वैलक्षण्यसूचकस्तुः । प्रकर्षानुपयोगाच्छिक्षाद्यनु-रोधाच्चाह—**विवृतेति** । तत्र तु तावन्मात्रेण न सिद्धिरिति—प्रकर्षाश्रयणमिति भावः । भाष्ये='अलोऽ-न्त्या'दिति सूत्रस्थे । एतेन 'तयैव सिद्धे तस्य ग्रहणं व्यर्थमेवे'ति प्राचोक्तमपास्तम् । तदाह—**दिगिति** । **फलभावादिति** । लोपान्यलोपद्वारकफलाभावादित्यर्थः । लोपमात्रन्तु न फलमित्यन्यत्र स्पष्टम् ।

❀ सदाशिवभट्टीयम् ❀

द्भावेन तदन्तत्वाद्ग्रहः स्यादिति मन्यते । **तस्य लो** । **विपरिणामेति** । लोपस्य कर्मसाधनत्वे तु नायम् । **दिगिति** । नन्वादिर्ञिटुडूनामिति न्यासेन व्यञ्जनस्योपदेशेऽजित्यचश्चेत्त्वे 'ट्वितोऽथुजि'-त्यादावुभयतो ग्रहणेन सिद्धौ किन्तस्य ग्रहणेनेति चेच्छृणु, उदित्वा'दुदितो वे'त्यस्य प्रसङ्गः, तत्र कर्म-

❀ वरवर्णिनी ❀

अन्त्यस्य लोपो नेति । न चेत्पदस्य प्रथमान्तस्य षष्ठ्या विपरिणामो न क्रियते, किन्तु लोप इति कर्मसाधनः, तेन 'इल्लुप्यते' इत्येव 'लोप' इति सूत्रस्यार्थः, एवञ्चाल्समुदायबोधकपदोत्तरषष्ठ्या एवाभावेनालोन्त्यपरिभाषाऽप्रवृत्तौ नान्त्यस्येत्त्वापत्तिरिति तस्येति व्यर्थमिति वाच्यम्, 'नाभि नभञ्चे'ति वार्त्तिकेन गुणा अभेदका इति पक्षे उदात्तान्तनाभिशब्दस्थानेऽनुदात्तान्तनभादेशवारणायार्थिकेऽपि षष्ठ्यर्थबोधे 'स्थानेऽन्तरतम' इति परिभाषाप्रवृत्तेरावश्यकतयाऽलोन्त्यपरिभाषाया अपि आर्थिकषष्ठ्यर्थबोधे प्रवृत्तेर्दुर्वारतया नाभिशब्दस्य स्थाने नभ आदेश इति वदित्सञ्ज्ञकस्य लोप इत्यार्थिकषष्ठ्यन्तार्थबोधस्य प्रकृतेऽपि सम्भवेन तत्परिभाषाप्रवृत्त्यापत्तेः ।

वान्तो। 'येन विधि'रित्यस्यापवादभूतया 'तस्मान्नुडची'त्याद्यर्थमावश्यिकया वाचनिक्या 'यस्मिन्विधिस्तदादावल्ग्रहणे' इति वार्त्तिककृदुक्तपरिभाषया लब्धमर्थमाह- **यकारादाविति । ओदौतोरिति ।** 'ओदौतोरिति वक्तव्य'मितिवार्त्तिकमूला-

❀ अभिनव-चन्द्रिका ❀

तस्मान्नुडचीत्याद्यर्थमावश्यिकयेति । यत्तु यान्तप्रत्ययासम्भवादेव यादौ प्रत्यये इत्यर्थो भविष्यतीति तस्मान्नुडचीत्याद्यर्थमावश्यिकयेत्युक्तिर्नागेशस्यायुक्तैवेति, तन्न। गोमयमततीति गोमयात्, तस्माण्णिचि टिलोपे लटि गोमययतीत्यादौ यान्तप्रत्ययसम्भवेनपरिभाषाऽऽश्रयणं विनाऽसिद्धेः ।

केचित्तु—प्रत्ययाव्यवहितपूर्वत्वविशिष्टौ यकाराव्यवहितपूर्वत्वविशिष्टौ च यावोदोतौ तयोरवावौ भवतइति सूत्रार्थ इति नात्र यस्मिन्विधिरिति परिभाषाऽऽवश्यकीत्याहुस्तन्न । 'भानो याती'त्यादौ प्रत्ययलक्षणेन प्रत्ययाव्यवहितपूर्वत्वस्य स्वतश्च यकाराव्यहितपूर्वत्वस्य सत्त्वेनावादेशापत्तेः।

यत्तु सर्वत्र 'प्रत्ययावयवे यकारे'इति वैयधिकरण्यान्वयेनोपपत्तौ इयं परिभाषैव नाऽऽवश्यकीति, तन्न, सम्भवति समानाधिकरण्येनान्वये वैयधिकरण्यान्वयस्यान्याय्यत्वात् । परिभाषाज्ञापकानां वैयधिकरण्यान्वयज्ञापनेऽपि उष्ट्रगोयुगमित्यादौ अवादेशस्य 'परमकाव' इत्यादौ 'कोः कत्तत्पुरुषेऽची'ति कदादेशस्य चाऽऽपत्तेश्च । 'परमकाव' इति तु कुत्सितः ऊः कूः, तस्मादणि तदन्तेन परमशब्देन समासे रूपमितिबोध्यम् ।

परे तु गव्युगजिति वक्तव्ये ओकारोच्चारणान्नोष्ट्रगोयुगमित्यत्राऽवादेशापत्तिः । न चोष्ट्रगोयुगमततीत्युष्ट्रगोयुगात्, तस्माण्णिजन्ताण्णिचि णिलोपटिलोपयोस्ततः पुनः क्विपि यलोपे तच्चरितार्थमिति वाच्यम्, इदुदुपधेभ्य आचक्षाणणिचोऽनभिधानेनैतादृशरूपस्यैवासम्भवात् । 'कोःक'दिति सूत्रे रथादिसाहचर्येण कुशब्दाघटितस्यैवोत्तरपदस्य ग्रहणेन परमकाव इत्यत्रापि दोषा भावाच्चेति दिक् ।

वाचनिक्येति । भाष्ये वचनरूपेण पठितयेत्यर्थः । अत्र 'न ल्यपी'ति, 'कोः कत्तत्पुरुषे' इत्येव सिद्धे 'रथवदयोश्चे'ति, 'अनेकवचने झल्ये'दित्येव सिद्धे 'बहुवचने झल्येत्,' 'ओसि चे'ति सूत्रद्वयकरणञ्च ज्ञापकमिति परिभाषेन्दुचन्द्रिकायां विस्तरः ।

परिभाषयेति । तदर्थस्तु-अभेदसम्बन्धावच्छिन्नप्रकारताप्रयोजकत्वेन सम्भावितमल्मात्रवृत्ति-विषयताप्रयोजकं सप्तम्यन्तं पदं स्वबोध्यार्थनिष्ठाऽऽद्यवयवतानिरूपकसमुदायस्य सञ्ज्ञा भवतीति ।

❀ चिदस्थिमाला ❀

स्वरूपसती सप्तमी एतत्प्रवृत्तौ निमित्तमिति सूचयन्नाह-**तस्मादिति।** आदिना 'नेड्वशि कृती'त्यादिपरिग्रहः। वार्तिककृदुक्तत्वादेवाह—**वाचेति ।** एतेनान्यथास्य सिद्धिरिति प्राचोक्तमपास्तम् । यथा चैतत्तथा प्रति-

❀ ज्योत्स्ना ❀

परिभाषालभ्यमिति। परिभाषार्थस्तु—यस्मिन्सप्तम्यन्ते अल्रूपे ग्रहस्य=सप्तम्यन्तार्थनिमित्तता-

❀ सदाशिवभट्टीयम् ❀

धारयस्त्वशङ्यः, 'उवुन्दिर्' 'उतृदि'रित्यादीनामसङ्ग्रहापत्तेरित्यादिर्दिगर्थोऽवसेयः। **वान्तो। मानाभावेति।**

❀ विषमपदविवृतिः ❀

रिति परिभाषां विनैव यान्तप्रत्ययासम्भवाद्यादावित्यर्थो भविष्यतीत्याशङ्क्याह—**तस्मान्नुडिति । वाचनिक्येति ।** इदं चिन्त्यं-'न ल्यपी'ति लिङ्गेन तत्सिद्धेरिति केचित् । **यस्मिन्विधिरिति ।**

व्याख्यानादिति भावः। 'पूर्वसूत्रे वान्तौ प्रति तयोरेव स्थानित्वनिर्णया'दिति 'स्थानेऽन्तरतम'सूत्रस्थकैयटोक्तन्तु न युक्तम्, वान्तज्ञानाय सूत्रपर्यालोचनस्याऽऽवश्यकत्वेऽपि तद्वाक्यार्थपर्यालोचने मानाभावात्। यथासङ्ख्यसूत्रसहकारेण बोधोत्तरं तयोस्तत्त्वनिर्णयात्। अन्तरतमपरिभाषया निर्वाहे तु—लक्ष्यपर्यालोचनकाले तन्निर्णयः। अत एव 'पूर्वसूत्रे स्थानिविशेषलाभो यथासङ्ख्यसम्बन्धात्, इह तु निमित्ताभावात्तल्लाभाभावः' इति षष्ठे प्रकृतसूत्रे कैयटः? **गव्यमिति**। भत्वाट्टिलोपो न। यीति किं? गोभ्याम्। प्रत्यये किं? गोयानम्।

❀ अभिनव-चन्द्रिका ❀

बोधोत्तरमिति। वस्तुतस्तु 'एचोऽयवायाव' इत्यादेर्यथासङ्ख्यसूत्रसहकारेण 'स्वस्थानिकत्व'—'स्वविशेष्यकापेक्षाबुद्धिविशेषविषयतासजातीयापेक्षाबुद्धिविशेषविषयतावत्त्वं'तदुभयसम्बन्धेन एचोऽयादिषु सम्बन्धः। विषयतासाजात्यञ्च विषयतायां—'स्वनिरूपकापेक्षाबुद्धिनिष्ठजनकतानिरूपितजन्यतावच्छेदकसङ्ख्यात्वव्याप्यजात्यवच्छिन्नजन्यतानिरूपितजनकतावच्छेदकत्व'—'स्वनिरूपकापेक्षाबुद्धीयैकत्वनिष्ठप्रकारतानिरूपितैकत्वावच्छिन्नधर्मितात्व'—'तादृशैकत्वानवच्छिन्नधर्मितात्वैतदन्यतरवत्त्व' एतदुभयधर्मेण इति पुनर्यथासङ्ख्यसूत्रसहकारेण बोधान्तरस्य नापेक्षेति चिन्त्यमेतत्।

न च सहविवक्षाया अभावाद्द्वन्द्वासाधुत्वमिति वाच्यम्, एकरूपावच्छिन्नस्यैकरूपावच्छिन्नसंसर्गेण एकरूपावच्छिन्नेऽन्वयसत्त्वेन तस्याः सत्त्वात्। **प्रकृतसूत्रे कैयट इति**। एवञ्च पूर्वपरविरुद्धत्वात् पूर्वकैयटश्चिन्त्य इति भावः। 'हलि सर्वेषा'मित्यत्र यकारस्यैवानुवृत्तिमभिप्रेत्याह—**लोपः शाकल्यस्येति वेति**।

❀ चिदस्थिमाला ❀

पादितं भावप्रकाशे। मनोरमा-रत्नाकर-दण्ड्याद्युक्तेरसाङ्गत्यध्वननायाह—**पूर्वेति**। **वान्तेति**। वान्तपदार्थेत्यर्थः। ननु तत्पर्यालोचने तदपि स्यादत आह—**यथेति**। तथा च सामान्यतो जातोऽपि वाक्यार्थबोधो नैतदुपयोगीति भावः। ननु न तत्सहकारेण बोधावश्यकत्वं, प्रागुक्तरीत्या 'स्थानेऽन्तरतम' इत्यनयैव निर्वाहादत आह—**अन्तरेति**। एवञ्च तत्रापि न मानमिति भावः। कैयटयोर्मिथो विरोधमपि सूचयन्नाह—**अत एवेति**। ओदौतोरिति वार्तिकोपपादकोऽयं ग्रन्थः। [यद्यप्यस्य सूत्रस्य पूर्वसूत्रनियामकत्वेन तत्रौदोतोरित्यस्य सत्त्वेनात्र धातोरोदौतोश्चेद्वान्तादेश इति अनुचितो मूले तथा निलाप्यवेनावस्थितनिमि-

❀ ज्योत्स्ना ❀

ग्रहस्य करणे=अर्थाद्व्यावृत्तिकरणे विशेषणे—यो विधिः स तदादौ बोद्धव्यः—'इति। विशेषस्तु परिभाषाप्रदीपार्चिषि द्रष्टव्यः।

न युक्तमिति। आचार्यपारम्पर्याच्छिष्याणामनुक्रमेणैव सूत्रतद्वाक्यार्थयोरध्ययनतात्पर्यपर्यालोचने प्रायशो दृष्टे। अत एव 'मध्येऽपवादाः पूर्वान्विधीन्बाधन्ते नोत्तरा'नित्यादेरुक्तिसम्भव

❀ सदाशिवभट्टीयम् ❀

ननु यथा वान्तपदे सामान्यतः श्रुते विशेषाकाङ्क्षायां पूर्वसूत्रपर्यालोचनं तथा स्थानिजिज्ञासया वाक्यार्थपर्यालोचनमावश्यकमिति चेन्न। स्थानिजिज्ञासायामेच इति श्रुतेन तस्याः शान्तावपि विशेषस्थान्यंशे निराकाङ्क्षत्वेन तदलाभादित्याहुः। पदपर्यालोचनेऽर्थावगतिर्जातैवात आह—

❀ विषमपदविवृतिः ❀

सप्तम्यन्ते विशेषणेऽलशब्दे उपादीयमाने यस्मिन्नलि यो विधिः स तदादौ इत्यर्थः। 'हलि सर्वेषा'-

ननु 'गव्यूति'रित्यत्र वस्य 'हलि सर्वेषा'मिति 'लोपः शाकल्यस्ये'ति वा लोपः स्यादत आह—**वान्त इत्यत्रेति** । न च विशेषविहितेन कार्यित्वेन लोपे वस्य निमित्तत्वबाध इति वाच्यं, निमित्तत्वानाक्रान्ते विषये कार्यित्वस्य चारितार्थ्यात् ।

तक्रकौण्डिन्यन्यायश्चानवकाशविषयो विधेयविषयश्चेति स्पष्टं 'तद्धितेष्वचा'मिति सूत्रे

❀ अभिनव-चन्द्रिका ❀

कार्यित्वस्य चारितार्थ्यादिति । परे तु विषयतयोर्यत्र व्याप्यव्यापकभावस्तत्रैव तक्रन्याय-प्रवृत्तौ–वल्पदप्रयोज्यनिमित्तविषयतायाः, 'व्यो'रित्येतत्प्रयोज्यस्थानितायाश्च सामानाधिकरण्यस्यैव दुरुपपादत्वेन 'नात्र तक्रन्यायविषय'इत्येव लेखनीयम् । **विधेयविषयश्चेति** । विभिन्नविभिन्नविधेयता-निरूपितोद्देश्यदलीयविषयतयोर्यत्र व्याप्यव्यापकभावस्तद्विषय इत्यर्थः । अथवा विधेययोर्यत्र व्याप्यव्यापकभावस्तद्विषय इत्यर्थः । व्याप्यतावच्छेदको व्यापकतावच्छेदकश्च सम्बन्ध उद्देश्यो-द्देश्यतावच्छेदकादेर्विधेयेन साकं यः सम्बन्धः तत्तुल्यवित्तिवेद्यसम्बन्धो बोध्य इत्यन्यत्र विस्तरः ।

अत्रेदं तत्त्वम्,–एकविनियोगोद्देशेन प्रयुक्तवाक्यकदम्बघटकव्यापकधर्मावच्छिन्नबोधकपदप्रति-पाद्यतावच्छेदकावच्छिन्ने तद्वाक्यकदम्बघटकव्याप्यधर्मावच्छिन्नबोधकपदार्थतावच्छेदकावच्छिन्ना-

❀ चिदस्थिमाला ❀

त्तेस्यैकवचनस्यानुरोधेनैचश्चेदित्युक्तम् ?] । उक्तरीत्या गव्यमित्यत्र लोपाप्राप्तिराह—**ननु गव्यूतिरिति** । तस्यासिद्धत्वात्तत्र वकारग्रहणाननुवृत्तेश्चाह—**लोप इति** । एतेन विपरीतं **रत्नाकरो**क्तिरपास्ता । न च 'त्यदादीनाम' इत्यत्रैव वार्तिकद्वयपाठेन भवदभिमतसिद्धाऽत्र पाठसामर्थ्यादेव न वलोप इति प्रश्लेषादि वैयर्थ्यमिति वाच्यम्, उपायस्योपायान्तरादूषकत्वात् । प्रश्लेषतः सामर्थ्यकल्पितापूर्ववचनाङ्गीकारे गौरवात्, सामर्थ्येन सर्वथा शास्त्रबाधकल्पनापेक्षया पाक्षिकबाधकल्पनस्यैवौचित्येन तावतैव तस्य साफल्येन पाक्षिक-लोपापत्तेर्दुर्वारत्वात् । अङ्गाधिकारे पाठे तदन्तविध्यापत्तौ गोशब्देनाव्ययीभावे तद्धितार्थविषयतत्पुरुषे समाहारद्वन्द्वे चैकदेशेतिन्यायेनेतरेतरद्वन्द्वे स्वतश्च गोऽन्तत्वस्य सत्त्वेन तस्य पूर्तौ तदादेशापत्त्या अनिष्ट-रूपापत्तेश्चेतिदिक् । **बाध इति** । तथा च सूत्रे वद्वयश्रवणापत्तिरिति भावः । तदप्राप्तियोग्येऽचारि-तार्थ्यस्य तद्बीजत्वादाह—**निमित्तत्वेति** । ननु 'येन ने'ति न्यायेन बाधे तथा सत्त्वेऽपि प्रकृते 'तक्र-कौण्डिन्य' न्यायेन बाधोऽत आह–**तक्रेति** । **चेन**–'येन ने'तिन्यायसमुच्चयः । **सूत्रे इति** । तत्र हि क्रौष्ट्रो

❀ ज्योत्स्ना ❀

इति तु **कैयटोपाध्यायानामाशयः** । **निमित्तत्वबाध इतीति** । तथा च 'लोपो व्यो' रित्यस्य वकारे परतोऽप्रवृत्त्या वान्त इति निर्देशासङ्गतिरिति भावः । **निमित्तत्वानाक्रान्त इति** । वकारभिन्ने रेफादावित्यर्थः । 'अन्यथा रलीत्येव वदे'दिति बृहच्छेखरोक्तं तु न युक्तम्, भवेवेत्यादाविव यकारस्य वकारे परतो लोपानां काव्यमीमांसकैरुक्तत्वेन प्रकृते यञ इव तत्तदर्थापत्तेः । **विधेयविषय इति** । इदमभ्युच्चयमात्रं, वस्तुतस्तत्र यावदप्राप्तं तावद्विधेयं

❀ सदाशिवभट्टीयम् ❀

यथेति । 'हलि सर्वे'इत्यत्र वग्रहणासम्बन्धात्तस्यासिद्धत्वाच्चाह—**लोपः शेति** । **विधेयविषयश्चेति** । अयं

❀ विषमपदविवृतिः ❀

मित्यत्र वग्रहणं नानुवर्त्तते इत्यभिप्रेत्याह—**लोपः शाकल्यस्येति** । **निमित्तत्वानाक्रान्ते इति** । यथा प्रकृते—पूर्ववकारे । न हि ततः पूर्वं लोपकार्यी तिष्ठति येन तस्य निमित्तत्वं स्यात्, 'अचो रहाभ्या'मित्यत्र तु रेफे द्वित्वनिमित्ते नियमेन द्वित्वकार्यित्वं प्राप्नोति । **विधेयविषयश्चेति** । 'अचो रहाभ्या'मित्यनेन रेफस्य द्वित्वनिमित्तत्वमपूर्वं बोध्यमिति विधेयमेवेति भावः ।

१. [ ] एतदन्तर्गतः पाठोऽसंलग्नः प्रमादापतितो भाति ।

यङ्विधायके च भाष्ये । अन्त्ये 'उत्तरयोर्विग्रहेण विशेषासम्प्रत्ययान्नित्यग्रहणानर्थक्यं, क्रियासमभिहारे च नैतेभ्यो यङा भवितव्य'मिति भाष्ये चेनं 'विशेषासम्प्रत्यया'दित्यनुकृष्यते । अन्यथा—तक्रकौण्डिन्यन्यायेन सिद्धे विशेषासम्प्रत्ययादित्यनुकर्षकचकारवैयर्थ्यापत्तिः । निरूपयिष्यते चेदं यङन्ते । तस्य च वार्त्तिकेऽनुवृत्त्या यूतौ श्रूयमाणवकारान्त आदेश इत्यर्थः । सूत्रे तु न फलं, गव्यादौ भत्वेन वान्तस्य पदत्वाभावात् ;

❀ अभिनव-चन्द्रिका ❀

तिरिक्तत्वेन सङ्कोचो भवतीत्यत्र तात्पर्यग्राहकेण—धर्मयोर्यत्र व्याप्यव्यापकभावस्तद्विषयेण—'माठरपरिवेषण'न्यायेन कार्यित्वेन निमित्तत्वबाधः कस्मान्नेति शङ्कैवात्रोचिता । समाधानमपि—तस्यानित्यत्वम्, विभिन्नवाक्यघटकपदप्रतिपाद्यतावच्छेदकधर्मयोर्यत्र व्याप्यव्यापकभावस्तद्विषयोऽयं न्याय इति नात्र तत्प्रवृत्तिरिति वा वक्तुमुचितमिति दिक् ।

❀ चिदस्थिमाला ❀

जागत' इत्यादावन्त्योपधावृद्ध्योर्निषेधवचनमुक्त्वोक्तन्यायेन तयोरादिवृद्ध्या बाधमाशङ्क्य दृष्टान्ते'नाप्राप्तिसत्त्वेऽपि इह सौश्रुत इत्यादौ तयोरप्राप्त्या तदभाव' इत्युक्तम् । 'सामान्यविशेषभावो बाधहेतुः, स चेह नास्ती'ति कैयटः। निमित्तांशे तत्सत्त्वेऽपि कार्यांशे तदभाव इति तदाकूतम् । आद्ये स्पष्टत्वादाह—**अन्त्येति** । 'धातोरेकाच' इत्येत्रत्यर्थः । **उत्तरयोरिति** । नित्यं कौ, लुपसदेत्यनयोरित्यर्थः । तस्याग्रेऽप्यनुवृत्तिरिति भावः ।

ननु तेभ्यः क्रियासमभिहारे नित्यं यथा स्यादिति तदावश्यकमत आह—**क्रियेति** । समुच्चयाभावादाह—**चेनेति** । अन्यथा तस्य सावकाशविषयत्वादौ क्रियासमभिहारादेर्यङ्द्योत्यतया तद्वृत्तेर्धातोरित्यर्थेनानुवाद्यत्वं न विधेयत्वं, क्रियासमभिहाराविवक्षायां चारितार्थ्यञ्च, तत्रापि तत्प्रवृत्तौ तेन सिद्ध्या तदानर्थक्यमिति नित्यग्रहणं प्रत्याख्यातं, तदाह—**निरूपेति** । प्रकृतमाह—**तस्य चेति** । प्रश्लिष्टवस्य चेत्यर्थः । **यूताविति** । गोरित्यादिसामर्थ्यलभ्यमर्थमाह—**श्रूयेति** । सूत्रे=तद्विषये । तस्य प्रत्यये प्रवृत्तिः, स च द्विविधः, तद्धितः, कृच्च, तत्राद्ये आह—**गव्यादाविति** । **भत्वेनेति** । 'बाधेने'ति शेषः । द्वितीये

❀ ज्योत्स्ना ❀

न ह्यग्निर्दग्धं दहतीतिप्राप्ताप्राप्तविवेकन्यायेन—'रक्तं पटं वये'त्यादावेकद्वित्रिविधीनां काव्यमीमांसकैरुक्तत्वेन प्रकृते यङ इव तत्तदर्थानामप्यस्ति तद्वद्वकारस्य विशेषशब्देन कार्यित्वबोधनादत एव 'रहाभ्यामिति विशेषतः श्रुतेन निमित्तभावेन तयोः कार्यित्वबाध' इति भाष्ये उक्तम् । स्पष्टञ्चेदं 'धात्रंश'इति प्रतीके मनोरमाशब्दरत्नयोः । विस्तरस्तु परिभाषाप्रदीपार्चिषि द्रष्टव्यः । न पदान्त-

❀ सदाशिवभट्टीयम् ❀

सङ्कोचो निष्फलः । आद्येनैव सर्वसामञ्जस्यादित्याहुः । **अन्त्य इति** । उत्तरयोः='नित्यङ्कौटिल्य' 'लुपसदे'त्यनयोः । विग्रहेण वृत्तिप्रतिपाद्यविशेषयोः कौटिल्यगर्हयोः शक्तिस्वभावेनासम्प्रत्ययान्नित्यग्रहणमनर्थकम् । 'क्रियासमभिहारे तद्वारणाय त'दित्यपि—न, गत्यर्थकात्तत्रापीष्टत्वेन लुबादिभ्यश्च यङेव न, स्वभावेन समभिहाररूपविशेषाप्रत्ययेन तद्वारणस्य सुकरत्वादित्यादि तिङन्तशेखरे द्रष्टव्यमित्याहुः ।

❀ विषमपदविवृतिः ❀

विशेषासम्प्रत्ययादिति । 'कुटिलं व्रजती'ति वाक्यात्कुटिलं पन्थानं गच्छतीत्यस्यैव प्रतीतिर्न तु कौटिल्यविशिष्टव्रजनरूपविशेषस्य सम्प्रत्ययः शब्दस्वाभाव्यादित्यर्थः । **अनुकृष्यत इति** । अनुकृष्यमाणस्य च यङन्तेन क्रियासमभिहाररूपविशेषासम्प्रत्ययादित्यर्थः ।

लव्ये स्वत एव तदभावाल्लोपाप्राप्तेः । गोशब्दादिभ्यः क्यजादावपि—'नः क्ये' इति नियमेन पूर्वस्य पदत्वाभावात् । एवन्तर्हि वार्तिके एव प्रश्लेष उचित इत्याशयेनाह—**छकाराद्वेति** । 'लोपो व्यो'रिति सूत्रे वकारप्रत्याख्यानन्तु लौकिकोदाहरणाभावेन तदर्थतया बोद्धव्यम् । अत एव 'इको गुणे'ति सूत्रे "–'अतो ऌान्तस्ये'त्यत्र लुप्तनिर्दिष्टो वकार–" इत्युक्तं भाष्ये । शास्त्रीयसौत्रप्रयोगार्थन्तदिति तदाशयः । न चैवं 'विष्णवे' इत्यादौ 'तस्य लोप' इति दुर्वारं, गव्यूतावुच्चारणस्य चारितार्थ्यादिति वाच्यं, 'गत्रि च युक्ते' इत्यादिनिर्देशैर्वारणात् ।

परे तु—सा पूर्वपक्ष्युक्तिरिति न वकारप्रश्लेषो लोपेनोचितः । किञ्च च्छन्दसि सर्वविधीनां व्यवस्थितत्वान्न वलोपप्रसक्तिस्तत्रत्ये गव्यूतौ । अध्वपरिमाणेऽपि सञ्ज्ञा-

---

❀ अभिनव-चन्द्रिका ❀

सञ्ज्ञात्वभङ्गापत्तेरिति । नच 'पूर्वपदात्सञ्ज्ञाया'मित्यस्य 'कृतणत्वेन यत्र सञ्ज्ञात्वाऽवगमस्तत्रैव णत्व'मित्यर्थेन सञ्ज्ञात्वभङ्गभयेन रघुनाथादिशब्दे णत्वाभावेऽपि 'हलि सर्वेषां' 'लोपः शाकल्यस्ये'त्यत्र सञ्ज्ञायामित्यस्याभावेन यत्र कृतणत्वेन सञ्ज्ञावगम इत्याद्यर्थालाभाद्दृष्टान्तदार्ष्टान्तिकयोर्वैषम्येण लौकिकगव्यूतौवलोपो दुर्वार इति वाच्यम्, अध्वपरिमाणबोधकत्वमुपजीव्यप्रवृत्तस्यावादेशस्याध्वपरिमाण-

❀ चिदस्थिमाला ❀

आह—**लव्ये इति** । **स्वत एवेति** । तदप्राप्तेरेवेत्यर्थः । उभयमिन्नेपि तत्र न फलमित्याह—**गोशब्देति** । आदिना क्यङ्परिग्रहः । एवं पूर्वपक्षाशयं प्रतिपाद्योत्तरपक्षमवतारयति—**एवं तर्हीति** । तत्रैवं फलसत्त्वे चेत्यर्थः । लाघवादिति भावः । ननु 'लोपो व्यो'रित्यत्र वकारस्य प्रत्याख्यानात्कथमिष्टसिद्धिरत आह—**लोप इति** । इदं प्रमाणयति—**अत एवेक इति** । सिच्यन्तरङ्गत्वाङ्गीकारेऽलावीत्यादिसिद्ध्यर्थमिति भावः । लौकिकत्वनिरासायाह—**शास्त्रीयेति** । अनतिप्रसङ्गायाह—**सौत्रेति** । **न चैवमिति** । वार्तिके उक्तरीत्या तथार्थाङ्गीकारे इत्यर्थः । आदिना–सजातीयपरिग्रहः । मूलं खण्डयति—**परे त्विति** । **सेति** । 'इको गुणे'ति सूत्रस्थेत्यर्थः । सिच्यन्तरङ्गस्य न्यायेन बाधात्तस्य तत्त्वमिति स्पष्टमन्यत्र । एवञ्च वकारप्रत्याख्यानसङ्कोचो न युक्त इति लोपाप्राप्त्या नेष्टसिद्धिस्तदाह—**नवेति** । नन्वस्तु प्रकारासङ्गतिस्तथापि तत्र लोपकरणं कथमत आह—**किञ्चेति** । तत्रादावाद्यवार्तिकविषये आह—**छन्दसीति** । द्वितीये आह—**अध्वेति** । अध्वपरिमाणेऽपि तत्र गव्यूतौ सञ्ज्ञात्वभङ्गापत्तेर्न वलोप इत्यन्वयः । तत्र हेतुमाह—**सञ्ज्ञेति** । 'यतोऽत' इत्याद्यन्तौ । एवमन्यत्रापि दृष्टमावश्यकमित्याह—

❀ विषमपदविवृतिः ❀

लौकिकोदाहरणेति । छन्दसि तु जीवे रदानुकि जीरदानुः स्रिवेरास्रेमाणमित्युदाहरणमस्त्येवेति भावः । **व्यवस्थितत्वादिति** । व्यवस्थितविकल्पत्वादित्यर्थः ।

❀ वरवर्णिनी ❀

नः क्य इति । जगद्विदितपाण्डित्यप्रकर्षाः **शेषावतारगुरुवरश्रीहरिनारायणत्रिपाठिचरणास्तु**—"गां नयतीति गोनीः,=गोपः, गोन्यमाचष्टे गोनयति, गोनयतीति–गोन्=गवाध्यक्षः । तं गोनमिच्छति–गव्यतीत्यत्र नान्तत्वेन 'नः क्ये' इति पदत्वान्नलोपेऽवादेशे च वलोपाभावार्थं सूत्रेऽपि प्रश्लेष आवश्यकः । पदसञ्ज्ञायां नलोपस्यासिद्धत्वात्पदत्वम् , अवादेशे तु नलोपो नासिद्धः, 'नलोपः सुप्स्वरे'तिनियमादिति चिन्त्य एवायं ग्रन्थ"—इत्याहुः ।

शब्दोऽयम्, तत्र सञ्ज्ञात्वभङ्गापत्तेर्न वलोपः। यथा रघुनाथेति सञ्ज्ञाशब्दे नित्यस्यापि णत्वस्याभावः। सर्वनामशब्दे णत्वाऽऽशङ्का तु—तत्य सञ्ज्ञिविशेषे आधुनिकविनियोगाच्छास्त्रानुसारिशब्दस्यैव विनियोग उचित–इत्यभिप्रायेण। निरूपितश्चैतत्सर्वादीनीतिसूत्रे भाष्यप्रदीपोद्द्योते इत्याहुः। निरूपयिष्यते चेदं 'पूर्वपदात्सञ्ज्ञाया'मिति सूत्रे।

❀ अभिनव-चन्द्रिका ❀

बोधकत्वविघातकलोपप्रवृत्तिं प्रत्ययनिमित्तत्वेन सन्निपातपरिभाषया वकारलोपाप्राप्त्या वकारप्रश्लेषो व्यर्थ इत्यदोषात्। केचित्तु त्रिपाद्यां सन्निपातपरिभाषाया अप्रवृत्त्या 'लोपो व्यो'रिति लोपेन वकारप्रश्लेष आवश्यक एवेत्याहुः। परे तु–आत्थेत्यादौ थत्वे कृते ईडादिवारणाय त्रिपाद्यामपि क्वचित्तस्याः प्रवृत्तिरित्याहुः।

❀ चिदस्थिमाला ❀

यथेति। 'पूर्वपदात्सञ्ज्ञाया'मिति प्राप्तस्येत्यर्थः। नन्वेवं सर्वनामशब्दे णत्वाशङ्कापरभाष्यविरोधोत आह—**सर्वेति**। युक्तिसम्भवेनाज्ञानकल्पना नोचितेत्याशयेनाह—**तस्येति**। तत्र चिरन्तनसत्त्वादाह—**आधुनिकेति**। 'दीनीति सूत्रे' इति पाठः। एतेन सञ्ज्ञापूर्वक इति 'लोपः शाकल्यस्ये'त्यस्यव्यवस्थितविभाषात्वाद्वा नलोप इति प्रकाशरत्नाकराद्युक्तमपास्तम्।

❀ विषमपदविवृतिः ❀

इत्याहुरिति। परे तु 'लोपो व्यो'रिति सूत्रे वकारप्रत्याख्यानमेकदेश्युक्तिः, इको गुणेति सूत्रस्थभाष्यविरोधात्, अत एव 'न पदान्त'सूत्रे 'वृक्ष'वित्यत्र 'पदान्तस्य स्थाने इत्यर्थे 'लोपो व्यो'रिति लोप आपादितो दीक्षितेन। लण्सूत्रे च 'वृक्षव् करोती' त्यत्र 'लोपो व्यो'रिति लोपस्याग्रिमशेखरे आशङ्किष्यमाणत्वाच्च। अत एव—

'सुधे सुधेवाऽरिवधात्सुराणां सुका रणे लाघवतश्च रामः।
विशेषणे द्वे य इहादिकर्तुर्वेदेदधीती स हि कैयटीये॥'—

—इत्यभियुक्तोक्तिः सङ्गच्छते। तत्र हि 'सुधे' 'सुक'रिति धिन्विकृण्विभ्यां विचि गुणे रूपम्। न च 'सुधे' इत्यत्र 'न धातुलोप' इति गुणनिषेधः शङ्क्यः, आर्धधातुकत्वतद्व्याप्यान्यतररूपेणार्द्धधातुकनिमित्तके लोप एव तत्प्रवृत्तेः, अन्यथा 'न धातुलोपे'त्यस्य प्रत्याख्यानेन फलभेदापत्तेः। 'अगुषी'दित्यादौ तन्निमित्तकगुणवारणाय लघूपधाद्विहिते प्रत्यये गुण इत्यर्थे त्वत्र गुणो दुर्लभः, अत एव च 'च्छ्वोः शू'डिति सूत्रे भाष्ये–'ऊठष्ठिवे ऊद् आदिः कस्मान्न भवति ? अस्तु

❀ वरवर्णिनी ❀

रघुनाथेतीति। 'पूर्वपदात्सञ्ज्ञाया'मित्यनेन सञ्ज्ञात्वसम्पादकणत्वस्यैव विधानेन रघुनाथादौ सञ्ज्ञात्वविनाशकणत्वादेरप्रवृत्तेर्युक्तत्वेऽपि 'अध्वपरिमाणे च'त्यस्य—'अध्वपरिमाणबोधकोवादेशो भवति, न तद्भञ्जक' इत्येवमेवार्थस्य स्वीकारेण गव्यूतिरित्यत्राध्वपरिमाणबोधकावादेशस्य प्रवृत्तावपि पश्चा'ल्लोपः शाकल्यस्ये'ति प्राप्तस्य लोपस्य वारणमशक्यमिति चिन्त्योऽयं ग्रन्थ इति **श्रीबालशास्त्रि**चरणानामाशयमस्मत्पितामहचरणाः **श्रीस्नेहिरामशास्त्रिण** आविश्चक्रुः। **गौडास्तु**—'परम्परयाऽवादेशस्य सञ्ज्ञाभञ्जकत्वाल्लोपसम्भावनयाऽवादेशो न स्यादिति वार्तिकारम्भसामर्थ्यादेव लोपो नेत्याहुः। **मान्यास्तु**—'रघुनाथशब्दोऽयं न सञ्ज्ञाशब्दः, किन्तु यौगिक एवायं, रघुवंशादौ बहुशो योगार्थतात्पर्येणैव प्रयोगाणामुपलम्भादिति चिन्त्योऽयं शेखर' इत्याहुः।

धातोस्त । 'धातो'रित्यस्याभावे प्रातिपदिकमात्रविषयो नियमः स्यात्तथा च 'गव्य'-मित्यत्र न स्यात्, 'ओयते' इत्यत्र च स्यात्। तदभावे सामान्यतो नियमापादनन्तु योगविभागैवकारवैयर्थ्यापत्तेरयुक्तम् । 'तन्निमित्तस्य चेद्धातोरेवे'ति नियमे बाभ्रव्यासिद्धे-

❀ अभिनव-चन्द्रिका ❀

धातोस्तन्निमित्तस्यैव । नच 'न यकी'त्येव सूत्रमस्त्विति वाच्यम्, भूधातोर्विचि तस्माद्धितार्थे यति 'भोय'मित्यादौ वान्तादेशापत्तेः। **प्रातिपदिकविषयो नियमः स्यादिति** । स्यादेतत्—'नियामकशास्त्रीयोद्देश्यतावच्छेदकव्यापकं नियम्यशास्त्रीयोद्देश्यतावच्छेदकव्याप्यञ्च यद्रूपं तद्रूपावच्छिन्नातिरिक्तत्वेन नियम्यशास्त्रीयोद्देश्यतावच्छेदकावच्छिन्ने सङ्कोचो भवती'ति सिद्धान्तः। तथा 'च प्रातिपदिकमात्रविषय' इति ग्रन्थेन—यकारादिप्रत्ययाव्यवहितपूर्वत्वाविशिष्टप्रातिपदिकावयवैच्त्वं सङ्कोच्यतावच्छेदकमिति लभ्यते । न च यकारादिप्रत्ययाव्यवहितपूर्वत्वविशिष्टधात्ववयवैच्त्वं सङ्कोच्यतावच्छेदकं कस्मान्नेति वाच्यम्, बाभ्रव्यादौ व्यभिचारेण निरुक्तरूपे नियामकशास्त्रीयोद्देश्यतावच्छेदकव्यापकत्वालाभात् । एवञ्च 'वान्तो यि प्रत्यये'इत्यत्र तद्रूपावच्छिन्नातिरिक्तत्वेन सङ्कोचे वान्तोयीति सूत्रमेव व्यर्थं स्यादिति चेन्नैवम्, ओयते औयतेत्यत्र वान्तादेशार्थं तच्चरितार्थ्येनादोषात् । न चैवमपि धातुग्रहणसत्त्वे धातोरेचश्चेदित्यादिमूलग्रन्थतो धात्ववयवत्वविशिष्टयादिप्रत्ययाव्यवहितपूर्वविशिष्टैच्त्वावच्छिन्नातिरिक्तत्वेन सङ्कोच इति फलति, तथाच गव्यतीत्यादौ वान्तादेशानापत्तिरिति वाच्यम्, यादिप्रत्ययाव्यवहितपूर्वत्वविशिष्टैजन्तधातोश्चेत्तर्हि तन्निमित्तस्यैवेति नियमस्वीकारेणादोषात् । नच तथा सति एजन्तस्थाने वान्तादेशापत्तिः, निर्दिश्यमानपरिभाषया वारणात्। **इत्यरुचेराहेति** । वस्तुतस्तु 'नाजानन्तर्ये' इति निषेधादियमरुचिरसङ्गतेति केचित्। परे तु—'सा परिभाषा नास्त्येवेति दोष'इत्याहुः ।

❀ चिदस्थिमाला ❀

मात्रपदेन सामान्यनियमव्यवच्छेदः । **स्यादिति** ।—सम्भावनायान्तथाचैच इत्यनुवृत्त्या 'यादौ प्रत्यये परे प्रातिपदिकस्यैचश्चेद्वान्तादेशस्तर्हि तन्निमित्तस्यैवे'ति नियमेन बाभ्रव्यादिसिद्धिरिति भावः । तत्रादौ त्वस्याव्याप्तिमाह—**तथा चेति** । अतिव्याप्तिमाह—**औयत इति** । प्राचोक्तिं खण्डयति—**तदभावे इति** । धातुग्रहणाभावे इत्यर्थः । **सामेति** । एचो यादौ प्रत्यये चेद्वान्तादेशस्तर्हि तन्निमित्तस्यैवेतीत्यर्थः । **पत्तेरिति** । विशिष्टस्य विधिनैव तत्फललाभादिति भावः । एतेन मूले फलानुक्तत्वाद्धातुग्रहणं व्यर्थमित्यपास्तम् । इष्टतोऽवधारणार्थं एवकार इत्याह—**तन्निमित्तेति** । एव इत्यर्थः । तच्छब्देनासम्भवात्सन्निहितोऽपि धातुर्न परामृश्यते किन्तु यादिप्रत्यय इति भावः । 'तर्ही'ति शेषः । **बाभ्रेति** । ओयत इत्यादौ धातोस्तन्निमित्तस्याप्यापत्तेश्चेत्यपि बोध्यम् । क्विबन्त-

❀ सदाशिवभट्टीयम् ❀

धातोस्त । 'न यकी'ति तु न सूत्रितम् । जनावि साधुर्जनौयमित्यत्रावादेशापत्तेरित्याहुः । मम तु तन्निमित्तत्वाभावाद्धातुसंशब्दनेन विहितप्रत्ययपरत्वाभावाच्च न सः । अत एव क्विबन्तभूशब्दा'त्तत्र साधु'-रिति यति—भोयमित्येव ।

❀ विषमपदविवृतिः ❀

आदिर्लोपो व्योरिति वकारस्य लोपो भविष्यती'त्युक्तं भाष्ये । तत्रैव कैयटे—क्विग्रहणाननुवृत्तिपक्षे दिवेर्यङ्लुकि 'देदेती'त्युक्तम् । छन्दसि सर्वविधीनां वैकल्पिकत्वमाश्रित्य—'गव्यूति'रित्यत्र वलोपवारणं त्वगतिकगतिः । 'लोकेऽध्वपरिमाणे सवकारेणैवाध्वपरिमाणप्रतीत्या वलोपो ने'त्यपि शिथिलम् । न हि 'पूर्वपदा'दित्यत्रेव 'सवकारेणाध्वपरिमाणे गम्ये वान्तादेश' इत्यर्थोऽस्ति । वस्तुतः 'पूर्वपदा'-दित्यत्रापि 'सणत्वेन सञ्ज्ञायां गम्यमानाया'मित्यर्थो न युक्तः । 'अग' इत्यस्य वैयर्थ्यापत्तेः, रघुनाथादौ क्षुभ्नादित्वाण्णत्वं नेत्याहुः ।

स्तद्वारणायैवकारः। **लाव्यमित्यादि।** अत्र गुणवृद्ध्योर्यण्णयन्निमित्तकत्वेनैचो यादिप्रत्ययनिमित्तकता। **तन्निमित्तस्येति किमिति।** सूत्रमेव किमर्थमिति प्रश्नः। **ओयत इति।** वेञः कर्मणि लटि यकि यजादित्वात्संप्रसारणेऽकृत्सार्वेति दीर्घे आङा सहाऽऽद्गुणः। नधातुलोपसूत्रभाष्यरीत्या बहिर्भूतधातूपसर्गकार्यस्य बहिरङ्गत्वाद्वान्तादेशे गुणोऽसिद्ध इत्यरुचेराह—**औयतेति।** तस्मादेव कर्मणि लङि आडागमे वृद्धिः पूर्ववत्।

क्षय्यज। क्षि क्षये, जि जये, इत्यनयोरेव ग्रहणं, न तु क्षीष् हिंसायाम्, क्षै जै क्षये, इत्यनयोर्व्याख्यानात्। अत एव 'क्षिज्योरेवैच' इति भाष्ये उक्तम्। **तस्मै प्रेति।** क्रयार्थे वस्तुनि क्रय्य इति निपात्यते इत्यर्थो, व्याख्यानाद्गुणभूतस्यापि तदा

❀ चिदस्थिमाला ❀

भूशब्दाद्धितार्थे उगवेति यति सत्यभिधाने—भव्यमिति भवत्येव, धातोः कार्याभावेन 'धातोः कार्यमुच्यमानं तत्प्रत्यये भवती'ति परिभाषाया अप्राप्तेः। एतेन—'धातोः स्वरूपग्रहणे' इति परिभाषया नियमस्य धातुप्रत्ययविषयकत्वेन तत्र न वान्तादेश इत्यपास्तम्। तत्पाठस्य प्रसङ्गभिरित्यादा'वनुदात्ते'त्यमागमापादनेन भाष्ये दूषितत्वादिति बोध्यम्। **अत्रेति।** तेनैव रूपेण निमित्ततेत्यत्र नाग्रह इति भावः।

यद्यपि एवरहितप्रश्नेनैकदेशे प्रश्न इति मूलतो लभ्यते, तथापि तद्द्वारा समुदायप्रश्ने तात्पर्यं, तदभावे नियमासम्भवे सूत्रस्यैव वैयर्थ्यादित्याह—**सूत्रमेवेति।** पूर्वेणैव सिद्धेरिति भावः। **न धात्विति।** नन्वित्यादिः। तत्र ह्यार्धधातुकग्रहणस्य लोपविशेषणत्वपक्षे उपेद्धादौ दोषमाशङ्क्य 'बहिरङ्गो गुणोऽन्तरङ्गो वा नलोप' इत्युक्तम्। 'पक्षभेदेनोदाहरणद्वय'मिति प्राचोक्तिं खण्डयन्पक्षयोरेकवाक्यतयाऽनुभूयते सुखमित्यादिसाधिकया लब्धमर्थमाह—**बहिर्भूतेति।** यदुपसर्गनिमित्तकं कार्यमुपसर्गार्थाश्रितं विशिष्टोपसर्गनिमित्तत्वात्तदन्तरङ्गं, यत्तु न तथा—तत्र 'पूर्वागतसाधननिमित्तकमेवान्तरङ्ग'मिति पश्चादागतोपसर्गनिमित्तकत्वेन तयोः कार्यस्य बहिर्भूततेत्यर्थः। **वृद्धिरिति।** आटश्चेतीति भावः। एवव्यवच्छेद्यमेवाह—**नन्विति।** **इत्यनयोरिति।** इत्यर्थकयोरित्यर्थः। व्याख्याने मूलमाह—**अत एवेति।** अन्यथा तथा निर्देशासङ्गतिः स्पष्टैवेति भावः। सूत्रार्थमाह—**क्रयार्थ इति।** ननूभयमप्ययुक्तं, सर्वनाम्नां प्रधानपरामर्शित्वस्यौत्सर्गिकत्वेन प्रत्ययार्थपरामर्शौचित्यादिति चेन्न, तथाहि सति यदि स एवार्थस्तदर्थ इति तत्पुरुषः तदा क्रय्यशब्दः स्वार्थे वर्तेत इत्यर्थलाभेन तदर्थलाभेन तदर्थग्रहणं व्यर्थं स्यात्। अथ सोऽर्थो यस्येति बहुव्रीहिस्तथापि शब्दे शब्दस्य वृत्त्यभावादनर्थकमेव तत्स्यात्तस्मात्सामर्थ्याद्गुणभूतस्यापि तस्य विनिमयलक्षणस्य ग्रहणम्, 'अर्थेने'ति समासस्तदतदभिप्रेत्याह—**व्याख्यानादिति।** तदा=तच्छब्देन। उक्तमेव व्यतिरेकमुखेन द्रढयति—

❀ सदाशिवभट्टीयम् ❀

औयत इति। नन्वत्रापि वान्तादेशे बहिरङ्गयकोऽसिद्धत्वं, रियतीत्यत्र यथेति चेन्न। एतादृशान्तरङ्गत्वस्य जातबहिरङ्गासिद्धत्वनियामकत्वं नेति परत्रोक्तत्वात्। अत एव क्षीयत इत्यादौ यकि दीर्घादि सिध्यतीत्याहुः।

यद्यप्यत्र सूत्रे धातोरोदौतोश्चेदिति व्याख्येयं, नियमस्य तत्रैव प्रवृत्तेस्तथापि तन्निमित्तस्येत्येकवचनानुरोधादेवमुक्तमित्याहुः। क्षय्य हिंसायामित्यस्याग्रे **'इत्यस्ये'**ति शेषः। अतो नाग्रिमद्विवचनासङ्गतिः, क्षय्येत्यत्र प्रकृतिभूतयोरेककोटितया वा। ननु सानुबन्धकत्वादयं न ग्राहिष्यतेऽत आह—**क्षै इति।** लक्षणप्रतिपदोक्तेत्यस्य तु नायं विषयः, प्रतिपदोक्तानुपूर्व्यश्रुतेः। **व्याख्येति।** एचोभावादित्यपि बोध्यम्। **क्रय्यस्त।** शाब्दमर्थमाह- **क्रयार्थे वस्तुनीति।** व्याख्यानात्—**गुणेति।** तच्च=तदर्थेति विशेषणासङ्गतिरूपम्,—अत्रैव सूत्रे प्रदीपोद्योतयोः स्पष्टम्। अत्र मते क्रीणातिः क्रयार्थः क्रय्ये। स च द्रव्यदानपूर्वकधान्याद्यादानम्। एवञ्च क्रेतृकर्तृक्रियाश्रयो धान्यमित्यर्थकं 'क्रेतृभिः क्रय्यन्धान्य'मिति सिध्यति। केचिन्मते तु सोऽत्र विक्रयः, स च लाभेच्छया द्रव्यादानपूर्वकधान्यादानम्,एवञ्च विक्रेतृभिः क्रय्यं क्रेतृभिः क्रेयमित्येव व्यवस्थितमिति बोध्यम्। ननु विनि-

परामर्शः। क्रयार्थत्वञ्च—फलोपधानरूपं, 'तदर्थ' इति विशेषणात्तदाह—**क्रेतार इति।** योग्यतामात्रग्रहणे त्वव्यावर्त्तकं तत्स्यादिति भावः। केचित्तु—स्वीयं धान्यादि दत्वा यत्र तन्मूल्यग्रहणं तत्र धान्यं क्रय्यम्। यत्र तु स्वयं दत्त्वा परकीयधान्यादिग्रहणं तत्र धान्यं क्रेयम्। द्रव्ये तु न क्रय्यत्वं नापि क्रेयत्वं, किन्तु धान्यादेरेव, शक्तिस्वभावात्। भाष्यस्वरसोऽप्येवमेवेत्याहुः।

❀ अभिनव-चन्द्रिका ❀

द्रव्ये तु न क्रय्यत्वं नापि क्रेयत्वमिति। वस्तुतस्तु द्रव्येऽपि क्रय्यत्वक्रेयत्वव्यवहारोऽस्त्येव।

❀ चिदस्थिमाला ❀

योग्यतेति। तदिति। 'तदर्थ' इति विशेषणमित्यर्थः। क्रय्यशब्दे क्रीणातिर्विक्रये वर्तते' विक्रयश्च लाभेच्छया द्रव्यग्रहणफलकं धान्यादिदानं, तदाह—**स्वीयं धान्यादीति।** क्रेयशब्दे तु स क्रये, स च धान्यार्थिभिर्द्रव्यं दत्वा ग्रहणं, तदाह—**यत्र त्विति। स्वीयं द्रव्यमिति।** 'स्वय'मिति पाठे—आत्मनेत्यर्थः। 'क्रियते' इति शेषः। नन्वेवं रीत्या द्रव्येऽपि व्यवहारः स्यादत आह—**द्रव्ये त्विति।**

शब्दशक्तीति। क्रय्यादिपदशक्तीत्यर्थः। अत्र मते बोधे एव विशेषो न तु फले इति बोध्यम्।

❀ सदाशिवभट्टीयम् ❀

मयाश्रयत्वाविशेषाद्द्रव्येपि प्रयोगद्वयं स्यादत आह—**द्रव्येति।** इदं च मतद्वयेपि बोध्यम्। **स्वरसेति।** 'क्रेयं नो धान्यं, न चास्ति क्रय्य'मिति प्रत्युदाहरणस्वरसेत्यर्थः। **आहुरिति।** तस्य ममापि योजयितुं शक्यत्वमरुचिः।

❀ विषमपदविवृतिः ❀

तदा=तत्त्वेन तच्छब्देन। **तत्र धान्यं क्रय्यमिति।** तत्पुरुषविषये तद्धान्यं क्रय्यमित्यर्थः। तत्पुरुषं प्रति तद्धान्यं क्रय्यमिति फलितं। **तत्र धान्यं क्रेयमिति।** तत्पुरुषम्प्रति धान्यं क्रेयमिति फलितम्। **द्रव्येति।** मूल्यभूतस्वर्णरूप्यादिद्रव्ये इत्यर्थः।

❀ वरवर्णिनी ❀

फलोपधानरूपमिति। परे तु—'क्रयणक्षणाव्यवहितपूर्वक्षणेऽपि फलोपधाननिश्चयाभावात्क्रयणोत्तरन्तु तस्य स्वत एवाभावादिदं क्वापि न स्यात्, स्वरूपयोग्यग्रहणे तु 'तदर्थे' इत्यव्यावर्त्तकं स्यादतः शेखरोऽयश्चिन्त्य एव। तादर्थ्यन्त्वत्र—'तदिच्छाधीनेच्छाविषयत्व'रूपं ग्राह्यमिति 'क्रेतारः क्रीणीयु'रित्यादौ सर्वसामञ्जस्य'मित्याहुः। 'क्रय्य'मित्यस्य,—'विक्रेतु'रिति शेषः। 'क्रेय'मित्यस्य,—'क्रेतु'रिति शेषः।

धान्यादेरेवेति। क्रेतृविक्रेत्रुभयेच्छाधीनेच्छाविषयत्वस्य मुख्यस्य धान्यादावेव सत्त्वेन तेषामेव तत्त्वव्यवहारः, धान्यक्रेतुः कार्षापणादिविक्रयेच्छा, धान्यविक्रेतुश्च धान्यसमर्पणपुरस्सरं कार्षापणादिक्रयणेच्छात्वार्थिकी न मुख्येति **नागेशभट्टानामाशयः।** एतेन—'वस्तुतस्त्वि'त्यादिना **दण्डिभट्टानामत्रारुचि**प्रदर्शनमाशयाज्ञानमात्रविजृम्भितमिति तदनुसरन्तोऽन्येपि समाहिताः। **परेतु**—'द्रव्ये तु न क्रय्यत्व'मित्यस्य—सुवर्ण—रजतादौ, नाणक—कार्षापणादौ, मणि—मौक्तिकादौ चापामरं द्रव्यपदेन प्रसिद्धे, न क्रय्यत्वं=न क्रय्यपदव्यवहार्यत्वं, विक्रेता रत्नापणिकादिस्तत्र न क्रय्यपदं प्रयुङ्क्ते इति यावत्। अतएव लोकास्तद्रत्नजातं न धान्यादिवत्प्रकामं बहिः प्रसारयन्तीति। एवं—न—क्रेयत्वं=तत्र रत्नादौ क्रेता न क्रेयशब्दं प्रयुङ्क्ते, किन्तु संग्राह्यादेयादिशब्दानेव प्रयुङ्क्ते इत्यर्थमाहुः। एतेनेदानीमपि कार्षापणादीनापणे प्रसारयन्तीत्यादिनाऽनार्यव्यवहारबलेन विपरीतं साधयन्तः समाहिताः। यत्त्वा'र्या अप्येवमाचरन्ती'ति—तत्तुच्छं, परानुकरणमात्रसाराणामनार्यव्यवहारमहमहमिकयाऽनुवर्त्तमानानामेव तथा व्यवहारो न शिष्टानामिति वक्तुं शक्यत्वादिति केचित्। अन्ये तु काव्यादौ रत्नादिप्रसारणस्यापि बर्णनाद्रत्नादेरपि धान्यादिवत्प्रसारणादिव्यवहारानुमानात्तत्र क्रेयत्वक्रय्यत्वयोर्न विरोध इत्याहुः।

लोपः शा । भोभगोअघोअपूर्वस्येत्यशीति चानुवर्त्तते, तत्रौकारान्तेष्वोतो गार्ग्यस्येति बाधकमित्याशयेनाह—**अवर्णपूर्वयोरिति** । व्योरित्यनुवृत्तावपि वर्णसमाम्नाये यकारस्य प्राक्पाठात्तत्क्रमेणाह—**यवयोरिति** । 'स तस्मा आचष्टे' इत्यादिभाष्यप्रयोगादत्र रोरित्यस्यासम्बन्धः । इदं सूत्रं लघुप्रयत्ने न । शाकटायनमते तयोर्विधानेन शाकल्यमते तदभावात् । अवर्णेति किं ? गौर्यत्र । पदान्तयोः किं ? हरये ।

अशि किं ? वृक्षं वेतीति वृक्षवीः, क्विप्, तमाचष्टे इति—**ण्यन्ताद्विच्** । वृक्षव्

❀ अभिनव-चन्द्रिका ❀

अत एव 'लोके' आपणे प्रसारिताः पणाः क्रय्या विक्रेतुः, क्रेतुश्च क्रेया इति व्यवहारो भवत्येव । एवं रजतसुवर्णादावपि तथा व्यवहारो भवत्येवेति सूचनाय केचिदित्याहुः ।

शाकटायनमते इति । अयं भावः—ऋषिविशेषघटितशास्त्रबोधितं साधुत्वं ऋषिविशेषो न जानाति, सामान्यतो बोधितं साधुत्वन्तु सर्व एव जानन्ति । तथा च व्योर्लघ्वितिशास्त्रबोधितं शाकटायनमते तत्साधुत्वं शाकल्यो न जानातीति तयोर्लोपो न ।

❀ चिदस्थिमाला ❀

वैरूप्यापत्तिस्तदर्थं इत्यत उक्तार्थालाभश्चात्रारुचिबीजम्। समस्तत्वादाह—**भो इति** । विवरणविव्रीयमाणयोर्विरोधं परिहरति—**व्योरिति** । ननु प्राग्वद्रोरित्यस्यानुवृत्त्या तत्स्थानिकयोरित्यर्थे वकारांशे बाधेऽपि यकारांशे पर्यवसानेन हर एहीत्यादौ प्राप्तेरेवाभावेन मूलमयुक्तमेवात आह—**स तस्मा इति** । वैकल्पिकत्वेन विधानसामर्थ्यं दुर्वचमत आह—**शाकटेति** । **गौरिति** । गौरी अत्रेत्यर्थः । **क्विबिति** । एतं मत्वोठ् तु न, टिलोपस्य

❀ सदाशिवभट्टीयम् ❀

लोपःशा । **भोभगोइति** । अयं भावः–गौर्यत्रेति व्यावृत्तयेऽपूर्वस्येति तावदनुवर्तनीयमेव व्योरित्यत्रापि, ततश्च भोयच्युतो न सिध्येदतो भोभगो इत्यपि स्वरितयितव्यं, स्मृतवादीनामनभिधानेनौतो गार्ग्यस्येत्यत्रासम्बन्धे दोषाभावेपि हलित्यत्रावर्णमात्रसम्बन्धे दोषस्य स्पष्टत्वात् ।

वस्तुतस्तु 'ओतो गार्ग्यस्ये'त्यत्रापि दोषः, एरर्थः यर्थः शम्भो यर्थ इत्यत्र भो इत्याद्यनुवृत्तेरभावे लोपापत्तिरूपः । न च स गुण एवेति वाच्यम्, ओतोगेति सूत्रे भाष्ये, सिद्धे लोपे नित्यार्थमिद'मित्युक्तं तद्विरोधात् । अन्यथाऽप्राप्ते विध्यर्थमेव वदेदत एव तत्र वक्ष्यति—**भाष्यानुसारिणस्त्विति** । एवं इश्च उश्च यू, तदर्थं य्वर्थमित्यत्र लोपवारणाय 'हलि सर्वेषा'मित्यत्राप्युभयानुवृत्तिरावश्यकी । एतेन तत्रोभयनिवृत्त्येष्टसिद्धिरित्यपास्तम् । दध्यानयेत्यादीनामिवैषामनभिधानस्यावश्यकत्वात् । 'अचिश्नुधातुभ्रुवां य्वो'रिति निर्देशेनेष्टापत्तेः कर्तुमशक्यत्वादिति ।

ननु अश्ग्रहणानर्थक्यं, नह्यत्र रुरस्तीत्यश्ग्रहणप्रत्याख्यानपरसिद्धान्तभाष्ये रुग्रहणादत्र सूत्रे रुसम्बन्धेन तत्स्थानिकयस्यैव लोपोनेन स्यात् । अन्यथान्यत्राभावादित्युक्तोक्तरीत्या तन्न व्याख्यत् । कार्यिणोऽभावादिति वक्ष्यमाणरीत्या सामान्यत एव वदेदत आह—**स तस्मा आ इति** । **असम्बन्ध इति** । एवं च रुपदमुपलक्षणमिति न तद्विरोध इति भावः । यद्वा 'भोभगो' इति सूत्रशेषोद्योतोक्तवृक्षवादिव्यावृत्तये 'हलि सर्वेषा'मित्यत्र रुपदसम्बन्धेन रुस्थानिकयस्यैव ग्रहणमिति पक्षान्तरेऽत्रापि सम्बन्धः स्यादत आह—'स तस्मेति' ।

❀ विषमपदविवृतिः ❀

लोपः शाकल्यस्य । **बाधकमिति** । गार्ग्यग्रहणस्य पूजार्थत्वेन नित्यं तदिति भावः । **शाकल्यमत इति** । अत एव 'कौ बाहू का ऊरू'इति शाकलानां वकाररहितः पाठः, तैत्तिरीयाणां

❀ वरवर्णिनी ❀

लघुप्रयत्न इति । परे तु नागेशमते लघुप्रयत्नेऽस्याप्रवृत्तावपि—'भोयच्युते'त्यादौ लघुप्रयत्नसहितमेकं रूपं, लघुप्रयत्नादेशस्य वैकल्पिकतया तदभावेऽनेन लोपविकल्पे रूपद्वयमिति यानि त्रीणि रूपाणि

करोति । क्विपि तूठ् स्यात् । विज्निमित्तको 'लोपो व्यो'रिति लोपस्तु न । णिलोपटिलोपयोः स्थानिवत्त्वात् । प्रातिपदिकाण्णिजुत्पत्त्या पदत्वाभावेन, परपदस्थाजादेशाभावेन च, लोपस्य पदचरमावयवत्वाभावेन च 'नपदान्त'इतिनिषेधाप्रवृत्तेः । एतेन क्वनिमित्तको वलोपोऽत्र दुर्वार इत्यपास्तम् । किञ्च स्थानिवत्त्वनिषेधं विनाऽस्य पदान्तत्वासिद्ध्यात्र निषेधाप्रवृत्तिः । 'स्थानिवत्त्वनिषेधज्ञाने पदान्तत्वज्ञानं तन्निर्णये च स्थानिवत्त्वाभावज्ञान'मित्यन्योन्याश्रयस्तत्राप्रवृत्तौ मानम् । इदञ्च नपदान्तसूत्रे भाष्ये स्पष्टम् ।

न च पदसञ्ज्ञायां टिलोपस्य स्थानिवत्त्वाद्वस्य पदान्तत्वमेव नास्तीत्यशीति व्यर्थमिति

❀ अभिनव-चन्द्रिका ❀

एतेनेति । णिलोपटिलोपयोः स्थानिवत्त्वेनेत्यर्थः ।

❀ चिदस्थिमाला ❀

णिलोपस्य बहिरङ्गासिद्धत्वात् । ननु पुनरपि क्विबेव कुतो नात आह—**क्विपीति** । 'क्वौ विधि'मिति स्थानिवत्त्वनिषेधात्, उक्तवैपरीत्येनात्र बहिरङ्गासिद्धत्वं न। नन्वेवमपि विचि 'लोपोव्यो'रिति वलोपापत्तिरेव सूत्रमते आह—**विजिति** । 'क्वौ लुप्त'मित्यस्यासार्वत्रिकत्वात्तन्निमित्तकलोपे एव प्रवृत्तेश्चात्राप्रवृत्तिरिति सूचयन्नाह—**टिलोपेति** । ननु 'न पदान्ते'ति निषेधोऽत आह—**प्रातीति** । ननु 'सुबन्ताण्णि'जिति हरदत्तादिमतेऽन्तर्वर्तिसुपा तत्त्वमेकदेशेतिन्यायेन वान्तेऽपि सुलभमेवात आह—**परेति** । इदञ्च कर्मणि क्विप्रत्यये शेषषष्ठीसमास इति पक्षे तत्प्राप्तिमभ्युपेत्य, वस्तुतस्तु सपक्ष एवायुक्त इति तदप्राप्तिरेवेत्याह—**लोपस्येति** । **एतेनेति** । अन्यान्ययुक्तिद्वयेन तदप्रवर्तनेनेत्यर्थः । अन्यथा तथा पदत्वाभावेऽपि क्विबुत्तरसुब्निमित्तकपदत्वसत्त्वेन स स्यात् । न चातिदिष्टभत्वेन पदत्वबाधः, णिचो लुप्तत्वात् । न च स्थानिवत्त्वम्, अल्विधित्वात्। न चाचः परेति णिलोपस्य तत्त्वेन तत्त्वं, तस्य स्थानिवत्त्वस्य 'न पदान्ते'ति निषेधप्रतिबन्धद्वारा पदान्तस्थानिकवलोपप्रतिबन्धकतया तत्रापि 'न पदान्ते'ति निषेधात् । णिलोपस्येव टिलोपस्यापि स्थानिवत्त्वापत्तौ वान्ते भत्वस्य दुर्लभत्वेन तत्र पदत्वानिवृत्तेः, 'प्रकल्प्य वापवादविषय'मिति न्यायेन निषेधविषये तत्प्रतिबन्धाय स्थानिवत्त्वाप्रवृत्तेश्चेति भावः । किञ्चान्तरङ्गभसञ्ज्ञयोक्तरीत्या बहिरङ्गपदत्वस्यासिद्धत्वेन बाधायोगात् । **इत्यपास्तमिति** । इत्यप्यपास्तमित्यर्थः ।

किञ्चेति । 'यत' इतिशेषः। नास्य=वस्य । अत्र=वृक्षव् करोतीत्यत्र । नन्वेवमपि तत्र तदप्रवृत्तिः कुतोऽत आह—**स्थानीति** । **तत्रेति** । वलोपे इत्यर्थः। निषेधस्येति भावः। **पदेति** । बहिर्भूतसुनिमित्तिकायामित्यर्थः।

❀ ज्योत्स्ना ❀

सूत्रे कर्मसाधनो विधिशब्दः, स्थानषष्ठ्या समास इति पक्षमभ्युपगम्य वृक्षवित्यत्र निषेधाप्रवृत्तिमाह—**किञ्चेति** । **स्पष्टमिति** । भावसाधनविधिशब्दाश्रयणे वेतस्वानित्यत्र रुःप्राप्नोतीत्याशङ्क्य—'ननु

❀ सदाशिवभट्टीयम् ❀

क्विपि त्विति । णिचः पूर्वभाविनमाश्रित्य तु न, ऊठो बहिरङ्गत्वेन टिलोपस्यासिद्धत्वात् **एतेन केति** । आद्यान्ययुक्तिद्वयेन 'पदान्ते'ति निषेधाप्रवर्त्तनेनेत्यर्थः। अन्यथा बहिर्भूतसुपापादत्वात् स्यादेवेत्याहुः ।

❀ विषमपदविवृतिः ❀

सवकारःपाठः । **एतेनेति** । वलोपे स्थानिवत्त्वेनेत्यर्थः । **अन्योन्याश्रय इति** । यथाऽस्य न

❀ वरवर्णिनी ❀

भवन्ति, तान्येव लघुप्रयत्नेऽस्य प्रवृत्त्यङ्गीकारेऽपि भवन्ति, तथाहि—लघुप्रयत्नलोपे तद्रहितमेकं, लोपविकल्पात्तत्सहितमेकं, लघुप्रयत्नस्यापि विकल्पाच्छुद्धयकारसहितमेकमिति शेखरोऽयं काकदन्तपरीक्षामनुकरोतीत्याहुः ।

मानमिति । अत्रत्योऽन्योन्याश्रयप्रतिपादकः शेखरो'न पदान्ते'त्यत्र कर्मसाधनो विधिशब्दस्तेन पदचरमावयवोद्देश्यके विधावित्यर्थ'इत्यसिद्धपक्षे बोध्यः, अन्यथा 'वेतस्वा'नित्यत्रापीत्थमेवान्योन्याश्रयान-

वाच्यम् । 'पूर्वत्रासिद्धीय'इति निषेधात् । साक्षात् ,पदत्वादिद्वारकपरम्परया वा पूर्वत्रासिद्धीयप्रापकस्य तत्प्रतिबन्धकस्य वाऽतिदेशस्य तेन निषेधादिति केचित् ।

परे तु—'न पदान्ता हलोऽणः सन्ती'ति लण्सूत्रस्थभाष्याद्वृक्षवादेरनभि-

❀ अभिनव-चन्द्रिका ❀

निषेधादिति । साक्षात्पूर्वत्रासिद्धीयसाधकस्य, परम्परया पूर्वत्रासिद्धीयसाधकस्य, साक्षात्पूर्वत्रासिद्धीयप्रतिबन्धकस्य, परम्परया पूर्वत्रासिद्धीयप्रतिबन्धकस्य च स्थानिवद्भावस्यानेन निषेधः । तत्र साक्षात्साधकस्योदाहरणं—किमु सन्ति । अत्र 'श्नसोरल्लोप'इत्यल्लोपस्य स्थानिवद्भावः पूर्वत्रासिद्धीयस्य 'मय उञो वो वा' इति वत्वस्य साक्षात्साधकः । एवं वृक्षस्य वः, वृक्षवः, तस्मात् ण्यन्ताद्विचि 'वृक्षव्' इत्यत्र णिलोपटिलोपयोः स्थानिवद्भावः–साक्षात्पूर्वत्रासिद्धीयस्य 'लोपः शाकल्यस्ये'ति वलोपस्य साधकः । परम्परया पूर्वत्रासिद्धीयसाधकस्योदाहरणं–पिपठीस्तत्रेति । अल्लोपस्य स्थानिवद्भावः पदसञ्ज्ञाप्रतिबन्धद्वारा षत्वसाधकः । साक्षात्प्रतिबन्धकस्योदाहरणं–राज्ञ इति । अत्राल्लोपस्य स्थानिवद्भावः साक्षात् श्चुत्वप्रतिबन्धकः । एवं पौरोहित्यं काव्यमित्यादौ यस्येति लोपस्य स्थानिवद्भावः साक्षात् 'अनचि चे'ति द्वित्वप्रतिबन्धकः । एवं शो तनूकरणे इत्यस्मात् 'घञर्थे कविधान'मिति कप्रत्यये वाक्शब्देन समासे तस्माण्ण्यन्तात्क्विचि 'तितुत्रे' इतीडागमनिषेधे वाक्श्रिरित्यादौ टिलोपादेः स्थानिवद्भावः साक्षात्पूर्वत्रासिद्धीयस्य श्चुत्वस्य प्रतिबन्धकः । परम्परया प्रतिबन्धकस्योदाहरणं—पिपठीरिति । अत्राल्लोपस्य स्थानिवद्भावः पदसञ्ज्ञाप्रतिबन्धद्वारा रुत्वप्रतिबन्धक इति दिक् । **हलोऽणः सन्तीति** । अत एव कर्त्रादेर्नानभिधानम् । नचैवमपि रेफान्तानां गिरादी-

❀ चिदस्थिमाला ❀

ननु पदसञ्ज्ञायां यथोद्देशत्वस्यैव सिद्धान्ततयाऽत्रैपादिकत्वेन कथं तत्प्रवृत्तिरत आह—**साक्षादिति** । अन्यपरम्पराया वारणायाह–**पदत्वादीति** । आदिना भत्वपरिग्रहः । विकल्पः प्रयोगभेदेन । **केचिदित्यनेन** सूचितामरुचिमाह—**परे त्विति** ।

❀ ज्योत्स्ना ❀

चैवं विज्ञायते यः सम्प्रति पदान्त' इति भाष्यं, तत्र किमपेक्षया सम्प्रतीत्यतः कैयट आह—स्थानि-

❀ सदाशिवभट्टीयम् ❀

ननु पदादिसञ्ज्ञायां यथोद्देशस्यैव सत्त्वात्कथं पूर्वत्रासिद्धत्वमत आह–**साक्षादिति** । अन्यपरम्परावारणायाह—**पदत्वादीति** । आदिना भत्वम् । साक्षात्प्रतिबन्धकातिदेशोदाहरणे राज्ञि श्चुत्वं । पदत्वद्वारकपरम्परया प्रतिबन्धकस्य तु—पिपठीरिति । उभयरीत्या प्रापकस्य तूदाहरणं मृग्यमनन्यथासिद्धम् । 'तत्प्रतिबन्धके'ति पाठः । **न पदान्ता इति** । लण्सूत्रस्थभाष्यात्पदान्ता हलोऽणो न सन्तीतिहेतोर्वृक्षवादेरनभिधान-

❀ विषमपदविवृतिः ❀

पदान्तसूत्रस्थशब्दरत्नेनाविरोधस्तथा तट्टीकायामस्माभिर्निरूपितम् । **पदत्वादिद्वारकेति** । आदि-

❀ वरवर्णिनी ❀

पदान्तेति निषेधाप्रवृत्तौ तदर्थं पदे इति सप्तमीसमासेन परपदस्थाजादेश इत्यर्थाश्रयणं भाष्यकृतामसङ्गतमेव स्यात् । सिद्धान्तभूते भावसाधनपक्षे तु वेतस्वानित्यत्र—नान्योनाश्रयशङ्का, रुत्वरूप–पदचरमावयकर्मकविधेः स्थानिभूतादचः पूर्वत्वेन दृष्टत्वाभावेन स्थानिवद्भावनिषेधप्रतिबन्धकपदान्तकर्मकविधित्वाभावरूपकार्ये कर्त्तव्ये स्थानिवद्भावाप्रवृत्तेः । कर्मसाधने तु–पदान्तसकारस्य रुत्वविधानेन रोः पदचरमावयवत्वग्रहान्न पदान्तेति निषेधप्रवृत्त्या स्थानिवद्भावनिषेधात्पूर्वं सकारे पदान्तत्वाग्रहात्, तद्ग्रहे च पदान्तोद्देश्यकविधित्वाभावेन निषेधाप्रवृत्तेः सकारादेः स्थानिभूतादचः पूर्वत्वेन दृष्टत्वमस्त्येवेति तस्य निषेधप्रतिबन्धकपदान्तत्वाभावरूपकार्ये कर्त्तव्ये स्थानिवद्भावरूपकार्ये स्थानिवद्भावप्रवृत्तेरन्योन्याश्रयो युक्त एवेत्याहुः ।

पूर्वत्रासिद्धीये इति । विनिगमनाविरहाच्चतुर्विधस्थानिवद्भावप्रतिबन्धकोऽयमित्याशयः । तत्र साक्षा-

धानमेव । 'भोभगो' 'इति सूत्रेऽश्ग्रहणमनर्थकमन्यत्राभावा'दिति वार्त्तिकाच्च । अशोऽन्यत्र तन्निमित्तकार्यकार्यिणोऽभावादिति तदर्थः । 'न ह्यन्यत्र रुरस्ती'ति तद्व्याख्यानभाष्ये रुग्रहणमुपलक्षणम् । एतदाशयमजानानेनैकदेशिना—'उत्तरार्थं हलि सर्वेषामिति,—वृक्षव् करोतीत्यत्र मा भू'दित्युक्तम् । अस्य चैकदेश्युक्तित्वं लण्सूत्रस्थोक्तभाष्यविरोधेन स्पष्टमेव कैयटेनोक्तम् । अत एव भाष्ये 'उत्तरार्थ'मित्युक्त्वा 'हलि सर्वेषा'मित्यत्रैव प्रयोजनमुक्तम् । 'हलि सर्वेषा'मित्यत्र वकारनिवृत्त्यैवात्र तद्वारणसम्भवान्न तत्राप्यश्ग्रहणस्य प्रयोजनमिति तद्भाष्यमेकदेश्युक्तिरेवेत्याहुः ।

❀ अभिनव-चन्द्रिका ❀

नामनभिधानं स्यादिति वाच्यम्, पदान्ता हल्रूपा 'अणोऽप्रगृह्यस्ये'त्येतदनुनासिककार्यभाजः परेऽणो न सन्तीति भाष्याशयेनादोषात् ।

❀ चिदस्थिमाला ❀

गमकान्तरमाह—**भोभगो इतीति** ननु कथं तत एतल्लाभोऽत आह—**अशोऽन्यत्रेति** । तन्निमित्तककार्यस्य—कार्यिणः=स्थानिनोऽभावादित्यर्थः । नन्वेवं भाष्यविरोधोऽत आह—**नह्यन्यत्रेति** । उत्तरभाष्यविरोधं परिहरति—**एतदिति** । अत एव=तेषामनभिधानादेव । एवेन 'लोपः शाके'त्यस्य व्यवच्छेदः । अन्यथा तत्रापि फलसत्वेन तावत्पर्यन्तधावनासङ्गतिरेवेति भावः ।

प्रकारान्तरेणापि तस्यैकदेश्युक्तित्वमाह—**हलीति** । एतेन तत्र प्रयोजनोक्तिरुपलक्षणमेतस्यापीति न

❀ ज्योत्स्ना ❀

वत्त्वनिषेधाद्विना यः सिद्धः पदान्तस्तस्य विधौ स्थानिवत्त्वनिषेधो, यथा कानि सन्ति कौ स्त इति । इह तु सकारः स्थानिवत्त्वनिषेधाद्विना पदान्तत्वेनासिद्ध इति भवत्येव स्थानिवद्भाव इत्यपदान्तत्वात् सस्य रुत्वाभाव इति वृक्षवादेरनभिधानमेवेति लण्सूत्रभाष्ये न पदान्ताः परेऽणः सन्तीति पाठस्तस्मात्, 'ननु चेदमस्ति कर्तृ हर्तृ इति' तदुत्तरभाष्यात्पराणुदाहरणसद्भावस्य प्रदर्शनाच्च चिन्त्यमेतत् । 'भोभगो' इति सूत्रभाष्यतात्पर्यवर्णनं तु परिभाषाप्रदीपार्चिषि विस्तरेण निरूपितम् ।

❀ सदाशिवभट्टीयम् ❀

मेवेति योजना । तत्र हि भाष्ये'ऽण्ग्रहणसामर्थ्यात्पूर्वेणा'णोऽप्रगृह्यस्ये'त्यत्राण्, अन्यथाऽच इत्येव वदे'दित्युक्तम् । अभिधाने त्वेषान्तदसङ्गतिः स्पष्टैवेति तत्रैवोद्योते स्पष्टम् । यथाश्रुतपाठस्य कौस्तुभे दूषितत्वादेवं व्याख्यायते । अष्टमे कैयटस्याप्ययमेवाशयः । **उक्तभाष्येति** । उक्तार्थतात्पर्यकभाष्य इत्यर्थः ।

❀ विषमपदविवृतिः ❀

पदेन पदत्वाभावः । 'परम्परया वे'त्येतत्प्रापकस्य, प्रतिबन्धकस्य वेत्युभयत्रान्वयि । अत्र च स्थानिवद्भावः पदत्वाभावसम्पादनद्वारा पूर्वत्रासिद्धीयप्रतिबन्धक इति बोध्यम् । वस्तुतस्तु पूर्वत्रासिद्धीय इत्यस्यैवमर्थकरणे फलस्य प्रमाणस्य चाभावः । ननु पाचयतेः पाक्, याजयतेर्याट्, पिपठिषतेः पिपठीरित्यादौ कुत्वादिप्रवृत्तिः फलम्, अन्यथा तत्र पदसञ्ज्ञायां चकारादेः पदान्तत्वाभावेन कुत्वाद्यनापत्तेरिति चेन्न । कार्यकालपक्षे पदसञ्ज्ञाया अपि पूर्वत्रासिद्धीयत्वेनादोषात् । 'हलोऽणः सन्ती'ति भाष्ये क्वचि'त्परेऽणः सन्ती'ति पाठः । **इत्याहुरिति** । परे तु—'भोभगो' इति सूत्रे भाष्ये 'वृक्षव् करोति' प्रयोगस्य कण्ठत एव पठितत्वेनानभिधानोक्तिः साहसादेव । न पदान्ता हलोऽणः

❀ वरवर्णिनी ❀

त्पूर्वत्रासिद्धीयप्रापकोदाहरणं—क इवाचरणं—क्तिः, पुंसः क्तिः—'पुंक्ति'रित्यत्र अकारलोपस्य स्थानिवत्त्वात्पुमः खयीति रुत्वं न । न पदान्तसूत्रेण पदचरमावयवविधित्वान्निषेधे तु स्वार्थिककप्रत्ययान्त'पुंक'

कानि सन्तीति । वाक्यसंस्कारपक्षेऽपि पूर्वोपस्थितनिमित्तकत्वरूपान्तरङ्गत्वमादायान्तरङ्गाणां पूर्वं प्रवृत्तिरितीकारादेः स्थानिभूतादचः पूर्वत्वं बोद्धयम् ।

एकः पूर्व । 'गुण' इत्यादेर्विधेयसमर्पकत्वेन तत्रैकत्वसङ्ख्याया विवक्षणेनोभयोः

❀ अभिनव-चन्द्रिका ❀

विधेयसमर्पकत्वेनेति । नच 'सूत्रे लिङ्गवचन'मिति परिभाषया एकत्वविवक्षा कर्तुं न शक्यते इति वाच्यं, तस्या अनुवाद्यविषयत्वात् । अत एवात्रत्यैकग्रहणप्रत्याख्यानपरं भाष्यं सङ्गच्छते । **एकग्रहणं स्पष्टार्थमिति ।** नचैकत्वसङ्ख्याविवक्षणेऽपि एकत्वसङ्ख्यायाः केवलान्वयित्वेनाव्यावर्तकत्वात्पूर्वपरयोः स्थाने गुणद्वयं दुर्वारं स्यादिति वाच्यं, स्वसजातीयनिष्ठभेदप्रतियोगितानवच्छेदकैकत्वस्यैकवचनार्थत्वेनादोषात् । साजात्यञ्च–'स्वप्रकृत्यर्थतावच्छेदकवत्त्व'—'स्वसमभिव्याहृतपदार्थसंसर्गित्वो'भयधर्मेण । तथा च 'गङ्गोदक'मित्यादौ गुणद्वये एकवचनस्य स्वप्रकृत्यर्थतावच्छेदकं यत् सङ्केतसम्बन्धेन–गुणपदं, तद्वत्त्वं, स्वसमभिव्याहृतपदार्थौ यौ पूर्वपरौ, तत्संसर्गित्वमेतदुभयधर्मेण

❀ चिदस्थिमाला ❀

ततोऽनभिधानमिति नैकदेश्युक्तित्वं तस्येत्यपास्तम् । एतेन तथा **मनोरमारत्नाकरदण्ड्या**द्युक्तमपास्तम् ।

तत्साधकतन्निषेधोदाहरणमाह—**कानीति ।** नन्वस्त्वत्र प्रागुक्तरीत्या वाक्यसंस्कारपक्षस्तथापि श्नसल्लोपविध्योर्युगपत्प्रवृत्त्यैकारस्यानादिष्टादचः पूर्वत्वाभाव एव । न च परत्वान्निर्वाहः, मिथः परिहारेण लब्धावकाशयोः समवस्थितयोरेकत्र लक्ष्ये युगपत्प्राप्तिरूपविरोधाभावेन तदप्रवृत्तेः । नित्यत्वमप्युभयोः समम् । न च वाचः क्रमवृत्तितया यौगपद्यमपि नेति वाच्यम् , तथापि वैपरीत्यापत्तेरत आह—**वाक्येति ।** अपिना पदसंस्कारपक्षसमुच्चयः । तस्यानेकविधत्वादाह—**पूर्वोपेति ।** एतन्मूलक एव

❀ ज्योत्स्ना ❀

वाक्यसंस्कारपक्षेऽपीति । अयं भावः–यद्यप्यस्मिन्पक्षे विरोधाभावेन सर्वशास्त्राणां युगपत्प्रवृत्त्या

❀ विषमपदविवृतिः ❀

सन्तीत्यत्र च 'कार्यभाज इति शेष' इति कैयटेनैव लण्सूत्रे विस्पष्टमुक्तत्वेन वृक्षवादेरनभिधाने

❀ वरवर्णिनी ❀

शब्दादाचारक्विबन्तात् क्तिनि 'पुंक्ति'रित्यत्र फलं बोध्यम् । एवं वन्दधातोः क्विपि संयोगान्तलोपे वनित्यस्य तच्छब्देन समासे तस्मादाचक्षणणिजन्तात् क्तिचि टिलोपणिलोपयोः–वन्तिरित्यत्र णिलोपस्य स्थानिवत्त्वादम्परत्वेन नश्छव्येति रुत्वं नेत्यपि फलं—**श्रीबालशास्त्रि**चरणा आहुः । द्वितीयं–पिपठीस्तत्रेत्यत्र स्थानिवद्भावेन पदत्वप्रतिबन्धद्वारा षत्वं न । तृतीयम्—अन्तशब्दादाचारक्विबन्तात्कर्त्तरि क्विप्यल्लोपे सौ हल्ङ्यादिलोपे संयोगान्तलोपे अनित्यस्य शम्भुशब्देन योगे 'अञ्च्छम्भुरित्यत्र शितुगिति तुक्सिद्धिः । एवं राश इत्यत्र श्चुत्वमपि बोध्यम् । चतुर्थं—पिपठीरिति **जटाजूटकृतः** ।

वाक्यसंस्कारपक्षेऽपीति । पदसंस्कारपक्षे स्थानिभूतादचः पूर्वत्वेन दृष्टत्वस्यैकारेऽभावान्निकारस्य यण्, वाक्यसंस्कारपक्षेऽपि स्थानिवद्भावनिषेधाच्च यणित्य**पि**पदेन ध्वनितम् । **परे** तु—वाक्यसंस्कारपक्षेऽन्तरङ्गपरिभाषा न प्रवर्त्तत इति शङ्कायां—पूर्वोपस्थितनिमित्तकत्वरूपान्तरङ्गत्वसत्त्वात्प्रवर्त्तत एवेत्याशयेन–'वाक्यसंस्कारपक्षेऽपी'ति ग्रन्थ इत्याहुः ।—"ननु वाक्यसंस्कारपक्षेऽपि साध्यत्वेन पूर्वं क्रियाप्रयोक्तृबुद्ध्यारूढा भवति । तस्याश्च निरूपकाकाङ्क्षायां ततः कारकाणि साधनतया बुद्ध्यारूढानि भवन्तीति तद्वाचकशब्दानामपि तेनैव क्रमणोपस्थितिरिति 'सन्ती'त्यस्यैव पूर्वमुपस्थितावल्लोपस्यैवान्तरङ्गत्वमिति कथमिकारादेस्तत्त्वमिति चेन्न, प्रयोक्त्रिच्छायाः सर्वतो बलवत्त्वेन–येन क्रमेण तदिच्छा तेनैव क्रमेण शब्दोपस्थित्या–'कानी'त्यस्यैव पूर्वं यत्र प्रयोक्त्रिच्छा तत्र श्नसादीनामन्तरङ्गत्वस्य वक्तुं शक्यतया स्थानिभूतादचः पूर्वत्वेन दृष्टत्वस्य सूपपादत्वादिति—" **श्रीबालशास्त्रि**चरणानामाशयमस्म**त्पितामह**चरणा आविश्चक्रुः ।

पूर्वपरयोरेकवाक्यतयैव विधेयान्वयेन चानयोः पूलयोः कटं कुर्वित्यादित इवोभयसम्बन्ध्येकविधेयस्यैव प्रतीतेरेकग्रहणं स्पष्टार्थम् ।

❀ अभिनव-चन्द्रिका ❀

स्वसजातीयं-गुणद्वयं भवतीति–तन्निष्ठो यो भेदः पूर्वगुणवृत्तिः–'परगुणवृत्त्येकत्ववान्न'त्याकारको भेदस्तादृशभेदीयप्रतियोगितावच्छेदकं तदेकत्वं जातम्, एवञ्चालनीन्यायेन परगुणवृत्तिर्यो भेदः 'पूर्वगुणवृत्त्येकत्ववान्न'त्याकारकस्तादृशभेदप्रतियोगितावच्छेदकं तदेकत्वं जातमिति–न पूर्वपरयोः स्थाने गुणद्वयम् । एकस्मिन् गुणे तु स्वसजातीयस्स एव गुणो जात इति स्वस्मिन् 'स्ववृत्त्येकत्ववान्न-'त्याकारकभेदाभावाद्गुणे 'घटो ने'त्यादिभेदस्यैव सत्त्वेन तादृशभेदप्रतियोगितावच्छेदकं घटत्वादिकम्, अनवच्छेदकमेवैकत्वं जातमिति लक्षणसमन्वयः । अत एव 'पशुना यजेते'त्यादावनेकपशुकरणकयागान्नादृष्टसिद्धिः ।

ननु स्वप्रकृत्यर्थतावच्छेदकपशुत्वस्य स्वसमभिव्याहृतयागसंसर्गित्वस्य च यागीयपशुषु सर्वेषु सत्त्वात्स्वसजातीयाः सर्वेऽपि यागीयपशवो जातास्तथाच चालनीन्यायेन सर्वाण्येवैकत्वानि स्वसजातीयनिष्ठभेदप्रतियोगितावच्छेदकानि जातानीति कथमेकैकपशुकरणकनानायागादृष्टसिद्धिरिति चेत्, अत्र केचित्—'पशुना यजेत' इत्यादावेकवचनार्थैकत्वस्य स्वाश्रयपशुकरणकत्वं—स्वानाश्रयपश्वकरणकत्वमेतदुभयसम्बन्धेन धर्मिपारतन्त्र्येण यागेऽन्वयस्वीकारेणैकपशुकरणकयागादृष्टसिद्धिः, अनेकपशुकरणकयागाच्चादृष्टासिद्धिश्चेत्याहुः ।

परे तु–साजात्यघटकं स्वसमभिव्याहृतपदार्थसंसर्गित्वञ्च–स्वसमभिव्याहृतपदार्थतावच्छेदकधर्मपर्याप्त्यनुयोगितावच्छेदकधर्मावच्छिन्नसंसर्गित्वरूपं विवक्षितम् । तथा च 'पशुना यजेते'त्यादौ स्वसमभिव्याहृतपदार्थतावच्छेदकं यत् यागत्वं, तत्पर्याप्त्यनुयोगितावच्छेदकं, तद्व्यक्तित्वं, तदवच्छिन्नसंसर्गित्वं–तद्यागीयपशावेव, न तु यागान्तरीयपशाविति–एकैकपशुकरणकनानायागादृष्टसिद्धिः ।

नचैवमपि यागत्वपर्याप्त्यनुयोगितावच्छेदकं यागान्तरगतं तद्व्यक्तित्वमपि, तदवच्छिन्नसंसर्गित्वं

❀ चिदस्थिमाला ❀

'वाक्यसंस्कारपक्षे श्रुतवर्णक्रमेणैव लक्ष्यसंस्कार' इत्युद्घोषः । स्पष्टञ्चेदमन्यत्र ।

यत्तु **रत्नकारः**—एकग्रहणमावश्यकमन्यथा तयोः पृथक् स्थानित्वेनादेशद्वयं स्यात्, 'रदाभ्या'मुभौ साभ्यासस्ये'ति वत् । न च मीमांसकमर्यादया निर्वाहस्तस्या अत्रानाश्रयणात्, अन्यथा बहुदोषापत्तिरिति स्पष्टमन्यत्र, तस्मादेकग्रहणमेवेह तदनाश्रयणे मानमिति । तन्न, अग्नीषोमाभ्यामित्यादौ द्वन्द्वोत्तरचतुर्थ्या समुदिते तत्समुदाये वा एकप्रदेयनिरूपितैकदेवतात्वबोधवत्पूर्वपरयोरित्यत्र द्वन्द्वोत्तरषष्ठ्या एकविधेयनिरूपितत्वनिष्ठैकस्थानित्वबोधेनादेशद्वयाप्रसक्तेः । 'रदाभ्या'मित्यादौ तु गमकवशात्तथेति न दोष इत्यन्यत्र स्पष्टं, तद्ध्वनयन्नाह—**गुणे इति** । आदिना वृद्ध्यादिपरिग्रहः । तत्र=विधेये, पश्वेकत्ववत् । ननु नेदं सर्वथात्राश्रीयते दोषबाहुल्यादिति चेन्न, सर्वथानाश्रयणेऽपि लक्ष्यानुसारिव्याख्यानेन क्वचिदाश्रयणात्तदेतद्ध्वनयन्नाह -**नोभयोरिति** ।

एकेति । 'द्वन्द्वनिर्देशा'दित्यादिः । अन्यथा पृथगेव वदेत् । किञ्च सम्भवत्येकवाक्यत्वे वाक्यभेदस्यान्याय्यत्वम् । **पूलयोरिति** । अत्रैकशेषस्तत्र द्वन्द्व इति विशेषोऽन्यत्सर्वं तुल्यम् । अत्रेतरेतरद्वन्द्वनिर्देशेन प्रत्येकमपि

❀ ज्योत्स्ना ❀

शिभावस्याकारसमवधाने सत्त्वात्स्थानिभूतादचः पूर्वत्वेन दृष्टस्यैकारस्य यणोऽविधानात्स्थानिवत्त्वाप्राप्त्या निषेधो न प्राप्नोति, तथापि श्रुतवर्णक्रमादेव संस्कारकल्पनम्, अन्तरङ्गत्वात्, अत्र च पदान्तग्रहणस्यैतदुदाहरणपरं भाष्यमपि मानमित्याहुः ।

❀ विषमपदविवृतिः ❀

प्रमाणाभावाच्च । 'वृक्षव्करोती'त्यत्र चाशीत्यनुवृत्त्या 'हलि सर्वेषा'मित्यस्याप्रवृत्तौ वकारस्य न कार्य-

❀ अभिनव-चन्द्रिका ❀

यागान्तरीयपशावप्यस्त्येवेति दोषस्तदवस्थ एवेति वाच्यं, एकत्वविशिष्टपदार्थसंसर्गित्वस्य विवक्षितत्वात् । वै० 'स्वनिष्ठविषयतानिरूपितविषयताश्रयत्वतात्पर्यविषयत्व'सम्बन्धेन । यागान्तरस्य च एतदेकत्वविषयतानिरूपितविषयताश्रयत्वतात्पर्यविषयत्वाभावान्न दोषः । यद्यपि एतदेकत्वविशिष्टयागीयपशुपदार्थनिष्ठभेदप्रतियोगितावच्छेदकत्वं यागान्तरीयपशुगतैकत्वस्यापद्यते एव, तथा तदेकत्वविशिष्टयागान्तरीयपशुनिष्ठभेदप्रतियोगितावच्छेदकत्वमेतदेकत्वस्यापीति नैतावताऽपि दोषोद्धारः सम्भवति, तथापि 'स्वसजातीयनिष्ठभेदप्रतियोगितावच्छेदकत्व' 'स्वतादात्म्यो'भयाभाववत्त्वस्य एकत्वे विवक्षणान्न दोषः । एतदेकत्वे तदेकत्वविशिष्टयागान्तरीयपशुनिष्ठभेदप्रतियोगितावच्छेदकत्वस्य सत्त्वेऽपितत्तादात्म्याभावेन उभयाभावस्य सुलभत्वात् । नन्वेवमनेकपशुकरणकयागादप्यदृष्टसिद्ध्यापत्तिः, सर्वेषां पशुगतानामेकत्वानां निरुक्तोभयाभावस्य सुलभत्वादितिचेत्, अत्रोच्यते—स्वसमभिव्याहृतपदार्थतावच्छेदकधर्मपर्याप्त्यनुयोगितावच्छेदकधर्मविशिष्टान्यत्वमेकत्वे विशेषणीयम् । वै०स्वविशिष्टनिष्ठभेदप्रतियोगितावच्छेदकत्व स्वविशिष्टवृत्तित्वोभयसम्बन्धेन । उभयत्र स्ववै०—स्वावच्छिन्नसंसर्गित्व स्वसमभिव्याहृतप्रकृत्यर्थतावच्छेदकवत्त्वोभयसम्बन्धेन । एकयागीयानेकपशुसमवेतानां सर्वेषामेकत्वानां यागगततद्व्यक्तित्ववैशिष्ट्यस्य निरुक्तोभयसम्बन्धेन सत्त्वान्न तद्विशिष्टान्यत्वमिति नानेकपशुकरणकयागाददृष्टसिद्धिः । एकैकपशुकरणकानेकयागेभ्यश्चादृष्टसिद्धिः सुलभा । तत्र भिन्नभिन्नयागसम्बन्धिपशुसमवेतानामेकत्वानां तत्तद्यागगततद्व्यक्तित्ववैशिष्ट्यस्यासत्त्वेन तदन्यत्वस्य सुलभत्वात् । यत्तद्व्यक्तित्वमादाय भेदप्रतियोगितावच्छेदकत्वं तदादाय न तद्विशिष्टपदार्थवृत्तित्वं, यदादाय तद्विशिष्टपदार्थवृत्तित्वं तदादाय न तद्विशिष्टनिष्ठभेदप्रतियोगितावच्छेदकत्वमिति न कस्यापि एकत्वस्य तद्विशिष्टत्वमिति । न चैवमेकस्यां शालायां यत्र बहवो ब्राह्मणा भुञ्जते तत्रास्यां शालायां ब्राह्मणो भुङ्क्ते इति प्रयोगापत्तिः । भोजनत्वस्य प्रत्येकपर्याप्तत्वेन भोजनत्वपर्याप्त्यनुयोगितावच्छेदकतत्तद्व्यक्तित्वावच्छिन्नसंसार्गित्वस्य प्रकृत्यर्थतावच्छेदकब्राह्मणत्वस्य च प्रत्येकं ब्राह्मणे एव सत्त्वेन किञ्चिद्भोजनगततद्व्यक्तित्ववैशिष्ट्यस्य पूर्वोक्तरीत्या कस्मिन्नपि एकत्वेऽसत्त्वेन तदन्यत्वस्य सुलभत्वादिति वाच्यम्, स्वसमभिव्याहृतपदार्थतावच्छेदको यो यो धर्मस्तत्पर्याप्त्यनुयोगितावच्छेदकधर्मविशिष्टान्यत्वस्य विवक्षणेन प्रकृते च शालात्वस्यापि तथात्वात् तत्पर्याप्त्यनुयोगितावच्छेदकतद्व्यक्तित्ववैशिष्ट्यस्यैव ब्राह्मणगतेषु सर्वेषु एकत्वेषु सत्त्वेन तदन्यत्वस्याभावादापत्तेरयोगात् । नचैवमपि यत्र शालायामेको ब्राह्मणो भुङ्क्तेऽपरश्च स्वपिति तत्रास्यां शालायां ब्राह्मणो भुङ्क्ते इति प्रयोगो न स्यात्, ब्राह्मणद्वयस्यापि पूर्ववत्स्वसजातीयत्वादिति वाच्यम्, स्वसमभिव्याहृतप्रकृत्येत्यादिप्रथमसम्बन्धस्थाने स्वसमभिव्याहृतैकवचनार्थनिष्ठप्रकारतानिरूपितधर्मितावच्छेदकवत्त्वस्य विवक्षणात् । तथा च प्रकृते भोजनकर्तृत्वविशिष्टब्राह्मणत्वस्यैवानतिप्रसक्ततया धर्मितावच्छेदकत्वेन तस्य च स्वापकर्तृत्वविशिष्टब्राह्मणेऽसत्त्वेनाऽदोषः । नन्वेवमपि सम्पन्नो व्रीहिरित्यादौ स्वप्रकृत्यर्थतावच्छेदकव्रीहित्वस्य स्वान्वयितावच्छेदकत्वेन तात्पर्यविषयीभूतक्षेत्रत्वपर्याप्त्यनुयोगितावच्छेदकधर्मावच्छिन्नसंसर्गित्वस्य च सर्वव्रीहिव्यक्तिषु सत्त्वात्स्वसजातीयनिष्ठभेदप्रतियोगितावच्छेदकान्येव सर्वाण्येकत्वानि जातानीति तत्रैकवचनार्थैकत्वानुपपत्तिः । न च येन सम्बन्धेनैकत्वान्वयस्तत्सम्बन्धावच्छिन्नावच्छेदकताकप्रतियोगिताकभेदो विवक्षितः । तथा च प्रकृते स्वाश्रयव्रीहित्ववत्त्वसम्बन्धेनैकत्वस्य व्रीहावन्वयेन तत्र स्वाश्रयव्रीहित्ववत्त्वसम्बन्धेन स्ववृत्त्येकत्ववान्नेति भेदस्याभावेन न दोष इति वाच्यम् । 'सम्पन्नो व्रीहि'रित्यादौ स्वसजातीयनिष्ठस्वाश्रयव्रीहित्ववत्त्वसम्बन्धेन स्वनिष्ठैकत्ववान्नेतिभेदस्याप्रसिद्ध्या दोषतादवस्थ्यादिति चेन्न । स्वसजातीयनिष्ठभेदप्रतियोगितावच्छेदकताऽनवच्छेदकसंसर्गनिष्ठावच्छेदकतानिरूपकप्रकारताश्रयैकत्वमेकवचनार्थ इति वक्तव्यत्वात् । ननु व्रीहियवोभय-

उरण् । 'उः स्थाने' इति 'षष्ठीस्थाने' इतिपरिभाषया लब्धम्, 'उदात्तस्वरित-योर्यण' इतिवत् । 'स्थानेऽन्तरतम' इत्यतः—'स्थाने'ग्रहणमनुवर्त्तते, तस्य लक्षणया

❀ अभिनव-चन्द्रिका ❀

सम्पत्तिदशायां 'सम्पन्नो व्रीहि'रिति प्रयोगो दुर्वार एव, यवे प्रकृत्यर्थतावच्छेदकवत्त्वस्य अन्वयितावच्छेदकवत्त्वस्य वाऽभावेन तमादाय भेदप्रतियोगितावच्छेदकत्वस्य व्रीहिनिष्ठैकत्वे उपपादयितुमशक्यत्वादितिचेन्नस्वप्रकृत्यर्थतावच्छेदकवत्त्वञ्च—स्वप्रयोगप्रयोजकबुद्धिविषयतावच्छेद-कावच्छिन्नधर्मवत्त्वमिति विवक्षणेनादोषात् । 'स्वप्रयोजके'त्यस्यस्व वाचकविभक्तिप्रयोजकेत्यर्थः । तथाहि उप्तेषु धान्येषु किं किं सम्पन्नमिति प्रश्ने धान्यत्वव्याप्यजात्यच्छिन्नं बोधयानीति तात्पर्येण 'सम्पन्नो व्रीहि'रिति वाक्यप्रयोगात्स्ववाचकविभक्तिप्रयोगप्रयोजकबुद्धिविषयतावच्छेदकं यद् धान्य-त्वव्याप्यजातित्वं तद्वत्त्वस्य निरुक्तस्वसमभिव्याहृतपदार्थसंसर्गित्वस्य च व्रीहाविव यवेऽपि सत्त्वेन व्रीहित्वे व्रीहित्ववृत्त्येकत्ववान्नेतिभेदाभावेन न दोषः । अत एव यत्र व्रीहियवावुभौ सम्पन्नौ तत्र सम्पन्नो व्रीहिरिति न प्रयोगः । तन्निष्ठभेदप्रतियोगितावच्छेदकत्वस्यैव व्रीहिगैतकत्वेषु सत्त्वात् । निरुक्तैकत्वमेवैकपदप्रवृत्तिनिमित्तं बोध्यम् । एतच्छङ्कासमाधानादिकं प्रकृतेऽप्यतिदेष्टव्यमित्याहुः ।

स्वसमभिव्याहृतपदार्थसंसर्गित्वेनैव साजात्योक्तौ तु 'पशुना यजेत' इत्यादौ स्वसमभि-व्याहृतपदार्थयागसंसर्गित्वस्य पुरोडाशादावपि सत्त्वेन स्वसजातीयं यत् पुरोडाशादिकं तन्निष्ठभेद-प्रतियोगितावच्छेदकमेवैतत्पशुवृत्त्येकत्वं जातमित्येकपशुकरणकयागादप्यदृष्टसिद्धिर्न स्यात् । स्वप्र-कृत्यर्थतावच्छेदकवत्त्वमात्रोक्तौ तु—स्वप्रकृत्यर्थतावच्छेदकपशुत्वस्य सर्वपशुषु सत्त्वेन—यागीयपश्व-तिरिक्तसामान्यपशुनिष्ठभेदप्रतियोगितावच्छेदकमेव यागीयपशुगतमेकत्वं जातमिति एकपशुकरण-कयागादप्यदृष्टसिद्धिर्न स्यादिति दिक् ।

यण इतिवदिति । अनेन 'विधौ परिभाषोपतिष्ठिते नानुवादे' इति परिभाषाऽसङ्गतेति

❀ चिदस्थिमाला ❀

स्थानिवत्त्वं बोध्यम् । अन्यथा समाहारद्वन्द्वेनैव निर्दिशेत । अत एवैकादेशस्य ऋकारस्थानिकत्वेन रपरत्व-सिद्धिरित्यन्यत्र स्पष्टम् । यत्तु—अनुवादे परिभाषाणामनुपस्थितेः 'षष्ठी स्थाने' इत्यतः स्थानेग्रहणमनुवर्तत इति **रत्नाकरदण्डिप्रभृतयस्तन्न**, उक्तयुक्तेः तस्य, समस्तत्वाच्च, तदतद्धनयन्नाह—**षष्ठीति** । एतत्प्रकार-स्यावश्यकतयाह—**उदात्तेति** । यत्तु रत्नाकरः-'स्थानेऽन्तरे'त्यतोऽनुवृत्तं प्रथमान्तेन विपरिणम्यते, स च प्रसङ्गः, एवञ्च उः स्थाने प्रसज्यमानोऽण्रपरो भवतीति वाक्यार्थः । वस्तुतस्तु लाघवादेकवाक्यतायामुः-स्थानेऽण्रूपो रपरो भवतीति वाक्यार्थसम्भवादिदं व्यर्थं, ङमुडिति दद्रगिति वक्तव्ये परग्रहणसामर्थ्याच्च । एवञ्चारायादेशौ भवत इत्यर्थः । न च सर्वादेशतापत्तिः, वर्णद्वयान्यसमुदायरूपस्थानिनोऽभावात् ।

न चैवमपि 'ऋत इद्धातो'रित्यादौ ऋदन्तस्य धातोरित्यर्थलाभात्तत्सत्त्वमिति वाच्यम् , विशेषणविशेष्यभावे कामचारेणान्यथा व्याख्यानात् । न चैवमपि उपधायाश्चेति व्यर्थम् । अङ्गाक्षिप्तप्रत्ययेन ऋकारे विशेषिते तस्मिन्निति परिभाषया व्यवहिते सत्यप्राप्तौ तदारम्भादिति, तन्न, प्रसङ्गशब्दे भावघञः सिद्धन्तित्वेनो-क्तार्थासम्भवाद्विभक्तिविपरिणामे गौरवाच्च । किञ्चैकवाक्यता किम्पदैकवाक्यताऽभिमतोत वाक्यैक्यवा-क्यता ? नाद्यः, उद्देश्यविधेयभेदेन तदसम्भवात् । पदोपस्थितिपक्षाङ्गीकारेऽपि त्वदुक्तवाक्यार्थस्य दुर्वचत्वात् । 'ऋत इद्धातो'रित्यादौ साफल्ये सत्याद्गुण इत्यादौ दोषापत्तेश्च । नान्त्यः, उक्तवाक्यार्थासम्भवात्, परग्रहणस्य वक्ष्यमाणरीत्या साफल्यात । ऋत इद्धातोरित्यादौ तयोस्तथा विशेष्यविशेषणभावेऽपि अङ्गाधिकारस्थत्वेन तस्य च विशेषत्वस्यैव नियतत्वेन इदन्तस्याङ्गस्य धातुरूपस्येत्यर्थापत्तावुक्तदोषतादवस्थ्यात् । प्रत्ययस्याङ्गांशे उत्थिताकाङ्क्षत्वेन तथा विशेषणविशेष्यभावासम्भवेनोत्तरसूत्रवैयर्थ्यापत्तेश्च, तदतद्धनयन्नाह—**स्थानेऽन्तरेति** ।

❀ सदाशिवभट्टीयम् ❀

उरण् । **लक्षणयेति** । तस्य तत्र ताल्वादिस्थानबोधकत्वादिति भावः। वस्तुतस्तु आवश्यकस्वरितत्वप्रतिज्ञकस्य

प्रसङ्गावस्थायामित्यर्थस्तदाह—**रपरः सन्नेवेति**। 'रपर' इत्यवयववाचिना परशब्देन षष्ठ्यर्थे बहुव्रीहिस्तेनास्यावयवत्वात् 'यदागमा' इति न्यायेन विशिष्टस्य गुणवृद्धित्वेन 'ऋकारस्य गुणवृद्धी अरारावेवे'ति नियमोपपत्तिः। अत एव 'रदाभ्या'मिति सूत्रे 'थलि च सेटी'ति सूत्रे च भाष्ये—'गुणो भवति वृद्धिर्भवतीति—रेफशिरा गुणवृद्धिसञ्ज्ञकोऽभिनिर्वर्त्तते'—इत्युक्तम्। 'उः स्थानेऽण् प्रसज्यमान एव रपरो भवति, पूर्वभक्तश्च रेफ इत्यर्थ' इति कैयटः। अवयवत्वं वाचनिकमेव तत्साहश्यबोधनपर्यवसायि।

※ अभिनव-चन्द्रिका ※

ध्वनितम्। **अवयववाचिनेति**। अवयवत्वविशिष्टपरत्वावच्छिन्नवाचिनेत्यर्थः। **षष्ठ्यर्थे बहुव्रीहिरिति**। तथा च 'रपर' इत्यस्य–रेफनिष्ठावयवतानिरूपकः, रेफनिष्ठपरत्वावधितावांश्च प्रसङ्गावस्थायामण् भवतीति सूत्रार्थः। **नियमोपपत्तिरिति**। वस्तुतस्तु रेफविशिष्टे गुणत्वाद्यभावेऽपि न

※ चिदस्थिमाला ※

लाघवादाह—**तस्येति**। तदाह=फलितमाह। यत्तु अन्तपदस्य 'मिदचोऽन्त्या'दित्यत्रेवात्राप्यनुवृत्तिस्तेन गुणादिशब्दैर्योविहितस्तस्यान्तावयव इत्यर्थेन नियमोपपत्तिरिति, तन्न, गौरवात्, वाक्यभेदापत्तेश्च, क्लिष्टत्वाच्च, अन्यथोपपत्त्या फलाभावाच्च। तदेतद्ध्वनयन्नाह—**रपरइति**। इत्यत्रेत्यर्थः। अवयववाचित्वादेवाह—**षष्ठ्यर्थे इति**। अस्य=रेफस्य। प्रकृतोपयोगादाह—**विशिष्टस्येति**। यथा चैतत्तथा स्पष्टमन्यत्र। अन्यथा सर्वत्रान्तरतम्याभावस्य तुल्यत्वादनियमः स्यादिति भावः। उक्तार्थे संमतिमाह—**अत एवेति**। तदर्थाङ्गीकारादेवेत्यर्थः। तत्रत्यकैयटं फलितार्थकथनपरमाह—**उः स्थाने इति**। ऋत इद्धातोरित्यादौ तथार्थेऽपि 'अलोऽन्त्यस्य' 'निर्दिश्यमाने'ति परिभाषाभ्यामविरोधेन समाविशन्तीभ्यामिष्टसिद्धिः, एतेना'ने मुगि'ति मुग्विधिसामर्थ्याद्वर्णग्रहणे 'यदागमा'इत्यस्याऽप्रवृत्तिरित्यपास्तम्। उक्तभाष्यविरोधादिना ततस्तदनित्यत्वस्यैवाङ्गीकारात्। ननु शाखाया शाखान्तरावयवत्वव्यवहारादर्शनाद्वर्णस्य वर्णान्तरं कथमवयवोऽत आह—**अवयवेति**। न च सिद्धपदार्थस्य वचनसहस्रेणापि बोधनं दुर्वचमत आह—**तत्साहश्येति**।

※ सदाशिवभट्टीयम् ※

'षष्ठी स्थाने'इत्यत्रत्यस्थानपदस्यात्रानुवृत्तिः। एवञ्चाधिकं स्वरितत्वं लक्षणा च न, तथा भाष्यं त्वेकदेश्युक्तिरित्यत्रैवोद्योते स्पष्टम्। यद्यप्याररादिरूपेण विधानेऽभक्तत्वादिशङ्कैव नास्ति, तथाप्यणमनूद्य रपरत्वमिति पक्षमाश्रित्य भाष्ये पक्षत्रयं चिन्तितम्, अन्तग्रहणमनुवर्त्य पूर्वान्तत्वपक्षश्च स्थापित इति **कौस्तुभं** कटाक्षयन्नाह—**रपर इत्यवयवेति**। ननु 'रेफशिरे'त्यादिभाष्यम'नूद्य रपरत्व'मिति पक्षेणातद्गुणसंविज्ञानबहुव्रीहिणा वा सुयोज्यमिति चेन्न, प्रकरणविरोधादतस्तत्रत्यं कैयटमाह—**स्थान इति**। न केवलमाकरग्रन्थ-

※ विषमपदविवृतिः ※

भाक्त्वम्। यद्वा 'न पदान्ता हलोण' इत्यस्य 'दोषसम्पादका' इति शेषः। तेन हरयिह विष्णविहेत्यादौ पदान्तहल्रूपाणां सत्त्वेऽपि न क्षतिः। 'वृक्षव्करोती'त्यत्राशीत्यनुवृत्त्या न दोष इति स्पष्टमेव भाष्ये उक्तम्। 'वकारनिवृत्त्यैवात्र तद्वारणसम्भवा'दिति तु न युक्तम्। द्वन्द्वनिर्दिष्टयोरेकदेशानुवृत्त्यसम्भवात्। अत एव द्वन्द्वनिर्दिष्टैकारस्य निवृत्त्यर्थ'मदसो मा'दिति सूत्रे माद्ग्रहणं कृतम्। 'भोभगो' इति सूत्रस्थश्चिन्त्यमेतदिति कैयटग्रन्थस्तु–लण्सूत्रस्थस्वोक्तदिशोपपत्तिचिन्तनं कार्यमित्येवं

अन्यथा वर्णस्य वर्णान्तरावयवत्वं हलन्ताच्चेतिसूत्रभाष्योक्तरीत्याऽसङ्गतं स्यात् । पञ्चम्यर्थे बहुव्रीहिणाऽनवयवत्वे तु—गुणवृद्धिशब्देनाकारादेरेव रेफपरस्यैतदेकवाक्यतया विधानं स्यात् । गुणत्वादिकन्त्वकारादिनिष्ठमेव स्यादित्युक्तानियमानुपपत्तिः । अत एव वव्रे इत्यादौ हलादिःशेषसिद्धिः । अभ्यासावयवस्यैवानादेस्तेन निवृत्तेः ।

एतेनाणमनूद्य रपरत्वं विधीयते इति परास्तम् । उक्तनियमानुपपत्तेः । अत्र पक्षे क्व रपरत्वं ?

❁ अभिनव-चन्द्रिका ❁

क्षतिः, ऋकाराकारयोर्मूर्धन्यावयवकत्वस्य सत्त्वेन तेनैवाऽऽन्तर्येण ऋकारस्याऽरारावेवेति नियमोपपत्तेरित्यन्यत्र विस्तरः । **उक्तनियमानुपपत्तिरिति** । अत्रेदं तत्त्वम्—'उरण् रपर' इत्यत्र

❁ चिदस्थिमाला ❁

'अन्यत्रान्यशब्दः प्रयुज्यमानो विनापी'ति न्यायादिति भावः । अन्यथा=उक्तार्थानङ्गीकारे । अवयवत्वं=स्वारसिकम् । **भाष्योक्तेति** । तत्र हि–अन्तशब्दस्य समीपवाचित्वं नावयववाचित्वं तस्य तत्त्वस्याभावादित्युक्तम् ।

उक्तमेवार्थं व्यतिरेकमुखेन प्राचामसङ्गतिं ध्वनयन्द्रढयति—**पञ्चेति** । परशब्दः समीपदेशवाचीति व्यवस्थाविषय इति भावः । एवेन विशिष्टव्यवच्छेदः । उक्तहेतोरेवाह—**रेफेति** । तत्र हेतुमाह—**अत एवेति** । विशिष्टे तत्त्वाङ्गीकारादेवेत्यर्थः । तत्रादिशब्दस्यावयववाचित्वेन तस्य सत्त्वस्य सत्त्वेनेतरनिवृत्तौ तात्पर्येणादिमिन्नस्य तदवयवस्यैव तत्र ग्रहणमित्यन्यथानुपपत्तिः स्पष्टैव । तदाह—**अभ्यासेति** ।

स्वतन्त्रविधायकत्वं दूषयति–**एतेनेति** । तदर्थमाह–**उक्तेति** । स्वतन्त्रविधिपक्षे कैश्चिद्दत्तं दूषणं खण्डयति-**अत्र पक्षे इति** । स्वतन्त्रविधिपक्षे इत्यर्थः । यत्तु वृद्धिरारालैच्, अरलदेङ् गुणः, ऋत इर् , उरोष्ठ्येत्येव सिद्धे

❁ ज्योत्स्ना ❁

हलन्ताच्चेति सूत्रे भाष्येति । तत्र ह्येवमुक्तं—हलन्ताच्चेत्ययुक्तोऽयं निर्देशः । कथं हि नामैको हलन्त्यं स्यादन्यस्यान्य इति । व्याख्यातञ्च प्रदीपे–अन्यस्यान्य इत्यनेनात्यन्तभेदमनयोर्दर्शयतीति । **आदेशानेव रलपरानिति** । 'वृद्धिरारालादैच्' 'अरलदेङ्गुण' 'ऋतइर्' 'उरोष्ठ्ये'त्यादीति भावः । किन्त्वेवं सत्यनेकरेफलकारपरोच्चारणाद्यपेक्ष्य सूत्रकरणे किं **गौरवमिति चिन्त्यम्** ।

❁ सदाशिवभट्टीयम् ❁

विरोध एवापि तु लक्ष्यविरोधोपीत्याह—**अत एत वव्रे इति** । अभ्यासस्य नैरर्थक्यान्नात्रानुमानिकादेशस्य स्थानिवत्त्वेनाभ्यासत्वलाभोऽर्धविकाराच्च नैकदेशविकृतन्यायेनापीति भावः । यदि त्ववयवत्ववादिनाप्यत्र प्रक्रियाज्ञानवतामित्युक्तरीत्यैव पुनरभ्यासत्वं वाच्यमिति ममापि तद्रीत्या नोक्तदोष इत्युच्येत, तदा तु गीरित्यत्र रेफान्तधातोरभावाद्दीर्घो न स्यात् । आनुमानिकादेशावसरस्तु न प्राप्ताऽप्राप्तविवेकन्यायेनास्य रेफमात्रविधायकत्वेन तदननुमानादित्यत्रैवोद्योते स्पष्टम् । तथा माहिस्मते पिपरुरित्यादावभ्यस्तानामादिरिति स्वरोऽपि फलम्, अन्यथा रेण व्यवायान्न स्यादित्यादिभाष्योक्तमनुसन्धेयमिति दिक् । यद्यपि भाष्येऽन्तपदानुवृत्त्या पूर्वान्तत्वमुक्तं न परशब्दस्यावयववाचकत्वेन, तथापि अन्तपदस्य रेफेन्वयात्सौत्रसमासकल्पनामपेक्ष्येदं लघ्विति भावः । अत एव परादित्वपक्षो नाशङ्कितोऽत्र । **नियमानुपपेति** । आन्तर्यविशेषण त्रयाणामापत्तेरिति भावः । कौस्तुभं कटाक्षयति—**अत्र पक्षे इति । सम्भवादिति** । अयम्भावः—

❁ विषमपदविवृतिः ❁

पर इत्याहुः । **इतिवदिति** । अनूद्यमानविशेषणेऽपि सा परिभाषा प्रवर्तत इति भावः । **वव्रे इति** । स्थानिवत्सूत्रे आरेत्यादौ स्वोक्तदिशा द्विरुक्तपूर्वभागस्य पुनरभ्यासत्वेऽनादेस्तेन निवृत्तेश्चिन्त्यमेतदिति केचित् । **अत्र पक्षे इति** । अणमनूद्य रपरत्वं विधीयत इति पक्षे इत्यर्थः । **रलपरानिति** ।

क लपरत्वमिति व्यवस्थाऽनुपपत्तिस्तु न, रेफवत्स्थानिकस्य रेफपरत्वं, लकारवत्स्थानिकस्य लपरत्वमिति व्यवस्थासम्भवात् । **तत्रान्तरतम्यादिति** । स्थानत इति भावः । रेफादिद्वाराऽऽदेशस्यापि मूर्धादिस्थानत्वात् । 'तत्र–तत्राऽऽदेशानेव रलपरानुच्चार्येदं सूत्रं न कार्य'मिति तु न वाच्यम्, 'आप्ज्ञप्यृधामीत्' 'भृञामि'दित्यादौ दोषापत्तेः ।

❀ अभिनव-चन्द्रिका ❀

परशब्दः शुद्धपरत्वावच्छिन्नवाचक एव । रः परो यस्मादिति पञ्चम्यर्थे बहुव्रीहिः । नच 'ऋकारस्य गुणवृद्धी अरारावेवे'ति नियमानुपपत्तिरिति वाच्यम्, 'अनान्तर्यमेवैतयोरान्तर्य'मितिभाष्येण दत्तोत्तरत्वात् । न चैकारादावप्यनान्तर्यसत्त्वेन सोऽपि स्यादिति वाच्यम्, 'स्ववृत्तित्व'—'स्वेतरयावदादेशावृत्तित्व'—'स्वदलभिन्नदलीयवृत्तित्व'—एतत्त्रितयसम्बन्धेन स्वविशिष्टस्थानप्रयत्नजन्यत्वाद्यान्तर्यसत्त्वेनाऽनान्तर्यस्य एकारादावभावात् । नचैवमपि 'अचो ञ्णिती'त्यादावकारनिरूपिताऽऽन्तर्यस्याऽऽकारे सत्त्वेनानान्तर्याभावादकारस्याऽऽरित्वेवेति नियमो न स्यादिति वाच्यम्, 'अचो ञ्णिती'त्यत्र 'अत उपधाया' इति सूत्रादत इत्यनुकृष्य माठरपरिवेषणन्यायेनाच्पदार्थेऽकारातिरिक्तत्वेन सङ्कोचं कृत्वा वाक्यभेदेन वृद्धिविधानेनादोषात् । नचैवमपि 'गुणो भवति वृद्धिर्भवति, रेफशिरा गुणवृद्धिसञ्ज्ञकोऽभिनिर्वर्तते' इतिभाष्यविरोध इति वाच्यं, 'गुणवृद्धिसञ्ज्ञकः रेफशिरस्कः सन्नभिनिर्वर्तते' इत्यर्थकरणेनाविरोधात् । नचैवमपि 'वव्रे' इत्यादौ रेफस्याभ्यासानवयवत्वेन हलादिःशेषानापत्तिरिति वाच्यं, स्थानिवत्सूत्रस्थशेखरोक्तदिशा वरित्यस्य पुनरभ्याससञ्ज्ञायां हलादिःशेषस्य सुवचत्वादिति दिक् । **भृञामिदित्यादाविति** । 'भृञामिर्' इत्युच्यमानेऽपि हलादिःशेषेण रूपसिद्धौ चिन्त्योऽयं दोष इति केचित् ।

❀ चिदस्थिमाला ❀

उरण्रपर इति सूत्रं व्यर्थमिति तन्मते खण्डयति—**तत्र तत्रेति** । **आबिति** । अत्रापि तथा पाठे आबयोरपि तदापत्तिस्तदपाठे ऋधोपि तदभावापत्तिरुभयपाठे गौरवापत्तिरेवं 'भृञामि'दित्यत्रापि तथा

❀ ज्योत्स्ना ❀

आप्ज्ञप्यृधामीदिति । अत्रेदिति यथाश्रुते इत्सेतीति न सिद्ध्येत्, तदर्थमीरि रपरे क्रियमाणे

❀ सदाशिवभट्टीयम् ❀

अत्रापि पक्षे प्राप्तेति न्यायेन पूर्वान्तौ रलौ विधीयेते, तत्रान्तरतमपदानुवृत्त्यान्तरतमौ तौ भवतः । साधारणधर्मस्तु अवयवावयविभावतादात्म्यान्यतरसम्बन्धेन यो लकारवान्—प्रसज्यप्रसञ्जकभावतादात्म्यान्यतरसम्बन्धेन तत्सम्बन्धित्वम् । यद्वा ऋस्थानिकाणः स्थानेन्तरतमो रपर एव विधीयते, सादृश्यन्तु प्रसज्यप्रसञ्जकभावतादात्म्यान्यतरसम्बन्धेन लवत्सम्बन्धित्वमिति । प्रतिपत्तिगौरवात्तूक्तम्**—सम्भवेति** । मूर्धादीत्यादि न कार्यमिति । अयम्भावः—यथान्यासेऽष्टौ मात्रा, गुणादिसञ्ज्ञाविधौ रलपरोच्चारणेऽप्यष्टावेव वर्द्धन्त इति यद्यपि समम्, 'ऋत इ'दित्यादौ तकारेण रेफो निमेय इति सोऽपि सम एव । तथापि 'आनङृत' इत्यत्र नङयोः प्रयोजनाभावान्न वक्तव्याविति लाघवमेवं लपरश्चेति वाक्यं न वक्तव्यमिति च । तथा योगविभागाभाव-प्रतिपत्तिगौरवाभावौ च लाघवमिति । **भृञामिदित्यादाविति** । अयम्भावः—यथान्यासे-

❀ विषमपदविवृतिः ❀

'वृद्धिरादै''जदेङ्गुण'इति सूत्रयोरारालौ अरलौ च विशिष्य निर्देष्टव्यौ । 'ऋत इद्धातो'रित्यादौ तु रपरः पाठ्यः । **भृञामिति** । इदं न युक्तम् । अभ्यासे हलादिः शेषेणानादेर्हलो निवृत्तेर्विशेषाभावात् ।

❀ वरवर्णिनी ❀

आदेशानेवेति । **परे** तु तथोच्चारणे–'रै'शब्दादाचारक्विबन्ताद्क्विचि नपुंसकह्रस्वे–'रि'शब्दे इकारे

अत्राण् पूर्वेणैव, 'प्रशास्तृणा'मिति निर्देशात् । वस्तुतो रप्रत्याहाराभावेन 'रपर' इत्यस्य स्थाने 'लपर' इति पठनीयमिति—'लपरत्वं वक्ष्या'मीति तुल्यास्यसूत्रभाष्याल्लभ्यते ।

झरो झ । 'झयो हे'त्यतो 'वाऽवसाने' इत्यतो वा विकल्पोऽनुवर्त्तते । हयवरट्सूत्रशेषे भाष्ये स्पष्टमिदम् । **लोपे इति** । ऋधधातोर्झर इति भावः ।

❀ अभिनव-चन्द्रिका ❀

वाऽवसाने इत्यतो वेति । भाष्यसम्मताष्टाध्यायीपाठरीत्येदमुक्तम् । 'झर'इत्यनेन ऋधेर्धस्ये-त्युच्यमाने 'पूर्वत्रासिद्धीयमद्वित्व' इति शङ्कासमाधानादेर्नोपयोग इति सूचितम् ।

❀ चिदस्थिमाला ❀

पाठेऽन्त्ययोरपि तदापत्तिरन्यथाद्यस्यापि तदभावापत्तिरुभयपाठे गौरवापत्तिः । यद्यपि तत्र हलादिः शेषेण श्रवणान्न दोष उभयथापि, तथापि माङादौ हलादिरित्यस्य व्यापारकल्पने प्रक्रियादिगौरवापत्तिः, साधुत्व-बोधकप्रक्रियाभेदेन तदभावापत्तिश्चेति भावः । आदिना 'ऋत उ'दित्यादिपरिग्रहः । गमुलित्यादेः कपिलका-दित्वात्साधनन्तु पृषोदरादित्वेनैव सर्वसिद्धौ सम्पूर्णशास्त्रस्यैव प्रत्याख्यानापत्तिरिति भावः । एवं सति वृद्ध्यादिसूत्रेऽपि गौरवं बोध्यम् । रप्रत्याहारस्य खण्डितत्वात् सिद्धान्तमाह—**वस्तुत इति** । लभ्यत इत्यत्रान्वयः। कैयटादिमतेनाह—**झय इति** । सिद्धान्तमते नाह—**वावसेति** । उभयसङ्ग्रहायैवाह—**विकल्प इति** । प्राचामसङ्गतिं ध्वनयन्नाह- **हयेति** । प्रकृतत्वादाह—**ऋधधातोरिति** । ननु द्वित्वे लोपाभावेऽपि त्रिधत्वा-

❀ ज्योत्स्ना ❀

आप्ज्ञपोरीप्सति ज्ञीप्सतीति न सिद्ध्यत इति भावः । 'भृञामि'दित्यस्योपन्यासश्चिन्त्यः । इदिति यथा-श्रुतपाठे दोषाभावात् । रपरपाठेऽपि हलादिशेषो भविष्यति । रेफोच्चारणसामर्थ्यान्न भविष्यतीति चेत्तर्हि मापाठि रपरः, नह्यशुद्धं पठित्वा कुचोद्यं कर्तुमुचितम् । **भाष्याल्लभ्यत इति** । अत्र यद्वक्तव्यं तदुक्तं प्राक् ।

❀ सदाशिवभट्टीयम् ❀

'बिभर्त्ती'त्यस्य हलादिशेषस्मृतिपूर्वकप्रयोगेभ्युदयः । मिमिते जिहीत इत्यादेस्तु तदपूर्वके अत्र न्यासे तत्र रपरोच्चारणे सर्वत्रापि तत्पूर्वक एव तस्मिन् स स्यात् । अरपरे तु बिभर्त्तीत्यत्रापि तदपूर्वके सः स्यादिति । सनाथयिष्यते चेदं ग्रन्थकृत्सम्मतिदानेन । आदिना—ऋत उत्, सर्वत्रादृष्टव्यत्ययश्च संगृह्यत इति दिक् ।

वस्तुतस्तु शङ्कायां तत्रतत्रेति वीप्सासत्त्वात्तदनुरोधेन भृञामिदित्यत्र दोष उक्तस्स च सर्वादेशत्वापरि-लक्षणः, सूत्रारम्भे तु सन्निपातपरिभाषया न, मातुरित्यत्राप्ययं बोध्य इति । 'उरणोर'गिति तु न सूत्रितं, चाकर्तीत्यत्राभ्यासस्य कित्त्वेन 'दीर्घोऽकित' इति दीर्घानापत्तेः । 'तत्प्रकरणस्थकित एव वर्जन'मिति वक्ष्य-माणं माधवादिमतं तु न न्याय्यम्, मानाऽभावात् । नुक्-रीक्-रुक्-रिक्-एषां सर्वेषां वर्जनानापत्तेर्बाध्यसा-मान्यचिन्ताया आवश्यकत्वात् । सत्यभिधाने च्छायत इत्येव । वस्तुतस्तु अकिद्ग्रहणस्याऽभ्यासविकार इति परि-भाषाज्ञापकतापरभाष्यप्रामाण्येनाभ्यासनिमित्तककित एव ग्रहणमिति दीर्घोऽकित इत्यत्रोद्योते स्पष्टत्वादत्र न्यासे न दोष इति । तत्प्रामाण्यात्तु हाको हाङश्चानभिधानान्न यङ्लुकावित्यप्युद्योते तत्सूत्र उक्तन्तदा तु दोष इति । **झरो** । कैयटमतेनाह—**झयेति** । भाष्यसम्मतपाठ आह—**वावसेति** । उभयसङ्ग्रहायाह—

❀ वरवर्णिनी ❀

स्थानिवद्भावेन वृद्धित्वातिदेशे 'वृद्धाच्छ' इति छप्रत्ययापत्तिः, 'घटक'शब्दे च—'मितां ह्रस्व'इति ह्रस्वाकारस्य स्थानिवत्त्वेन वृद्धित्वातिदेशे च वृद्धकार्यापत्तिः । सम्प्रति आरादेरपि वृद्धितया वृद्धित्वस्यात्मात्र वृत्तिधर्मत्वाभावेनाऽनल्विधाविति निषेधासम्भवादित्याद्यपि दोष इत्याहुः ।

असतीति। 'द्वित्वाभाव' इत्यनुकृष्यते। **त्रिधमिति**। त्रिधकारत्वं–प्रक्रियाभिप्रायेण। न च 'द्वित्वभिन्ने पूर्वत्र कर्त्तव्ये परमसिद्ध'मित्यर्थकेन 'पूर्वत्रासिद्धीयमद्वित्वे' इत्यनेन धातुधकारस्य जश्त्वे दस्य द्वित्वमितीदमयुक्तमिति वाच्यं, फले विशेषाभावेन तदनादरणात्। न ह्यत्र जश्त्वात्पूर्वमनन्तरं वा द्वित्वे रूपे विशेषोऽस्ति, तदनन्तरजश्त्वप्रवृत्तेः। तस्य परिभाषात्वेन फलविशेषे एव प्रवृत्तेरित्यन्यत्र विस्तरः।

पञ्चमीति। विनिगमकाभावादिति भावः। अत एवास्य वैकल्पिकत्वम्।

❀ **अभिनव-चन्द्रिका** ❀

प्रक्रियाभिप्रायेणेति। परिनिष्ठिते 'झलां ज'शिति जश्त्वेन दस्यैव श्रवणादिति भावः। **तदनादरणादिति**। नच 'पूर्वत्रासिद्ध'मिति द्वित्वस्यासिद्धत्वाज्जश्त्वे दस्यैव द्वित्वमिति मूलासङ्गतिरिति वाच्यम्, तस्या अपि परिभाषात्वेन फलाभावादप्रवृत्तेः। नचैवमपि 'विप्रतिषेधे पर'मिति परत्वाज्जश्त्वे पुनरपि मूलासङ्गतिरिति वाच्यं, तस्या अपि परिभाषात्वेन फलाभावादप्रवृत्त्या प्रथमोपस्थितद्वित्वप्रवृत्तौ बाधकाभावादिति दिक्। **विनिगमकाभावादिति**। चिन्त्यमिदम्। विनिगमकाभावेन तात्पर्य-

❀ **चिदस्थिमाला** ❀

त्कथमिदमत आह—**द्वित्वाभावे इति**। तथा च द्वित्वलोपयोरभावे इत्यर्थः। यत्तु—"धातुधस्य परिभाषया जश्त्वे कृते द्वित्वमिति प्रक्रियायामपि तत्त्वाभावेन भूतपूर्वगत्या प्रयोगे तत्त्वं दुर्लभमिति–त्रिधमिति चिन्त्यम्"–इति **खण्डन**कृत्तत्खण्डयति–**न चेति**। यत्तु वर्णद्वित्वे नास्य प्रवृत्तिर्द्वित्वे परसवर्णत्वं सिद्धं वाच्यं संयन्तेत्यादौ त्रियकारार्थमिति वार्तिकोक्तेरत एव 'णत्वं द्वित्व'मिति कौमुदीसङ्गतिरिति तन्न, वाक्क् वागिति-भाष्योक्तलक्ष्यासिद्ध्यापत्तेः। यथा चैतत्तथा स्पष्टं भावप्रकाशे। **इत्यर्थकेनेति**। विध्यर्थतात्पर्यकेण। 'द्वित्वे पूर्वत्र परमसिद्धं ने'त्यर्थस्तु न, असमर्थसमासाद्यापत्तेः, निषेधविधौ गौरवाच्च। स्पष्टञ्चेदमन्यत्र। 'पूर्वत्रासिद्धीय'मिति गहादित्वाच्छः। तदधिकारभवशास्त्रत्वमस्याः लिङ्गम्। यत्र तत्त्वं तत्राद्वित्वे इत्युपतिष्ठते इत्यस्यार्थः। तत्र पूर्वत्रासिद्धमित्यधिकारप्राप्तं, 'सम्भवति सामानाधिकरण्ये' इति न्यायेनाद्वित्वे इति पूर्वत्रेत्यत्रान्वेति, तेन परस्य द्वित्वस्याप्यसिद्धत्वं भवतीति भावः। इत्यनेन=वार्तिकेन। **तदनन्तरमिति**। अत एव 'यणो मय' इति वचनान्तरेण पुनर्द्वित्वेन निष्पन्नस्य चतुर्धस्यानुक्तिः। ननु तस्य वार्तिकत्वेन फले विशेषनिरपेक्षत्वेन कथमिदमत अनादरे हेतुमाह—**तस्येति**। उक्तवचनस्येत्यर्थः। यद्यपि वार्तिककृदुक्तमिदं तथापि परिभाषावृत्तिकृद्भिरस्य तत्त्वमुक्तमिति तदुक्तं परिभाषेति–न दोषः। **परीत्यनेन** पर्जन्यवल्लक्षणप्रवृत्तिरित्यस्या सञ्चारः सूचितः। नियामकत्वमेव हि परिभाषात्वं, नियमश्च फलविशेषायैवेति यत्र फलाविशेषस्तत्राप्रवृत्तिः, अत एव 'व्रीहीनवहन्ती'त्यादौ दृष्टफले विशेषाभावान्नियमजन्यादृष्टं कल्पयन्ति वाक्यार्थविदः। कृष्णलेषु तु नावघातः, दृष्टफलाभावात्। दृष्टद्वारैव चादृष्टकल्पनेति बोध्यम्।

फलविशेषे एवेति। यत्र पूर्वत्रासिद्धप्रवृत्तौ तन्निषेधे वा फले विशेषस्तत्रैवेत्यर्थः। एतेन भाष्योक्तं खण्डनकारोक्तं रत्नाकरोक्तं मन्दोक्तं चापास्तमिति भावप्रकाशे स्पष्टं, तदाह—**इत्यन्यत्रेति**। शब्दरत्नादावित्यर्थः। **अत एवेति**। पक्षभेदादेवेत्यर्थः। एवेनानुवृत्त्यादिनिरासः, इदश्चानचीत्यत्र वेत्यस्या-

❀ **सदाशिवभट्टीयम्** ❀

विकल्प इति। **इत्यर्थकेनेति**। विध्यर्थतात्पर्यकेण, न तु द्वित्वे पूर्वत्रपरमसिद्धं नेत्यर्थकेन। असमर्थसमासापत्तेरिति भावः। पूर्वन्द्वित्वेऽसकृज्जश्त्वम्। अन्यथा सकृदेवेति प्रक्रियायां विशेषसत्त्वादाह–**रूप इति**।

प्रवृत्तेरिति। आष्टमिकवर्णद्वित्वस्य द्विःप्रयोगत्वे व्यक्तिभेदेन चासकृत्प्रवृत्तेरित्यर्थः। **परिभाषात्वेति**। वार्तिकत्वेपि परिभाषावृत्तिकृद्भिस्तत्त्वेनोक्तत्वादिति भावः। एवन्तु विप्रतिषेधसूत्रस्यापि परिभाषात्वस्योक्तत्वात् विप्रतिषेधपदं किमर्थमिति चेच्चिन्तायिष्यते। यणो मय इति द्वित्वे चतुर्धमपि बोध्यम्। **अत एवेति**। एवेनानुवृत्तिव्युदासः। इदश्चानचीत्यत्र वेत्यस्यासम्बन्धपक्षे,

❀ **विषमपदविवृतिः** ❀

अत एवास्येति। इदं चिन्त्यम्। विनिगमनाविरहेणार्थद्वयपरत्वेऽपि विकल्पालाभात्। अर्थद्वयपरत्वं

कृष्णैकेति । कृष्णेति सम्बुद्ध्यन्तं पृथक्पदमिति काश्चित् ।

एत्येध । ऊठत्राऽऽदेश एव, व्याख्यानात् । एचीति नोठो विशेषणमूठस्तत्त्वासम्भवात् । 'एत्येधत्यो'रिति योगं विभज्य तयोरेवैचीति विशेषणस्य भाष्ये कृतत्वाच्च,तदाह-**एजाद्योरिति**। एतिरत्र इणेव, प्रसिद्धत्वात् । उपैतीत्यादौ वृद्धिरेचीत्यनेन गतार्थत्वमाशङ्क्याह–**पररूप**-

ॐ अभिनव-चन्द्रिका ॐ

निर्णयाभावाच्छाब्दबोधस्यैवानापत्तेः । तस्माद्भाष्ये पक्षद्वयस्यापि स्थितत्वेनाऽऽवृत्त्या 'यणो मय' इति वार्तिकस्यार्थद्वयस्वीकारादिति बोध्यम् । **अत एवेति** । पक्षद्वयस्यापि भाष्ये स्थितत्वादेवेत्यर्थः ।

ननु 'कृष्णैकत्व'मित्यादौ 'पूरणगुणे'ति निषेधात्षष्ठीसमासो न स्यादित्याशङ्क्याऽऽह— **पृथक् पदमिति** । **कश्चिदिति** । अत्रारुचिबीजन्तु—अनित्योऽयं गुणेन निषेधः 'तदशिष्यं सञ्ज्ञाप्रमाणत्वा'दिति निर्देशादित्यस्य मूले एव स्फुटीकरणादिति बोध्यम् । **तत्त्वासम्भवादिति** ।

ॐ चिदस्थिमाला ॐ

ननुवृत्तिपक्षे बोध्यम् । तदनुवृत्तौ तु तत्रास्योपसङ्ख्यातत्वात्ततोऽपि तत्त्वं बोध्यम् ।

कश्चिदिति । क्रियाद्वयाध्याहारादिप्रयुक्तगौरवादिकमत्रारुचिबीजम् । एतेन तथा दण्डयुक्तमपास्तम् । तस्मात्–'सञ्ज्ञाप्रमाणत्वा'दित्यादिनिर्देशेन गुणेन निषेधानित्यस्यान्यार्थमावश्यकतया तेन षष्ठीतत्पुरुषः । एवमग्रेणीति तत्त्वम् । ननूठ उपघाते इत्यस्य भ्वादावेकीयमतेन पठ्यमानस्य दीर्घादेः कुतो न ग्रहणमत आह— **ऊठत्रेति** । अत्रानुकार्यानुकरणयोरभेदविवक्षया तत्प्रयुक्तकार्य्यं न, सूत्रे तु तद्भवत्येव । तथा सत्यल्पाच्तरत्वेन पूर्वनिपातौचित्यं, तदाह—**व्याख्येति** । **एचीतीति** । अनुवृत्तमित्यादिः । **तत्त्वेति** । एजादित्वेत्यर्थः । यत्तु रत्नाकरः—आ अवतीत्यवतेः क्विप्यूठि एजादित्वसम्भवादिदं चिन्त्यं, तस्मान्मिथः साहचर्यादेवैजाद्योर्ग्रहणं तयोर्न त्वचीत्यनुवृत्त्येति, न च तत्र वृद्धिरेचीति सिद्धिरोमाङोश्चेत्यनेन बाधात् । अनेन तु सामर्थ्याद्बाध्यते इति, तन्न । वृद्धिसूत्रस्थकैयटोक्तेस्तस्यानभिधानात् । किञ्च ओमाङोरित्येतद्बाधकल्पनापेक्षया सामर्थ्येन यद्येचोठ् विशेष्येत तदा येन नेतिन्यायेनात्रैवोमाङोरिति बाधित्वा स्यादिति–विश्वौह इत्यादि न स्यादिति । 'वाह ऊठ्'सूत्रभाष्यामिमतेष्ट निष्टलक्ष्यानुरोधेन चैचीत्यस्योडंशे सम्बन्धाकल्पनस्यौचित्यात् । अत एव वार्तिकादिसङ्गतिस्ताद्धनयन्सम्भवमभ्युपेत्याप्याह—**एत्येधत्योरिति** । एवेनोठो व्यवच्छेदः । ननु वी गतीत्यादौ प्रश्लिष्टस्यापि ग्रहणमत्र कुतो नात आह—**एतिरिति** । **प्रसिद्धेरिति** । अभिव्यक्तेति न्यायादिति भावः । एधतिसाहचर्येणाप्रश्लिष्टसानुबन्धकस्यैव ग्रहणाच्चेत्यपि बोध्यम् । आदिना–उपैधत इत्यस्यैव परिग्रहः । **आशङ्क्येति** । तदाशङ्कां हृदि निधायेत्यर्थः । नन्वेवं 'पररूपापवाद'

ॐ ज्योत्स्ना ॐ

फलविशेष एव प्रवृत्तेरिति । 'तदनन्तरं जश्त्वप्रवृत्ते'रित्यत्र हेतूपदर्शनमिदम् ।

कश्चिदिति । प्रक्रियाप्रकाशकृन्मतमिदम्, 'पूरणगुणे'तिनिषेधात्समासालाभादिति तदाशयः । 'सञ्ज्ञाप्रमाणत्वा'दित्यादिनिर्देशैस्तन्निषेधानित्यत्वज्ञापनाद्दोषाभाव इति ह्यत्रास्वरसः। **व्याख्यानादिति**। न तूठ उपघात इति भ्वादावेकीयमतेन पठित इति भावः । **प्रसिद्धत्वादिति** । तेन वी गतीत्यत्र-

ॐ सदाशिवभट्टीयम् ॐ

तत्सत्त्वेतु ततोपि तत्त्वं बोध्यम् । **कश्चिदिति** । 'पूरणगुणे'ति सूत्रे सिद्धान्तयिष्यमाणरीत्येदमेव युक्तं, न त्वत्रास्वरसोद्भावनम् । जनौरित्यत्र सम्भवादाह—**एत्येधत्योरिति** । **इणेवेति** । 'इणीकारादौ प्रतिषेध' इति वार्तिकारम्भात्सानुबन्धकत्वेऽप्यस्य ग्रहणमिति भावः । ननूभयोरास्त्विति चेन्न, आरम्भप्रत्याख्यानयोः फलभेदापत्तेरित्याहुः । **तीत्यादाविति** । आदिनोपैधत इत्येव । आशङ्क्य=तदाशङ्कां

ॐ विषमपदविवृतिः ॐ

तु तत्रावृत्त्यादिना बोध्यम् । **पृथक् पदमिति** । 'पूरणगुणे'ति षष्ठीसमासनिषधादिति भावः । **इणेवेति** । न तु वीगतीत्यत्र प्रश्लिष्ट इत्यर्थः ।

गुणेति । एत्येधत्योरेङि पररूपस्योठि चाऽऽद्गुणस्येति विवेकः । **उपैधते इति** । अत्र न सर्वादेशः । 'एत्येधत्याद्यवयवेऽची'त्येवं क्रमेण सूत्राणामर्थात् । अयमेवार्थ इति प्रत्ययलक्षणसूत्रस्थभाष्यस्वरसः । 'वृक्षे शाखे'तिवदेत्येधत्यूठ्स्विति सप्तमी बोध्या ।

प्रष्ठौह इति । प्रष्ठं वहतीत्यर्थे वहेण्वौ ततः शस्यूठि सम्प्रसारणे पूर्वरूपेऽनेन वृद्धिः ।

❀ अभिनव-चन्द्रिका ❀

नचावयतेः क्विपि औरित्यादावेजादिरूठ् सम्भवतीति वाच्यम्, 'एत्येधत्यो'रिति योगं विभज्य एचीत्यस्य तत्रैव विशेषणपरभाष्यप्रामाण्येनैतस्यानभिधानात् । 'विश्वौह' इत्यादौ वृद्ध्यर्थं भगवता एचीत्येत्येधत्योरेव विशेषणमित्युक्ततया चैतस्यानभिधाने न मानमिति परे । **सूत्राणामर्थादिति** । केचित्तु एजाद्येत्येधत्योरित्येव सूत्रार्थः । न च सर्वादेशत्वापत्तिरिति वाच्यम्, 'अलोऽन्त्यस्य' 'आदेः परस्य' इत्येताभ्यां सर्वादेशत्ववारणात्सम्भवति सामानाधिकरण्ये वैयधिकरण्यस्यान्याय्यत्वाच्च

❀ चिदस्थिमाला ❀

इत्येवोचितं, तत्र तस्यैव गुणबाधकवृद्धिं बाधित्वा प्रसक्तेरिति चेन्न । प्रसङ्गादूडंशेऽपि फलोक्तेः, अत एव तेनैव गतार्थत्वाद्व्यर्थोयं योग इति **रत्नाकरोक्त**मपास्तम् । तदेतद्ध्वनयन्नाह—**एत्येधत्योरिति** । चो व्युत्क्रमे, अत एव गुणस्य परनिपातः, सूत्रे क्रमबोधने शङ्काप्रसङ्गक्रमबोधने च तात्पर्यात् । अन्यत्रादोषादाह—**अत्रेति** । ऐकरूप्यायाह—**एत्येधेति** । 'एजादी'त्यादिः । अचीत्यप्यनुवर्तते इति भावः । सूत्रेत्युपलक्षणं वार्तिकानामपि । **अर्थादिति** । तात्पर्यार्थादित्यर्थः । सप्तमीस्वरसादिति भावः । एतेनादेः परस्येत्येत्येव सिद्धिरिति नैवं वर्णनमुचितमित्यपास्तम् । परस्यैव विधाने तत्प्रवृत्तेः । मूलादिसकलग्रन्थासङ्गतिं ध्वनयन्नाह—**अयमेवेति** । शाब्द इत्यर्थः । **प्रत्ययेति** । अनुस्वारं विहाय प्राग्भागानुकरणं, तत्र हि सूत्रप्रयोजनकथनावसरे वार्तिकोक्तविध्यर्थत्वफलखण्डनावसरे प्रत्याख्यानवाद्युक्तदोषाणां परिहारावसरे गव्यतीत्यत्र नात्वमतो नैवं विज्ञायतेऽम्यचीति, कथं तर्हि ? अच्यमीतीत्युक्तं भाष्ये । अच्प्रधानं, तद्विशेषणमम्, अमोऽवयवेऽचीत्यर्थ इति तदादिविध्यभावः । तत्र वर्णनिमित्तमात्वे न प्रत्ययनिमित्त मिति दोषाभाव इति **कैयटः** । नन्वेवं षष्ठ्युचिताऽत आह—**वृक्षे इति** । अवयविनोऽधिकरणत्वविवक्षयेति भावः । एवं सर्वत्र बोध्यम् । **ण्वाविति** । 'वहश्चे'त्यनेनेति भावः । सम्प्रसारणपूर्वरूपे=तत्प्रयुक्तपूर्वरूपे इत्यर्थः ।

❀ ज्योत्स्ना ❀

प्रश्लिष्टस्य न । **भाष्यस्वरस इति** । तत्र 'द्यौतोम्शसो'रित्यत्राचीत्यमीति चानुवर्तते, अमीत्येतदचीत्येतस्य विशेषणमतस्तदादिविध्यप्रवृत्तेरेकादेशो वर्णाश्रय इत्युक्तम् । एजादावित्यर्थेऽपि-

❀ सदाशिवभट्टीयम् ❀

हृदि निधायेत्यर्थः । **विवेक इति** । अत एव मूले गुणस्य परानिपातः । इणि निर्दिश्यमानपरिभाषया इष्टसिद्धेराह—**अत्रेति** । ऐक्यरूप्यादाह—**एत्येधत्योरिति** । 'सूत्रे'त्युपलक्षणं, वार्त्तिकस्यापि । आदेः परस्येति कुतो न समाहितमत आह—**अयमेवेति** । परस्यैव विधाने तत्प्रवृत्तेरित्यन्ये । तत्र मानफले मृग्ये । **लक्षणसूत्रेति** । मकाररहितानुकृतिरेषा । **ऊठि सम्प्रसारणे इति** । तत्सञ्ज्ञके ऊठीत्यर्थः ।

❀ विषमपदविवृतिः ❀

'वृक्षे शाखे'ति । न्यायनयेऽवयवस्यावयविन्याधारत्वप्रसिद्धावपि लोकेऽवयविनोप्यवयवाधारत्वं प्रसिद्धमिति भावः ।

प्रेदिधदिति । परे तु—'इणीकारादौ प्रतिषेध' इति वार्त्तिके एधत्यनुपादानात् 'न त्वेधतेरव्यभिचारा'दितिवृत्तेश्चास्यानभिधानमेव । 'एत्येधत्योरेचीति विशेषण'-मिति भाष्यस्यैधत्यंशे सम्भवमात्रेणोपरञ्जकतया विशेषणमित्याशय इत्याहुः । 'उपैधयते' इत्यादावपि वृद्धिर्भवत्येव, प्रकृतिभागस्यैधरूपत्वात् । किञ्च—एत्येधत्यवयवेऽचीत्यर्थः प्रत्ययलक्षणसूत्रभाष्यसम्मत इति—अत्र न दोषः। **पुरस्तादिति** । 'पुरस्तादपवादा

❀ अभिनव-चन्द्रिका ❀

मूलोक्तमेव युक्तमिति प्राहुः । **इत्याहुरिति** । परे तु 'यथोत्तरं मुनीनां प्रामाण्य'मिति परिभाषया 'इणीकारादा'विति वार्त्तिके इणत्येधतेरप्युपलक्षणम् । मूलोक्तं तु न युक्तम्, वार्तिकानुसारेणै-धत्यंशे एचीत्युपरञ्जकमितिकल्पनापेक्षया भाष्यानुसारेण वार्त्तिके उपलक्षणतया व्याख्यानस्यैव

❀ चिदस्थिमाला ❀

सप्तम्यन्तपाठे ऊठ्विशेषणम् । मूलादिग्रन्थान् खण्डयति—**परे त्विति** । नन्वेवं योगविभागेन वार्तिकप्रत्या-ख्यानपरभाष्यविरोधोऽत आह—**एत्येधत्योरिति** । ननु प्रत्याख्यानपरभाष्याप्रामाण्याद्वार्तिके इण्-ग्रहणमु लक्षणमित्येव कुतो नेति चेन्न । तथा सत्यन्यत्र तस्यार्थस्यानुक्तत्वेनात्रैव वक्तव्यत्वेन तदनुक्त्या भगवता वार्तिककृदुपहासस्यान्यत्रेवात्राकरणेन चोपक्रमस्यैव प्राबल्येनात्र तथा दुर्वचत्वादिति बोध्यम् ।

ण्यन्तस्य शब्दान्तरत्वेनैधरूपत्वाभावान्नातिप्रसङ्गस्तत्रेति तदंशे तद्व्यर्थमेवेति वृत्त्यादिग्रन्थासङ्गतिं ध्व-नयन्नाह—**उपैधयत इति** । आदिना प्रैदिधिषते इत्यादिपरिग्रहः । अपिना मूलोक्तशुद्धधातुरूपपरिग्रहः । तत्र दीक्षितमतेनाह—**प्रकृतीति** । सिद्धान्तमतेनाह—**किञ्चेति** । 'यत' इति शेषः । एवं चावश्य-कत्वादचीत्यस्याप्यनुवृत्तिस्तत्राह—**एत्येधेति** । एवञ्च तदीयस्यैचो निमित्तत्वेऽपि तस्यानिमित्तत्वमेवेति भावः । एतेन—वृत्तिमाधवग्रन्थखण्डकैरुपैधयते इत्यादौ दोषो नोद्भावितोऽस्फूर्तिवशादिति **जगन्नाथोक्तं**, प्रकृतिभागस्यैधरूपत्वेऽप्यनर्थकत्वेनानतिप्रसङ्गान्मनोरमादि चिन्त्यं, भाष्याद्याशयस्तु 'तन्मध्यपतित' न्यायेन एतावधिकस्यार्थवत्तया एधतिग्रहणेन ग्रहणादतिप्रसङ्ग इतीति **रत्नाकरोक्तं**चापास्तम्, उक्तयुक्तेः, तस्या अनित्यत्वात्, एत्यादीनामुपलक्षणत्वाद्विशेषणतयाऽग्रहणात । भाष्यादियोजकत्वद्रीत्यापि मनोरमायाः सुयोजत्वात्, वर्णविशेष्यत्वेन ग्रहणे तदप्रवृत्तेश्चेति दिक् । न्यायस्वरूपमाह—**पुरस्तादिति** । अस्य

❀ ज्योत्स्ना ❀

निर्दिश्यमानपरिभाषया दोषाभाव इति परिभाषाप्रदीपार्चिषि विस्तरः । **वृद्धिर्भवत्येवेति** । **शेषनरहरिस्त्वे**त्येधूठ्स्वित्येव सिद्धे श्तिप्श्पोर्निर्देश आर्धधातुकाविषयैधतेर्वृद्धिनिमित्ततायोतनार्थः । अत उपैधयत इत्यादौ न वृद्धिरिदमेवाभिप्रेत्य ण्यन्तस्य शब्दान्तरत्वमिह पुरस्कृतं माधवाचार्यै-रिति **बुधमनोहरायां** व्याचष्टे । एवं त्विणेधत्यूठ्स्वित्येव वक्तव्ये एतीति निर्देशो व्यर्थ इति चेत्, वीगंतीत्यत्र प्रश्लिष्टस्य ग्रहणार्थः स्यादिति । 'प्रसिद्धत्वादेतिरत्रेणेव गृह्यत' इति व्याख्यानं चिन्त्यम् ।

❀ सदाशिवभट्टीयम् ❀

'सम्प्रसारणपूर्वे'ति पाठे—तत्प्रयुक्तपूर्वेत्यर्थः । **अनभिधानेति** । ननु प्रत्याख्यानभाष्याद्वार्त्तिके इणपदमुप-लक्षणमित्येव कुतो नेति चेन्न, एवं सति अन्यत्रास्यार्थस्यानुक्तत्वेनात्रैव वक्तव्यत्वेन तदनुक्त्या भगवता-

❀ विषमपदविवृतिः ❀

ण्यन्तस्य शब्दान्तरत्वमभ्युपेत्य 'तुष्यतु दुर्जन' इति न्यायेनाह—**किं चेति** । **एधत्यवयवत्वे इति** । तत्त्वेन दृष्टे इत्यर्थः ।

अनन्तरान्विधीन्बाधन्ते नोत्तरा'निति न्यायः। अवश्यं स्वपरस्मिन्बाधनीये भेदेनापेक्षायां प्रथमोपस्थितबाधेनाकाङ्क्षानिवृत्तिर्हि तद्बीजम्। **असाधुरेवेति**। आङिणोरेकादेशस्य पूर्वान्ततयाऽऽङि पररूपेण बाधादिति भावः। **अर्थवद्ग्रहणे इति**। अस्या बीजं-'स्वं रूप'मिति सूत्रे उक्तम्। **पररूपे प्राप्ते इति**। 'पूर्वन्धातुः साधनेन युज्यत'इति सिद्धान्तादिति भावः।

❀ अभिनव-चन्द्रिका ❀

ज्यायस्त्वात्। तथा च 'इदिध' दित्यस्यानभिधाने न मानमित्याहुः। **भेदेनेति**। विशेषेणेत्यर्थः। **आकाङ्क्षानिवृत्तिरिति**। 'विप्रती' तिसूत्रबाधे मानाभाव इत्यपि बोध्यम्।

❀ चिदस्थिमाला ❀

युक्तिसिद्धत्वमाह—**अवश्यमिति**। अपवादभिन्नेऽपवादेन तत्त्वादेव बाधनीये इत्यर्थः। **भेदेनेति**। 'येन ने'त्यत्र यदा येनेत्यस्य स्वेतरेणेत्यर्थः। अपवादेतरत्वावच्छिन्नेनेति यावत्। स्वमपवादः,-तदा स्वविषये स्वेतरद्यद्यत्प्राप्नोति तत्सर्वं बाध्यं तदव्याप्तलक्ष्याभावादितीयं-'बाध्यसामान्यचिन्ते'त्युच्यते। यदा तु येनेत्यस्य तल्लक्षणेनेत्यर्थः। शास्त्रविशेषेणेति यावत्। प्राधान्यात्कार्येणेत्यर्थतो वा,-तदा बाध्यविशेषचिन्ता। तत्र द्वितीयपक्षे कार्येणेत्यस्य कार्यविशेषेणेत्यर्थेऽपि कार्यतावच्छेदको यो विशेषधर्मस्तदवच्छिन्नसर्वकार्यग्रहण-सम्भवात्पररूपत्वावच्छिन्ने कार्ये प्राप्ते आरभ्यमाणाया अस्या वृद्धेः पररूपबाधकत्वे पूर्वयुक्त्या तेन न्यायेन निर्णीते किंशास्त्रविहितस्येत्येवमवान्तरकार्यविशेषचिन्तायामित्यर्थः। **बाधेनेति**। चारितार्थ्ये पश्चादुप-स्थितबाधे इति शेषः। **निवृत्तिरिति**। विप्रतिषेधशास्त्रबाधे मानाभावश्चेत्यपि बोध्यम्। मूले—**अवेहीति इति**। 'अवेहि मां किङ्कर'मिति रघुकाव्ये इत्यर्थः। पूर्वान्तवत्त्वयेति पाठः। आङ्त्वे हेतुरयं।

सीरदेवाद्युक्तेरसाङ्गत्यं ध्वनयन्नाह—**अस्या इति**। तत्प्रत्याख्यानपक्षे उपस्थितस्यार्थस्य शब्दं प्रति विशे-षणत्वसम्भवे त्यागायोग इत्यर्थः। ननु पूर्वं धातुरुपसर्गेणेति पक्षे न पररूपप्राप्तिः, किन्तु गुणस्येति मूलम-युक्तमत आह—**पूर्वमिति**। तस्यैतदेकवाक्यत्वार्थमन्यार्थकत्वेन सिद्धान्तत्वेऽपि यथाश्रुतस्य सकलसम्मत स्यासिद्धान्तत्वमिति ध्वनयन्नाह—**सिद्धान्तादिति**। अत एव प्रत्ययान्तरूपैकदेशस्य निमित्तता वार्त्ति-कोक्ता सङ्गच्छते, अन्यथा तदसङ्गतिः स्पष्टैव। तपरकरणं नेहार्थं, दीर्घऋकारादेर्धातोरसम्भवात्। नचोप-कारतीत्यत्र वृद्धिवारकतया साफल्यं, धातुपाठपठितधातोरेवेह ग्रहणात्, प्रसिद्धत्वात्, उत्तरसूत्रस्यपि वक्ष्य-माणरीत्याऽप्रवृत्तिः। अत एव वृत्तिकृतोत्तरसूत्रे एव फलमुक्तम्। एतेन तथा रत्नाकरोक्तमपास्तम्।

❀ ज्योत्स्ना ❀

अस्यां बीजमिति। सीरदेवोक्तं राजेः पृथग्भ्राजिग्रहणं ज्ञापकं तु मनोरमायामुपपादितं—शब्द-रत्नोक्तदूषणनिराकरणेन परिभाषाप्रदीपार्चिषि व्यवस्थापितं तत एव बोद्धव्यम्।

❀ सदाशिवभट्टीयम् ❀

वार्त्तिककृदुपहासस्यान्यत्रैवात्राकरणेन चोपक्रमस्य प्राबल्येनात्र तथा दुर्वचत्वात्। **निवृत्तिरिति**। तथा सावकाशत्वे विप्रतिषेधशास्त्रबाधे मानाभावश्चेत्यपि बोध्यम्। **पूर्वान्तवत्त्वयेति** पाठ इत्याहुः। ननु 'पूर्वं धातुःसाधनेने'ति नयेऽस्य सार्थक्येन नयान्तरेऽन्तरङ्गत्वात् रूपान्तरं स्यादत आह—**पूर्वं धातुरिति**। पररूपोद्देश्यतावच्छेदकाक्रान्त एव वृद्धिप्राप्त्या न मूलासङ्गत्यावतरणं युक्तं, यथाश्रुतस्य तु लक्ष्याऽसिद्ध्या

❀ विषमपदविवृतिः ❀

भेदेनापेक्षायामिति। इदं बाध्यमित्यपेक्षायामित्यर्थः। सर्वं बाध्यमिति विवक्षायां तु नाय न्यायः। यथाचि रादेशे। **पूर्वं धातुरिति**। अत्र चेदमपि लिङ्गमिति भावः।

उपसर्गादृति । तपरकरणादुपऋकारीयतीत्यादौ 'वा सुपी'ति न वृद्धिः । सौत्र-ऋतिरस्तु न गृह्यते, व्याख्यानात् । आदित्यनुवृत्तेन तदन्तविधिरित्याह-**अवर्णान्तादिति** । 'यस्मिन्विधि'रिति परिभाषयाह—**ऋकारादाविति** । पूर्वपरयोस्तयोः समुदाययोरन्त्याद्योर्वर्णयोरेकादेश इत्यर्थः । 'उपसर्गावयवाकाराद्धात्ववयवे ऋकारे तयोः पूर्वपरयोर्वृद्धिरित्युचितम् । 'गते'रिति तु नोक्तम् । 'अच्छर्छती'त्यादौ दोषात् ।

अन्ता । इह 'पूर्वपरयो'रिति वर्तते, यथासङ्ख्यञ्च, अन्तादिशब्दावुपस्थितैतकादेश-

❀ अभिनव-चन्द्रिका ❀

उपऋकारीयतीत्यादाविति । उपऋकारयति उपऋकारति—इत्यस्याप्युपलक्षणम् । **उचितमिति** । वस्तुतस्तु अवर्णान्तादुपसर्गादृकारादौ धाताविवत्यर्थेऽपि 'अलोऽन्त्यस्य' 'आदेः परस्ये' त्येताभ्यां सर्वादेशतावारणान्मूलोक्तमेव युक्तमिति बोध्यम् ।

अच्छर्च्छतीति । 'अच्छ गत्यर्थे'ति गतित्वम् । **अन्तादिवच्च** । इह 'एकः पूर्वपरयो'रिति वर्तते,

❀ चिदस्थिमाला ❀

तदेतद्ध्वनयन्नाह—**तपरेति** । आदिनैतत्सजातीयपरिग्रहः । **वा सुपीति** । पदच्छेदाभिप्रायमनुकरणम् । ननु 'ऋतेरीय'ङितिसूत्रपठितस्यैव ग्रहणं कुतो नात आह—**सौत्रेति** । **व्याख्येति** । आदचीतिवर्णप्रकरणमूलादित्यर्थः । **वृत्तेनेति** । विशेषणेन 'येन विधि'रिति शेषः । अल्ग्रहणे इत्यस्याल्बोधक इत्यर्थो न तु स्वरूपेणाल्मात्रोच्चारणे इत्यर्थः । एवञ्च तद्बोधकोत्तरसप्तमी तन्निमित्तं, न तु वर्णमात्रात्परैव, सा च प्रागुक्तरीत्याऽस्ति, तदेतद्ध्वनयन्नाह—**यस्मिन्निति** । **परिभाषयेति** । लब्धमिति शेषः । समुदायादेशापत्त्या यथाश्रुतासङ्गतेराह—**पूर्वेति** । **तयोरिति** । अवर्णान्तोपसर्गऋकारादिधात्वोरित्यर्थः । सिद्धान्तमतेनाह—**उपेति** । अवयविनोऽपादानत्वविवक्षया वर्णनिष्ठपरशब्दयोगस्य तत्र विवक्षया वा पञ्चमी । सप्तमी तु प्राग्वदिति भावः । मात्रपदलाघवादाह—**गतेरितीति** ।

इहैकः पूर्वेति पाठः । तत्रैक इत्युद्देश्यकोट्यन्तर्गतं, पूर्वपरयोरिति विधेयकोट्यन्तर्गतम् । यद्वा 'इह पूर्वे' त्येव पाठः । तस्य प्रत्याख्यानात् । प्रत्यासत्त्योद्देश्यलाभः । तत्राह—**यथेति** । **अन्तादीति** । अवयवत्वेन

❀ सदाशिवभट्टीयम् ❀

असिद्धान्तत्वं ध्वनयन्नाह-**सिद्धान्तेति** । **तपरकरणेति** । यद्यप्युपऋकारयतीत्यत्र प्रकृतसूत्रे एव फलं देयम्, तथापि परत्रैव फलप्रदर्शनपरवृत्तिप्रामाण्येनैधत्यादिसाहचर्याच्च गणपठितस्यैव धातोरत्र ग्रहणमिति भावः । भाष्यानुग्रहस्त्वत्र मृग्यः । **वा सुपीति** । पदच्छेदाऽभिप्रायेणानुकरणमिदम् । **व्याख्यानादिति** । धातुग्रहणाभावे 'प्रर्षभवन'मित्यत्रातिव्याप्तिदानपरप्रकृतसूत्रस्थभाष्यरूपादित्यर्थः । **परिषयेति** । लब्धमिति शेषः ।

समुदायादेशापत्त्या यथाश्रुतासङ्गतेराह—**पूर्वेति** । **अन्त्याद्ययोरिति** । अलोन्त्यस्यादेः परस्येति परिभाषाभ्यां लब्धमिदम् । सिद्धान्तमतेनाह—**उपसर्गेति** । तात्स्थ्यात्ताच्छब्द्यमिति भावः । निर्दिश्यमानपरिभाषाप्रापकत्वेन यथाश्रुते मूलं सङ्गच्छेत, लक्ष्ये च निर्बाधे कथं लक्षणावैयधिकरण्यगर्भितस्यास्यौचित्यमिति चिन्त्यमेतत् । **अन्तादिव** । एकग्रहणप्रत्याख्यानादाह—**इह पूर्वेति** । क्वचित्तु इहैकः पूर्वेतिपाठः ।

❀ विषमपदविवृतिः ❀

अन्तादिवच्च । **पूर्वपरशब्दौ चेति** । तथा च पूर्वपरयोरित्यन्तायोर्विशेषणम् । यद्वा पूर्वपरयोरित्यध्याहृतव्यवहारान्वयी, तथा चान्तादिवर्णवत्स्वघटितसमुदाये प्रातिपदिकत्वादिव्यवहारानादेशः सम्पादयति । 'समुदायस्यान्तादिभ्या'मित्यग्रिमशेखरस्वारस्येन तु—पूर्वपरयोरस्यान्तादिपदार्थेऽन्वय इति लभ्यते । अन्त्यपक्षे तु समुदायेत्यस्य ये व्यवहारा इत्यनेनान्वयः । षष्ठ्यर्थो निष्ठत्वम् । अत्र च वति'स्तेन तुल्य'मित्यनेन ।

स्थानिपरौ । पूर्वपरशब्दौ च तद्घटितसमुदायपरौ । एवञ्च—'पूर्वस्य परस्य समुदायस्यान्तादिभ्यां वर्णाभ्यां पृथगवस्थिताभ्यां ये व्यवहाराः—प्रातिपदिकत्व-सुबन्तत्व-प्रत्ययत्वादयस्ते कृतैकादेशस्य भवन्ति, न तु तद्वर्णमात्रवृत्तयोऽत्व—ह्रस्वत्वादय' इत्यर्थस्तत्फलित-

❀ अभिनव-चन्द्रिका ❀

यथासङ्ख्यञ्च सम्बन्धः । पूर्वपदमेकादेशपूर्वस्थानिचरमावयवके लाक्षणिकमेवं परपदमेकादेशपरस्थान्याद्यवयवके लाक्षणिकम् , तथा चैकादेशः—एकादेशपूर्वस्थानिचरमावयवकसमुदायस्यान्तवत्स्यात् , एवमेकादेशः—एकादेशपरस्थान्याद्यवयवकसमुदायस्यादिवत्स्यादिति सूत्रार्थः । एकादेशनिष्ठचरमावयवतानिरूपकसमुदाये एकादेशपूर्वस्थानिनिष्ठचरमावयवतानिरूपकसमुदायवृत्त्यर्थवत्पर्याप्तधर्मा अतिदेष्टव्याः, एवमेकादेशनिष्ठाद्यवयवतानिरूपकसमुदाये एकादेशपरस्थानिनिष्ठाद्यवयवतानिरूपकसमुदायवृत्त्यर्थवत्पर्याप्तधर्मा अतिदेष्टव्या इति यावत् । 'तद्वच्चे'त्येव सिद्धे 'अन्तादिवच्चे'तिसूत्रकरणादर्थवत्पर्याप्तेत्येतल्लाभः । 'तद्वच्चे'त्युच्यमाने—एकादेशस्थानिपर्याप्तधर्मस्यातिदेशः स्यात् । तथा च खट्वाभिर्मालाभिरित्यादौ भिस ऐसाद्यापत्तिश्च स्यात् । एतन्मूलकमेवोच्यते—'न वा अताद्रूप्यातिदेशा'दिति । अन्यथा वचनेन वचनान्तरप्रत्याख्यानस्यायुक्तत्वाद्वर्णाश्रयेऽन्तादिवत्त्वप्रतिषेधो वक्तव्यो, वक्तव्यः, न वा अताद्रूप्यातिदेशादिति प्रत्याख्यानमसङ्गतं स्यात् । एतत्सर्वम्मनसि निधाय वक्ष्यति—**प्रातिपदिकत्वेत्यादि** । **एकादेशस्थानिपराविति** । एकादेशपूर्वस्थानिचरमावयवकैकादेशपरस्थान्याद्यवयवकपरावित्यर्थः । **तद्घटितसमुदायपराविति** । एकादेशचरमावयवकाएकादेशपराद्यवयवकसमुदायपरावित्यर्थः । यथाश्रुतन्तु न युक्तम्, एकादेशघटितस्वाश्वशब्दे पूर्वान्तवद्भावेन एकादेशपूर्वस्थानिचरमावयवकसमुदायवृत्तिस्वशब्दत्वस्यातिदेशे तस्मादीरिन्शब्दे परे'स्वादीरेरिणो'रिति

❀ चिदस्थिमाला ❀

त्यादिः । उक्तहेतोरेव प्रत्यासत्तिलभ्यमाह—**उपस्थितैकेति** । अत एवाह—**पूर्वपरेति** । तदोभयपरामर्शः । तत्तदिति पाठान्तरम् । यत्किञ्चित्समुदायस्येष्टत्वे तु तदनुवृत्तिर्व्यर्था स्यादिति भावः । शाब्दमर्थमाह—**एवञ्चेति** । एवं पदार्थशुद्धौ चेत्यर्थः । 'परस्य च समुदे'ति पाठः । 'च'शून्यपाठे—गामश्वमितिवत्समुच्चयः । तत्र तृतीयान्ताद्वतिरित्याह—**स्यान्तादीति** । पार्थक्याभावे स्वस्यैवाभावात्सादृश्यानुपपत्तेराह—**पृथगिति** । असंहितायामिति भावः । एक इत्येकादेशविशिष्टपरं, प्रत्यासत्तिलभ्य वा,

❀ सदाशिवभट्टीयम् ❀

वर्त्तते इति । अन्यथा वर्णवृत्तिधर्मस्यातिदेशः स्यात्, समुदायनिष्ठस्य च न स्यात् । **स्थानिपराविति** । अवयवत्वेन बोधकाविति समुदायाक्षेपकत्वमनयोः, समुदायश्च पूर्वपर एवान्तादी च तत्स्थानिभूतावेवेति भावः । अन्यथा कृते एकादेशेऽवशिष्टपूर्वसमुदायस्य योन्तो वर्णभिन्नः तन्निष्ठसमुदायस्यातिदेशः स्यात् । तथाच परमपादस्य अः परमपादा इत्यादौ विभक्त्येकादेशात्प्रागेकादेशरहितपूर्वसमुदायान्तः पादिति तद्धर्मातिदेशे 'पादःपदि'ति पद्भावः स्यात् । अचः परेति स्थानिवत्त्वं तु न, पूर्वमात्रविधित्वाभावात् । निर्दिश्यमानपरिभाषा तु स्थानिवद्भावे इवान्तवद्भावेपि न, अत एव खट्वे, खट्वायाः, खट्वयोरित्यादौ परादिवद्भावेन आप्त्ववत्याकारे 'आङि चाप' इत्यादिनैत्वसिद्धिः । तत्र स्थानिवत्त्वेन त्वाप्त्वन्दुर्लभम्, अनल्वृतिधर्मवत्त्वेन स्थानितावद्वृत्तिकत्वाभावात् । अत एव प्रकृतसूत्रभाष्ये खट्वेत्यत्र परादिवत्त्वेन हल्ङ्यादिलोपः साधित इति भावः । **तद्घटितेति** । तदा उभयोः परामर्शः । परस्य च समुदायस्येति पाठः । विनापि चमन्यत्रेव समुच्चयो वा । पार्थक्याभावे उपमानस्यैवाभावात्सादृश्यासङ्गतेराह—**पृथगिति** । **कृतैकेति** । एक

माह—**योऽयमित्यादि** । तेन रामावित्यादौ परादिवत्त्वेन औ इत्यस्य सुप्त्वे, पूर्वमान्तस्यैकदेशविकृतन्यायेन प्रकृतित्वे, यस्माद्विहितस्तदादितदन्तत्वमार्थसमाजग्रस्तमिति पदत्वसिद्धिः । तद्वर्णमात्रवृत्तिधर्मानतिदेशात्खट्वाभिरित्यत्राऽत्वनिबन्धन ऐस्न, 'अयजे इन्द्र'मित्यादौ सवर्णदीर्घश्च न । अत एव तुक्यसिद्धवचनं चरितार्थम् । अन्यथाऽधीत्ये-

❀ अभिनव-चन्द्रिका ❀

त्यद्यापत्तेः । **तद्वर्णमात्रवृत्तिधर्मानतिदेशादिति** । अन्तादिवर्णवृत्तिवर्णमात्रवृत्तिधर्मघटितधर्मानतिदेशादित्यर्थः । **तुक्यसिद्धवचनञ्चरितार्थमिति** । नचाधीयेत्यादौ तुग्वारणायासिद्धवचनञ्चरितार्थम्, अन्यथा पूर्वान्तवद्भावेन ह्रस्वत्वस्य परादिवद्भावेन तदादित्वस्य चातिदेशेन तुग्दुर्वारः स्यात्, नचोभयत आश्रयणे नान्तादिवदितिनिषेधात्तुकोऽप्राप्त्याऽसिद्धवचनं व्यर्थमेवेति वाच्यम्, एतन्मते उभयत आश्रयण इत्यस्याभावादिति वाच्यम्, अन्तरङ्गे तुकि कर्तव्ये पदद्वयसम्बन्धिवर्णद्वयनिमित्तकत्वेन बहिरङ्गस्य सवर्णदीर्घस्यासिद्धत्वेनादोषात् । न च 'नाजानान्तर्ये' इतिनिषेध इति वाच्यम्, तस्या असत्वात्, सत्त्वे वा यत्र बहिरङ्गासिद्धत्वमन्तरङ्गशास्त्रप्रवृत्तिप्रयोजकन्तत्रैव तत्प्रवृत्तिस्वीकारेणाक्षद्यूरित्यादौ बहिरङ्गासिद्धत्वस्यान्तरङ्गवलिलोपप्रवृत्तिवदधीयेत्यादौ बहिरङ्गासिद्धत्वस्यान्तरङ्गप्रवृत्ति-

❀ चिदस्थिमाला ❀

तदित्याशयेनाह—**कृतैकेति** । पूर्वस्य परस्य चेत्यर्थः । एवञ्च विशिष्टनिष्ठधर्मस्यैवातिदेशः । तद्व्यवच्छेदमाह—**न तु तद्वर्णेति** । अन्तादीत्यर्थः । एकादेशमात्रे इति भावः । विशिष्टञ्च वर्णयुक्तमयुक्तं वेत्यन्यदेतत् । अन्तादियुक्तपूर्वपरावयवितुल्यः कृतैकादेशः स इति परमार्थः । विशिष्टपर्याप्तस्य साम्प्रतं तद्वृत्तेरप्यतिदेशस्येष्टत्वादाह—**मात्रेति** । एवमग्रेऽपि । अत एवाह—**अत्वह्रस्वत्वेति** । मात्रपदं सफलयन्नेवास्यार्थस्य फलमाह—**तेनेति** । उक्तार्थाङ्गीकारेणेत्यर्थः । ननु मूलोक्तस्यैव शाब्दत्वमिति तस्यैवातिदेशोऽस्तु तावतापि रामावित्यादिसिद्धेरत आह—**तदिति** । अस्याल्विध्यर्थत्वे रत्नाकरदण्ड्याद्युक्तदोषोऽपि नेत्याह—**अयजे इति** । स्पष्टार्थं पुनर्नञुक्तिः । उक्तार्थे मानमाह—**अत एवेति** । उक्तार्थाङ्गीकारादेवेत्यर्थः । **'तुक्ये'ति**—तत्र कार्ये तस्यासिद्धत्वबोधकं वचनं, तुग्ग्रहणमेवेत्यर्थः । **अन्यथा**=अन्तादिवदिति पदस्वारस्येन

❀ सदाशिवभट्टीयम् ❀

इत्येकादेशविशिष्टपरं, प्रत्यासत्तिलभ्यं वा तदिति भावः । **न तु तद्वर्णेति** । ससहाये व्यपदेशिवत्त्वाऽभावेन वर्णस्य समुदायत्वाभावादिति भावः । **मात्रवृत्तय इति** । इदमुपलक्षणम्—तद्घटितानामदन्तत्वादीनामपि । तेन खट्वाभिरित्यादावदन्तत्वातिदेशोपि नेति बोध्यम् । मात्रपदं सफलयन् द्वितीयार्थस्य फलमाह—**तेन रामेति । पूर्वं मान्तेति** । इदं प्राचीनवासनया, व्यपवर्गानपेक्षगेनान्तादिवत्त्वाभावेप्यस्य सिद्धिः । ननु यत्र पूर्वः परो वा वर्णः ससहायस्तत्रोक्तरीत्या तद्वृत्तिधर्मातिदेशो मास्तु, यत्र त्वसहायस्तत्र तद्वृत्तेरपि धर्मस्यातिदेश इष्यत एव, यथा शिवेहीत्यत्राङ्त्वं, खट्वेत्यत्राप्त्वञ्च । एवं चायज इन्द्रमित्यादौ न्यायसाम्यादिक्त्वादेरप्यतिदेशः कुतो नेति चेत्तत्राह—**अत एवेति** । आदिवत्त्वेन । अन्तवत्त्वेन तूक्तरीत्या तदतिदेशो न प्राप्नोतीति भावः । प्रदीपकृद्रीत्या सूत्रं स्थापयति—**क्षीरेत्यादि । भवत्येवेति** । कृते एकादेशेऽवशिष्टः 'प्' इति पूर्वस्तच्चरमावयवत्वातिदेशे यदागमन्यायेनोत्तरपदवत्त्वमेकाच्त्वं स्वाश्रितमित्यर्थसमाजग्रस्तं तदिति तद्भावः । अनेन विशिष्टातिदेशस्तु दुर्लभोऽल्मात्रवृत्तिधर्मघटितत्वादस्याप्यप्राप्तेः, एनेत्यत्र

❀ विषमपदविवृतिः ❀

एकादेश इति । प्रथमान्तश्रवणात् । कृतैकादेशस्येति तु फलितार्थकथनम् । **औ इत्यस्येति** ।

❀ वरवर्णिनी ❀

तुक्यसिद्धवचनमिति । परे तु—"यत्तु—'अधीये'त्यादौ तुगभावार्थन्तच्चरितार्थम्, तत्र हि अधिपूर्वकादीङ्धातोर्ल्यपि दीर्घे तस्यासिद्धत्वाद्ध्रस्वात्परत्वाभावान्न तुगिति, तन्न, एकत्रैकस्मिन्धर्मिणि 'एकादेश-

त्यादावादिवत्त्वेन ह्रस्वत्वप्रयुक्ततुक्सिद्धौ तद्वैयर्थ्यं स्पष्टमेव। तदुक्तं 'वर्णाश्रये चान्तादिवत्त्वप्रतिषेधो वक्तव्यो, न वाऽताद्रूप्यातिदेशा'दिति । अन्तादिवर्णमात्रवृत्तिधर्मानतिदेशादिति तदर्थः । 'क्षीरपेणे'त्यादावेकारविशिष्टे एकाजुत्तरपदत्वं भवत्येव ।

❀ अभिनव-चन्द्रिका ❀

प्रयोजकत्वाभावेनादोषादिति दिक् । **अन्तादिवर्णमात्रवृत्तिधर्मानतिदेशादिति ।** अन्तादिवृत्तिवर्णमात्रवृत्तिधर्मघटितधर्मानतिदेशादित्यर्थः । **एकाजुत्तरपदत्वं भवत्येवेति ।** स्यादेतत्—एकाजुत्तरपदत्वस्य अन्तादिवृत्तिवर्णमात्रवृत्तिधर्मघटितत्वेन कथं पे इत्यत्रातिदेशः ? । न चान्तादिवर्णविशिष्टधर्मघटितधर्मस्यातिदेशो न भवतीति ताद्रूप्यानतिदेशादित्यस्यार्थः, अन्तादिवर्णवै० 'स्ववृत्तित्व'

❀ चिदस्थिमाला ❀

पूर्वपरान्तादितुल्य एकादेश इति मूलोक्तार्थाङ्गीकारे । एवं सूत्रसम्मतिमुक्त्वा भाष्यादिसम्मतिमप्याह—**तदुक्तमिति** । 'वार्तिककृते'ति शेषः । **श्रये इति** । 'विधा'विति शेषः । उक्तरीत्या सूत्रादेव तथार्थलाभ इति नेदमपूर्ववचनं कार्यमित्याह—**न वेति** । अताद्रूप्येति च्छेदः । नवा वक्तव्यं ताद्रूप्यस्यान्तादिवर्णमात्रवृत्तिधर्मस्यानेनातिदेशाभावादित्यर्थस्तदाह—**अन्तादीति** । मात्रपदेन तद्घटितसमुदायवृत्तिधर्मव्यावृत्तिः,तद्धेतुककार्ये एतदतिदेशस्येष्टत्वात् । **नतीति** । अनेन सर्वतः पश्चान्नञ्समास इति सूचितम् ।

यद्यप्यस्याप्यनल्विधावनिष्टत्वं तथापि स्थानिवद्भावेन गतार्थमिदमिति मनोरमादिसकलग्रन्थसङ्गतिरेव, तदेतद्ध्वनयन्नाह—**क्षीरेति** । विशिष्टे=पूर्वसमुदाये । तथा च प्रागुक्तरीत्या नेत्यस्य विभक्तित्वमिति भावः । नन्विदमपि तेनैव सिद्धमत आह—**स्थानीति** । अत्र तु तन्मात्रवृत्तिधर्मानतिदेशः, उक्तरीत्या नेदृशस्य

❀ ज्योत्स्ना ❀

एकाजुत्तरपदत्वं भवत्येवेति । पे इत्येकारान्ते उत्तरपदत्वं नास्तीत्यतिदेशेन तदेवानीयते ।

❀ सदाशिवभट्टीयम् ❀

परादिवत्त्वेन विभक्तित्वं, व्यपवर्गानपेक्षणेनोभयत इत्यस्याप्रवृत्तेः,एकदेशविकृतन्यायेन तु नेत्यत्र तत्त्वं दुर्लभम्, अक्तपरिमाणनिष्ठत्वाद्विभक्तित्वस्येत्याहुः । एकाच्त्वं स्वाश्रितम्, उत्तरपदत्वमात्रन्तु प्रार्थ्यते, तत्र चानल्विधाविति निषेधो दुर्लभः, स्थानिसम्बन्धिवर्णानाश्रितत्वादितिरीत्या प्रदीपस्योद्योत एव दूषितत्वाद्विधेरेवाप्राप्तत्वेन निषेधपर्यन्तं प्रदीपकृतो धावनं व्यर्थमिति च ध्वनयन्स्वरीत्या सूत्रं सफलयति—**किञ्चेत्या**—

❀ विषमपदविवृतिः ❀

तस्यैकादेशघटितत्वं व्यपदेशिवद्भावेन । **तद्वैयर्थ्यमिति** । अधिपूर्वाद्दैवादिकादीङ्गताविति धातोः

❀ वरवर्णिनी ❀

स्थान्याद्यवयवकसमुदायवृत्तिधर्म' 'एकादेशस्थान्यन्तावयवकसमुदायनिष्ठधर्मं'तदुभयस्यातिदेशानङ्गीकारेण—'ई'वृत्तिकृत्तदादित्वस्य, उपसर्गेकारवृत्तिह्रस्वत्वस्य च (समुदितस्योभयस्य) ईकारेऽतिदेशाभावेन ह्रस्वान्ततदादित्वविरहादेव तत्र तुगप्राप्त्या तस्य वार्त्तिकफलतया वक्तुमशक्यत्वात् । पूर्वोक्तोभयधर्मस्यैकत्र धर्मिण्यतिदेशाभावादेव अशब्दस्य अन्शब्देन बहुव्रीहिसमासे डापि टिलोपे दीर्घे 'आः' इत्यत्र सुप्तदादित्वस्य आप्तदादित्वस्य चैकत्राशब्देऽतिदेशाभावान्न हल्ङ्यादिलोपः । अत एव च 'आ-आ'विति प्रश्लिष्य 'ङ्याब्ग्रहणेऽदीर्घ' इति वार्तिकखण्डनं भाष्यकृतः सङ्गच्छते, अन्यथा हे—अतिखट्व अः 'अतिखट्वा' इत्यत्र आप्तदादित्व-सुतदादित्वोभयधर्मस्य खट्वाशब्देऽतिदेशे लोपप्राप्त्या तद्वारणाय तस्य वार्तिकस्य चारितार्थ्येन तत्प्रत्याख्यानमसङ्गतं स्या''दित्याहुः ।

स्थानिवद्भावेन तु नैतल्लभ्यम्,अप्राधान्येनालाश्रयणात् । किञ्च एकादेशे वर्णयोरेव स्थानित्वं न समुदायस्येति—भी ई भिय इत्यादावेकादेशविशिष्टे धातुत्वानापत्तिः । धातुत्वस्यैकादेशस्थानिधर्मत्वाभावात् । आनुमानिकादेशकल्पकवाक्यमन्तादिघटितसमुदायस्यैकादेशघटित आदेश इत्येव, न तु प्रत्येकं तयोः स्थानित्वबोधकं, तथा सति स्वाश्वशब्दस्य

❀ अभिनव-चन्द्रिका ❀

'स्ववृत्तित्वर्णत्वव्याप्यत्व'—'स्वस्थानिकादेशवृत्तित्वै'तत्रितयसम्बन्धेन । तथा च एकाजुत्तरपदत्वघटकाच्त्वे स्वस्थानिकादेशवृत्तित्वस्यैव सत्वान्न दोष इति वाच्यम्, 'उत्तरपदाद्यच्त्वस्य ताद्रूप्यानतिदेशेन अतिदेशो न भवती'ति परिभाषेन्दुशेखरविरोधेन एतस्यार्थस्य वक्तुमशक्यत्वादिति चेन्मैवम् । 'स्ववृत्तित्व''स्ववृत्तिवर्णत्वव्याप्यत्व' 'स्वाभाववत्व'—एतत्रितयसम्बन्धेन स्वविशिष्टधर्मघटितधर्मो नायातीत्यर्थकरणेनादोषात् । अभावश्च स्वस्थानिकादेशवृत्तित्व, स्वनिष्ठा या अभेदसम्बन्धावच्छिन्नप्रकारतावच्छेदकता, सम्बन्धानवच्छिन्नप्रकारतावच्छेदकता वा तदवच्छेदकत्वोभयसम्बन्धावच्छिन्नप्रतियोगिताको ग्राह्यः, अथवा अन्तादिवृत्तिर्वर्णमात्रवृत्तिश्शाब्दबोधजनकशक्तिज्ञानीयमुख्यविशेष्यतावच्छेदकश्च यो धर्मस्तद्घटितो धर्मो नायातीत्यर्थइति न दोषः । विस्तरस्तु परिभाषेन्दुचन्द्रिकायान्द्रष्टव्यः । परे तु क्षीरपेणेत्यादौ उत्तरपदत्वमेव पूर्वान्तवद्भावेनानीयते, एकाच्त्वन्तु स्वतः

❀ चिद्रस्थिमाला ❀

तस्य तन्निष्ठत्वस्य निर्विवादत्वात् । इदमेव ततोऽत्र वैलक्षण्यम् । एवं मनोरमादिरीत्याप्यावश्यकत्वमुक्त्वा सिद्धान्तरीत्याप्याह—**किञ्चेति** । 'अन्यथे'ति शेषः । ननु तथा वाक्यकल्पनया निर्वाहोऽत आह—**आनुमानिकेति । वाक्यमिति** । तदपीत्यर्थः । **समुदेति** । पूर्वपरसमुदायेत्यर्थः । अत एवाह—**घटितेति** । तयोः=पूर्वपरसमुदाययोः, मानाभावादिति भावः । विपक्षे बाधकमप्याह—**तथा सतीति** ।

❀ ज्योत्स्ना ❀

नत्वेकाच्त्वपि, यथाऽरुदितामित्यत्र वलादित्वमिति स्थानिवद्भावेनास्याप्यन्यथासिद्धेः प्रदीपकृत्प्रदर्शितोदाहरणनिराकरणावसरे हरदत्तमिश्रैरुपपादनाच्चिन्त्यमेतत् । एतेनोत्तरपदत्वेन रूपेणोत्तरपदसम्बन्धित्वमपि विशिष्टातिदेशं विना दुर्लभमिति कथञ्चिदाशयकल्पनं केषाञ्चित्प्रत्युक्तम् । अयं त्विह विस्मयः—'क्षिप्ते प्रदीपोद्देशेन हरदत्तेन दूषणे । अप्राप्य तमिहायातं हैडिम्बन्यायतः कथम् ? ॥'

तथा हि—एकादेशात्प्राग्यौ पूर्वपरौ तद्घटितसमुदायधर्मः कृतैकादेशेऽतिदिश्यते—इत्युक्तसूत्रार्थमाश्रित्य हरदत्तोक्तं दूषणं प्रवर्तते, नत्विहैव प्रदीपकृतासौ सूत्रार्थ आश्रितः, क्षीरपेणेत्यत्र कृते एकादेशे ततः प्राग्भागान्तावयवत्वमतिदिश्यत इति तदुक्तेः । एवञ्च पकारमात्रे उत्तरपदत्वं सिद्धमिति न तदपेक्षा । एकाच्त्वं तु तत्र नास्तीति तदर्थमतिदेशोऽपेक्ष्यते । नचैतत्स्थानिवद्भावाल्लब्धुं शक्यमिति तदाशयः । न च वृक्षावित्यादौ परादिवद्भावार्थमर्थान्तरमपि तत्राश्रितमिति व्यापकत्वात्तदेव सर्वत्रास्त्विति तदवस्थो दोष इति वाच्यं, यथोक्तप्रकारे दोषाभावात् । किञ्च वृक्षावित्याद्युदाहरणस्य स्थानिवद्भावेनान्यथासिद्धेस्तदर्थमर्थान्तराश्रयणे प्रमाणाभावात् । अनन्यसिद्धस्य क्षीरपेणेत्याद्युदाहरणस्य सिद्धये तदुक्तार्थस्य प्रत्यासत्तिलभ्यस्य बलवत्त्वात् । परादिवद्भावस्य तर्हि मुख्योदाहरणं किं भविष्यतीति चेत्—'उपसर्गस्यायता'वित्यत्रायतिपरस्योपसर्गरेफस्य लकार इति पक्षे प्लायते पलायत इति । तत्र ह्येकादेशे कृते ततः परभागाद्यवयवत्वं तस्यातिदिश्यते—रेफस्यायतिपरत्वसम्पादनार्थम् । 'अयति-

❀ सदाशिवभट्टीयम् ❀

दिना । अन्ये तु 'समुदायस्येती'त्यन्तस्य मध्यमणिन्यायेनोभयान्वयित्वात्—'न तल्लभ्य'मित्यत्र हेत्वन्तरमाहुः । **भिय इत्यादाविति** । आदिनोद्योतोक्तक्षीरपेणेत्यस्य संग्रहः । मनोरमादेः पूर्वापरविरोधं सूचयंस्तन्मतेनाह—

स्थानिवत्त्वेन स्वशब्दतया तत ईरिन्शब्दे वृद्ध्यापत्तेः। किञ्च भवत्सम्मतस्य 'उभयत आश्रयणे नान्तादिव'दित्यस्यासङ्गतौ भवत्सम्मता'ऽभीया'दित्याद्यसिद्धिः। स्थानिवत्त्वं तूभयत आश्रयणे इष्यत एव। अन्यथाऽचः परस्मिन्नित्यस्याप्युभयत आश्रयणेऽप्रवृत्त्या-पत्तौ प्लायत इत्याद्यसिद्धिरिति दिक्।

❀ अभिनव-चन्द्रिका ❀

सिद्धमेवेति न कोऽपि दोष इत्याहुः। **दिगिति**। तदर्थस्तु स्थानिवत्सूत्रेणैव अन्तादिवच्चेतिसूत्रं गतार्थम्। न च क्षीरपेणेत्यादौ एकाजुत्तरपदत्वस्य अल्लव्याप्यधर्मघटितत्वेन अनल्विधाविति-निषेधादतिदेशो न स्यादिति वाच्यम्, परे त्वित्यादिना दत्तोत्तरत्वात्। नच भिय इत्यादौ इयङ् न

❀ चिदस्थिमाला ❀

तत्कल्पकस्यार्थवत्त्वस्य तत्रापि सत्त्वेन मानत्वात्तथैव तत्कल्पने चेत्यर्थः। मनोरमादेः पूर्वपरविरोधं सूचयंस्तन्मतेनाह—**किञ्चोभेति**। **इत्यस्येति**। लोकसिद्धस्येत्यर्थः। ननूभयत आश्रयणे न स्थानिवदित्ये-वैतदभावे कल्प्यतेऽत आह—**स्थानीति**। अत्र हेतुमाह—**अन्यथेति**। तत्र तदनिष्टत्वे इत्यर्थः। मते इत्यादिः। 'असिद्धे'रिति पाठे तु नास्योपयोगः। पूर्वसूत्रे दोषाभावादाह—**अचः परेति**। विनि-गमनाविरहादिति भावः। अयताविति न रेफविशेषणं, तथा सति अव्यवधाने एव प्रवृत्तिसम्भवेन व्यवधाने प्रवृत्त्यनापत्तेः, तस्मादयतिविशेषणम्, अत एवोपसर्गस्यायताविति सूत्रे उक्तार्थे प्लायत इत्यादावेका-देशे कृते व्यपवर्गाभावाल्लत्वं न स्यादित्याशङ्क्यैकदेशिनान्तवद्भावाद्व्यपवर्ग इति उक्ते परेणैकदेशिनो-भयत आश्रयणे नान्तादिवदित्युक्तेऽचः परेति स्थानिवत्त्वाद्व्यपवर्ग इति सिद्धान्तिनोक्तं, तदेतद्धृदि निधा-याह—**प्लायत इति**। ननु परसूत्रस्य तत्र प्रवृत्तावपि अस्य गतार्थत्वं पूर्वसूत्रेणेति तद्विषय एव निषेधकल्पनमिति न कोऽपि दोष इति चेन्न, अभीयादित्यादौ श्रौतस्थान्यादेशभावस्य वर्णयोरेव सत्त्वेनाति-दिष्टस्यैवाप्राप्तेस्तथा तत्कल्पनेऽपि प्रागुक्तरीत्या विशिष्टस्य स्थानित्वेऽपि प्रत्येकं तयोः स्थानित्वे मानाभावाच्च। स्पष्टा चेयं रीतिरुपसर्गादृत्यूह्योरित्यस्य प्रोह्यते इत्यादौ गुणे कृते प्रवृत्तिवारणपरभाष्ये। अत एव सिद्धान्तेऽन्तादिवद्भावनिषेधेऽपि पूर्वसूत्रकृतस्थानिवद्भावप्रयुक्तातिप्रसङ्गो न। नचैवमपि अचः परेति स्थानिवत्त्वाद्दोष एवेति वाच्यम्, स्वविधौ तस्याप्रवृत्तेः। किञ्चैतत्सत्त्वे उभयत आश्रयणे इत्यस्य भाष्योक्त-न्यायसिद्धत्वसङ्गतिः, अपूर्ववचनाङ्गीकारे गौरवं, तद्विरोधश्च। किञ्चोभयत इत्यस्यैकदेश्युक्तित्वेऽपि प्रागुक्तरीत्यै-तस्यावश्यकत्वमेव। यथा चैवं सत्यभीयादित्यस्य सिद्धिस्तथा तिङन्ते मूल एव स्फुटीभविष्यति। अचः परेत्यस्य तत्र प्रवृत्तेरेव पादिकः, औदवाहिः इत्यादावनेन पदाद्यापादनपरमचः परेति सूत्रभाष्यकैयटादिकं सङ्गच्छेत। तस्मात्प्राधान्येन तन्मात्रवृत्तिधर्माश्रयेऽस्या प्रवृत्तिरिति ततो वैलक्षण्येनास्यावश्यकत्वमत एव भाष्ये न प्रत्याख्यातमेवञ्च ते चिन्त्या एवेति दिक्। तदाह—**दिगिति**। यत्तु धातूपसर्गकार्यत्वेन वृद्धे-

❀ ज्योत्स्ना ❀

परस्योपसर्गस्य यो रेफस्तस्य लकार इति पक्षान्तरे एकदेशविकृतन्यायाद्यकारमात्रेऽयतित्वातिदेशा-

❀ सदाशिवभट्टीयम् ❀

किञ्चोभे इति। **असङ्गताविति**। सूत्रसत्त्वे त्वन्तादिशब्दाभ्यां पूर्वपरशब्दाभ्यां च विरोधस्य पुरः-स्फूर्तिकत्वात्तदसङ्गतिरिति भावः। ननूभयत आश्रये न स्थानिवदित्यपूर्वमारभ्यते तत्राह—**इष्यत एवेति**। **दिगिति**। दिगर्थ इण्धातुस्थशेखरादवसेयः।

❀ विषमपदविवृतिः ❀

क्तो ल्यपि तुगभावार्थमसिद्धवचनस्य चारितार्थ्याच्चिन्त्यमेतदिति केचित्। **इष्यत एवेति**। इदं चिन्त्यम्। स्थानिवत्सूत्रप्राप्तस्थानिवत्त्वस्यैवोभयत आश्रयण इत्यनेन निषेधाङ्गीकारादिति। **इति दिगिति**। अन्ये त्विदं देवदत्तस्येदं यज्ञदत्तस्येत्यादावग्रिमेदमित्यस्योत्तरान्वयित्वेन देवदत्तस्ये-

निर्देशादिति । न च 'कर्त्तरि चर्षी'त्यादौ गुणस्य पदद्वयसम्बन्धिवर्णद्वयाश्रितत्वेन बहिरङ्गत्वाद्रेफाभावेन न विसर्ग इति वाच्यम्, गुणस्येव पदद्वयसम्बन्धिरेफखरात्मकवर्णद्वयाश्रितत्त्वेन विसर्गस्यापि तत्त्वात् । परनिमित्तकत्वमप्युभयोः समम् ।

❀ अभिनव-चन्द्रिका ❀

स्यात्, धातुत्वस्य स्थान्येकदेशवृत्तित्वेन तस्य स्थानिवत्सूत्रेणातिदेष्टुमशक्यत्वादिति वाच्यम्, 'अर्थवत्त्वेव स्थान्यादेशभावविश्रान्ति'रिति सिद्धान्तसिद्धत्वेन 'भिय' इत्यादौ इकारप्रश्लेषेण भी इत्यस्य ई इत्यस्य चोभयोरर्थवत्त्वेन भी इत्यस्य स्थाने भी इत्यादेशः । ई इत्यस्य स्थाने ई इत्यादेशः, भीई इत्यस्य स्थाने भी इत्यादेश इत्यानुमानिकस्थान्यादेशानां स्थानेऽन्तरतमपरिभाषासहकारेण कल्पनेन भीवृत्तिधातुत्वस्य स्थानिवत्सूत्रेण भी इत्यादेशेऽतिदेष्टुमशक्यत्वात् ।

नच स्वाश्वशब्दे निरुक्तदिशा स्वशब्दत्वातिदेशे तस्मादीरिञ्छब्दे परे वृद्ध्यापत्तिरिति वाच्यम्, स्वाश्वशब्दे स्व इत्यस्य अश्व इत्यस्य समुदायस्य चार्थवत्त्वेऽपि 'स्थानेऽन्तरतम'परिभाषासहकारेण स्व इत्यस्य स्थाने स्वा इत्यादेशः, अश्व इत्यस्य स्थाने आश्व इत्यादेशः स्व-अश्वइत्यस्य स्थाने 'स्वाश्व' इत्यादेश इति कल्पनेऽपि स्वशब्दत्वस्य स्थान्येकदेशवृत्तित्त्वेन स्वाश्व इत्यादेशेऽतिदेष्टुमशक्यत्वात् । न चैवमपि अमी इत्यादौ ईत्वन्न स्यादिति वाच्यम्, अद ई इति स्थिते अद इत्यस्य स्थाने अदे इत्यादेशः' ई इत्यस्य स्थाने ए इत्यादेशः, अद ई इत्यस्य स्थाने अदे इत्यादेश इतिकल्पनेन ईकारवृत्तिबहुवचनत्वस्य ए इत्यत्रातिदेष्टुं शक्यत्वेन ईत्वस्य सुवचत्वात् । नचाद्यर्थकानल्विधावितिनिषेधः शङ्क्यः, तस्यानङ्गीकारात् । अङ्गीकारे वा आरोपप्रकारीभूतबहुवचनत्वस्य साक्षादुद्देश्यतानवच्छेदकत्वाच्च । न चान्तादिवत्सूत्राभावे 'उभयत आश्रयणे नान्तादिव'दित्यस्यासङ्गतिः, नच स्थानिवत्त्वस्यैव तन्निषेध इति वाच्यं, 'प्लायत' इत्यादौ लत्वानापत्तेरिति वाच्यम्, 'उभयत आश्रयणे न स्थानिव'दिति स्थानि-

❀ चिदस्थिमाला ❀

रन्तरङ्गत्वाद्बहिरङ्गत्वेन समाधानं दुर्वचम् । वस्तुतो धातूपसर्गनिमित्तवृद्ध्यपेक्षयोपसर्गावयवमात्रनिष्ठपदान्तत्वनिमित्तकविसर्गेऽन्तरङ्गत्वमस्त्येवेति तदप्यत्र समाधानं सुवचमिति, तन्न, तस्याप्रयोजकत्वात् । वृद्धेरपि वर्णनिमित्तकत्वात् । उभयनिमित्तकत्वस्योभयत्र तुल्यत्वादीदृशस्य तत्त्वस्यान्यत्र निरस्तत्वादतिप्रसङ्गापत्तेश्च । तदेतद्ध्वनयन्नन्यथा शङ्कते—**न चेति** । गुणशास्त्रेणापवादद्वयानपेक्षणात्पदद्वयाश्रितत्वेन तत्त्वस्य दुर्वचत्वादाह—**सम्बन्धिवर्णद्वयेति** । ननु नैवं तत्त्वं तत्राश्रीयते, किन्त्वन्यथेति तत्त्वं तत्रास्त्येवेत्यत आह—**परेति** । एतेनान्यथैव तद्वारणेन ज्ञापकपर्यन्तानुधावनं व्यर्थमित्यपास्तम् । इदञ्च त्रिपाद्यां तत्प्रवृत्तिम-

❀ ज्योत्स्ना ❀

त्परत्वं ततः प्राग्भागेऽन्तवद्भावादुपसर्गत्वात्प्लायत इत्यादेरपि नास्त्यादिवद्भावोदाहरणत्वं तथापि आ अयते आयत इत्येकादेशं कृत्वा पश्चान्निर्दुरोर्योगे निलायते दुलायत इत्यनयोस्तदुदाहरणत्वं भविष्यति, एकादेशेन व्यवधानादुपसर्गस्यायतिपरत्वात् । नचैवमादावानुमानिकादेशस्य स्थानिवद्भावादन्यथासिद्धिः, स्वशब्दघटितस्थान्यादेशे स्वत्वातिदेशानभ्युपगमवदयतिघटितस्थान्यादेशेऽयतित्वातिदेशाप्रवृत्तेस्तुल्यत्वादित्याहुः ।

❀ विषमपदविवृतिः ❀

दमिति स्थानिसमुदायस्य निरर्थकत्वेन देवदत्तस्येदमित्यादेशकल्पना न तत्र सम्भवति, अर्थवत्त्वेवानुमानिकस्थान्यादेशभावविश्रान्तेः । तथा च तत्रेष्टानुरोधेन देवदत्तस्येति वेदमिति वादेशः कल्पनीयः । एवं स्वाश्वशब्देपि । तत्र हि 'स्वा'इत्यादेशकल्पना'ऽऽश्व' इत्यादेशकल्पना वा स्यात् ।

कार्यकालपक्षे त्रिपाद्यां तदुपस्थितावपि पूर्वं प्रति परस्यासिद्धत्वादन्तरङ्गाभावेन पूर्वस्या-न्तरङ्गनिरूपितबहिरङ्गत्वाभावात्कथं तस्यासिद्धत्वप्रतिपादनम् ? । न चानया पूर्वस्या-सिद्धत्वादभावेन तं प्रति परासिद्धत्वं 'पूर्वत्रे'त्यनेन वक्तुमशक्यमिति वाच्यम्, एवं हि विनिगमनाविरहादुभयोरप्यप्रवृत्तौ विसर्गो दुर्वारः । एवञ्च विरोधात्कार्यकालपक्षेऽपि

❀ अभिनव-चन्द्रिका ❀

वत्सूत्रस्यैव निषेध इति स्वीकारेणादोषादिति दिक् । **पूर्वम्प्रतीति** । सापादिकपरिभाषाशास्त्रम्प्रती-त्यर्थः । **परस्येति** । त्रैपादिकान्तरङ्गस्येत्यर्थः । **अन्तरङ्गाभावेनेति** । अन्तरङ्गत्वप्रकारकज्ञानाभावे-नेत्यर्थः । **पूर्वस्येति** । सापादिकबहिरङ्गस्येत्यर्थः ।

❀ चिदस्थिमाला ❀

भ्युपेत्योक्तम् । वस्तुतस्तदेव नेति प्रतिपादयितुं यथोद्देशे तत्राप्रवृत्तिः, कार्यकाले तु तत्र **प्रवृत्तिरेवेति** कैयटादिसकलग्रन्थासङ्गतिं ध्वनयन्नाह—**किञ्चेति** । तदसिद्धत्वरूपहेत्वभावादिति भावः । इदमपि तद्रीत्या, अपिना सिद्धान्तभूतानुपस्थितिसमुच्चयः । **पूर्वमिति** । पूर्वत्रासिद्धमित्यनेनेति भावः । **तस्येति** । बहि-रङ्गस्य पूर्वस्येत्यर्थः । तत्रोपस्थितयाऽनयेति भावः । ननु कार्यकालपक्षमाश्रित्य तत्रैतदुपस्थितिसामर्थ्येन पूर्वत्रासिद्धमित्यस्य बाधः, अत एव नार्कुटादौ न विसर्ग इति नोक्तदोष इति चेन्न । तथा स्वीकार्यमुत यथोद्देश-

❀ सदाशिवभट्टीयम् ❀

उपस्थितावपीति । अत्र पक्षे परिभाषादृष्ट्या त्रिपाद्यसिद्धत्वरूपप्रतिबन्धकाऽभावादिति भावः । **कथमिति** । न च पूर्वत्र कर्त्तव्ये परासिद्धत्वेपि तत्र कृते तदसिद्धत्वे मानाभाव इति पञ्चानामित्यत्र वक्ष्यमाणरीत्या जातगुणादेरसिद्धत्वमनयेति युज्यत एवेति वाच्यम् 'न भकुर्छुरा'मिति कुर्ग्रहणेन पूर्वत्रेत्यस्य विषयसप्तमीत्वबोधनेन पूर्वदृष्ट्या परमसिद्धमित्येव तदर्थात् । अन्यथा कुर्वन्तीत्यादावुदिति तपरत्वसामर्थ्यादेव गुणस्येव दीर्घस्यापि व्यावृत्तौ किन्तेन ? । अत एव 'चन्चूर्यत' इत्यादौ दीर्घ-सिद्धिः । अन्यथा 'चन्चूर्ती'त्यत्र गुणस्येव दीर्घस्यापि उत्परस्यात इति तपरत्वेन निवृत्तिः स्यात् । विसर्जनीयसूत्रस्थं भाष्यमपीह मानम्, उत्तरग्रन्थस्त्वरुचितया नेष्यत इति दिक् । **विनिगमना-विरहेति** । पूर्वत्रेत्यस्याधिकारत्वेन प्रागेव प्रवृत्तिः । श्रुतत्वं च विनिगमकमपि बोध्यमन्यत्रोक्तम् ।

❀ विषमपदविवृतिः ❀

तथा चानुमानिकस्थान्यादेशभावे एकादेशविषये प्रत्येकं स्थानित्वेपि एकादेशान्ते पूर्ववृत्तिधर्मस्य तदादौ परवृत्तिधर्मस्य स्थानिवद्भावेन लाभो, न तु वैपरीत्येन, अत्रैवान्तादिवच्चेति तात्पर्यग्राहकम् । एवञ्च आश्वशब्देऽश्वशब्दत्वं स्थानिवद्भावेन स्यान्न स्वशब्दत्वमिति न दोषः । भिय इत्यादौ तु भीशब्दत्वं स्थानिवत्त्वेन स्यादेव । आनुमानिकस्थान्यादेशभावे एकादेशघटिते धातुत्वानयन-सम्भवात् । क्षीरपेणेत्यत्र तु पे शब्दे आनुमानिकस्थान्यादेशभावमाश्रित्योत्तरपदत्वमात्रमानीयत इति णत्वसिद्धिरिति भावः । एवञ्च सत्यन्तादिवद्भावस्य स्थानिवत्सूत्रमूलकतया 'न वा ताद्रूप्यानतिदेशा'दिति प्रतिषेधखण्डनं सूपपद्यते । अत एव ङ्याब्ग्रहणेऽदीर्घ इति स्थानिवत्त्वनिषेधेऽदीर्घग्रहणं चरितार्थम् । एकाजुत्तरपदत्वस्यान्तवद्भावेनातिदेशे खट्वा-भिरित्यादावदन्तत्वस्याप्यतिदेशापत्तिः । पूर्वपरघटितसमुदायस्येत्यर्थेन तु न वा ताद्रूप्यातिदेशा-दिति वार्तिकार्थस्य तु न क्रोडीकारः । रामावित्यादौ भवदुक्तदिशा व्यपदेशिवद्भावो नाभिरित्यत्र

तदनुपस्थितिरेव त्रिपादीस्थेऽन्तरङ्गे उचिता । अत एव विसर्जनीयसूत्रे भाष्ये इमामेव युक्तिमुक्त्वा—'अयुक्तोऽयं परिहारो न वा बहिरङ्गलक्षणत्वा'दितीत्युक्तम् । एवञ्च तत्र-तत्र वचनान्येव कार्याणि, ज्ञापकानुसरणं वा कर्त्तव्यम् । अत एव 'निगाल्यते' इत्यादौ

❀ अभिनव-चन्द्रिका ❀

अयुक्तोऽयं परिहार इति । न च युक्तोऽयं परिहार इत्यर्थो न्याय्यः, अन्यथा 'निष्ठानत्वमवृद्धेः' 'नृमतौ प्रतिषेधः' । 'तस्य दोषः संयोगादिलोपलत्वणत्वेषु' 'यणः प्रतिषेधो वाच्यः', 'विसर्जनीयोऽनुत्तरपदे' इत्याद्यनेकवचनस्वीकारे गौरवादिति वाच्यम् , आर्तत्, आर्मतीत्' चक्रयकैत् ,प्लायते, प्राहिणोत्, कलं त्रातीति कलत्राः—तस्माण्ण्यन्तात्क्विपि कलत्रित्याद्यर्थं तत्तद्वचनानामावश्यकत्वेन गौरवस्य समत्वात् । अत एव भविष्यति, सर्वेषां, रामाणां, राज्ञामित्यादौ षत्वणत्वश्चुत्वादिकं सिध्यति । अन्यथा अन्तरङ्गे णत्वादौ कर्तव्ये इट्, सुट्, नुट्, अल्लोपादेरसिद्धत्वेन षत्वादिकन्न स्यादिति दिक् ।

विसर्जनीयप्रतिबन्ध इति । 'विसर्जनीयोऽनुत्तरपदे' इति वार्तिकेनेत्यर्थः । अत्रोत्तरपदमर्थवत उपलक्षणम् । तथा च अर्थवद्विशिष्टस्य रेफस्य विसर्गो न भवतीति तदर्थः । वै०'स्वाव्यवहितपूर्वत्व'-'स्वोत्तरप्रत्ययनिमित्तकत्वो' भयसम्बन्धेन । अत एव नार्कलिपरित्यादौ न दोषः । अथवा यं खरन्निमित्तीकृत्य विसर्गो जायते तद्विशिष्टरेफस्य विसर्गो न भवति । वै०'स्वनिमित्तकत्व,–स्वाव्यवहितपूर्वाच्स्थानिकत्वै'तदुभयसम्बन्धेन । अत एव 'दास्याः पुत्रः', 'होतुः पुत्र' इत्यादौ न दोषः । अत एव 'कर्तरि चर्षी' त्यादिनिर्देशास्सङ्गच्छन्ते ।

❀ चिदस्थिमाला ❀

पक्षमाश्रित्य तेनास्या बाधः स्वीकार्य ? इत्यत्र विनिगमकाभावेन तथोक्तेर्दुर्वचत्वात् । तदाह—**न चानयेति** । प्रक्रान्तया'ऽसिद्धं बहि'रित्यनयेत्यर्थः । **एवं हीति** । अनया पूर्वासिद्धत्वेन पूर्वत्रेत्यस्य प्रवृत्तिप्रतिबन्धस्तेन च परासिद्धत्वे तन्निरूपितवहिरङ्गत्वाभावादेतत्प्रवृत्तिप्रतिबन्ध इत्येवं द्वयोर्मिथोविरोधेन द्वाभ्यां मिथः-प्रवृत्तिप्रतिबन्धे क्रियमाणे इत्यर्थः । हि=यतः । अन्यतराप्रवृत्तेरिष्टत्वेऽप्यन्यतराप्रवृत्तेरनिष्टत्वमिति विरोधसूचकोऽपिः । **दुर्वार इति** । परत्वादिति भावः । एवञ्च=तस्य दुर्वारत्वे च । विरोधात्=उक्तरूपात् । अपिर्यथोद्देशसमुच्चये । उक्तेऽर्थे भाष्यसम्मतिमप्याह—**अत एवेति** । तत्र तदनुपस्थितेरौचित्यादेवेत्यर्थः । 'कार्यकालपक्षमेवोपक्रम्ये'ति शेषः । अनेनोपसंहारस्य यथोद्देशपरत्वं निरस्तम् । **विसर्जनीयेति** । खरवसानयोरिति सूत्रे इत्यर्थः । **इमामिति** । एवं हीत्याद्युक्तामित्यर्थः । एवोऽप्यर्थे । तेन 'पूर्वं प्रती'ति प्रागुक्ताया वक्ष्यमाणायाश्च समुच्चयः । 'इतीत्युक्त'मिति पाठः । सिद्धान्तिनेति भावः । त्रिपादीस्थेऽन्तरङ्गे कार्येऽयं परिहारः—संयोगान्तस्य रदाभ्यामित्यादौ यत्रयत्रोक्तः–स सर्वो न युक्त इति तदर्थः । तदाशयमिष्टलक्ष्यनिर्वाहार्थमाह—**एवञ्चेति** । तस्यायुक्तत्वे चेत्यर्थः । **वचनेति** । 'विसर्जनीयोऽनुत्तरपदे' इत्यादीनी-

❀ सदाशिवभट्टीयम् ❀

इमामेवेति । एवं हीत्याद्युक्तामिति भावः । 'लक्षणत्वादितीत्युक्त'मिति पाठः । **अनुसरणं वेति** । झल-

❀ विषमपदविवृतिः ❀

पूर्वान्तवद्भावेनात्वादिदेशे ऐसादेशापत्तिरित्याहुः । **ज्ञापकानुसरणं वेति** । 'तस्मादित्युत्तरस्ये'ति निर्देशाज्ज्ञापकात्त्रिपादीस्थेन्तरङ्गेप्यन्तरङ्गपरिभाषा क्वचित्प्रवर्तते इति दध्यत्रेत्यत्र न संयोगान्तलोपः, बहिरङ्गयणोऽसिद्धत्वात् । परे तु पूर्वत्र कर्त्तव्ये परस्यासिद्धत्वेऽपि तत्र कृते परस्यासिद्धत्वे मानाभावः । एवमेव हल्सन्ध्यन्ते शब्दरत्ने स्पष्टमेवोक्तम् । तथा च नार्कुटादौ पूर्वस्याः कृतत्वेन ताम्प्रति परस्य विसर्गस्यान्तरङ्गस्य पूर्वत्रेत्यनेन सिद्धत्वबोधनमशक्यम् । तथा च बाधकभावात् अन्तरङ्गपरिभाषा कार्यकालपक्षे परिभाषान्तरवत् त्रिपाद्यां प्रवर्तत एव । विसर्जनीयसूत्रे शेखरोक्त-

लत्वाद्यर्थं 'तस्य दोष' इति वचनमेवारब्धम्, अन्यथाऽन्तरङ्गत्वाण्णिलोपात्पूर्वं वैकल्पिकलत्वे—चक्र्यत्र माषवपनीत्यादौ बहिरङ्गासिद्धत्वेन च सिद्धे तद्वैयर्थ्यं स्पष्टमेव।

यत्तु लक्ष्यानुरोधात्कार्यकालपक्षे उपस्थितयाऽन्तरङ्गपरिभाषयाऽऽनुमानिक्या प्रत्यक्षसिद्धस्यापि 'पूर्वत्रे'त्यस्य बाध इति, तन्न लक्षणैकचक्षुषामादरणीयम्। अत एव 'उर'णिति सूत्रे—'रेफस्य पूर्वान्तवत्त्वे विसर्जनीयप्रतिषेधो वक्तव्यो—नार्कुटाद्यर्थ'-

---

❀ अभिनव-चन्द्रिका ❀

अत्र निमित्तता तद्भावभावितामात्रेण। एवञ्च 'अन्तवद्भावेन पदान्तरेफस्य न विसर्गः' इतिवचनान्तरं न कल्पनीयं भवतीत्यपरमनुकूलम्। विस्तरस्तु परिभाषेन्दुचन्द्रिकायां द्रष्टव्य इति दिक्।

❀ चिदस्थिमाला ❀

त्यर्थः। लाघवादाह—**ज्ञापकेति**। झल इत्यपकर्षादेरप्युपलक्षणमिदम्। उक्तस्य सिद्धान्तभाष्याशयत्वे गौरवमिष्टापत्त्या परिहर्तुमाह—**अत एवेति**। तत्रैतदसञ्चारादेवेत्यर्थः। **लत्वेति**। अचीति वा लत्वे इत्यर्थः। आदिशब्दः प्रकारे, अत एव चक्र्यत्रेत्यादिसङ्गतिः। **रब्धमिति**। वार्तिककृतेति भावः। **अन्येति**। तत्रैतत्प्रवृत्तावित्यर्थः। वैलक्षण्यसत्त्वेन भेदमाह—**चक्र्यत्रेति**। सिद्धे च कैयटाद्युक्तिं खण्डयति—**यत्त्विति**। अपिर्विरोधे। तथा च युक्त एव स परिहार इति भावः।

चक्षुषामिति।—कर्तुः शेषत्वविवक्षया षष्ठी। उक्तार्थं द्रढयति—**अत एवोरणिति**। भाष्ये इत्यत्रान्वयः। नन्वेवमपि लक्ष्यैकचक्षुषा तदादर एवेति चेन्न, भगवदतिरिक्ते तत्त्वाभावाच्छास्त्रस्यासदादीन्प्रति प्रवृत्तेश्च। किञ्च पूर्वत्रेत्यस्य प्रत्यक्षत्वेन तस्य ततः प्राबल्यस्य लोकतन्त्रान्तरसिद्धत्वेन तेनास्या अनुमानिक्या बाधस्यै-

❀ ज्योत्स्ना ❀

ज्ञापकानुसरणं वा कर्तव्यमिति। 'उभयथर्क्षि'त्यादीत्यादिः। एवं त्वीं'दूतौ च सप्तम्यर्थे' 'दाधा घ्वदाप्' 'यूस्त्र्याख्यौ'वित्यादिनिर्देशेषु संयोगादिसंयोगान्तलोपादेरकरणा- 'न मुन' इत्यत्र नेति योगविभागे तात्पर्यग्राहकात् त्रिपाद्यां बहिरङ्गपरिभाषादृष्ट्याऽसिद्धत्वबोधनान्न काप्यनुपपत्तिः। अत एव बहिरङ्गपरिभाषाया अप्रवृत्तौ युक्तिमुक्त्वा 'अतः किं? अतोऽयुक्तः परिहारो 'न वा बहिरङ्गलक्षणत्वा'दिति पूर्वरूपं कृत्वाऽवहित्था प्रदर्शिता भगवता, न तु न युक्त इति नञः पृथगुपादानं स्पष्टं कृतम्। यद्व्याख्यत्प्रदीपकारः—'यदा तु लक्ष्यदर्शनवशाद्बहिरङ्गपरिभाषाश्रीयते—यथा चक्रेऽष्विष्टतो व्यवस्था, तदा युक्त एव परिहारो 'न वा बहिरङ्गलक्षणत्वा' दिती'ति। लक्ष्यस्यानुमेयस्य—नेति योगविभागस्य—दर्शनमनुमापकं यत्—'सप्तम्यर्थे' 'स्त्र्याख्यौ'वित्यादिनिर्देशस्तद्वशादित्यर्थः। ध्वनितं चेदं 'संयोगान्तस्य लोपः' इति सूत्रे भाष्ये—तदाह—**इति-**

❀ विषमपदविवृतिः ❀

युक्तिमुपजीव्य प्रवृत्तम्—अयुक्तोऽयं परिहारो न वा बहिरङ्गलक्षणत्वा'दिति भाष्यं शिथिलमेव, युक्तेः शैथिल्यात्। अत एव शिथिलयुक्तिमूलकस्यो 'भौ वाऽविशेषा'दिति कात्यायनसूत्रस्याननुष्ठापकलक्षणशैथिल्यं जैमिनिनोक्तम्। 'उभावाग्नेयाग्नीषोमीयपुरोडाशौ चतुर्धा कर्तव्यावविशेषात्, 'आग्नेयं चतुर्धा करोती'ति श्रुतौ अग्निदेवताकपुरोडाशे चतुर्धाकरणस्योक्तत्वेनोभयोरपि पुरोडाशयोरग्निदेवताकत्वाविशेषा'दिति तत्सूत्रार्थः। तत्र चाविशेषादिति युक्तिः शिथिला, ऐन्द्राग्ने चतुर्धाकरणवारणाय श्रुतावाग्नेयपदेनाग्निपर्याप्तदेवताकत्वस्यैव विवक्षितत्वात्। 'तस्य दोष'इति तु बहिरङ्गासिद्धित्वेन सिद्धौ व्यर्थमेव। एवञ्च तत्र-तत्र वचनानि न कार्याणीति महल्लाघवम्। तस्मादित्युत्तरस्येत्यादिज्ञापकं वा 'क्वचित्त्रिपाद्यां कार्यकालपक्षे बहिरङ्गपरिभाषा प्रवर्त्तत' इत्यर्थेऽनुवर्त्तव्यमिति न

मित्युक्तं भाष्ये इति दिक् ।

उपसर्गेणैवेति । तत्सञ्ज्ञायाः क्रियायोगनिमित्तत्वादित्यर्थः । यदर्थे क्रियारूपे प्रादीनामन्वयस्तं प्रत्येवोपसर्गत्वमिति भावः । प्रकृते च प्रत्यासत्त्या ऋकारादिनिमित्तोपसर्गग्रहणात्प्रगतः ऋद्धः—प्रर्द्ध इत्यत्र न । **पुनरिति ।** प्रकृतसूत्रे भाष्ये स्फुटमेतत् । **सुब्धाताविति ।** सुबन्तप्रकृतिके धाताविव्यर्थः । तुल्यास्यसूत्रे उपार्कारीयतीत्यादेरेतदुदाहरणत्वस्य

❀ अभिनव-चन्द्रिका ❀

क्रियायोगनिमित्तत्वादिति । जन्यबोधविषयीभूतक्रियाविशेषविषयकतात्पर्यग्राहकत्वे सति प्राद्यन्यतमत्वमुपसर्गत्वमिति स्वीकारेण जन्यत्वस्य जनकांशे नित्यसाकाङ्क्षत्वेन क्रियाविशेषविषयकबोधस्य धातुजन्यतया धातोराक्षेप इति भावः । **प्रत्यासत्त्येति ।** यज्जन्यबोधविषयीभूतक्रियाविशेषविषयकतात्पर्यग्राहकत्वं प्रादीनां तद्धातुनिरूपितोपसर्गत्वन्तेषामिति प्रगत ऋद्धः प्रर्द्ध इत्यादौ गमधातुजन्यबोधविषयीभूतक्रियाविशेषविषयकतात्पर्यग्राहकत्वेन प्रशब्दस्य गमधातुनिरूपितोपसर्गत्वमेव, नतु ऋधधातुनिरूपितोपसर्गत्वमिति न वृद्धिरिति भावः । **सुबन्तप्रकृतिकधाताविति ।** सुबन्तप्रकृतिकप्रत्ययान्त-

❀ चिदस्थिमाला ❀

वौचित्येन तथा वक्तुमेवाशक्यम् । एवञ्च तथा हरदत्ताद्यर्वाचीनानां तथोक्तिस्तत्र तत्रासङ्गतैवेति बोध्यं, तदाह—**दिगिति ।** पूर्वपक्षे हेतुमाह—**तत्संज्ञेति ।** नन्वेमपि सिद्धान्तासङ्गतिः, प्रगत ऋषभ प्रर्षभ इत्यादौ ऋकारादिधात्वयोगेऽप्यन्तर्भूतक्रियायोगेनोपर्गत्वसत्त्वेन तत्रानतिप्रसङ्गायोक्तरीत्या सामान्यतस्तदाक्षेपेऽपि प्रगत ऋच्छकः प्रर्च्छक इत्यादिवारणफलेकष्टधातुविशेषलाभाय च तस्याऽवश्यकत्वादत आह—**यदर्थे इति ।** तत्र क्रियायामित्येव वाच्ये योगग्रहणादिदं लब्धम् । अत्र यथा 'गतिकारकोपे'ति सूत्रस्य शब्देन्दुशेखरविरोधो न तथा तत्रैव परे त्वित्यादिना स्फुटम् । तत्र तद्वारणायाह—**प्रकृते चेति । रादीति ।** धात्वित्यर्थः । एवञ्च तत्र वारणेन वारणार्थतदुक्तार्थसाधकमनोरमादिग्रन्थस्याप्ययमेवार्थः । एतेनासम्बद्धत्वादयुक्तमिति रत्नाकराद्युक्तमपास्तमिति स्पष्टं भावप्रकाशे । **स्फुटमेतदिति ।** एतेन न माङ्योगे इतिसूत्रे भाष्येऽजादीनामटा सिद्धमित्युक्त्वाऽऽटश्चेतिसूत्रं विधायास्वपोहसतीत्यत्र वृद्धिमाशङ्क्य धाताविव्यपकृष्य समाहितत्वेन तस्य साफल्याद्योगविभागे मानाभाव इति परास्तम् । अत्रैव तथा स्फुटत्वात् । अत एव धाताविव्युभयोः शेष इति भाष्ये उक्तम्, अन्यथा तत्रैव कुर्यादिति न मिथो भाष्ययोर्विरोध इति बोध्यम् । **प्रकृतिके इति ।** सुबन्तप्रकृतिक-

❀ ज्योत्स्ना ❀

दिगिति । दिगर्थोऽत्र न दूषणस्य पुष्टिरपि तु भूषणस्येत्याहुः । **सुबन्तप्रकृतिके धाताविव्यर्थ इति ।** न तु सुबन्ते धातावृगित्यादाविव्यर्थः ।

❀ सदाशिवभट्टीयम् ❀

त्यपकर्षस्याप्युपलक्षणमिदम् । **दीक्षितङ्कटाक्षयति-तत्सञ्ज्ञयेत्यादिना ।** नन्वन्तर्भूतक्रियायोगनिमित्तकोपसर्गत्ववति प्रर्षभादौ योऽतिप्रसङ्गस्तद्भङ्गाय तदित्यत आह—**यदर्थेति ।** नन्वसति धातुग्रहणे ऋकारनिरूपितोपसर्गत्वस्याप्रसिद्धत्वात्प्राद्युपलक्षकं तत्स्यादित्यतिप्रसङ्ग एवात आह—**प्रत्यासत्त्येति ।** तन्निरूपितस्याप्रसिद्धत्वेपि तद्घटितनिरूपितग्रहणं प्रत्यासन्नमिति भावः । कृतेपि धातुग्रहणे यदर्थेत्युक्तार्थस्यावश्यकत्वं ध्वनयन्नृषभं त्यजति-**ऋद्ध इति ।** धातुग्रहणस्याटश्चेत्युत्तरार्थताया 'न माङ्योगे'इति सूत्रे भाष्य उक्तत्वेन कथमिति दूषणाभासम्परिहरति-**प्रकृतसूत्रेति । सुबन्तप्रकृतिकेति ।** तत्प्रकृतिकक्यजादिघटित इत्यर्थः ।

❀ विषमपदविवृतिः ❀

कश्चिद्दोष इत्याहुः । **सुबन्तप्रकृतिके इति ।** न तु सुबन्ते धाताविव्यर्थः । तथा सति ऋतधातोः

भाष्ये उक्तत्वात्। शास्त्रे सुबन्तस्य धातुप्रकृतित्वेनोक्ततया–तत्प्रकृतिके इति व्याख्यानमेवोचितम्। ऋषभस्य समीपमुपर्षभं, तदिच्छति–उपर्षभीयतीत्यत्र तु न वृद्धिः, उपेत्यस्यानुपसर्गत्वात्। अत्रापि धातावित्यनुवर्त्य वाक्यभेदेन व्याख्येयं, तेन सुब्धातावपि न प्रकृतिभावः। **प्रार्षभीयतीति**। अत्र 'शरोऽची'त्यस्यानुपन्यासेन व्यञ्जनात्परस्यै-

❀ अभिनव-चन्द्रिका ❀

धातावित्यर्थः। यथाश्रुतन्तु न युक्तं, धातौ सुबन्तप्रकृतिकत्वस्य क्वाप्यदृष्टत्वात्। **धातुप्रकृतिकत्वेनेति**। धातुसञ्ज्ञाप्रयोजकप्रत्ययप्रकृतिकत्वेनेत्यर्थः। अन्यथा धातौ प्रत्ययत्वस्याभावेन एतदुक्तिरस-

❀ चिदस्थिमाला ❀

क्यजादिघटिते इत्यर्थः। ननु सुबन्ते धातावित्यर्थ एव कुतो नात आह—**तुल्यास्येति**। नन्वेवमपि 'सुबन्तावयवके' इत्येवार्थो दण्डिरत्नाकराद्युक्तः कुतो नात आह—**शास्त्रे इति**। **धात्विति**। तत्सञ्ज्ञाप्रयोजकक्यजादिप्रकृतित्वेनेत्यर्थः। तथा चाक्लृप्तकल्पना नेति न्यायात्तथेति तदुक्तिरयुक्तैवेतिभावः। प्रर्षभतीत्यादावाचारक्विबन्ते प्रर्षभयतीत्यादावाख्यातण्यन्ते चेदं न प्रवर्तते, सुब्धातुत्वाभावात्। यत्तु दण्डी–सुबन्तस्य धातोरसम्भवान्न तथार्थः, यद्यपि ऋज गतावित्यादेः क्विपि तत्सम्भवस्तथापि तपरकरणव्यावर्त्यप्रसिद्धिरिति नामधातुरेवेह गृह्यते इति, तन्न, ॠकारशब्दादाचारक्विबन्तात्कर्तरि क्विपि व्यावर्त्यप्रसिद्धेः। यत्तु ऋतीत्यनुवृत्तं श्रूयमाणसुपीत्यस्यैव विशेषणं नाक्षिप्तधातोस्तेन ऋकारादिसुबन्तप्रकृतिके इत्यर्थः। तेन ऋषभस्य समीपमुपर्षभं, तदिच्छति–उपर्षभीयतीत्यत्र न वृद्धिः, ऋषभशब्दस्यान्तर्वर्तिविभक्त्या सुबन्तत्वेऽपि क्यचस्तत्प्रकृतिकत्वाभावात्, धातुसञ्ज्ञानिमित्ते प्रत्यये कृते उपसर्गस्य पृथक्करणाद्धातुत्वं परं 'ऋषभीय'शब्दस्यैव, अत एवोपार्षभीयतेत्यादावुपात्पूर्वं नाडिति, तन्न, पूर्वत्र क्लृप्तत्वेन तद्विशेषणत्वस्यैवौचित्यात्। धातुसञ्ज्ञाप्रयोजके प्रत्यये चिकीर्षिते उपसर्गसमानाकारपूर्वपदस्य पृथक्करणेन क्यचस्तत्प्रकृतिकत्वसत्त्वाच्च–अत्रापि आटि न दोषः। एवञ्च तत्र दोष एवात आह—**ऋषभेति**। **उपेत्येति**। 'क्यजन्तं प्रती'त्यादिः। **प्रार्षेति**। अत्राचोरिति न द्वित्वं, 'शरोऽची'ति निषेधात्, नन्वेवं तदुपन्यासौचित्यमत आह—**अत्रेति**।

❀ ज्योत्स्ना ❀

धातुप्रकृतिकत्वेनोक्ततयेति। 'सुपआत्मन' इत्यादिनेत्यर्थः।

❀ सदाशिवभट्टीयम् ❀

सुबन्तावयव इत्येव कुतो नोक्तमत आह–**शास्त्र इति**। **धातुप्रकृतिकत्वेनेति**। तत्सञ्ज्ञाप्रयोजकक्यजादिप्रकृतिकत्वेनेत्यर्थः। सूत्रे सुप्पदं लक्षणिकमिति भावः। उपार्षभपुरुषतीत्यत्र तु नित्यमेव वृद्धिः।

ननु 'आत' इति सूत्रे वक्ष्यमाणरीत्या सुबन्तोपश्लिष्टः सन्य ऋकारादिधातूपश्लिष्ट इत्यर्थात् सुबन्तावयवकधातावित्यर्थो न्यायसिद्ध इति लक्षणैव निर्मूलेति चेन्न। तथा सति सुबन्तधातूभयनिरूपितोसर्गत्वस्य उपार्क् इत्यादौ सम्भवेन तत्रैव स्यादिति तुल्यास्यसूत्रभाष्यासङ्गत्या तस्यैव मानत्वात्। नहि सति सम्भवे तदघटितनिरूपितं ग्रहीतुमुचितम्। उक्तार्थे लक्षणा, अवयवलक्षणेत्यत्र भाष्यानुग्रहः परश्चिन्तनीयः।

ऋतीति सुबन्तविशेषणमित्युपर्षभीयतीत्यस्य सिद्धिरित्युक्तङ्खण्डयति–**ऋषभेति**। ऋकारादेर्धातुत्वेन त्वदुक्तार्थासङ्गतेरित्यपि बोध्यम्। **अत्रापि धाताविति**। अत एव ह्रस्वादुपसर्गाद्वृद्धिर्विप्रतिषेधेनेति वार्तिकं सामान्यतः सूत्रद्वयविषयकतया प्रवृत्तं धातावित्येतत्सामर्थ्यात्प्रत्याख्यातम्। ऋत्यक इति सूत्रे भाष्ये उपार्च्छतीति तदुदाहरणन्तु वा सुपीत्युदाहरणोपलक्षणम्। न माङ्योग इति सूत्रस्थस्य धातावित्यु-

❀ विषमपदविवृतिः ❀

क्विपि सुप्येव प्रवृत्तिः स्यात्। **उपर्षभीयतीति**। नन्वन्तरङ्गत्वादेवात्र पूर्वं गुणस्य प्रवृत्त्या न वृद्धिरिति चेन्न। उपसर्गसमानाकारं पूर्वपदं धातुसञ्ज्ञाप्रयोजके प्रत्यये चिकीर्षिते पृथक् क्रियत

कस्यानेकस्य वोच्चारणे विशेषाभावेन 'अचो रहाभ्या'मित्यस्य तन्निषेधस्य चानावश्यकता सूचिता । **वाक्यभेदेनेति** । इदं वृत्तौ स्पष्टं, भाष्ये तु न दृश्यते । 'एवे चे'तिवार्त्तिकं सूत्रे धातावित्यनुवृत्तेरारब्धम् । अवधारणं—नियमः । एवशब्दस्य द्योत्यमर्थद्वयम्—अवधारणमसम्भवरूपानवक्लृप्त्यादि च, तयोरन्त्योऽत्र एवशब्दार्थ इत्यभिप्रेत्याह-**अनक्लृप्तावेवेति** । क्वेव भोक्ष्यसे ? इत्युक्तेः—स्थलसङ्कीर्णत्वादिना नास्ति सम्भवस्तत्र भोजनस्येति गम्यते ।

अचोऽन्त्या । 'अच' इति निर्धारणे षष्ठी । अन्ते भवोऽन्त्यः । 'अन्त्यादी'ति

❀ **अभिनव-चन्द्रिका** ❀

ज्ञता स्यात् । **तत्प्रकृतिक इति** । धातुसञ्ज्ञाप्रयोजकप्रत्ययप्रकृतिक इत्यर्थः । **निर्धारणे षष्ठीति** । स्वार्थसमुदायस्य 'स्वघटकत्व', 'स्वघटकान्त्याजितरयावदजवृत्त्यन्तत्ववत्त्वै'तदुभयसम्बन्धेन अचि, 'स्वघटकवृत्तित्व', 'स्वघटकान्त्याजितरयावदजवृत्तित्वै'तदुभयसम्बन्धेन अन्त्यत्वे वा अन्वयः । **गमकत्वादिति** । बोधजननसमर्थत्वादित्यर्थः । अन्यत्वस्य निरूपकांशे नित्यसाकाङ्क्षत्वेन यत्किञ्चित्पदार्थनिष्ठप्रकारतानिरूपितनित्यसाकाङ्क्षेतरनिष्ठविशेष्यतासम्बन्धेन शाब्दबुद्धित्वावच्छिन्नम्प्रति

❀ **चिदस्थिमाला** ❀

स्यैकस्येति । व्यञ्जनस्येत्यर्थः । **न दृश्यत इति** । एतेनौतोमिति सूत्रे भाष्ये ध्वनितमित्यपास्तम् । तथा-च मूलादि चिन्त्यमेवेति भावः । **अनुवृत्तेरिति** । एतदारम्भसामर्थ्यादोम्यारम्भाच्च मण्डूकप्लुत्येति भावः । निपातानां द्योतकत्वाशयेनाह—**द्योत्यमिति** । षष्ठ्यन्तस्य विशिष्टेऽन्वयः । असम्भवरूपत्वमनवक्लृप्तेरेव विशेषणम् । आदिनाऽमर्षादिपरिग्रहः । तत्राद्ये निषेधादाह—**तयोरिति** । ननु कथं ततोऽसम्भवप्रतीतिस्तद्बोधकाभावादत आह—**क्वेति** । **षष्ठीति** । सौत्रमेकवचनं, तदाह—मूलेऽचां मध्ये इति । एतेन जातावेकवचनमिति दण्डयुक्तमपास्तम् । अन्यत्रापि तस्य प्रवृत्त्यापत्तेः । नन्वन्त्यशब्दस्य सापेक्षत्वात्कथं समासोत आह—**गमकेति** । गुरुकुलमितिवन्नित्यसापेक्षत्वादिति भावः । मूले **सीमन्त** इति—नान्तस्य डाबन्तस्य ग्रहणं, षष्ठीतत्पुरुषः । **केशेति** । विलक्षणरचनाविशिष्टकेशेष्वित्यर्थः । तथा च वार्तिकं—**सीमान्तः केशेष्विति** । अपत्ये इञो

❀ **ज्योत्स्ना** ❀

उच्चारणे विशेषाभावेनेति । व्यञ्जनानामज्व्यतिरेकेण कालान्तरं नास्तीति मतेनेदम् वस्तुतस्तत्तत्सूत्र-

❀ **सदाशिवभट्टीयम्** ❀

भयोः शेष' इति भाष्यस्य तूपसर्गाद्वृद्ध्योरित्यादिरर्थ इति भावः । **विशेषाभावेनेति** । इदमसिद्धवदादिसूत्रेषु भाष्ये स्पष्टम् । **न दृश्यत इति** । यत्तु 'ओतोम्शसो'रिति सूत्रे उद्योते—केचित्त्वत्र सूत्रे सुब्ग्रहणमनुवर्तते वाग्रहणं निवृत्तमिति भाष्ये उक्तं तत्र निवृत्तपदस्वारस्यादपि स्वरितत्वमस्त्येव, तत्फलन्त्वेङि पररूपमित्यत्रानुवृत्य वाक्यभेदेन व्याख्यानमित्याहुरित्याद्युक्तं तदरुचिग्रस्तमिति स्पष्टमेव, तथा सत्यत्र न सम्बध्यत इत्येव ब्रूयादुत्तरत्रावश्यकसम्बन्धस्य निवृत्त्ययोगात्, निवृत्तस्य सम्बन्धायोगात्, तस्मादननुवृत्तिरेव । निवृत्तिस्तत्र भाष्यार्थ इति तत्रैवोद्योते स्पष्टम् । **धातावित्यनुवृत्तेरिति** । ननु विश्वौह इत्यादौ संप्रसारणे गुणे एज्लक्षणवृद्ध्यैव सिद्धावूड्विधानं बहिरङ्गपरिभाषां ज्ञापयतीति वाह ऊठ्सूत्रस्थभाष्यादुपसर्गादित्यस्य मण्डूकानुवृत्तावपि धातावित्यनुवृत्तिः किमर्था इति चेन्न, तथा सति एङ्निरूपितोपसर्गत्वाप्रसिध्या प्राद्युपलक्षको माभूदित्येतदर्थत्वात् । उचितं तूपसर्गादित्यनुवृत्तेरित्येव । क्लृप्त्यादीत्यादिनाप्यर्थः । **अचों** । **षष्ठीति** । यावदन्त्यपदस्याव-

❀ **विषमपदविवृतिः** ❀

इत्यङ्गीकारेणादोषात् । एवे चेत्यत्र वक्तव्यपदाभावेन सूत्रत्वभ्रमं निराकर्तुमाह—**वार्तिकमिति** । **गमकत्वादिति** । वृत्त्यघटकपदार्थान्वितस्वार्थावगमकत्वेन शिष्टप्रयुक्तत्वादित्यर्थः ।

गमकत्वाद्बहुव्रीहिः। **मार्त्तण्ड इति**। मृतण्डादागतो-मार्तण्डः। अण्विषये एव पररूपम्। ननु मार्त्तशब्दान्त्याच्तकाराकारः स आदिर्यस्येत्यन्यपदार्थो दुर्लभ इति चेन्न। एकस्मिन्नेव समुदायरूपत्वारोपेण तदवयवत्वारोपेण च तदुपपत्तेः। एतन्मूलकमेव 'व्यपदेशिवदेकस्मि'न्निति पठ्यते इत्यलम्। वस्तुत आरोपस्य नात्रोपयोगः,

❀ अभिनव-चन्द्रिका ❀

मुख्यविशेष्यतासम्बन्धेनोपस्थितिः कारणमिति कार्यकारणभावमूलक-'पदार्थः पदार्थेनान्वेति, न तु पदार्थैकदेशेने'तिन्यायस्याऽप्रवृत्तेरिति भावः। **आरोपस्येति**।'विपर्ययो मिथ्याज्ञानमतद्रूपप्रतिष्ठ'मिति पतञ्जलिलक्षितविपर्ययात्मकज्ञानस्येत्यर्थः। तच्च नैयायिकमत इवान्यथाख्यातिरेव। तदभाववद्विशेष्यकतत्प्रकारकं ज्ञानमिति यावत्। यथा रामायेत्यादौ सुप्त्वाभाववत्-'य'-शब्दविशेष्यकं

❀ चिदस्थिमाला ❀

बाधकत्वादिदमर्थं छस्य बाधकत्वादाह—**मृतण्डादिति**। ननु मृताण्डादिति वाच्ये मृतण्डादिति कथमत आह-**अण्विषये एवेति**। विषयता च भावित्वेन, एवञ्च मृतण्डेति कृतेऽणि आदिवृद्धिरिति भावः। सिद्धप्रयोगाशयेनाह—**मार्तेति**। एवञ्च टिसञ्ज्ञाया एवाभावे कथं पररूपमिति भावः। आदित्वोपपत्त्यै आह—**तदवयवेति**। **एतदिति**। समुदायरूपत्वाद्यारोपमूलकं परिभाषारूपं वचनमित्यर्थः। एवेन मूलान्तरादिव्यवच्छेदः। यथैकस्मिन् पुत्रे तत्तद्धर्मारोपेण युगपज्ज्येष्ठत्वादिव्यवहारो यथा च 'शिलापुत्रकस्य शरीर'-मित्यादावेकस्मिन् शिलापुत्रके वयःकृतावस्थानामपि प्राणिनिष्ठत्वेन वस्तुतस्तत्राभावादारोपितानेकावस्थाभिरनेकावस्थाविशिष्टशिलापुत्रकत्वैकावस्थाविशिष्टशिलापुत्रकत्वादिरूपसमुदायरूपत्वाद्यारोपेणानेकावस्थाविशिष्टशिलापुत्रकस्यैकावस्थाविशिष्टमिदं शरीरमवयव इत्यादिव्यवहारो लोके तथेयायेत्यादावेकाच्त्वादिव्यवहारोपपत्तिरिति लोकन्यायसिद्धमेवेदमिति यावत्। अत एवाशास्त्रीयस्याप्यनेनातिदेशोऽत एव भवतीत्यादावङ्गत्वादिसिद्धिस्तथा चैतदर्थं तथावश्यं वाच्ये इयायेत्यादावप्ययमेव प्रकार इति तदर्थं कैयटादेरन्यथोक्तिरयुक्तैवेति स्पष्टं परिभाषेन्दुशेखरादौ। सजातीयसहायशून्ये मुख्यव्यवहारवत्कार्यं भव,भवतीति परिभाषार्थस्तदाह—**इत्यलमिति**। सकलप्राचीनग्रन्थासङ्गतिं ध्वनयन्सिद्धान्तमाह—**वस्तुत इति**। **शब्देति**।

❀ ज्योत्स्ना ❀

प्रामाण्याद्यञ्जनानामपि पृथक्कालान्तरमस्त्येवेति संस्कर्तेत्युदाहरणे वक्ष्यते। **मृतण्डादागत इति**। 'मृतेऽण्डे भवो मार्तण्ड' इति तु व्युत्पत्तिः प्रदर्शयितुं युक्ता। 'मृतेऽण्ड एष एतस्मिन्यदभूत्ततो मार्तण्ड इति व्यपदेश' इति तन्निर्वचनस्य भागवते प्रदर्शितत्वात्। 'मृते अचेतने एष सूर्यो वैराजरूपेण यस्मात्प्रविष्ट' इति तद्व्याचष्टे—श्रीधरः। अण्डं=ब्रह्माण्डं। 'महाभारते मोक्षधर्मेषु बुधशापवशाददितेरुदरस्थितो गर्भो निश्चितनो ममार, बहिर्निःसृतस्तु पश्चाच्चैतन्यमवापेति मार्तण्ड-

❀ सदाशिवभट्टीयम् ❀

यविनं प्रति साकाङ्क्षत्वेपि निर्धारणावधिम्प्रत्यनाकाङ्क्षत्वादित्याहुः। **मृतण्डादागत इति**। भागवतादिप्रसिद्धमपि भवरूपार्थं भगवतोऽनित्यत्वप्रसङ्गात्त्यक्त्वा आगत इत्युक्तम्। अलमर्थः परिभाषेन्दुशेखरादवसेयः।

❀ वरवर्णिनी ❀

वस्तुत इति। केचित्तु—आरोपविकल्पयोः पर्यायशब्दत्वमेव, तथाहि—योगमते प्रमा-विपर्यय-विकल्पभेदेन वृत्तिस्त्रिविधा। तत्र-'स्वात्मकज्ञान-तद्विशेष्य-तद्वाचकशब्दै-तन्त्रितयावलम्बिनी यथार्थज्ञानात्मिका'—**प्रमा**। 'प्रमादिबाधकप्रतिबध्यो भ्रमाख्यस्तदभाववति तत्प्रकारकज्ञानात्मको—**विपर्ययः**, 'इच्छाजन्यः प्रमादिप्रतिबन्धकाप्रतिबध्य आरोपापरपर्यायस्तदभाववति तत्प्रकारकज्ञानरूपो' **विकल्पः**, -इति सिद्धान्तादतः शेखरोऽयमसङ्गत-इत्याहुः। **योगागमविशारदास्तु**-'प्रमाण-विपर्यय-विकल्प-निद्रा-स्मृत्याख्यासु-पञ्चसु वृत्तिषु—'स्व-स्वविषयीभूतार्थवाचकशब्दोभयावलम्बिनी, रजतत्व-समवाय-रजतादि-

'शब्दज्ञानानुपाती वस्तुशून्यो विकल्प' इति पतञ्जल्युक्तेरर्थाभावेऽपि विकल्पात्मकं ज्ञानमत्र, तदपि लक्ष्यानुरोधाच्छास्त्रप्रवृत्त्युपयोगीति बोध्यम्। 'पतञ्जलि'रिति तु—अञ्जलेः

❀ अभिनव-चन्द्रिका ❀

सुत्वप्रकारकं ज्ञानं यथा। **विकल्पात्मकज्ञानमिति**। वस्त्वविषयकत्वे सति शब्दज्ञानोभयविषयकं ज्ञानमित्यर्थः। यथा पुरुषस्य चैतन्यम्, राहोश्शिरः, वन्ध्यापुत्र इत्यादिज्ञानम्। एवं रामायेत्यादौ यञादिसुब्रूपवस्तुशून्यत्वेऽपि 'यशब्दः यञादिसु'बितिशब्दज्ञानोभयमात्रविषयकज्ञानेनैव दीर्घः सिध्यतीति आरोपस्य नोपयोग इति भावः। ननु समासार्थं पतञ्जलिशब्दस्य मयूरव्यंसकादौ पाठस्यावश्यकत्वेन तत्रैव निपातनादितशब्दस्य लोपेनैव तद्रूपोपपत्तौ शकन्ध्वादिषु एतत्पाठोऽनावश्यक इत्यभिप्रेत्याह—**इति विग्रह इति**।

❀ चिदस्थिमाला ❀

'यत' इत्यादिः। पुंप्रयत्नेनावश्यनिरोद्धव्यप्रमाणविपर्ययविकल्पनिद्रास्मृतिरूपपञ्चवृत्तीनां मध्ये विकल्पलक्षणमिदं। शब्दश्च ज्ञानञ्च शब्दज्ञाने ते अनुपातिनी=जनके यस्य स—शब्दज्ञानानुपाती, श्रोतुः श्रूयमाणशब्दहेतुकः—प्रयोक्तुः पदार्थोपस्थितिहेतुको बाधनिश्चयेऽपि कलहादौ शशशृङ्गादिप्रयोगे उत्प्रेक्षादौ च सर्वानुभवसिद्धश्च वस्तुशून्यो=बाधितविषयःप्रत्ययो विकल्पाख्या वृत्तिरित्यर्थः। अपिना प्रमाणसमुच्चयः। यथा चैतत्तथाऽन्यत्र स्पष्टं सकलम्। नन्वेवमपि पतञ्जलिरित्यस्यासिद्धिस्तत्र द्विविधज्ञानेनानिर्वाहान्मनीषेत्यादौ प्रमाणेन शकन्धुरित्यादौ विकल्पज्ञानेन निर्वाहोऽतः सिद्धान्तप्रसङ्गात्तत्र—सिद्धान्तं सकलग्रन्थासङ्गतिं ध्वनयन् सिंहावलोकनन्यायेनाह—**पतञ्जलिरिति**। अत एव तुः। नन्वेवं निपातनानां बाधकत्वस्यैवाङ्गी-

❀ ज्योत्स्ना ❀

पदव्युत्पत्तिः प्रदर्शिता। मृतेऽण्डे जातो मृत्वा जात इत्यर्थ इति तद्व्याख्यातारः। **पतञ्जल्युक्तेरिति**। पतञ्जलिप्रणीतयोगसूत्ररूपत्वादेतस्य तथात्वम्। शब्दज्ञानमनु पश्चात्पतति=जायते—शब्दश्रवणानन्तरं यज्जायत इत्यर्थः। 'शब्दज्ञानानुपाती'त्यनेन भ्रमस्य व्यावृत्तिः, 'वस्तुशून्य' इत्यनेन तु प्रमायाः।

❀ सदाशिवभट्टीयम् ❀

शब्दज्ञानानुपातीति। पुंप्रयत्नेनावश्यं निरोद्धव्यप्रमाणविपर्ययविकल्पनिद्रास्मृतिरूपपञ्चवृत्तीनां मध्ये विकल्पलक्षणमिदं, शब्दश्च ज्ञानं च शब्दज्ञाने तेऽनुपातिनी जनके यस्य सः, श्रोतुः श्रूयमाणशब्दहेतुकः प्रयोक्तुः पदार्थोपस्थितिहेतुको बाधनिश्चयेऽपि कलहादौ शशशृङ्गादिप्रयोगे उत्प्रेक्षादौ च सर्वानुभवसिद्धश्च वस्तुशून्यो बाधितविषयः प्रत्ययो विकल्पाख्या वृत्तिरित्यर्थः। 'शब्दज्ञाने'त्यादि-'उक्ते'रित्यन्तस्य मध्यमणिन्यायेन—उपयोगाऽभावे तादृशज्ञानसत्तायां च हेतुत्वेनान्वयः। अत्र=व्याकरणे। यत इति शेषो वा इत्याहुः। सिंहावलोकितन्यायेन विशेषं वक्तुमाह—**पतञ्जलिरितीति**। एतेन पतन्नञ्जलेरिति विगृह्णन् रत्ना-

❀ विषमपदविवृतिः ❀

शब्दज्ञानानुपातीति। शब्दज्ञानोत्तरमेव जायमान इत्यर्थः। पतञ्जलिना—वृत्तयः—पञ्च, तस्य

❀ वरवर्णिनी ❀

बाह्यपदार्थावलम्बिनी, बौद्धपदार्थानवलम्बिनी, रजते—इदं रजतमित्याकारिका यथार्था वृत्तिः'—**प्रमा**। अन्यवृत्तिरजतत्वादिधर्मपुरस्कारेण शुक्त्यादिधर्मिका-शुक्ताविदं रजतमित्याकारिकाभ्रमात्मकज्ञानरूपाऽपरा **विपर्यया**ख्या वृत्तिः। शब्दज्ञानानवगाहिनी बाह्यवस्त्वनवगाहिनी बौद्धपदार्थमात्रावगाहिनी—'बन्ध्यापुत्रः' 'शशशृङ्ग'-मित्याद्याकारिका **विकल्पाख्या** वृत्तिः। इयं द्विधा—इच्छाजन्या बाधकाबाध्या, अन्यथाजनिता बाधकबाध्या-चेति। तत्राद्या तार्किकै**रारोप** इत्युच्यते। एवञ्चैकस्मिन्नप्यकारे समुदायत्वारोपेणान्यपदार्थः सुलभ' इत्याहुः। इतोऽधिकं **श्रीबालशास्त्रि**चरणबद्धे **जटाजूटे**, तदनुसारिण्यां **श्रीस्नेहिरामशास्त्रि**चरणकालितायां **त्रिपुरसुन्दर्यां**ञ्चानुसन्धेयम्।

पतित इति विग्रहे मयूरव्यंसकादित्वात्समासे तत्रैव निपातनादितशब्दस्य लोपे पृषोदरादित्वाद्वा तल्लोपे साधु। गोनर्ददेशे कस्य चिदृषेरञ्जलेः सन्ध्याकरणसमये पतित इत्यैतिह्यात्।

ओत्वोष्ठयोः। अत्र समर्थपरिभाषा नोपतिष्ठते, 'समासेऽङ्गुलेः सङ्ग' इत्यादौ

❀ अभिनव-चन्द्रिका ❀

अनेन पतन्ति अञ्जलयो यस्मिन्नमस्कायत्वादिति विग्रहे तु शकन्ध्वादिषु पाठ आवश्यक इति सूचितम्। अञ्जलेः पतित इति विग्रहे प्रमाणन्दर्शयितुमाह—**'ऐतिह्यादिति**। **परिभाषाप्रवृत्तिस्वीका-**

❀ चिदस्थिमाला ❀

कारात्तथा प्रयोगो न स्यादत आह—**पृषोदेति**। एवञ्चास्येदमुदाहरणमेव नेति मूलादि चिन्त्यमेवेति भावः। ननु तथैव कुतो नात आह—**गोनर्देति**। पर्वतरूपे इत्यर्थः। अत एव भगवान्भाष्यकारः पतञ्जलिर्गोनर्दीयपदवाच्य इति तत्र-तत्र भाष्ये एव स्फुटम्। असर्यमाणवक्तृकत्वादाह—**ऐतिह्यादिति**। यत्तु 'समर्थः पदविधि'रित्यस्योद्देश्यकोटौ पदगन्धसत्त्वे प्रवृत्तेरङ्गीकारेणैकार्थीभावपरतया भाष्यादौ तस्या-व्याख्यानेन चौत्वादेरवर्णान्तस्य समासे एवैकार्थीभावसम्भवेन तयैव समासे प्रवृत्तिसिद्धौ समासग्रहणं व्यर्थमिति तत्खण्डयति—**अत्र समर्थेति**। विसर्गप्राग्भागानुकरणम्। परिष्कृतं दोषमाह—**समासेऽ-**

❀ ज्योत्स्ना ❀

इतशब्दस्य लोप इति। एवन्तु शकन्ध्वादिगणेऽस्य पाठे प्रयोजनं चिन्त्यम्। तशब्दस्य लोप

❀ सदाशिवभट्टीयम् ❀

करः कटाक्षितो, लडर्थस्य बाधात्। **तल्लोपे इति**। इदमुपलक्षणं जश्त्वाभावस्यापि, एवञ्चात्र गणेऽस्य पाठोऽनार्ष इति भावः। यद्वा 'इतशब्दस्य लोप' इत्यत्राकार उच्चारणार्थः, एवञ्चेद्भागस्य लोपेऽका-रस्य त्वनेन पररूपे तस्य स्थानित्वान्न जश्त्वम्। अन्यथा 'पाठोऽनार्ष' इति साक्षादेव वदेत्। समासार्थं मयूरव्यंसकादित्वस्यावश्यकत्वेन पृषोदरादित्वकल्पनं किमभिप्रेत्येति तु चिन्त्यम्।

अन्ये तु मयूरव्यंसकादित्वात्समासेऽत्रपाठादितशब्दस्य पररूपेऽर्द्धाधिकविकारेण पदत्वाभावाज्जश्त्वा-भावे सिद्धमिदम्, नह्यत्र टेरित्युपात्तमस्तीत्याहुः। केचित्तु—मयूरव्यंसकादित्वादेव तितशब्दस्य-तमादेशमाहुः। **ओत्वोष्ठ**। ओष्ठस्य परनिपातः—प्रकरणानित्यत्वात्। समासग्रहणवैयर्थ्यं परि-हरति—**अत्र समेति**। वस्तुतस्तु तदुपस्थानेपि न तद्वैयर्थ्यङ्काल ओष्ठीयितुं शक्तस्य ओष्ठीयितुमित्या-दावुपपदेन क्यजन्तप्रकृतिकतुमुनन्तस्यैकार्थीभावसत्त्वेन तत्रातिप्रसङ्गवारणेन तत्सार्थक्यात्। तदयं भावः—अत्र तदुपस्थाने यत्रावर्णस्य ओष्ठादिना सामर्थ्यङ्कुम्भकारोष्ठ औपगवोष्ठ इत्यादौ—तत्रैव समासः

❀ विषमपदविवृतिः ❀

इत्युपक्रम्यारोपात्पृथग्विकल्पात्मिकां वृत्तिमुक्त्वा तल्लक्षणमिदं सूत्रं प्रणीतम्। तदुदाहरणं तु 'चैत-न्यस्य स्वरूपं' 'घटस्य स्वरूप'मित्युक्तं तद्भाष्यकृता। तत्र हि चैतन्यस्वरूपपदार्थयोरभेदेन तत्सम्बन्धरूपं यद्वस्तु तच्छून्यमविद्यमानं यस्य विषयः स विकल्प इत्यर्थः। अत्र मार्तण्ड इत्युदाहरणविषये'ऽचोन्त्या-दि टी'ति शास्त्रं विकल्पात्मकज्ञानजनकमिति तात्पर्यम्। परे तु सङ्ग्राहकशास्त्रस्यान्यत्र चारिर्थ्या-देतद्विषये वचनाभाव उपप्लव एव न स्यात्, विकल्पात्मकज्ञानजननं तु दूरेतराम्। किञ्च सम्बन्धांशे एव विकल्पात्मकं ज्ञानं, न तु आदित्वांशे। विकल्पात्मकज्ञानस्य शास्त्रप्रवृत्त्युपयोगित्वञ्च निर्मूलम्। अत एवाद्यन्तवत्सूत्रे भाष्ये'ऽपूर्वानुत्तरत्वलक्षणत्वादाद्यन्तयोः सिद्धमेकस्मिन्नर्थे आद्यन्त-वद्भावेने'ति वार्तिकमतमुपन्यस्य 'गोनर्दीयस्त्वाह—सत्यमेतत्सति त्वन्यस्मिन्निति स्वमतेन सूत्रारम्भ एव कार्य' इत्युक्तमित्याहुः। **इति शब्दलोप इति**। 'इति जश्त्वाभावे चे'त्यपि पूरणीयम्।

सन्ध्याकरणसमय इति। सर्परूपेणेति शेषः। **ओत्वोष्ठयोः**। ननु अत्र समर्थपरिभाषोपस्थिता-

समासग्रहणेन 'पदविधि'रिति सूत्रस्वरसेन, भाष्यादिस्वारस्येन च पदत्वेन सुबन्तत्वेन वा यत्र साक्षादुद्देश्यता तत्रैवैतत्परिभाषाप्रवृत्तिस्वीकारात् । ओत्वोष्ठादिमात्रस्य पदत्वाभावात् । अवर्णादोत्वोष्ठयोरचि तद्घटितसमासे इत्यर्था'द्दन्त्योष्ठ्यो वः स्मृत' इति प्रयोगसिद्धिः । अन्यथा प्रत्यासत्त्यौत्वाद्युत्तरपदकसमास एव प्रवृत्त्यापत्तौ तदसङ्गतिः स्पष्टैव । ओतुर्बिडालः ।

❀ अभिनव-चन्द्रिका ❀

रादिति । पदसञ्ज्ञाप्रयोजकप्रत्ययोत्पत्तिप्रयोजकसञ्ज्ञाशास्त्रीयोद्देश्यतावच्छेदकरूपावच्छिन्नसम्पादकत्वरूपपदविधित्वस्य ओत्वोष्ठयोरित्यत्राभावादिति भावः। अत एव 'समासेऽङ्गुलेः सङ्ग' इत्यत्र

❀ चिदस्थिमाला ❀

ङ्गुलेरिति । नन्वस्तु तस्यापि वैयर्थ्यमत आह—पदेति । स्वरसशब्दो धर्मपरः । नन्वेवमपि सुबन्तत्वेनेत्यस्य कथं लाभोऽत आह—भाष्यादिस्वारस्येन चेति । सूत्रभेदेन विकल्पः । साक्षादित्यनेन कोऽप्यन्तर्गतत्वनिरासः। नन्वत्र तत्त्वेनोद्देश्यता कुतो नात आह—ओत्वोष्ठादीति । मात्रपदेन सुबादिव्यावृत्तिस्तत्वेनैव मूलादिमते निमित्तत्वस्यात्रोल्लेखात् । एतेनोक्तयुक्त्यैव समासे लब्धे समासग्रहणमोत्वोष्ठयोरुत्तरपदत्वे एव प्रवृत्त्यर्थम्, इदानीं तेनोत्तरपदाक्षेपात्तद्रूपयोरुत्तरपदयोरित्यर्थात्पदविधित्वमपीत्यन्यदेतदित्यपास्तम्, उक्तयुक्तेः, दन्त्योष्ठ्य इत्यादिप्रयोगविरोधाच्च, तदेतद्धनयन् सिद्धान्तरीत्याह—अवर्णादिति । घटितत्वञ्च यथाकथञ्चिन्नतूत्तरपदत्वेनैवेति भावस्तदाह—दन्त्य इति । अन्यथा=तद्घटितेत्याद्यर्थानङ्गीकारे । तथार्थस्यावश्यकत्वादाह—प्रत्येति । त्यापत्तौ=प्रवृत्तिप्राप्तौ । 'बिडालसुतौष्ठव्रणस्ते' इत्यादौ वृद्धिरेवेत्यपि

❀ ज्योत्स्ना ❀

इति तु वक्तुमुचितम् । तत्रैव तत्परिभाषाप्रवृत्तिस्वीकारादिति । एतेनौ'त्वोष्ठयोः समासेवे'त्यत्र समासग्रहणवैयर्थ्यशङ्का प्रत्युक्ता । प्रयोगसिद्धिरिति । 'दन्तोष्ठ्य' इति तु प्रचुरः पाठस्तत्र कृत-

❀ सदाशिवभट्टीयम् ❀

स्यान्नतु दन्त्योष्ठ्यादौ पदादेरकारस्यानर्थकत्वेन सामर्थ्याभावादिति समासविधावव्याप्त्या 'सर्वस्य द्वे' इत्यादावतिव्याप्त्याह—सुबन्तत्वेन चेति । इदं चाभ्युपेत्य । वस्तुतः पदविधित्वं । वस्तुतस्तदेव नेत्याह—ओत्वोष्ठादीति । मात्रशब्दः कात्स्न्र्ये । भ्यामादौ तत्त्वेपि जसादिषु तदभावादिति भावः । अत्र

❀ विषमपदविवृतिः ❀

वस्य वासुदेवस्यौष्ठ इति समासे एवेदं स्यान्न बिम्बोष्ठ इत्यादौ, तत्राकारस्यानर्थकत्वेनोष्ठेनासामर्थ्यादित्याशङ्क्याह—अत्र समर्थेति । पदत्वेनेति । एतस्योदाहरणं मृग्यम् । प्रत्युत 'युष्मदस्मदोः षष्ठी'त्यादिसूत्रेषु 'पदस्य पदा'दित्यधिकारेणैतत्परिभाषाप्रवृत्तावसामर्थ्ये आदेशानापत्तिः । परमव इत्यादावेव स्यात्प्रवृत्त्यापत्तिश्चेत्यपि बोध्यम् । सुबन्तत्वेनेति । तिङन्तत्वेन चेत्यपि बोध्यम् । तेना'ख्यातमाख्यातेने'त्यादावप्येतत्परिभाषोपस्थितिः सिद्धा । तद्धितविधौ प्रातिपदिकत्वेनोद्देश्यत्वेऽपि 'घकालतने'ष्वित्यादिज्ञापकेन 'स्वार्थे परिपूर्ण'मिति न्यायेन चार्थिकं सुबन्तत्वेनोद्देश्यत्वं, नहि शब्दस्तेन रूपेणोद्देश्यत्वे एव तत्प्रवृत्तिरित्यत्र किञ्चिन्मानम् । तत्रैवेति । तेना'न्यादितरे'त्यादौ न तत्प्रवृत्तिः । ओत्वोष्ठादिमात्रस्येति । 'ओत्वोष्ठयो'रादिरोकारस्तन्मात्रस्य पदत्वाभावादित्यर्थः । एतदुत्तरं—'तदुत्तरपदके समासे इत्यर्थासम्भवा'दिति शेषः । तद्घटितेति । अवर्णौत्वोष्ठसम्बन्ध्यच्—एतदुभयघटितेत्यर्थः । अन्यथेति । अजाद्योरोत्वोष्ठयोरित्यर्थे इत्यर्थः । अयम्भावः—

ओमाङोः । अत्र एङीति नानुवर्त्तते, तेनेषदर्थकाऽऽङा सह ऋषभशब्दस्य समासेऽद्य–अर्षभ इत्यत्र पररूपेऽद्यर्षभसिद्धिः । न चात्र परत्वाद्दीर्घप्रसङ्गः, प्रतिपदविधित्वञ्च निरवकाशत्वे सत्येव बाधकत्वे प्रयोजकमिदञ्च मध्येऽपवादन्यायेनाविहीत्यादौ वृद्धेरेव बाधकं स्यादिति वाच्यम्, लक्ष्यानुरोधेनात्र बाध्यसामान्यचिन्ताश्रयणात् । अन्यत्र प्रतिपदविधित्वस्य बलवत्त्वे प्रयोजकतादर्शनेन परदीर्घात्पूर्वं पररूपप्रवृत्तेश्च ।

❀ अभिनव-चन्द्रिका ❀

समासग्रहणञ्चरितार्थम् । मूलोक्तन्तु न युक्तम्, यञादिविधौ, ण्वुल्विधौ स्वार्थिकतद्धितविधौ च पदत्वेन सुबन्तत्वेन वा साक्षादवच्छिन्नोद्देश्यताकत्वस्याभावेन समर्थपरिभाषाऽनुपस्थितिप्रसङ्गादिति-

❀ चिदस्थिमाला ❀

बोध्यम् । एतेनात्रेत्यादि पदत्वाभावादित्यन्तमनूद्य–तन्न, ओत्वोष्ठादिमात्रस्याप्यन्तर्वर्तिसुपा पदत्वेन सावपि पदं भवतीति भाष्यात्पदत्वेन वा समर्थपरिभाषोपस्थितिसम्भवात् । वस्तुतस्तत्र शक्तं पदं गृह्यते, अन्यथा 'समर्थः पदे'तिसूत्रस्थभाष्यासङ्गतेरिति **मन्दोक्तमपास्तम्** । असम्बद्धत्वात्, द्वितीयभक्षस्यासिद्धान्तत्वात्, तत्र शक्तपदग्रहणे 'एङि पररूप'मित्यादावपि तत्प्रवृत्त्यापत्त्या प्रेजते इत्यस्यासिद्ध्यापत्तेः । भाष्यार्थानवबोधाच्चेति दिक् । अत्र चकारो व्यर्थः, नचैङीत्यनुकर्षणार्थः, अद्यर्यादित्यादावनिष्टापत्तेस्तद्धनयन्नाह–**अत्रैङीतीति** ।

हरदत्तोक्तिं खण्डयितुमाह—**न चात्रेति** । ननु प्रतिपदविधित्वेनापवादत्वात्पररूपेण दीर्घबाधोऽत आह—**प्रतिपदेति** । चस्त्वर्थे । एवमग्रेऽपि । नन्वेवमिदं व्यर्थं, शिवेहीत्यादावपि वृद्ध्याक्रान्तत्वादत आह—**इदञ्चेति** । बाध्यविशेषचिन्तेतिभावः । 'मध्येऽपवादाः पूर्वान्विधीन्बाधन्ते नोत्तरा'-निति न्यायः । पूर्वोपस्थितबाधेन नैराकाङ्क्ष्यं तद्बीजम् । लक्षणैकचक्षुष्कमते, बाध्यविशेषचिन्तापक्षे च आह—**अन्यत्रेति** । हे रमे स्वाम्पि इत्यादावित्यर्थः । अत एवाद्ये प्रतिपदोक्तत्वात्पूर्वमेत्वे आकारप्रश्लेषाद्धलङ्याद्दिलोपो न प्राप्नोतीत्याशङ्क्य'एङ्ह्रस्वा'दिति लोपेन तत्समाहितम् । **बलवत्त्वे इति** । निरव-

❀ ज्योत्स्ना ❀

पररूपाद्यत्प्रत्यय इत्यस्मदुपदर्शितप्रकारे न काचिदनुपपत्तिः । **बलवत्त्वे प्रयोजकतादर्शनेनेति** ।

❀ सदाशिवभट्टीयम् ❀

चाभावेपि हेत्वन्तरतयैव व्याख्यानं सम्यक्, बृहति तद्दर्शनात् । **स्पष्टैवेति** । एवञ्च प्रयोगानुरोधाद्व्याप्तिन्यायाश्रयणमिति भावः । **अन्यत्र प्रतिपदेति** । अत्र यद्वक्तव्यं परिभाषेन्दुशेखरविवृतिसंग्रहे तदुक्तं,

❀ विषमपदविवृतिः ❀

ओत्वोष्ठयोः परत्वेनाश्रयणे हि प्रत्यासत्त्या तदुत्तरपदके समासे एवास्य प्रवृत्तिः स्यात् । अत्र त्वोत्वोष्ठयोरजेव परत्वेनाश्रितः, तेनौष्ठस्य व्रणः ओष्ठव्रणः, वृषलस्यौष्ठव्रणः—वृषलोष्ठव्रण इत्यात्रापि पररूपं भवति । न ह्यत्रोष्ठशब्द उत्तरपदं—किन्त्वोष्ठव्रणशब्दः, समर्थपरिभाषानुपस्थितेर्दन्त्योष्ठ्यो वृषलोष्ठव्रण इत्यपि प्रयोजनं योज्यम् । नह्यत्र दन्तस्य ओष्ठेन सामर्थ्यमस्ति, तयोः परस्परमनन्वयात् । एवं सङ्गस्य कार्यं–सङ्गकार्यम्, अङ्गुलेः सङ्गकार्यमङ्गुलिसङ्गकार्यमित्यत्रापि षत्वं भवत्येव । अङ्गुलिशब्दघटकेणः परस्य सङ्गसकारस्य षत्वमित्यर्थाश्रयणेन प्रकृतसाम्यात् । **ईषदर्थेति** । तेन 'निपात' इति न प्रकृतिभावः । 'ऋत्यक' इति पाक्षिकप्रकृतिभावस्तु स्यादेव । ननु आ ऋषभ इत्यत्र 'ऋत्यक' इति प्रकृतिभावे पश्चादद्यशब्देन सम्बन्धे तेन सवर्णदीर्घे च पश्चादृत्यक इत्यस्य पाक्षिकत्वादप्रवृत्तौ गुणेन अद्यर्षभीयसिद्धिरिति चेन्न । तस्मिन्नेव लक्ष्ये प्रथमं भावोपक्रमे पश्चात्प्रकृतिभावस्याभावायोगात् । अन्यथा शुशुवतुरित्यादौ वैकल्पिकत्वा'द्विभाषा श्वे'रित्यस्य पूर्वमप्रवृत्तौ द्वित्वे 'श्वयतेर्लिट्यभ्यासलक्षणप्रतिषेध' इति अभ्यासलक्षणसम्प्रसारणाप्रवृत्तौ

अव्यक्तशब्दार्थो—**ध्वनेरिति** । अविद्यमानकत्वादिशब्दस्येत्यर्थः । तस्य चाच्छब्दोऽनुकरणे एव सम्भवतीत्याह—**अनुकरणस्येति** । अत्रालोन्त्यस्येति न प्रवर्त्तते, 'नानर्थके' इति निषेधात्, 'आम्रेडितस्य वे'ति वक्तव्ये 'नाम्रेडितस्ये'त्यारम्भाद्वा ।

अत इति किं ? वटगिति ।

नाम्रेडित । 'अव्यक्तानुकरणस्ये'ति, 'अत' इति च वर्त्तते । अव्यक्तानुकरणा-

ॐ **अभिनव-चन्द्रिका** ॐ

दिक् । **कत्वादिशब्दस्येति** । अविद्यमानकादिशब्दस्येत्यर्थः । कत्वादेर्वर्णत्वव्याप्यजातित्वे शब्दत्वाभावात् । 'नानर्थक'परिभाषाप्रत्याख्यानेऽपि उपायमाह—**आरम्भाद्वेति** ।

ॐ **चिदस्थिमाला** ॐ

काशत्वाभावेऽपि परादिसमवधाने शीघ्रोपस्थितिकत्वेन पूर्वप्रवृत्तिप्रयोजकत्वेरूपे इत्यर्थः । अत एव परनित्यान्तरङ्गप्रतिपदविधयो विरोधिसन्निपाते तेषां मिथःप्रसङ्गे परबलीयस्त्वमिति 'प्रत्ययोत्तरपदयोश्चे'ति सूत्रस्थकैयटीयपाठः सङ्गच्छते । अत एव पूर्वत्र परग्रहणं सफलम्, अन्यथा 'एङ्चेङ्'इत्येव ब्रूयात् । एतेन 'चकारस्य पुनर्विधानार्थत्वान्न दोष' इति हरदत्तोक्तमपास्तम् । ननु सूत्रे षष्ठीतत्पुरुषः ? कर्मधारयो वा ? नाद्यस्तदा तदनुकरणस्य ध्वनिरूपस्यैव सम्भवेन तस्याच्छब्दासम्भवात् । नान्त्यः, अनुकरणशब्दानर्थक्यापत्तेरितिचेन्न, तत्सामर्थ्यात्प्रथमपक्षस्यैव ग्रहणात् । नचोक्तदोषस्तत्सामर्थ्यादेव तदनुकरणस्य वर्णसमूहरूपस्यैव ग्रहणात् । नच तस्यानुकरणत्वासम्भवः, सजातीयस्यैव तत्त्वादिति वाच्यम्, सजातीये प्रत्यभिज्ञया तत्त्वस्यैव सत्त्वेनानुकरणत्वस्य दुर्वचत्वेन भेदे एव तस्य वाच्यत्वेन सर्वसाम्ये भेदाभावेन शब्दत्वादिसाम्येन तस्य तत्त्वसम्भवात्तदेतदभिप्रेत्य व्याचष्टे—**अव्यक्तेत्यादि** । अविद्यमानकत्वादीति बहुव्रीहिः । **त्याहेति** । इत्याशयेनाहेत्यर्थः । **अनुकरणस्येतीति** । परिस्फुटाकारादिवर्णकस्येत्यर्थः । तत्प्रत्याख्याने ाह—**आम्रेडितेति** । तस्य तदन्यव्यावृत्त्यर्थत्वस्य स्फुटत्वादाह—**वटगितीति** । एतेन प्राचोक्तं चिन्त्यमिति ध्वनितं, यथा चैतत्तथा स्पष्टमन्यत्र । **चेनेतावित्यस्य** समुच्चयः । 'सूत्रमनुवर्तत' इति वक्तव्ये एवमुक्तिर्वैचित्र्याय, पूर्वतोऽत्र विलक्षणान्वयो द्वयोरिति सूचनाय च, तथाहि—सा चाम्रेडितस्येत्यनेन व्यधिकरणषष्ठी, साचात इत्यनेनेति, तदेवाह—**अव्यक्तेति** । ननु मूलेऽन्त्यस्य तकारमात्रस्येति व्याख्यानेन तथैव सूत्रे

ॐ **ज्योत्स्ना** ॐ

वस्तुतस्त्वन्तरङ्गन्यायमूलकं प्रतिपदविधेर्बलवत्त्वमिति **परिभाषाप्रदीपार्चिः**प्रदर्शितरीत्यनुसरणे नास्ति दोषस्योक्तिसम्भव इति बोध्यम् । **अनुकरण एवेति** । नचैवमनुकरणस्येति व्यर्थम्, तदभावे

ॐ **सदाशिवभट्टीयम्** ॐ

वक्ष्यते चाग्रेऽपि । **अव्यक्तानु** । अविद्यमानेत्यादिबहुव्रीहिपूर्वपदः कर्मधारयः । **इत्याहेति** । इत्याशयेनाहेत्यर्थः । **अत इति किमिति** । इदं चिन्त्यम्, तदभावे विशिष्टानुकरणस्यादेशः प्राप्नोतीति प्रश्नस्य निरालम्बनत्वादिष्टस्यैवासिद्धेः । **मूले पटितीति** । अत्रैकदेशविकृतन्यायेन पदत्वाज्जश्त्वं न, अचः परेति स्थानिवत्त्वादज्झल्स्थानिकत्वेपि अज्मात्रस्थानिकत्वात, कृष्णर्द्धिरित्यादौ ऋवर्णस्थानिकत्ववत् । नपदान्तेतिनिषेधस्तु परपदमात्रस्याजादेश एव, अत एव घटानयनमित्यादौ जश्त्वादि नेत्याहुः ।

नाम्रे । **अत इति चेति** । चेनेताविति सूत्रमनुवर्त्त इति तु वक्तव्यम् ।

ॐ **विषमपदविवृतिः** ॐ

पश्चाद्विभाषा श्वोरित्यस्योत्तरखण्डे प्रवृत्तौ शिशुवतुरिति रूपापत्तेः । अव्यक्तशब्दस्य ध्वनौ योगं दर्शयति—**अविद्यमानेति** । अविद्यमानं व्यक्तं—कत्वादिधर्मो—यत्र सोऽव्यक्त इति विग्रह इति भावः । **अनुकरण एवेति** । तथा च सूत्रेऽनुकरणशब्दः स्पष्टार्थ इति भावः । 'अत इति किं वट'गित्यप-

वयवीभूताम्रेडितावयवाच्छब्दस्येत्यर्थः। 'नाम्रेडितस्य तस्तु वे'ति न सूत्रितं, वैचित्र्यार्थम्। फलकल्पनाभिनिवेशस्तु न युक्तो, भाष्यानुक्तेः। अत एव 'तदधीते तद्वेदे'ति सूत्रे 'द्विस्तद्ग्रहणं प्रमादकृतमाचार्यस्ये'ति भाष्ये उक्तम्। 'लाघवानवधानलक्षणोऽत्र प्रमाद' इति कैयटः। क्व तदवधानं ? क्व तदनवधानमिति तु—भाष्यकृदुक्तप्रयोजने तदवधानमन्यत्रान्यादिति निर्णेयम्। ननु डाचोऽभावादेतदप्राप्तिरत आह—**बहुलवचनादिति।**

तस्य परम्। अवयववाचिपरशब्दयोगेऽत एव ज्ञापकात्षष्ठी। 'तस्य'ग्रहणं

❀ अभिनव-चन्द्रिका ❀

ज्ञापकादिति। परशब्दस्यावयवत्वविशिष्टपरत्वावच्छिन्नवाचकत्वेन परत्वेऽवधितयाऽन्वयविवक्षायां पञ्चमी, अवयवत्वे निरूप्यनिरूपकभावसम्बन्धेनान्वयविवक्षायां षष्ठीति भावः। अवयवत्वविशिष्टपूर्वत्वावच्छिन्नवाचकपूर्वशब्देऽप्येवम्बोध्यम्। अत एव परन्नाभेः कायस्य, पूर्वन्नाभेः कायस्येत्यादिप्रयोगाः

❀ चिदस्थिमाला ❀

कार्ये एव सूत्रवैयर्थ्यापत्तिर्दोषोऽत आह—**नाम्रेडीति।** तत्र हेतुगर्भं विशेषणमाह—**वैचित्र्यार्थमिति।** पदलाघवाभावेन मात्राप्रतिपत्तिलाघवसत्त्वेऽपि सर्वत्र तथैव वाच्यमित्येवंरूपनियमाभावसूचनार्थमित्यर्थः। यत्तु "नाम्रेडितस्येत्यंशस्यान्वाचयशिष्टत्वज्ञापनार्थं तथोक्तं, तेन वटत्वटगित्यादावन्त्यस्य वा पररूपं भवत्येव, एतेन नाम्रेडितस्य अन्त्यस्य वेति योगद्वयेनैव पूर्वस्य नित्यत्वे उत्तरस्य वैकल्पिकत्वे च सिद्धे तुशब्दो व्यर्थ इत्यपास्तम्। निषेधोऽच्छब्दमात्रविषयो, द्वितीयं तकारातकाराद्यन्तमात्रविषयमिति विषयविशेषस्य स्पष्टतया बोधनार्थं तस्य सत्त्वात्, एवञ्च 'पट पट इत्याहे'त्यादावन्त्याकारस्य परस्य पररूपे 'पटपटित्याहे'—त्यपि पक्षे बोध्य—"मिति, तत्खण्डयति—**फलेति।** इदं द्रढयति—**अत एवेति।** अन्यथा तत्रापि तदनुक्तस्य फलस्य सम्भवात्तदसङ्गतिः स्पष्टैव। वृद्धिसूत्रस्थभाष्याविरोधाय प्रकृतसङ्गतये चाह—**लाघवेति।** अनतिप्रसङ्गायाह—**क्वेति।** अत एव तुग्रहणं वैलक्षण्यायावश्यकमिति तत्रापि न तथा प्रयोगः पक्षे इति बोध्यम्।

एतदिति। वीप्साद्यभावान्नित्यवीप्सयोरित्यस्याप्राप्तिरेवेति भावः। ननु परशब्दस्य दिशि दृष्टत्वेन पञ्चम्युचिताऽत आह—**अवयवेति। त एवेति।** निर्देशरूपादेवेत्यर्थः। यत्तु तस्य ग्रहणमेतत्प्रकरणद्विरुक्तपरस्यैव सञ्ज्ञा यथा स्यात्, प्रकरणान्तरद्विरुक्तपरस्य माभूदित्यर्थम्। अन्यथा (मूलोक्त) व्याख्यातरीत्या वैयर्थ्यं स्पष्टमेवेति, तत्खण्डयति—**तस्येति।**

❀ ज्योत्स्ना ❀

भग्नदन्ताद्युच्चारिताव्यक्तशब्द एव स्यादिति भावः। **फलकल्पनाभिनिवेशस्त्विति।** नाम्रेडितस्येत्यंशस्यान्वाचयशिष्टत्वद्वारा वटग्वटगितीत्यादौ पररूपमन्त्यस्य भवतीत्येवंरूप इत्यर्थः।

ननु द्विस्तद्ग्रहणमधीयान—विदुषोः पृथग्ग्रहणार्थम्, अन्यथा यस्तदधीते वेद च तत्रैव स्यादिति वृत्तिकारादिभिर्द्विस्तद्ग्रहणस्य प्रयोजनमुक्तमेवेत्यत आह—**क्व तदवधानमित्यादि। पाठादच्त्वमिति।**

❀ सदाशिवभट्टीयम् ❀

फलकल्पनेति। नाम्रेडितेत्यंशस्यान्वाचयशिष्टत्वज्ञापनद्वारा 'वटक् वटगिती'त्यादौ पररूपमन्त्यस्य भवतीति फलकल्पनाभिनिवेश इत्यर्थः। **तस्य प। सिद्धेरिति।** पूर्वोऽभ्यास इत्यत्रेवेति भावः। अन्योत्प्रेक्षितं फलमन्यथा साधयति—**अन्यदिति।** तस्य सञ्ज्ञायां 'शूद्रसन्निभ' इत्यादौ 'आम्रेडितं भर्त्सने' इति प्लुतापत्तिरित्याहुः।

❀ विषमपदविवृतिः ❀

पाठः। शङ्कासमाधानयोर्निर्दलत्वात्। **फलकल्पनेति।** पटदितीति शब्दान्तस्यानुकरणे द्वित्वे

स्पष्टार्थं, 'द्वे' इत्यनुवर्त्य षष्ठ्या विपरिणामेन सिद्धेः। अन्यद्विरुक्तपरस्य तु न सञ्ज्ञा, अष्टमे 'सर्वस्ये'त्येतत्प्रकरणे सञ्ज्ञाकरणात्।

झलाञ्ज। अन्तग्रहणं 'झली'ति निवृत्त्यर्थम्। सर्वोपकारकतया च प्रकरणान्तेऽस्य लेखः। एतेन 'श्र'दित्यत्रैव लेख उचित इत्यपास्तम्।

अज्झलोः सावर्ण्यनिषेधादाह—**अचि किमिति**। **अनिष्पत्तेरिति**। 'नाज्झला'-वितिसूत्रविषयनिर्णयेऽपवादविषयपरिहारेण तत्तद्वर्णीयसवर्णपदवाच्यानिर्णयोत्तरं तावतां ग्रहणस्य ग्रहणकशास्त्रबोध्यतया एतद्बोधकाले ग्रहणकशास्त्रस्य तावद्ग्रहणबोधकत्वा-निष्पत्तेरित्यर्थः।

❀ अभिनव-चन्द्रिका ❀

स्सङ्गच्छन्ते। अत एव रेफानुस्वारैचामवयवत्वावच्छिन्नविधेयताश्रयत्वरूपागमत्वसिद्धिरिति दिक्।

विपरिणामेनेति। पूर्वोऽभ्यास इत्यत्रेवेति भावः। मूले **पदान्त इति**। पदान्तानां झलामित्यर्थः। अन्यथा सरितावित्यादौ पदान्तो यत्ताविति तत्र विद्यमानत्वाज्झलो जश्त्वं दुर्वारं स्यादिति बोध्यम्। **परिहारेणेति**। अपवादशास्त्रीयोद्देश्यतावच्छेदकावच्छिन्नातिरिक्तत्वेन सङ्कोचेनेत्यर्थः। प्रकृते च सङ्कोचप्रकारं पूर्वमेवावोचाम। **अनिष्पत्तेरिति**। असम्भवादिति भावः। तथा हि सवर्णपदशक्तिनिश्चयस्य अणुदित्सूत्रजबोधे कारणत्वेन नाज्झलाविति शास्त्रजबोधाधीनत्वेन तत्कालेऽष्टादशबोधकारणत्वस्याणुदित्सूत्रेऽसम्भवादिति।

❀ चिदस्थिमाला ❀

उक्तफलस्यान्यथासिद्धिमाह—**अन्येति**। प्रकरणान्तरे इत्यर्थः। ननु स्कोरित्यतोऽन्तपदानुवृत्तिः कल्प्यैवेति न व्यर्थमत आह—**अन्तेति**। 'पुन'रित्यादिः।

झलीति। तेन तदाकाङ्क्षेण पदस्येत्यस्यैव सम्बन्धः सूचितो न तस्योक्तरीत्येति पदान्त इत्यस्य लाभः। एतेन फलान्तरं कैश्चिदुच्यमानं निरस्तम्। ननु श्रदित्यत्रैवेदं लेख्यमत आह—**सर्वोपेति च**। **चो** वाक्यालङ्कारे। हल्सन्धिप्रकरणे स्मर्यमाणत्वादाह—**लेख इति**। प्रथमोपस्थितत्वाद्वैपरीत्यं न। एतेन तथा केषांचिदुक्तिः, शिंशपाचोद्यमेतदित्युक्तिश्च परास्ता। ननु वाक्यार्थज्ञाने पदार्थज्ञानस्याभावज्ञाने प्रतियोगिज्ञानस्य च कारणत्वेनोभयतः प्राग्विधिवाक्यार्थज्ञानस्यावश्यकत्वेऽपि निषेधवाक्यार्थज्ञानानपेक्षत्वात्कथमिदमत आह—**नाज्झलावितीति**। **पवादेति**। निषेधस्यापि बाधकतासाधर्म्येण तत्त्वव्यवहारादिति भावः।

वाच्येति। तत्प्रकारकनिश्चयोत्तरमित्यर्थः, तद्वाच्यस्य निश्चयोत्तरमित्यर्थो वा। अनेन सामान्यतः ततः प्राग्बोधोऽस्त्येवेति सूचितम्। **बोध्यतेति**। विषयभेदेन बाधकासम्भावनया प्रतिबन्धकाप्रामाण्यसन्देहाभावात्प्राक् निषेधपर्यालोचने तु बाधकसम्भावनया तुल्यास्यसूत्रजशक्तिग्रहेऽप्रामाण्यसन्देहेन तस्य प्रतिबन्धकत्वेनाणु-

❀ सदाशिवभट्टीयम् ❀

'तस्य' ग्रहणाभावे 'क्षिप्रक्षुद्राणां पर'मित्यादिनिर्देशादवयववाचियोगे षष्ठीति बोध्यम्। **झलाञ्ज**। **निवृत्त्यर्थमिति**। स्कोर्ग्रहणं तत्सम्बन्धेपीतरव्यावर्त्तकमिति निवृत्तिबोधने समर्थम्। अत एव 'दधस्तथोश्चे'ति सूत्रे भाष्ये 'झली'त्यनुवर्त्य 'तथोश्चे'ति प्रत्याख्यातम्। 'झलीति मण्डूकप्लुत्यानुवर्तत' इति तत्सूत्रीयोद्योतस्तु पक्षान्तरपरः। 'तत्सामर्थ्यात्तन्निवृत्त'मिति वक्ष्यमाणमूलन्तु सूत्रमते इति बोध्यम्। तदनुवृत्तिस्तु 'क्विन्प्रत्ययस्य कु'रित्यादावनिष्टार्थैव स्यादिति भावः। नन्वेवं 'क्विन्प्रत्ययस्य कुरन्ते' इति न्यस्यतां, प्रकृते च झलीत्यस्य सम्बन्धोस्तु, एवञ्च झशि विधायकम्मास्तु, खरि तु चर्त्वे न विशेषः। हेपरे पदान्तो झल् तु असम्भवी, अभ्यासे चर्चेत्यादिचतुःसूत्री त्विहैव पाठ्या, तत्रैव वा, जश्पदं झलामिति च न कर्त्तव्यमिति चेन्न। तथा सति सुद्ध्युपास्य इत्यादौ द्वित्वस्यासिद्धत्वे झलो झल्परत्वाभावेन जश्त्वानापत्तेः। षड्क्षित्यत्रैव शुष्क इत्यत्र जश्त्वापत्तेश्च। खरि चर्त्वस्य झलि जश्त्वापवादत्वे तु पक्वादौ दोषो बोध्यः। ननु 'झष-

सूत्रस्थसवर्णपदानुवृत्तिमभिप्रेत्याह—**ऋति सवर्ण इति**। तत्फलं दध्यृकारादावेतदप्रवृत्तिः। एतद्विधेययोरइउणसूत्रानन्तरं पाठादच्त्वं, तेन तयोः स्थाने प्लुतासिद्धिस्तयोश्च न रपरत्वम्। **द्विमात्रमिति**। अत एव 'अकः सवर्णे' इत्यनेनैव ऋकारद्वयस्य स्थाने रेफद्वयवत्तारूपगुणकृतान्तर्येण कदाचिद्रेफद्वयगर्भस्य, विवृतत्वान्तर्येण कदाचिद्विवृतस्य, ऌकारे लकारवत्तान्तर्येण कदाचिद्द्विलकारस्य, कदाचिद्विवृतत्वसाम्येन

❀ अभिनव-चन्द्रिका ❀

न रपरत्वमिति। अणुदित्सूत्रानन्तरमेतयोः पठेनाण्त्वाभावादिति भावः। **अत एवेति**। द्विमात्रिकत्वादेवेत्यर्थः।

❀ चिदस्थिमाला ❀

दित्सूत्रजबोधानापत्तिः। नहि नाज्झलाविति वाक्यार्थबोधात्प्राक् सवर्णपदबोध्यनिश्चयस्तथा च विधिवाक्यार्थबोधस्य निषेधीयात्ततः प्रागावश्यकत्वेऽपि तन्निश्चयाभावात्तत्र तदप्रवृत्तिरिति भावः। **यैतदिति**। नाज्झलाविति प्रक्रान्तेत्यर्थः। एतेन स्वरूपतस्तस्य सत्त्वेन मूलमयुक्तमित्यपास्तम्। ननु वार्तिकपाठो न तथा, किञ्च तथा सत्यग्रे पुनस्तदुक्त्यसङ्गतिरत आह—**सूत्रस्थेति**। एवञ्चाग्रेऽपि स्पष्टार्थं तदुल्लेखः। **तत्फलमिति**। अन्यथाऽक इत्यनुवृत्तेस्तत्रापि स्यादिति भावः। नन्वनयोः प्रसिद्धतो भेदेन कथमच्त्वादि, अन्यथा वार्तिकवैयर्थ्यमेवात आह—**एतदिति**। यत्त्वनयोरयोगवाहेषु पाठेनाच्त्वात्प्लुतसिद्धिरिति **कौस्तुभकारादयस्तन्न**, अनयोः प्रयोगविशेषनिष्ठत्वेन बहुप्रयोगानिर्वाहकत्वेन तत्सञ्ज्ञायां मानाभावाद्गौरवात्, आश्रयस्थानत्वापत्तेः, होतृकारादौ रपरत्वापत्तेश्च। अत एव परिगणनं भाष्योक्तं सङ्गच्छते, तदेतद्ध्वनयन्नाह—**अइउणसूत्रेति**। **च नरपेति**। रपरत्वाभावश्चेत्यर्थः। तत्र मानमाह—**अत एवेति**। द्विमात्रत्वादेवेत्यर्थः। 'प्रत्याख्यात'मित्यत्रान्वयः। एतेन 'दीर्घे प्राप्ते ह्रस्वो विधीयते' इति प्राचोक्तमपास्तम्। स्थानत आन्तर्यस्याविशिष्टत्वादाह—**रेफद्वयेति**। प्रत्येकमेकरेफत्वादिति भावः। **गुणेति**। तत्र गुणशब्देनोक्तत्रितयातिरिक्तधर्ममात्रस्य ग्रहणादिति भावः। **रेफद्वयेति**। अस्यैकस्य तद्वत्त्वात्। उक्तहेतोरेवाह—**विवृतेति**। दीर्घविधेर्ह्रस्वा-

❀ ज्योत्स्ना ❀

स्वतन्त्रऋकारऌकाराभ्यामनयोर्ग्रहणं तु न भवति, तयोर्विवृतत्वादनयोश्चेषत्स्पृष्टत्वात् प्रयत्नभेदात्। अनयोरर्धतृतीयमात्रत्वमिति मतेऽप्यूकालोऽजिति भाष्योक्तयोगविभागेन 'य ऊकालः

❀ सदाशिवभट्टीयम् ❀

स्तथो'रिति सूत्रे भाष्येऽत्रत्यान्त इति योगविभागमाश्रित्य तत्रत्यमध इति प्रत्याख्यान्तत्कथन्तस्य झलीति निवर्त्तने सामर्थ्यमिति चेन्न। तदभावेपि 'जश् झला'मिति योगविभागेन तत्प्रत्याख्यानसम्भवादिति दिक्। **अकः स**। **अपवादेति**। बाधकसाम्यान्निषेधेऽप्यपवादत्वव्यवहारः। **अइउणसूत्रेति**। ऋऌक्सूत्रानन्तरम्पठतो **रत्नाकरस्या**शयश्चिन्त्य इति भावः। **नरपरत्वमिति**। अनयोरयोगवाहत्वमङ्गीकुर्वतः **कौस्तुभकृतो** मते तु रपरत्वापत्तिस्तेषामिकारात्प्राक्पाठादिति भावः। **विवृतत्वसाम्येन रेफवत्तासाम्ये-**

❀ विषमपदविवृतिः ❀

पटदिति पटदितीत्यत्राम्रेडितघटिततकारस्य द्वित्वाभावः अन्त्यस्येत्यस्य फलमिति फलकल्पनाभिनिवेश इत्यर्थः। **अइउणसूत्रानन्तरमिति**। इदं चिन्त्यम्' तयोरिक्प्रत्याहारे प्रवेशापत्तेः। ऋऌक्सूत्रानन्तरं तयोः पाठस्तूचितः। **ऌकारे इति**। 'ऋकारात्परत' इति शेषः। **तादृशस्येति**।

रेफवत्तासाम्येन च तादृशस्य ऋकारस्य सिद्धया विकल्पफलसिद्धिमाश्रित्यैतद्वचनद्वयं 'तुल्यास्ये'ति सूत्रे भाष्ये प्रत्याख्यातम् ।

द्वौ रेफाविति । अत्रापि तदेव भाष्यं मानम् । द्विरेफत्वे हि रेफद्वयवति स्थानिन्ययं, लकारवत्यपर इति व्यवस्था सिद्ध्यति । **अभित इति ।** 'द्वौ रेफा'वित्यनुषज्यते, तच्च द्वितीयान्तम् , अभितः पदयोगात् ।

एओङ्सूत्रे भाष्ये मातृणामित्यादौ णत्वादिसिद्ध्यर्थमवश्यमङ्गीकर्त्तव्ये 'वर्णैकदेशा वर्णग्रहणेन गृह्यन्ते' इति पक्षे—प्लृय खट्वाभिर्वाचा तरतीत्यादौ तुगैस्द्वयज्लक्षण-

❀ अभिनव-चन्द्रिका ❀

सिद्ध्येति । विनिगमनाविरहेण मूर्धस्थानजन्यत्वविशिष्टविवृतत्वस्य, मूर्धस्थानजन्यत्व-विशिष्टरेफद्वयवत्त्वस्य च आदेशद्वयनियामकत्वादिति भावः । एवं लृकारांशेऽपि मूर्धस्थान-जन्यत्वविशिष्टविवृतत्वस्य दन्तस्थानजन्यत्वविशिष्टलकारद्वयवत्त्वस्य चादेशद्वयनियामकत्वं बोध्यम् । वार्तिकद्वयविधेययोरमितोऽज्भक्तिसत्त्वे प्रमाणमाह—**एओङ्सूत्रे इत्यादि । अत एवेति ।** ह्रस्वऋकारद्वयस्थानिकमेव पूर्ववार्त्तिकविधेयं साधु । एवं ह्रस्वऋकार—ह्रस्वलृकारोभयस्थानिकमेव पर-

❀ चिदस्थिमाला ❀

ऽप्राप्त्याऽन्त्यस्य दीर्घस्याभावादाह—**द्विलकारस्येति ।** सम्भवादाह—**रेफेति । प्रत्येति ।** अन्यथा तदसङ्गतिः स्पष्टैव । एतेन 'वार्तिके सवर्णपदस्यावश्यकत्वेन सूत्रेऽकीत्यस्य करणे विपरीतं गौरव'मिति 'सुवचो'-परि **खण्डनकृदुक्तम्** , 'उक्ताशयस्तु न भाष्यविरोधान्नहि दीर्घसंज्ञार्थं वर्णसमाम्नाये पाठः कर्तव्य इति भाष्यं सङ्गच्छते' इति **रत्नाकरोक्तञ्चापास्तम्** । तदेव=उक्ततुल्यास्यसूत्रस्थमेव । तदेवाह-**द्विरेफेति ।** हि=यतः । अन्यथा प्रत्याख्याने विवृतत्वसाम्यस्यैकरेफवत्त्वसाम्यस्य चाविशेषादव्यवस्थैवानयोर्मिथः स्यादिति भावः । तसन्तं भक्तेर्विशेषणं नतु विशेष्यमिति साकाङ्क्षत्वादाह—**द्वाविति ।** पूर्वत्र प्रथमान्तत्वादाह—**तच्चेति ।** 'अमित' इत्यस्य यद्यप्युभयतः इत्यर्थस्तथाप्यत्र लक्षणया सर्वत इत्यर्थः । अत एवाज्भक्तेरित्येकवचनम् , अन्यथा तदसङ्गतिः स्पष्टैव, तदेतद्ध्वनयन्—इदानीमन्यथालेखसत्त्वादभित इत्ययुक्तमिति शङ्कामपनुदति—**एओङिति ।** 'सूत्रे' इत्यस्य भाष्ययोरन्वयः । 'भाष्ये' इत्यस्य—करणादावन्वयः । आदिभ्यां चक्लृपे आनृजे इत्यादौ लत्वादिपरिग्रहः । यद्यपि सन्ध्यक्षरेष्वपि दोषस्तथापि वक्ष्यमाणरीत्या तत्र परिहारासम्भवात्प्रका-रान्तरेण भाष्ये परिहारादत्र त्यागस्तदेतद्ध्वनयन्नाह—**प्लृयेति । शङ्काया इति ।** 'करणव'दित्यत्रान्वयः।

❀ सदाशिवभट्टीयम् ❀

न चेति । अन्यतरोक्तावीषत्स्पृष्टऋकारोपि स्यादिति भावः । **प्रत्याख्यातमिति ।** द्विमात्रत्वाभावे दीर्घ-सञ्ज्ञाभावात्तदसङ्गतमेव स्यादिति भावः। **व्यवस्था सिध्यतीति ।** ननु लकारवति पूर्वोक्तरीत्या विवृतत्व-रेफवत्त्वसाम्याद्विवृतऋकारः, ईषत्स्पृष्टलकारस्तु लकारवत्त्वसाम्यात्स्यात् । ईषत्स्पृष्ट ऋकारस्तु रेफवत्वसाम्या-त्प्राप्नोति नान्तरतम इति कथं सङ्करप्राप्तिरिति चेन्न । एकरेफवत्त्वे ह्युक्तरीत्या रेफवति (-लकाररेफवति-) लकारवति चास्याप्राप्त्याक्षरसमाम्नाये पाठसामर्थ्येन भवन्नव्यवस्थया स्यादित्याशयात् । द्विरेफत्वे तु सामर्थ्यविरहेण न सङ्कर इति भावः । यद्वा स्थानेन्तरमे इति सप्तम्यन्तपाठे द्विरेफवत्त्वाभावे सङ्करः प्राप्नोति, यथा 'होतृ लकार' इत्यत्रैकरेफवत्त्वाद्धोतृ ऋकार इत्यत्र लकाराभावत्वादन्यतरगुण-कृतान्तर्यमादायोभयत्रापीषत्स्पृष्टप्रवृत्तेरिति । **'अभित' इतीति ।** अभित इत्यस्य यद्यप्युभयत इत्यर्थस्तथापीह

❀ विषमपदविवृतिः ❀

विवृतत्वादिमत इत्यर्थः । **प्रत्याख्यातमिति ।** 'लृऋवर्णयोः सावर्ण्यमाश्रित्ये'ति शेषः । ननु ऋकारस्य लकारे परे विवृतऋकार एव स्यान्नत्वीषत्स्पृष्टलकारः, ततोऽपि विवृते धर्मद्वयकृतान्तर्येणान्तरतम-

णानां शङ्कायाः,'दीर्घा'दिति तुग्विधानसामर्थ्य-तपरकरणसामर्थ्य-नौद्यच इतिसूत्रस्थनौग्रहणसामर्थ्यैर्भेदेनाप्रतिभासमानेषु वर्णावयवेषु अवयवसदृशस्वतन्त्रवर्णाश्रयकार्याभावज्ञापनरूपसमाधानस्य च करणवत्–प्रातर्ऋतमित्यत्र रोरीत्यस्य तद्‍ऌकार इत्यादौ तोर्लीत्यस्य च शङ्कासमाधानाकरणेन 'यत्तद्रेफात्परं भक्ते'रिति हयवरट्सूत्रस्थभाष्येण च ऋऌ-

---

❀ चिदस्थिमाला ❀

दीर्घादितीति। योगविभागेनेति भावः । विशिष्य ज्ञापने गौरवान्नान्यपवृक्तस्येति वार्तिकैकवाक्यतया चाह–**भेदेनेति** । अकरणे दृष्टान्तः—**करणवदिति । शङ्केति** । शङ्कासमाधानयोरकरणेनेत्यर्थः । नन्वेतावतापि पूर्वत्रैवाज्भागसत्तासिद्धिरत आह—**यत्तदिति ।** रेफाद्भक्तेरिति समानाधिकरणे पञ्चम्यौ । 'इति भाष्येण

❀ सदाशिवभट्टीयम् ❀

सर्वत इत्यर्थो बोध्योऽत एव भक्तेरित्येकवचनं सङ्गच्छते । **सामर्थ्यैरिति** । इदञ्चिन्त्यम्—द्वन्द्वे इतिशब्दद्वयप्रवेशः कथमिति । शङ्कासमाधानयोरकरणेनेत्यर्थैकदेशे षष्ठ्यन्तद्वयार्थस्यान्वयमभिप्रैति । नन्वेवमादितस्तद्भागोस्तु, परत्र तु तत्सत्त्वे किम्मानमत आह—**यत्तदिति** । रेफाद्भक्तेरित्येते समानाधिकरणेपञ्चम्यौ । रेफरूपभागात्परं यत्तेन व्यवधानादित्यर्थः । 'हयवरट्सूत्रस्थे'त्यपपाठः, एओङ्सूत्रस्थत्वादस्य ।

भाष्येण चेति। चेन 'कुलङ्कृत्तृं रमत' इत्यत्र रोरीत्यस्य, ऌकार इत्यत्र यणो मय इत्यस्य च शङ्कासमा-

❀ विषमपदविवृतिः ❀

नात् । एवं गमृनित्यत्र ऌकारवत्तान्तर्येणेषत्स्पृष्टो दुर्वार इति चेन्न । ऋऌक्सूत्रानन्तरं पाठस्य होत्ऌकार इत्यत्राच्त्वासिद्धिद्वारा प्लुतार्थत्वेन पाठसामर्थ्येन यत्किञ्चिदान्तर्येपीषत्स्पृष्टऌकारस्य लक्ष्ये प्रवृत्त्यङ्गीकारात् । गमृनित्यत्र त्वीषत्स्पृष्टस्य शङ्कैव नास्ति, पूर्वसवर्णत्वाभावात् । एवं धातृणामित्यत्रेषत्स्पृष्टदीर्घस्य न शङ्का, रेफद्वयाघटितत्वाविवृतत्वरूपधर्मद्वयकृतान्तर्यस्य विवृते एव सत्त्वात् ।

ननु 'त्रिषष्टिश्चतुःषष्टिर्वा वर्णाः शम्भुमते मताः । प्राकृते संस्कृते चापि स्वयं प्रोक्ताः स्वयम्भुवा ॥ स्वरा विंशतिरेकश्च स्पर्शानां पञ्चविंशतिः । यादयश्च स्मृता ह्यष्टौ चत्वारश्च यमाः स्मृताः ॥ अनुस्वारो विसर्गश्च ᳵक ᳵपौ चापि पराश्रितौ । दुस्पृष्टश्चेति विज्ञेयो ऌकारः प्लुत एव चेति' शिक्षाविरोधः, ईषत्स्पृष्टयोरनयोराधिक्यात् । तत्र दुःस्पृष्टो ऌकारो मातृकान्यासेपि, नैतौ परिगणितौ । तथा हि तत्र षोडश स्वराः, पञ्चविंशतिः स्पर्शाः, यादयोष्टौ ल–क्षेति द्वयं, सङ्कलनयैकपञ्चाशद्वर्णा भवन्तीति चेन्न । तुल्यास्यसूत्रस्थभाष्यवार्तिकप्रामाण्येनैतयोरपि तत्र पूरणात् । यथाऽक्षरसमाम्नाये मातृकापाठे चाविद्यमाना अपि यमा उक्तशिक्षाबलाद्वर्णराशिषु पूर्यन्ते तथा शिक्षायामपरिगणितोऽपि दीर्घॡकारो मातृकापाठे पठ्यते । **परे तु** त्रिषष्टिश्चतुःषष्टिर्वेति सङ्ख्या धर्मकृता न तु व्यक्तिकृता, वर्णानां प्रत्युच्चारणे भेदपक्षेऽसम्भवात् । तथा चाभितोज्भक्तिसंहितरेफघटितत्वतादृशकालघटितत्वरूपधर्माभ्यां द्वाभ्यां विवृतयोरीषत्स्पृष्टयोश्च ॡॠवर्णयोर्द्वित्वम् । एवमेव त्रिमात्रचतुर्मात्रयोः 'प्लुतावैच इदुता'विति सूत्रे भाष्ये विस्पष्टमुक्तयोरेओङ्सूत्रभाष्येण 'त्रिमात्रचतुर्मात्रा आदेशा माभूव'न्नित्यनेन सूचितयोर्द्विमात्राधिकत्वेनानुगमेन प्लुतमध्येऽन्तर्भावान्नाधिक्यम् । सत्यभिधाने गमृणामित्यत्र विवृतत्वसाम्येन विवृतो दीर्घॠकारो ऌकारवत्तान्तर्येणेषत्स्पृष्टॠकारश्च पर्यायेण भवतः । एवं मातृकापाठे पठितोऽपि दीर्घॡकारो विवृतो न भवति, तस्योच्चारायितुं शक्यत्वेपि तुल्यास्यसूत्रस्थभाष्यकैयटप्रामाण्येन तस्य शास्त्राविधेयत्वात् । मात्रिक एकारस्तु उच्चारायितुमशक्यत्वान्नास्त्येवेत्याहुः । **रेफात्परं भक्तेरिति** । रेफाद्भक्तेः परं न तत्क्वचिदपि व्यपवृक्तमिति तदर्थः । एतद्भाष्येण तु रेफात्परतोप्यज्भक्तिरस्तीत्यागतम् । **हयवरट्सूत्रस्थेति** । एओङ्सूत्रस्थेत्युचितम् ।

कसूत्रस्थयोरर्धमात्राज्भागत्याभितः कॢप्तत्वेन तथैवोचितत्वादिति भावः । **द्वौ लकाराविति** । हल्द्वयवत्पूर्वसाहचर्यादिति भावः । अत्र ह्रस्वऋकारद्वयस्थानिकैकादेशे एव पूर्वस्य साधुत्वं, ह्रस्वऋकारऌकारस्थानिकैकादेशे एवोत्तरस्य साधुत्वम् । अत एव ऌति न ऋकारो नाप्यृति ऌकारः । अत एव वार्तिके ऋतीति तपरकरणमुत्तरवार्त्तिके ऌतीति च चरितार्थम् । तुल्यास्यसूत्रे भाष्ये यदेतदृतीति एतदृत इति वक्ष्यामीत्येतत्, वचनाश्रयणेन ऋऌवर्णयोः सावर्ण्यं न कार्यमिति च सङ्गच्छते । उपस्थितरेफीयप्रयत्न-

❀ अभिनव-चन्द्रिका ❀

वार्त्तिकविधेयं साधु इति स्वीकारादेवेत्यर्थः । अत्रैव प्रमाणमाह—**अत एवेत्यादिना । भाष्यादावुक्त-**

❀ चिदस्थिमाला ❀

चे'ति पाठः । 'इति 'हयवरट्' सूत्रस्थभाष्येण चे'त्यपपाठः, मूलाशुद्धेः । इदञ्च तत्रैवाग्रहणपक्षे 'रषाभ्या'मित्यत्र ऋकारग्रहणं कर्तव्यं, ग्रहणपक्षे 'रषाभ्या'मित्येव सिद्धमित्युक्त्वा—न सिध्यति यत्तरेफात्परं भक्तेस्तेन व्यवहितत्वान्न प्राप्नोतीत्युक्तम् । अर्धमात्रेति बहुव्रीहिः, तद्ध्वननायैवाह—**अज्भागस्येति । तथैवोचीति** । कॢप्तकल्पनेति न्यायेन प्रकृतेऽपीति भावः । अत्र तथा गमकाभावादाह—**हल्द्वयवदिति** । वार्तिकपक्षेऽतिप्रसङ्गं निराचष्टे—**अत्रेति** । अनयोर्मध्ये इत्यर्थः । **कादेशे इति** । प्राप्ते इति शेषः । पक्षे इति भावः । एवमग्रेऽपि । तथा भाष्योदाहरणात् । एतेन गम्ऌकार इत्यादौ चरितार्थमुत्तरवार्तिकं तत्र न प्रवर्तेतेत्यपास्तम् । अस्य फलान्तरमाह—**अत एवेति** । तथैव साधुत्वाङ्गीकारादेवेत्यर्थः । यत्त्वयमर्थो व्यवस्थितविभाषया लब्ध इति, तन्न, तासां परिगणनात्, तदेतद्ध्वनयन्नन्यथा स्थलत्रये मानान्याह—**अत एवेति** । उक्तार्थस्येष्टत्वादेवेत्यर्थः । अस्योभयत्रान्वयः ।

वार्तिके इति । 'आद्ये' इत्यादिः । यदि दीर्घेऽपि परतः स्यात्तर्हि तदानर्थक्यं स्पष्टमेव । इदमुपलक्षणमुत्तरस्यापि । ऌग्रहणस्यावश्यकत्वादाह—**ऌतीति** । यदि तपरकरणाद्दीर्घे परतोऽप्रवृत्तावपि तत्काल-सवर्णसर्वग्रहणात्सङ्करः स्यात्तर्हि विधेयद्वयकमाद्यवार्तिकमेव कार्यमिति भावः । नन्वेवमप्युभयत्र प्रथमह्रस्वस्यैव न लाभोऽत आह—**तुल्यास्येति । इत्येतदिति** । उक्तहेतोरुक्तवचनद्वये इत्यर्थः । सावर्ण्यस्य होतृऌकार इत्यत्र दीर्घसिद्धिं फलमुक्त्वा अनेनैव सिद्धिमुक्त्वा सवर्णे इत्यनुवर्त्यमन्यथा दध्ऌ्रादावतिप्रसङ्ग इति सावर्ण्यमवश्यमङ्गीकार्यमित्युक्त्वा यदेतदित्यादि—ऋकारस्य ऋकार एव सवर्ण इति ऋत्येव भविष्यतीत्याशयकमुक्त्वा—ततो 'ऌति ऌवा' 'ऋत' इत्येव, इदञ्चासवर्णार्थं, तेन ऌति रूपद्वयं सिद्धमिति सावर्ण्यं न कार्यमिति पूर्वपक्षिणोक्तञ्च सम्मतं सङ्गच्छते चेत्यर्थः । उभयत्राद्ययोर्दीर्घयोर्ग्रहणे तु तदसङ्गतिः स्पष्टैव । एतदेकवाक्यतयैव प्रागुक्ते सिद्धान्तभूतैतद्वचनद्वयप्रत्याख्यानपक्षेऽपि न कोऽपि दोषः । एतेन गॄमॄन् गमॄणां धातॄणामित्यादावेतौ दुर्वारावित्यपास्तम् । षाष्ठकैयटाद्युक्तसंवृतत्वनिरासायाह—**उपेति** । एतेन यः

❀ ज्योत्स्ना ❀

स एवाच्सञ्ज्ञको भवतीत्यर्थेन सञ्ज्ञानिषेधादिति भावः । **उत्तरस्य साधुत्वमिति** । व्यवस्थितविभाषाश्रयणादिति भावः । ननु भाष्यकृत्परिगणितातिरिक्ता व्यवस्थितविभाषा न सन्तीत्यत आह—**अत एव वार्तिके इति** । तथा च भाष्यतात्पर्यविषयाणामपि-

❀ सदाशिवभट्टीयम् ❀

धानाकरणस्य संग्रहः । आरम्भप्रत्याख्यानयोः फलभेदं योजयति—**अत्रेत्यादिना** । अनयोरित्यर्थः । **ऋतीति । तपरकरणेति** । इदञ्च न्यायसिद्धमपि भङ्ग्यन्तरेणोक्तम् । **ऌतीति** । अन्यथा 'ऋति ऋऌ वे'त्येव ब्रूयादिति भावः । पूर्वस्य ह्रस्वत्वे मानमाह—**तुल्यास्येति** । वार्तिकस्य तद्द्वयस्याऽऽत्त्वं वक्ष्यामीति तृतीयस्य

❀ विषमपदविवृतिः ❀

तत्रैव तथा भाष्यदर्शनात् । 'न ऋकार ईषत्स्पृष्ट' इति शेषः । **नाप्यृतीति** । 'ऌकारा'दिति शेषः ।

त्यागे मानाभावादीषत्स्पृष्टाविमौ । विवृतत्वे हि विवृतऋकारलृकाराभ्यामनयोरपि ग्रहणे'ऽकः सवर्ण' इत्यनेनैव सिद्धे वार्त्तिकस्यैव वैयर्थ्यापत्तेः।

एङः । पदान्तात् किम् ? भवति ।

सर्वत्र वि । 'प्रकृत्याऽन्त' इति सूत्रात्प्रकृत्येत्यनुवर्त्तते । प्रकृतिशब्दोऽत्र स्वभाववाची, 'दुस्त्यजा प्रकृति'रित्यादौ तथा दर्शनात् । प्रकृत्या स्वभावेनावस्थानमित्यर्थः ।

अत एव प्रकृतिभावे न पूर्वरूपं, नाप्ययादय इति भावः। 'नान्तः पाद'मिति पाठे त्वनेन सूत्रेण 'गोशब्दस्य यत्प्राप्तं तन्ने'ति व्याख्यानेन—'नान्तः पाद'मित्यनेनैव पूर्वरूपत्वादिकं विकल्पेन निषिद्ध्यत इति बोद्ध्यम् ।

अवङ् । स्फोटोऽयनं यस्य सः, स्फोटप्रतिपादक इत्यर्थः । 'स्फौटायनस्ये'ति पाठे नडादित्वं कल्प्यम् । स्फोटायनोऽवङः स्मर्त्ता, अन्यस्तु तदभावस्येति स्मृत्यन्तरा-

※ अभिनव-चन्द्रिका ※

मिति । 'अथ नित्यग्रहणं किमर्थ'मित्यादिना भाष्य इत्यर्थः ।

※ चिदस्थिमाला ※

कश्चित्प्रयत्नोऽस्त्वित्यपास्तम् । ननु प्रसिद्धऋकारीयो विवृतप्रयत्न एवास्तु, अत एवाह—**विवृतेति** । हि=यतः । **सिद्धाविति** । प्रागुक्तरीत्या रूपद्वयसिद्धावित्यर्थः । वार्तिकस्य=तद्द्वयस्य । सुबन्ते ङसीतिनियमेन दोषाभावादाह—**भवतीति** । न च 'ङसि ङसोश्चे'त्यस्य 'अपदान्ताच्चेन्ङसिङसोरेवे'तिनियामकत्वान्न दोष इति वाच्यम्, 'विभक्तौ चेन्ङसिङसोरेवे'ति नियमेनापि तस्य साफल्यस्य सुवचत्वात् । एतेनोक्तरीत्या सिद्धे उत्तरार्थं स्पष्टार्थमिहैव कृतमिति **मनोरमारत्नाकरा**द्युक्तमपास्तम् । **प्रकृत्यान्तरितीति** । अत्र पाठे षाष्ठं भाष्यं मानम् । तस्याऽनेकार्थत्वादाह—**प्रकृतिशब्दोऽत्रेति** । न तु सर्वत्रेति भावः। 'प्रकृतिभाव'इत्यस्य सशेषपूरणसमासस्यार्थमाह—**प्रेति** । भावार्थोऽ**वेति**। एतेन प्रकृत्येत्यनेन गोरिति षष्ठ्यन्तमन्वयायोग्यमित्यपास्तम् । अत एव=उक्तार्थकस्य तस्यानुवर्तनादेव । भावे—सति । अन्यथा तदसङ्गतिः स्पष्टैव ।

नान्तरिति । 'इको गुणे'तिसूत्रभाष्यसम्मते इति भावः । **त्वनेनेति** । पाठान्तरैकवाक्यत्वायानन्तरस्येति न्यायानङ्गीकारेण बाध्यसामान्यचिन्ताङ्गीकारेण 'सुजाते' 'अश्वसूनृते' इत्यादौ तेन तयोर्नित्यनिषेधवदित्यर्थः। आदिना अयादिपरिग्रहः । **निषीति** । एतेन 'पूर्वरूपमेव विकल्प्यत' इति **मनोरमा**द्युक्तं,'भ्रष्टावसरन्यायेन तत्र पठितदोष' इत्यन्योक्तञ्चापास्तम् । उक्तयुक्तेः, तन्न्यायानाश्रयणाच्च ।

अयनं=परायणं, प्रतिपाद्यम् । 'कस्तस्येत्यर्थ' इति पाठः । **कल्प्यमिति** । स्फोटस्य ऋषेरपत्य-

※ ज्योत्स्ना ※

व्यवस्थितविभाषात्वमिष्यत इति भावः । **वार्तिकस्य वैयर्थ्यापत्तिरिति** । यद्यप्यर्धतृतीयमात्रत्व-

※ सदाशिवभट्टीयम् ※

चेत्यर्थः । **वैयर्थ्यापत्तेरिति** । इदञ्च वाशब्दश्चार्थ इति मते, स्पष्टञ्च तस्य तदर्थकत्वन्तुल्यास्यसूत्रस्थभाष्यप्रदीपोद्योतेषु । विकल्पार्थत्वे तु दीर्घेत्यनुवृत्त्यैव सिद्धौ विधेयनिर्देशस्य वैयर्थ्यम्बोध्यम् । एतेन विवृतत्वेपि नित्ये प्राप्ते विकल्पार्थं वचनं, तेन पक्षे यणादेशः फलमिति परास्तम् ।

एङः पदा । भवतीति । ननु भवतेरिति निर्देशोपष्टम्भेनापदान्तात् ङसिङसोरेवेति नियमात्सिद्धमिदमिति

※ विषमपदविवृतिः ※

लृकार ईषत्स्पृष्टः । विषयविशेष एव पूर्वस्य साधुत्वं, विषयविशेष एवोत्तरस्य साधुत्वमिति व्यवस्था-

नुसन्धानद्वारेणात्र विकल्पो बोद्धव्यः। **निवृत्तमिति** । अत एव'इन्द्रे इति सामर्थ्यान्नित्य'-मिति भाष्यादावुक्तम् । **गवाग्रमिति** । सन्निपातपरिभाषाया अनित्यत्वाद्दीर्घ इति

❀ चिदस्थिमाला ❀

मित्यर्थः । ननु अचि परे पदान्ते गोरवङ् साधुरित्यर्थे प्राधान्यादवङः साधुत्वं स्फोटायनेन स्वीकृतं न सर्वैरिति स्मृत्यन्तरानुसन्धानद्वारेण तस्यैव विकल्पापत्तिरिति कथं पक्षेऽवङोऽभाव इति चेन्न । साधुत्वस्यापौरुषेयतयाऽविकल्प्यत्वेनावङः श्रुतत्वेन लडादिषु प्रयोगासमवायिषु श्रुतसम्बन्धस्यैव क्लृप्तत्वेन न श्रुतावङैव सम्बन्धेन तदुपपत्तेस्तदेतदभिप्रेत्य आह—**स्फोटेति** । णात्र—न तु सर्वत्र । 'एतेन विभाषानुवृत्तेस्तत्पूजार्थ'मिति **दीक्षितदण्ड्याद्युक्तं**, 'तथैव सिद्धे तद्ग्रहणाद्व्यवस्थितविभाषे'ति**मन्दो-क्त**ञ्चापास्तम् । कार्यंशब्दमते तु न विकल्पसिद्धिर्न हि तन्मतेनावङ् कृतो नान्येनेति स्मृत्यन्तरानु-सन्धानेन विकल्पो व्याख्यातुं शक्यः । अन्येनोत्पादितस्य पुनरुत्पादनायोगात्, पाणिनिकृत-कार्यान्तराणामप्यन्येनाकरणात्सर्वत्र विकल्पापत्तेर्देवदत्तेन घटः कृतो न विष्णुनेत्येतावता घटोत्पत्ते-र्विकल्पापत्तेश्च । साधुत्वं त्वर्थापत्तिकल्प्यवाक्येनैवेति बोध्यम् । 'निवृत्तौ व्याख्यानमेव शरण'मिति **दण्डयुक्ते**रसाङ्गत्यं ध्वनयन्नाह—**अत एवेन्द्रेतीति** । एतेन मौलः सचः पाठोऽप्युपेक्ष्य इति-सूचितम् । आदिना कैयटादिपरिग्रहः । अन्यथा तस्यावश्यकत्वेन तदसङ्गतिः स्पष्टैव । ननु 'सन्निपाते'त्य-नेन दीर्घो न स्यादत आह—**सन्तीति** । 'कष्टाये'तिज्ञापकादिति भावः । इदं समूलयंस्ताः परिगण-

❀ ज्योत्स्ना ❀

पक्षेऽपि नास्ति वार्तिकस्य वैयर्थ्यम्—तथाप्यूकाल्त्वाभावादनयोर्दीर्घसञ्ज्ञा न स्यात्—तदर्थमपि-

❀ सदाशिवभट्टीयम् ❀

चेन्न । 'अनुबन्धादौ चेत्तयोरेवे'तिनियमे औपगवासिद्धेः । 'वर्णका तान्तवे' 'अनुगवमायामे' इत्यादिनिर्देशा-श्रयणेपि'शसिभिन्ने चेत्तयोरेवे'तिनियमापत्त्या इरेशब्दस्य शसि इरय इत्यस्यासिद्धिरेवेति भावः। प्रतिपत्तिगौरवन्तु स्पष्टमेवोत्तरार्थमस्यावश्यकत्वाद्न्तग्रहणं स्पष्टार्थम्, एङन्तात्पदान्तादित्यर्थेप्यलोन्त्यपरिभाषया सिद्धेः। सर्वत्रे-त्यादावपि प्रत्यासत्त्या सिद्धेः। **अवङ् स्फो**। अयनम्परायणम्प्रतिपाद्यमिति यावत्। **'कस्तस्येत्यर्थ'** इति पाठः । **स्फोटायनोवङ् स्मर्तेति** । विभाषापदानुवृत्तेस्तयोभयस्मारकत्वाच्चिन्त्यमेतदत एव प्लुतप्रगृह्येतिसूत्रे नित्य-ग्रहणङ्किमर्थं ? विभाषा माभूत्, पूर्वस्मिन्नेव योगे विभाषाग्रहणं निवृत्तमिति भाष्ये पूर्वस्मिन्योग इत्येकवचनं सङ्गच्छते, निवृत्तपदस्वारस्यञ्च। तत्र **कैयटोपि**–पूर्वस्मिन्निति । इन्द्रे चेत्यत्रेत्यर्थ इति–व्याख्यत् । तत्रो**द्योत**-प्यारम्भसामर्थ्यादिति भाव इत्युक्तम् । अत एव सामर्थ्यान्नित्यमित्युत्तरग्रन्थसङ्गतिः । स्फोटायनग्रहणस्य पूजार्थत्वे हि तत्सङ्गच्छतेऽन्यथा मतान्तरे तस्मिन् तत्सिद्धये तस्यावश्यकत्वात्तदसङ्गतिः स्पष्टैव । **भाष्या-दाविति** । यद्यपि कण्ठरवेण भगवता नैवमुक्तन्तथापि पूर्वस्मिन्नेव निवृत्तमिति निर्हेतुकं वदन्नुक्तं हेतुं प्रसिद्धत्वादभिप्रैतीति भावः । उक्तभाष्यस्य योगविभागसामर्थ्यान्नित्यमित्यभिप्रायकत्वेनापि सुयोजत्वा-दुक्तमा**दाविति** । तेन वृत्त्यादिपरिग्रहः, अत एव गवोद्घादयः प्रयोगा भाष्ये सङ्गच्छन्त इति दिक् ।

अनित्यत्वाविति । अनेन यथा सन्निपातपरिभाषाशेषस्यपरिभाषेन्दुशेखरविरोधो न तथा तत्रैव तद्वि-वृतिसङ्ग्रहे स्पष्टम्। **देवत्रातेत्यादि** । 'नुदविदे'ति नत्वं सञ्ज्ञायान्न। देवेत्युपलक्षणं–भवत्रातादेः । क्रिया-शब्दे वा, अचि विभाषे'ति लत्वं–प्राण्यङ्गे नित्यं, विषेनैव, क्रियाशब्दे वा। 'विभाषा ग्रह'इति णो जलचरे नित्यं

❀ विषमपदविवृतिः ❀

ऽङ्गीकारादेव। वस्तुत लृकारात्परत ऋकारस्य प्रयोगे न मानम्। उक्तव्यवस्थाङ्गीकारे प्रमाणमाह—**अत एव वार्तिके** इत्यादिना–सङ्गच्छत इत्यन्तेन । अत एव=ह्रस्वऋकारद्वयेत्यादिव्यवस्थाङ्गी-कारादेव। **अयनं यस्येति** । स्फोटस्यायन आश्रय इति षष्ठीतत्पुरुष इति केचित्। **अन्यस्तदभाव-**

बोद्धयम् । व्यवस्थितेति । 'देवत्रातो गलो ग्राह इतियोगे च सद्विधिः । मिथस्ते न विभाष्यन्ते गवाक्षः संशितव्रतः । तेन प्राण्यवयवे ने'ति 'शाच्छो'रिति सूत्रे भाष्ये स्पष्टम् । 'अग्नीत्प्रेषणे' इति सूत्रे 'अग्नीदग्नीन्विहरे'त्यत्र एतद्व्यावृत्त्यर्थं वार्तिककृद्बहुल-ग्रहणघटितं न्यासं कृतवान् । तत्प्रत्याख्यानाय भाष्ये कृतेन विभाषेति योगविभागेन विभाषे-त्यस्य व्यवस्थितविभाषात्वं ध्वनितम् । तथा 'अजेर्व्यघञपोरिति च व्यवस्थितविभाषे'ति

❀ अभिनव-चन्द्रिका ❀

व्यवस्थितविभाषयेति । तत्त्वञ्च-विभाषाशास्त्रीयोद्देश्यतावच्छेदकव्याप्यरूपव्यापकभावा-भावान्यतरविधायकत्वम् । देवत्रात इति । 'नुदविदोन्दत्रा' 'अचि विभाषा' 'ल्टः सद्वा' 'सर्वत्र

❀ चिदस्थिमाला ❀

यति–**देवेति** । 'नुदविदोन्दत्रे'ति नत्वं सञ्ज्ञायां न भवति । देवग्रहणं सञ्ज्ञोपलक्षणार्थं, 'क्तिक्तौचे'ति क्तः, तेन भवत्रात इत्यादावपि तत्त्वान्नत्वं न, यदातु क्रियाशब्दस्त्राणन्त्रात इति, तदा नत्वविकल्पः। 'अचि विभाषे'ति लत्वं प्राण्यङ्गे नित्यं, विषे नैव, क्रियाशब्दे तूभयं । 'विभाषा ग्रह' इति णप्रत्ययो जलचरे नित्यं, रविगुर्वादिरूपे ज्योतिषि पचाद्यजेव, क्रियाशब्दे तूभयम् । 'लक्षणहेत्वो'रितिशत्रादिविधिर्हन्तीति पलायते इत्यादाविति प्रयोगे न भवति । ते=नत्वादयो मिथः=एकस्मिन्विषये, न विकल्प्यन्ते, किन्तु विषयभेदेने-त्यर्थः । वातायने नित्यमवङ्, प्राण्यङ्गे गोरक्षि गोऽक्षीति, गवाङ्गं–गोङ्गमित्यादौ विकल्पः । 'शाच्छोरे'ति इत्वं व्रतविषये नित्यं, तेन संशितो ब्राह्मण इत्यस्यापि सिद्धिः, अन्यत्र विकल्प इति बोध्यम् । प्रकृते आह— **तेनेति । नेदं परिगणनमिति** । तत्रस्थचेन भाष्योक्तान्यसङ्ग्रह इति ध्वनयन्नाह—**अग्नीदिति** । 'न्यासं कृतवा'नित्यत्रान्वयः । **एतदिति** । अग्नीदिति प्लुतेत्यर्थः । **घटितमिति** । तथोक्तेऽनतिप्रसङ्गाय 'ओश्रावया-श्रावयोः परस्य चे'ति न्यासान्तरे कृतेऽन्यसङ्ग्रहाय 'बहुलमन्यत्रापी'ति न्यासान्तरमित्यर्थः । **एतदिति** । उभयेत्यर्थः । तदव्यवहितेऽग्रिमे 'विभाषा पृष्टे'तिसूत्रे इति भावः । **ध्वनितमिति** । अन्यथा बहुलग्रहण-सत्त्वे ओश्रावयाश्रावयाभ्यामन्यत्राग्नीत्प्रेषणे बहुलं प्लुतस्तत्रापि तत एव नादेर्न परस्य, अपि त्वन्त्यस्यैव, तत्र

❀ ज्योत्स्ना ❀

फलान्तराश्रयणे गौरवं स्यादतो द्विमात्रत्वमीषत्स्पृष्टत्वमिति पक्षोऽत्राङ्गीकृतः ।

❀ सदाशिवभट्टीयम् ❀

सूर्यादौ न, क्रियाशब्दे वा । 'लक्षणहेत्वो'रिति शत्रादिविधिर्हन्तीति पलायत इत्यादाविति शब्दप्रयोगे न । ते =नत्वादयो मिथ एकस्मिन् विषये न विकल्प्यन्ते, किन्तु विषयभेदेनेत्यर्थः। एवं वातायने नित्यमवङ्, प्राण्यङ्गे न, गवाङ्गमित्यत्र वा । शाच्छोरितीत्वं व्रतविषये नित्यं–संशितो ब्राह्मणः, अन्यत्र वेति बोध्यमित्याहुः ।

नेदम्परिगणनन्तेन भाष्योक्तान्यसङ्ग्रह इत्याह—**अग्नीदिति** । **एतदिति** । अग्नीदिति प्लुत इत्यर्थः । **घटितमिति** । उक्तोदाहरणेनतिप्रसङ्गाय 'ओश्रावयाश्रावयोः परस्य चे'ति न्यासान्तरे कृतेऽन्यसङ्ग्रहाय 'बहुलमन्यत्रापी'ति न्यासान्तरमित्यर्थः । **विभाषेति** । तदग्रिमे'विभाषा पृष्टे'तिसूत्रीयेत्यर्थः। **ध्वनितमिति** । अन्यथा बहुलग्रहणसत्त्वे ओश्रावयाश्रावयाभ्यामन्यत्र बहुलं प्लुतस्तत्रापि तत एव नादेर्न परस्यापि त्वन्त्यस्य नित्यं, योगविभागे तु नैव व्यवस्थेति प्रत्याख्यानासङ्गतिरिति भावः । **इति च व्यवस्थितेति** ।

❀ विषमपदविवृतिः ❀

स्येति । अन्योऽवङो न स्मर्त्तेत्युक्तौ–तदभावस्य स्मर्त्तेत्यर्थाल्लभ्यते इति भावः । **देवत्रात इति** । अत्र पक्षे नत्वं न । गलः—अत्र पक्षे लत्वाभावो न । ग्राहः–अत्र पक्षेऽच् न । इतियोगे सद्विधिः,

'अजेर्वी'तिसूत्रे भाष्ये स्पष्टम् । **न** च व्यवस्थितविभाषयेन्द्रे नित्यावङि सिद्धे 'इन्द्रे च'-ति व्यर्थमिति वाच्यं, भाष्योक्तातिरिक्तव्यवस्थितविभाषाणामप्रामाणिकत्वज्ञापनार्थं तत्सत्त्वादित्याहुः ।

इन्द्रे च । क चिद्भाष्यपुस्तके 'च'शब्दरहितः पाठः । इन्द्रावयवेऽचीत्यर्थस्तेन षष्ठीतत्पुरुषोत्तरपदषष्ठीतत्पुरुषे 'गवेन्द्रयज्ञ' इत्यादाववङ्सिद्धिः। अन्यथा वाक्ये गोशब्द-स्येन्द्रपरत्वासम्भवेन समासाक्षेपादिन्द्रशब्दस्योत्तरपदत्व एव प्रवृत्तिः स्यात् ।

❀ चिदस्थिमाला ❀

तु नित्यं, योगविभागे तु नैवं व्यवस्थेति प्रत्याख्यानासङ्गतिरिति भावः । स्पष्टान्तामाह—**तथेति** । अयं भाष्यसमुच्चायकः । चो व्यवस्थितविभाषासमुच्चायकः.। पूर्वसूत्राद्वेत्यनुवर्त्य–प्रवेतुं, प्रवीतः, संवीतिः, समाजः समजः, उदाजः,उदजः, समजनमुदजनं,समज्या, प्राजितेति सिद्ध्यर्थं तत्त्वं स्पष्टं तत्रोक्तम् । सकलग्रन्थासाङ्गत्यं ध्वनयन्नाह—**नचेति** । परिगणितविषयातिरिक्तविषयकाणामप्यङ्गीकारे इति भावः । परिगणितविषय-कान्यप्रागुक्तसङ्ग्रहायाह—**भाष्योक्तेति** । तत्तद्विषयकेत्यादिः । एतेन 'तयैव सिद्धे तद्व्यर्थमिति त्याज्य-मेवे'ति **दण्डयुक्तम्**, 'अस्मास्तत्त्वस्य भाष्यादिसम्मतत्वेन ज्ञापितेपि सार्थक्याभावेन ज्ञापनासम्भवादिदम-युक्तमेवञ्चोक्तरीत्या व्यर्थमेवेद'मिति **मन्दोक्तं** चापास्तमुक्तयुक्तेर्लक्ष्यभेदेन लक्षणभेदेन–ऐक्येपि–तत्रांशे एव तत्त्वस्य स्फुटमङ्गीकारादन्यथा गवाग्रमित्यादावपि तथा स्यादिति दिक् । भाष्यसिद्धान्तमाह—**इन्द्रावेति** । सप्तमी तु प्राग्वत् । अचीत्यनुवृत्तिसामर्थ्यादिदं लब्धं, तदुक्तं भाष्ये–नैवं विज्ञायते—इन्द्रेचेति ? कथं तर्हि? अचोचीन्द्रे इति । यथाचैतत्तथा **स्पष्टमुद्योते** । ननु उत्तरपदाक्षेपे गमकाभावाद्यथाश्रुतव्याख्यानेनैव तत्रापि सिद्धिरिति किमर्थमनुवृत्त्या प्राग्वद् व्याख्यानमत आह—**अन्यथेति** । तथा व्याख्यानानङ्गीकारे इत्यर्थः। **वाक्ये इति**। विभक्त्या व्यवधानात्। द्वयोरनुकरणे तु न प्राप्तिरभिव्यक्तेति न्यायादिति भावः। **क्षेपा-दिति** । तथाच तेनोत्तरपदाक्षेपः, तदाह-**स्योत्तरेति** । एवेनोक्तस्थलव्यावृत्तिः । न चेदानीमपि वाक्येऽ-सम्भवात्समासाक्षेपस्तुल्य इति तदाक्षेपे उत्तरपदेन्द्रावयवेचीत्यर्थापत्तौ दोषतादवस्थ्यमिति वाच्यम्, आक्षे-

❀ सदाशिवभट्टीयम् ❀

तेन ण्वुलादौ नित्यम्, वलादौ वा, घञपोर्नेति भावः । **इन्द्रे चेति व्यर्थमिति** । इतोपि ग्रन्थस्वरसात् स्फोटायनग्रहणस्य पूजार्थतैव लभ्यते । **अप्रामाणिकमिति** । यं यं विषयमुपादाय यस्य यस्य व्यवस्थित-विभाषात्वमुक्तन्तदितरविषयकस्य तस्य तस्य तत्त्वमप्रामाणिकमिति भावः । **परत्वासम्भवेनेति** । विभक्त्या व्यवधानादिति भावः । अनुकरणे त्वभिव्यक्तेति न्यायादिति भावः । यत्तदेतेभ्य इत्यादा-वत्त्ववदनुकरणस्य प्रकृतिवद्भावे सम्भवोऽस्त्येवेति । **समासाक्षेपेति** । तेन चोत्तरपदाक्षेपः, सिद्धान्ते त्वजनु-वृत्तिसामर्थ्येन न तदाक्षेप इति भावः । इदञ्च नव्यरीत्या मनो नारोहति, तथापि भाष्योक्तमित्येतावता सन्तोष्टव्यमिति दिक् । अन्येत्विदम्प्राचामनुरोधेनोक्तं, स्वमते तूत्तरपदेत्यस्याध्याहारस्तत्फलञ्च त्रिपदद्वन्द्व-बहुव्रीह्योर्गविन्द्रदेवदत्ता गविन्द्रप्रिय इत्यादावप्रवृत्तिरत एव प्रकृतसूत्रे इन्द्रादाविति वक्तव्यमित्युक्तं, तस्य चायं भावस्त्रिपदेऽतिव्याप्तिवारणायाजादाविन्द्रशब्द उत्तरपद इत्यर्थे गवेन्द्रयज्ञेऽव्याप्तिरत इदं वक्तव्यन्त-दर्थस्त्विन्द्रस्यादिर्योऽच् तदादावुत्तरपद इति नाव्याप्तिरितीन्द्रशब्दे योऽच् तदादावुत्तरपद इत्यर्थमाश्रित्य

❀ विषमपदविवृतिः ❀

=शतृशानचोर्विधिः । मिथः=एकैकस्मिन्नर्थे ते=नत्वादिविधयो न विभाष्यन्ते=न विकल्प्यन्ते, किन्त्व-र्थभेदेनैव भावाभावयोर्व्यवस्थेत्यर्थः । **अप्रामाणिकत्वज्ञापनार्थं इति** । वस्तुतो व्यवस्थितविभाषाया अगतिकगतिकत्वज्ञापनार्थम् । **इन्द्रेचेति** ? । एवमेव विकल्पे प्राप्ते नित्यार्थविधयः सङ्गच्छन्ते ।

'प्लुतप्रगृह्या' इत्यस्य 'प्रकृत्ये'ति पाठे एव सामञ्जस्यम्मत्वाऽऽह—**अथ प्रकृतीति**। न चैतद्घटकपदार्थज्ञानाय प्रगृह्यत्वादिकथनं पूर्वं युक्तमिति वाच्यम्, 'इन्द्रे चे'त्यत्र प्राचीनपठितनित्यग्रहणस्य प्रामादिकत्वं बोधयितुं तदव्यवहितमेतत्सूत्रलेखनात्। तत्र नित्यग्रहणे तदव्यवहितोत्तरैतत्सूत्रे तद्वैयर्थ्यं स्पष्टमेवेत्याशयेनाह—**प्लुताः प्रगृह्याश्च वक्ष्यन्ते इति**। अचीत्यनुवर्त्तमाने पुनरज्ग्रहणं प्रत्यासत्त्या यत्राच्यनयोः प्रकृतिभावस्तदज्निमित्तकार्यस्यैव तेनाभाव इत्यर्थलाभार्थं, तेन जानु उ अस्य रुजति—जानू अस्येत्यादौ सवर्णदीर्घरूपसन्धिर्भवत्येव। **एहि कृष्णेति**। 'दूराद्धूते चे'ति प्लुतः। अत्र

❀ अभिनव-चन्द्रिका ❀

विभाषा' 'शाच्छोः' एतानि कारिकोक्तलक्ष्यविषये व्यवस्थितविभाषया प्रवर्त्तन्ते इत्यर्थः।

आक्षेपादिति। श्रुतार्थापत्त्येति भावः। **भवत्येवेति**। नच'प्लुतप्रगृह्या'इत्येव सिद्धे अचीत्यनुवृत्तिसामर्थ्यादेव यदज्निमित्तकः प्रकृतिभावः तदज्निमित्तकसन्धिकार्यस्यैवाभावोऽनेन भवतीति—जानु उ अस्य रुजति—जान्वस्य रुजतीत्यादौ न दोष इति सूत्रेऽजिति व्यर्थ-

❀ चिदस्थिमाला ❀

स्यानुपपत्तिमूलकत्वेन पूर्वत्र तथा सत्त्वेपीदानीं तदभावेन तत्र मानाभावेन तथार्थासम्भवात्, अचीत्यनुवृत्तिवैयर्थ्यापत्तेश्चान्यथा भाष्याविरोधापत्तेश्च। एतेन 'तथा दोषादिदं चिन्त्यं, तस्माद्गौणमुख्यन्यायेन निर्वाहोऽस्यैवत्परिभाषया वे'ति **मन्दोक्त**मपास्तमुक्तयुक्तेः। गौणत्वस्याप्रधानत्वान्यस्य तत्र ग्रहणाद्वर्णप्राधान्येन तस्या अप्यप्रवृत्तेः, अन्यथा भाष्यविरोधापत्तेश्चेति दिक्। यत्तु **दण्डिरत्नाकरादयः** "–अथ प्रकृतीत्यपपाठः, सर्वत्रेति प्रागेव तस्योक्तत्वात्। यद्वाऽवङ् इन्द्रेचेतिसूत्रद्वयं तत्प्रकरणस्थमपि तद्वाह्यं वाच्यं, ताभ्यां तदविधानात्, नच प्रकृतिभावापवादत्वादवङनुवृत्त्यर्थत्वात्तत्प्रकरणस्थत्वं, पूर्वरूपापवादत्वस्यापि तुल्यत्वात्। तत्प्रकरणपाठस्य च गोशब्दानुवृत्त्यर्थत्वात्। एवञ्च स्वलेख्यप्रकृतिभावप्रकरणाद्बहिस्तत्सूत्रद्वयं लिखितं, तत्प्रसङ्गात्सर्वत्रेति सूत्रमपि तत्रैवेति सिद्धस्य गतिर्बोध्या–"इति, तदसदिति ध्वनयन्नाह—**प्लुतेति**। एतेन पाठान्तरव्यवच्छेदः। अध्याहाराद्यापत्तेर्बाध्यसामान्यचिन्ताश्रयणाच्चेति भावः। पूर्वत्र तूभयथापि अन्त्यसद्भावेप्याद्याभावेनान्वयः प्रागुक्त एवैतदर्थमिति बोध्यम्। एतेन 'अयं ग्रन्थः सर्वत्रेतिसूत्रात्पूर्वमेव वक्तुं युक्त' इत्यपास्तम्।

उत्तरग्रन्थमवतारयति—**नचैतदिति**। पदार्थबोधस्य वाक्यार्थधीहेतुत्वात्। व्युत्क्रमेणाह—**प्रेति**। आदिना प्लुतपरिग्रहः। तदेवाह—**तत्र हीति**। हि=यतः। **तदिति**। नित्यग्रहणेत्यर्थः। **अचीति**।

❀ सदाशिवभट्टीयम् ❀

तत्प्रत्याख्यानमित्याहुः। **प्लुतप्र**। वैपरीत्येनाह—**प्रगृह्यत्वेति**। **वैयर्थ्यमिति**। पूर्वसूत्रे नित्यग्रहणं पठद्भिरुत्तरसूत्रेऽपठनादिदञ्चिन्त्यम्। इह भाष्ये पठितमिति प्रामाणिकमिति वाशयः। **अनुवर्तमानेति**। जानु उ रुजतीत्यादौ पूर्वेण सन्धिवारणायेति भावः। **तेन जानू इति**। नचेण्ङिशीनामित्युक्तरीत्यासिद्धमेवेदमिति वाच्यम्, उ अस्येत्यनयोः पूर्वं सम्बन्धे पश्चाज्जानुपदसम्बन्धे प्रकृतिभावस्यैवान्तरङ्गत्वात्।

वाग्रहणेति। विभाषाग्रहणेत्यर्थः। **बाधकेति**। परत्वादिति भावः। यद्यपि नेति वाच्ये प्रकृत्येत्युक्त्या पूर्वेषां सर्वेषामिव परस्यापि ह्रस्वस्याभावः। 'नान्तःपादे'ति पाठेपि बाध्यसामान्यचिन्तया सिद्धः, अन्यथाऽनन्तरसन्धिकार्यस्यैव निवृत्तिः स्यान्न तु सर्वेषां, तथापि ऋत्यक इत्यत्रापि बाध्यसामान्यचिन्तावश्यकत्वेन 'हरी ऋच्छत' इत्यत्रापवादविप्रतिषेधाद्ध्रस्वः स्यात्। तदर्थं नित्यग्रहणम्, इकोऽसवर्णे इत्यत्र तु न बाध्यसामान्य-

❀ विषमपदविवृतिः ❀

सामञ्जस्यमिति। नेति पाठे तु प्लुतप्रगृह्याणामिति षष्ठीनिर्देशः स्यादिति भावः। **प्लुतप्रगृह्या**। **जानू अस्येति**। नन्वत्र स्थानिवत्त्वेन प्रगृह्यत्वं वाच्यन्तच्च दुघर्टं, नव्यमते तस्यालधर्मवृत्तित्वादिति

प्लुतस्याऽऽश्रयात्सिद्धत्वं बोध्यम् । **नित्यमिति किमिति** । वाग्रहणनिवृत्त्यैव तल्लाभ इति प्रश्नः । **मा भूदिति** । नित्यग्रहणसामर्थ्येन पुनर्विधानाद्बाधकविषयेऽप्ययमेवेति भावः ।

इकोऽसवर्णे । 'एङ'इत्यतः 'पदान्ता'दित्यनुवृत्तं—प्रथमया विपरिणम्यत इत्याह—**पदान्ता इति । वेति** । ह्रस्वयणोर्विधानसामर्थ्यात्तु न विकल्पसिद्धिः । अपदान्तादौ यणश्चरितार्थत्वात् । **सामर्थ्यादेवेति** । चेन प्रकृतिभावाकर्षणेऽपि 'ऋत्यक' इत्यत्र चानुकृष्टत्वेन तदसम्बन्ध इति तदर्थं ह्रस्वविधानसामर्थ्यस्याऽऽवश्यकत्वेन चकारो व्यर्थ

ॐ अभिनव-चन्द्रिका ॐ

मिति वाच्यम्, जानु उ जानू इत्यत्र प्रकृतिभावाभावायाऽचीत्यनुवृत्तेस्तदर्थक्येन वैयर्थ्याभावान्निरुक्तार्थकल्पनासम्भवात्। **अयमेवेति**। ननु 'इको यणचि' पदस्य शाकल्यस्य ह्रस्वः' 'ऋत्यक'इत्येवसूत्रत्रयमस्तु, तथा च हरी एतावित्यादौ परत्वादयमेव प्रकृतिभावो यथा स्यादिति नित्यग्रहणं व्यर्थं, नच 'इक' इत्यपि व्यर्थम्, 'ह्रस्वस्य पिति' 'दीर्घा'दितिसूत्राभ्यां ह्रस्वदीर्घानुवृत्त्यैव सिद्धेः । 'हे दैत्य अत्रे'त्यादौ परत्वात्सवर्णदीर्घेण बाधान्न यणिति वाच्यम्, यातिरित्यादौ स्थानिवद्भावेन यणापत्तेः । पूर्वस्यैव विधौ स्थानिवद्भावेन सवर्णदीर्घाप्राप्त्या सवर्णदीर्घप्रवृत्तियोग्यसवर्णात्वावच्छिन्नातिरिक्ताच्परकत्वस्य सत्त्वात् । गोमयशब्दादाचारक्विबन्तात्क्विचि अतोलोप–यलोपयोर्गोमतिरित्यादौ यणापत्तेश्चेति चेन्मैवम्, 'अप्लुतवदुपस्थिते' इत्यत्रासवर्णग्रहणानुवृत्तये यथाश्रुतन्यासस्यावश्यकत्वात् । अत एव 'ई चाक्रवर्मणस्ये'ति सूत्रस्थ-ई-ग्रहण–तत्प्रत्याख्यानयोर्न फलभेद इति दिक् ।

चानुकृष्टत्वेनेति । वस्तुतस्तु अस्य चकारस्यानुवृत्त्यर्थकत्वेन निवृत्त्यर्थकत्वाभावाच्चानु-

ॐ चिदस्थिमाला ॐ

इको यणचीत्यतः। 'अज्निमित्ते'ति बहुव्रीहिः। तेन=प्रकृतिभावेन । उञो 'निपात' इति प्रगृह्यत्वं । ननु प्लुतस्यासिद्धत्वमत आह—**अत्रेति** । प्रकृतिभावे इत्यर्थः। **श्रयादिति**। तमनूद्यैतद्विधानात् । 'अतो रो'रितिवत् । प्लुतभावीति तु न व्याख्यातं, लक्षणायां मानाभावात् । 'सुश्लोका इती'त्यादौ एकादेशेन प्लुतनिवृत्त्यप्रसङ्गाच्चेति **हरदत्तादयः** । ननु नित्यग्रहणं वाननुवृत्त्यर्थमिति स्पष्टतया प्रश्नासङ्गतिः, अज्ञानेन प्रश्नेपि तथोत्तरे वाच्येऽन्यथोत्तरासङ्गतिरत आह—**वाग्रहणेति** । नन्वेतदर्थकेन तेन कथं तन्निवृत्तिरत आह—**नित्येति** । **बाधकेति**। परत्वात्। प्रथमया=तदन्तेन । यत्तु शाकल्यग्रहणमुत्तरार्थं ह्रस्वयणोर्विधिसामर्थ्यादेव पर्यायसिद्धेः । सवर्णेच्चि दीर्घविधानेनासवर्णे एव तद्विषयत्वादिति, तत्खण्डयति—**ह्रस्वेति** । आदिना 'वाप्यश्व' इत्यादिपरिग्रहः । तथाच ह्रस्वस्य तदपवादत्वापत्तिरिति भावः । एवेनोक्तप्रकारस्याश्रयणीयत्वं सूचित-

ॐ ज्योत्स्ना ॐ

अपदान्तादाविति । गौर्यावित्यादौ । आदिपदाद्वाप्यश्व इति समासादिर्गृह्यते । **एतेनेति** । पदान्त-

ॐ सदाशिवभट्टीयम् ॐ

चिन्तावश्यकत्वं, तद्विषये यण एव प्राप्तेरिति बोध्यम् । **प्रथमयेति** । तदन्तेनेत्यर्थ. । सर्वत्रेत्यादौ सप्तम्यन्ततया विपरिणतत्वेन, 'दिव उ' दित्यत्रापि तथैवोपयोक्ष्यमाणत्वेन चेहैव विपरिणामः किमर्थं इति चिन्त्यम् । अथवेकः पदान्तस्य प्रकृत्यावस्थानमित्यर्थे सर्वत्र षष्ठ्यैव विपरिमाणोऽस्तु ।

ॐ विषमपदविवृतिः ॐ

चेत्सत्यम् । परादिवद्भावेनैव प्रगृह्यत्वाङ्गीकारात् । **अपदान्तादाविति** । आदिपदेन समासादौ ।

इति भाव. । **भाष्ये स्थितमिति** । 'प्रकृतसूत्रे' इति शेषः । एतेन 'ह्रस्वाभावे प्रकृतिभावार्थं चकार' इति न्यासाद्युक्तमपास्तम् । 'चक्री अत्रे'ति तु संहिताया अविवक्षायां बोध्यम् । 'न समासे सिति चे'ति वार्त्तिकम् । **पार्श्वमिति** । 'पर्श्वा णस् वक्तव्य' इति णस् । 'सिति चे'ति पदत्वम् ।

ऋत्यकः । सवर्णार्थमनिगर्थञ्चेदम् । होतृ ऋकारः । ब्रह्म ऋषिः । **आर्छदिति** । आटो धात्ववयवत्वेनापदान्तत्वादिति भावः । एतेन 'आटश्चे'ति पुनर्वृद्धिविधानार्थेन चेन उस्योमाङ्क्षु पररूपबाधवत्प्रकृतिभावस्यापि बाधेनेष्टसिद्धिरित्यपास्तम् ।

समासेऽपीति । व्याख्यानादिति भावः । **सप्त ऋषीणामिति** । 'दिक्सङ्ख्ये' इति समासः ।

❀ अभिनव-चन्द्रिका ❀

कृप्तपरिभाषाया अप्रवृत्तेश्चिन्त्यमेतत् । **वाचकस्येति** । प्रत्यभिवादे नामगोत्रान्यतरोच्चारणस्य

❀ चिदस्थिमाला ❀

त्तदाह–**चेनेति** । अत्रेति शेषः । तथा च-एवासङ्गतिरिति भावः । **तदसम्बन्ध इति** । तदापत्तिरित्यर्थः । ननु 'लुटि च कॢप'इतिसूत्रभाष्येऽनुवृत्त्यर्थं सर्वचकाराः प्रत्याख्याता एवेत्येवमुक्तिरसङ्गतेति चेन्न । विधेयान्तरासमभिव्याहृतानामेव तेषां तत्र प्रत्याख्यानेन तत्समभिव्याहारे तावतैवाकाङ्क्षाशान्तेः पूर्वासम्बन्धसम्भावनया तदावश्यकत्वप्राप्तेस्तदेतद्ध्वनयन्नाह—**प्रकृतेति** । एतेन व्याख्यानमपास्तम् । ननु ह्रस्वस्य वैकल्पिकतया तदभावे प्रकृतिभावार्थं चकारस्तेन चक्री अत्रेत्यादिसिद्धिस्तस्यापि तत्त्वात्पक्षे चक्र्यत्रेत्यपीति चेन्न । भाष्यप्रामाण्येन तदभावे तदभावात्, भाष्यविरुद्धसूत्राशयकल्पनापेक्षया तथैव तस्यौचित्यात्, तदाह–**एतेनेति** । भाष्यविरोधेनेत्यर्थः । नन्वेवं कथं तस्य सिद्धिरत आह—**चक्रीति** । यत्तु इको यणीति इग्ग्रहणादिको यणेव क्वचिद्यथा स्यादित्यर्थकाद्वाप्यश्व इत्यादिसिद्धमन्यथा ह्रस्वदीर्घानुवृत्त्या प्लुते प्रकृतिभावात्, अवर्णादौ गुणादेर्बाधकत्वात्सिद्धे किन्तेनेति, तन्न, वचनं विना विषयविवेकाज्ञानेन तदसम्भवाद्, गौरवात्, पचतीत्याद्यर्थत्वाच्च । तदेतद्ध्वनयन्नाह—**न समेति** । वार्तिकमित्येकवचनेन भाष्ये एकं वार्तिकमिति सूचितम् । **पार्श्वमितीति** । पर्शूनां समूह इत्यर्थः । **पदत्वमिति** । तेन भत्वनिमित्तक 'ओर्गुण'इति गुणो न । ननु इकि पूर्वेण सिद्धिरिति ऋत्यस्येत्येवास्तु, किञ्चाकोसवर्णे इत्येकसूत्रमेवास्त्वत आह–**सवर्णेति** । अत एव सप्तर्षीणामित्यत्र 'न समास' इति निषेधो नेति भावः । तयोः क्रमेण लक्ष्ये आह—**होत्रिति** । आडोऽभ्रमायाह—**आट इति** । **एतेनेति** । उक्तरीत्या प्राप्तेरेवाभावेनेत्यर्थः । विनिगमनाविरहस्तु न,

❀ ज्योत्स्ना ❀

ग्रहणानुवृत्त्या आर्च्छेदित्यादेर्व्यावर्त्तनेनेत्यर्थः । **इत्यपास्तमिति** । न चान्यार्थमवश्यवक्तव्ययोक्तयुक्त्यैवा-

❀ सदाशिवभट्टीयम् ❀

प्रकृतसूत्रेति । लुटि चेति सूत्रस्थचकारप्रत्याख्यानपरम्भाष्यन्तु विधेयान्तरासम्बद्धचकारविषयकमिति बोध्यम् । **एतेनेति** । भाष्यविरुद्धकल्पनापेक्षया सामर्थ्यसिद्धार्थानुवादकत्वस्य चकारे उचितत्वेनेत्यर्थः । 'वार्तिक'मित्येकवचनेन भाष्ये एकं वचनमिति सूचितम् । **अपास्तमिति** । पदान्तादित्यनुवृत्तिर्बिहुऋच्छकेत्यत्र बहुच्यतिप्रसङ्गभङ्गायावश्यकीति भावः । **व्याख्यानादिति** । तद्वैरस्याभावे मानाभावादित्यर्थः । **प्रकरणेति** । प्रतिज्ञया तात्पर्य-

❀ विषमपदविवृतिः ❀

वार्तिकमिति । वक्तव्यपदाभावात्सूत्रत्वभ्रमवारणायेदम् । **एतेनेति** । पदान्तग्रहणानुवृत्त्यैवार्च्छेदित्यादेर्व्यावर्त्तनेनेत्यर्थः । **अपास्तमिति** । नचान्यार्थमवश्यमाश्रयणीयेन चकारेणैव प्रकृतिभाव

प्रकरणशुद्धये प्रकृतिभावविधायकसूत्रद्वयमुपन्यस्य 'प्लुतप्रगृह्या' इतिसूत्राकाङ्क्षितप्लुतप्रगृह्ययोर्मध्ये प्रथमोपात्तत्वात्प्लुतप्रकरणमारभते—**वाक्यस्य टेः** । वाक्यस्येत्यभावे पदस्य टेरित्यर्थेऽनन्त्यस्यापि पदस्य टेः प्लुतः स्यात् । तत्सत्त्वे तु वाक्यस्य टिरन्त्यपदस्यैव सम्भवतीति न दोषः । टिग्रहणाभावे प्लुतश्रुत्योपस्थिताच्परिभाषयाऽजन्तस्यैव स्यात् । टिग्रहणे तु तत्सामर्थ्याट्टिनाऽचो विशेषणाद्व्यञ्जनान्तस्यापि भवति ।

प्रत्यभिवादे । प्रणामादिभिराशिषं वाच्यमानो गुर्वादिर्यत्प्रतिसम्भाषते तत्प्रत्यभिवादः, न त्वाशीर्वचनं, शूद्रे आशीर्वादरूपप्रत्यभिवादाभावेनाशूद्रे इत्यस्य वैयर्थ्यापत्तेः । अत एव भाष्ये 'अशूद्रे इति किं ? कुशल्यसि तुषजके'त्युक्तम् ।

❀ अभिनव-चन्द्रिका ❀

नियतत्वेन वार्तिकेन स्वरूपग्रहणं, भोशब्दांशे त्वसम्भवात् स्वरूपग्रहणमेव, न पर्यायग्रहण-

❀ चिदस्थिमाला ❀

तदनुवृत्तेः क्लृप्तत्वात् । अनन्तरस्येति न्यायेन तस्य पररूपमात्रबाधकत्वात् । बहुचि बहृच्छकइत्यादिव्यावृत्त्यर्थं तस्यावश्यकत्वाच ।

व्याख्यानादिति । ज्ञापकपरभाष्यप्रामाण्यात्सित्साहचर्याच्च तस्य पूर्वसूत्रमात्रविषयकत्वात् । तद्वदस्याभावे मानाभावाच्चेत्यर्थः । **प्रकरणेति** । प्रतिज्ञया तत्र तात्पर्यबोधनात् । **प्रकृतीति** । लौकिकमिति भावः । **द्वयमिति** । तावत एव सत्त्वादिति भावः । **प्रथमोपेति** । पूर्वोपस्थितनिमित्तकत्वेनान्तरङ्गत्वादित्यर्थः । एतेन प्रथमत्याग इतिन्यायस्यात्रानाश्रयणादिदं चिन्त्यमित्यापास्तम् । टेरित्येति पाठः । **पदस्येति** । तस्याधिकृतत्वादितिभावः । **त्यर्थे**=तदापत्तौ । अपिनेष्टान्त्यसमुच्चयः । नन्वेवं टिग्रहणं व्यर्थं, तस्यान्त्यास्याच एव तत्प्रवृत्तेरत आह—**टीति** । सम्भवतीति न्यायेनाह—**अजन्तस्यैवेति** । नपुंसकह्रस्वत्ववदिति भावः । 'तत्सामर्थ्या'दितिपाठः । टिग्रहणसामर्थ्यादिति तदर्थः । अन्यथा 'त'दित्यादिः । एवञ्च न तन्न्यायप्रवृत्तिस्तदाह—**टिनेति** । विशेषणात्=विशेष्यीकरणात् । एवमग्रेपि । **तस्यापीति** । वाक्यस्येति भावः । एवम्प्रागपि बोध्यम् । यत्तु **हरदत्तदण्डिरत्नाकरादयः**—आशीर्वचनं प्रत्यभिवादः । तत्रैव प्रसिद्धत्वात्तथा च शूद्रभिन्नविषयकाशीर्वादवृतिवाक्यमित्यर्थं इति, तन्न, भाष्यविरोधात् , तदाह—**प्रणामेति** । आशिषं=तदादिकं, यदर्थरूपं बोधयितुमिति शेषः । वचनं=तन्मात्रं । नन्वत्र न मानमत आह—**अत एवेति** । एतेनायुष्मानेधि तुषजकेति तदुक्तमपास्तं, तथाचाशीर्वादरूपं कुशलादिप्रश्नरूपं वाभिवादयितर्यनुग्रहद्योतकं वाक्यमात्र

❀ ज्योत्स्ना ❀

च्छेदित्यादेर्व्यावृत्तिसिद्धौ पदान्तग्रहणानुवृत्तिगौरवग्रस्तेति वाच्यम् , 'अनन्तरस्ये'ति न्यायेन पररूप-

❀ सदाशिवभट्टीयम् ❀

बोधनात् । **द्वयमिति** । तावत एव सत्त्वादिति भावः । 'वाक्यस्य टेरिती'ति पाठः । **अनन्त्यस्यापीति** । एकवचनन्तु प्रत्यभ्युच्चमानस्य हूयमानस्यैव प्लुतः प्राप्नोतीत्यभिप्रेत्य । सूत्रद्वयेन—यत्तु-भाष्ये वाक्ये यावन्ति पदानि तेषां सर्वेषां प्लुतः प्राप्नोतीत्युक्तं, तत्त्वेतद्द्वयातिरिक्तविषयकमिति भावः । **अचो विशेषणेति** । तदनुपस्थितिस्तु न, टेर्विशिष्टस्य प्लुतापत्तेः । 'नित्यादा'विति पाठः । **प्रगृह्यस्येति** । 'सूत्रेणे'ति पाठः । सप्तम्यन्तपाठे

❀ विषमपदविवृतिः ❀

वारणे पदान्तग्रहणानुवृत्तौ गौरवमिति वाच्यम्, 'दिव उ'दित्युत्तरार्थं तदनुवृत्तेरावश्यकत्वात् । 'अनन्तरस्ये'ति न्यायेन पुनर्वृद्धिविधानस्य पररूपमात्रबाधनार्थत्वाच्च । ईषदसमाप्त ऋच्छको-बहृच्छक

अभिवादये इति । नमस्कारादिपूर्वमाशीरादि वाचयामीत्यर्थः । 'आयुष्मा'नित्यायुष्मत्त्वस्य विधेयत्वात्सम्बोधनविभक्त्यभावः । **एधीति** । 'भवे'त्यस्याप्युपलक्षणम् । प्रत्यभिवादे शर्मादिप्रयोगो न नियतः । 'एचोऽप्रगृह्यस्ये'ति सूत्रे प्रत्यभिवादेऽन्तस्यैचः प्लुतविधानात् । 'आयुष्मानेधि अग्निभूता ३ इ' इति भाष्ये तदुदाहरणाच्च । शर्मादिप्रयोगे तु तत्रैव प्लुतः । 'शर्मान्तं नाम ब्राह्मणस्ये'त्यादिस्मृत्या तस्य नामावयवत्वबोधनात् । **स्त्रियां नेति** । स्त्रिया अपि नाम्नाऽभिवाद—प्रत्यभिवादे इत्यर्थस्य भाष्यसम्मतत्वादिति भावः । **नाम गोत्रं वेति** । अभिवाद-प्रत्यभिवादे नामगोत्राभ्यामेव स्मृतिषु प्रसिद्धे । तत्राधिकृतस्य 'पदस्ये'त्यस्य 'प्रत्यभिवादे' इत्यनेन विशेषणात्

❀ **चिदस्थिमाला** ❀

प्रत्यभिवादशब्देनोच्यते इति भावः । अत एवाह—**पूर्वकमाशीरादीति** । 'नित्यादा'विति पाठः । आदिना—स्त्रीलिङ्गपरिग्रहः । तस्या अनुवादविषयत्वात्, स्पष्टञ्चेदमन्यत्र । न च 'एधी'त्यस्ते रूपेऽपि—'आयुष्मान्भव सौम्येति वाच्यो विप्रोऽभिवादने'इति मनूक्तिविरोध इति वाच्यं, तत्र 'भवे'त्यस्याऽर्थपरत्वात्तद्ध्वनयन्नाह—**एधीतीति**। नन्वेवं 'शर्मान्तं नाम ब्राह्मणस्ये'त्यादि स्मृतिविरोध एवात आह—**प्रत्येति**। 'सूत्रेणे'ति पाठः । सप्तम्यन्तपाठे—'वृत्तिकृते'ति शेषः । **प्रत्येति** । तदंशविषयवाक्ये । भाष्यसम्मतिमप्याह—**आयुष्मानिति** । 'ता इती'ति पाठः । **तदिति** । प्रत्यभिवादांशेत्यर्थः । नियतपदस्वारस्यादाह—**शर्मादीति** । नन्वेवं वक्ष्यमाणविरोधोऽत आह—**शर्मान्तमिति** । तस्य=शर्मादेः । 'शर्मान्त'मित्यत्र तद्गुणसंविज्ञानबहुव्रीहिरन्तशब्दश्चरमावयववाचीति भावः । 'न स्त्र्यभिवादयते पादोपसङ्ग्रहणमेव करोती'ति केचित् । अन्ये तु—साऽभिवादयतेऽपि, न तु स्वनाम गृह्णाति, एवञ्च प्रत्यभिवादेऽपि तदभाव एवेति, तदसदिति ध्वनयन्नाह—**स्त्रिया अपीति** । तत्र तथोदाहरणादिति भावः । 'मूलोक्तस्य न्यायसिद्धत्वं न त्वपूर्वत्व'मिति प्रतिपादयंस्तत्र तत्प्रयोगे मानमाह—**अभीति** । एवेन तदन्यव्यवच्छेदः । 'असौ नामाहमस्मीति स्वं नाम परिकीर्त्तये'दिति मनुराद्ये मानं, द्वितीये तु मनुरुक्त एव । तत्र 'नाम'पदं गोत्रस्याप्युपलक्षणं, स्मृत्यन्तरात् । नन्वेतावता तयोस्तयोरन्यतरप्रयोगलाभस्तथापि तयोस्तदन्तत्वलाभः कथमत आह—**तत्रेति** । सूत्रे इत्यर्थः, तद्वाक्ये इत्यर्थो वा । ननु तद्वृत्तित्वं न तन्मात्रस्य, किन्तु वाक्यस्येति

❀ **ज्योत्स्ना** ❀

मात्रबाधकत्वात्पुनर्विधानार्थचकारस्येत्याशयात् । **उपलक्षणमिति** । 'आयुष्मान् भव सौम्येति वाच्यो विप्रोऽभिवादने' इति मनूक्तेरिति भावः । तर्ह्येधिप्रयोगे किं मूलमिति चेन्न, मनूक्तौ—भवेत्यस्यार्थपरत्वेन व्याख्यानात् । तत्रापि किं गमकमिति चेदायुष्मानेधीति भाष्यकृदुदाहरणमित्येवेति—बोध्यम् । **स्मृतिषु प्रसिद्धे इति** । 'असौ नामाहमस्मीति स्वं नाम परिकीर्तये'दिति मनूक्तौ 'नामे'त्यस्य

❀ **सदाशिवभट्टीयम्** ❀

'वृत्तिकृते'ति शेषः। **प्रत्यभिवादेऽन्त्यस्यैच इति** । प्रत्यभिवादविषयवाक्यावयवस्यैच इत्यर्थः। ननु तत्प्रयोगे कथं नामान्तं वाक्यमत आह—**अवयवत्वेति** । एवञ्च शर्मान्तशब्देन्तशब्दश्चरमावयववाची, तद्गुणश्च बहुव्रीहिरिति भावः। नन्वेवमन्यतरप्रयोगस्य लाभेपि तस्य तदन्तत्वलाभः कथमत आह—**तत्राधीति**। स्पष्टञ्चेद-

❀ **विषमपदविवृतिः** ❀

इत्यर्थं तु पदान्तग्रहणस्यावश्यकत्वाच्च । **उपलक्षणमिति** । 'आयुष्मान्भव सौम्येति वाच्यो विप्रोऽभिवादने' इति मनूक्तेः । तर्ह्येधीति प्रयोगे किम्मूलमिति चेत्, आयुष्मानेधीति भाष्योदाहरणमेवेत्यवेहि । **स्मृतिष्विति** । 'असौ नामाहमस्मीति स्वं नाम परिकीर्तये'दित्यादि मनुस्मृतिषु ।

१ तयोः=नामगोत्रयोः, तयोः=अभिवाद—प्रत्यभिवादयोः । तयोः=नामगोत्रयोः ।

प्रत्यासत्त्या प्रत्यभ्युद्यमानार्थवाचकस्यैव प्लुत इति भावः । तत्र नामशब्देन द्वादशेऽह्नि पित्रादिकृतं गृह्यते । अत एवा'ऽऽयुष्मान् भव दण्डि'न्नित्यादौ प्लुतो नेति स्पष्टं भाष्ये । **भोराजन्येति** । भोःशब्दस्य राजन्य-वैश्यवाचकनाम्नश्च टेः प्लुतो वेत्यर्थः । भोःशब्दस्याप्राप्ते, इतरयोस्तु नामत्वात्प्राप्ते—विभाषेयम् ।

दूराद्धूते । यावति देशे प्राकृतप्रयत्नोच्चारितं सम्बोद्ध्यमानो न शृणोति किन्त्वधिकं प्रयत्नमपेक्षते—तावद्दूरम् । दूरादाह्वानञ्च दूराद्बोधनस्योपलक्षणं, न तु सम्बोधनविभक्तिनियामकस्याभिमुखीकृत्य बोधनरूपस्य सम्बोधनस्योपलक्षणम् । 'आगच्छतु भवान्देवदत्त' इत्येवमाह्वानस्यापि सम्भवात् । अत एवाऽऽकडारसूत्रे नदी-गुरुसञ्ज्ञयोः समावेशे 'वात्सीबन्धु'रित्यत्र 'गुरो'रिति प्लुतो, 'नदी बन्धुनी'ति पूर्वपदान्तोदात्तत्वञ्च

❀ अभिनव-चन्द्रिका ❀

मिति भावः । **विभाषेयमिति** । उभयत्र विभाषेयमित्यर्थः । **सम्बोधनस्येति** । प्रकृतवाक्यजन्यबोधाश्रयत्वप्रकारकेच्छोद्देश्यत्वस्वरूपसम्बोधनस्य नोपलक्षणमित्यर्थः ।

❀ चिदस्थिमाला ❀

तत्तस्य विशेषणमत आह—**प्रत्यासत्त्या चेति** । एवञ्च तत्सम्बन्धिनो वाक्यसम्बन्धिघटितत्वाय वाक्यान्तत्वं तयोरावश्यकमिति भावः । तत्र=न्यायसिद्धे वचने । कृतं=कृतमेव । 'द्वादशेऽह्नि पिता नाम कुर्यात्', 'शर्मान्तं नाम ब्राह्मणस्ये'त्यादिश्रुति-स्मृत्याद्युक्तत्वात् । एवेन बोधकशब्दमात्रव्यावृत्तिः, तत्फलमाह—**अत एवेति** । स्वरूपास्वरूपग्रहणकृतवैरूप्याय व्याचष्टे—**भोःशब्देति** । उक्तहेतोरेवाह—**नाम्नश्चेति** । 'प्लुतो वेत्यर्थ' इति पाठः । अत एवाह—**भोःशब्देति** । अनामगोत्रत्वात् । अत एव भाष्यकृताऽपि तत्राऽप्राप्तिं मत्वा सर्वस्यैव नाम्नः प्रत्यभिवादे भोः—शब्द आदेशः, 'अपर आह'त्यादिनोक्तः, 'इन्द्रवर्मा'दौ च न तथानुक्तेः । अत एव 'शर्म-वर्मादेर्नामाऽन्तर्भाव' इति प्रागुक्तम्, अत एव शर्मान्तटेर्नित्यं प्लुतसिद्धिः । एतेन—'वैरूप्येण व्याख्याने न मान'मित्यपास्तम् ।

दूरत्वस्यानियतत्वादाह—**यावतीति** । **प्राकृतेति** । स्वाभाविकेत्यर्थः । **स्योपेति** । तन्मात्रस्येत्यर्थः । एवञ्च तत्सत्तानियमः, आह्वानमस्तु, मास्तु वेति भावः । मनोरमा-दण्डि-रत्नाकरादिसकलग्रन्थान्दूषयति—**न त्विति** । नियतस्योपलक्ष्यत्वं, नाऽनियतस्येत्याशयेनाह—**आगेति** । एवञ्चाह्वानमात्रे तस्यैवाऽसत्त्वात्कथं तत्त्वमिति भावः । नन्विष्टानुरोधेन तथोच्यतेऽत आह—**अत एवेति** । मदुक्तार्थाङ्गीकरोदेवेत्यर्थः । **कडारेति** । रेफान्तमनुकृत्यागन्तुनाऽकारेण निर्देशः । **प्लुत इति** । अनन्त्यस्य गुरोरीकारस्येति भावः ।

❀ सदाशिवभट्टीयम् ❀

मत्रैव भाष्ये । स्वरूपास्वरूपग्रहणकृतविशेषाय व्याचष्टे—**भोःशब्देति** । प्लुतो वेति पाठः । **दूराद्बोधमस्योपेति** । तन्मात्रस्येत्यर्थः । नियतस्योपलक्षणं नत्वनियतस्येत्याशयेनाह—**आगच्छतु इति** । **कडारसूत्रेति** ।

❀ विषमपदविवृतिः ❀

अत्र नामपदं—गोत्रस्याप्युपलक्षणम् । **दण्डिन्नित्यादाविति** । 'दशम्युत्तरकालं जातस्य पुत्रस्य नाम विदध्याद्घोषवदाद्यन्तरन्तःस्थमवृद्धं त्रिपुरुषानूकमनरि प्रतिष्ठितं, तद्धि प्रतिष्ठिततमं भवति, द्व्यक्षरं चतुरक्षरं वा नाम कृतं कुर्यान्न तद्धित'मिति कल्पसूत्रे तद्धितान्तस्य नामत्वप्रतिषेधादिति भावः । **दूराद्धूते च** । 'दूरान्तिकार्थेभ्य' इति प्रातिपदिकार्थमात्रे पञ्चमी, ल्यब्लोपनिमित्ता वा ।

फलमुक्तं भाष्ये। अन्यथाऽत्र सम्बोधनाभावेन 'गुरो'रित्यस्याप्राप्त्या तदसङ्गतिः स्पष्टैव।

उपलक्षणत्वादसत्यप्याह्वाने भवति, तदाह—**सक्तूनित्यादि**। अत्रापि दूराद्धूते इत्येतदनुवृत्तस्य पदस्येत्यस्य विशेषणं, तेन हूयमानार्थवाचिनः पदस्यैव टेः प्लुतः, तच्च रूढं यौगिकं वेत्यन्यदेतत्।

हैहेप्र। हैहयोः सम्बोधनद्योतकत्वेन केवलाभ्यामपि ताभ्यां सम्बोधनदर्शनेन च तयोरपि हूयमानार्थपदत्वाद् 'गुरोरनृत' इत्येव सिद्धे नियमार्थमिदमित्याह—

❀ आभिनव-चन्द्रिका ❀

अत एवेति। सूत्रे 'दूराद्धूते' इति बोधनमात्रस्य उपलक्षणमिति स्वीकारादेवेत्यर्थः।

गुरोरनृत इत्येव सिद्ध इति। न च 'गुरोरनृत' इत्यस्य उद्देश्यतावच्छेदकं हूयमानार्थबोधकं वाक्यघटकं यत्पदं तत्सम्बन्धि ऋद्धिन्नानन्त्यगुरुत्वन्तत्सम्बन्धि टित्वञ्च, 'है हे' इत्यस्योद्देश्यता-

❀ चिदस्थिमाला ❀

अन्यथात्रेति। तदुक्तार्थाङ्गीकारे—प्रक्रान्ते 'वात्सीबन्धु'रित्यत्रेत्यर्थः। **अपि**ना—तत्समुच्चयः। **सक्तूनिति**। अत एवातो रोरिति सूत्रे 'सुस्रोता ३ अत्र त्वमसी'त्युदाहृतम्। पूर्ववदाह—**अत्रापीति**। पूर्ववदत्र नियामकाऽभावेनाविशेषादाह—**तच्चेति**। पदञ्चेत्यर्थः। पित्रादिसङ्केतिततत्प्रकृतिकं, पाचकशब्दादिप्रकृतिकञ्चेत्यर्थः। मूलादिरीत्याह—**हैहयोरिति**। अस्यानुपयोगादाह—**केवलेति**। नामग्रहणनिषेधस्थले इति भावः। **अपि**नेतरसाहित्यसमुच्चयः। 'हूये'ति बहुव्रीहिः। एवमग्रेऽपि। ननु 'वाक्यस्य टे'रित्युक्तेः

❀ ज्योत्स्ना ❀

गोत्रोपलक्षणत्वादिति भावः। **केवलाभ्यामपि ताभ्यां सम्बोधनदर्शनेनेति**। 'आगच्छ हे' इत्यादौ।

❀ सदाशिवभट्टीयम् ❀

रेफान्तमनुक्त्यागन्तुनाकारेण निर्देशो बोध्यः। **असत्यपीति**। अत एवा'तोरो'रिति सूत्रे 'सुस्रोता ३ अत्र त्वमसी'त्युदाहृतं भाष्ये, ननु तत्र दूरत्वस्याविवक्षाया वक्ष्यमाणत्वेन किमर्थं योगविभागेन विधानं, 'गुरोरनृत'इत्येव सिद्धमिति चेन्न। भोः शिव ३ भव ३ इत्यादौ गुरोरभावेन, नपुंसके कर्तृ हर्तृ इत्यादौ ऋकारसत्वेन भो अ ए ओ इत्यादौ अनन्त्याभावेनाद्यांशस्याप्राप्त्याऽऽदेरित्यंशस्यापि सन्नियोगशिष्टन्यायेनाप्रवृत्तेः। तत्र दूरत्वस्याविवक्षाया वक्ष्यमाणत्वेनेह तु तद्विवक्षणेन विभागावश्यकत्वाच्च। **हैहे। सम्बोधनदर्शनेनेति**। नामग्रहणनिषेधस्थल इति भावः। **गुरोरनृत इत्येवेति**। उक्तरीत्या तस्यानन्त्याभावेनाप्राप्तेरिदं चिन्त्यम्। अत एव पूर्वेण हूयमानार्थस्य विधानेनाप्राप्त्या वचनमिति **कैयटे**। **उद्योत**कारोपि 'दूराद्धूते च'ेति सूत्रान्तरेण सिद्धे किमर्थमित्यत आहेत्यवतारितवान्। **हैहेन्त इति**।—बहुव्रीहिस्तत्पुरुषत्वे तु तयो-

❀ विषमपदविवृतिः ❀

हैहेन्त इत्येवेति। न 'च 'वाक्यस्य टे'रित्यधिकारादन्तग्रहणवैयर्थ्यम्, तदभावे हैहेग्रहणस्यान-

❀ वरवर्णिनी ❀

हैहेप्रयोगे। 'वाक्यघटकहूयमानार्थकपदावयवो यो गुरुस्तस्य प्लुत' इति 'गुरोरनृत' इत्यस्यार्थः। एवञ्च 'हे रामे'त्यादावेकारस्यापि हूयमानार्थकपदघटकतया 'गुरोरनृत' इत्यनेनैव सिद्धाविदं नियमार्थमिति तात्पर्यम्। ननु हैहे इत्यस्य वाक्यविशेषणतया तदन्तविधौ हैहेशब्दान्तवाक्यघटकहैहेशब्दयोरित्यर्थाद्धे रामेत्यादौ प्लुतो न स्यादित्यत आह—**हैहेऽन्ते इति**। अयम्भावः—'हैहेशब्दान्तवाक्यावयवयोः—प्रत्यासत्त्या—हैहयो'रित्यर्थक—'हैहेऽन्ते' इत्येव सिद्धे प्रयोगग्रहणसामर्थ्यात्तदन्तविध्यभावेन वाक्यावयवहैहयोरित्यर्थेन हे रामेत्यत्रापि प्लुतसिद्धिरिति। न च 'हैहेऽन्ते' इत्यनुचितं, हैहयोरित्युक्तेऽपि तदन्तविधिनोक्तार्थलाभसम्भवादिति वाच्यं, निर्दिश्यमानपरिभाषाऽप्रवृत्तये 'हैहेऽन्ते' इत्यस्यौचित्यात्,

हैहयोरेवेति। 'हैहेऽन्ते' इत्येव सिद्धे प्रयोगग्रहणादनन्त्ययोरपि। तदाह—**हे ३ रामेति।** केचित्तु एकं हैहेग्रहणमनन्त्यार्थम्, अन्यथा 'वाक्यस्य टे'रित्यधिकारादन्त्य-

---

❀ अभिनव-चन्द्रिका ❀

वच्छेदकं-हूयमानार्थबोधकवाक्यघटकं यद्धैहेपदं तत्सम्बन्धि टित्वं। तथा चानयोः सामानाधिकरण्यस्यैवाभावाद्व्याप्यव्यापकभावस्य दूरापास्तत्वेन 'नियम्यत्वेनाभिमतशास्त्रीयोद्देश्यतावच्छेदकव्याप्यरूपावच्छिन्नोद्देश्यताकत्वे सति-नियम्यत्वेनाभिमतशास्त्रीयविधेयतावच्छेदकरूपावच्छिन्नविधेयताकत्वन्नियामकत्व'मिति नियामकलक्षणस्य प्रकृतेऽभावादिदमसङ्गतमिति वाच्यम्, आह्वानविषयकवाक्यघटक-

❀ चिदस्थिमाला ❀

कथं 'हे रामेती'त्यत आह—**हैहेऽन्त इति।** बहुव्रीहिः, तत्पुरुषो वा, तयोरन्तत्वे सतीत्यर्थः। 'एव'-व्यावर्त्यमाह—**प्रयोगेति।** 'हैहयो'रिति नियमार्थ—राकारव्यावृत्त्यर्थमिति भावः। मूलादि दूषयन्सिद्धान्तमाह—**केचित्त्विति। एकमिति।** आद्यमित्यर्थः। प्रयोगग्रहणफलस्य स्वतन्त्रस्य वक्ष्यमाणत्वादाह—**हैहे इति।** प्रत्यासत्त्या 'तयोरेव प्रयोग'इत्यर्थलाभ इति भावः। नन्वेवमपि 'प्रयोगे' इति व्यर्थं,

❀ ज्योत्स्ना ❀

नचैवं स्वसमभिव्याहृतपदशक्त्युपस्थापकत्वाभावादनयोर्द्योकत्वानुपपत्तिरिति वाच्यम्, स्वघटितवाक्यार्थान्वययोग्यपदार्थाक्षेपकत्वरूपस्य द्योतकत्वस्यात्र विवक्षितत्वात्। तथात्वञ्च 'हे' इत्यस्य सम्बोधनपदार्थाक्षेपकत्वात्, 'प्रादेशं विपरिलिखती'त्यत्र वेर्विमानक्रियाक्षेपकत्वाद्द्योतकत्वं यथा। प्रादेशं विमाय परिलिखतीत्यर्थादित्याहुः। **हैहेन्ते इत्येव सिद्धे इति।** न च वाक्यस्य टेरित्यधिकारादन्त इत्यस्य वैयर्थ्यमिति वाच्यम्, तदभावे हैहेग्रहणस्यानन्त्यार्थकत्वापातात्। ततः किमिति चेन्नियमार्थता न स्यादिति–हे रामेत्यादौ हूयमानार्थकान्त्यपदटेः प्लुतेन समावेशः स्यात्। पुनर्हैहयोरिति किमर्थं स्यादिति चेदप्रतिपत्तिजनकमेव स्यादिति माकारि तत्। अथवा हैहयोः सम्बन्धि

❀ सदाशिवभट्टीयम् ❀

रन्तत्वे सतीत्यर्थः। अत्रेदं बोध्यं–हैहयोर्हूयमानार्थकत्वे 'हैहयो'रिति न्यासे वाक्यावयवयोस्तयोष्टेरचः प्लुत इत्यर्थे हे ३ रामेत्यादौ विध्यर्थं स्यात्, तदन्तवाक्ये तु पूर्वेण सिद्ध एव सः, तदादौ वाक्ये हैहेटि–वाक्यटिप्लुतयोः समावेशः परं दोषः। हैहेन्तवाक्यावयवहूयमानार्थपदटेः प्लुत इत्यर्थे राम हे इत्यादावनिष्टोनन्त्यपदटेः प्लुतः सूत्रस्य फलं स्यात्, आदिभूतयोस्तयोरिष्टः प्लुतो न सिध्येदनन्त्यपदटि–अन्त्यहैहेटि–प्लुतयोरनिष्टः समावेशश्च स्यात्। अन्तयोर्हैहयोः परमिष्टः प्लुतः पूर्वेण सिध्यति। 'प्रयोगे हैहयो'रिति न्यासे त्वारम्भादेवानन्त्यग्रहे सिद्धेऽन्त्यानन्त्ययोः प्लुतार्थङ्क्रियमाणात्प्रयोगग्रहणान्नियमार्थत्व सम्पद्यते इति

❀ वरवर्णिनी ❀

अन्यथा निर्दिश्यमानपरिभाषया 'हेराम–कृष्ण हैं' इत्यत्र वाक्यादेर्हें इत्यस्य न स्यात्। ननु 'गुरोरनृत' इत्यत्र 'दूराद्धूते' इत्यनुवृत्त्या तस्य पदविशेषणत्वेन 'हूयमानपदार्थवाचकपदान्तवाक्यावयवहूयमानार्थकपदावयवगुरो'रित्यर्थात्प्रत्यासत्त्या 'यादृशहूयमानार्थकपदान्तं वाक्यं तादृशपदावयवगुरो'रित्यर्थेन हे रामेत्यत्राऽप्राप्तप्लुतविध्यर्थत्वेनास्य नियमार्थत्वालाभ इति चेदुच्यते,—वाक्यघटकप्रयुज्यमानयोर्हैहयोरित्यर्थको 'हैहेप्रयोगे' इत्येको योगो—हे राम इत्यत्र विध्यर्थः। ततो 'हैहयो'रिति द्वितीयो योगः, स च नियमार्थ इत्याशयात्। हैहेघटितवाक्यावयवगुरोश्चेत्प्लुतस्तर्हि हैहेघटकगुरोरेवेति नियमसूत्रार्थः। इत्थञ्च 'गुरोरनृत' इत्यत्र हैहेघटितवाक्यातिरिक्तत्वेन सङ्कोच इति शेखरकृतां निगूढमाकूतमिति — **श्रीशिवकुमारशास्त्रि**चरणा व्यावर्णयामासुरिति—शेषावतारा अस्मद्गुरवः **श्रीत्रिपाठिचरणा** व्याचक्षते।

योरेव तयोः स्यात् , तदाह—**हे३ रामेति** । प्रयोग इति तु–यत्र सम्बोधनोत्तरं तयोः प्रयोगस्तत्र तेनैवाभिमुख्यस्य द्योतितत्वेन द्योत्याभावादनर्थकयोरपि तयोः प्लुतार्थं, तदाह—**राम है३ इति** । अन्यथाऽप्रयुक्तयोः प्लुतासम्भवात्तद्वैयर्थ्यं स्पष्टमेव । '**हैहयो**'रिति तु–तयोर्हूयमानार्थपदत्वाभावादप्राप्ते विध्यर्थम् । नियमे तु न मानम् । तेनात्र प्लुतसमावेशः, एतत्सर्वं भाष्यकैयटयोः स्पष्टमित्याहुः ।

❀ अभिनव-चन्द्रिका ❀

ऋद्धिन्नानन्त्यगुरुत्वं तत्सम्बन्धिघटित्वञ्च—'गुरोरनृत' इत्यस्योद्देश्यतावच्छेदकमित्यङ्गीकारेण प्रकृत-सूत्रस्य नियामकत्वसौलभ्यादिति दिक् । **प्रयोग इति तु इति** । अयम्भावः-'हैहयो'रित्येव सूत्र-मस्तु, हैहेशब्दान्तं यद्वाक्यं तदवयवनिर्दिश्यमानावयवटेरित्यर्थः । तथा च द्वितीयं हैहेग्रहणं

❀ चिदस्थिमाला ❀

नह्यप्रयुक्तयोः प्लुतः सम्भवतीत्यत आह—**प्रयोगेति** । तयोः=सम्बोधनद्योतकयोर्हैहे इत्यनयोः । **तेनै-वेति** । सम्बोधनविभक्त्यन्तेनैवेत्यर्थः । **तयोरिति** । 'द्वौ ब्राह्मणा'वित्यादिवत्प्रयोग इति भावः । अन्यथा =उक्तरीत्यनङ्गीकारे । नन्वेवमपि हैहयोरिति व्यर्थं, प्रत्यासत्त्या तयोरेव विधानादत आह—**हैहयो-रिति** । तदभावे 'दूराद्धूते' इत्यस्यानुवृत्त्या पूर्ववद्धूयमानार्थकपदस्यैव टेस्तयोरन्त्यानन्त्यत्वयोः सतोः स्यान्नतु प्रत्यासत्तिन्यायेन, तथा तदभावे नियामकत्वं दुर्लभमेव, सूत्रन्त्वगुरोः करणेन सफलमिति भावः । पूर्वेणाऽसिद्धिमाह—**हूयेति** । तयोराभिमुख्यरूपसम्बोधनद्योतकत्वादिसत्त्वेऽपि तत्त्वाभावः स्फुट एव, नामगोत्रयोरेव तद्वृत्तित्वात् ; अत एव 'तच्च रूढ'मिति प्रागुक्तविरोधो नेतिभावः । **विध्यर्थमिति** । तत्त्वसूचकमित्यर्थः । उक्तहेतोरेवाह—**नियमे त्विति** । तथाच मूलोक्त एवकारोऽयुक्त-स्तदाह—**तेनेति** । पूर्वेण हूयमानार्थकपदस्य टेः प्राप्तेरिति भावः । अत्र **केचिदित्यनेनाऽरुचिः** सूचिता,

❀ ज्योत्स्ना ❀

हूयमानार्थकानन्त्यपदस्यापि प्लुतार्थं स्यादिति राम हे इत्यादौ प्लुतसमावेशः स्यात् । सति तु प्रयोगग्रहणे हैहयोरित्येको योगो नियमार्थः । 'हैहेप्रयोग' इति योगान्तरे च–हैहयोरित्यस्यानु-वृत्त्याऽनन्त्ययोस्तयोरेव प्लुत इति सकलेष्टसिद्धिरित्याशयः । **अन्यथेति** । प्रयोगग्रहणस्यानर्थक-हैहयोः प्लुतार्थत्वाभावे इत्यर्थः । **तद्वैयर्थ्यं स्पष्टमेवेति** । सति तु प्रयोगग्रहणे तत्सामर्थ्या-दानर्थक्ये सत्यपि प्रयोगस्तयोश्च प्लुतसिद्धिरिति भावः । **अप्राप्तेर्विध्यर्थमिति** । अन्यथा राम हे

❀ सदाशिवभट्टीयम् ❀

सर्वेष्टसिद्धिः । प्रथमे पक्षे प्रत्यासत्त्या द्वितीयार्थे त्वभिमते आद्यार्थवारणाय–हैहेन्ते इत्येव वदेत् । 'हैहेप्रयोगे' इत्युक्ते त्वन्त्यानन्त्यसाधारणे तत्प्रयोगे हूयमानार्थवाक्यपदस्य टेः प्लुत इत्यर्थादिष्टे सिद्धेपि समावेशः स्या-दिति यथान्यासमेव रमणीयम् । 'प्रयोगे हैहयो'रिति तु सुवचं, 'कालाध्वनोरत्यन्तसंयोग' इतिवत्प्रत्यासत्त्या सर्वेष्टसिद्धिः । **अन्त्ययोरेवेति** । इदञ्चिन्त्यम्, हैहेन्ते इत्येव सिद्धे प्रयोगग्रहणेनोभयार्थत्वसिद्धेः । **अनर्थक-योरपीति** । अयं भावः–एकं हैहेग्रहणं–नामग्रहणनिषेधविषये एहि हे इत्यादौ हूयमानार्थकत्वाभावादप्राप्ते विध्यर्थम् । अपरं च हे रामेत्यादौ वाक्यादित्वादप्राप्ते विध्यर्थम् । अर्थवत्परिभाषाबाधे च न मानमतः **प्रयोगेति** । तस्यानर्थकत्वं च शस्त्रीशब्दे स्त्रीशब्दस्येव ततोऽर्थबुबोधयिषाविरहात् । एतेन द्योतितत्वेन द्यो-त्याभावादित्यसङ्गतं, द्योत्यभेदाभावेपि द्योतकसमुच्चयस्य बहुशो दृष्टत्वादित्यपास्तम् । बुबोधयिषाविरह-प्रतिपादनेस्योपयोगात्, अनर्थकस्यापि पदत्वं तु निपातस्यानर्थकस्येत्यनेनास्त्येवेति बोध्यम् । वाक्यपदन्तु टेरेव विशेषणं, नानर्थेषु ? तदवयवत्वोपयोगः । क्वचित्तु तन्मध्यपतितेति तत्त्वमस्त्येव, पदत्वाभावादिति । आभिमुख्यरूपसम्बोधनद्योतकत्वेपि तत्त्वाभावः । नामगोत्रयोरेव तद्वृत्तित्वादत एव 'तच्च रूढ'मिति

यत्तु—अयं हूयमानार्थपदस्य टेः प्लुतस्य बाधकस्तक्रकौण्डिन्यन्यायादिति, तन्न । शिव हे इत्यादौ तस्याप्राप्तेस्तन्न्यायविषयाभावात् ।

गुरोर । 'दूराद्धूते' इत्यनुवर्त्तते, तेन दूराद्बोधन एव प्रवृत्तिः,—तदाह— **दूराद्धूत इति** । दूरत्वञ्चात्राविवक्षितं, तेन प्रत्यभिवादे 'भोराजन्ये'त्यस्य विषयेऽप्यस्य प्रवृत्तिः । तद्विषयेऽप्युपलक्ष्यबोधनसत्त्वात् । सर्वप्लुतप्रकरणस्य तु न शेषः । तथा हि सति 'वाक्यस्य टे'रित्यनेन सहैवास्याप्यधिकारत्वमेव कुर्यात् । एतत्त्रयविषयमेवेदमिति प्रकृतसूत्रे 'अनुदात्तम्प्रश्नान्ते'ति सूत्रे च वृत्तौ स्पष्टम् । 'अपि'शब्दो यथाप्राप्त-

❀ **अभिनव-चन्द्रिका** ❀

निर्दिश्यमानपरिभाषाया अप्रवृत्तये । 'हैहेऽन्तस्ये'त्यनेनैव निर्दिश्यमानपरिभाषाया अप्रवृत्तौ सिद्धायां द्वितीयहैहेग्रहणं—तदन्तविध्यभावाय । 'हैहेऽन्ते हैहयो'रित्येव सिद्धे प्रयोगग्रहणमनर्थकहैहयोरपि

❀ **चिदस्थिमाला** ❀

तद्बीजन्तु—'यद्यपि सर्वं भाष्य–कैयटारूढं, तथापि वैकल्पिकेषु भावानुष्ठानौचित्येन (शास्त्रा ?) 'हैहयोः प्रयोगे'इत्येव प्रत्यासत्तिन्यायेन, षष्ठ्युच्चारणसामर्थ्येन च तयोरेव प्लुतसिद्ध्या तद्व्यर्थमेवे'ति । समावेशं समर्थयन्नेवकारसमर्थनं केनचित्कृतं खण्डयति—**यत्त्विति** । न्यूनत्वाद्यथाश्रुतमूलासङ्गतेराह—**दूरत्वञ्चेति** । अयोगविभागाभिप्रायेण विकल्पसाम्याद्विशिष्याह—**भोराजन्येति** । नन्वनेन सर्वत्र शास्त्रान्तरैः प्लुतेऽनन्त्यस्य तस्य स कुतो नेति तदुल्लेखाद्यसङ्गतिरत आह—**सर्वेति** । **स्याप्येति** । 'गुरोरनृत' इति सूत्रस्यापीत्यर्थः । **एवेन**—विधित्वव्यवच्छेदः । अत्र मानमप्याह—**एतत्त्रयेति** । 'प्रत्यभिवादे' 'दूराद्धूते च' 'है हेप्रयोगे' एतत्त्रयेत्यर्थः । भाष्यादेरुदासीनत्वादाह—**वृत्ताविति** । तत्राद्ये उक्तं—"प्रत्यभिवादे 'दूराद्धूते चे'त्येवमादिना यः प्लुतो विहितस्तस्यैवायं स्थानिविशेष उच्यते" इति । अन्त्ये च

❀ **ज्योत्स्ना** ❀

इत्यादौ सामर्थ्यादनन्त्यस्यापि हूयमानार्थकस्यैव स्यादिति भावः । **एतत्त्रयविषयमेवेदमिति** । 'प्रत्यभिवादेऽशूद्रे' 'दूराद्धूते च' 'हैहेप्रयोगे हैहयो'रित्येतत्त्रयविषयमित्यर्थः । **वृत्तौ स्पष्टमिति** ।

❀ **सदाशिवभट्टीयम्** ❀

प्रागुक्तविरोधो न । **आहुरिति** । उक्तान्यस्वरसबीजानि । समावेशं समर्थयन्नेवकारसमर्थनं खण्डयति—**यत्त्विति** । यत्तु 'गुरोरनृत' इत्यस्य भिन्नपदत्वेपि प्रवृत्तिरिति, तन्न । 'अनुदात्त'मित्यनेन सिद्धे एकैकग्रहणक्किमर्थमिति भाष्यविरोधात् । **गुरोरनृ । अविवक्षितमिति** । इदञ्च न भाष्यसम्मतम्—अत एव प्रकृतसूत्रे भाष्ये 'लघोरन्त्यस्य प्लुतप्रसङ्गो दूराद्धूतेचे'ति विशिष्योक्तम् । सूत्रशेषस्थ—'एकैकग्रहणमनुदात्तं प्रश्नान्ताभिपूजितयोरिति विहितप्लुतसमावेशाभावार्थम्-'इति भाष्यस्य तु-एतद्विहितप्लुतमनूद्यानुदात्तत्वरूपगुणमात्रन्तेन विधीयत इत्याशयः, तदेतद्ध्वक्ष्यति **वृत्तौ स्पष्टमिति** । **भोराजन्येति** । अयोगविभागाभिप्रायेण विकल्पसाम्याद्विशिष्योक्तिरित्याहुः । **एतत्त्रयेति** । प्रत्यभिवादे' 'दूराद्धूते, हैहेप्र'एतत्त्रयेत्यर्थः। इदं केचित्तु मते । पूर्वमते तु 'भोराजन्ये'ति त्रित्वं बोध्यम् । **वृत्ताविति** । तत्राद्ये उक्तं—प्रत्यभिवादे प्लुतो विहितस्तस्यैवायं स्थानिविशेष उच्यते इति । अन्त्ये च नानुदात्तमित्यादिना लाघवादनुदात्तत्वादिगुणविधानेन प्लुतः, स च दूराद्धूत इत्यादिभिरेवेत्युक्तम् ।

❀ **विषमपदविवृतिः** ❀

न्यार्थतापात इत्याशयात् । **एतत्त्रयविषयमेवेति** । 'प्रत्यभिवादे शूद्रे','भोराजन्यविशां वेति वाच्यं', 'दूराद्धूतेचे'त्येतत्त्रयविषयमित्यर्थः । **वृत्तौ स्पष्टमिति** । प्रकृतसूत्रे चैवं वृत्तिग्रन्थः-प्रत्यभिवादे

टिसमुच्चयार्थः। यदि तु गुरोः सन्निधानादन्त्यो गुरुरेव समुच्चीयेत, तदाऽन्त्यलघुमति-अनन्त्यगुरावेतस्य, अन्त्यलघौ 'दूराद्धूते चे'त्यादीनां दुर्वारत्वेन प्लुतसमावेशापत्तिः। एकैकग्रहणं त्वेतद्विहितानामेव पर्यायार्थं स्यात्। तेन यत्रान्त्योऽपि गुरुरनन्त्यगुरुद्वयं वा—तत्रैव पर्यायः स्यात्। व्याख्यानाच्चैतदर्थलाभः। **अनन्त्यस्यापीति**। अपिनाऽन्त्यस्य गुरोरगुरोश्चेत्यर्थः। **पर्यायार्थमिति**। अन्यथा समावेशः स्यादिति भावः। 'अनुदात्तं पद'मिति तु त्रिपाद्यां न प्रवर्त्तत इति तत्रैव वक्ष्यते। 'प्राचा'मिति तु पक्षे सर्वेषां प्लुताभावार्थम्। **विकल्पत इति**। सा च व्यवस्थितविभाषा। तेनाग्नीद-ग्नीन्विहरेत्यादौ 'अग्नीत्प्रेषणे' इति न। भाष्ये तु 'विभाषापृष्टे'ति सूत्रे 'विभाषे'ति योग-

---

ॐ अभिनव-चन्द्रिका ॐ

प्लुतार्थमिति। **व्याख्यानाच्चेति**। अनन्त्यस्यापीत्येतत्सामर्थ्यादित्यर्थः। अन्यथा एकैकग्रहण-सामर्थ्यादेतद्विहितप्लुतपर्यायस्य सिद्धत्वादेतद्वैयर्थ्यं स्पष्टमेव। **वक्ष्यत इति**। 'अनुदात्तं पद'मिति

ॐ चिदस्थिमाला ॐ

'अनुदात्त'मित्यादिना लाघवादनुदात्तत्वादिगुणमात्र विधीयते, न प्लुतः, स च 'दूराद्धूते' इत्यादिभि-रेव—"इत्युक्तम्। प्रकृतत्वादाह—**टीति**। इदमेव प्रतिपादयति—**यदि त्विति**। 'असुब्वत' इतिव-दाह—**लघुमतीति**। वाक्ये इत्यर्थः। आदिशब्दः प्रकारे, बहुवचनं स्पष्टार्थम्। नन्वेकैकग्रहणात्तद-भावोऽत आह—**एकैकेति**। अत्रैव करणादिति भावः। अपिनाऽनन्त्यसमुच्चयः। आदिना त्र्यादि-परिग्रहः। ननु सान्निध्यात्तथैवाऽर्थोऽस्तु, समावेशे इष्टापत्तिरत आह—**व्याख्येति**। 'टे'रित्यस्य प्रकृतत्वेन वाक्यान्त्यस्य प्राप्तत्वेनोपस्थितत्वादनन्त्यसमभिव्याहारेण तेन तत्समुच्चयस्यैवौचित्यादित्यर्थः। अत एवा-'ऽनन्त्यस्यापी'त्यग्रे 'गुरो'रिति न पठितं सूत्रे। एतेन—'तेनाऽगुरुरेव समुच्चीयते' इत्यपास्तम्। उक्तमेव व्याख्यानेन विशदयति—**अपिनान्त्येति**। एतेन—मूले—'ऋद्धिन्नस्यानन्त्यस्यापि गुरो'रिति पाठः सूचितः। यत्तु—"अनन्त्यग्रहणं व्यर्थं, पृथग्योगकरणसामर्थ्येनैवाऽनन्त्यस्य सिद्धेः, अन्यथा 'दूराद्धूते' इत्यनेन सदैव पठेत्—"इति **रत्नाकरः**, तन्न, तथा सति 'तक्रकौण्डिन्य'न्यायेनान्त्यस्य गुरोः प्लुतानापत्तेः, तेनैव न्यायेनानन्त्यगुरुकेऽन्त्यलघोष्टेः प्लुतानापत्तेश्च। एकैकग्रहणन्त्वनन्त्यगुरूणामेव पर्यायार्थं स्यादिति दिक्। नन्व'नुदात्तं पद'मिति परिभाषणान्न समावेशोऽत आह—**अनुदात्तमिति**। अत एव तव्यत-

ॐ ज्योत्स्ना ॐ

'प्रत्यभिवादेऽशूद्रे' 'दूराद्धूते' इत्यादिना यः प्लुतो विहितस्तस्यैवायं स्थानिविशेष उच्यत इति हि तत्रोक्तम्। न न्वेकस्योदात्ते प्लुते कृतेऽपरस्मिन्ननुदात्तं पदमित्यस्य प्रवृत्त्या समावेशो दुर्लभोऽत आह—**अनुदात्तम्पदमिति त्विति**। **त्रिपाद्यां न प्रवर्तत इतीति**। सपादसप्ताध्यायीस्थानुदात्तं

ॐ सदाशिवभट्टीयम् ॐ

अन्त्यलघुमतीति। असुब्वत इति वत्साधु। वाक्ये इति शेषः। **चेत्यादीनामिति**। आदिः प्रकारे, बहुवचनं स्पष्टार्थम्। **न प्रवर्तत इति**। स्वरितत्वादित्यादि, तत्रैव शेखरे क्षोदिष्यते। प्रवृत्तावप्युदात्तानुदात्त-

ॐ विषमपदविवृतिः ॐ

दूराद्धूतेचेत्यादिना यः प्लुतो विहितस्यैवायं स्थानिशेष उच्यत इति। आदिना—भोराजन्येत्यस्य सङ्ग्रहः। 'अनुदात्तं प्रश्नान्ते'ति सूत्रे—'नानेन प्लुतो विधीयते, किन्तु दूराद्धूतादिषु विहितस्य प्लुतस्यानुदात्तगुणमात्रं विधीयत इति। **एतद्विहितानामेवेति**। एतदभ्यनुज्ञातानामेवेत्यर्थः। पूर्व-वृत्ति-ग्रन्थेनास्य स्थानिविशेषमात्रलाभादिति बोध्यम्। **त्रिपाद्यां न प्रवर्तत इति**। तव्यतस्तित्करणात्।

विभागो दर्शितः । साऽपि व्यवस्थितविभाषेति कैयटः । अत एव—'ओश्रावये परस्येति वक्तव्य'मिति वचनस्य—'अग्नीदग्नी'नित्यादौ प्लुतनिवृत्तये कृतस्य—विभाषेति योगविभागेन प्रत्याख्यानं भाष्योक्तं सङ्गच्छते । एवञ्च भाष्यसम्मतैषा व्यवस्थितविभाषेत्याहुः ।

'अप्लुतव'दित्युक्त्या प्लुत इत्यध्याहारस्तदाह—**प्लुतोऽप्लुतवदिति । प्लुत एव निषिद्धयेतेति ।** तत्स्थाने अप्लुतस्य विधानेन स एव निवर्त्ततेत्यर्थः । प्रसज्य-प्रतिषेधेन व्याख्यानन्तु न युक्तं, गौरवात् । किञ्च तथा सति प्लुतप्रकरणे एव

❀ अभिनव-चन्द्रिका ❀

परिभाषाया उदात्तस्वरितान्यतरविधायकशास्त्रत्वस्य लिङ्गत्वेन-त्रिपाद्या असिद्धत्वात्—उदात्त-स्वरितविधायकशास्त्रत्वप्रकारकज्ञानाभावादेतस्यास्त्रिपाद्यामप्रवृत्तावुदात्तप्लुतश्रवणाभावाय एकैकग्रहण-मावश्यकमिति भावः । **प्रत्याख्यानमिति** । 'अग्नीदग्नीन्विहर' इत्यत्रातिव्याप्त्यभावेऽपि 'ओश्रावये परस्य चे'ति वार्तिकस्य ओ ३ श्रावय, आ ३ श्रावय इत्यादावव्याप्तत्वादिति भावः । **गौरवादिति** ।

❀ चिदस्थिमाला ❀

त्वं, यतोऽनाव' इति च चरितार्थम् । आद्ये हि-'अन्त' इति वर्त्तते, अन्यथा ऽऽद्यविषये पुनः शेष-निघातेन सिद्धावन्त्यविषये पुनस्तदापत्त्या तद्वैयर्थ्यं स्पष्टमेव, अत एव षाष्ठभाष्यसङ्गतिरित्यन्यत्र स्पष्टं, तदाह—**तत्रैवेति** । नन्वेवं 'प्राचा'मिति व्यर्थमत आह—**प्राचामिति** । **सा चेति** । यथा चैतत्तथा प्रागुक्तम् । यत्तु—''प्रत्यभिवादे' इत्यारभ्याऽग्नीदित्यन्तोऽत्र सर्वपदेन ग्राह्यो नाग्निमस्तत्र विभाषाग्रह-णादत्र करणाच्चे'ति, तदसदिति मूलमसङ्गतं, भाष्ये तथा नोक्तत्वात्तत्फलस्यान्यस्य प्रतिपादितत्वात्तस्य स्वस्व-मतप्रच्युतिदोषपरिहारार्थत्वाच्चेति च-ध्वनयन्नाह—**भाष्ये त्विति** । ननु कण्ठतस्तथा भाष्ये नोक्तमत आह—**अत एवेति** । तस्यास्तत्त्वादेवेत्यर्थः । 'ओश्रावयाश्रावयोः परस्य वेती'ति पाठः । 'अग्नी'दित्यस्य स्थाने इति भावः । **सङ्गेति** । अन्यथा प्रत्याख्याने पक्षे तस्य दुर्वारत्वेन तयोः फलभेदापत्त्या तदसङ्गतिः स्पष्टैव । एतेन''—'प्रत्यभिवादे' इत्यनेनाऽप्यसम्बन्धः, अत एव'भोराजन्ये'ति वार्तिके 'वा' ग्रहणं सफलम्, अन्यथा विकल्पस्यानेनैव सिद्धौ तद्वैयर्थ्यं स्पष्टमेव, अत एव च—'अविद्वांस' इति भाष्यं सङ्गच्छते'' इत्यपास्तम्, उक्तयुक्तेः । वार्तिके विकल्पस्यैतत्सिद्धार्थकथनपरत्वात् । भाष्यन्तु वैकल्पिकेषु भावानुष्ठानौचित्येन शास्त्राज्ञाननिन्दामात्रपरमिति दिक् । अननुवृत्त्यादेराह—**अप्लुतेति** । स्वस्मिन्स्व-सादृश्यस्यासम्भवादिति भावः । पर्युदासस्य युक्तत्वेन 'अप्लुत एव विधीयेते'ति पाठस्य युक्तत्वेऽपि वृत्ति-पाठोऽप्यार्थिकार्थपरतया सुयोज इति ध्वनयितुं तथा दृश्यमानपाठमपि व्याचष्टे—**तदिति** । आदेश-मात्रस्य स्थानिनिवर्त्तकत्वस्य दृष्टत्वादिति भावः । एवञ्च फलितस्तन्निषेध इति तात्पर्यम् । ननु प्रसज्यप्रति-षेध एवास्तु, अत एव तथा वृत्तावुक्तं, जातस्यापि लोपादिनेव निवृत्तिरिति तद्भावः, अन्यथा 'नचे'त्यादि-दोषापत्तिरत आह—**प्रसज्येति** । **गौरेति** । असमर्थसमासापत्ते'र्भुक्तवन्त'मिति न्यायविरोधापत्तेश्चेत्यर्थः ।

❀ सदाशिवभट्टीयम् ❀

प्लुतसमावेशाभावाय तदित्यपि बोध्यम् । **परस्य चेतीति** पाठः । **वक्तव्यमिति** । 'अग्नी'दित्यस्य स्थाने इति भावः । **सङ्गच्छत इति** । अन्यथा प्रत्याख्यानपक्षे तस्य दुर्वारत्वेन फलभेदापत्त्याऽसङ्गतिः स्यादिति भावः ।

ननु गुरोश्चानृत एकैकस्य प्राचा'मित्येवास्तु-अनृतो गुरोश्चादेः प्लुत इत्यर्थादिति चेन्न । अगुरुसमुच्चायक-तापि स्यादिति वकाराकारस्यापत्तेः, नचैवं गुरुग्रहणं व्यर्थमिति वाच्यं, गुर्वभाववत्पदव्यावृत्त्या चरितार्थ-त्वात् । सिद्धान्त इव व्याख्यावलम्बने तु न कश्चिद्दोषः । **अप्लुतव । अप्लुतस्य प्लुतविधानेनेति** । पर्यु-दासात् । ह्रस्वस्य दीर्घस्य चेत्यर्थः । न चान्तरतम्याद्दीर्घ एव स्यादिति वाच्यं, दीर्घ इत्येव वाच्यं

नोपस्थिते इति वदेत् । न च पर्युदासेऽग्नी३ इतीत्यादौ प्रगृह्याश्रयप्रकृतिभावं बाधित्वा

❀ अभिनव-चन्द्रिका ❀

असमर्थसमासस्य क्रियाध्याहारस्य चावश्यकत्वादिति भावः । **इति वाच्यमिति** । न च कार्यातिदेश-

❀ चिदस्थिमाला ❀

अत **एवाह—किञ्चेति** । 'यत' इति शेषः । लाघवादिति भावः । नन्वेवमपि दोषात्तत्याग इत्याशयेन-सिद्धान्तेऽप्याह—**नचेति** । वृत्तिकारोक्तिरियम् । यत्तु **दण्ड्यादयः**—'अप्लुतकार्यं यणादिक'मिति

❀ सदाशिवभट्टीयम् ❀

एवमुक्त्यान्तरतमपरिभाषाबाधात् । इदं चाप्लुत एव विधीयेतेति पाठानुपलम्भमालम्ब्य । **नोपस्थित इतीति** । तद्विधावनुपस्थित इत्युक्ते तु पर्युदासादवसाने न स्यात् प्लुत इति भावः । नन्विह प्रकरणे पाठे सर्वस्यापि निषेधः, त्रिपाद्यान्तथा न्यासे त्वन्यतमस्य स्यात । यदि तु वाक्यस्य टेरित्यनेन सहास्याप्यधिकारत्वं क्रियेत तदा सोमसु३दिति दे३वदत्तेत्यनुब्रूहीतीत्यादावपि प्लुतो न स्यात्तत्तद्विधायकैरपि सम्बन्धात्, इह पाठे तु न निषिध्यते, उपस्थितस्य व्यवहितत्वादिति चेन्न । इह न्यासेपि बाध्यविशेषचिन्ताया वक्तुं शक्यत्वात्। यद्वा त्रिपाद्यामेव 'वाक्यस्य टे'रित्यतः प्राक् 'नोपस्थिते प्लुत' इति निषेधविधिरस्तु, ततो वाक्यस्य टेः प्लुत इत्यनुवर्तते। एवञ्चानारभ्य विधिमधीतस्यास्य सर्वप्रतिषेध-कत्वमिट्प्रतिषेधस्येवेत्याशयात्। **वदेदिति** । मन्मते तु अग्नी इति अग्नि इति इतिप्रयोगद्वयमादेशपक्षे, निषेधे तु दीर्घघटित एवेति फलभेदात्तथा नोक्तम् । नचादेशेऽल्विधित्वेन प्रगृह्यत्वानातिदेशेन सन्धिकार्यप्रवृत्तौ अग्नीतीत्येकमेव स्यादिति वाच्यम्, एवमपि पञ्चमीसमासेन स्थानिवत्त्वात्, आदेशस्य बहिरङ्गासिद्धतया प्रकृतिभावप्रवृत्तेर्निष्प्रत्यूहत्वादिति भावः । नन्वेवं सिद्धान्तेपि 'इन्द्रे च' 'इको सव' 'ऋत्यकः' 'आङोना' प्रगृह्या अचि' 'प्लुताश्चाक्रवर्मणस्य' 'नोपस्थिते' 'दिवउ'दितिन्यासः कुतो न कृतः, एवं हि शाकलविषये परत्वादेव प्रकृतिभावः सिद्ध इति नित्यंग्रहणं न कर्त्तव्यमित्यपरं लाघवमिति चेन्न । तथा सति निषेधानां बलीयस्त्वेन प्रगृह्यत्वप्रयुक्तप्रकृतिभावस्याप्युपस्थिते निषेधापत्तेः । स्पष्टं चेदं तासिलादीत्यत्र शेखरे । नचादेशविधाने प्रगृह्यप्रयुक्तप्रकृतिभावेनादेशनिवृत्तौ भाष्योक्तदूषणानवतारः, निषेधस्य तु प्रकृतिभावाप्रतिबध्यत्वेन प्लुतश्रवणं न स्यादिति तदवतार इति वाच्यं, वक्ष्यमाणरीत्यादेशस्य बहिरङ्गत्वेनासिद्धतया प्रकृतिभावानिवर्त्यत्वात् । प्रकृतिभावेन स्वरूपसद्विकारानिवृत्तेरिति तु वक्तुमप्यशक्यं, 'निपात एका'जितिसूत्रे हलन्तस्य प्रगृह्यत्वेनैव दोष इति भाष्योक्तिविरोधात्। त्वद्रीत्या पुरोस्तीत्यादौ रुत्वाप्रवृत्त्यापत्तौ दोषसत्त्वात् । रुत्वस्याज्निमित्तत्वाभावेन प्रकृतिभावाप्रतिबध्यत्वे तु पूर्वत्रासिद्धमित्यस्य बाधे मानाभावादिति बोध्यम् । नचैवमप्युत्वस्याज्निमित्तत्वेन प्रतिबन्धापत्तौ रुत्वस्यासिद्धत्वेन सा नेति **प्रदीपोद्योतयोरुक्तं** तु न सम्यक् । असिद्धत्वेपि सान्तबुद्ध्या प्रवर्त्तमानौ सञ्ज्ञाप्रकृतिभावौ रान्त एव प्राप्तौ, तत्र च रान्तबुद्ध्या प्रवृत्तमुत्वं पश्यन्तौ तत्प्रतिबध्नीयातामेव, तन्निमित्तयोरदर्शनेपि तत्प्रवृत्तिदर्शने प्रतिबन्धकाभावात् । अग्नी इत्यत्रानुनासिकविधेर्द्विमात्रत्वाग्रहेपि प्रगृह्यत्वप्रवृत्तिग्रहवदिति वाच्यं, यद्बुद्ध्या प्रकृतिभावप्रवृत्तिः तस्य योऽकारस्तत्प्रतिबन्ध

❀ विषमपदविवृतिः ❀

अप्लुतवदुपस्थिते । इति वदेदिति । यत्तु प्लुतनिषेधस्य त्रिपादीस्थत्वेनासिद्धत्वा'त्प्लुतप्रगृह्या' इति प्रकृतिभावे संहिताकार्यं न स्यात्, प्लुतनिषेधस्तु श्रवणार्थं स्यादिति, तन्न । प्रकृतिभावदृष्ट्या प्लुतस्याश्रयात्सिद्धत्वेन तस्य च लक्ष्येऽदर्शनेन प्रकृतिभावाप्रवृत्तेः, न हि निषेधो न दृश्यत इत्येतावता तेन लक्ष्येऽप्रवृत्तिः, प्लुतो लक्ष्येऽस्तीति बुद्धिः प्रकृतिभावशास्त्रस्य सम्भवतीति ।

न च पर्युदासेऽप्येतद्दूषणतौल्यं, किं च'प्लुतप्रकरणोत्तरं नोपस्थिते'इत्युक्ते संहितायामित्यस्य सम्बन्धो न स्यात्तेन च 'तयोर्य्वावची'त्यतः संहितायामित्यस्य सम्बन्ध इति वाच्यम्, एवमपि पर्युदासे प्लुतस्योदात्तस्य स्थाने आन्तर्यादप्लुतादेश उदात्तो भवति

परत्वादप्लुतवद्भावे दीर्घादिकं स्यादिति वाच्यम् । शब्दत इतिशब्दसापेक्षाप्लुतवद्भावापेक्षया वर्णमात्रापेक्षप्रकृतिभावस्यान्तरङ्गत्वात् । 'अप्लुतव'दित्यस्य प्लुतकार्यं नेत्यर्थस्तु न शब्दमर्यादालभ्यः । प्लुतेऽप्लुतसादृश्यविधानस्यैव शब्दतो लाभात् । भाष्ये 'प्लुत-

❀ अभिनव-चन्द्रिका ❀

पक्षे 'यन्निमित्तवैकल्यप्रयुक्तोपदेशाप्रवृत्तिस्तदतिरिक्तसर्वनिमित्तकलमतिदेशस्ये'ति सिद्धान्तेन प्रगृह्यः प्रकृत्येत्यनेन प्रगृह्यभिन्नत्वेन 'अकस्सवर्ण' इत्यत्राक्पदार्थे सङ्कोचात्प्लुतभिन्नत्वातिरिक्तसवर्णाजव्यवहितपूर्वत्वविशिष्टप्रगृह्यभिन्नाक्त्वस्य अप्लुतवद्भावे निमित्तत्वेन इमे शङ्कासमाधाने निर्दले इति

❀ चिदस्थिमाला ❀

व्याख्यानं उक्तरीत्योक्तस्थले यणादिकार्यं स्यात्ततश्च वत्करणप्रयोजनं यणादिकमेव स्यात्तस्मात्प्लुतकार्यं प्रकृतिभावरूपं,—न करोति, न भवतीति वाऽर्थ इति वृत्त्युक्तव्याख्यानमेव युक्तं, तच्च प्रागुक्तोभयसङ्ग्रहायाह—**नेत्येति** । उक्तरीतिमनुसृत्याह—**प्लुते इति** । नन्वेवं भाष्यविरोधोऽत आह—**भाष्ये इति** ।

❀ ज्योत्स्ना ❀

पदमित्येतद्दृष्ट्या त्रिपाद्या असिद्धत्वादिति भावः । **इतिवदिति** । एवं तु प्लुतनिषेधस्य त्रिपादीस्थत्वेनासिद्धत्वात्-'प्लुतप्रगृह्या' इतिप्रकृतिभावे संहिताकार्यं न स्यात्, प्लुतनिषेधस्तु श्रवणार्थं स्यात्—सुश्लोक इतीति । न च प्रसक्तस्य प्लुतस्यानेन निषेधो न तु जातस्य निवृत्तिरितीह प्लुत एव लक्ष्ये न प्रवृत्तः कुतस्तरां तत्प्रयुक्तः प्रकृतिभाव इति वाच्यम्, प्रसक्तनिषेधे 'पूर्वत्रासिद्ध'मिति शास्त्रबाधप्रसङ्गात्त्रैपादिकबाधकशास्त्रेण जातनिवृत्तेरेव सति सम्भवे कर्तुं योग्यत्वात् । जातस्य निवृत्तिकल्पने गौरवं तु पाक्षिकं निषादस्थपत्यधिकरणरीत्या फलमुखत्वाददुष्टम् । अत एव रामा-

❀ सदाशिवभट्टीयम् ❀

अत्र तु सबुद्ध्या प्रवृत्तिरस्य विकार इति । नन्वेवम्—एहि स्वर् इरिन् गच्छति, एहि देवदत्त एधतेऽयं, पाहि शिव ओं नमस्करोमि त्वामित्यादौ बहिरङ्गसन्धिकार्यस्य प्रकृतिभावेन वारणं न स्यादिति चेत्सत्यम्, इष्टापत्तेः, अनिष्टत्वे ग्राहकप्रमाणोपलम्भे तु बहिरङ्गासिद्धत्वाऽनित्यत्वमेव शरणम् । गौरवस्य फलमुखत्वं प्रतिपादयन्सिद्धान्ते शङ्कते—**न च परीति** । **अन्तरङ्गत्वादिति** । वस्तुतस्तु शास्त्रकार्यातिदेशयोरुभयोरप्यातिदिश्यमानकार्यस्योपदेशदेशानतिक्रमात्प्रकृतिभावस्यैव परत्वेन प्रवृत्त्या न कश्चिद्दोषः । एतेन—'अतिदेशप्राप्तकार्यस्यासिद्धत्वात्कथं प्रकृतिभावनिवर्त्यत्व'मित्यपास्तम् । तदेतद्ध्वनयन् वक्ष्यति—**सादृश्यविधानस्यैवेति** । **प्लुते कृतेपीति** । 'तस्यासिद्धत्वात्पूर्वं प्रगृह्यत्वेपी'त्यादिः ।

❀ विषमपदविवृतिः ❀

नोपस्थिते इत्युक्तौ उदात्तस्य श्रवणं न स्यादिति विशेषः । मन्मते संहिताया इत्यस्य सम्बन्धासम्बन्धाभ्यां विशेषः । वत्करणेऽप्युक्तन्यायेन पर्युदासमेव स्थिरीकृत्य शङ्कते—**न चेति** । **परत्वादिति** । प्लुतत्वप्रयुक्तप्रकृतिभावापवादत्वेऽपि प्रगृह्यत्वप्रयुक्तप्रकृतिभावानपवादत्वाद्विप्रतिषेधोपपत्तिः । इदमयुक्तम्—शास्त्रातिदेशे दीर्घस्य परत्वभावात्कार्यातिदेशेऽपि स्थानिवत्सूत्रे परिवीरित्यत्रोक्तातिदेशात्तस्य तत्त्वाभावात् । **अन्तरङ्गत्वादिति** । इदमप्ययुक्तम्—'न धातुलोप' इति सूत्रेऽन्तरङ्गनिषेधदृष्ट्या गुणस्यासिद्धत्वेनोपेद्ध इत्यादौ गुणः प्रवर्त्तत इति भाष्योक्तरीत्या प्रकृतिभावेन दीर्घबाधानापत्तेः । किञ्च वत्करणाभावेऽप्यप्लुतशब्देन प्लुतस्य स्थाने विहितस्य दीर्घस्योक्तदिशा वारणे वत्करणवैयर्थ्यं तदवस्थम् । वस्तुतस्तु प्रकृतिभावेन तु स्वापेक्षबहिरङ्गस्यापि निवृत्तिः, 'उपसर्गादृती'ति सूत्रे धाताविति योगविभागेन पुनर्वृद्धिविधानाज्ज्ञापकात् । तेन सुखार्त इत्यत्र पक्षे वृद्धिनिवृत्तिसिद्धेरिति एका दिक् । **न शब्दमर्यादया लाभ इति** । इदमप्य-

कार्यप्रतिषेधार्थ'मित्युक्तिस्तु—फलितार्थाभिप्रायेणैवेति बोद्धयम्। **प्रगृह्याश्रये इति।** प्लुते कृतेऽपि तस्यासिद्धत्वाद्दीर्घत्वबुद्धिवत्तद्गतं प्रगृह्यत्वमनुकार्ये सुलभम्। अनुकरणे तु 'प्रकृतिवदनुकरणमि'त्यतिदेशात्तत्त्वमिति भावः।

'किम्मया कर्त्तव्य'मिति पृष्ट आह—**चिनु ही ३ इदमिति।** 'विभाषा पृष्टप्रतिवचने हे'रिति प्लुतः। इदंशब्दोऽत्र वाक्यान्तरस्थ इति हेरिकारस्य वाक्यटित्वम्।

ॐ अभिनव-चन्द्रिका ॐ

वाच्यम्, परत्वादप्लुतवद्भावेन 'प्रगृह्यः प्रकृत्ये'त्यस्य बाधादवैदिकेतिशब्दाव्यवहितपूर्वत्वविशिष्टप्लुतभिन्नप्रगृह्यभिन्नत्वेनाक्पदार्थे सङ्कोचादवैदिकेतिशब्दाव्यवहितपूर्वत्वविशिष्टप्लुतभिन्नो यः प्रगृह्यः, तद्भिन्नोयोऽक् तादृशाक्त्वमेवाप्लुतवद्भावे निमित्तमिति शङ्काशयः। अन्तरङ्गत्वात्प्रगृह्यः प्रकृत्येत्यनेन बाधात्सामान्यतः प्रगृह्यभिन्नत्वेनाक्पदार्थे सङ्कोचात्सवर्णाजव्यवहितपूर्वत्वविशिष्टप्रगृह्य-

ॐ चिदस्थिमाला ॐ

अत एव—'प्लुत एव निषिध्यते'त्येव पाठो मूले इति बोध्यम्। ननु प्लुतस्य प्रगृह्यत्वं दुर्लभं तत्र दीर्घाणामेव ग्रहणेन तेषाञ्चानण्त्वेन सवर्णग्राहकत्वादत आह—**प्लुते इति।** 'प्लुतः प्रकृत्ये'तिज्ञापकात्स्वरसन्धिषु प्लुतस्य सिद्धत्वेपि प्रगृह्यसञ्ज्ञाया अतत्त्वेन तस्याऽसिद्धत्वादादौ प्रगृह्यत्वे ततः प्लुत इत्यर्थः। अपिना—तदभावसमुच्चयः, त्रिमात्रेऽपि द्विमात्रबुद्धेरप्रतिघातादिति भावः। नन्वेवमप्यनुकरणेऽसिद्धत्वाभावेन कथन्तत्त्वमत आह—**अनुकेति।** तत्त्वम्=असिद्धत्वं, प्रगृह्यत्वं वा। यत्तु रत्नाकरादिः—'किंमया-चेतव्यमिति प्रश्न' इति, तन्न, इदमित्यस्य वाक्यान्तरस्थत्वेन विशेषप्रश्नासम्भवात्, तदेतद्ध्वनयन् सामान्यप्रश्नमाह—**कर्त्तव्यमिति। चिन्विति**—लोडन्तं, 'ही'त्यव्ययम्। यत्तु-'अनन्त्यस्येति प्लुत' इति, तन्न, ततो विभाषेत्यस्य विशेषविहितत्वात्तस्याऽसिद्धत्वाच्च, तदेतद्ध्वनयन्नाह—**विभाषेति। वाक्यटित्वमिति।** अन्यथा 'वाक्यस्य टे'रित्यधिकाराद्धिशब्देकारस्यातथात्वान्न स्यादिति भावः। खण्डयितुं

ॐ ज्योत्स्ना ॐ

दित्यत्र 'जश्त्वं' 'वावसाने'इति साधनक्रमसिद्धान्तः। 'जश्त्व'मित्यस्य 'बाधिते'तिशेषपूरणेन तत्र करिष्यमाणं व्याख्यानं तु निर्युक्तिकं, रत्नमुड़ित्यादौ जश्त्वाप्रवृत्तिप्रसङ्गग्रस्तञ्च, ज्ञापकञ्चात्र वत्करणमेव। अन्यथोक्तरीत्या 'नोपस्थिते' इत्येव वक्तव्येऽप्लुत इत्युक्तिरप्लुतसादृश्यविधानार्था भविष्यतीति वत्करणं व्यर्थमेव स्यादिति चिन्त्यमेतत्। यद्यप्यप्लुत इति प्लुतसदृशविधाने प्लुतस्थाने दीर्घेण भवितव्यं, प्रसज्यप्रतिषेधे तु प्लुतनिषेधे ह्रस्वेन भाव्यं, तथापि सत्येकादेशे नास्ति तत्र फले विशेष इति न तत्र निर्भरः कृतः। **इतिभाव इति।** न चैवमपि प्लुतस्यासिद्धत्वे प्लुतात्पूर्वमेव प्रगृह्यसञ्ज्ञायां ततः प्लुते त्रिमात्रे यथोद्देश्यपक्षे द्विमात्रत्वेन पश्यन्त्या अपि सञ्ज्ञायाः पुनः प्रवृत्तौ बीजाभावेनाल्विधित्वात्स्थानिवद्भावस्य दुर्लभत्वेन चाग्नी ३ इतीत्यादौ प्रगृह्याश्रयप्रतिभावो दुर्लभ एवेति वाच्यम्, अन्तरङ्गत्वात्प्लुतस्य प्रागेव प्रवृत्तेः, यथोद्देशपक्षे षाष्ठपरिभाषादृष्ट्या त्रिपाद्या-

ॐ सदाशिवभट्टीयम् ॐ

दीर्घत्वबुद्धिवदिति। अनुनासिकप्रतिबन्धाय पुनः सञ्ज्ञाप्रवृत्तये तद्बुद्धेरावश्यकत्वादिति भावः। **प्रगृह्यत्वमिति।** प्रकृतिभावदृष्ट्येति भावः। **तत्त्वमिति।** प्रगृह्यत्वमित्यर्थः। 'चेतव्य'मिति प्रश्ने इदमित्येकवाक्यस्थमेव युक्तमतः सामान्यतः पृच्छति—**कर्त्तव्यमिति।** 'चिनु' इति लोडन्तम्। 'ही'त्य-

ॐ विषमपदविवृतिः ॐ

युक्तम्। 'अचः परस्मि'न्निति'व'तृतीयादिषु भाषितपुंस्क'मितिवच्चाप्लुतो यथा प्लुतकार्यं न प्रवर्त्तयति

उभयत्र विभाषेयमिति । उपस्थिते प्राप्तेऽनुपस्थिते चाप्राप्ते इत्यर्थः । विभाष्यते विकल्प्यत इति–विभाषा । 'गुरोश्च हल' इत्यप्रत्यये टाप् । 'न वेति विभाषाया'-मिति भाष्यप्रयोगात् । भाष्ये तु 'किमर्थमिदमुच्यते ? अनुपस्थितार्थं, तत्र ईग्रहणेन नार्थः, अविशेषेण चाक्रवर्मणस्याप्लुतवदित्येव, इदमपि सिद्धं–वशा इयं–वशेय' मित्युक्तम् । तद्बलेनोपस्थिते पूर्वविप्रतिषेधेन ईग्रहणेऽपि नित्याप्लुतवद्भाव एवेष्टः । प्रत्याख्याने नित्याप्लुतवद्भावस्य 'येन नाप्राप्ति'न्यायेन वैकल्पिकतद्बोधिताभावांशबाध-कत्वात् । 'उपस्थिते इत्यस्य निवृत्त्या परविप्रतिषेधादुभयत्र विभाषेय'मिति–कैयटस्य

❀ **अभिनव-चन्द्रिका** ❀

भिन्नाक्त्वमेवाप्लुतवद्भावे निमित्तमिति समाधातुराशय इत्यदोषात् । अपवादविषये सङ्कुचित-सङ्कोचो न भवतीति सिद्धान्तादिति दिक् । **कैयटस्य प्रमाद इति** । परे तु 'अप्लुतवदुपस्थिते' इति सूत्रे 'इकोऽसवर्णे' इति सूत्रादसवर्ण इत्यनुवर्त्तते । अत एव चिनुहीदमित्यादौ ईग्रहणसत्त्वे

❀ **चिदस्थिमाला** ❀

स्वारसिकमर्थमाह—**उपस्थिते इति** । वा–प्राप्ते अप्राप्ते च । वक्ष्यमाणार्थसिद्धये 'विभाषे' त्यस्याव्ययत्वं निराचष्टे–**विभेति** । नवेतीति द्वयोर्विभाषयोर्मध्ये 'पयसस्तु विभाषये'त्यादपि बोध्यम् । मूलासङ्गतिं भाष्यविरोधात्प्रतियादयन्सिद्धान्तमाह–**भाष्ये** त्वित्यादि—**अन्ये** इत्य-न्तेन । अत एव तुः । एवमुपक्रमभाष्यमुक्त्वाऽग्रिमभाष्यमाह—**तत्रेति** । सूत्रे इत्यर्थः । **चाक्रेति** । आचार्यस्येत्यर्थः । **वदिति** । 'भवती'ति शेषः । फलभेदे प्रत्याख्यानाऽसङ्गत्या तदेकवाक्यतायै सूत्रमते आह—**तद्बलेनोपेति** । तृतीयान्तार्थमाह—**प्रत्येति** । 'सुश्लोकेतीत्यादाविव 'चिनुहीती' त्यादावपीति शेषः । **चैकेति** । तस्मादुभयत्र विभाषात्वं भाष्यविरुद्धमिति भावः । नन्वेवं कैयटविरोधोऽत आह—**उपेति** । टस्य=तस्य तु । एतेन 'वक्ष्यमाणरीत्या कैयटोऽपि सुयोज'इत्यपास्तम् ।

❀ **ज्योत्स्ना** ❀

असिद्धत्वेऽपि लोकन्यायसिद्धान्तरङ्गबलवत्त्वस्य त्रिपाद्यामप्रवृत्तौ हेत्वभावस्य **परिभाषाप्रदीपा-र्चिषि** विस्तरेण निरूपणात् । षाष्ठपरिभाषाया अपि यथा त्रिपाद्यां प्रवृत्तिस्तथा तूक्तं प्राक् ।

❀ **सदाशिवभट्टीयम्** ❀

व्यम् । **विभाषेति** । 'अनन्त्यस्यापि प्रश्ने'त्यस्यासिद्धत्वाद्नेनैव न्याय्य इति भावः । **टाबिति** । न त्वव्ययमिति भावः । **नवेतीति** । द्वयोर्विभाषयोर्मध्ये प्राप्ताऽप्राप्तविभाषयेत्यपि बोध्यम् ।

ईचाक्र । बृहति तु 'नार्थे' इत्यस्य—चाक्रवर्मणस्येत्येतत्सम्बन्धेन नार्थः–न सकलप्रयोजनसिद्धि-रित्यर्थः । अयं भावः—'ई' इति पृथक् पदं कार्यम्, 'उपस्थिते' इति वर्त्तते, पूर्वेण सिद्धे विकल्पार्थ-मिदं, ततः 'चाक्रवर्मणस्ये'ति, अयमेव च सूत्राशयः, एवञ्च सूत्रभाष्ययोर्न विरोधः, भाष्याविरोधेन सूत्रस्येव सूत्राविरोधेन भाष्यव्याख्याया उचिततत्वाच्च । एतेन भाष्ये ईग्रहणसत्त्वे 'वशेय'मित्यसिद्धिवत् 'चिनुहीती'त्यादौ नित्याप्लुतवद्भावासिद्धिर्नोक्ता, नापि पूर्वविप्रतिषेधारम्भगौरवमित्यपास्तम् । 'कैयटस्य प्रमाद' इत्येव प्रामादिकमित्युक्तम् ।

❀ **विषमपदविवृतिः** ❀

तथा प्लुतोपीत्यभावातिदेशाङ्गीकारेणोक्तार्थलाभसम्भवात् । तदेतदभिप्रेत्य भगवद्भ्यां भाष्यकार-वार्तिककाराभ्यामुक्तम्—'वद्वचनं प्लुतकार्यप्रतिषेधार्थं, वद्वचनं क्रियते–प्लुतकार्यप्रतिषेधार्थ'मिति ।

प्रमादः । मूलन्तु इतिशब्दभिन्ने वैदिकेतिशब्दे चेत्येवम्परतया कथञ्चिद्व्याख्येयमित्यन्ये । उद्देश्यप्रतिनिर्देश्ययोरैक्यमापादयत् सर्वनाम पर्यायेण तत्तल्लिङ्गभागितीयमिति निर्देशः ।

विशेषणेन तदन्तविधिमाश्रित्याह—**ईदूदेदन्तमिति** । **द्विवचनमिति** । सञ्ज्ञाविधौ प्रत्ययग्रहणे तदन्तविधिनिषेधादिति भावः । एदन्तमिति व्याख्याने फलमाह—**पचेते इति** ।

निपात ए । निपात इति किम् ? चकारात्र । प्रत्ययस्य शास्त्रकल्पितार्थव-

❀ अभिनव-चन्द्रिका ❀

विकल्पेनाप्लुतवद्भावः । प्रत्याख्यानपक्षेऽपवादत्वान्नित्याप्लुतवद्भाव इति फलभेदो न । अत एव 'नित्यग्रहणं किमर्थ'मिति भाष्योक्तः प्रश्नः सङ्गच्छते । अन्यथा 'इको यणची'त्यनन्तरं 'पदस्य शाकल्यस्य ह्रस्वः' 'ऋत्यक' इत्येवमेव सिद्धे तदसङ्गतिस्स्पष्टैव । एवञ्च यथाश्रुतं मूलमेव युक्तम् , कैयटस्यापि प्रमाद इति प्राहुः । **इति भाव इति** । वस्तुतस्तु ईदूदेदन्तं यद्द्विवचनं तदन्ततदादि प्रगृह्य-

❀ चिदस्थिमाला ❀

त्तेन तथाहेत्युक्त्या तथा दुर्वचत्वात्, एवमपि मूलसङ्गतिरित्याह—**मूलन्त्विति** । अत एव तुः । एतेनैतौ प्राप्तेऽन्यत्राऽप्राप्ते' इति **दण्डि-रत्नाकरादि**व्याख्यानमपास्तम् । प्राप्ताऽप्राप्तविभाषायामेव तत्प्रयोगस्य स्वारसिकत्वादाह—**कथञ्चिदिति** । नन्विदंशब्दस्योद्देश्यसमर्पकत्वेनोद्देश्यस्य च योग-सूत्रान्यतररूपत्वेन स्त्रीलिङ्गनिर्देशासङ्गतिरत आह—**उद्देश्येति** । अत एव 'स कर्ते'ति 'स शब्द' इत्यादि च सङ्गच्छते । ननु 'प्रत्ययग्रहणे' इति तदन्तविधिरत्रापि कुतो नात आह—**सञ्ज्ञेति** । तेन 'कुमार्यगार'मित्यादौ नेति स्पष्टमन्यत्र । ननु हरी इत्यादावीकारादेर्द्विवचनरूपत्वान्निष्प्रयोजनव्यपदेशिवद्भावप्रवृत्तिजगौरवनिरासाय तथैव व्याख्यानमस्त्वत आह—**एदन्तमिति** । एवञ्चैतदर्थं तदावश्यकत्वेऽवैरूप्याय तत्रापि तथेति तत्रातिदेशेन निर्वाह इति भावः । एतेनैकारांशे द्वितीयोदाहरणानर्थक्यं परिहृतम् । ननु वर्णग्रहणेऽपि तत्प्रवृत्तेरर्थवत एव ग्रहणमिति तदभावेपि नात्र दोषोऽत आह—**प्रत्येति** ।

❀ ज्योत्स्ना ❀

अप्रत्यये **टाबिति** । नत्वव्ययमिति भावः । **इत्यन्ये इति** । वस्तुतः पूर्वविप्रतिषेधकल्पने गौरवप्रसङ्गाद'**नुपस्थितार्थ**'मिति भाष्यस्य-तदर्थमपीत्यर्थ उचितः । तत्र 'ई ३ ग्रहणेन नार्थः, अविशेषेण चाक्रवर्मणस्ये'त्यादि तदुत्तरभाष्ये चा'विशेषेणे'त्यस्य-स्थान्यंशे निमित्तांशे चाविशेषेणेत्यर्थाद'प्लुतवच्चाक्रवर्मणस्ये'तावत्सूत्रस्य करणसूचनादुपस्थिते इत्यंशस्यापि ग्रहणवदानर्थक्यस्य सूचनात्फले विशेषाभावेन कैयटमतस्य सद्युक्तिकत्वादित्याहुः । नन्विदंशब्दस्योद्देश्यसमर्पकत्वमुद्देश्यस्य चाप्लुतवदित्यादेर्योगरूपता सूत्ररूपता वा,उभयथापीयमिति स्त्रीलिङ्गनिर्देशोऽनुपपन्नोऽत आह—**उद्देश्येति** । अत एव'णेरणा'विति सूत्रे कर्माकारपरामर्श्यपि तच्छब्दः स कर्तेति वाक्ये विधीयमानकर्तृलिङ्गभाग्भवतीत्याहुः । नन्वनाङिति पर्युदासादर्थवत्त्वेनैव च सादृश्यग्रहणात्केवलस्य प्रत्ययस्य प्रयोगाभावादानर्थक्याच्चकारात्रेत्यत्र न दोषोऽत आह—**प्रत्ययस्येति** । न च स्वातन्त्र्येण प्रयोगार्हल-

❀ सदाशिवभट्टीयम् ❀

इत्यन्ये इति । वस्तुतः पूर्वविप्रतिषेध एव युक्तः योगपरत्वे सूत्रपरत्वे वा इयमित्यसङ्गतमत आह—**उद्देश्येति** । उक्तं प्राक् । **निपात ए** । पर्युदासादर्थवद्गृह्येतात आह—**प्रत्ययेति** । नन्वेवं क्वापि बहुव्रीहिर्न स्यादत आह—

❀ विषमपदविवृतिः ❀

ईदूदेत् । एकारस्य गङ्गे इत्येकमेवोदाहरणमुपन्यस्य पुनरुदाहरणान्तरोपन्यासस्य फलं वक्तुमवतारयति—**एदन्तमिति** ।

त्वात्। एकाजिति कर्मधारयो वर्त्तिपदार्थप्रधानत्वेनान्तरङ्गत्वात्, 'व्याहरति मृगः' इत्यादिनिर्देशाच्च। तेन 'प्रेद'मित्यादौ न दोषः। तदाह—**एकोऽजिति। आङ्वर्ज इति।** पर्युदासस्यौचित्यात्। अत एवैकाज्नाङिति नासूत्रि। वासुदेववाचकस्य अशब्दस्य आङा सहाव्ययीभावे आ आत्-अमित्यादौ सत्यभिधाने स्वत आङ्भिन्नत्वेन

❀ अभिनव-चन्द्रिका ❀

सञ्ज्ञमित्यर्थेऽपि न दोषः। नच 'पदार्थः पदार्थेनान्वेति न तु पदार्थैकदेशेने'तिव्युत्पत्तिविरोध इति

❀ चिदस्थिमाला ❀

'प्रेद'मित्याद्येकग्रहणव्यावर्त्यं'मिति दण्डयुक्तेरसाङ्गत्यं ध्वनयन्बहुव्रीहिर्नेत्याह—**एकेति**। विषयभेदेनापवादत्वस्य 'पूर्वकालैके'त्यस्य दुर्वचत्वादाह—**वर्त्तीति**। नन्वेवं तेन क्वापि बहुव्रीहिर्न स्यादत आह—**व्याहेति**।

प्रसिद्धदोषाभावाय-**पर्युदेति**। एतेन—"वृजेर्ण्यन्तात्कर्मणि घञ्, बहुव्रीहिः, आङ्भिन्न इति तदर्थ इति, 'प्रगृह्य'इत्यग्रे योज्यम्, आङ् वर्जनीयः, तस्य नेति यावत्—" इति **दण्डि-रत्नाकरा**द्युक्तमयुक्तमिति च सूचितम्। सूत्रसम्मतिमप्याह—**अत एवैकेति**। यत्तु—"नायं पर्युदासः, किन्तु प्रसज्यप्रतिषेधः, अग्रे 'प्रतिषिद्धार्थोऽयमारम्भ' इति भाष्योक्तेः, अन्यथा पूर्वेणैव सिद्धौ तदसङ्गतिः स्पष्टैव, वक्ष्यमाणरीत्या पदद्वयवैयर्थ्यापत्तिश्च। किञ्च फले विशेषः, तथा हि—'अम्-इतः-एत'इति रूपं प्रतिषेधपक्षे, तस्य स्थानिवत्त्वादाङ्त्वेन प्रगृह्यत्वनिषेधात्। पर्युदासे तु स्वतोऽनाङ्त्वात्स्थानिवत्त्वेन निपातत्वाच्च प्रगृह्यत्वं दुर्वारमेव। परादिवत्त्वेन तद्भिन्नत्वन्तु न लभ्यमशास्त्रीयत्वात्। एवममित्यादौ प्रगृह्यत्वात्पूर्वान्तवत्त्वेन पदान्तत्वात्पूर्वरूपानापत्तिः" इति **दण्डि-रत्नाकरा**दयस्तत्खण्डयंस्ततः पर्युदासे आदौ फलविशेषं प्रतिपादयति—**वासुदेवेति**।

❀ ज्योत्स्ना ❀

रूपमर्थवत्त्वं पर्युदासेन लभ्यम्, आङो निपातत्वेन द्योतकत्वात्स्वातन्त्र्येण प्रयोगाभावादुक्तरूपार्थवत्त्वस्यैव ग्रहीतुमुचितत्वात्। एतेन 'वर्णग्रहणेऽर्थवद्ग्रहणपरिभाषाया अप्रवृत्तेः प्रत्ययार्थवत्त्वादिविचारो व्यर्थं' इति परास्तम्। **औचित्यादिति**। 'पर्युदासादेवाङ्सदृशाज्रूपनिपातलाभे एकग्रहणमन्यत्र वर्णग्रहणे जातिग्रहणज्ञापकमिति भाष्यसङ्गतिः। न चैवमाहो—उताहो-इत्याद्योदन्तनिपातसमाहाराभ्युपगमादेकनिपातत्वं निरस्य—तत्र 'निपात एका'जित्येव सिद्धे ओदित्यनर्थकमित्याशङ्क्य-आ उ ओ इत्यत्र पूर्वान्तवद्भावादनाङिति प्रतिषेधे प्राप्ते प्रतिषिद्धार्थोऽयमारम्भ इति भाष्यविरोधः, स्वत आङ्भिन्नत्वप्रयुक्तकार्यस्य प्रगृह्यत्वस्य पूर्वान्तवद्भावादतिदिश्यमानाङ्त्वविरोधित्वादप्रवृत्तावपि परादिवद्भावादुकारग्रहणेन ग्रहणात्तत्प्रवृत्तेर्निष्प्रत्यूहत्वादिति वाच्यम्, तस्य भाष्यस्यैकदेश्युक्तित्वात्। अत एव **गोऽभव**दित्यादौ प्रगृह्यसञ्ज्ञावारणायौतश्चिवप्रतिषेध इति वार्तिककृता वचनमारब्धं, भाष्यकृता च गौणमुख्यन्यायेन प्रत्याख्यातं सङ्गच्छत इत्याहुः।

अमिति। अव्ययीभावत्वेन क्लीबत्वान्नपुंसकह्रस्वे रूपम्। **प्रगृह्यत्वं नेति**। तत्फलन्तु अ इतः

❀ सदाशिवभट्टीयम् ❀

व्याहरतीति। आ आत्—अमिति। समाससञ्ज्ञासमकालं दीर्घे ततो नपुंसकह्रस्वः। 'उ' पदे तु लुकः प्राक् दीर्घप्राप्तिरेव नेत्यन्तरङ्गत्वाद्ध्रस्वे ततो दीर्घ इति नादसोसेरिति सूत्रीयशेखरविरोधः। यदि 'से'

❀ विषमपदविवृतिः ❀

अर्थवत्त्वादिति। अनाङिति पर्युदासेनार्थवत एव ग्रहणादिति भावः। एतेन-'दमदसोरको'रिति प्रतिषेधेन वर्णग्रहणेऽर्थवत्परिभाषाया अप्रवृत्तिज्ञापनादिदमप्ययुक्तमित्यपास्तम्। पर्युदासपक्षे दोषमाशङ्क्य निराकरोति—**वासुदेवेति**। **अमिति**। अत्र प्रगृह्यत्वेऽपि

पूर्वान्तवत्त्वेन निपातत्वेऽपि प्रगृह्यत्वन्न । पूर्वान्तवत्त्वेनाऽऽङ्त्वातिदेशेऽतिदिश्यमान-धर्मविरुद्धस्वाश्रयधर्मप्रयुक्तकार्यनिवृत्तेरतिदेशस्वभावसिद्धत्वात् । ओदिति सूत्रे आ उ ओ, इत्यत्र अनाङिति–'प्रतिषिद्धार्थोऽयमारम्भ' इति भाष्यन्तु पर्युदासेऽपि गम्यस्य प्रतिषेधस्य सत्त्वान्नानुपपन्नम् । अनाङिति पर्युदासादेव निपातैकाज्रूपत्वे लब्धे निपातैकाज्ग्रहणं स्पष्टार्थम् ।

❀ अभिनव-चन्द्रिका ❀

वाच्यम्, गभीरायां नद्यां घोषः'ङमो ह्रस्वादची'त्यत्रैव द्विवचनपदमेव ईदूदेदन्तं यद्द्विवचनन्तदन्त-तदादिपरम्, ईदूदेदितितात्पर्यग्राहकमिति स्वीकारेणादोषात्। सञ्ज्ञाविधाविति परिभाषा तु फलाभा-वान्न स्वीक्रियते इत्यन्यत्र विस्तरः । **चकारात्रेति** । अत्र णलो माभूदित्यर्थः । **अन्तरङ्गत्वादिति** । निषादस्थपत्यधिकरणन्यायादिति बोध्यम् । **सत्यभिधाने इति** । अपरनिमित्तकत्वेनान्तरङ्गत्वात्पूर्वं-नपुंसकह्रस्वे पश्चात्सवर्णदीर्घे आमित्येव स्यादितिबोधनाय 'सत्यभिधाने' इत्युक्तम् । **विरुद्धेति** ।

❀ चिदस्थिमाला ❀

आदिना 'एत' इत्यादिपरिग्रहः । **पूर्वान्तेति** । निपातत्वार्थन्तदावश्यकत्वे तेन तस्यापि लाभ इति भावः । यद्वा–पर्युदासेऽपि निषेधस्य गम्यत्वेन शास्त्रीयकार्यादेः सत्त्वादिति बोध्यम् । **सिद्धत्वा-दिति** । एवञ्च न तत्र तद्भिन्नत्वप्रयुक्तं कार्यमिति तदैक्यमेवेति भावः । प्रथमदोषमुद्धरति—**ओदितीति** । अनाङिति प्रतिषेधविषये आङनाङोरेकादेशे तत्प्रतिप्रसवार्थ इत्यर्थः । द्वितीयदोषमुद्धरति—**अनाङितीति** । भगवताऽप्रत्याख्यातत्वादाह—**स्पष्टार्थमिति** । एतेन–'निपातग्रहणमुत्तरार्थ'-मिति दीक्षित-दण्ड्याद्युक्तम्, 'एकाज्रूपनिपातमात्रस्य प्रगृह्यत्वार्थमेकाज्ग्रहणं, तेन गौणानाम्

❀ ज्योत्स्ना ❀

एत इत्यत्र प्रकृतिभावो नेति भावः । **अतिदेशस्वभावसिद्धत्वादिति** । न च परादिवद्भावादा-ङ्भिन्नत्वग्रहः, उभयत आश्रयणेऽन्तादिवद्भावविरहादिति सङ्क्षेपः । **स्पष्टार्थमिति** । अन्यथा आङ्भिन्नार्थवन्निपातत्वेनापि सादृश्यग्रहणे 'कमीमिदु'इत्यनर्थकोकारे प्रगृह्यत्वानापत्तिरिति भावः । **अच्समुदायग्रहणाभावे सिद्धे इति** । अनाङिति पर्युदासादजन्तनिपातस्य प्रेदं ब्रह्मेत्यादेरपि

❀ सदाशिवभट्टीयम् ❀

शब्दे वक्ष्यमाणरीत्या पदत्वाभावान्न प्रकृतिभावप्रसक्तिस्सत्यपि तत्त्वे इत्युच्यते, तदा अम्–इतः एतः, आ ओः–उ,'उ अस्ति वस्ती'त्यादौ तत्प्रसक्तिर्बोध्या । आगत उ, ओरानन्दो वानन्द इत्यादौ तत्प्रसक्तेश्च । एतेन नपुंसकह्रस्वे स्वमतेऽल्विधित्वान्निपातत्वारोहः कथमिति समाहितम् । **प्रगृह्यत्वं नेति** । तत्त्वे तु अमित्यत्र 'अमि पूर्वे' इति पूर्वरूपं न स्यादिति भावः । **स्वाश्रयेति** । ननु स्वाश्रयधर्मप्रयुक्तकार्याभा-वेपि परादिवद्भावेनाङ्भिन्नत्वातिदेशे तत्त्वन्दुर्वारम्, 'अशास्त्रीयत्वात्तत्वानतिदेश' इत्योत्सूत्रीयोद्योतोक्तन्न युक्तम्, अर्थवत्सूत्रशेषे भाष्ये 'काण्डे'इत्यादौ पूर्वान्तवत्त्वेन प्रत्ययान्तभिन्नत्वातिदेशस्योक्तत्वात् । **स्पष्टा-र्थमिति** । अन्यथा दीर्घत्वादिनापि सादृश्यं गृह्येतेति भावः । **सिद्धिरिति** । इकः परो यो हल् इत्येव सिद्धेऽन्तग्रहणाद्व्यवहिताव्यवहितसाधारणं सामीप्यमिति तु वक्तुमशक्यं, यियक्षतीत्यादौ कित्त्वे सम्प्र-

❀ विषमपदविवृतिः ❀

पदान्तत्वाभावेन प्रकृतिभावाप्रवृत्तेरयुक्तमेतत् । नचाम् इत एत इत्यत्र प्रकृतिभावापत्तिरित्याशयः, अव्ययीभावस्य समासान्तरघटकत्वे विवादादिति केचित्। ए आ ई एतीत्यत्र प्रकृतिभावापत्तेरित्यन्ये । **नानुपपन्नमिति** । अन्ये त्वनाङिति प्रसज्यप्रतिषेध एव, 'यदयमनाङिति प्रतिषेधं शास्ती'ति प्रकृत-

स्वाङ्गसमुदाये स्वाङ्गत्वाभाववदच्समुदायेऽच्त्वाभावादजित्येवाच्समुदायग्रहणाभावे सिद्धे एकग्रहणमन्यत्र वर्णग्रहणे जातिग्रहणार्थम् , तेन 'धिप्सती'त्यादिसिद्धिरिति भाष्ये स्पष्टम् । जातिग्रहणार्थमित्यस्योपात्तजात्याश्रयैकानेकव्यक्तिग्रहणार्थमित्यर्थः । तेन तितउशब्दैकदेशस्य 'अउ' इत्यस्यानुकरणे 'अउ अकरो'दित्यत्र 'अनुकरणञ्चा-निती'ति निपातत्वेऽपि प्रगृह्यत्वाभाव एकग्रहणफलम्बोद्ध्यम् । ननु ङकारस्य

❀ अभिनव-चन्द्रिका ❀

अत्र विरुद्धत्वन्तदभाववत्तानिश्चयमुद्रया न तु तदभावव्याप्यवत्तानिश्चयमुद्रया, अत एवाधुरित्यादौ 'विभाषा घ्राधे'डिति लुगर्थमतिदिश्यमानघेट्त्वविरुद्धस्वाश्रयादन्तत्वप्रयुक्त 'आत'इतिशास्त्रेण जुस्भवतीति दिक् । **स्वाङ्गत्वाभाववदिति** । स्वाङ्गत्वपर्याप्त्यभाववदित्यर्थः । **अच्त्वाभावादिति** । अच्त्वपर्याप्त्यभावादित्यर्थः । **वर्णग्रहणे इति** । यस्मिञ्छास्त्रे यादृशवर्णत्वव्याप्यजात्यवच्छिन्न-ग्रहणन्तत्रेत्यर्थः । **जातिग्रहणार्थमिति** । तादृशजात्यवच्छिन्नमात्रारब्धसमुदाये तादृशजातेरति-देशादित्यर्थः । **धिप्सतीति** । 'हलन्ताच्चे'त्यत्र वर्णत्वव्याप्यहल्त्वजात्यवच्छिन्नग्रहणसत्वात्तादृश-हल्त्वजात्यवच्छिन्नमात्रारब्ध'म्भि'ति समुदाये हल्त्वातिदेशेन कित्त्वं सिद्ध्यतीति भावः । स्यादेतत्—'इग्वतो झल्' इति 'इको झल्''हलन्ताच्चे'त्युभयस्थाने न्यासः क्रियते इति इयम्परिभाषा निष्फला।

❀ चिदस्थिमाला ❀

'ई अभव'दित्यादौ सञ्ज्ञासिद्धि'रित्यन्योक्तम् , 'अङिदित्येव सूत्रङ्कार्य' मित्यपरोक्तञ्चापास्तम्। तथा लब्धस्य तत्रानुवृत्तिसम्भवात् , प्रतिषिद्धार्थमारम्भेण तद्विषयत्वलाभात् , 'देवोऽसि' 'वायवायाही'त्यादौ लक्षणप्रति-पदोक्तपरिभाषया निर्वाहात् , अत एव तत्र प्रगृह्यत्वस्यानिष्टत्वात् , गौणमुख्यन्यायाद्भाष्यानुक्तत्वादत्राच्च्य-न्तप्रतिषेधानुक्त्या तेषामनभिधानसूचनात् , तेषामप्रसिद्धत्वादल्पत्वात् , तथा न्यासे मात्रालाघवस्यासार्व-त्रिकस्य सत्त्वेपि पदलाघवाभावात् , निपातपदावश्यकत्वापत्त्या गौरवाच्चेति दिक् । एतेन—पदद्वयघटित-न्यासकरणेन सूत्रकृतः, ओत्सूत्रस्थभाष्यप्रामाण्येन भगवतश्च लक्ष्यभेदस्य सम्मतत्वात्तत एव तत्प्रयोगस्य प्रामाणिकत्वात् , अन्यथा तद्विरोधापत्तेश्च चिन्त्यमि'मिति तदुक्तमपास्तम् । यतो न प्रत्याख्यातं किन्तु स्पष्टार्थमत आह—**स्वाङ्गेति** । तस्य प्रत्येकपर्याप्तत्वात्। यथा चैतत्तथा स्फुटीभविष्यति । एतेना'ऽजि-त्येकत्वविवक्षया समुदायनिरास' इति दण्ड्याद्युक्तमपास्तम् । स्वस्मिंश्चारितार्थ्यंलब्धमर्थमाह—**अन्यत्रेति । भाष्ये इति** । एतेना'ऽपृक्तसञ्ज्ञायामेकग्रहणस्योक्तार्थज्ञापकतामाश्रित्यैकाज्ग्रहणं सुत्यजम् , अत एव मनोरमायां निपातग्रहणस्यैव फलमुक्तं, न तु एकाज्ग्रहणस्ये'ति दण्ड्युक्तमपास्तम् । नन्वेवमपि तत्र कार्यबाधात्तदाश्रयैकव्यक्तावेव कार्यमिति दोषतादवस्थ्येनाफलत्वमेवात आह—**जातीति** । अनति-प्रसङ्गायाह—**पात्तेति । बोध्यमिति** । एतेन—''अच्-समुदायग्रहणशङ्कानिरासार्थम् , अन्यथा 'अइउ-

❀ ज्योत्स्ना ❀

ग्रहणाभावे सिद्धे इति बोध्यम् । एतेनैकग्रहणस्य स्पष्टार्थत्वोक्तिरनास्थयेत्युक्तं भवति, तदाह—**एक-ग्रहणफलं बोध्यमिति** । अर्थवद्ग्रहणपरिभाषामूलिकाया गौणमुख्यपरिभाषाया विशिष्टरूपोपादान-

❀ सदाशिवभट्टीयम् ❀

सारणापत्तेः । अनल्विधावित्यादौ तु सामर्थ्यान्न जातिग्रहणमित्यर्थ इति । अन्यथा जातिग्रहणेपि जाते-रेकैकव्यक्तिव्यङ्ग्यतयाऽसङ्गतिरेव, प्रवृत्तिनिमित्ततया जातिग्रहणस्य सर्वत्र सत्त्वेन तस्यावक्तव्यत्वात् ।

❀ विषमपदविवृतिः ❀

सूत्रस्थभाष्यात् , 'प्रतिषेधार्थोयमारम्भ' इत्योत्सूत्रस्थभाष्याच्च प्रसज्यप्रतिषेध एवायं, तेन आ ई ए इ

काप्यश्रवणेन ङिदङिद्विवेको दुर्ज्ञेय इत्यत आह—**वाक्यस्मरणयोरिति**। वाक्य-शब्देन स्वार्थगतमनभिमतत्वम्। स्मरणं—विस्मृतस्य स्मृतिविषयता। **एवङ्किल तदिति**—स्मृतार्थनिर्देशः।

'निपात' इत्यनुवृत्तमोदित्यनेन विशेष्यत इत्याह—**ओदन्त इति**। निपातसञ्ज्ञा

❀ अभिनव-चन्द्रिका ❀

न च यियक्षतीत्यादौ कित्त्वापत्तिरिति वाच्यं, इग्वतो धातोर्विहितो झलादिः सन् किदित्यर्थेना-दोषात्। 'वचि स्वपी'त्यत्र विहितविशेषणस्य भाष्ये उक्तत्वेन अर्थवत्त्वस्य धातुत्वस्य च उत्तरखण्डे एव सत्त्वेन प्रकृते कित्त्वेपि अर्थवद्यजादिविहितकितोऽभावेनादोषाच्च। ननु 'इग्वतो झ'लिति 'लिङ्-सिचा'वित्यत्रानुवर्त्तनात् नेषीष्ट कोषीष्टेत्यादावपि कित्त्वापत्तिः, न चैतत्परिभाषाया अभावे उर्ज्जीत्यादौ नुमभावाय 'नपुंसकस्य झलच' इत्यत्राच्पदस्यावृत्त्या अचः परो यो झल् तदन्तस्य नुमिति भाष्योक्तार्थे तक्षीत्यादौ नुमनापत्तिः, अचः परो यो झल् तदन्ताभावादिति वाच्यं, 'नपुंसकस्य न यमी'ति न्यासेनादोषादिति चेन्मैवम्, वर्णग्रहणे जातिग्रहणमित्यस्याभावे श्रायसा-वित्यादा'वचः परस्मि'न्नित्यस्याच्समुदायेऽच्त्वपर्याप्तेरभावेनाच्त्वपर्याप्त्यनुयोगितावच्छेदकधर्मा-वच्छिन्नानुयोगिताकपर्याप्तिकस्थानिताकत्वस्य वृद्धावभावेनाप्राप्त्या नुमापत्तेः।

❀ चिदस्थिमाला ❀

इत्यादौ 'समुदायैकाद्विर्वचन' न्यायेन समुदायस्यैव स्यान्नावयवानां, सिद्धान्ते तु—'तक्रकौण्डिन्य'-न्यायाऽनित्यत्वात्प्रगृह्येऽपि परे प्रकृतिभाव'' इति **कैयटाद्युक्तं**, ''वर्णग्रहणे तदन्तविधावजन्तनिपाते अतिव्याप्तिनिरासार्थन्त''दिति रत्नाकरदण्ड्याद्युक्तञ्चापास्तं, समुदायसञ्ज्ञयाऽवयवानामननुग्रहात, हलन्ते सत्यपि तत्त्वे फलाभावेनाजन्त एव सिद्ध्या व्यावर्त्याभावेन तत्सामर्थ्यादज्रूपस्यैव ग्रहणात्। न च 'पुरोऽस्ती'-त्यादौ प्रकृतिभावेन रोरुत्वं न स्यादिति वाच्यं, प्रगृह्यसञ्ज्ञां प्रति रुत्वासिद्ध्या रेफान्ते तत्त्वाभावेना-दोषात्। न च सान्तनिष्ठतत्त्वस्यैकदेशेतिन्यायेन रेफान्तेऽपि सत्त्वेन तत्त्वात्तन्न स्यात्, सञ्ज्ञां प्रतीव प्रकृतिभावं प्रत्यपि रुत्वासिद्ध्या तदप्रवृत्तेः, सान्ते तु न किञ्चिदपि सिद्धकाण्डस्थफलं यत्प्रकृतिभावेन व्यावर्त्यम्, वैपरीत्यशङ्का तु पर्युदासादेव नेति दिक्। **क्काप्येति**। प्रयोगे इत्यर्थः। **स्वार्थेति**। वाक्या-र्थेत्यर्थः। पूर्वमेवं नामंस्थाः सम्प्रति त्वेवं मन्यसे इत्यर्थपर्यवसाने हि पूर्वोक्तार्थस्यानभिमतत्वं स्फुटमेवाव-गम्यते इति भावः। पूर्ववदेवं किलेत्यादेरनुयोगाशङ्कां हृदि निधायाह—**एवमिति**। आकारप्रतिपाद्यार्थेत्यर्थः। एतेन'स्मरणद्योतक' इति सामान्यतो मनोरमा-रत्नाकर—बोधिन्याद्युक्तमपास्तम्। उक्तहेतोरेवाह—**निपात-इति**। एतेन पूर्वविरुद्धमिदमित्यपास्तम्। ननु च्व्यन्तेऽति प्रसङ्गोऽत आह—**निपातेति**। 'सती'त्यनेना-

❀ ज्योत्स्ना ❀

विषयत्वौचित्याच्च्व्यन्ते प्रगृह्यसञ्ज्ञावारणायौदितिसूत्रे तस्याः प्रवृत्तये विशिष्टरूपोपादानमस्तीति वक्तव्यं, तच्च कीदृशमित्याशङ्कायामाह—**निपातसञ्ज्ञेत्यादि**। तथा च 'आन्महन्त' इत्यादौ महत इत्यादि-

❀ सदाशिवभट्टीयम् ❀

स्मृतार्थेति। आकारप्रतिपाद्यार्थेत्यर्थः।

❀ विषमपदविवृतिः ❀

अत्रेत्यत्र परादिवद्भावेन प्राप्तमपि प्रगृह्यत्वं न। गम्यमानप्रतिषेधाभिप्रायकत्वं तु न युक्तम्। 'ओषु यातं मरुत' इत्यादौ परादिवद्भावेन प्राप्तप्रगृह्यत्वस्य निषेधकाभावेन प्रवृत्तिसौलभ्येन 'प्रतिषेधार्थीय-मारम्भ ओषु यातं मरुत' इत्यादि भाष्यग्रन्थसन्दर्भासङ्गतेः। न च प्रतिषेधार्थत्वे 'ओतश्चिव'-

चादिपदोपस्थितचादीनां–सति सम्भवेऽर्थवतामेवेति–सार्थकनिपातानां निपातपदेन तत्तदर्थविशिष्टानामेवोपस्थितिरिति–गौणमुख्यन्यायेन प्रकृतसूत्रस्थनिपातपदेन गौणार्थानां न ग्रहणमिति–गोऽभवदित्यादौ च्व्यन्ते नास्य प्रवृत्तिः। एवञ्च कार्यकालपक्षेऽपि 'च्व्यन्ता निपाता' इत्यस्यानुपस्थितिरेतत्परिभाषावशात्। अव्ययसञ्ज्ञादौ तु नैतत्परिभाषाप्रवृत्तिरनित्यत्वात्। अत एवानर्थकेऽपि निपाते सा सञ्ज्ञा सिद्ध्यति।

❁ अभिनव-चन्द्रिका ❁

वस्तुतस्तु—अच्त्वपर्याप्त्यनुयोगितावच्छेदकधर्मावच्छिन्नानुयोगिताकपर्याप्तिकस्थानितावच्छेदकादेशः स्थानिवदिति अचः परस्मिन्नित्यस्यार्थेन श्रायसावित्यादौ न दोषः। न च निगाल्यत इत्यादौ णिलोपस्य स्थानिवत्त्वन्न स्यात्, स्थानित्वावच्छेदकणित्वस्य 'णि'इत्येतत्समुदायपर्याप्तत्वादच्त्वस्य इकारपर्याप्तत्वाच्चेति वाच्यं, णित्वस्य 'णी'तिसमुदायवत् इकारेऽपि पर्याप्तत्वेनाच्त्वपर्याप्त्यनुयोगितावच्छेदकं यत् इकारवृत्तितद्व्यक्तित्वं तद्धर्मावच्छिन्नानुयोगिताकपर्याप्तिकत्वस्य स्थानितावच्छेदकणित्वे सत्त्वेनादोषादिति सुधियो विभावयन्तु।

चादीनामिति। न च निपातपदस्य चत्वात्वादिनानाधर्मावच्छिन्नशक्तत्वेन नानार्थत्वेन

❁ चिदस्थिमाला ❁

सम्भवेनैषामपीति सूचितम्। अत एवाह—**सार्थकेति**। **पस्थितिरिति**। तथा च लौकिकार्थवत्त्वयोग्यपदाश्रये न्यायप्रवृत्तिरिति सिद्धान्तविषयताऽस्ति, अत एव वर्णग्रहणादौ तदप्रवृत्तिस्तदाह—**गौणेति**। यद्यप्यन्यत्र निपातग्रहणे सर्वग्रहणमिष्टं, तथापि इह शब्दाधिकारेण भाष्यप्रामाण्यादर्थवत्परिभाषैतत्परिभाषयोः प्रवृत्तिः, अत एव'निपात' इति सूत्रं विहाय-'ओ'दिति सूत्रे एव–'ओतश्च्व्यन्तस्य प्रतिषेध'इति वार्तिकारम्भस्तदाह—**प्रकृतेति**। 'अदोऽभव'दित्यादौ लक्षणप्रतिपदोक्तपरिभाषया निर्वाहादाह—**गोऽभवदिति**। एतेन "तस्या विशिष्टरूपोपादानविषयत्वात् 'भानोऽत्रे'–त्यादि तत्प्रत्युदाहरण"मिति **रत्नाकराद्युक्तमपास्तं**, प्रकृतसूत्रभाष्यविरोधापत्तेः। नन्वेवमपि कार्यकालपक्षेऽत्र तदुपस्थितिसामर्थ्यात्त्यादेव ग्रहणमत आह—**एवञ्चेति**। अपिना यथोद्देशपक्षसमुच्चयः। 'एवञ्चे'त्यस्यार्थमाह—**एतदिति**। नन्वेवमुक्तरीत्याऽतिप्रसङ्गोऽत आह—**अव्ययेति**। आदिना प्रातिपदिकसञ्ज्ञादिपरिग्रहः। ननु असम्भवे तत्र तत्त्वस्येष्टत्वादाह—**निपाते इति**। एतन्मूलार्थवत्परिभाषाया अप्रवृत्त्येदं द्रढयति—**अत एवेति**। ननु तस्मिन्निति बाधे मानाभावेनौचित्या-

❁ ज्योत्स्ना ❁

विशिष्टानुपूर्व्यवच्छेदेन विशिष्टं रूपं साक्षादुपादीयते, एवमिहापि निपातपदोपस्थितं 'चे'त्यादिविशिष्टं रूपमुपादीयत एवेति परिभाषाप्रवृत्तिरक्षतेति भावः। **अनित्यत्वादिति**। अयमभ्युपगमवादः। वस्तुतस्तु साक्षादेकदेशद्वारा वा विशिष्टरूपोपादाने गौणमुख्यन्यायप्रवृत्तिः। निपातपदोपस्थितचादीनां तु न तथात्वमित्यव्ययसञ्ज्ञाविषये न तत्प्रवृत्तिः। प्रगृह्यसञ्ज्ञायां त्वोदन्त इत्येतदेव विशिष्टरूपोपादानमिति वाच्यं, तेन दोषः। अत एव गौर्वाहीको गां वाहीकमानयेत्यादौ णित्वात्वयो-

❁ सदाशिवभट्टीयम् ❁

अव्ययसञ्ज्ञादाविति। आदिना 'निपात एका'जिति प्रगृह्यत्वं, तेन 'ई अभव'दित्यादौ प्रगृह्यत्वम्। अत एवोदित्यत्रैव च्व्यन्तप्रतिषेध उक्तः, प्रत्याख्यातश्च न्यायेन। **अनित्यत्वादिति**। नन्वव्ययसञ्ज्ञायाः कथं पदकार्यत्वं, येनानित्यत्वमवलम्ब्यत इति चेच्छृणु, पदकार्यविषयकोऽयं न्याय

❁ विषमपदविवृतिः ❁

प्रतिषेध इति वार्त्तिकानुत्थानमिति वाच्यम्, प्रतिषिद्धार्थाया अपि ओदन्तस्य प्रगृह्यसञ्ज्ञायाः प्रतिबन्धकाभावेनादो भवतीत्यत्रापि प्राप्तेः। **ओत्**। **च्व्यन्ते नास्य प्रवृत्तिरिति**। यद्यपि निपात-

त्रपो इतीत्यादौ प्रगृह्यत्वायाह—**सम्बुद्धिनिमित्तक इति।** सम्बुद्धिपर इति व्याख्याने तु सोर्लुका लुप्तत्वेन तत्परत्वाभावान्न स्यात्। **न लुमतेतिनिषेधानित्यत्वं त्वगतिक-**

❀ **अभिनव-चन्द्रिका** ❀

सकृदुच्चरितन्यायेनावृत्तिमन्तरा सर्वेषां बोधानापत्तिरिति वाच्यं, चकारादि-आत इत्येतदन्त-

❀ **चिदस्थिमाला** ❀

त्सम्बुद्धिपर इति व्याख्यानमेव सुशकं वक्तुमिति मूलसङ्गतिरत आह—**त्रपो इतीति।** ननु निषेधा-नित्यत्वेन तत्परत्वमत आह—**न लुमेति।** तथा च—लक्ष्यानुरोधेन तदप्रवृत्तिस्तथा व्याख्यानञ्च। एतेना-ऽनूद्यमानौकारविशेषणत्वान्निमित्तसप्तमी, 'ङ्किति चे'ति वदिति **रत्नाकरोक्तमपास्तम्।** तत्रापि तत्प्रवृत्ति-

❀ **ज्योत्स्ना** ❀

प्रवृत्तिर्गौणमुख्यन्यायेन प्राप्ता पदकार्यविषयत्वाभ्युपगमेन निवारिता **कैयटोपाध्यायैः।** एवञ्च गौणलाक्षणिकत्र्यादिशब्दे त्रयादेशादि प्रवर्तत एव। न चैवं सञ्ज्ञात्र्यादिशब्देऽपि तत्प्रसङ्ग इति वाच्यम्, 'अभिव्यक्तपदार्था ये' इति न्यायेन तद्वारणात्। **गौणमुख्यपरिभाषायां** गौणलाक्ष-णिकत्वरूपगौणत्वस्य ग्रहणेन सर्वनामप्रकरणरीत्या च प्रातिपदिककार्येऽपि तत्प्रवृत्त्यङ्गीकारेण तत-स्तस्य भेदादुभयोरप्यर्थवत्परिभाषामूलकत्वाच्च गौरवाभावात्। न चैवं सञ्ज्ञात्वश्वशुरादौ 'टाङसी' त्यादीनामप्रसङ्गः, अदन्तादित्येवंविशिष्टरूपोपादानस्य तत्र सत्त्वादिति वाच्यं, विशिष्टानुपूर्व्यवच्छे-देन विशिष्टरूपोपादान एव तत्प्रवृत्तेरभ्युपगमात्। इदमपि गौणमुख्यन्यायात्तस्य पृथक् मूलमिति **परिभाषाप्रदीपार्चिषि** विस्तरेण निरूपितम्। निरर्थकनिपातेऽव्ययसञ्ज्ञाप्रवृत्तिस्तु तत्र पाठसामर्थ्या-देवेति दिक्। **अगतिकगतिरिति।** नचैवं लुनाति-पुनातिप्रभृतीनां विचि गुणे 'एङ्ह्रस्वा' दिति

❀ **सदाशिवभट्टीयम्** ❀

इत्यस्य—यस्य शब्दस्य वस्तुतः पदत्वविशिष्टस्यैव यत्कार्यप्रयोजकत्वं प्राप्नोति तत्र कार्ये तस्य गौणार्थकस्य न ग्रहणमिति न्यायार्थ इत्यर्थः। अस्ति च च्व्यन्तस्य पदत्ववत एवाव्ययत्वप्रयोजकत्वं, 'प्रत्ययोत्तरपदयो' रित्यादौ तु त्वदीयादौ पदत्वाविशिष्टस्यापि युष्मदादेः प्रयोजकत्वदर्शनात्त्वद्भवतीत्यादिसिद्धिरिति परि-भाषेन्दुशेखरविवृतिसङ्ग्रहे विस्तरः। अत्र एतत्परिभाषेत्यस्य एतन्मूलभूतार्थवत्परिभाषेत्यर्थः, तदाह—**अतएवानर्थकेति।** सा सञ्ज्ञा=निपातेति प्रगृह्यसञ्ज्ञा।

सम्बुद्धौ शा। त्रपो इतीति। ननु सम्बुद्धित्वस्य हल्ङ्यादिलोपेनस्थानितावद्वृत्तिकत्वात्सर्वत्रैव तत्परत्वं दुर्लभमिति चेन्न, 'नियमस्य विधिमुखेन प्रवृत्ति'रिति पक्षे प्रत्ययलक्षणेन सौलभ्यात्। सौ 'शाकल्ये'ति सिद्धे सम्बुद्धिग्रहणं प्रगृह्यत्वे 'न लुमते'त्यस्याप्रवृत्तिज्ञापनार्थं, तेन मिथो इतीत्यत्रातिव्याप्तिवारणेन सम्बु-द्धिग्रहणं चरितार्थं, फलञ्च त्रपो इतीति—सूत्रकृन्मतं, न तु निमित्तसप्तमीत्याहुः। ननूपस्थित इत्येव कुतो नोक्तमिति चेन्न, उत्तरत्र इतावित्येव यथा सम्बध्यते, वेदे ॐ यथा स्यादिति। **रत्नाकरस्त्ववैदिके** इति

❀ **विषमपदविवृतिः** ❀

पदेन चादीनामर्थवतामेवोपस्थितिरिति चाद्यंशे गौणमुख्यन्यायकार्यं प्रवर्त्तताम्। च्व्यन्तांशे तु न विशिष्टरूपोपादानमित्यर्थवद्ग्रहणपरिभाषागौणमुख्यन्याययोर्न प्रवृत्तिः। च्व्यन्ते मुख्यार्था-सम्भवश्च। तथापि चाद्यंशे विशिष्टरूपोपादानमात्रेण प्रवर्त्तमानगौणमुख्यन्यायोऽमुख्यार्थके च्व्यन्ते प्रगृह्यसञ्ज्ञां व्यावर्त्तयति भाष्यप्रामाण्यादित्याशयः। अन्ये तु गोभवदित्याद्यर्थं ओतश्च्विप्रत्ययप्रति-षेध इति वार्तिकमारब्धव्यमेव। तत्प्रत्याख्यानपरं भाष्यं त्वेकदेशिनः। ऋषिशापादिनाऽगौरेव गौः समभवत्तत्र च्व्यन्ते मुख्यार्थस्यैव सत्त्वे निपातसञ्ज्ञाया गौणमुख्यन्यायेन वारणासम्भवात्। न च तत्रार्थे च्विरेव नेष्यत इति वाच्यम्, तथा सति 'सञ्ज्ञोपसर्जनीभूतास्तु न सर्वादय' इत्यादि-

गतिः । इताविति किम् ? पटोऽत्र । अनार्षे किम् ? ब्रह्मबन्धवित्यब्रवीत् । संहिताया विवक्षायामप्यवादिरहितप्रयोगार्थमिदम्। तद्विवक्षा च—वर्णोच्चारणे नियतेनार्धमात्राकालव्यवायेनोच्चारणेच्छा । तदधिकार्द्धमात्राकालव्यवायेनोच्चारणेच्छा च—तदविवक्षेति बोद्धयम् ।

ॐ अभिनव-चन्द्रिका ॐ

समुदायघटकजन्यबोधविषयतावच्छेदकधर्मावच्छिन्ने शक्तिस्वीकारेणादोषात् । **उच्चारणेच्छेति** । वस्तुतस्तु अर्धमात्राधिककालाव्यवायेन उच्चारणेच्छा–संहिताविवक्षा, अर्धमात्राधिककालव्यवाये-

ॐ चिदस्थिमाला ॐ

स्वीकारात् । **ब्रह्मेति** । एतेन मूलेऽस्याऽपाठः सूचितः । नन्विदं व्यर्थं, संहिताया अविवक्षायां 'विष्णो इती'त्यस्य सिद्धेः, समासे तु नास्य प्रवृत्तिः, तत्र हि—सुब्लुकि तन्निमित्तौकाराभावात् , सम्बुद्ध्यन्तेन प्रायोऽसमासाच्च, अत आह—**संहितेति** । आदिना वलोपपरिग्रहः । तदेव प्रतिपादयति—**तदिति** । आधिकस्याप्यैच्छिकत्वनिरासायाह—**अर्द्धमात्रेति** । सङ्गत्यर्थमुञ इति सम्पूर्णक-

ॐ ज्योत्स्ना ॐ

सम्बुद्धिलोपे 'लो इति' 'पो इती'त्यादावव्याप्तिः, ओकारस्य सम्बुद्धिनिमित्तकत्वाभावात् । न च 'गोतो णि'दित्यत्र गकारस्याविवक्षितत्वाण्णिद्वद्भावे वृद्धौ च लौः पौरित्येव तत्रेष्यते, लाक्षणिकौकारे तदप्रवृत्तेः, 'न वर्णग्रहणे' इति निषेधस्तु वर्णप्राधान्यविषयः, अत एवादोऽभवदित्यादावोदित्यनेन च्व्यन्ते प्रगृह्यसञ्ज्ञा लक्षणप्रतिपदोक्तपरिभाषया वारिता भाष्ये इति वाच्यम्,'अचः परस्मि'न्नित्यत्र भाष्यविरोधेन तदनभिधानस्योपाध्यायैः प्रदर्शितत्वात् । इदं तु स्यात्—सम्बुद्धिग्रहणमेवेह किमर्थमिति । न चाहो इतीत्यादौ परत्वाद्विकल्पाभावार्थं तदिति **मनोरमोक्तिर्युक्ता**, ओदिति नित्यसञ्ज्ञायाः पदान्तरानिरपेक्षत्वेनान्तरङ्गत्वात् । न च कार्यकालपक्षे पदान्तरवृत्त्यजपेक्षप्रकृतिभावेनैकवाक्यत्वादुभयोः साम्यमिति वाच्यम् , एवमपि पदान्तरवृत्त्यज्मात्रापेक्षनित्यसञ्ज्ञातस्तद्घटितेतिशब्दसापेक्षविकल्पस्य बहिरङ्गत्वात् । परत्वाद्विकल्पप्रवृत्तौ पुनःप्रसङ्गविज्ञानान्नित्यसञ्ज्ञायां फले विशेषाभावात्सम्बुद्धिग्रहणानर्थक्यमिति तु न युक्तम् । यत्र परशास्त्रप्रवृत्तौ पूर्वशास्त्रप्रवृत्तिः वाक्यप्रवृत्तां परशास्त्रप्रवृत्तिं बाधते तत्र पुनः प्रसङ्गविज्ञानाभावासिद्धान्तस्या'चश्चे'ति सूत्रे प्रदीपप्रदर्शितस्य **परिभाषाप्रदीपार्चिषि** परिष्कृतत्वादिति । अत्राहुः—निपातपदाननुवृत्तये

ॐ सदाशिवभट्टीयम् ॐ

शेषः । अनार्ष इत्यनुवृत्तेर्वृत्तावुक्तत्वादिति व्याख्यत्, तत्तु चिन्त्यमेव, 'उकारश्चेतिकरणेन युक्तो रक्तोपृक्तोद्भावित, इति प्रातिशाख्यविरोधात् । वस्तुतो वेदे आपाद्यमानरूपाभावेनानार्ष इति व्यर्थमेवेति तु न, छान्दसेतिपरकलौकिकौदन्ते दोषात् । अत एवेतिसामानाधिकरण्याय तद्धितः सार्थकः । अत्र 'ओः शाकल्यस्ये'ति सुवचन्तु न, अ उ ओ इत्यत्रापि उवर्णस्थानिकत्वेन दोषात् । **अवादीति** । आदिपदं चिन्त्यार्थकम् । **इदमिति** । सूत्रमित्यर्थः ।

ॐ विषमपदविवृतिः ॐ

वार्तिकभाष्यविरोधापत्तेः । च्व्यन्तांशे विशिष्टरूपोपादानाभावने मुख्यार्थासम्भवेन च गौणमुख्यन्यायप्रवृत्त्यसम्भवाच्चेत्याह—**निपात इति किमिति** । **मिथो** इतीत्यत्र प्रगृह्यत्वं माभूत् । यत्तु देवोसीति प्रत्युदाहरणं बृहच्छेखरे दत्तं, तन्न । अदोऽभवदित्यादाविव लक्षणप्रतिपदोक्तपरिभाषया वारणसम्भवात् । **ब्रह्मबन्धविति** । वेदे आपाद्यमानप्रयोगाभावेन प्रगृह्यत्वस्य वैकल्पिकत्वेन चानार्ष इति व्यर्थमिति केचित् । **तदधिकार्द्धमात्राकाल इति** । ततोऽप्यधिककालव्यवधानेनोच्चारणन्तु अर्थ-

१. 'आदिपदं चिन्त्यप्रयोजन'मिति पाठान्तरम् ।

उञः । अत्रोञ् निपात एव । 'उञ ऊँ' इत्येकसूत्रत्वे तु—शाकल्यग्रहणाननुवृत्तौ 'ऊँ इती'त्येकमेव स्यात्, प्रगृह्यसञ्ज्ञाप्रकरणेन प्रगृह्यत्वस्यादेशस्य च सह विधानात्। 'उ इति' 'विती'ति च न स्यात्। आदेशे प्रगृह्यत्वकार्यन्तु स्थानिवद्भावेन बोद्ध्यम्। प्रगृह्यत्वस्य साक्षादुद्देश्यसम्बन्धस्य क्लृप्ततया विधेयविशेषणत्वे मानाभावात्। शाकल्यग्रहणानुवृत्तावपि प्रगृह्यत्वस्य ऊँ आदेशस्य विकल्पे 'ऊँ इति' 'विती'ति सिद्ध्यति, न तु

❀ **अभिनव-चन्द्रिका** ❀

नोच्चारणेच्छा तदविवक्षा । यथाश्रुतन्तु न युक्तम् । अर्धमात्रान्यूनकालेनोच्चारणस्थले संहितात्वानापत्तेः । **निपात एवेति** । लक्षणप्रतिपदोक्तपरिभाषयेति भावः ।

❀ **चिदस्थिमाला** ❀

सूत्रप्रतीकम् । अत एवाह—**अत्रेति** । 'उञ ऊँ' इत्यत्रेत्यर्थः । **निपात एवेति** । न प्रत्याहारः, उञ्ग्रहणसामर्थ्यात्, अन्यथा—हल्सु विशेषाभावादुच्ग्रहणमेव कुर्यात्, उञ्निपाते ञकारोच्चारणसामर्थ्याच्चेति भावः । ननु पाणिनिनैकसूत्रत्वेन पठितमिति किमिति मूले योगविभागोऽत आह—**उञ ऊँ इति** । अननुवृत्तौ=तत्पक्षे । नन्वेवमपि यणादेशेन सानुनासिकवकारघटितमेव स्यान्न तूक्तमत आह—**प्रगृह्येति** । प्रकरणेन=तत्पाठेन । अन्यथा तदानर्थक्यं स्पष्टमेव । अतएव चः । 'एव'व्यवच्छेद्यमाह—**उ इतीति** । 'इती'त्यस्यात्रापि सम्बन्धः। **प्रगृह्यत्वेति** । सञ्ज्ञारूपोऽर्थः। षष्ठी त्वादेशापेक्षयेति न दोषः। नन्वेवमपि स्थानिनि तत्त्वेऽपि आदेशे न तत्त्वमल्विधित्वेन स्थानिवद्भावाभावादत आह—**आदेशे** इति। सहविधानेऽपि वाचः क्रमवृत्तित्वात्सम्भवानुरोधेनादौ सञ्ज्ञा, तत आदेशः, अल्विधित्वन्तु न, सुप्त्ववदिति तत्त्वमितिभावः । एतेन—"स्थानिवत्त्वेन 'निपात एका'जिति प्रगृह्यत्व"मित्यपास्तम्। नन्वेवं गौरवादादेशेनैव तत्सम्बन्धोऽस्त्वत आह—**प्रगृह्येति** । परम्परयात्रापि तत्सत्त्वादाह—**साक्षादिति** । 'पूर्वत्रे'ति शेषः ।

❀ **ज्योत्स्ना** ❀

इह सम्बुद्धिग्रहणमिति । तदभावे हि तदनुवृत्त्याहो इतीत्यादावेव विकल्पापत्तिरिति । अत्र शब्दरत्नकृतः—निपातपदसम्बद्धौग्रहणानुवृत्त्यैव सिद्धौ 'ओच्छाकल्यस्येतावनार्षे' इति न्यासेन पुनरोद्ग्रहणान्निपातपदनिवृत्तौ सम्बुद्धिग्रहणं वैचित्र्यार्थमिति । अत्र वदन्ति—स्वरादिपठिते मिथो इतीत्यत्रैवं सति विकल्पापत्तिरिति । अत्रायं शब्दरत्नकृदाशयः—पुनरोद्ग्रहणान्निपातभिन्नस्येव प्रतिपदोक्तभिन्नस्याप्योकारस्येह ग्रहणान्मिथो इतीत्यत्रादोष इति । किन्त्वेवंव्याख्याने प्रमाणमपश्यता भगवता सूत्रकारेणेह सम्बुद्धिग्रहणं कृतमिति तत्त्वम्। **निपात एवेति**। न तु कृतसम्प्रसारणो

❀ **सदाशिवभट्टीयम्** ❀

उञः । **निपात एवेति** । न तु प्रत्याहारः, तथा सति उजित्येव ब्रूयात् । नापि कृतसम्प्रसारणस्य वेञो, लाक्षणिकत्वादिति भावः । **स्थानिवद्भावेनेति** । अग्रहीदित्यादाविट्त्ववदेवेति भावः । **मानाभावादिति** । यद्यपि सामानाधिकरण्येनान्वयस्य पूर्वं क्लृप्तत्वेन उञ इति श्रुतत्वादादेशेनैव सम्बध्यत इति न्याय्यं, कैयटोक्तेश्च, उञ इत्येतदावृत्त्यभावप्रयुक्तलाघवानुरोधेन प्रगृह्यसञ्ज्ञकमिति भाष्योक्तिस्वारस्येन च सम्भवति सामानाधिकरण्ये वैयधिकरण्यस्यान्याय्यत्वेनास्यादेशविशेषणत्वमेव

❀ **विषमपदविवृतिः** ❀

बोधानुपयोगित्वाच्छिष्टसंप्रदायावरोधाच्च हेयमेवेति भावः । **उञः** । **निपात एवेति** । न तु प्रत्याहारः । उजित्येव वक्तव्ये ञकारोच्चारणसामर्थ्येन क्विबन्तस्य कृतसम्प्रसारणस्य वेञ इति–शब्दपरत्वेऽपि न प्रगृह्यत्वस्योपयोगः, तुक्प्रवृत्तेः, नाप्युञादेशः, तुगन्तस्यानिर्दिश्यमानत्वात् । **मानाभावादिति** । इदमयुक्तम्। 'उञ'इत्यस्यावृत्त्या स्थानषष्ठ्यन्तत्वस्य वाच्यवाचकभावसम्बन्धार्थ-

'उ इती'ति । प्रगृह्यत्वविकल्पेन पक्षे तदभावेऽपि अस्य तात्पर्यात् , एतदभावे 'निपात एका'जित्यस्याप्रवृत्तेः । तदुक्तं भाष्ये—योगविभागं प्रदर्श्य—'किमर्थो योगविभागः? शाकल्यमते 'ऊँ' विभाषा यथा स्यात् , 'ऊँ इति' 'उ इति' । अन्येषामाचार्याणां मतेन 'विती'ति । अनेन हि योगविभागस्य 'उ इती'ति रूपसिद्धिः फलमिति स्पष्टमेव लभ्यते । अतो योगविभागेन व्याचष्टे—**उञ इति** । उञो वाचकं पदं प्रगृह्यमित्यर्थः ।

❀ अभिनव-चन्द्रिका ❀

तात्पर्यादिति । अस्य प्राप्तविभाषात्वेन पक्षेऽभावविधायकत्वादिति भावः । सूत्रे षष्ठ्युपपत्तये आह—**उञो वाचकमिति** । एवञ्च सूत्रे वाच्यवाचकभावः षष्ठ्यर्थ इति भावः ।

❀ चिदस्थिमाला ❀

तथाचा'ऽकृत्रे'तिन्यायेनात्रापि तथैवेति भावः । न च दीर्घोच्चारणसामर्थ्याच्चणभावे एतत्प्रकरणपाठो व्यर्थ एवेति वाच्यम्, असंहितायां साफल्यात् । अनुवृत्तिपक्षे आह—**शाकल्येति** । पूर्वमतसमुच्चायकोऽपिः ।

नन्वनेन विकल्पेनोभयोरभावपक्षे 'निपात' इति प्रगृह्यत्वेन-'उ इती'त्येव स्यान्न तु 'विती'ति—इदमयुक्तमत आह—**प्रगृह्येति** । तस्यापीत्यर्थः । अत एवाग्रिमाऽपिसङ्गतिः । तेन वादेशादिसमुच्चयः ।

'तात्पर्य'मप्रवृत्तौ हेतुः । 'तदुक्त'मिति व्युत्क्रमेणान्वयः । अत एव ल्यबुपपत्तिः । अनुवृत्तिपक्षेऽयं ग्रन्थस्तदाह—**शाकेति** । **अनेनेति** । तस्य तत्त्वविवक्षया तृतीया, हेतौ वा । भाष्येणेत्यर्थः । हि=यतः ।

एतेना 'नुवृत्तिपक्षे उक्तरीत्या तयोः सिद्धिर्न तु 'वीती'त्यस्य, अतो योगविभाग'इति **रत्नाकरदण्ड्याद्यु**क्तमपास्तम् । **अत इति** । उभयथाऽपि तत्रासिद्धेरित्यर्थः । **उञ इतीति** । मौलविभक्तसूत्रप्रतीकमिदम् ।

नन्वेवं समानाधिकरण्याद्यभावात्कथं सञ्ज्ञा–सञ्ज्ञिभावोऽतस्तस्य फलितार्थत्वं ध्वनयञ्छाब्दार्थमाह—**उञ इति** । अध्याहारोऽन्वयायेति भावः । तस्य शब्दपरत्वस्यैव सत्त्वादाह—**पदमिति** ।

❀ ज्योत्स्ना ❀

वेञ्धातुरिति भावः । **तदभावेऽप्यस्य तात्पर्यादिति** । शाकल्यातिरिक्तमते प्रगृह्यत्वमुञो नेत्यर्थे तात्पर्यादित्यर्थः । उञ इत्यनेन प्रगृह्यमित्यस्यानन्वयादाह—**उञो वाचकमिति** । प्रगृह्यपदस्य धर्मपरत्वे तु लक्षणाप्रसङ्गाद्गौरवमिति भावः । **स्पष्टमेव लभ्यत इति** । योगविभागाभावपक्षे

❀ सदाशिवभट्टीयम् ❀

न्यास्यम् , तथापि वक्ष्यमाणभाष्याऽनुरोधेनोद्देश्यत्वस्य विशेषणत्वमेव युक्तम् , लक्ष्यविसंवादाच्चेति स्फुटीभविष्यति । **न तु उ इतीति** । न च निरनुबन्धकोकारमादाय तत्सिद्धिः, उ इतीत्यस्मात्सानुबन्धकप्रतीतेरपीष्टत्वादिति **स्पष्टमुद्योते** । न च ऊँभावाभावपक्षे शाकल्यह्रस्वेन उ इति वितीति सिध्यतीति वाच्यं, योगविभागाभावे ऊँविधौ शाकल्यपदस्य यथाश्रुतत्वेन शाकल्यान्यमते च शाकल्यह्रस्वस्य नाप्राप्त्या ऊँभावस्य तक्रकौण्डिन्येतिन्यायेन 'भोभगो' इति सूत्रभाष्योक्तरीत्या तत्र तत्कृते उन्त्वाभावेन सार्थक्याभावेन न्यायाप्रवृत्तौ तु सर्वथानिरवकाशत्वेन वा शाकल्यह्रस्वबाधकत्वात् । तदभावपक्षे तदप्राप्तेश्च ।

❀ विषमपदविवृतिः ❀

कत्वकल्पने गौरवेण प्रथमान्तार्थेऽस्याभेदेनान्वयस्य क्लृप्तत्वेन च विधेयविशेषणत्वस्यैवोचितत्वात् ।

स्पष्टमेव लभ्यत इति । अन्ये तु योगविभागाभावे प्रगृह्यत्वस्योञादेशस्य च शाकल्यमतेन युगपत्प्रवृत्तौ तन्मते 'ऊँ इती'ति रूपं तदन्यमते 'उ इति' प्रगृह्यत्वस्य 'निपात एकाजना'ङिति सामान्यशास्त्रप्रणयनेन तदन्यमतेऽपि सत्त्वनिश्चयेन स्मृत्यन्तरानुसन्धानद्वारा प्रगृह्यत्वांशे विकल्पासम्भवेनादेशांशे एव स्मृत्यन्तरानुसन्धानद्वारा विकल्पपर्यवसानापत्तेः । यथा 'ऋतो भारद्वाजस्ये'

शाकल्यस्येतौ प्रगृह्यमित्यनुवर्त्तते, तदाह—**उञौ इतौ वेत्यादि**। विकल्पानुवृत्तौ हि 'निपात एके'त्येव सिद्धे इदं व्यर्थमेव स्यात्। एवञ्च प्राप्तविभाषेयम्। 'ऊँ' इत्यत्र शाकल्यप्रगृह्यपदयोरसम्बन्धे उञ इत्यर्थाधिकारादप्रगृह्यस्यैवादेशे तस्य 'इको य'णिति यणि 'ऊँ इती'त्यस्यासिद्धिः। दीर्घोच्चारणवैयर्थ्यापत्तिश्च। विकल्पमात्रसम्बन्धेऽपि

❀ चिदस्थिमाला ❀

त्रितयमित्यर्थः। एतेन—"सञ्ज्ञाभिन्नन्द्वयमनुवर्त्तते" इति **रत्नाकरो**क्तमपास्तम्। अत्रान्ययोरावश्यकत्वस्य स्पष्टत्वादाद्यफलमाह—**विकल्पेति**। हि=यतः। ननु योगविभागेऽपि 'ऊँ' इति सूत्रे वा-सञ्ज्ञे नानुवर्त्ये, पूर्वविकल्पस्तु सामर्थ्यादादेश एव तत्कार्यप्रवृत्त्या 'ऊँ इति' 'विती'ति रूपद्वयार्थ भविष्यति, आदेशस्य स्थानिवत्त्वेन प्रकृतिभावापवादेन 'मय' इत्यनेनान्तरतम्यादनुनासिकत्वस्य सुलभत्वेन 'किम्विती'त्यपि सिद्धमत आह—**इत्यत्रेति**। शब्दाधिकारे इष्टकल्पनसम्भवादाह—**अर्थाधिकारादिति**।

❀ ज्योत्स्ना ❀

शाकल्यमते—उँ इतीति रूपं सिद्धमेवेति—न तदंशेऽपूर्वविधानम्। एवं शाकल्यातिरिक्तमते— वितीत्यस्यापि सिद्धत्वान्न-तदंशेऽपि तथात्वम्। उ इतीति—तु शाकल्यमते न कदापि प्राप्तमिति—तदेव योगविभागस्य फलमित्युक्तभाष्यात्स्पष्टमेव लभ्यत इति भावः। यद्यपि निरनुबन्धकोकारमादाय 'उ इती'त्यस्य सिद्धत्वाद्योगविभागो निरर्थकस्तथापि 'उ इती'त्यतः सानुबन्धकबोधस्यापीष्टत्वेन तदनापत्तिरिति निष्कर्षः। उपाध्यायास्तु-योगविभागस्य फलं वितीति रूपमित्याहुः। तथा ह्येकयोगे उञ इति श्रुतेरादेशेनैव सम्बध्यते न प्रगृह्यसञ्ज्ञयेति सा 'निपात एका'जिति- नित्यैव-उञो भविष्यतीति शाकल्यश्रुत्यनुवृत्त्याऽऽदेशे विकल्पिते रूपद्वयेनैव भाव्यमिति।

उ इति। अत्र पक्षे उ इतीत्यस्य शाकल्यातिरिक्तमते सिद्धत्वेऽपि शाकल्यमते तदसिद्धिरिति तदपि

❀ सदाशिवभट्टीयम् ❀

इत्यन्विति। योगविभागे कृते ऊँभावपक्षे शाकल्यह्रस्वेन 'उँइती'ति चतुर्थं रूपं सम्भवति न वेति चेच्छृणु, परत्वान्तरङ्गत्वाभ्याम् ऊँभावात्प्राक् शाकल्ये क्षतिरेव न। ऊँभावे न सः। प्रतिपदोक्तत्वात्तु न तत्प्राप्तिः, हरी

❀ विषमपदविवृतिः ❀

त्यस्या'चस्ताख'दिति सामान्यशास्त्रप्रणयनेन ऋदन्ते स्मृत्यन्तरानुसन्धानद्वारा नेड्विकल्पबोधकत्वम्। न च प्रगृह्यपदानुवृत्तिवैयर्थ्यं, तस्योत्तरत्रानुवृत्त्यर्थत्वेनोपपत्तेः। तथा चैकयोगत्वे शाकल्यमते उँ इत्येकमेव स्यात्। तदेतदुक्तं भाष्ये—'शाकल्यस्य चाचार्यस्य मतेन उँ इति विभाषा यथा स्यात्-उँ इति, उ इतीति। तदन्यमतेन 'निपातएका'जिति नित्यं प्रगृह्यत्वात् उ इतीति स्यात्। तदेतदुक्तं भाष्ये—अन्येषामाचार्याणां मतेन—वितीति। योगविभागेन उञ इत्यनेन प्रगृह्यत्वस्य शाकल्यमते विधानेन योगविभागेन सिद्धप्रगृह्यसञ्ज्ञाविज्ञानसामर्थ्यात्स्मृत्यन्तरानुसन्धानद्वारा सामान्यशास्त्रसत्त्वेऽपि प्रगृह्यत्वांशे विकल्पः सिध्यति। द्वितीययोगेन तु सति प्रगृह्यत्वे एवादेशविकल्पः, तत्रापि शाकल्यग्रहणानुवृत्तिसामर्थ्यात्। ननु शाकल्यग्रहणानुवृत्तिः सति प्रगृह्यत्वे एवादेशो यथा स्यान्न त्वप्रगृह्यत्वे इत्येवमर्थं स्यात्, न स्याद्दीर्घोच्चारणसामर्थ्येन प्रगृह्यपदानुवृत्तिसामर्थ्येन च, सत्येव प्रगृह्यत्वे आदेशकल्पनासम्भवात्। तस्माद्द्वितीययोगे शाकल्यानुवृत्तिः सति प्रगृह्यत्वे आदेशविकल्पार्थेत्येव तत्त्वमित्याहुः। **दीर्घोच्चारणवैयर्थ्यापत्तिश्चेति**। असंहितायां तस्य चारितार्थ्याच्चिन्त्यमेतदिति केचित्। **विकल्पमात्रसबन्धेऽपीति**। शाकल्यपदसम्बन्धे

'ऊँ इती'त्यस्यासिद्धिरिति—विधानसामर्थ्यात्प्रगृह्यपदसम्बन्धः । प्रगृह्यपदमात्रसम्बन्धेऽर्थाधिकारादप्रगृह्यस्य नित्ये ऊँआदेशे 'ऊँ इती'ति, प्रगृह्यस्य 'उ इती'ति सिद्धेऽपि 'विती'ति न सिद्ध्येत् । तदाह—**उञ इतौ दीर्घोऽनुनासिक** इत्यादि । अत्र विशिष्टस्य विधिरिति न वाक्यभेदः । न च प्रगृह्यत्वमादेशश्च शाकल्यमते इति

❀ अभिनव-चन्द्रिका ❀

विशिष्टस्य विधिरिति । 'लोहितोष्णीषा ऋत्विजः प्रचरन्ती'त्यत्रेवात्रापि प्रगृह्यसञ्ज्ञकत्व-

❀ चिदस्थिमाला ❀

अस्य मुख्यत्वात्सञ्ज्ञा-सञ्ज्ञिभावस्यैव तत्रासत्त्वादिति भावः । दोषान्तरमाह—**दीर्घाच्चेति** । मात्रपदेन प्रगृह्यान्यवच्छेदः । **अपिरुक्तसमुच्चायकः** । यणापत्त्येति भावः । पक्षद्वयेऽप्याह—**विधानेति** ।

नन्वेवं तस्यैव सम्बन्धोऽस्तु, मास्तु च विकल्पसम्बन्धोऽत आह—**प्रगृह्येति** । मात्रपदेन विकल्पनिरासः । अत एवाह—**नित्ये इति । तीति** । इतीति चेत्यर्थः । तस्मादुभयोरनुवृत्तिः । एतेन—प्रगृह्यत्वाननुवृत्तावादेशमात्रविकल्पे प्रगृह्याप्रगृह्ययोर्द्वयोरप्युञोरादेशापत्तौ प्रगृह्यादेशे प्रकृतिभावेनेष्टसिद्धावप्यप्रगृह्यादेशेऽस्य सवर्णोऽनुनासिको वकारः स्यात्, तदनुवृत्तौ तु प्रगृह्यत्वमप्यनेन विधीयते इति न दोषः, शाकल्याननुवृत्तौ तु उञ्मात्रस्यानेन नित्ये ऊँ आदेशे 'ऊँ इती'त्येकमेव रूपं स्यात् । 'प्रगृह्य'मिति प्रथमान्तस्य षष्ठ्यन्ततया विपरिणामं कृत्वा स्थानिविशेषणत्वं स्वीकृत्य प्रगृह्यस्योञ ऊँ इति **हरदत्तोक्तव्याख्यायान्तु** 'ऊँ इतीति' विती'ति च द्वे एव रूपे स्यातां, न तु 'उ इतीति, तस्मात्तदनुवृत्त्याऽऽदेशविकल्पे रूपत्रयसिद्धि'रिति कैयट-दीक्षित-दण्डि-रत्नाकराद्युक्तमपास्तम्, उक्तयुक्तेः, विपरिणामे मानाभावात्, दोषान्तरस्यान्यत्र स्पष्टत्वाच्चेति दिक् । दीर्घोच्चारणन्तु प्रागुक्तरीत्या सफलम् । एतेन—दीर्घोच्चारणसामर्थ्यादेव प्रकृतिभावसिद्धौ किं प्रगृह्यत्वेने'त्यपास्तम् । नन्वनेन सञ्ज्ञाऽऽदेशोभयविधाने वाक्यभेदापत्तिरत आह—**अत्रेति** । क्रमेणाह—**प्रगृह्येति** । उभयत्रापि तदनुवृत्तेरुक्तत्वादाह—

❀ ज्योत्स्ना ❀

योगविभागस्य फलम् । मुख्यफलन्तु वितीत्यस्य सिद्धिरिति बोध्यम् । युक्तञ्चैतत्—उ इतीत्यस्यैव सिद्धिर्योगविभाग इति प्रागुपदर्शितमतस्य भाष्याभिमतत्वे तु 'किमर्थो योगविभागः?—उञः प्रगृह्यसञ्ज्ञार्थः—उ इती'त्येव ब्रूयादिति दिक् । **तस्येको यणीति** । न चादेशविधानसामर्थ्याद्यणभावः, शास्त्रबाधकल्पनमपेक्ष्य प्रगृह्यपदसम्बन्धस्यैव योग्यत्वादित्याशयात् । यद्वक्ष्यति—**विधानसामर्थ्यात्प्रगृह्यपदसम्बन्ध इति । दीर्घोच्चारणवैयर्थ्यापत्तिश्चेति** । असंहितायां तदुच्चारणस्य चारितार्थ्याच्चिन्त्यमेतत् । **प्रगृह्यत्वमादेशश्चेति** । उञ इति विभक्तसूत्रेण प्रगृह्यत्वम्, ऊँ—इत्यनेन

❀ सदाशिवभट्टीयम् ❀

एनावित्यत्रेव प्रकृतिभावेन बाधादिति । **वैयर्थ्यापत्तिरिति** । संहिताऽविवक्षया तु न सार्थक्यमिताविति सप्तमीनिर्देशसत्त्वेन तद्विरहे उपश्लेष एव नेति पूर्वमुक्तत्वात् । विधिवैयर्थ्यन्तु नोक्तं, प्रतिपदोक्तत्वात्, अत्र कृते शाकल्येनानुनासिके ह्रस्वे साफल्यात् । **विकल्पमात्रेति** । शाकल्यपद इत्यर्थः । **विधानेति** ।

❀ विषमपदविवृतिः ❀

प्रगृह्यपदस्यासम्बन्धे इत्यर्थः । **अर्थाधिकारादिति** । इदमयुक्तम्-उञिति पदस्याप्रगृह्यत्वे शक्त्यभावात् । तस्मात्प्रगृह्यस्यादेशे योगविभागवैयर्थ्यापत्तेः । अप्रगृह्यस्यैवादेश इति वक्तुं युक्तम् ।

तयोरेकप्रयोगे एव प्रवृत्तिः स्यादिति वाच्यं, योगविभागसामर्थ्येन शाकल्यमते एव भावाभावकल्पनात् । वस्तुत उञनुवादेन सञ्ज्ञाऽऽदेशयोः सह विधानमेव न्याय्यम् । आदेशे स्थानिवद्भावात्प्रगृह्यकार्यम् । भाष्ये 'प्रगृह्यसञ्ज्ञकश्चे'त्यपि स्थानिवद्भावलब्धार्थस्वरूपकथनमिति न्यायविदो विचारयन्तु ।

मय उञो । व्याख्यानादत्र मय् प्रत्याहारः । अस्य त्रैपादिकत्वेनासिद्धत्वान्न 'प्लुतप्रगृह्या' इत्यनेन बाधः । **नानुस्वार इति** । 'किं विती'त्यादौ प्रगृह्यसञ्ज्ञाऽभावेऽस्यासिद्धत्वादि'को यणि'ति यणि अनुस्वारो भवत्येव ।

ननु 'यः शिष्यते स लुप्यमानार्थाभिधायी'ति न्यायेन गौरीशब्दस्य सप्तम्यर्थवृत्तित्वेऽपीकारस्य तत्त्वाभावोऽत आह—**ईदूदन्तमिति** । शब्दस्वरूपस्य विशेष्यत्वात्तदन्तविधिरिति भावः । **मामकी तनू इति** । प्रगृह्येष्विति शब्दप्रयोगस्य पदकारैर्नियमितत्वात्पदपाठे प्रगृह्यत्वफलमत्र बोध्यम् । ईदूतौ किं ? अग्ना भवाति । सप्तम्या डादेशः । तपरत्वमसन्देहाय । सप्तमीति किम् ? धीती, मती । ह्रस्वान्ताभ्यान्तृतीयैक-

❀ अभिनव-चन्द्रिका ❀

विशिष्ट 'ऊँ'इत्यादेशो विधीयत इति भावः । **विचारयन्त्विति** । उभयोः सह विधाने वाक्यभेदापत्त्या गौरवाद्विशिष्टविधानमेव न्याय्यम् । अत एव भाष्ये 'प्रगृह्यसञ्ज्ञकश्चे'त्यनेन विशिष्टविधानमेव बोधितमिति—विचारणा । **प्रगृह्यफलमिति** । **मामकी इति तनू इति—**

❀ चिदस्थिमाला ❀

शाकेति । तथा च पक्षे 'विती'त्यस्य सिद्धावपि 'उ इती'ति न स्यादिति भावः । **भावेति** । ऊँआदेशस्येति भावः । प्रागुक्तरीत्या मूलासङ्गतिं ध्वनयन्सिद्धान्तमाह—**वस्तुत इति** । न्याय्य'मित्यत्रान्वयः । प्रागुक्तरीत्यैवाह—**आदेश इति** । अत्र भाष्यविरोधं परिहरति—**भाष्ये इति** । **स्वरूपेति** । 'दीर्घोनुनासिक' इतिवदिति भावः । ननु मय्धातोर्ग्रहणं कुतो नात आह—**व्याख्येति** । बहुलक्ष्यसंस्कारानुरोधमूलकादित्यर्थः ।

नन्वयमप्रगृह्यपक्षे, प्रगृह्यपक्षे प्रकृतिभावेनास्य बाधादत आह–**अस्येति** । 'किम्वुक्त'मित्यादौ प्रगृह्यसञ्ज्ञाया 'निपात' इत्यनेन नित्यत्वादाह—**किं वितीति** । 'सञ्ज्ञाऽभावे'इत्यत्राकारप्रश्लेषः । **तत्त्वाभाव इति** । अस्य सप्तम्यप्रकृतित्वेन तदर्थानन्वितत्वादिति भावः । **शब्देति** । शब्दानुशासनप्रस्तावात् । सप्तम्यर्थे इत्युपात्तार्थाक्षिप्ततद्वाचकशब्देत्यर्थः । नन्वत्र संहितायां न प्रगृह्यत्वस्य प्रयोजनमत आह—**प्रगृह्येष्वितीति** । त्वा वां तनू ऋत्वेनाधमाना'मित्यत्र संहिताकालेऽप्यस्ति तत्, तथापि तत्र 'ऋत्यक' इति प्रकृतिभावेनैव सिद्धं, छन्दसि आपाद्यरूपाभावात्पक्षे दोषो नेति भावः । **डादेश इति** । 'सुपा'मितीति भावः । एवमग्रेपि । अत्रापि प्राग्वत्पदपाठे दोषो बोध्यः । दीर्घत्वेनानण्त्वादाह—**तपरत्वमिति** । अर्थग्रहणफलस्य पृथग्वक्ष्यमाणत्वादाह—**सप्तमीतीति** । प्रकृते दीर्घान्तत्वभ्रमनिरासायाह–**ह्रस्वान्तेति** । 'परस्ये'ति शेषः । जातावेकवचनं, लुक् तु न,

❀ ज्योत्स्ना ❀

आदेश इत्यर्थः । **न्यायविदो विचारयन्त्विति** । प्रगृह्यत्वस्य साक्षादुद्देश्यसम्बन्धस्य क्लृप्ततया विधेयविशेषणत्वे मानाभावो हि न्यायः । 'प्रगृह्य'मित्यस्य प्रथमान्तसमानाधिकरणपदेनैवान्वयः पूर्वत्र दृष्ट इति तथैवेहापि न्याय्यमिति तु विधेयविशेषणवादिनामाशयः । उपाध्यायास्तु—प्रगृह्यपदमनुवर्त्य विभक्तिविपरिणामेन षष्ठ्यन्ततया उञ इत्यस्य विशेषणमिति व्याचक्षते । तन्मते वाक्यभेदकल्पनागौरवशङ्कापि नास्तीति विशेषः । **मय्प्रत्याहार इति** । न तु धातुरिति भावः ।

❀ विषमपदविवृतिः ❀

विचारयन्त्विति । इदमयुक्तमित्युक्तम् । **मय्प्रत्याहार इति** । न तु धातुः । **वैजात्येति** । तच्च तदन्त-

वचनस्य पूर्वसवर्णे सवर्णदीर्घः । **अर्थग्रहणञ्चेमिति** । न च तदभावे 'ईदूदे'दितिवदीदूदन्ता यां सप्तमीत्यर्थापत्तिः । तथा च ययीत्यादावेव स्यात्, एकादेशस्य परादिवद्भावेन सप्तमीत्वात्, न तु 'गौरी'त्यादाविति–तत्सिद्ध्यर्थन्तदावश्यकमिति वाच्यम्, 'ईदूतौ सप्तमी प्रगृह्यम्' 'अदसः' 'एच्च द्विवचन'मित्येव सिद्धे गुरुभूतन्यासकरणेन तत्प्रकरणापेक्षया वैजात्यबोधनात्, ऊकारांशेऽसम्भवाच्च–'सञ्ज्ञाविधा' वितितदन्तग्रहणनिषेधाप्रवृत्त्या 'ईदूदन्तं सप्तम्यन्त'मित्यर्थेनेष्टसिद्धेरिति प्रश्नः । 'ययी'त्यादेरनभिधानमेवेति परे ।

वृत्ताविति । अर्थग्रहणसामर्थ्यात्सप्तम्यर्थमात्रे पर्यवसन्नमित्यर्थेनात्र तत्संसृष्टा-

❀ **अभिनव-चन्द्रिका** ❀

इत्यादावित्यर्थः । **असन्देहायेति** । अनण्त्वेन सवर्णाग्रहणादिति भावः । **अनभिधानमेवेति** । 'ईदूतौ सप्तमीत्येवे'त्यादिप्रकृतिसूत्रस्थभाष्यप्रामाण्यादिति भावः । **सप्तम्यर्थमात्रे पर्यवसन्नमिति** । तत्त्वञ्च सप्तम्यर्थविशिष्टत्वम् । वै० 'स्वनिरूपितशक्तिपर्याप्त्यधिकरणत्व'—'स्वानुयोगिनिरूपितशक्त्यधिकरणत्व'—'स्वप्रतियोगिनिरूपितशक्तिपर्याप्त्यधिकरणत्वै'तत्त्रितयसम्बन्धेन' । 'वाप्यश्व' इत्यादौ 'वापी'त्यत्र सप्तम्यर्थाधाराधेयभावनिरूपितशक्तिपर्याप्त्यधिकरणत्वस्य स्वप्रतियोगिवापीत्वावच्छिन्न-

❀ **चिदस्थिमाला** ❀

ह्रस्वश्रवणापत्तेः । 'अर्थे' इत्यनेन प्रधानाप्रधानन्यायेनार्थग्रहणसामर्थ्येन च विभक्त्यर्थस्यैव ग्रहणमिति भावः । **तदिति** । समासघटकेत्यर्थः । **ययीत्यादाविति** । आदिना 'पपी'त्यादिपरिग्रहः । ननु व्यपदेशिवद्भावेन तदन्तत्वेपि न सप्तमीत्वमत आह—**एकेति** । एवव्यवच्छेद्यमाह—**न त्विति** । **इतिर्हेतौ** । **तदिति** । तत्रापि तत्सिद्ध्यर्थमित्यर्थः । वाप्यश्व इत्यादिव्यावृत्त्यर्थं तु न, वाप्यादिपदानामाधेयाश्वादिरूपार्थवृत्तित्वेपि 'अधिकं प्रविष्टं न तु तद्धानि'रिति न्यायेन सप्तम्यर्थवृत्तित्वानपायेन तस्या दुर्वारत्वादिति भावः ।

इत्येवेति । एवमेव लघुभूतसूत्रत्रयेणेत्यर्थः । **न्यासेति** । सूत्रत्रयेत्यर्थः । **वैजात्येति** । 'प्रकृतसूत्रे' इत्यादिः । ननु प्रकरणतो वैजात्यं दुर्वचं, प्रकरणस्यैकत्वात्, सूत्रतो वैजात्यन्त्वत्रापि सममिति कथं तेन सिद्धान्तभूतेनोक्तार्थबोधनमत आह—**ऊकारांशे इति** । ऊकारान्तसप्तम्या असम्भवादित्यर्थः । अप्रवृत्ता हेतुरयम् । तद्वदीकारांशेऽप्यसम्भव एवेति कथयन्सिद्धान्तमाह—**ययीत्यादेरिति** । प्रकृतसूत्रस्थभाष्यप्रामाण्यादेवेत्यर्थः । यथा चैतत्तथा स्फुटीभविष्यति । एतेन 'वाप्यश्व' इत्यादावपि सप्तम्यर्थोऽस्त्येवेति नार्थोऽर्थग्रहणेनेति प्रश्न' इति **दण्डयुक्त**मपास्तम् । तथार्थस्यैवासम्भवादवधारणार्थमात्रपदेनाधेयव्यावृत्तिर्न तु प्रकृत्यर्थस्येत्याह—**तत्ससृष्टेति** । अपिना तत्समुच्चयः । तथा च विशिष्टे पर्यवसानं,

❀ **ज्योत्स्ना** ❀

तपरत्वमसन्देहायेति । इदमभेदकत्वपक्षे । भेदकत्वपक्षे तु गुणान्तरयुक्तानां सञ्ज्ञाप्रवृत्त्यर्थन्तपर-

❀ **विषमपदविवृतिः** ❀

विधिसद्भावकृतम् । 'न चे'त्यारभ्ये'ती'त्यन्त इत्येको ग्रन्थः । **अनभिधानमिति** । 'नचास्तीदूतौ सप्तमी'ति प्रकृतसूत्रस्थभाष्यादिति भावः । **आधेयार्थे वृत्तिरिति** । एकार्थीभाववत्तेन समासे वापी-

❀ **वरवर्णिनी** ❀

अर्थग्रहणसामर्थ्यादिति । जहत्स्वार्था वृत्तिर्नाम—एकार्थीभावः, अजहत्स्वार्था वृत्तिर्नाम–व्यपेक्षेति मनसि निधाय प्रवृत्तभाष्यमतेनायं ग्रन्थः । अर्थग्रहणसामर्थ्यात्सप्तम्यर्थनिरूपितशक्त्यधिकरणेकारान्तौकारान्तौ प्रगृह्यावित्यर्थेन जहत्स्वार्थायां वृत्तौ एकार्थीभावे पूर्वपदस्यार्थाभावेन समुदायस्याऽपर्याप्त्या पूर्वपदे सत्त्वेऽपि सप्तम्यर्थनिरूपितशक्तेः पर्याप्त्या तत्राऽसत्त्वान्न प्रगृह्यत्वम् । अजहत्स्वार्थायान्तु वापीपदस्य वाप्यधिकरणक

धेयार्थेऽपि वृत्तेर्न दोषः। 'सञ्ज्ञाया'मिति समासे जहत्स्वार्थायां वृत्तौ पूर्वपदस्यान-र्थक्येऽपि 'सुप्सुपे'ति समासे अजहत्स्वार्थायां प्रसक्तदोषस्योक्तरीत्यैव वारणमिति भावः।

'गौरी अधिश्रित' इत्यत्राधिश्रयणक्रियायामेव गौरीपदबोद्ध्याधिकरणत्वान्वय इति गौर्यधि-

❀ अभिनव-चन्द्रिका ❀

निरूपितशक्तिपर्याप्त्यधिकरणत्वस्य च सत्त्वेऽपि स्वानुयोग्यश्वत्वावच्छिन्ननिरूपितशक्त्यधिकरणत्वस्यापि एकार्थीभाववादिमते सत्त्वेन स्वानुयोगिनिरूपितशक्त्यनधिकरणत्वस्याभावान्न दोषः। मूलोक्तन्तु न युक्तं-'गौरी'त्यादौ 'गौरी'त्यस्य गौरीत्वावच्छिन्नार्थवृत्तित्वेन सप्तम्यर्थमात्रपर्यवसन्नत्वाभावात्।

ननु 'गौरी'त्यादौ गौरीपदस्य आधाराधेयभावसम्बन्धेन गौरीत्वावच्छिन्नविशिष्टे लाक्षणिकतया सप्तम्यर्थानुयोगिनिरूपितशक्त्यधिकरणत्वस्यैव सत्त्वेन कथं सप्तम्यर्थविशिष्टत्वं निरुक्तसम्बन्ध-त्रयेणेत्यत आह—**अधिकरणत्वान्वय इति**। **अप्रतीतिमात्रमिति**। अत्यन्तरूढेषु 'जहत्स्वार्था तु तत्रैव

❀ चिदस्थिमाला ❀

प्रकृत्यर्थविशिष्टसप्तम्यर्थाधिकरणमात्रे इति प्रकृतिप्रत्ययार्थोभयविशिष्टोत्तरपदार्थवृत्तित्वादत्र न भवतीति भावः। 'जहत्स्वार्थवृत्तिपक्षे पूर्वोत्तरपदयोर्वर्णवदानर्थक्यादिदं सिद्ध'मिति **रत्नाकरोक्तिं** खण्डयन्नाह—**सञ्ज्ञायामिति**। 'जहत्स्वार्था तु तत्रैव यत्र रूढिर्विरोधिनी' त्युक्तेरिति भावः। सकलग्रन्थकारोक्त्य-साङ्गत्याय उत्तरपदस्यार्थवत्त्वस्य तत्रापि सत्त्वादाह—**पूर्वपदेति**। **सुप्सुपेति**। अस्य वैकल्पिकत्वात्, अत एव न रूढिरिति भावः। अत एवाह—**अजहदिति**। नन्वेवं गौरीत्यादावधिकरणकारकस्य क्रियान्वयावश्यकत्वेन तस्याश्चानुयातत्वेन? तत्र तस्य लक्षणावश्यकत्वेन न तन्मात्रपर्यवसन्नत्वमित्यव्याप्तिः। किञ्च विरुद्धविभक्तिरहितनामार्थतया भेदेनान्वयायोगादभेदान्वयाय तेषान्तदधिकरणके लक्षणावश्यकत्वेन सप्तम्यर्थमात्रपर्यवसन्नत्वाभावः। 'लुप्तस्मरणाच्छाब्दबोध' इति वादिनां मते सप्तम्यर्थपर्यवसन्नत्वमेव नेत्यत आह—**गौरीति**। गुणभूतक्रियायामपि तदन्वयस्यान्यत्र स्पष्टतरत्वात्प्राचां मतेनेदम्। किञ्च 'राज्ञो देव-दत्तस्य यज्ञदत्त' इत्यादौ प्रकारद्वयेनाप्यन्वयदर्शनेन लोपादिद्वारा लक्षणाया एवान्वाख्यानेन तेषां सप्तम्यर्थ-मात्रलक्षणया तत्पर्यवसन्नत्वेन भेदान्वये बाधकाभावः। भेदाऽभेदान्वयबोधे च तात्पर्यमेव नियामकम्।

❀ विषमपदविवृतिः ❀

पदस्य वाप्यधिकरणकाश्वरूपार्थोपस्थितिजनकत्वादिति भावः। **समासे जहत्स्वार्थायामिति**।

❀ वरवर्णिनी ❀

लक्षणयाऽऽधेयार्थस्याधिक्येऽपि इकारान्तस्य सप्तम्यर्थनिरूपितशक्तेः पर्याप्त्यधिकरणत्वेन प्रगृह्यत्वं स्यादिति।

अजहत्स्वार्थवृत्तिं स्वीकुर्वतां मतेऽर्थग्रहणेन सप्तम्यर्थमात्रवृत्तिशक्त्यधिकरणेकारोकारान्तौ प्रगृह्याविल्यर्थेनाधे-यार्थस्याधिक्यान्नात्र प्रगृह्यत्वम्। ननु 'सप्तम्यर्थवृत्तिशक्त्यधिकरणत्वे सति सप्तम्यर्थेतरवृत्तिशक्त्यनधिकरणत्व'-मित्यर्थस्य मात्रपदमहिम्ना लाभा'त्सोमो गौरी अधिश्रित'इत्यत्र प्रकृत्यर्थस्याधिक्येन सप्तम्यर्थमात्रवृत्तिशक्त्य-नधिकरणत्वेन प्रगृह्यत्वं न स्यादिति चेन्न। प्रकृत्यर्थेतरो यः सप्तम्यर्थेतरस्तद्वृत्तिशक्त्यनधिकरणत्वे सति सप्तम्यर्थवृत्तिशक्त्यधिकरणत्वमित्यर्थस्वीकारेणादोषात्। अन्ये त्वेकार्थीभावे एव यत्र वृत्तिघटकपदानामर्थ एव न सा जहत्स्वार्था वृत्तिः, यत्र तु पूर्वोत्तरयोः पदयोः पृथगर्थोऽस्ति साऽजहत्स्वार्था वृत्तिः, यथा वापीपदं वापीत्वावच्छिन्नवाचकम्, अश्वपदमश्वत्वावच्छिन्नवाचकम्, वाप्यश्वपदं वाप्यधिकरणकाश्ववाचकमिति। उभयविधयोरपि वृत्त्योः प्रगृह्यत्वाभावाय सप्तम्यर्थनिरूपितशक्तिपर्याप्त्यधिकरणेकारोकारान्तौ प्रगृह्यौ स्त इति वाक्यार्थेन जहत्स्वार्थायां वृत्तौ वृत्तिघटकपदयोरर्थाभावेन न दोषः। समुदायस्यापर्याप्त्या वापीपदे विद्यमानत्वेऽपि सप्तम्यर्थनिरूपितशक्तिपर्याप्त्यधिकरणत्वाभावान्न दोषः। एवमजहत्स्वार्थायामपि वापीपदस्य वापीत्वावच्छिन्नवाचकत्वेऽपि पर्याप्त्या सप्तम्यर्थस्य तत्राभावाददोषो बोध्य इति श्रीत्रिपाठिगुरुचरणा आहुः।

करणके लक्षणायां मानाभाव इति—न तत्र दोषः। **वाप्यामश्व इति**।—'सुप्सुपे'ति समासः, 'सञ्ज्ञाया'मिति वा। ननु 'सञ्ज्ञाया'मिति समासे वाक्येन सञ्ज्ञाऽनवगमान्नित्यसमासत्वेन विग्रहोऽनुचित इति चेन्न। तेषु समाससमानार्थकवाक्याभावेन नित्यसमाससदृशत्वेऽपि नित्यसमासत्वाभावात्, विभाषाधिकारबाधे मानाभावात्। नित्यसमासे हि वृत्तिघटकपदानां पृथक् प्रयोगाभाव एव। अत्र तु पृथक्प्रयोगेऽपि तद्बोध्यविशिष्टार्थाप्रतीतिमात्रमित्याहुः।

अणोऽप्र। अण इति किं? कर्त्तृ हर्त्तृ। अत्राण्पूर्वेणैव—व्याख्यानात्। 'आगच्छतमग्नी' इत्यादौ प्लुतस्यासिद्धत्वात्ततः प्रागेव यथोद्देशत्वात्प्रगृह्यत्वे जाते पश्चात्प्लुते

❀ **अभिनव-चन्द्रिका** ❀

रूढिर्यत्र विरोधिनी'त्यभित्युक्तोक्त्या जहत्स्वार्थवृत्तेरेव स्वीकारादिति भावः। **व्याख्यानादिति**।

❀ **चिदस्थिमाला** ❀

यथा चैतत्तथाऽन्यत्र स्पष्टम्। **णके इति**। क्रियारूपाभिधेये इत्यर्थः। 'इकोऽसवर्णे' इति सूत्रस्थकैयटानुरोधेनाह—**सुप्सुपेति**। फलभेदविशेषं वक्तुं प्रकृतसूत्रस्थकैयटानुरोधेनाह—**सञ्ज्ञायामिति**। **सत्त्वेनेति**। इदञ्च शाकलसूत्रे कैयटे स्फुटम्। वाक्यस्य सत्त्वादाह—**समानार्थेति**। नित्याधिकारपाठादाह—**नित्यसमासत्वेति**। ननु तदभावेपि तत एव तत्त्वं कुतो नात आह—**विभाषेति**। तदधिकारपाठ एव हि तद्बाधे मानं, न चात्र तथेति भावः। तथा चात्र गौणं तत्त्वं, न तु मुख्यमत एवोक्तसादृश्यमुपपन्नमित्याह—**नित्येति**। हि=यतः। मात्रपदेन तद्व्यवच्छेदः। अत एव तत्सादृश्यात्तथा तत्त्वं, न तु तथेति दिक्। ननु परणकारेण प्रत्याहारेऽस्याप्यण्त्वमेवात आह—**अत्रेति**। **व्याख्येति**। 'अप्रगृह्ये'ति पर्युदासेन हलामप्रवृत्त्या लाघवायाऽच इत्येव वाच्येऽण्ग्रहणसामर्थ्यमूलकादित्यर्थः। ननु मौलः पर्युदासो न युक्तः, 'आगच्छतं हरी'इत्यत्र प्लुतस्य नव्यरीत्याऽऽश्रयेणास्मन्मते स्थानिवत्त्वेन प्रगृह्यत्वेऽपि स्वाश्रिततदन्यत्वस्यापि सत्त्वादनुनासिकापत्तेः, तस्मात्प्रसज्यप्रतिषेधोऽयम्। एतेन तथा **हरदत्तोक्तिरप्यपास्तेति रत्नाकरस्तदसत्**, 'अतिदिश्यमाने'त्यादिप्रागुक्तेस्तद्धनयन्नाह—**आगच्छतमग्नी इति**। कैयटादिवर्णिततयथोद्देशपक्षस्वरूपाभिप्रायकोयं ग्रन्थ इति ध्वनयन्नाह—**यथोद्देशेति**। एतेन 'तदा फलाभावात्कथं प्रवृत्ति'रिति, 'कार्यकालेऽत्रागमने तस्यानसिद्धत्वमिति कथमेत'दिति च परास्तम्।

❀ **ज्योत्स्ना** ❀

करणमी'दूदेदि'त्येत्रेवेति बोध्यम्। **इति केचिदिति**। 'हलोऽनन्तरा' इति सूत्रोक्तरीत्या सञ्ज्ञा-

❀ **सदाशिवभट्टीयम्** ❀

प्राचीनमतेनेदम्। तत्र हि शाकल्यह्रस्वेप्यस्य सार्थक्येन तत्र तक्रन्यायेनायं ह्रस्वबाधक इति नात्र कृतेऽ-

❀ **विषमपदविवृतिः** ❀

जहत्स्वार्था तु तत्रैव यत्र रूढिर्विरोधिनीति भावः। **मानाभाव इति**। न च नामार्थयोरभेदान्वय इति व्युत्पत्तिभङ्गः, गौरीपदार्थाधिकरणत्वस्य भेदसम्बन्धेनाधिश्रयणेऽन्वयाङ्गीकारात्। तथा च लक्षणाऽवश्यकीति चेन्न। दधि पश्येत्यादिवदुपपत्तेः। न च तत्रेवात्रापि विभक्तिस्मरणेन शाब्दबोधे सप्तम्यर्थे पर्यवसन्नत्वं दुरुपपादम्। न चाधिश्रयणक्रियायामेव गौरीपदबोध्याधिकरणत्वान्वय इति बृहच्छेखरोक्तं युक्तम्, नामार्थधात्वर्थयोरपि साक्षाद्भेदेनान्वयस्याव्युत्पन्नत्वादिति वाच्यम्, आधेयार्थानुपस्थापकत्वे सति सप्तम्यर्थोपस्थितिजनकत्वस्य 'सप्तम्यर्थे पर्यवसन्न'शब्दार्थत्वात्। प्रकृते च लुप्तविभक्तिस्मृतिहेतुत्वेन गौरीपदस्यैव सप्तम्यर्थोपस्थितिजनकत्वात्। 'पञ्चकम्प्रातिपदिकार्थ' इति

तस्याप्यनुनासिकप्रतिबन्धार्थं पुनः सञ्ज्ञेति नानुनासिकः । सञ्ज्ञायाः कार्यार्थत्वात्पुनः प्रवृत्तौ कार्यमेव बीजम् । स्थानिवत्त्वन्तु न, प्लुतस्थान्यल्वृत्तिधर्मत्वेनाल्विधित्वात् । पूर्वसवर्णे कृते द्विवचनत्वन्तु—परादिवद्भावेन । तेन ताद्रूप्यानतिदेशेऽप्येतद्धर्मातिदेशाङ्गीकारात् । अत एव 'रामा'वित्यादौ परादिवद्भावेन सुप्त्वात्पदत्वं साधितम्—'अन्तादिव' दित्यत्र भाष्ये—इति स्पष्टमाकरे ।

अच्सन्धिरिति । 'सिद्धमनच्त्वा'दिति वार्तिकप्रयोगेण, 'अल्पाच्तरमि'ति सौत्रप्रयोगेण, 'कथमनच्त्वमि'ति भाष्यप्रयोगेण च—वृत्तिघटकाच्पदे पदान्तकार्यस्य तत्सन्निधानेन श्चुत्वस्य चाभावो बोद्ध्यते इति केचित् ॥

इति स्वरसन्धिः ॥

❀ अभिनव-चन्द्रिका ❀

लण्सूत्रस्थभाष्यप्रामाण्यादित्यर्थः । **अल्वृत्तिधर्मत्वेनेति** । अल्त्वव्याप्यधर्मावच्छिन्नस्थानितानिरूपितादेशताश्रयधर्मकारोपप्रकारीभूतधर्मत्वेनेत्यर्थः । **अल्विधित्वादिति** । वस्तुतस्तु 'अप्रगृह्यस्ये'त्यत्र प्रसज्यप्रतिषेधस्वीकारेऽसमर्थसमासकल्पनया क्रियाध्याहारेण च गौरवात्प्रसज्यप्रतिषेधस्य चान्याय्यत्वाल्लाघवेन पर्युदासस्यैव युक्तत्वादल्त्वव्याप्याच्त्वावच्छिन्नस्थानितानिरूपितादेशताश्रयधर्मिकारोपप्रकारीभूतप्रगृह्यत्वस्य 'अणोप्रगृह्यस्ये'त्येतच्छास्त्रीयोद्देश्यतायाः साक्षादनवच्छेदकत्वेना'नल्विधा'वित्यस्याप्राप्त्या स्थानिवद्भावेनैव प्रगृह्यत्वं सुलभमिति दिक् । ननु 'प्लुतो द्विवचनत्ववा'निस्याकारकारोपेऽल्त्वव्याप्यधर्मावच्छिन्नस्थानितानिरूपितादेशताश्रयधर्मिके प्रकारीभूतद्विवचनत्वस्य प्रगृह्यसञ्ज्ञाशास्त्रीयोद्देश्यतायाः साक्षादवच्छेदकत्वेना 'नल्विधा'वितिनिषेधात्कथं द्विवचनत्वमित्यत आह–**परादिवद्भावेनेति** । **ताद्रूप्यानतिदेशेऽपीति** । अन्तादिवृत्तिवर्णमात्रवृत्तिधर्मघटितधर्मानति-

❀ चिदस्थिमाला ❀

प्रगृह्येति । 'प्लुतपक्षेऽफलत्वेपि तदभावपक्षेऽनुनासिकप्रतिबन्धेन फलवती'त्यादिः । **तस्यापीति** । तद्दृष्ट्या तत्र द्विमात्रत्वबुद्धेरिति भावः । नन्वेवमपि कथं पुनः प्रवृत्तिरत आह—**सञ्ज्ञाया इति** । 'लक्ष्यलक्षण'मिति तु विध्यादिविषयकमिति भावः । ननु स्थानिवत्त्वेनैव सिद्धे किमर्थमयं प्रकारोऽत आह—**स्थानीति** । नन्वेकादेशे उक्तरीत्या अस्थानिवत्त्वेन द्विवचनत्वमेव नेति कथमादावेव प्रगृह्यत्वमत आह–**पूर्वेति** । ननु तेनापि ताद्रूप्यातिदेशो नेष्टोऽत आह—**तेनेति** । वर्णमात्रवृत्तिधर्मस्य तेनानातिदेशेऽपि अस्याऽतत्त्वेनातिदेशसम्भवात् । इदं द्रढयति—**अत एवेति** । साधारणधर्मातिदेशाङ्गीकारादेवेत्यर्थः । यथा चैतत्तथाऽधस्तात्प्रतिपादितमन्यत्र च स्फुटम् । **आकरे इति** । कैयटादावित्यर्थः ।

नन्व'च्सन्धि'रित्यत्र कुत्व–श्चुत्वे उचिते, अत आह—**सिद्धमिति** । सवर्णसञ्ज्ञाप्रकरणेइति भावः । सूत्रपाठे प्राथम्यादेवमुक्तं, 'यथोत्तरं मुनीना'मितिन्यायेनाग्रे व्यत्ययः । एवमग्रेपि । 'अचोऽक्षु' इत्यादिभाष्यप्रयोगनिर्वाहायाह—**वृत्तिघटकेति** । एतेन 'स्पष्टप्रतिपत्त्यर्थं तदकरण'मिति दण्डयुक्तमपास्तम् । वस्तुतस्तेषामार्षत्वेनोपपत्तेरुक्तज्ञापने तादृशक्रष्युक्तफलाभावाद'चोऽक्षु' इति भाष्यप्रयोगेण पदान्तरसमभिव्याहारेण स्फुटप्रतीतौ तत्प्रवृत्तेरपि बोधयितुं शक्यत्वेनात्र सन्धिपदसमभिव्याहारसत्त्वादेव

❀ विषमपदविवृतिः ❀

पक्षे गौरीपदस्यैवाधिकरणशक्त्युपस्थापकत्वाद्वा । **पुनः प्रवृत्ताविति** । कार्यकालपक्षाश्रयणेन तु न

अथ हल्सन्धिः ।

स्तोश्चु । 'स्'-इति 'श्'-इति च लुप्तविभक्तिके भिन्ने पदे । **योग इति ।**

❀ अभिनव-चन्द्रिका ❀

देशेऽपीत्यर्थः । **अच्पद इति** । 'आदिरन्त्येने'तिसूत्रबोधितसञ्ज्ञामात्रस्योपलक्षणमिदम् । अत एवा'णुदिदी'त्यादौ ङमुडभावादिसकलेष्टसिद्धिरिति ।

❀ इति स्वरसन्धिः ❀

❀ चिदस्थिमाला ❀

मपि 'आलुन्तदसहने' इत्यादौ सौत्रत्वादेरेवावश्यकत्वेनात्रापि तथैवोपपत्तावीदृशकल्पने मानाभावाच्चेद-मयुक्तमिति बोध्यन्तदाह—**केचिदिति** ।

❀ इति स्वरसन्धिः ❀

स्तोः । नन्वत्र स्थान्यादेशयोः समाहारद्वन्द्वे क्लीबत्वापत्तिः, इतरेतरयोगे द्विवचनापत्तिः, नच सौत्रं पुंस्त्वमिति सर्वैरुक्तत्वाल्लिङ्गस्य लौकिकत्वेन तद्व्यत्ययस्योकाल इतिवद्वितीय्यत्ययतो लाघवेनौचित्यमित्याशय-कान्न दोष इति वाच्यं, साहित्यस्य विशेष्यत्वेन तद्विवक्षासम्भवेनानिष्टापत्तेः, तदङ्गीकारे तत्कृतगौरवाच्च । **एतेन** 'सहितशब्दस्य शाकपार्थिवादित्वाल्लोप' इति **रत्नाकरोक्तं**, 'लिङ्गमशिष्य'मित्येव सिद्धे मनोरमा-शेखरश्च चिन्त्यः, तत्कल्पने, छन्दसत्वकल्पने च गौरवादिति **मन्दोक्तञ्चापास्तम्** । उक्तहेतोः, आशया-नवबोधादिष्टेः सत्त्वाच्च, अत आह—**सितीति** । एकरूपत्वाय निमित्तांशेपीदमेव बोध्यम् । एकमुत्तर-

❀ ज्योत्स्ना ❀

त्वभङ्गापत्तेर्नेह कुत्वश्चुत्वे इति तु परमनिष्कर्षोऽत्र विवक्षितः ।

❀ इत्यच्सन्धिः ❀

'स्तोरिति समाहारद्वन्द्वः, सौत्रं पुंस्त्व'मिति प्राचीनव्याख्याने गौरवम्मत्वा व्याचष्टे—**लुप्त-विभक्तिके भिन्ने पदे इति। श्चुनेति** । विनापि सहयोगं 'सहयुक्त'इत्यनेन तृतीया, सहार्थश्च सहचारः, एकस्मिन्प्रयोगे द्वयोरेव स्थितिरूपः । स चाव्यवहितयोरेव ग्राह्यः, 'चिततूलभारि'ष्विति निर्देशात् । एवं 'ष्टुने'त्युत्तरत्रापि, 'तमडन्यतरस्या'मितिनिर्देशात्, अतो 'योग'इति वृत्तेः परिष्कारमाह—**संयोग**

❀ सदाशिवभट्टीयम् ❀

नुनासिकह्रस्व इति पूर्ववन्न सार्थक्यं, स्वमते तु पूर्ववद्दीर्घविधानेत्यर्थः। **इति शेखरविवृतिसङ्ग्रहेऽच्सन्धिः।**

स्तोश्चुनेति । लुप्तेति । आद्ये 'सुपो धा'त्विति, अन्त्ये हल्ङ्याबितीत्यन्ये । रुत्वे विसर्गे चानु-पपत्त्यभावेपि जश्त्वाभावाय च्छान्दसत्वातिदेशस्यावश्यकत्वेन तत एव लुक्कल्पने लाघवम् । एकपदत्वे तु चार्थे तत्प्रवृत्तिरपि यथासङ्ख्यमनन्वयाद्क्रमकसाध्यैव, 'कृत्तद्धित' 'सुपो धातु' 'च्छन्दोवत्सूत्रे'ति बहूनामनुसन्धाने गौरवमित्यभिप्रेत्याह—**भिन्ने इति** । 'युवोरनाका'वितिसूत्रे भाष्य-

❀ विषमपदविवृतिः ❀

निर्वाहः । 'अणोऽप्रगृह्यस्ये'त्येतद्देशस्थप्रगृह्यसञ्ज्ञादृष्ट्या प्लुतस्य सिद्धत्वेन प्लुतात्पूर्वं प्रगृह्यसञ्ज्ञा-नापत्तेः ।

❀ इत्याचार्यराघवेन्द्रकृतविषमपदव्याख्यायां **स्वरसन्धिः** समाप्तिमियात् ❀

संयोग इति तदर्थः। तेन 'चित'मित्यादौ न दोषः। अत्र 'पदस्ये'त्यधिकृतमपि न सम्बध्यते। 'शा'दिति ज्ञापकात्। तेन याच्ञा सिद्धा। शात्परस्य स्तोः श्चुत्वनिषेधकात् 'शा'दिति लिङ्गादेव निमित्तकार्यिणोर्यथासङ्ख्यं न। एवमुत्तरसूत्रेऽपि—'तोः षी'ति ज्ञापकान्न तत्। **शकारचवर्गौ स्त इति**। 'यथासङ्ख्य'मिति शेषः। **हरिश्शेते**

अभिनव-चन्द्रिका

न सम्बध्यत इति। सामानाधिकरण्येन न सम्बध्यते इत्यर्थः। अत एव 'पदस्ये'त्यधिकृतं वैयधिकरण्येन सम्बध्यत'इति अग्रिमग्रन्थेन 'अत एव सादेः पदस्येति नार्थ' इति परिभाषेन्दुशेखरग्रन्थेन च न विरोधः। **यथासङ्ख्यं नेति**। अनेन स्थान्यादेशयोर्यथासङ्ख्यमस्त्येवेति सूचितम्। एवमुत्तरसूत्रेऽपि

❀ चिदस्थिमाला ❀

सूत्रेऽपि। 'सत्या' 'भीम' इतिवान्निर्देश इत्याह—**संयोगे इति**। तदर्थः=अध्यारलभ्यस्य योगे इत्यस्यार्थः। संयोगश्चाव्यवहितयोरेवेत्याह—**तेनेति**। आदिना 'कट्टैल'मित्यादिपरिग्रहः। तेनोत्तरत्राप्येवमेवेति सूचितम्। ननु पदस्येत्याधिकारेण पदान्तयोस्तयोरित्यर्थेन चितमित्यादौ दोष एव न, अत आह—**अत्रेति**। फलमप्याह—**तेनेति**। अतिदेशेनानुकरणे क्लीत्वादाह—**सिद्धेति**। एवमुत्तरसूत्रेऽपि 'न पदन्ता' दितिज्ञापकात्तिदसम्बन्धो बोध्यः। **यथासङ्ख्यमिति**। 'तथदधने'त्यादेरप्यनादितया तमादाय

❀ ज्योत्स्ना ❀

इति। तदर्थ इति। तेन याच्ञा सिद्धेति। पदस्येत्यस्य सम्बन्धे तु पदान्तयोः सकारतवर्गयोरित्य-

❀ सदाशिवभट्टीयम् ❀

'इतरेतरयोगे सौत्रो लोप' इति ग्रन्थस्तु कयोर्युवोरिति सूत्रस्थभाष्याऽनुरोधादिति न तद्विरोधः। अत्र पक्षे प्रत्येकं स्वरितत्वं प्रतिज्ञेयं—ष्टुनेत्यत्रानुवृत्तये। तदपि स्वरितत्वस्याज्झल्साधारणदोषरूपत्वे। अज्निष्ठस्वररूपत्वे तु एकपदत्वमेव न्याय्यमित्याहुः। 'योग' इति वदतो मूलकृतो मते संहिताधिकारसत्त्वे निमित्तकार्यिणोः संहिताविरहादेव चितादौ न दोषः, तत्प्रत्याख्याने तु स्यादेवात आह—**संयोग इति**। नन्वेवमपि 'तस्मिन्नि'तिसूत्रे भाष्ये 'निर्दिष्टे' इत्यस्य समिधावित्यत्र यण् नेति प्रयोजनमुक्तम्। तत्र मनोरमायां चा'चि यणित्युक्ते व्यवहितेपि प्राप्नोती'त्युक्तम्, तदुभयमप्यसङ्गतं, संहिताविरहादेव यणोऽप्राप्तेरिति चेन्न। तत्सन्निकृष्टवर्णसन्निकर्षस्यापि संहितासञ्ज्ञाप्रयोजकत्वात्, साक्षात्सन्निकर्षग्रहणे मानाभावात्। यथा 'नचवाहे'ति सूत्रे युक्तग्रहणम्। अत एवै'कपदे संहिता नित्ये'ति यथाश्रुतं सङ्गच्छतेऽन्यथा ययोरस्ति तयोरस्त्येव, ययोर्नास्ति तयोर्नास्त्येवेति व्याख्येयं स्यात्। **पदस्येति**। 'पदान्तस्ये'ति णत्वनिषेधकसूत्राचरोऽनुनासिके इत्यर्थमधिकृतमपीति भावः। अत एवै'कादिश्चिकस्ये'ति सूत्रे'ऽदुट् कर्त्तव्य' इत्याशङ्क्य—'पदान्तस्येति विधीयमानमनुनासिकत्वं न स्या'दित्युक्तम्। पदान्तस्येत्युक्तिस्वरसभङ्गप्रसङ्गान्नास्य 'न पदान्ताट्टो'रित्यतोऽनुवृत्तिरित्यभिप्रायकत्वं, विभक्तिविपरिणामापत्तेश्च। अन्तपदानुक्तिस्तु तस्य तत्रानावश्यकत्वसूचनाय। ष्टुनेत्यत्र तु 'नपदान्ता'-दितिज्ञापकादसम्बन्धः। एतेन पदाधिकारस्या'पदान्तस्य मूर्द्धन्य' इत्येतदवधिकत्वाच्चिन्त्यमेतदित्यपास्तम्। **यथासङ्ख्यमिति। शेष इति**। स्थानेऽन्तरतमपरिभाषया सिद्धिरित्यपि बृहच्छब्दरत्नोक्तमनुसन्धेयम्। लघुशब्दरत्ने आन्तरतम्येन लघुनोपायेन सिद्धेस्त्वादिपदैरनादिसिद्ध–'तथे'त्यादिक्रमेणैवोपस्थितिरित्येव कुत

❀ विषमपदविवृतिः ❀

स्तोश्चुना श्चुः। पदस्येत्यधिकृत्येति। इदमयुक्तम्–'अपदान्तस्य मूर्धन्य' इतः प्रागेवैतदधिकारसमाप्तेः। सम्बन्धेपि वा 'ङः सी'त्यादाविव वैय्यधिकरण्येनान्वयेऽदोषाच्च। **शादिति ज्ञापकादिति**। विश्नमाचष्टे विश्नचेतेत्यादौ सम्बुध्यन्ते पदान्ते शात्परतवर्गसम्भवेनेदमप्ययुक्त-

इति। 'वा शरी'ति विसर्गाभावे शः। **सच्चिदिति**। चुत्वस्यासिद्धत्वाज्जश्त्वेन दत्वे तस्य चुत्वेन जकारे चर्त्वमिति बोद्ध्यम्। तयोरत्रालेखस्तु वैचित्र्यार्थः। **विश्न इति**। 'यजयाचयतविच्छप्रच्छरक्षो न'ङिति नाङि 'च्छ्वोरि'ति शादेशे ङित्त्वाद्गुणाभावः। 'प्रश्ने चासन्नकाले' इति निर्देशात्सम्प्रसारणाभावः।

न पदान्ता। 'पदाट्टो'रित्येव सिद्धेऽन्तग्रहणं स्पष्टार्थम्। **टोः किमिति**। षकार-

❀ अभिनव-चन्द्रिका ❀

बोध्यम्। **स्पष्टार्थमिति**। अयम्भावः—पदसञ्ज्ञाप्रयोजकप्रत्ययोत्पत्तिप्रयोजकसञ्ज्ञाशास्त्रीयोद्देश्यता-

❀ चिदस्थिमाला ❀

परस्मैपदानामित्यादौ सूत्रान्तरक्रमेणेव तत्। चादिशब्दैरनादिसिद्धलोकप्रसिद्धक्रमेणैवोपस्थितैरिति भावः।

ननु 'वा शरी' त्येतद्दृष्ट्याऽसिद्धत्वादस्य कथमत्रेदमत आह—**वा शेति**। **श इति**। 'विसर्जनीयस्ये'-ति सस्येत्यादिः। नन्वेवं 'झलां जशोन्ते' 'खरि चे'त्यनयोरत्र लेख उचितोऽत आह—**तयोरिति**। **वैचित्र्येति**। अत्र तयोरभावेप्यदोष इति सूचनार्थमित्यर्थः। प्रश्नशब्देऽधिकमाह—**प्रश्ने इति**। 'बाधकान्येव निपातनानी'तिभावः। एवं रीत्या सूत्रखण्डनन्तु न, विश्न इत्याद्यर्थं ज्ञापनार्थञ्चावश्यकत्वात्। एतेन—'बाधकान्यपि तानी'तिपाक्षिकादोषाय सूत्रमित्यपास्तम्। **टोरिति**। अस्य विशेषणत्वेन टवर्गान्तात्पदादित्यर्थादिति भावः। **स्पष्टार्थमिति**। पदविधित्वाभावसम्पादनद्वारा समर्थपरिभाषाऽनुपस्थाकत्वं तु नाऽनामित्यस्य वैयर्थ्यापत्तेर्युक्त्यन्तरस्य वक्ष्यमाणत्वाच्चेति भावः। **पदान्तेति**। 'त्विट्तिष्ठती'त्यादाविति-भावः। एवञ्च स न व्यावृर्त्य इति तात्पर्य्यम्। अत्र तेन षत्वं, न तु वास्तवः स इति सूचयन्नाह—

❀ ज्योत्स्ना ❀

र्थापत्त्याऽत्र दोष इति भावः। **वैचित्र्यार्थमिति**। जश्त्वचर्त्वयोः प्रवृत्तिमन्तरेणापि 'सच्चि'-दित्यादेः सिद्धिरितीह वैचित्र्यं विवक्षितम्। **निर्देशात्सम्प्रसारणाभाव इति**। न च तत एव ज्ञापकात् श्चुत्वाभावस्यापि सिद्धौ 'शा'दिति व्यर्थमिति वाच्यं, विश्न इत्यर्थत्वादित्याशयात्।

स्पष्टार्थमिति। अटा सह वर्तमानः साट्, साट्—'सिद्धः'इत्यादावेकादेशे कृते एकदेशविकृतन्यायेन यत्र वर्ग(र्ण) एव पदं तत्रैव स्यान्न तु षट् सन्त इत्यादावपि, न च तदन्तविधिः, 'प्रातिपदिकान्तस्य' 'संयोगान्तस्ये'त्यन्तग्रहणात्रिपाद्यां पदग्रहणे प्रायेण तदभावकल्पनात्। 'पयस्स्थितिः' 'पृथक्स्थाते'-त्यादौ स्कोर्लोपाभावस्य तत्फलत्वात्। 'ङमो ह्रस्वा'दित्यादौ क्वचित्तदन्तविधिकल्पनेऽपि प्रकृते तत्सद्भावे प्रमाणाभाव इति ह्यत्र स्पष्टोऽर्थः। इदमपि अन्तग्रहणमुक्तार्थे ज्ञापकमित्यपि वदन्ति।

❀ सदाशिवभट्टीयम् ❀

आदृतमिति चेत्स्पष्टार्थम्। **प्रश्ने चेति**। 'ब्राह्मणाभ्यां कृतं देही'तिवत्तन्त्रमत्र, 'प्रश्नशब्दे प्रश्ने चे'तीत्यर्थः। **स्पष्टार्थमिति**। 'पदान्ताद्दे'त्यत्र वक्ष्यमाणरीत्या तु न सार्थक्यं, त्रैपादिकत्वेन समर्थपरिभाषाया अप्रवृत्तेः। पदत्वेन हेतुत्वेप्युद्देश्यताविरहाच्च। **टोःकिमिति**। परान् अस्यतीति पराष्टीकत इत्यादौ तु न दोषः।

❀ विषमपदविवृतिः ❀

मिति केचित्। **वैचित्र्यार्थ इति**। जश्त्वचर्त्वयोः प्रवृत्तिमन्तरेण सच्चिदित्यादिसिद्धिरिह वैचित्र्यम्।

निर्देशादिति। न च तत एव श्चुत्वाभावसिद्धौ शादिति व्यर्थम्। विश्नाद्यर्थत्वात्। यत्तु नासिकास्थानाधिक्येन तोरित्यादिना पञ्चमीग्रहणमाशङ्क्य शादिति निषेधाल्लिङ्गात्तुल्यास्यसूत्रे नासिकास्थानभिन्नं तात्वादिस्थानं गृह्यत इति कश्चिदुक्तवान्, तन्न। 'जश्त्वं', 'दितपाशपे'त्यादौ च श्चुत्व-निषेधाय शादित्यस्यावश्यकत्वात्। 'दिक्सङ्ख्ये सञ्ज्ञाया'मिति नियमादाह—**स्पष्टार्थमिति**।

पदान्ते जश्त्वविधानात्प्रश्नः । 'ह्रस्वात्तादा'विति षत्वस्यासिद्धत्वाज्जश्त्वाभाव इत्युत्तरम् । **षण्णवतिरिति** । षडधिका नवतिरिति विग्रहः । षण्णगर्य इति पृथक्पदे ।

यरोनु । पदान्तस्येति किं ? वेद्मि, बध्नाति । **स्पर्शे चरितार्थ इति** । उपलक्षणमिदं—वलयोरपि प्रवृत्तेः । एतच्च जातिपक्षे स्पष्टमेव । व्यक्तिपक्षेऽपि तादृश-

---

❀ अभिनव-चन्द्रिका ❀

वच्छेदकरूपावच्छिन्नसम्पादकविधित्वम्पदविधित्वं, तादृशं नात्रेति । **असिद्धत्वादिति** । सर्पिस् तममिति स्थिते जश्त्वम्बाधित्वा अपवादत्वाद्रुत्वे, विसर्गे, सत्वे, षत्वे च विसर्गसत्वषत्वानामसिद्धत्वाज्जश्त्वन्नेति भावः । रुत्वात्प्राक् षत्वन्तु न, रुत्वदृष्ट्या तस्यासिद्धत्वात् । **पृथक्पदे इति** । 'दिक्सङ्ख्ये सञ्ज्ञाया'-मितिनियमादिति भावः । **वेद्मि बध्नातीति** । इदमुपलक्षणं—चरुन्तुजंगमतुरित्यादेः । नच 'रदा-भ्या'मिति दकारस्य नत्वविधानं व्यर्थं सद्'पदान्तस्य यद्यनुनासिकस्तर्हि निष्ठाव्यवहितपूर्वत्वविशिष्ट-दस्यैवे'ति नियमान्नोक्तदोष इति वाच्यं, 'दस्य यदि भवति तर्हि निष्ठायामेवे'ति नियमस्य 'दस्य यदि भवति तर्ह्यपदान्तस्यैवे'ति विपरीतनियमस्य चाप्यापत्तेः, 'क्षुण्ण' इत्यादौ णत्वार्थं दस्थाने नकारादेशस्य चारितार्थ्याच्च । अन्यथा 'प्रत्यये भाषाया'मित्यनुनासिकस्यासिद्धत्वाण्णत्वं दुर्लभं स्यादिति दिक् । **वलयोरपीति** । इदमुपलक्षणं—यकारस्यापीति । अत एव 'मध्वाँश्चिनोषि'

❀ चिदस्थिमाला ❀

ह्रस्वादिति । समाहारद्वन्द्वे नपुंसकत्वापत्तेरितरेतरयोगे द्विवचनापत्तेराह—**षडधिकेति** । यत्तु 'सङ्ख्ये' तिस्वरासिद्ध्या चिन्त्यमिद'मिति **प्रकाशकृत्तन्न**, समासभेदेन स्वरभेदे इष्टापत्तेः । असञ्ज्ञात्वेन कर्मधार-यासम्भवात् षष्ठीसमासे क्लिष्टत्वादाह—**पृथगिति** । मूलादिरीत्या मूलीयन्यूनतां परिहरति—**वलयोरिति** । कमल्मुरारिः, वृक्षव् आनित्यादाविति शेषः । एतेन 'वृक्षव्नेते'ति दण्डयुक्तमपास्तं, लोपो व्योरित्यस्य प्रवृत्तेरिति **केचित्** । स्थानिवत्त्वेन तदप्रवृत्त्या तदपि युक्तमेवेत्यन्ये । **वेद्मीति** । वच्मीति पाठान्तरम् । हय-वरट्सूत्रस्थकौस्तुभानुरोधेनाह—**एतच्चेति** । व्यक्तिपक्षे तु प्रतिलक्ष्यं लक्षणभेदेन रेफविषयकलक्षणस्या-

❀ ज्योत्स्ना ❀

पृथक्पदे इति । न तु कर्मधारयः । 'दिक्सङ्ख्ये सञ्ज्ञाया'मिति नियमादिति भावः । **वलयोरपि**

❀ सदाशिवभट्टीयम् ❀

ष्टुनेत्यनुवर्त्य टवर्गान्तात्पदादित्यर्थः । एवं षोप्यनुवृत्तिः स्यादिति चेत्तत्राह—**षकारस्यापि पदान्ते इति** । **षत्वस्येति** । इदमुपलक्षणं- विसर्गसत्वयोरपि । एवञ्च त्रयाणामसिद्धत्वे रुत्वस्य त्वपवादत्वात्सिद्ध त्वेनाझल्त्वाज्जश्त्वाभाव इत्युक्तेश्चाभाव इति भावः । एतेन षस्यासिद्धत्वेपि सकारबुद्ध्या तत्प्रवृत्तिर्दुर्वारे-त्यतोऽपवादत्वेन बाधात्तदभाव इति वक्तव्ये एवमुक्तिश्चिन्त्येत्यपास्तम् । **वेद्मीति** । इदं वार्तिकप्रत्युदाहरणं, सूत्रस्य तु 'शङ्खध्मः' 'ब्रघ्न' इत्यादि बोध्यम् ।

❀ विषमपदविवृतिः ❀

षडिति । **भिन्नं पदमिति** । **स्पष्टार्थमिति** । समर्थसूत्रस्थकैयटरीत्या पदान्तविधित्वमेव न पद-

---

❀ वरवर्णिनी ❀

स्पर्शे चरितार्थ इति । सर्वत्र—'स्ववृत्तित्व'—'स्वघटितदलघटकस्वेतरयावदवृत्तित्व'—'स्वघटितदल-भिन्नदलघटकावृत्तित्वै'तत्त्रितयधर्म आनन्तर्यनियामकः । यत्र व्यावृत्तिरपेक्षिता तद्दलघटकस्य स्वपदेन ग्रहणं भवति । यथा प्रथमान्तपाठेऽन्तरतम आदेशो भवतीत्यर्थेऽन्तरतम इत्यादेशस्य विशेषणम्, आदेशस्तु विशेष्य इति विशेषणेन विशेष्ये व्यावृत्तिस्वीकारादादेशे व्यावृत्तिर्युक्तेति आदेशदलघटकस्य स्वपदेन ग्रहणम् ।

व्यक्तौ चरितार्थस्य एतद्व्यक्तिविषयतयोपप्लव एव नेति बोद्धयम् । स्पष्टञ्चेदमिको यणची'त्यत्र कैयटे । परे तु–स्थानेऽन्तरतमसूत्रे सप्तम्यन्तपाठस्य भाष्यकृता दूषितत्वेनैतद्युक्तेरुक्तिसम्भव एव न । तस्मात् 'अनुस्वारस्ये'ति सूत्रात्सवर्णग्रहण-मपकृष्य परः सवर्णोऽनुनासिको भवतीत्यर्थान्न दोषः । तदुक्तं भाष्ये, 'रेफेऽनुनासिक-परसवर्णत्वयोः प्रतिषेधो वक्तव्यो, न वक्तव्यो, रेफोष्मणां सवर्णा न सन्तीत्याहुः ।

❀ अभिनव-चन्द्रिका ❀

'कमलँश्चिनोषि,' 'दध्याँश्चिनोषी'त्यादौ 'नच्छवी'ति रुत्वेऽनुनासिके चानेन विकल्पो भवति । वस्तुतस्तु 'म पदान्ताः परेऽणः सन्ती'ति लण्सूत्रस्थभाष्यप्रामाण्येन च रूपलक्षणमित्येव वक्तव्यम् । न च सप्त-म्यन्तपाठे एतद्ग्रन्थप्रवृत्त्या तत्पाठे-'स्ववृत्तित्व'-'स्वेतरयावत्स्थान्यवृत्तित्व,'-'स्वदलभिन्नदलीयवृत्तित्वै'-तत्रितयसम्बन्धेन–आदेशविशिष्टधर्मवत्त्वरूपान्तर्यस्य ग्राह्यतया इदमसङ्गतम्, तालुस्थानजन्यत्वादौ निरुक्तवैशिष्ट्याभावादिति वाच्यम्, 'एतन्मुरारि'रित्यादौ घोषप्रयत्नवत्त्वविशिष्टा-ल्पप्राणप्रयत्नवत्त्व-विशिष्ट-स्पृष्टप्रयत्नवत्त्वविशिष्ट-दन्तस्थानजन्यत्वे, 'दध्याँश्चिनोषी'त्यादौ घोषप्रयत्नवत्त्वविशिष्ट–अल्पप्राणप्रयत्नवत्त्वविशिष्ट–ईषत्स्पृष्टप्रयत्नवत्त्वविशिष्ट-तालुस्थानजन्यत्वादौ च स्थानिवैशिष्ट्यस्य सत्त्वेनादोषात् ।

सवर्णा न सन्तीति । 'अनुनासिका' इति शेषः । एतेन रेफस्य 'रेफ एव सवर्णोऽस्तीति इदमसङ्गत'मित्यपास्तम् । अत्रेदमवधेयं,—प्रथमान्तपाठे—'स्ववृत्तित्व' 'स्वेतरयावदादेशावृत्तित्व'

❀ चिदस्थिमाला ❀

चारितार्थ्यात्तत्रापि प्रवृत्तिर्दुर्वारैवेति तदाश्रयणं, तत्र तु मूलरीत्या न दोष इति भावः । इको यणिति सूत्रस्थकैयटरीत्या तत्पक्षेऽपि मूलं सुयोजमित्याह—**व्यक्ताविति** । **चेदमिति** । अव्यवहितोक्तमित्यर्थः । तत्र हि द्रव्येऽपि पदार्थे उत्सर्गापवादभावः सन्दिग्धत्वाश्रयोस्त्येवेति तेनोक्तम् । मूलादि दूषयति—**परे त्विति** । निर्विसर्गसूत्रानुकरणम् । सुद्ध्युपास्य इत्यादौ यणभावापत्त्येति भावः । **सवर्ण इति** । स्था-निन इति भावः । **ल्यर्थादिति** । तत्करणादित्यर्थः । अत एव ल्यबुपपत्तिः । **तस्मादिति** । 'अत्र न दोष' इत्यत्रान्वयः । तदर्थतोनुवदति—**रेफ इति** । विषयसप्तमी । एतेन भाष्ये रेफस्येति सम्बन्धसामान्ये षष्ठी सूचिता । यद्यपि भाष्येऽत्र द्वित्वे इत्यप्युक्तं, तथापि तस्यात्रानुपयोगात्त्यागः । यद्यपि परसवर्णेप्येवं, तथापि समाधेरैक्यादाह—**परेति** । 'रेफोष्मणा' मित्यस्य चानुनासिकोऽनुस्वारोन्तरतमश्च सवर्णो ना-स्तीत्यर्थः । अतएव ऊष्मग्रहणं सार्थकम्, अत एव च महिष्मानित्यादौ सूत्ररीत्या स्थानप्रयत्नोभयान्तर-

❀ ज्योत्स्ना ❀

प्रवृत्तेरिति । 'वृक्षवँ नेता' 'कमलँ नमन'मित्यादाविति बोध्यम्। **युक्तेरुक्तिसम्भव एव नेति** । अपरे तु 'पारेगङ्गं गेहाद्गेहात्स्थविरतमान्ब्राह्मणानामन्त्रये'त्युक्ते यो यो यत्र यत्र गृहे स्थानेन वयसा च स्थविरतमत्वेन निर्णीतस्तस्य तस्य ततस्ततो गेहादामन्त्रणं विधीयमानं–गृहान्तरे स्थानमात्रा-

❀ सदाशिवभट्टीयम् ❀

वलयोरपि प्रवृत्तेरिति । दध्याँस्तिष्ठतीत्यादौ यस्यानुनासिको यकारस्तु न, सन्निपातपरिभाषाविरोधात्, अतो न न्यूनता । यद्वा य्च वश्च वं, वं च लश्च वलौ, तयोरित्यर्थः। मूलरीत्या चेयं मूलन्यूनतापरिहृतिः, स्वमते हला-मणामनभिधानात् । **रेफेऽनुनेति**। यद्यपि भाष्ये द्वित्वमप्युक्तं, तथापि प्रकृतेऽनुपयोगात्त्यागः, परसवर्णस्तु

❀ विषमपदविवृतिः ❀

विधित्वमिति बोधनद्वारा समर्थपरिभाषानुपस्थित्यर्थमिति केचित् । **यरोनुना** । **सवर्णा न सन्तीति** । एतदुत्तर'माहु'रिति शेषः ।

चिन्मयमिति । स्वार्थिकः 'तत्प्रकृतवचने' इति मयट् । तत्र तदिति वाक्यभेदेन

❀ **अभिनव-चन्द्रिका** ❀

'स्वदलभिन्नदलीयवृत्तित्वै'तत्त्रितयसम्बन्धेन स्थानिविशिष्टधर्मवत्त्वरूपमान्तर्यं ग्राह्यम्। 'अनान्तर्य-

❀ **चिदस्थिमाला** ❀

तमऋकारसम्भवेऽपि नानुनासिकः सः, नाज्झलाविति निषेधेन सवर्णत्वाभावात्। अधिकमुद्योतादौ स्पष्टम्। एतेन—तथा सकलग्रन्थकारोक्तमपास्तम्। 'सन्तीत्याहु'रिति पाठः। **यत्तु**—'नित्यं वृद्धे'त्यत्र नित्य-मितियोगविभागात्ताद्रूप्ये मयट्—इति **रत्नाकरस्तन्न**, योगविभागस्य भाष्यानारूढत्वात्, सामानाधिकर-ण्यस्य तथापि दुर्लभत्वाच्च, तदेतद्ध्वनयन्नाह—**स्वार्थिक इति**। तत्प्रकरणपाठादिति केचित्। वस्तुतो

❀ **ज्योत्स्ना** ❀

द्वयोमात्राद्वा स्थविरत्वेन सम्भावितस्यापि तस्य तदितरस्य तत आमन्त्रणं निवर्तयति। जातिपक्षे

❀ **विषमपदविवृतिः** ❀

अन्ये तु तुल्यास्यप्रयत्नमिति सूत्रं यस्मात्प्रत्ययविधिरिति वत् 'यत्रानुनासिको विधीयते तत्र तुल्यास्यमित्युपतिष्ठते'इत्यर्थकतया परिभाषारूपमपि, अनुनासिकपदानुवृत्तेः। 'अनुस्वारस्य ययी'-त्यत्र च मण्डूकप्लुत्याऽनुनासिकपदमनुवर्त्तते, तेन चतुर्मुखः कुण्डं रथेनेत्यादौ न दोषः। न च मह्ष्मानित्यत्र षकारस्य ऋकारापत्तिः, तस्य ऋकारस्य षकारेण सूत्रमते स्थानप्रयत्नोभयसाम्या-दिति वाच्यं, भाष्यमते प्रयत्नभेदेनादोषात्। जश्त्ववारणाय अल्लोपस्य स्थानिवत्त्वप्रवृत्तेरावश्यक-तया तेनैवानुनासिकवारणसम्भवाच्च। न च रेफे सानुनासिकेषत्स्पृष्टस्य प्रसङ्ग इति वाच्यं, तस्य सानुनासिकत्वे मानाभावात्। यद्वा कैयटोक्तरीत्या स्थानेन्तरतमपरिभषोपस्थाना-द्दोषाभावः। न च रेफे स्थानप्रयत्नाभ्यामन्तरतमस्य ताभ्यामन्तरमस्य चाप्राप्त्याऽन्तरतमपरि-भाषाया अनुपस्थितिरिति वाच्यम्, व्यक्तिपक्षे प्रतिलक्ष्यमन्तरतमानन्तरतमयोः प्राप्तावेव तदु-पस्थितावपि जातिपक्षे कतिपयलक्ष्येषु तयोः प्राप्तिमात्रेणान्तरतमपरिभाषोपस्थानस्य दुर्वारत्वात्। षकारस्य स्थानेन रेफान्तर्येपि आभ्यन्तरप्रयत्नेन तदभावान्नान्तरतमत्वम्, स्थानप्रयत्नाभ्यामान्तर्यं हि अन्तरतमत्वम्। एवं कुण्डं रथेनेत्यत्रापि अनुस्वारस्य स्थाने न रेफः। रेफस्यानुस्वारेण स्थान-साम्याभावेनान्तर्याभावात्। तथा चायं निष्कर्षः—'यत्र स्थानप्रयत्नाद्यनेकधर्मकृतान्तर्यसम्भवस्तत्र शास्त्रे तमप्प्रत्ययघटितमन्तरतम इत्युपतिष्ठते', 'यत्र त्वेकैकधर्ममात्रकृतान्तर्यसम्भवस्तत्र तम-ब्रहितमन्तर इत्युपतिष्ठते'। यत्र तस्याप्यसम्भवस्तत्र नोपतिष्ठते एव परिभाषा। नचैवं नेतेत्या-दाविव गुणः स्यान्न चेतेत्यादाविति वाच्यम्, एकारस्य प्रमाणत ईकारान्तर्याभावेपि स्थानप्रयत्नाभ्या-मिकारान्तर्येणान्तरतमत्वाक्षत्याऽदोषात्। न हि सर्वैरान्तर्यं तमबर्थः, किं तु स्थानप्रयत्नाभ्यामपि। न-चैवं ह्रस्वेकार एव यण्स्यान्न दीर्घे, तस्य स्थानप्रमाणाभ्यामान्तर्येण तमप्प्रत्ययघटितपरिभाषोप-स्थितेः। एवं षट् सज्जन्तीत्यादौ षजयोर्जश्त्वानापत्तिः, स्थानप्रयत्नाभ्यामन्तरतमे स्पर्शे जश्त्वचा-रितार्थ्यात्। एवं पाद्धनती(पाद्धन्ती?)त्यादौ झयो ह इति पूर्वसवर्णानापत्तिः। स्थानप्रयत्नाभ्यामन्त-रतमे वाग्घरिरित्यादौ तस्य चारितार्थ्यादिति वाच्यम्, त्वादिभ्य इति निर्देशेन झय्प्रत्याहार-परित्यागेन हल्प्रत्याहाराश्रयणेन व्याख्यानेन च तत्र व्यक्तिपक्षाश्रयणेनादोषात्। तत्र पक्षे दीर्घादि-व्यक्तिष्वन्तरतमानन्तरतमयोरसम्भवेन सकलाङ्गसहिताया उक्तपरिभाषाया अनुपस्थितेः। सवर्ण-ग्रहणापकर्षस्तु न 'रेफोष्मणां सवर्णा न सन्ती'ति भाष्याभिप्रेतः, तत्र तत्र 'प्रत्ययादित्युभयोः दोष' इत्यादिभाष्येणापकर्षस्य भाष्यकारासम्मतत्वावगमात्। दूरेतरां बहुसूत्रैर्व्यवहितेऽपकर्षः, दंशनमित्यादौ उक्तरीत्या परसवर्णवारणसम्भवात्—ययीति न कर्त्तव्यमित्याशयेन रेफोष्मणामिति भाष्ये ऊष्मग्रहणमित्याहुः। प्राचुर्यस्य स्वसमानाधिकरणस्वसजातीयाल्पत्वसापेक्षत्वनियमादाह—**स्वार्थिक इति**। वस्तुतस्तु 'प्रचुरप्रकाशो रवि'रित्यादौ उक्तनियमव्यभिचारात्प्राचुर्येपि मयट् सूपपादः।

क्व चित्प्राचुर्यरूपप्रकृतवचनाभावेऽपि मयडर्थम् । अत एव 'चिन्मयं ब्रह्मे'ति सामानाधिकरण्यम् । 'चिन्मात्र'मिति क्वाचित्कोऽपपाठः, मात्रचः प्रत्ययस्यात्रोपपत्त्यभावात् । मयूरव्यंसकादिष्वेवार्थमात्रशब्देनात्र समासस्य वक्ष्यमाणत्वात् । **निपातनादिति** । 'यवादिगणे 'ककुद्मा'निति प्रकृतिप्रत्ययसमुदायः पठ्यते' इति मतेनेदम् ।

❀ अभिनव-चन्द्रिका ❀

मेवैतयोरान्तर्य'मित्यत्राभावप्रतियोगिभूतमान्तर्यञ्च—निरुक्तत्रितयसम्बन्धेन स्थानिविशिष्टत्वे सति आदेशविशिष्टो यो धर्मस्तद्वत्त्वमेव ग्राह्यम् । चेता स्तोतेत्यादौ तादृशो धर्मस्तालुस्थानजन्यत्वादिरेव प्रसिद्धः, कृष्णर्द्धिरित्यादौ च ऋकाराकारयोस्तदभाव इति समन्वयः । 'अचोञ्णिती'त्यादावत इत्यपकर्षणेन 'माठरपरिवेषण'न्यायेन अकारातिरिक्ताच एव ग्रहणम् , नातः कण्ठस्थानजन्यत्वरूपं—(निरुक्तरीत्या स्थान्यादेशविशिष्टं)—धर्ममादाय तदभावस्य ऋकाराकारोभयवृत्तित्वविरहेण—आन्तर्यस्यैव सत्त्वेन—'अनान्तर्यमेवैतयोरान्तर्य'मिति भाष्यासङ्गतिरापादयितुं

❀ चिदस्थिमाला ❀

'ऽथ स्वार्थिका' इत्यस्य प्रायिकत्वम् , अत एव 'प्रकारवचने'इत्यादिविषये (वाच्य)वाचकताप्रतीतिस्तस्मादधिकरणेऽर्थे एव मयडिति मूलोक्तं प्रथमव्याख्यानं तत्रत्यमयुक्तम् । एवं सति प्रकृते तमुपपादयति—**तत्रेति** । अर्थादेव पूर्ववत्तल्लाभादिति भावः । एकवाक्ये तदलाभादाह—**वाक्येति** । अतएव तत्र तदिति सफलम् । इदं समर्थयते—**अत एवेति** । अन्त्यन्तस्वार्थिकमयडङ्गीकारादेवेत्यर्थः । इतेन 'मयड्वैतयो'रिति विकारावयवयोः स इत्यपि निरस्तम् । **उपपत्त्यभावादिति** । तत्र परिच्छेदकमात्रस्य प्रमाणपदेन ग्रहणेऽपि चिच्छब्दस्यातथात्वात् । नन्वेवं कथं मयूरव्यंसकादिगणे तत्पाठोऽत आह—**मयूरेति** । तत्र=अस्मिन् चिन्मात्रशब्दे । ननु यवादिगणे दान्तप्रकृतिमात्रपाठेन तदानिपातनात्स दुर्वारः, न च तत्र सति अझयन्तत्वेन वत्वाप्राप्त्या पाठनैष्फल्यम् , अस्यासिद्धत्वात् । यत्तु तथा सति नान्तमेव तत्र पाठ्यं न तु दान्तमिति, तेन तन्निपातनं मतुप्प्रकृतिभूतस्य तस्य नान्तत्वनिपातनेऽपि अन्यत्र दान्तप्रयोगस्य निर्बाधत्वादिति **दण्डी**, तन्न । तत्रैव तान्निपातने मानाभावात् , 'ककुन्नयन'मित्यादौ दोषापत्तेश्चात आह—**यवादीति** । 'मतेनेद'मित्यनेन मतान्तरमपि सूचितं, तच्चान्यत्र स्फुटम् । प्राचामसाङ्-

❀ ज्योत्स्ना ❀

तथैव योग्यत्वादिति षाष्ठभाष्योक्तन्यायसजातीयन्यायादिहापि 'पदान्ते यरः स्थानेऽन्तरतमानुनासिकान्भावये'त्युक्ते यो यो णकारादिर्यत्र यत्र टकारादौ यरि स्थानप्रयत्नाभ्यामन्तरतमत्वेन निर्णीतस्तस्य तस्य तत्र तत्र भावनं विधीयमानं चतुर्मुखो महिष्मानित्यादौ यरन्तरे स्थानमात्रसाम्यादान्तर्यवतो णकारस्यान्यस्य च भावनं निवर्तयतीत्यस्ति युक्तेरुक्तिसम्भव इत्याहुः । केचित्तु सञ्ज्ञापूर्वकत्वादस्य विधेरनित्यत्वात्क्वचिदप्रवृत्तिमङ्गीकृत्योक्तातिव्याप्तिं, यवादिगणे दकारनिपातनाच्च-निराचक्रुः । अन्ये तु व्यवस्थितविभाषात्वाङ्गीकारादुक्तदोषद्वयं परिहरन्तश्चिन्मयमित्यावर्थं 'प्रत्यये भाषायां नित्य'मित्यस्यापि वचनस्याकर्तव्यतां ब्रुवते । **एवार्थमात्रशब्देनेति** । एवकारार्थकमात्रशब्देनेत्यर्थः । **इतिमतेनेदमिति** । वैकल्पिकेषु भावानुष्ठानं धर्माधिक्य-

❀ सदाशिवभट्टीयम् ❀

सन्धेरैक्यादुक्तः । **मतेनेदमिति** । प्रकृतिपाठेपि चर्त्वाकरणान्निपातनमिति तु न युक्तम् । त्यदादिष्वपि तथा-

❀ विषमपदविवृतिः ❀

समानाधिकरण्यमिति । प्राचुर्ये मयटि तु—'अन्नमयो यज्ञ' इत्यादावन्नयज्ञयोरिव चिद्ब्रह्मणोर्भेद एव

उदः स्था। 'तस्मादित्युत्तरस्ये'ति परिभाषालभ्यमर्थमाह—**उदः परयोरिति**। **अत्राघोषस्येति**। समनियतत्वेनान्यतमग्रहणे बाधकाभावेन श्वासविवारयोस्त्यागेऽपि न न्यूनतेति बोद्ध्यम्। **थस्यासिद्धत्वादिति**। त्रिपाद्यां परत्वादिति भावः। 'हलो यमा'मितिसूत्रोक्तभाष्यसम्मताष्टाध्यायीपाठे तु—थस्यासिद्धत्वाभावेन चर्त्वं भवत्येव। अत एव 'उत्पूर्वस्कन्दे रोगे उपसङ्ख्यानम्, उत्कन्दो रोग' इति भाष्यं सङ्गच्छते। मूलन्तु प्राचामनुरोधेनेति परे। न चेदं सूत्रं व्यर्थं—'झलो

❀ अभिनव-चन्द्रिका ❀

शक्यते। नचैकारौकारयोस्तालुस्थानजन्यत्व—कण्ठतालुस्थानजन्यत्वादावभावप्रतियोग्यान्तर्यघटकस्थानिवैशिष्ट्येपि निरुक्तादेशवैशिष्ट्याभावादान्तर्याभावस्य सत्त्वेन (अनान्तर्यरूपान्तर्यसत्त्वेन) तादृशधर्ममादाय 'ऋकारस्य वृद्धिररारावेवे'ति नियमानुपपत्तिरिति वाच्यम्, ऐकारनिष्ठविवृतावर्णसदृशघटितत्वविशिष्ट-कण्ठतालुजन्यत्वे, औकारनिष्ठविवृतावर्णसदृशघटितत्वविशिष्टकण्ठौष्ठस्थानजन्यत्वे च स्थानिवैशिष्ट्यस्य आदेशवैशिष्ट्यस्य च सत्त्वेनान्तर्याभावस्याभावादिति दिक्।

न न्यूनेति। 'अशोकवनिका'न्यायेन अन्यतमलेखनमिति भावः। **अनेन ज्ञापनादिति**।

❀ चिदस्थिमाला ❀

लायाह-**तस्मादिति**। कैश्चिदुद्भावितां न्यूनतां परिहरति—**समेति**। तथाच नातिप्रसङ्गादीति भावः। **तमेति**। त्रयाणां मध्ये कस्यचिद्ग्रहणे इत्यर्थः। एतेन-सस्य पूर्वसवर्णेन तस्तस्य लोपे एकत्वं, तदभावे द्वित्वं, द्वित्वे त्रितमिति प्राचोक्तमपास्तं, मूलाशुद्धेः। असङ्गतिं वक्तुमादावाशयमाह—**त्रिपाद्यामिति**। तामेवाह—**हल इति सूत्रोक्तेति**। सूत्रीयभाष्येत्यर्थः। अत्र मानान्तरमप्याह-**अत एवोत्पूर्वेति**। आद्यवार्तिकस्य छान्दसत्वेन तद्विषयेऽन्ये इहमुत्कन्देत्यत्र तत एव दोषाभावादाह—**रोगे इति**। अत्रत्यं पूर्वसवर्णविधायकं वार्तिकमिदम्, अस्यारम्भसामर्थ्याल्लोकेऽपि प्रवृत्तिः, अन्यथोत्पूर्वत्वे स्कन्देश्छन्दस्युपसङ्ख्यानमित्येव सिद्धे रोगेत्यस्य वैयर्थ्यं स्पष्टमेव। नह्यत्र लोपसम्भावनापि, तथाच चर्त्वेन द्वित्वं रूपम्, अन्यथा भाष्यविरोधः स्पष्ट एव। एतेन तथाभाष्योदाहरणात्थलोप इति **रत्नाकरोक्तं**, 'तत्प्रामाण्येन नेतियोगविभागेनानसिद्धत्वेन सिद्ध'मित्य**न्योक्तं** चापास्तम्। **सूत्रमिति**। उदःस्थेतीत्यर्थः। यत्तु-थद्वयश्रवणार्थमिति,

❀ ज्योत्स्ना ❀

फलकमित्येतदनभ्युपगम्येदम्। तदभ्युपगमे तु यवादिपाठप्रयोज्ये मतुबो वत्वाभावे तत्प्रयुक्तकार्यं ककुच्छब्दे दकारस्य यत्प्राप्तं त'द्वावसाने'—इत्येतत्प्रवृत्त्या तान्तनिर्देशे कर्तव्ये ककुदिति दकारान्तप्रकृतिमात्रनिर्देशेनापि वारयितुं शक्यत इति बोध्यम्। 'ककुद्वत्ककुदं श्रेष्ठ वृषाङ्गे राजलक्ष्मणी'ति विश्वः। **इति भाष्यमिति**। 'उदःस्थास्तम्भो'रितिसूत्रस्थमित्यर्थः। **सङ्गच्छत इति**। अन्यथा तत्रापि थस्यासिद्धत्वाच्चर्त्वाभावे थकारस्य श्रवणप्रसङ्ग इति भावः। **प्राचामनुरोधेने**-

❀ सदाशिवभट्टीयम् ❀

त्वापत्तौ तत्कुलमित्यादौ चर्त्वानापत्तेः। तस्मात् नाग्रहो भावानुष्ठाने गणपाठे चेति। **थस्यासिद्धत्वेति**। एवञ्च पूर्वमेव चर्त्वस्य सकारे प्रवृत्तत्वात् लक्ष्ये लक्षणस्येति पुनर्न चर्त्वमिति भावः। थस्यापवादत्वादित्यपि बोध्यम्। एतेन सकारबुद्ध्या स्यादिति न शङ्क्यम्। **व्यर्थमिति**। अयम्भावः—अस्यासिद्धत्वात्सलोपे

❀ विषमपदविवृतिः ❀

स्याज्ञाभेदरूपं सामानाधिकरण्यमित्यर्थः। **हलो यमां यमीति सूत्रे इति**। 'हलो यमां यमी'ति

झली'त्यनेन सस्य लोपे उत्थानस्य सिद्धेरिति वाच्यं, झलादौ प्रत्यये तेन लोप इत्यर्थस्यानेन ज्ञापनात् । 'उदस्था'दित्यत्र तु—निर्दिश्यमानपरिभाषया निर्दिश्यमानादेरेव स्थानित्वान्न दोषः । 'झय' इति पञ्चमीत्याह—**झयः परस्येति** । 'पूर्वस्ये'त्यनुवर्त्तते ।

❀ अभिनव-चन्द्रिका ❀

अनेन 'सङीति वक्तव्य'मितिवार्तिकन्नापूर्वमिति बोध्यते । वस्तुतस्तु सूत्रसत्त्वे एकतकारथकारद्वयघटितं रूपं, सूत्राभावे 'झलो झली'तिलोपे तकारथकारोभयघटितं रूपमिति फलभेदेन 'झलो झली'तिसूत्रस्य वैकल्पिकत्वेन पक्षे सकारघटितरूपाभावाय च सूत्रसार्थक्या'दुदः स्थे'ति सूत्रसिद्धं सङीति वार्तिकं न भवतीति बोध्यम् । **न दोष इति** । न च 'उदः स्थास्तम्भो'रित्यत्र विशिष्टरूपोपादानसत्त्वेनार्थवत्परिभाषोपस्थित्या आगमसमभिव्याहारे आगमविशिष्टस्यैवार्थवत्त्वादुदस्थादित्यादौ स्थाशब्दे स्थापदप्रयोज्यार्थवत्स्थाशब्दत्वावच्छिन्नशाब्दबोधीयविषताया अभावेन, 'अस्था'शब्दे 'षष्ठीप्रकृतिजन्यशाब्दबोधीयविषयताश्रयत्वे सति षष्ठीप्रकृतिजन्यशाब्दबोधीयविषयताश्रयसमभिव्याहृतवर्णाघटितत्व'-रूपनिर्दिश्यमानत्वस्य सत्त्वेन च कथं न पूर्वसवर्णापत्तिरिति वाच्यम् , 'यदागमपरिभाषा लक्षणा-

❀ चिदस्थिमाला ❀

तन्न, उक्तरीत्या चर्त्वेन तदभावात्. तदेतद्ध्वनयन्नाह—**झलादाविति** । स्पष्टं चेदं 'परेश्च घाङ्के'ति सूत्रे कैयटे। ननूदस्थादित्यत्र यदागमा इति न्यायेनाद्विशिष्टस्य स्थात्वात्पूर्वसवर्णापत्तिः, 'स्थानप्रयत्नाभ्या'मित्यादि तूक्तरीत्या दुर्वचमत आह—**उदस्थादिति** । **स्थानित्वादिति** । 'आदे'रित्यनेन तत्त्वबोधनादित्यर्थः । उद इत्यस्य विशिष्टविशेषणत्वेन तेन तत्र प्राप्तावपि तद्बोधितस्थानित्वस्य तेन निरासेन निर्दिश्यमानस्यैव तत्त्वबोधनेन तेनादेरित्यस्य समावेशेन तदादेरेव ग्रहणमिति भावः । स्पष्टञ्चेदं पादः पदित्यत्र भाष्येऽन्यत्र च । एतेनेदं सर्वं चिन्त्यं, 'थ'युतस्य 'त'त्रययुतस्य च रूपस्यासिद्धेः, 'धि चे'तिवन्निर्वाहेऽस्यानुपयोगात् । 'लोपाभावे थश्रवण'मिति सर्वग्रन्थविरोधात्, भाष्ये कण्ठतस्तथा पाठानुक्तेः, भाष्ये 'उदः', 'उदःपूर्वत्वे' इत्यादेर-'भ्यासे चर्चे'त्यनन्तरस्थस्यापि लेखकप्रमादेन पूर्वम्पाठात् । एकतपाठस्योपलभ्यमानवार्तिकेन द्वितस्यैव सिद्ध्या छान्दसवर्णलोपाङ्गीकारे गौरवेण वार्तिकं विनैव तत्स्वीकारौचित्याच्चे'ति **मन्दोक्त**मपास्तम्, उक्त-युक्तेः । वैपरीत्यनिरासायाह—**झय इति** । 'नाज्झला'वित्यादिनिर्देशात्, तथा च तस्मादिति प्रवृत्ति-रिति भावः । यदि तु 'सवर्ण'इत्येवोच्येत-तस्य तत्त्वस्य क्लृप्तत्वात्-तर्हि रेफोष्मणामिति भाष्याद्धस्य ह एव-स्यात्, तथाच वचनवैयर्थ्यापत्तिरत आह- **पूर्वेति** । तदपीत्यर्थः । सामर्थ्यात्तस्य तत्त्वकल्पनादितिभावः ।

❀ ज्योत्स्ना ❀

तीति । 'उदःस्था' 'शश्छोटी'त्यनन्तरम्—'अभ्यासे चर्चे' त्येतद्याचक्षाणानाम् भाष्यकृतां मते तु तद्विरोध इति भावः । **उत्थानस्य सिद्धेरितीति** । 'झलो झली'त्यत्र विकल्पाननुवृत्तेरेकतकारस्य

❀ सदाशिवभट्टीयम् ❀

दकारस्य तकारेणोत्थानं साध्यन्तचान्तरेण यत्नं सिध्यतीति । सजातीयानेकव्यञ्जनोच्चारणे विशेषो नेत्यव-लम्बने तु यथाश्रुतमेव युक्तम् । उदस्थादित्यत्र तु न सार्थक्यमित्याह—**उदस्थेति** । **तङ् स्य इति** ।

❀ विषमपदविवृतिः ❀

सूत्रेऽस्माभिरुक्ते इत्यर्थः । एतेन 'हलो यमां यमी'ति सूत्रस्य भाष्यकृताऽनुपादानादिदमसङ्गतमित्यपा-स्तम् । 'नादिन्याक्रोश' इत्युत्तरं क्रमेणो'दःस्थास्तम्भोः,' 'शश्छोटि,' 'अभ्यासे चर्च,' 'झरो झरी'ति सूत्राणाम्भाष्यकृतोपादानात्तथा पाठो भाष्यकृत्सम्मत इति भावः । **ज्ञापनादिति** । व्यञ्जनपरस्यै-कस्यानेकस्य वोच्चारणे विशेषाभावात्पूर्वत्रासिद्धमद्विर्वचन इति द्वित्वदृष्ट्या पूर्वसवर्णस्य थस्य

घोषवत इति । समनियतत्वेऽपि विनिगमनाविरहात्स्वरूपप्रतिपादनाय च त्रितयग्रहणम् ।

झय इति । 'पदान्ता'दित्यपि बोद्धव्यम् । तेन 'विरप्श' मित्यादौ छत्वं न । **जकारे कृते इति** । 'छत्व'मिति शेषः । पूर्वोक्तभाष्यसम्मताष्टाध्यायीपाठे चर्त्वस्य छत्वं प्रत्यसिद्धत्वात् ।

मोऽनु । 'पदस्ये'त्यधिकृतं 'म' इत्यनेन विशेष्यत इत्याह—**मान्तस्येति** । 'हलि सर्वेषामि'त्यतो 'हली'त्यनुवर्त्तते । हलि किं ? राममाश्रय ।

नश्चा । चेन मोऽनुकृष्यते । अपदान्तस्य किं ? राजन्पाहि । **यशांसीति** । यशश्शब्दाज्जसः शौ 'नपुंसकस्ये'ति नुमि 'सान्ते'ति दीर्घः । **आक्रंस्यते इति** । क्रमेर्लृट्, 'आङ उद्गमने' इति तङ्, स्यः ।

अनुस्वारस्य । 'परे'ति लुप्तषष्ठीकं पृथक्पदम् । अत एव 'उदःस्थे'त्यादौ सवर्णग्रहणानुवृत्तिः, 'यरोनुनासिक' इत्यत्र तदपकर्षश्च सिद्धः । 'ययी'ति स्पष्टार्थम् ।

❀ अभिनव-चन्द्रिका ❀

ग्राहिके'तिस्वीकारेण सूत्रे स्थापदं स्थाविशिष्टे लाक्षणिकं, वैशिष्टयञ्च 'स्वघटितत्व' 'स्वविशिष्टाघटितत्वो'भयसम्बन्धेन । सम्बन्धघटकवैशिष्टयञ्च—'स्वाघटकत्व' 'स्वनिष्ठोद्देश्यतानिरूपितावयवत्वावच्छिन्नविधेयताश्रयाघटकत्वो'भयसम्बन्धेन । तथा च प्रकृते निरुक्तोभयसम्बन्धावच्छिन्नप्रकारताख्यशाब्दबोधीयविषयतायाः स्थाशब्दे सत्त्वेन अस्थाशब्दे निरुक्तनिर्दिश्यमानत्वस्याभावेनादोषादिति दिक् । **विरहादिति** । व्याप्तिन्यायादिति भावः । **विरप्शमिति** । इदमुपलक्षणं—'चक्शा'वित्यादेरपि । अन्यथा 'विरप्स'मित्यादौ छान्दसत्वादेव दोषाभावेन 'पदान्ता'दित्यस्य वैयर्थ्यापत्तेः ।

❀ चिदस्थिमाला ❀

एतेन 'पूर्वसवर्णोऽध्याहार्य'इति**प्राचोक्तं**, 'पूर्वतस्तदनुवृत्ति'रितिरत्नाकरोक्तञ्चापास्तम् । पूर्वविरोधं परिहरति—**समेति** । तस्य पूर्वत्राविशिष्टत्वादशोकवतिकान्यायेन सुपरिहरत्वाच्चाह—**स्वरूपेति** । पूर्वत्र तदविवक्षेति भावः । अनतिप्रसङ्गाय न्यूनतां निराचष्टे–**पदान्तादिति** । **तेनेति** । लोकेऽपीति भावः । आदिना 'विरप्शी'त्यादिपरिग्रहः । विपूर्वाद्रपेरौणादिकौ श-शिनौ । एतेन 'पदान्ता'दिति मूले न पाठ इति-सूचितम् । यथाश्रुतमूलासङ्गतिं निराचष्टे—**छत्वमिति** । ततश्चर्त्वम् । एतेन सप्तम्यन्तस्य मूले पूर्वत्रान्वयः सूचितः, व्युत्क्रमेणोक्तिस्तु वैचित्र्यार्था । एतेन 'पूर्वं छत्वोल्लेखेऽपि चुत्वतोऽसिद्धचर्त्वदृष्ट्या तस्यासिद्धत्वात्तदुत्तरं छत्वमिति प्रक्रिया बोध्ये'त्यपास्तम् । **शब्दे इति** । 'प्रकृतिभूते सती'ति शेषः । धातोः परस्मैपदित्वादाह—**आङ इति** । अत एव 'स्नुक्रमो'रिति नेट् । मनोरमादिसर्वग्रन्थासङ्गतिं ध्वनयन्नाह–**परेति** । अत्र प्रागुक्तम्भाष्यमेव मानमिति ध्वनयन्नाह—**यर इति** । सिद्धिश्चेत्यर्थः । आदिना कंसादिपरिग्रहः ।

❀ सदाशिवभट्टीयम् ❀

स्यश्च 'विकरणान्नियमो बलीया'नितिनये । 'विहितविशेषणं लावस्थायाञ्च स्यतासी' इति नये त्वादौ स्यः । यथा-

❀ विषमपदविवृतिः ❀

सिद्धत्वात्परत्वात्पूर्वसवर्णप्रवृत्त्या सकृद्गतिन्यायेन पश्चाद्द्वित्वाप्राप्तौ द्वितकारस्य रूपस्य लोपपूर्वसवर्णयोरविशेषाद्वेति भावः । **अनुस्वारस्य ययि** । ननु शकारसवर्ण ईकारः प्रसिद्ध इत्याशङ्क्याह–**प्रयत्नभेदेनेति** ।

'दंशन'मित्यादौ तु न दोषः, शकारसवर्णाप्रसिद्धेः; प्रयत्नभेदेनाज्झलोः सावर्ण्याभावात्। अचि अनुस्वाराभावात्।

मो राजि। 'ने'ति सिद्धे 'म' इत्युक्ति'र्हे मपरे' इत्येतद्विषये 'प्रशाम्ह्मलयती'-त्यादौ 'मो नो धातो'रिति नत्वबाधनार्था, निषेधस्त्वनन्तरत्वादनुस्वारस्यैव स्यात्। ध्वनितश्चेद'मेतदोऽन्', 'अमो म'शिति सूत्रयोर्भाष्ये।

हे मपरे। 'मपरे' इति बहुव्रीहिः, न तु तत्पुरुषोऽसम्भवात्। 'मोऽनुस्वार' इत्यतो 'म' इत्यनुवर्त्तते।

❀ अभिनव-चन्द्रिका ❀

अप्रसिद्धेरिति। 'यरोऽनुनासिक' इत्यतोऽनुनासिक इत्यस्यात्रानुवृत्त्या शकारसवर्णानुनासिकाप्रसिद्धेरिति भावः। **बहुव्रीहिरिति।** पञ्चम्यर्थे इति भावः।

❀ चिदस्थिमाला ❀

ननु सूत्रमते ईकारशकारयोः सावर्ण्यस्य सत्त्वेन स प्रसिद्ध एवात आह—**प्रयत्नेति**। यथोत्तरं मुनीनां प्रामाण्यात्। एतेन 'सूत्रमते तदावश्यकमेवे'ति दण्डयुक्तमपास्तम्। नन्वेवं शल्यदोषेऽप्यचि दोष एवात आह—**अचीति**। ननु 'न राजी'त्येव वाच्यं, अनुस्वारनिषेधेनैवेष्टसिद्धेरत आह—**तीति**। **यत्तु**–'समशब्दादाचक्षाणणिजन्तादाचारक्विबन्ताद्वा कर्तरि क्विपि सम्राडित्यत्र नत्वाभावोऽत्रैव फलमिति, तन्न, अभिव्यक्तेतिन्यायेनोपसर्गस्यैव समोऽत्र ग्रहणात्। तदेतद्धनयन्नाह—**हे मेति। नार्थेति**। तदर्थापीत्यर्थः। अत एवाह—**स्यैवेति**। ननु तत्रापि 'न ष'डित्यत्रेवात्र व्याख्यानान्न दोषोत आह—**ध्वनितमिति**। तत्र हि 'मो राजी'त्यनुस्वारादिबाधनार्थमित्युक्तम्, एवञ्चागत्या तत्र तथाङ्गीकारेप्यत्र तथा दुर्वचं, भाष्यविरोधापत्तेः। एतेन 'मस्य मविधानमनुस्वारनिवृत्त्यर्थ'मिति **दण्डिरत्नाकरा**द्युक्तं, 'न षडित्यत्रेव सिद्धेरिदं चिन्त्यमिति तथैव वाच्यम्, एवं शर्परे इत्यत्रापीति तत्र मनोरमोक्तमपि चिन्त्यमेवे'ति **मन्दोक्त**ञ्चापास्तम्। **भाष्ये इति**।—जातावेकवचनम्, **बहुव्रीहिरिति**। न तु पञ्चमीतत्पुरुषोऽसम्भवादिति भावः। **म इत्येति**। स्थानिसमर्पकमिति भावः।

❀ ज्योत्स्ना ❀

तस्य द्वित्वे द्वितकारकस्य च सिद्धौ त्रितकारकस्यासिद्धेश्चिन्त्यमेतत्। **शकारसवर्णाप्रसिद्धेरितीति**। न च दीर्घ ईकारः शकारस्य सवर्णः प्रसिद्ध इति वाच्यं, सूत्रकारमते तत्सद्भावेऽपि पञ्चधा प्रयत्नाङ्गीकर्तॄणां भाष्यकाराणां मते तदभावात्, तदाह—**प्रयत्नभेदेनाज्झलोः सावर्ण्याभावादिति**। ईषद्विवृत-विवृतत्वयोर्भेदेन तयोस्तदभावादित्यर्थः। विजातीयसवर्णाप्रसिद्धावपि सजातीयवर्णस्य रेफे सुप्रसिद्धत्वात्। न च सप्तम्यन्तपाठेनेह निस्तारः, तस्य दूषितत्वात्। अन्तरतमानन्तरतमयोः स्थानित्वप्रसङ्गेऽन्तरतमस्यैव स्थानित्वनियामकेन तेनानुस्वारमात्रस्थानिविषये नियन्तुमशक्यत्वात्। न च 'यरोऽनुनासिकेऽनुनासिको वे'त्यतोऽनुनासिकग्रहणानुवृत्त्या परसवर्णस्यानुनासिकस्यैव विधानाददोष, इति **नरहरे**रुक्तिर्युक्ता। तुल्ययुक्त्या 'दंशन'मित्यादौ शकारस्यापि व्यावृत्तौ पुनरपि 'ययी'त्यस्य वैयर्थ्यप्रसङ्गात्। अत्राहुः—सूत्रमतेऽनुनासिकदीर्घेकारशकारयोः सावर्ण्याङ्गीकाराद्दंशनमित्यादौ तद्व्यावृत्तये ययीत्यस्यावश्यवक्तव्यत्वात्। 'भाष्यमते पञ्चधा प्रयत्नाङ्गीकारात्तदभाव' इति चेदनुनासिकग्रहणानुवृत्तिरपि कुत्र तत्रोक्ता? क्व च व्याख्यातृभिस्त-

यथासङ्ख्य । सम्यक् ख्यानं—सङ्ख्या, क्रमवैशिष्ट्येन ज्ञानम् ।

❀ अभिनव-चन्द्रिका ❀

यथासङ्ख्यमिति । अनुपूर्वकदिशधातोः—पश्चाद्भवज्ञानमर्थः । एवमुत्पूर्वकदिशधातोः—सिद्धज्ञानमर्थः । एवम्—प्रतिनिर्पूर्वकदिशधातोः-अपूर्वज्ञानमर्थः । अस्मात्कर्मणि घञि—अनुदेशोद्देश,—प्रतिनिर्देश,—शब्दानां क्रमेणाकाङ्क्षाभास्यसम्बन्ध–उद्देश्यताश्रय–विधेयताश्रया अर्थाः । तथा च सूत्रेऽनुदेशपदेनोपस्थितिपश्चाद्भवशाब्दबोधविषयीभूताकाङ्क्षाभास्यसम्बन्ध उच्यते। अनोः पश्चादर्थकत्वात्, दिशेर्ज्ञानार्थकत्वाच्च। 'समाना'मिति चावर्त्तते। एकत्रानुयोगित्वमपरत्र प्रतियोगित्वञ्च षष्ठ्यर्थः। 'समाना'मित्यस्य—तुल्यसङ्ख्यावतामित्यर्थः। 'यथासङ्ख्य'मित्यस्य–सङ्ख्याकर्मकातिक्रमणकर्तृत्वाभाववानित्यर्थः। तथा च–तुल्यसङ्ख्यावत्प्रतियोगिकः, तुल्यसङ्ख्यावदनुयोगिकश्चाकाङ्क्षाभास्यसम्बन्धः—सङ्ख्याकर्मकातिक्रमणकर्तृत्वाभाववान्भवतीति वाक्यार्थः ।

❀ चिदस्थिमाला ❀

एकत्वादिरूढस्य सङ्ख्याशब्दस्य ग्रहणे वाक्यार्थानुपपत्तेर्यौगिकत्वमाह—**सम्यगिति** । 'सङ्ख्यानं–

❀ ज्योत्स्ना ❀

दभिप्रायत्वेन वर्णिता ? कथं तर्हि कुण्डं रथेनेत्यत्र परसवर्णो वारणीयः ? इति चेत्–त्वङ्करोषीत्यादावनुस्वारस्येत्यस्यान्तरतमङकारादिविधानेन चरितार्थस्य कुण्डं रथेनेत्यनन्तरतमरेफविधाने सामर्थ्याभावात्, प्रागुक्तषाष्ठभाष्योक्तन्यायसजातीयन्यायात्। तदेतद्—'रेफोष्मणां सवर्णा न सन्ती'त्येतद्भाष्यमुपादाय–'अनुस्वारपरसवर्णविधाने हि–'स्थानेऽन्तरतम' परिभाषोपस्थानात्, रेफस्य णकारोऽन्तरतमो नाप्यनुस्वारस्य रेफ' इति व्याख्यानेन प्रदीपकृता सूचितमित्यलम् ।

❀ सदाशिवभट्टीयम् ❀

सङ्ख्यमनु । सङ्ख्याशब्दस्य ज्ञानार्थतेति—साङ्ख्यशब्दे स्वार्थे तद्धित इति भावः । 'तामनती'ति पाठः ।

❀ विषमपदविवृतिः ❀

यथासङ्ख्यमनु । 'सङ्ख्या—सङ्ख्यानं' गणनमुच्यते । अनुदेशशब्दस्य सम्बन्धिशब्दत्वा-

❀ वरवर्णिनी ❀

यथासङ्ख्यमनुदेशः । अस्यार्थः–समसङ्ख्यकानामनुदेशः—पश्चाद्भववाक्यार्थबोधकालिकः सम्बन्धः–यथासङ्ख्यम्–अर्थात्सङ्ख्याकर्मकातिक्रमणकर्तृत्वाभाववान्–भवतीति । सजातीयक्रमानुयोगिताकप्रतियोगिताको भवतीति यावत् । साजात्यञ्च प्रथमत्व-द्वितीयत्वादिना । यथा–'एचोऽयवायाव'इत्यनेन प्रथमत्ववत एकारस्य-स्थाने प्रथमत्ववान्–अयादेशो भवति,–द्वितीयत्ववत ओकारस्य–द्वितीयत्ववान्–अवेव । नन्वत्र ओकारो द्वितीय ऐकारस्तृतीय इत्यर्थे किं गमकम्—विपरीतमेव कुतो नेति चेन्न–द्वितीयादिपदघटकपूरणप्रत्ययमाहात्म्येनैतादृशार्थलाभात् । पूरणप्रत्ययार्थश्चापेक्षाबुद्धीयैकत्वनिष्ठप्रकारतानिरूपितमुख्यविषयताश्रयत्वम् । अपेक्षाबुद्धिस्त्वत्र यथा–'अयमेकः एतदेकत्वविशिष्टविशिष्टोऽयमेक इति इमौ द्वा'विति द्वित्वोत्पादिकाऽपेक्षाबुद्धिः । त्रित्वोत्पादिकाऽपेक्षाबुद्धिर्यथा–'इमौ द्वावेतद्द्वित्वविशिष्टविशिष्टोऽयमेक इति इमे त्रय इति' । 'अयमेकोऽयमेकोऽयमेकइतीमे त्रय' इति नैयायिकोक्ताऽपेक्षाबुद्धिस्तु न साध्वी, द्वितीयतृतीयेत्यादिपूरणप्रत्यार्थसाङ्कर्यापत्तेः । द्वित्वोत्पादकाऽपेक्षाबुद्धीयैकत्वनिष्ठप्रकारतानिरूपितविशेष्यताश्रयत्वमित्यादिप्रकारेण द्वितीयत्वादिकम्बोध्यम् । पूरणप्रत्ययार्थविशेष्यतायां मुख्यतानिवेशेन प्रथमे पूरणप्रत्ययार्थो न, अन्यथाऽयमेक इति कथनेनैकत्वावच्छिन्नप्रकारतानिरूपितेदन्त्वावच्छिन्नविशेष्यतायाः सत्त्वेन तत्रापि तत्त्वं स्यात् । तथाच समसङ्ख्याकानां पश्चाद्भववाक्यार्थबोधकालिकः सम्बन्धः प्रतियोगिविशिष्टानुयोगिको भवतीत्यर्थः– वै० 'स्ववृत्तिसङ्ख्योत्पादकापेक्षाबुद्धीयैकत्वनिष्ठप्रकारतानिरूपितविशेष्यतासजातीयविशेष्यताश्रयत्व'सम्बन्धेन । साजात्यञ्च 'मुख्यत्वाऽमुख्यत्वै'तदन्य-

❁ अभिनव-चन्द्रिका ❁

सङ्ख्यात्र क्रमः । क्रमश्चापेक्षाबुद्धिविशेषविषयता । आकाङ्क्षाभास्यसम्बन्धे सङ्ख्याकर्मकातिक्रमणकर्तृत्वञ्च—स्वप्रतियोगिवृत्त्यपेक्षाबुद्धिविशेषविषयताविजातीयापेक्षाबुद्धिविशेषविषयतावदनुयोगिकत्वम् । तदभावश्च—स्वप्रतियोगिवृत्त्यपेक्षाबुद्धिविशेषविषयतासजातीयापेक्षाबुद्धिविशेषविषयतावदनुयोगिकत्वम् ।

साजात्यञ्च—'स्वनिरूपकापेक्षाबुद्धिनिष्ठजनकतानिरूपितजन्यतावच्छेदकसङ्ख्यात्वव्याप्यजात्यवच्छिन्नजन्यतानिरूपितजनकतावच्छेदकत्व' 'स्ववृत्ति-स्वनिरूपकापेक्षाबुद्धीयैकत्वनिष्ठप्रकारतानिरूपितैकत्वविशिष्टावच्छिन्नधर्मिताल' 'स्वनिरूपकापेक्षाबुद्धीयैकत्वनिष्ठप्रकारतानिरूपितैकत्वानवच्छिन्नधर्मितात्वै'तदन्यतरवत्त्वै'तदुभयधर्मेण ।

यथा 'समूलाकृतजीवेषु हन्कृञ्ग्रह' इत्यादौ तुल्यसङ्ख्यावत्समूलाकृतजीवप्रतियोगिकः, तुल्यसङ्ख्यावद्धन्कृञ्ग्रहानुयोगिकश्च य आकाङ्क्षभास्याव्यवहितोत्तरत्वादिः सम्बन्धस्तत्र—स्वप्रतियोगिसमूलवृत्त्यपेक्षाबुद्धिविशेषविषयतासजातीयापेक्षाबुद्धिविशेषविषयतावद्धननुयोगिकत्वम् , एवं-स्वप्रतियोगि-कृत-वृत्त्यपेक्षाबुद्धिविशेषविषयतासजातीयापेक्षाबुद्धिविशेषविषयतावत्कृञनुयोगिकत्वम् , स्वप्रतियोगिजीववृत्त्यपेक्षाबुद्धिविषयतासजातीयापेक्षाबुद्धिविशेषविषयतावद्ग्रहानुयोगित्वमित्यतः—सङ्ख्याकर्मकातिक्रमणकर्तृत्वाभावः इति समन्वयः ।

❁ वरवर्णिनी ❁

तरसम्बन्धेन । यथाऽत्र प्रतियोगिनावेकारौकारौ, तद्वृत्तिसङ्ख्योत्पादिकापेक्षाबुद्धिः—'अयमेक एकारः, एतदेकत्वविशिष्टविशिष्टोऽयमेक ओकारः, इतीमौ द्वौ'इत्याकारिका, तदीयैकत्वनिष्ठप्रकारतानिरूपितविशेष्यता उभयोरेकारौकारयोः, तयोर्मध्ये प्रथमे प्रकारतासमानाधिकरणत्वादमुख्या, तत्सजातीया या अय्निष्ठा एकत्वनिष्ठप्रकारतानिरूपिताऽमुख्या विशेष्यता, तदाश्रयः अय्, स अनुयोगी यस्यैतादृशः पूर्वोक्तः 'सम्बन्धो भवति । एवम्—एकारौकारवृत्तिद्वित्वसङ्ख्योत्पादकापेक्षाबुद्धीयैकत्वनिष्ठप्रकारतानिरूपिता मुख्यविशेष्यता—ओकारे, तत्सजातीयमुख्यविशेष्यताश्रयः—अव्, तदनुयोगिकश्च सम्बन्धो भवतीति समन्वयो बोध्यः ।

अत्रेदं विचार्यते—एतादृशार्थस्वीकारेऽपि—एकारौकाररूप—प्रतियोगि—वृत्तिद्वित्वसङ्ख्योत्पादकापेक्षाबुद्धीयैकत्वनिष्ठप्रकारतानिरूपिता या ओकारनिष्ठा मुख्यविशेष्यता तत्सजातीया या त्रित्वसङ्ख्योत्पादकापेक्षाबुद्धीयैकत्वनिष्ठप्रकारतानिरूपिता आय्निष्ठामुख्यविशेष्यता, तदाश्रय आय् तदनुयोगिकोऽपि स्यादिति ओकारस्यादेशः स्यादिति । अत्रोच्यते—समसङ्ख्यानामनुदेशः प्रतियोगिविशिष्टविशेष्यताश्रयानुयोगिको भवति । वै० 'स्ववृत्तिसङ्ख्योत्पादकापेक्षाबुद्धीयैकत्वनिष्ठप्रकारतानिरूपितविशेष्यतासजातीयत्व'—'स्ववृत्तिसङ्ख्यात्वव्याप्यधर्मावच्छिन्नजन्यतानिरूपितजनकतावदपेक्षाबुद्धीयैकत्वनिष्ठप्रकारतानिरूपितत्वै'तदुभयसम्बन्धेन । साजात्यञ्च—'मुख्यत्वामुख्यत्वै'तदन्यतरसम्बन्धेन । अथ वैकत्वावाच्छिन्नत्वैकत्वानवच्छिन्नत्वैतदन्यतरसम्बन्धेन साजात्यम् । केचित्तु—द्वितीयसम्बन्धस्थानेऽपि—'स्ववृत्तिसङ्ख्योत्पादकपेक्षाबुद्धिनिष्ठजनकतानिरूपितजन्यतावच्छेदकसङ्ख्यात्वव्याप्यधर्मावच्छिन्नजन्यतानिरूपितजनकतावदपेक्षाबुद्धीयैकत्वनिष्ठप्रकारतानिरूपितत्वेति'सम्बन्धान्तरमाहुः । फलन्तुल्यमेवेति । एवञ्च ओकारस्य नायादेशः । तथाहि—अय्अव्आय्वृत्तियाे त्रित्वोत्पादिका—'इमौ अयवौ द्वौ, एतद्द्वित्वविशिष्टविशिष्टोऽयमेक आय्—इतीमे त्रयोऽयवाय'इत्याकारिकापेक्षाबुद्धिस्तन्निष्ठजनकतावच्छेदको धर्मो त्रित्वोत्पादिकापेक्षाबुद्धित्वम्, स धर्म एकारौकाररूपप्रतियोगिवृत्तिना सङ्ख्यात्वव्याप्यद्वित्वत्वधर्मेणावच्छिन्नाद्वित्वसङ्ख्यावृत्तिजन्यतानिरूपिताया 'अयमेक एतदेकत्वविशिष्टविशिष्टोऽयमेक इतीमौ द्वौ' इत्याकारिकापेक्षाबुद्धिवृत्तिजनकता, तदवच्छेदको नेति न दोष इत्यलमिति—पण्डितैकशेष—शेषावतार—गुरुवरश्रीत्रिपाठिचरणा आहुः ।

'यत्साङ्ख्यैः प्राप्यते स्थानमि'त्यत्र सङ्ख्याशब्दस्य ज्ञानार्थताया दृष्टत्वात्। तामनतिक्रम्य—यथासङ्ख्यम्। अनुदेशः—पश्चाद्भवत्वाक्यार्थबोधकालिकः सम्बन्धः। साम्यं—सङ्ख्यया, योग्यत्वाद्व्याख्यानाच्च। एवञ्च समसङ्ख्यानां सम्बन्धो—येन क्रमेण पदज्ञानं

❀ अभिनव-चन्द्रिका ❀

सङ्ख्याकर्मकातिक्रमणकर्तृत्वञ्च—'स्वप्रतियोगिसमूलवृत्त्यपेक्षाबुद्धिविशेषविषयताविजातीयापेक्षाबुद्धिविशेषविषयतावत्कृञ्ग्रहैतदन्यतरानुयोगिकत्वमिति। हन्निष्ठापेक्षाबुद्धिविशेषविषयतायाः-समूलनिष्ठापेक्षाबुद्धिविशेषविषयतासजातीयत्वात्, कृञग्रहनिष्ठापेक्षाबुद्धिविशेषविषयतयोश्च समूलनिष्ठापेक्षाबुद्धिविशेषविषयताविजातीयत्वात्।

तथाहि—कृञ्निष्ठापेक्षाबुद्धिविशेषविषयतायां—'समूल इत्येकः, एतद्विशिष्टोऽयमेकः' इत्याकारकापेक्षाबुद्धीयसमूलनिष्ठापेक्षाबुद्धिनिष्ठजनकतानिरूपितजन्यतावच्छेदिका या सङ्ख्यात्वव्याप्यद्वित्वजातिः, तदवच्छिन्नाया हन्कृञ्निष्ठद्वित्वनिष्ठा जन्यता, तादृशजन्यतानिरूपिता 'हनित्येकः, एतद्विशिष्टोऽयं कृञेकः' इत्याकारकापेक्षाबुद्धिनिष्ठा जनकता, तदवच्छेदकत्वस्य सत्त्वेऽपि—समूलवृत्त्यपेक्षाबुद्धिविशेषविषयतावृत्तिपूर्वोक्तापेक्षाबुद्धीयैकत्वनिष्ठप्रकारतानिरूपितैकत्वानवच्छिन्नधर्मितात्वस्याभावात्तद्विजातीयत्वम्। एवं ग्रहनिष्ठापेक्षाबुद्धिविशेषविषयतायां समूलवृत्त्यपेक्षाबुद्धिविशेषविषयतावृत्ति-स्वनिरूपकनिरुक्तापेक्षाबुद्धीयैकत्वनिष्ठप्रकारतानिरूपितैकत्वानवच्छिन्नत्वस्य सत्त्वेऽपि, समूलनिष्ठापेक्षाबुद्धिनिष्ठजनकतानिरूपितजन्यतावच्छेदकसङ्ख्यात्वव्याप्यद्वित्वजात्यवच्छिन्नहन्कृञ्वृत्ति—द्वित्वनिष्ठजन्यतानिरूपितजनकतावच्छेदकत्वस्याभावात्, हन्निष्ठापेक्षाबुद्धिविशेषविषयतायाञ्च समूलवृत्त्यपेक्षाबुद्धिविशेषाविषयतानिरूपकापेक्षाबुद्धिनिष्ठजनकतानिरूपितजन्यतावच्छेदकसङ्ख्यात्वव्याप्यजात्यवच्छिन्नहन्वृत्तिद्वित्वनिष्ठजन्यतानिरूपितजनकतावच्छेदकत्वस्य, समूलवृत्त्यपेक्षाबुद्धिविशेषविषयतावृत्ति-स्वनिरूपकापेक्षाबुद्धीयैकत्वनिष्ठप्रकारतानिरूपितैकत्वानवच्छिन्नधर्मितात्वस्य च सत्त्वान्निरुक्तलक्षणसमन्वयो बोध्यः। एवमन्यत्राप्यूह्यमिति दिक्।

क्रमवैशिष्ट्येन ज्ञानमिति। वस्तुतस्तु सङ्ख्यात्र क्रमः। क्रमश्चापेक्षाबुद्धिविशेषविषयतेति

❀ **चिदस्थिमाला** ❀

सङ्ख्या, गणना क्रम'इति कैयटाद्युक्तार्थत्यागे बीजमाह—**यदिति**।'तामनती'ति पाठः। 'तदनती'ति वा। 'तमती'ति पाठे—तत्प्रकारः क्रमो ग्राह्यः।'अनुदेशः—पश्चादुच्चार्यमाणसम्बन्ध'इति कैयटाद्युक्तार्थाङ्गीकारे-'परस्मैपदाना'मित्यादौ तादृशानां स एव नेति दोषोऽत आह—**पश्चादिति**। पदज्ञानाद्यनन्तरमित्यर्थः। एतेन—कर्मणि घञ् सूचितः। समशब्दो न समपर्यायः, मुडापत्तेस्तद्ध्वनयन्नाह—**साम्यमिति**। तस्यातिप्रसङ्गा-

❀ **ज्योत्स्ना** ❀

तमतिक्रम्येति। 'सङ्ख्यानं सङ्ख्या—गणना क्रम' इतिसङ्ख्यापदनिर्वचनस्य बृहच्छब्देन्दुशेखरे कृत-

❀ **सदाशिवभट्टीयम्** ❀

'तदनती'ति वा। 'त'मितिपाठे—तत्प्रकारः क्रमो ग्राह्यः। ननु प्रसिद्धसङ्ख्याग्रहणेऽपि न दोषः, तत्सङ्ख्यापूरकस्य तत्सङ्ख्यापूरकेणान्वये तदनतिक्रम इत्येव वक्तुं शक्यत्वादिति चेन्न। प्रथमत्वस्य प्रसिद्धसङ्ख्यारूपत्वाभावात। **सम्बन्धो येनेति**। 'सम्बन्ध' इत्यस्यानन्तरं 'यथाक्रममित्यर्थ' इति शेषः।

❀ **विषमपदविवृतिः** ❀

दुद्देश्य आक्षिप्तस्तेनायमर्थः। 'समानां—समसङ्ख्यानाम्मध्ये यथागणनमुद्देशिभिः सहानुदेशिनः सम्बध्यन्ते' इति **कैयटोक्तन्तु** न युक्तं, 'समूलाकृतजीवेषु,' 'हलो यमा'मित्यादौ उद्देश्यानामपि

पदादुपस्थितिर्वा तेनैव क्रमेण वाक्यार्थबोधविषयः सम्बन्धस्तेषामित्यर्थः। फलितमाह— **समसन्बन्धीति**। यद्यपि स्थानाख्यलौकिकप्रमाणादेव सिद्धं, तथापि 'परस्मैपदानाम्'

❀ अभिनव-चन्द्रिका ❀

लेखनीयम्। 'क्रमवैशिष्टयेन ज्ञान'पर्यन्तानुधावने फलाभावात्। बोधकालिकः=वृत्तिबोधविषय इत्यर्थः। **सङ्ख्ययेति**। अपेक्षाबुद्धिविशेषविषयतयेत्यर्थः। **समसङ्ख्यानामिति**। तुल्यापेक्षाबुद्धिविशेषविषयतावतामित्यर्थः। **पदादुपस्थितिरिति**। पदनिष्ठशक्तिग्रहप्रयोजकशास्त्रे येन

❀ चिदस्थिमाला ❀

दाह—**व्याख्येति**। उपस्थितत्वादित्यर्थः। शब्दार्थमाह—**एवञ्चेति**। पदार्थत्रयज्ञाने चेत्यर्थः। समानो योऽनुदेशः स यथासङ्ख्यमिति योजनया लब्धमाह—**समेति**। 'सम्बन्धो यथासङ्ख्य'मिति पाठः। तत्रार्थस्योक्तत्वाद'त्ये व्युत्क्रमेण व्याचष्टे—**येनेति**। उभयोरपि तत्र कारणत्वेनोल्लेखः। **तेनैवेति**। कारणतुल्यत्वात्कार्यस्येति भावः। एतेन 'सङ्ख्याशब्देन क्रमो लक्ष्यते'इति **रत्नाकरोक्तमपास्तम्**। **फलीति**। 'त'दित्यादिः। **स्थानाख्येति**। 'शत्रु'मित्यादिवत्तथापाठेनैवेत्यर्थः। अत्रोपस्थित्या अर्थतः सत्त्वादाह—

❀ ज्योत्स्ना ❀

त्वाक्रमेणेहापि पुंल्लिङ्गो निर्दिष्टः, स्त्रीलिङ्गस्य नपुंसकस्य वा निर्देशस्त्विहोचितः। **येन क्रमेण पदज्ञानं पदादुपस्थितिर्वेति**। आद्योदाहरणं-'नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः'। अन्त्योदाहरणम्-''परस्मैपदानां णलतुसुस्थलथुसणल्वमाः'' हलो यमां यमि लोपः' इत्यादि। **इत्यर्थ इति**। उपाध्यायास्तु-सङ्ख्यानं सङ्ख्या, गणनमुच्यते, तदनतिक्रम्य यथासङ्ख्यमनुदेशः-पश्चादुच्चारितैः सम्बन्धः, अनुद्देशशब्दस्य सम्बन्धिशब्दत्वात्समानामित्यस्य समसङ्ख्यानामुद्देशिनामित्यर्थलाभः। तथाच समसङ्ख्यानामुद्देशिनामनुदेशिभिः सम्बन्धो-यथागणनं-प्रथमस्य प्रथमे-द्वितीयस्य द्वितीये इत्यादिरूपेणेति पार्यन्तिकोऽर्थ इत्याहुः। **स्थानाख्यलौकिकप्रमाणादेवेति**। तच्च **स्थाने**ऽन्तरतमसूत्रे भाष्ये-''यान्येतानि गोयुक्तकानि सङ्घुष्टकानि भवन्ति तान्यन्योन्यमपश्यन्ति शब्दङ्कुर्वन्ति, एवं तावच्चेतनावत्सु। अचेतनेष्वपि-लोष्टः क्षिप्तो बाहुवेगं गत्वा नैव तिर्यग्गच्छति नोर्द्ध्वमारोहति, पृथ्वीविकारः पृथ्वीमेव गच्छत्यान्तर्यत-''इत्यादिना सूत्रप्रत्याख्यानायानेकधा प्रदर्शितम्। अत एव 'शत्रुं मित्रं विपत्तिञ्च जये'त्यादौ क्रमेण क्रमिकाणामन्वयबोधः पुरुषप्रयत्नविशेषं विनापि सार्वजनीनः सङ्गच्छत इत्याहुः।

सिद्धमिति। 'इको यणि'त्यादौ 'परस्मैपदानाम्' 'एचोऽयवायाव' इत्यादाविति। 'हलो यमां

❀ विषमपदविवृतिः ❀

परस्परं यथासङ्ख्यस्येष्टत्वादित्यभिप्रेत्याह—**सम्यक्ख्यानमिति**। वस्तुतस्तु कैयटोक्तार्थ एव युक्तः। सर्वस्योद्देश्यस्य सर्वानुदेशः प्राप्नोतीति यथासङ्ख्यसूत्रस्थभाष्यस्वरसात्। अनुदेशपदस्याजहत्स्वार्थलक्षणया विधेय-तदन्वय्युभयपरत्वाचोक्तस्थलेषु दोषः। **सम्बधो नेति**। 'सम्बन्ध' इत्यपपाठः। **पदज्ञानं पदादुपस्थितिर्वेति**। आद्यस्योदाहरणं-'समूलाकृते'त्यादि। द्वितीयोदाहरणं-'परस्मैपदाना'मित्यादि। **स्थानाख्येति**। स्थानमत्र क्रमः। 'स्थानाच्चेतिसंयोगा'दिति सूत्रे आध्वरमीमांसकैस्तथैव व्याख्यातत्वात्। एतेन स्थानमधिष्ठानमित्यभिप्रेत्य यदुदयङ्करपाठकेनोक्तं''-तच्च स्थानेन्तरतमसूत्रे यान्येतानि सङ्घुष्टकानि भवन्ति तान्यन्योन्यं पश्यन्ति शब्दं कुर्वन्ति, एवन्तावत् चेतनावत्सु। अचेतनेष्वपि लोष्टःक्षिप्तोवायुवेगङ्गत्वा नैव तिर्यग्गच्छति न चोर्ध्वमारोहति, पृथिवीविकारः पृथ्वीमेव गच्छतीत्यादिना सूत्रप्रत्याख्यानायानेकधा प्रदर्शितम्-''इति,तत्पूर्वमीमांसाऽनध्ययनविजृम्भितमिति स्पष्टमेव। **लौकिकेति**। 'शत्रुं मित्रं विपत्तिञ्च जय रञ्जय भञ्जये'त्यादौ लोके क्रमेणान्वयदर्शनादिति भावः।

'एचोऽयवायाव' इत्यादौ शब्दतः सूत्रान्तरस्थक्रममादाय सम्बन्धबोधार्थम्, 'आद्यन्तौ टकिता'वित्यादौ समासनिर्देशे साहित्ये द्वन्द्वविधानादप्राप्तक्रमान्वयबोधनार्थञ्चेदम्। एवञ्च तत्र यथासङ्ख्येनान्वयबोधकवाक्यकल्पना एतत्प्रामाण्यात्, ततश्च बोध

❀ अभिनव-चन्द्रिका ❀

क्रमेण पदज्ञानमित्यर्थः। यथा 'परस्मैपदाना'मित्यादौ परस्मैपदनिष्ठशक्तिग्रहप्रयोजकं यत्तिप्सज्ञी'ति शास्त्रं, तत्र येन क्रमेण पदविषयकं श्रावणप्रत्यक्षं तेनैव क्रमेण णलादयो भवन्ति। एवं 'येन क्रमेण पदज्ञान'मित्यस्यापि-येन क्रमेण पदविषयकं श्रावणप्रत्यक्षमित्यर्थो बोध्यः। यथाश्रुतन्तु न युक्तम्—परस्मैपदपदेन सङ्केतसम्बन्धेन परस्मैपदवतामुपस्थित्या क्रमेणोपस्थितेरभावात्। **स्थानाख्यलौकिकप्रमाणेति**। यथा प्रतिपदि सुवर्णन्दीयतां, द्वितीयायां रजतन्दीयतां, तृतीयायां वस्त्रन्दीयतां,

❀ चिदस्थिमाला ❀

शब्दत इति। इदमेवात्र निमित्तम्, अन्यथा 'स्यतासी'इत्यादौ दोषापत्तेः। नन्वस्तु एवं तथापि तदनुरोधेनार्थसाम्येऽपि प्रवृत्तिरस्तीति नेदं फलमत आह—**आद्यन्ताविति**। साहित्ये=विशेष्यभूते। **अप्राप्तेति**। द्वन्द्वस्तु प्राथमिकबोधमादाय साधुः। यद्यपि समासत उपस्थितिरेकैव, तथाप्येतत्सूत्रारम्भसामर्थ्येनोपसर्जनावयवकृतं क्रमं गृहीत्वा यथासङ्ख्यसूत्रप्रवृत्तिरत्र शास्त्रे इति पृथग्वाक्यकल्पनया बोधान्तरं कल्प्यते। एवञ्चेदं सूत्रं द्वन्द्वसमासनिर्दिष्टसम्बन्धिनोस्तथान्वयेऽपि द्वन्द्वस्य साधुत्वं बोधयति स्वशास्त्रे, तेन लोके 'आद्यन्तौ वर्णानां विप्रशूद्रा'वित्यादेर्न साधुत्वं, तदाह—**एवञ्चेति**। अस्योक्तफलकत्वे चेत्यर्थः। तत्र=आद्यन्तावित्यादौ। **वाक्येति**। वाक्यान्तरेत्यर्थः। **ततश्चेति**। तस्माच्च तादृशो

❀ ज्योत्स्ना ❀

यमि लोप' इत्यादेरुपलक्षणमिदम्। अनयोस्तु 'स्थानेऽन्तरतम' इति सूत्रेणापि निर्वाह इति स्पष्टं भाष्ये। **अप्राप्तक्रमान्वयबोधनार्थमिति**। अत एव 'अजाविधनौ देवदत्तयज्ञदत्ता'वित्युक्ते

❀ सदाशिवभट्टीयम् ❀

शब्दत सूत्रान्तरेति। शब्दतः सूत्रान्तरस्थमर्थत अत्रोपस्थितमित्यर्थः। ननूक्तलौकिकप्रमाणस्यार्थसाम्येपि प्रवृत्तिरस्तु, अतः फलान्तरमाह—**आद्यन्ताविति**।

❀ विषमपदविवृतिः ❀

परस्मैपदानामित्यादि। 'परस्मैपदाना'मित्यत्र क्रमेण नोद्देश्यवाचकपदानामुपादानं नापि परस्मैपदपदादुद्देश्यानाङ्क्रमेणोपस्थितिः। किन्तु युगपदेव सर्वे सञ्ज्ञिनः प्रत्याय्यन्त इति न स्थानाख्यलौकिकप्रामाण्याद्व्यवस्थासम्भवः। एवन्द्वन्द्वे न क्रमेणान्वयः, तथान्वये द्वन्द्वस्यैवासाधुत्वात्,सहविवक्षायान्तस्य विधानात्। ननूक्तपरिभाषयापि कथमत्र व्यवस्था ? येन क्रमेण पदज्ञानम्पदादुपस्थितिर्वेत्युक्तपरिभाषार्थस्योक्तरीत्या परस्मैपदानामित्यत्रासम्भवात्, एव'मेचोऽयवायाव' इत्यत्रापि, एतेन 'पदादुपस्थिति'रित्यस्य 'परस्मैपदाना'मित्युदाहरणमित्यपास्तं, किञ्च परस्मैपदशब्देन तिबादीनामिव शतृक्वसोरुपस्थित्या न सङ्ख्यासाम्यम्, 'आद्यन्तौ टकिता'वित्यत्रापि ययोरर्थयोराद्यन्ताभ्यां क्रमेणान्वयो न तयोः क्रमेणोपस्थितिः, नापि तद्बोधकपदयोः क्रमेणोपादानं 'टित्किता'वित्यनुक्तेः। ययोः क्रमेणोपादानं टकारककारयोर्न तयोराद्यन्ताभ्यां क्रमेण सम्बन्ध इति चेत्सत्यं, कैयटोक्तार्थाश्रयणेनादोषात्। तथा हि लादेशानां परस्मैपदसञ्ज्ञाविधानेन तज्ज्ञानार्थं तिबादिसूत्रानुसन्धाने तत्र परस्मैपदानां तिबादीनाङ्गणनाक्रमेणोद्देश्यानुदेशिनोः सम्बन्धाङ्गीकारात्। शतृक्वसोः परस्मैपदत्वेपि असन्निहितत्वात्सन्निहितानां तिबादीनाञ्च नवत्वात्सङ्ख्यासाम्योपपत्तिः। 'आद्यन्ता'वित्यत्रापि टकारस्य प्रथमोपादानात्तद्घटितस्य टितः प्रथमं गणना, पश्चात्कित इति—गणनाक्रमेणैव सम्बन्धः। असहविवक्षायामपि द्वन्द्वस्य साधुत्वञ्च। नव्यमतेऽपि तिबादिसूत्रस्थक्रममादाय परस्मैपदानामित्यत्र टित्किद्घटकटकारककारयोः क्रमेणोपादानमादाया'द्यन्तौ टकिता'वित्यत्र च यथासङ्ख्यशास्त्रप्रवृत्तिः कथं चिदुपपादनीया। **यथासङ्ख्येनान्वय इति**। सङ्ख्यामनतिक्रम्य। करणल-

इति बोद्ध्यम्। अत्र स्वरितेनेत्यपकृष्यते, इति 'स्यत्यादि'त्यादौ नातिप्रसङ्गः। तत्र प्रतिपत्तिकालिकमेव सङ्ख्यासाम्यमेतच्छास्त्रप्रवृत्त्युपयोगीति 'ञमङणन'मिति सूत्रे भाष्ये स्पष्टम्।

❀ अभिनव-चन्द्रिका ❀

चैत्रेण प्रतिपदि गन्तव्यं, मैत्रेण द्वितीयायां, विष्णुमित्रेण तृतीयाया'मित्युक्तौ एतस्यै इदन्देयमित्यनुक्तावपि–चैत्राय सुवर्णमेव दीयते, मैत्राय रजतमेव, विष्णुमित्राय वस्त्रमेव यथा दीयते तद्वदिति भावः। **कल्पनेति** वस्तुतस्तु टित आद्यवयवे, कितोऽन्तान्तावयवेन्वयेऽप्येकरूपावच्छिन्नस्यैकरूपावच्छिन्नसंसर्गेणैकरूपावच्छिन्नेऽन्वयबोधेच्छारूपसहविवक्षायाः सत्त्वाद्द्वन्द्वस्य सूपपादत्वेन नास्ति वाक्यान्तरकल्पनोपयोग इति बोध्यम्। **नातिप्रसङ्ग इति**। स्वरितत्वाभावादिति भावः। अत्रेदन्तत्त्वम्–

❀ चिदस्थिमाला ❀

बोध इत्यर्थः। अनतिप्रसङ्गाय भाष्याद्यनुक्तमेवाह—**अत्रेति**। तथा च यत्र तत्त्वं तत्रैवैतदिति न तदभाववति तत्रातिप्रसङ्गः। अपकर्षसामर्थ्यादेव लौकिकस्याप्यप्रवृत्तिः। तेन काधिकारः? क यथासङ्ख्यमिति तु व्याख्यानतो निर्णेयम्। ननु सङ्ख्यासाम्यं लक्ष्यसंस्कारवेलायां शब्दतोऽर्थतश्च 'स्यतासी'इत्यादौ नेति कथं तत्राह—**तत्रेति**। विध्यादिष्विल्यर्थः। **भाष्ये इति**। तत्र हि ञकारेण प्रत्याहारमाश्रित्य मः प्रत्या-

❀ ज्योत्स्ना ❀

न ज्ञायते कस्याजा धनं? कस्यावय? इति भाष्ये उक्तम्। 'राजपुरोहितौ स्वाराज्यकामौ यजेयाता'मित्यत्र तु साहित्यावच्छिन्ने साहित्यावच्छिन्नान्वयबोधः प्राथमिकः, पार्ष्ठिकस्तु प्रकरणादिवाशाद्राजा स्वर्गकामो यजेत, पुरोहितश्च राज्यकामो यजेतेत्यन्वयबोध इत्यदोषः। प्रतिपत्तिकालिकं=प्राथमिकवाक्यार्थबोधकालिकम्। **प्रवृत्त्युपयोगीति**। तेन 'स्यतासी लृलुटो'रित्यादौ लृशब्देन लृङ्लृटोर्द्वयोः पश्चादुपस्थितावपि न दोषः। **ञमङणनमिति सूत्रभाष्ये इति**। तत्र हि मकारप्रत्या-

❀ विषमपदविवृतिः ❀

विवक्षया तृतीयेति केचित्। सङ्ख्यामनतिक्रम्यान्वयबोध इत्यर्थस्याविवक्षितत्वेन तृतीयार्थस्यानुपयोगेनान्वयासम्भवेन चायुक्तमेतदित्यन्ये। भाष्ये तु 'सङ्ख्यातानुदेश'इत्युक्तम्। तस्यार्थः--सङ्ख्यातं गणितन्तत्क्रमेणानुदेशो=विधिरित्यर्थः। **अपकृष्यत इति**। तथा च यत्र स्वरितेन युक्तं शब्दस्वरूपं तत्रैव यथासङ्ख्यशास्त्रम्प्रवर्तते इत्यर्थः। नन्वेमप्य'नुदात्तङित आत्मनेपद'मित्यादौ सङ्ख्यातानुदेशो दुर्वारः, आत्मनेपदशब्दे उत्तरत्रानुवृत्त्यर्थं स्वरितत्वस्यावश्यकत्वादिति चेन्न। ययोर्यथासङ्ख्यमन्वयस्तयोर्द्वयोरपि स्वरितत्वसत्त्वे एवैतच्छास्त्रप्रवृत्त्याऽनुदात्तशब्दे तदभावेनादोषात्।

स्यत्यादित्यादाविति। नन्वत्र ययोरन्वयः स्यत्ययोरकारस्य च तयोर्न सङ्ख्यासाम्यं, ययोश्च सङ्ख्यासाम्यं स्यत्ययोर्ङसि ङसोश्च, न तयोत्साक्षादन्वय इति न सङ्ख्यातानुदेशः प्राप्नोति। एवमेवा-'नुदात्तङितः', 'रादाभ्यान्निष्ठातः', 'श्नसोरल्लोपः', 'ङसिङसोश्च', 'विदिभिदिच्छिदेः कुरच्', 'अवेतृस्त्रो', 'रोपधेतोः', 'कतुयज्ञेभ्यश्चे'त्यादावपि न सङ्ख्यातानुदेशः। 'अनुदात्तङित' इत्यस्य 'लस्ये'त्यनेन 'रदाभ्या'मित्यस्य 'त'इत्यनेन,'सार्वधातुक' इत्यस्या'त' इत्यनेन,'ङसिङसो'रित्यस्या'ती'त्यनेन ताच्छीलादीनां कुरचा, 'कारणाधिकरणयो'रित्यस्य घञा, 'पथिदूतयो'रित्यस्य उञा, व्याख्यानभवयोष्ठञा साक्षादन्वयादिति चेन्न। परम्परासबन्धेप्यस्य प्रवृत्तेः। अन्यथा 'समूलाकृतजीवेषु' 'स्यतासी लृलुटो'-रित्यत्रापि एतदप्रवृत्त्यापत्तेः। तत्र हि 'लृलुटो'रित्यस्य 'धातो'रित्यनेन, समूलादीनां च णमुला साक्षादन्वय इत्याशयात्। इदञ्च व्यक्तिभेदेऽपि धर्मसाम्यमात्रेण प्रवर्त्तते। तेन 'स्यतासी लृलुटोः' 'नन्दिग्रहिपचादिभ्य' इत्यादौ सङ्ख्यातानुदेशः सिद्ध्यति। लृलुटोर्नन्द्यादीनां भेदेपि लृत्वनन्द्यादित्वरूपधर्मसाम्यात्। **भाष्ये स्पष्टमिति**। तत्र हीत्थं भाष्यम्—'किमर्थमिमावनुनासिकावुभावनुबध्येते,

एते यवला निरनुनासिका एव, विधीयमानत्वेन सवर्णाग्राहकत्वात् । जातिग्रहणप्राप्तस्येव गुणाभेदकत्वप्राप्तस्यापि 'अप्रत्यय' इत्यनेन निषेधाच्च । एवं 'मय उञ' इत्यत्रापि । अत एव मतोर्मस्य नानुनासिको वकारः, अन्यथा 'तद्वानासा'-मित्यादौ नित्यानुनासिकापत्त्या तन्निर्देशासङ्गत्यापत्तिरित्याहुः ।

चयो द्वितीया इति । 'नादिन्याक्रोशे' इत्यत्र भाष्ये इदम् । एतत्सामर्थ्या-

❀ अभिनव-चन्द्रिका ❀

इदं सूत्रन्धर्मसाम्ये एव प्रवर्त्तते, न तु व्यक्तिसाम्ये, व्यक्तीनामानन्त्येन तत्साम्यस्य दुरुपपादत्वात् । **इत्यत्रापीति** । अत एव 'किम् उँ उक्त'मित्यादौ अनुनासिकस्यापि स्थाने 'मय उञ' इति वकारो निरनुनासिक एवेति भावः । **तद्वानासामिति** । नच 'तसौ मत्वर्थे' इत्यत्र दकारप्रश्लेषाद्भत्वेन पदत्वबाधादनुनासिकाप्राप्त्या नेदं प्रमाणमिति वाच्यम्, 'प्रत्ययस्था'दिति सूत्रस्थासुब्वत

❀ चिदस्थिमाला ❀

ख्यातो, लक्ष्यासम्भवान्नातिप्रसङ्ग इत्युक्तञ्च । अन्यथागमिनां तावतां प्रयोगेष्वसत्त्वेनागमानाञ्च तावतां सत्त्वेन तदसङ्गतिः स्पष्टैव । सकलग्रन्थासङ्गतिं ध्वनयन् सिद्धान्तमाह—**एते इत्याद्यापत्तिरित्यन्तेन** । तत्र तावद्व्यक्तिपक्षे आह—**विधीयेति** । सिद्धान्तपक्षद्वये आह—**जातीति** । प्रतिपादितमिदमादौ । प्रसङ्गात्सिंहावलोकनन्यायेनाह—**एवमिति** । एवञ्च तत्रत्यमनोरमादिकं चिन्त्यमिति बोध्यम् । दार्ढ्याय प्रागुक्तमेवाह—**अत एवेति** । निषेधेन तद्ग्रहादेवेत्यर्थः । एतेन 'सर्वग्रन्थविरोधादिदं चिन्त्यम्, 'अप्रत्यय'इत्यस्य सूत्रमात्रविषयकत्वात् 'यण्वत''स्तद्वा'नित्यादिनिर्देशान्मतोर्मस्यानुनासिको ने'ति**मन्दोक्त**मपास्तम्, उक्तयुक्तेः । इदं=वार्तिकम् । नन्वेवमनेन द्वितीये चर्त्वे दुर्वारमत आह—**एतदिति** । ननु प्रातिशाख्यविरोधात्कथ-

❀ ज्योत्स्ना ❀

ख्याने 'ङमो ह्रस्वा'दित्यत्र 'ङ्ञो ह्रस्वादचि ङ्ञु'डिति न्यासे पदान्तयोर्झकारभकारयोरभावान् पञ्चागमास्त्रय आगामिन इति वैषम्यात्सङ्ख्यातानुदेशस्याप्रवृत्तिमुद्भाव्यैवमुक्तम् । **गुणाभेदकप्राप्तस्यापीति** । अत्र यद्वक्तव्यं तदुक्तम् । ननू'ष्मोदय'मिति प्रातिशाख्यविरोधा'त्सुगण्ठ्षष्ठ' इत्यादौ द्वितीयो

❀ विषमपदविवृतिः ❀

न ञकार एवानुबध्यते, कथं ङमो ह्रस्वादची'ति ? एतदप्यस्तु ञकारेण, नैवं शक्यं,झकारभकारयोरपि पदान्तयोर्झकारभकारौ आगमौ स्याताम् । न झकारभकारौ पदान्तौ स्तः, एवमपि पञ्चागमास्त्रय आगमिनो वैषम्यात्सङ्ख्यातानुदेशो न प्राप्नोति । सन्तु तावदेषामागमानामागमिनः सन्ति, झकारभकारौ पदान्तौ न स्त इति कृत्वा आगमावपि न भविष्यत इति । **नित्यानुनासिकापत्त्येति** । ननु तद्वानित्यत्र नानुनासिकः, कण्ठावच्छिन्नवायुसंयोगेनोत्पन्नेषु नासावच्छिन्नवायुसंयोगेन तद्रूपधर्मोत्पत्त्येत्यादिस्वग्रन्थपर्यालोचनया वकारस्य नासिकास्थानत्वाभावेन मुखसहितनासिकयोच्चार्यमाणवर्णत्वाभावात् अनुनासिकसञ्ज्ञाया अभावादनुनासिकादिप्रत्ययपरत्वाभावेन च कथमनुनासिकापत्तिः । 'आङोऽनुनासिको' यरोनुनासिक इत्यादौ तु लोकसिद्धानुनासिक्यगुणस्यैव विधानमिति न कश्चिद्दोष इति चेत्सत्यम् । वर्णमात्रस्य नासावच्छिन्नवायुसंयोगेनानुत्पत्तावप्यानुनासिक्यगुणविशिष्टस्य तथात्वेनानुनासिकसञ्ज्ञेत्याशयेनास्य कथं **चिद्योजनीयत्वात्। एतत्सामर्थ्यादिति** । इदमयुक्तम्—अप्सरा वत्सा इत्यादावेतस्य चारितार्थ्यात् । तत्र हि अप्पूर्वात्सर्तेरसिः वदे सः, ततश्चर्त्वे एव सस्य सिद्ध-

देतत्कृतद्वितीयस्य न चर्त्वम् । 'ऊष्मोदयं प्रथमं स्पर्शमेके द्वितीयमाहुरपदान्तभाज'-मिति प्रातिशाख्ये'ऽपदान्तभाज'मिति चर्त्वासिद्धत्वलब्धार्थानुवादः । पदान्ते जश्त्वप्रवृत्त्या चयोऽलाभात् । अत्र तु कृते न जश्त्वप्राप्तिरस्यासिद्धत्वात् । 'अफ्सरा' 'वथ्सा'इति भाष्योदाहृते छान्दसत्वाच्चर्त्वस्यासिद्धत्वं न । एवञ्च प्रातिशाख्ये'ऽपदान्तभाज'मित्युत्सर्गः । यद्वा तयोरव्युत्पन्नत्वं, न त्वप्पूर्वात्सर्त्तेरसिर्वदेः सो वेत्यन्यत्र विस्तरः ।

❀ अभिनव-चन्द्रिका ❀

इतिभाष्यप्रयोगस्य प्रमाणत्वात् । अन्यथा 'प्रत्यये भाषाया'मिति नित्यमनुनासिकन्दुर्वारं स्यात् ।

❀ चिदस्थिमाला ❀

मत्र द्वितीयोऽत आह—**ऊष्मोदयमिति** । यत्तु—'प्रातिशाख्य'मितिसमाख्याबलेन तस्य च्छन्दोमात्रविषयत्वं, लिट्स्वित्यादौ तु चर्त्वासिद्ध्या द्वितीयस्य प्राप्तिरेव न, अत एव भाष्येऽ'प्सरा'इति—अस्योदाहरणं दत्तं, तत्र हि अप्सु सरन्तीत्यर्थे अप्पूर्वात्सर्तेरसिर्विहित इति पस्य पदान्तत्वं स्पष्टमेवेति, तन्न,'सम्भवत्येके'तिन्यायेन तथा दुर्वचत्वात्, तस्यान्यथोपपत्तेश्च । तदेतद्ध्वनयन्नाह—**चर्त्वेति** । 'चयो द्वितीया'इति दृष्टयेति भावः । **पदान्ते इति** । 'प्राय'इति शेषः । **चय इति** । 'विना चर्त्वं'मित्यादिः । अत्र तु=द्वितीये तु। द्वितीयद्दोषमुपपादयति—**अप्सरा इति** । वदेः से, अपः पस्य पदान्तत्वेन जश्त्वे च—चर्त्वस्यावश्यकत्वादाह—**चर्त्वेति** । एतेनात्र **मान्याद्युक्तमपास्तम्** । सिद्धान्तमाह—**यद्वा तयोरिति** । पाणिन्यभिमताव्युत्पत्तिपक्षस्यैव भाष्याभिप्रेतत्वात् । व्युत्पत्तावपि पक्षान्तरमाह—**न त्विति** । किन्तु भाष्यप्रामाण्यान्नञ्पूर्वात् प्साधातोरसिररङ्, नलोपश्च, पतेः सः, आदेर्वं इति व्युत्पत्तिः । तत्राद्यं स्पष्टं निरुक्ते तद्भाष्ये च । उणादेर्भाष्यविरुद्धत्वस्य बहुश उपलम्भेऽप्यप्रामाणिकत्वादिति भावः । एवञ्च तस्य सार्वत्रिकत्वेऽपि तदेकवाक्यतायां न दोषलेशः, वस्तुतो नैकवाक्यता युक्तेति प्रपञ्चितं भावप्रकाशे, तथा च सर्वे ग्रन्था अयुक्ता एवेतिबोध्यम्, तदाह—**अन्यत्रेति** । उभयनिर्देशे पञ्चमीनिर्देशस्य बलवत्त्वेन 'ङ'इति पञ्चमी

❀ ज्योत्स्ना ❀

न प्राप्नोतीत्यत आह—**ऊष्मोदयमिति । सप्तमी षष्ठ्यर्थे इति** । एतेना'नवकाशेन सीतिसप्तमीनिर्देशेन 'ङ' इति सन्दिग्धपञ्चमीनिर्देशस्य बाधनाङ्गस्य धुट् प्राप्नोति, न चो'भयनिर्देशे पञ्चमीनिर्देशो बलीया'निति वाच्यम् ?, तत्किं वचनं परत्वहेतुकबाधमूलकम्?, उत अनवकाशस्यापि बाधकं स्वतन्त्रं? नाद्यः—पूर्वपरयोस्तुल्यबलत्वस्य तत्प्रवृत्तौ प्रयोजकत्वादन्यतरस्य निरवकाशत्वे तदसम्भवात् । नान्त्यः–'शि तु'गित्यादावपि तत्प्रवृत्त्यापत्ते'रित्यपास्तम् । 'सी'ति सप्तमीनिर्देशस्यापि लाघवार्थत्वेन सन्दिग्धपञ्चमीनिर्देशतुल्यबलत्वाच्च । अत्र तु पक्षे सकारे परे यो ङकारस्तस्मात्परस्य धुडिति सूत्रार्थो, ङात्परस्य सस्येति तु फलितार्थकथनं, ङ इति पञ्चमीनिर्देशेन पूर्वस्येति षष्ठ्यंशमात्रस्य बाधकल्पनादित्याहुः । नन्वेवमपि सीत्यस्य पदस्येत्येतद्विशेषणत्त्वात्तदादिविधौ सादेः पदस्येत्यर्थप्रसङ्गस्तथा च षट्स्वित्यत्र धुडप्रसङ्गः, सप्तमीनिर्देशेन पूर्वस्य कार्ये एव तदादिविधिप्रवृत्तिरिति तु न,'तस्मानुडची'त्यादौ दोषापत्तेः । विशेषणविशेष्ययोरुभयोः सप्तम्यन्तत्व एव तदादिविधि-

❀ विषमपदविवृतिः ❀

त्वाश्रयणेनैतस्य प्रवृत्तेः । तयोरव्युत्पन्नत्वेपि 'खरि च'त्येतदपवादत्वादेवास्मिन्कृते न तस्य प्रवृत्तिः । ऊष्मोदयम्=ऊष्मपरम् ।

ङः सि । 'सी'ति सप्तमी षष्ठ्यर्थे, व्याख्यानात् । तदाह–**सस्येति**। 'पदस्ये'त्यनुवर्त्तमानस्य वैयधिकरण्येनान्वयात्पदावयवस्य सस्येत्यर्थः । **षट्त्सन्त इति** । धुटि धस्य चर्त्वे लक्ष्यभेदात्पुनर्डस्य चर्त्वम् ।

नश्च । नकारान्तादिति । 'पदस्ये'त्यनुवृत्तं पञ्चम्या विपरिणम्यत इति भावः । वैयधिकरण्येनैवान्वय इति ङमुट्सूत्रस्थभाष्यस्वरसः । **नस्य पदान्तस्येति ।** अपदान्तनकारेऽनुस्वारप्रवृत्त्या फलितार्थप्रदर्शनमिदम् । 'नान्तस्य पदस्ये'त्युचितम् ।

चतुष्टयमिति । वक्ष्यमाणविकल्पैरिति भावः । तेन तुक्श्चुत्वे छत्वस्यासिद्धत्वाच्चयो द्वितीया इति पक्षे चस्य छत्वेन छकारछकार–छकारशकार–घटितरूपद्वयाधिक्ये अशानुस्वारविसर्गाणां द्वित्वविकल्पेनाधिक्येऽपि न क्षतिः ।

❀ अभिनव-चन्द्रिका ❀

षष्ठ्यर्थे इति । षष्ठ्यंशविकल–तस्मिन्निति परिभाषोपस्थित्या सकाराव्यहितपूर्वत्वविशिष्टो यो डकारस्तदव्यवहितोत्तरत्वविशिष्टस्य धुडित्यर्थेन सामञ्जस्याच्चिन्त्यमिदम् । **लक्ष्यभेदादिति** । स्वीयप्राथमिकप्रवृत्तावुद्देश्यतावच्छेदकावच्छिन्नत्वेनाश्रीयमाणो यावाञ्छब्दसमुदायस्तद्घटको यः तद्घटकमात्रोद्देश्यकविकारघटकातिरिक्तः, तद्घटकोद्देश्यकागमघटकातिरिक्तश्च,–तद्घटितत्वे सति स्वीयप्राथमिकप्रवृत्त्युत्तरकालिकप्राप्तिभिन्नप्राप्तिविषयाघटितत्वं यत्तल्लक्ष्यत्वं तस्याभावादिति भावः । **नकारान्तादितीति** । सकाराव्यवहितपूर्वत्वविशिष्टो यो नकारस्तदन्ताव्यवहितोत्तरत्वविशिष्टस्येत्यर्थः । **वैयधिकरण्येनैवेति**। वच पयांसि यशांसीत्यादावपि धुडापत्तिरिति वाच्यम् , धुटोऽसिद्धत्वादनुस्वारे नकाराभावेन

❀ चिदस्थिमाला ❀

स्वार्थ एवेति फलितमाह—**सीतीति** । **व्याख्येति** । पूर्वसूत्राप्रवृत्तेरित्यर्थः । एतेन प्रकल्पकत्वपक्षाशयेनात्र व्याख्यानं सर्वेषामपास्तं, तत्पक्षस्य भाष्ये दूषितत्वात् । यत्तु 'पदस्ये'ति विभक्तिविपरिणामेन 'ड' इत्यस्य विशेष्यं, 'सम्भवती'तिन्यायात्, डात्परस्य सान्तपदस्यासम्भवात् , भाष्योदाहरणसङ्गत्यापत्तेश्चेति, तन्न । ङमुट्सूत्रस्थभाष्यविरोधापत्तेः, तद्ध्वनयन्नाह—**पदेति** । साक्षादुद्देश्यविशेषणत्वस्य क्लृप्तत्वादाह—**सेति** । **लक्ष्येति** । खर्परझल्त्वावच्छिन्नमात्रं हि तस्य लक्ष्यं, नाधिकं मानाभावात् । एवञ्च लक्ष्यभेदः स्पष्ट एव ।

मूलं दूषयति—**वैयधीति** । 'ङमो ह्रस्वा'दित्यत्र सम्बन्धावश्यकत्वे मध्येऽपि तदौचित्यमिति भावः । सामानाधिकरण्येऽपि तस्य क्लृप्तविशेष्यत्वानुरोधेनाह—**नान्तस्येति** । 'अलोन्त्यस्ये'त्यस्याप्रवृत्त्या 'ससजुषो'रितिवत्फलितार्थकथनत्वासम्भवात् , वैयधिकरण्ये तु पदावयवस्येत्येव लभ्यते, नतु पदान्तस्येति मूलं चिन्त्यमिति भावः । अधिकसत्त्वान्नेयं परिसङ्ख्येत्याह—**वक्ष्येति** । अत एव चोत्तरार्द्धे तदुक्तिः । तेन=तथा मूलाशयेन । 'न क्षति'रित्यत्रान्वयः । तत्र तावत्तुक्पक्षे रूपद्वयवृद्धिमाह—**तुक इति** । तस्य जश्त्वं तु न, असिद्धत्वात्, अत एव श्चुत्वोत्तरमपि तन्न । एतेन तुकस्तस्य पदान्तत्वाच्चुत्वासिद्ध्या जश्त्वे ततश्चुत्वेन जे तस्य चर्त्वेऽपि तस्यासिद्धत्वाद्द्वितीयस्य प्राप्तिरेव नेति परास्तम् , उक्तयुक्तेः । 'शश्छोटी'तिछत्वविकल्पेनाह—**शकारेति** । उक्तव्याख्यावश्यकत्वायाह—**अशेति** । एतेन 'चतुष्ट्वं श्लोकस्य शेष-**कृष्णीयपदचन्द्रिकास्थत्वेन** तदनुरोधेनोक्तं, वस्तुत उक्तरीत्या रूपषट्कं बोध्य'मिति **रत्नाकरोक्तम्** , 'अत्र रूपद्वयवृद्धि-

❀ ज्योत्स्ना ❀

रिति परिभाषेन्दुशेखरोक्तमपि न युक्तम् । 'तीषसहे'त्यत्र दोषापादने तस्य परिभाषाप्रदीपार्चिषि विस्तरेण दूषितत्वादित्यत आह—**वैयधिकरण्येनान्वयादिति** । **भाष्यस्वरस इति** । 'ङमो-

ङमो। 'पदस्ये'त्यनुवृत्तं सामानाधिकरण्यानुरोधात्पञ्चम्या विपरिणम्यते इत्याह—**तदन्तं यत्पदं तस्मादिति**। तत्र 'ङम्'—स्वयं 'ह्रस्वा'दितिविशेषणसम्बन्धमनुभूय पदविशेषणत्वेन तदन्तपर इति भावः। 'ङम' इति पञ्चमीबलादचीति सप्तमी षष्ठ्यर्थे, तदाह—**अच इति**। सप्तमीनिर्देशस्तु लाघवार्थः, 'ङम उत्तरस्याच' इति 'तस्मि'न्निति-सूत्रस्थभाष्यात्। ङमन्तं यत्पदमिति किम्? 'अनिती'त्यादौ ङमुण्मा भूदिति।

भाष्ये तु विभक्तिव्यत्ययप्रकल्पने गौरवात्पदावयवङमः परस्येति वैयधिकरण्यमेवोक्तम्।

❀ अभिनव-चन्द्रिका ❀

धुटोऽप्राप्तेः। **ङमो ह्रस्वात्। सम्बन्धमनुभूयेति**। 'गम्भीरायान्नद्यां घोष' इत्यत्र नदीपदं गाम्भीर्यविशिष्टनदीतीरे लाक्षणिकं, गम्भीरायामिति तात्पर्यग्राहकमिति यथा तथा ङम्पदमेव ह्रस्वात्परत्वविशिष्टो यो ङम् तदन्ते लाक्षणिकं, ह्रस्वादिति तात्पर्यग्राहकमिति भावः। **षष्ठ्यर्थ इति**। वस्तुतस्तु अजव्यवहितपूर्वत्वविशिष्टो यो ङम् तदन्तं यत् पदं तदव्यवहितोत्तरस्य ङमुडित्यर्थेन

❀ चिदस्थिमाला ❀

बोध्ये'ति दण्डयुक्तश्चापास्तं, ञादिद्वित्वेनाधिक्यात्। **सामेति**। ङम इति पञ्चम्यन्तेनेति भावः। पञ्चम्या = तदन्तेन। 'गुणः कृतात्मसंस्कार' इति न्यायेनाह—**तत्रेति**। उक्तवाक्ये इत्यर्थः। अन्यथा सर्वेष्टसिद्धेरिति भावः। 'पदे'ति षष्ठीतत्पुरुषः। एतेन विभक्त्यर्थान्वयार्थं तदन्तस्य 'ङम्' पदेन वृत्त्योपस्थितेरावश्यकत्वेन पदार्थैकदेशत्वात् ङमि ह्रस्वान्वयो न स्यादित्यपास्तम्, उक्तयुक्तेः। उभयनिर्देशे इति न्यायेनाह—**ङम इति**। **लाघवेति**। वक्ष्यमाणफलार्थश्च इत्यपि बोध्यम्। पदविषयकप्रश्ने हेतुमाह—**ङम इति**। यद्वा उक्तव्याख्याने भाष्यसम्मतिमप्याह—**ङम इति**। अनितीति तिङन्तम्। मूलादिसकलग्रन्थासङ्गतिं प्रतिपादयन् सिद्धान्तमाह—**भाष्ये त्विति**। विभक्तिविपरिणामेत्यर्थः। तदुक्तातिप्रसङ्गं निराचष्टे—

❀ ज्योत्स्ना ❀

ह्रस्वा'दित्यत्र वैयधिकरण्येनान्वयस्यावश्यवक्तव्यत्वादिहापि तथैवोचितमिति तदाशयः(-स्वरसः)। **लाघवार्थ इति**। उत्तरत्र='मय उञ'इत्यत्रानुवृत्त्यर्थश्चेत्यपि बोध्यम्। एवञ्चानवकाशत्वात्सप्तमी-

❀ सदाशिवभट्टीयम् ❀

ङमो ह्रस्वात्। पञ्चम्या = तदन्तेन। तत्र=उक्तवाक्ये। एतेन विभक्त्यर्थान्वयाय तदन्ते ङम्पदशक्त्या पदार्थैकदेशत्वात् ङमि ह्रस्वान्वयो न स्यादित्यपास्तम्। **लाघवार्थ इति**। प्रकृतोत्तर-सूत्रयोरावश्यकविभक्तिद्वयस्य युगपदुच्चारयितुमशक्यत्वेनान्यतरत्र तद्व्यत्ययस्यावश्यकत्वे इहैव तत्कल्पनं लाघवोद्देशेनेति भावः। ननु सप्तमीनिर्देशे इहाऽचीत्यस्याच इत्यर्थकल्पनमेकम्, उत्तरत्र चाच इत्यर्थकस्याचीत्यर्थकत्वकल्पनमपरमिति ज्ञानगौरवेणार्द्धमात्रागौरवस्य निमातव्यत्वात्, प्रकृतानुगुणप्रत्ययोच्चारणे कार्ये सप्तम्युच्चारणसामर्थ्यात्, यथाश्रुतैव ङम इत्यस्यानिश्चितविभक्त्यन्तस्य षष्ठ्यन्ततां निर्णाययेदत आह—**ङम उत्तरेति**। अतो मात्रालाघवमेवाश्रितम्, टाङसीति सूत्रस्थभाष्येण मात्रालाघवस्यैवाभ्यर्हितत्वबोधनादिति च गूढो भावः। अन्ये तु पदविषयकप्रश्ने हेतुमाहे-

❀ विषमपदविवृतिः ❀

ङमो ह्रस्वादचि। **आवृत्त्येति**। इदमयुक्तम्—ङमंशे पदस्येत्यस्य वैय्यधिकरण्येनान्वयस्याऽनुपयोगात्। पदाधिकारस्य विशेष्यत्वादिति भाष्यन्तु अधिकारप्राप्तस्य त्यागायोगादुपरञ्जक-

'दण्डिने'त्यत्र ङमुडभावो—मण्डूकप्लुत्या 'उञि च पदे' इत्यतः 'पदे' इत्यनुवर्त्याजादेः पदस्य ङमुडित्यर्थेन बोद्धव्यः । 'पदस्ये'त्यस्यावृत्त्या सम्बन्धेऽपि विशेषणविशेष्ययोरुभयोः सप्तम्यन्तत्वे एव तदादिविधिप्रवृत्त्या तदलाभः स्यात् । एतदर्थमेवाचीति सप्तमीनिर्देशः । ङमन्तं यत्पदमित्यर्थेऽपि परमदण्डिनेत्यादावेतद्वारणाय 'पदे' इत्यनुवृत्तिराव-

❁ अभिनव-चन्द्रिका ❁

सामञ्जस्याच्चिन्त्यमेतत् । **वैयधिकरण्यमेवेति** । वस्तुतस्तु इदम्भाष्यमेकदेश्युक्तिः, 'अनिती'त्यादौ पदावयवङमव्यवहितोत्तरत्वविशिष्टाचः सत्त्वेन ङमुडापत्तेः । नच 'उञि च पद' इति सूत्रात्पद इत्यनुवर्त्त्य 'अजादिपदाव्यवहितपूर्वत्वविशिष्टः पदावयवो यो ङम् तदव्यवहितोत्तरत्वविशिष्टस्य ङमु'डित्यर्थेन न दोष इति वाच्यम् ,अश्वस्य पुत्रोऽश्वपुत्रः, न अश्वपुत्रोऽनश्वपुत्र इत्यादौ ङमुडापत्तेः, अश्व इत्यस्याजादिपदत्वान्नुटश्चानश्वपुत्र इति पदावयवत्वाच्च । नच ङम इत्यस्यावृत्तिं कृत्वा ङमन्तपदावयवो यो ङम्—अजादिपदाव्यवहितपूर्वत्वविशिष्टः—तदव्यवहितोत्तरस्य ङमुडित्यर्थेन न दोष इति वाच्यम् , एवमप्यनश्वपुत्रराजन्नित्यादौ ङमुटो दुर्वारत्वात् । ङमन्तमनश्वपुत्रराजन् इति यत्पदन्तदवयवत्वस्य नुटि सत्त्वादश्व इत्यस्याजादिपदत्वाच्च । तस्माद्धस्वात्परो यो ङम् , तदन्तं यत्पदमिति सामानाधिकरण्येनैवान्वय इति निष्कर्षः । अत एव वृषणश्च इत्यादौ णुट्न । नच भाष्योक्तायाः पदे इत्यस्यानुवृत्तेर्वैयर्थ्यमिति वाच्यम् , परमदण्डिनावित्यादौ कार्यित्वनिवेशेन उत्तरपदत्वे चेति निषेधाप्रवृत्त्या तदनुवृत्तेर्ङमुडभावायावश्यकत्वात् । **तदलाभः स्यादिति** । सामानाधिकरण्येनान्वयबोधं प्रति समानविभक्तिकत्वस्य तन्त्रत्वेन पदे ङम इत्यनेन तादृशबोधालाभादिति भावः ।

❁ चिदस्थिमाला ❁

दण्डीति । मध्येऽसम्बन्धायाह—**मण्डूकेति** । अर्थेन=तत्करणेन । नन्वावश्यकानुवृत्तिकपदस्येत्यस्यावृत्त्यैवोक्तार्थलाभे किमिति गुरुभूततथाकल्पनाऽत आह—**पदेति** । अचीत्यनेनापीति भावः । **तत्त्वे एवेति** । 'आर्धधातुकस्ये'डितिसूत्रे वलादेरित्यादिग्रहणसामर्थ्यात् । अत एव 'ङःसी'त्यादौ सादेः पदस्येति नार्थः । **एतदिति** । पदे इत्यनुवृत्त्यैवोक्तार्थलाभार्थमित्यर्थः । एवेनोक्तफलव्यवच्छेदस्तस्यागतिकगतित्वात् । तत्प्रवृत्तौ च स्वरूपसती सप्तमी निमित्तमिति नात्र दोषः । अत एव 'नेड्वशी'त्यादौ वशादेः कृत इत्यर्थलाभः । नन्वेवं गौरवस्याविशिष्टत्वान्मूलोक्तमेवास्त्वत आह—**ङमन्तमिति** ।

❁ ज्योत्स्ना ❁

निर्देशस्य बाधकत्वशङ्का प्रत्युक्ता । **एतदर्थमेवेति** । लाघवार्थत्वं तु न युक्तम् । उच्चारणकृतगौरवस्य ज्ञानगौरवेण निमातव्यत्वात् । 'मय उञ' इत्युत्तरत्र सूत्रे सप्तमीनिर्दिष्टानुवृत्तेरावश्यकत्वाच्चिन्त्यमेतत् ।

❁ सदाशिवभट्टीयम् ❁

व्यवतारयन्तोग्रिमग्रन्थान्वयमिच्छन्ति । **मण्डूकेति** । दशसूत्र्यामसम्बन्धादिति भावः । **आवृत्त्येति** । एतत्फलन्त्वश्वस्य पुच्छमश्वपुच्छं, न अश्वपुच्छमनश्वपुच्छमित्यत्र ङमुडभावः । अजादेरश्वस्य पदत्वेपि ङमन्तस्य पदत्वाभावाच्चिन्त्यम् । 'अनुवृत्तपदस्येत्यस्याचीत्यनेन विशेषणत्वेऽपी'ति प्रकृतसूत्रोक्तोद्योतीयस्यैव सम्यक्त्वात् । **एतदर्थमेवेति** । पूर्वोक्तरीत्या लाघवाभावेनात्र व्यत्ययकल्पनमेतदर्थमेव, स्वरूपसत्सप्तम्यास्तत्प्रवृत्तौ निमित्तत्वादिति भावः । नन्वेवं व्यत्ययप्रयुक्तं गौरवं तवाप्यविशिष्टं, मण्डूकानुवृत्तिश्चाधिकेति मूलोक्तमेवास्त्विति चेत्तत्राह—**ङमन्तेति** । एतदसाधारणफलन्तु—परमाट्तिरिति । अटतेः क्विप् , अट् , परमेण

❁ विषमपदविवृतिः ❁

तयाऽन्वयप्रदर्शनपरम् । वस्तुतस्तु पदस्येति विशेषणस्य प्रयोजनं वक्ष्यामः । **उभयोः सप्तम्यन्तत्वे एवेति** । इदमप्ययुक्तम् । 'तीषसहे'त्यादौ तदादिविध्यनापत्तेः । 'ङःसी'त्यादौ

इयक्येव । अन्तर्वर्तिविभक्त्या दण्डिन्नित्यस्य पदत्वात् । 'उत्तरपदत्वे चे'ति प्रत्यय-लक्षणनिषेधस्तु न, 'माषकुम्भवापेने'त्यादौ 'पदव्यवायेऽपीति' निषेधसिद्धये तस्य

❀ अभिनव-चन्द्रिका ❀

अत एवार्द्धधातुकस्ये'डिति सूत्रे आदिग्रहणञ्चरितार्थम् । नच यत्र विशेषणविशेष्ययो-रुभयोः सप्तम्यन्तत्वं तत्रैव 'यस्मिन्विधि'रितिपरिभाषाया प्रवृत्तिरित्यस्य नोपयोग इति वाच्यम्, इष्टापत्तेः । कार्यित्वमिति । नच 'पूर्वदण्डिप्रिय' इत्यादौ 'दण्डि'न्नित्यत्र उत्तरपदत्वे इति निषेधा-प्रवृत्तये उत्तरपदं मध्यमपदत्वानाक्रान्तमिति वक्ष्यते । तथा च माषकुम्भवापेनेत्यादौ 'कुम्भे'त्यस्य मध्यमत्वाक्रान्तत्वा'दुत्तरपदत्वे' इति निषेधाप्रवृत्त्या णत्वनिषेधस्य सूपपादत्वेन कार्यित्वनिवेशो विफल इति वाच्यं, यद्वृत्त्यारम्भकसुब्निमित्तिका पदसञ्ज्ञा चिकीर्षिता तद्वृत्तिविशिष्टत्वं मध्यमपदत्वमिति परिष्कारेणादोषात्। वै० 'स्वघटकत्व' 'स्वघटकार्थवदव्यवहितपूर्वत्व', 'स्वघटकार्थवदव्यवहितोत्तरत्वै'-तन्त्रितयसम्बन्धेन । तथाहि—'पूर्वदण्डिप्रिय' इत्यादौ 'पूर्व सु दण्डिन् सु प्रिय सु' एतद्वृत्त्यारम्भक-सुब्निमित्तिका पदसञ्ज्ञा 'दण्डि'न्नित्यस्य चिकीर्षिता, तद्वृत्तिघटकप्रियाव्यवहितपूर्वत्वस्य, तद्वृत्तिघटक-पूर्वाव्यवहितोत्तरत्वस्य च सत्त्वाद्दण्डिन्निति निरुक्तमध्यमत्वाक्रान्तमेवेति न प्रत्ययलक्षणनिषेधः ।

'माषकुम्भवापेने'त्यादौ तु वृत्तिद्वयम्, तत्र 'माष आम्, कुम्भ सु' इत्येतद्वृत्तिघटकार्थवदव्यवहित-पूर्वत्वस्याभावान्न कुम्भेत्यस्य पूर्ववृत्तिवैशिष्ट्यम् । 'माषकुम्भ अस् वाप' इत्याकारकवृत्तिवैशिष्टयस्य निरुक्तोभयसम्बन्धेन कुम्भपदे सत्त्वेऽपि न तद्वृत्त्यारम्भकसुब्निमित्तिका पदसञ्ज्ञा चिकीर्षितेति—'कुम्भे'त्यत्र प्रत्ययलक्षणत्वार्थमुत्तरपदत्वे इति निषेधाप्रवृत्तये 'कार्यित्व'निवेश आवश्यकः । नचैवमपि 'अतद्धित' इति वार्तिकप्रत्याख्यानाय 'पदे यो व्यवाय' इति सप्तमीसमास आश्रितो भाष्ये, तथा च 'माषकुम्भवापेन' 'क्षीरपवापेने'त्यादौ फलभेदवारणाय पदपदं पदत्वयोग्योपलक्षणमित्यवश्यं वक्त-व्यम् । अन्यथा 'गतिकारकोपपदाना'मिति सुबुत्पत्तेः प्रागेव समासेन—आद्योदाहरणे—पदे परतो यो व्यवायस्तस्याभावेन, अन्त्ये पदे परतः, पदेन व्यवायस्य चाभावेनारम्भप्रत्याख्यानयोः फलभेदो दुर्वारः स्यात् । तथाच 'माषकुम्भवापेने'त्यादौ 'कुम्भ' इत्यत्र पदत्वयोग्यत्वस्य सत्त्वाण्णत्वनिषेधसिद्ध्या

❀ चिदस्थिमाला ❀

'आवश्यिकेवे'ति पाठः । ननु विशिष्टस्य भत्वेन न पदत्वमत आह—**अन्तरिति** । ननु निषेधेन निर्वाहः सर्वैरुक्त एवाह—**उत्तरेति** । **तत्रैवेति** । प्रत्यासत्त्येत्यपि बोध्यम् । **तेनेति** । उक्तवार्तिकोक्तेनेत्यर्थः । एते-

❀ सदाशिवभट्टीयम् ❀

समासे परमाट् । ततोऽशब्देन षष्ठीसमासे—परमाडः । तत आचारक्विप्, ततः क्विच्, 'तितुत्रे' तिनेट् । अतो-लोपः, अत्रान्तर्वर्तिसुपा पदत्वात् 'नपदान्ता'दितिष्टुत्वनिषेधः । पदान्तत्वनिमित्तकत्वेपि न पदान्तादिति निषेधे उत्तरपदस्य कार्यित्वाभावेनेष्टसिद्धिः । **नेत्यादाविति** । आदिना अति बन्धने, क्विप्, अन्, अन्तः

❀ विषमपदविवृतिः ❀

पदाधिकारस्य विशेषणत्वेन लिट्स्त्वित्यादौ धुट्सिद्धावस्यार्थस्यार्थस्यानुपयोगाच्च । वलादे-रित्यादिग्रहणन्त्वचि इनु इति वद्वलि परत आर्धधातुकस्येत्यर्थप्रतीतिवारणाय । पदस्येत्यधिकृत-स्यानुवृत्त्यैव निर्वाहे भाष्यकारीयमण्डूकप्लुत्या 'ञ्जि च पदे' इत्यतः पदे इत्यस्यानुवृत्त्याश्रयण-न्तु ङम इत्यस्य षष्ठ्यन्तत्वाश्रयणेनाजादौ पदे ङमो ङमुडित्यर्थाभिप्रायकम् । ङम इत्यस्य पञ्चम्य-न्तत्वे हि अचीत्यस्य षष्ठ्यन्तत्वकल्पना स्यात् । अजादेः पदस्य ङमुडित्यर्थे तु प्रत्यङर्थ इत्यादौ समासे ङमुडापत्तिः । आद्यन्तौ टकितावित्येतदेकवाक्यतयाऽस्यापि पदादिविधि-त्वात् । अपदादिविधावित्यत्रोपपदविभक्तेरिति न्यायेन कर्मषष्ठीत्वस्यैवापत्तेः । कार्यित्व-

यत्रोत्तरपदस्य कार्यित्वं तत्रैव प्रवृत्तेः । 'तेन निषेधेन सिद्धमि'त्येतत्सूत्रस्थभाष्योक्ति-

अभिनव-चन्द्रिका

कार्यित्वनिवेशो विफल इति वाच्यं, अटतीत्यट्, परमश्चासावट् च परमाट्, तस्मादाचारक्विबन्तात् क्विपि 'तितुत्रे'तीडभावे परमाट्तिरित्यादौ ष्टुत्वनिषेधाय कार्यित्वनिवेशस्यावश्यकत्वात्।

नचैवमपि 'यद्वृत्त्यारम्भके'त्यादि नोच्यते, किन्तु सामान्यतः 'स्वघटकत्व,' 'स्वघटकार्थवदव्यवहितपूर्वत्व,' स्वघटकार्थवदव्यहितोत्तरत्वै' तत्रियसम्बन्धेन वृत्तिविशिष्टत्वं मध्यमत्वमित्युच्यते । तथाच परमाट्तिरित्यादौ वृत्तिघटक-ति-प्रत्ययाव्यवहितपूर्वत्वस्य, वृत्तिघटकपरमाव्यवहितोत्तरत्वस्य च सत्त्वान्मध्यमत्वमेवेति 'परमाड्ढि'रित्येव स्यान्न तु परमाट्तिरिति, उत्तरपदत्वे इति निषेधाप्रवृत्तेः, तथाच कार्यित्वनिवेशो विफल इति वाच्यं, 'परमलोम्निशयः', 'परमलोम्निचर' इत्यादावुत्तरपदत्वे इति निषेधप्रवृत्तये निरुक्तत्रितयसम्बन्धेन यद्वृत्त्यारम्भकसुब्निमित्तिका पदसञ्ज्ञा चिकीर्षिता तद्वृत्तिविशिष्टत्वं मध्यमपदत्वमित्यस्यावश्यवक्तव्यत्वात् । अन्यथा 'लोम'न्नित्यस्य मध्यमत्वाक्रान्तत्वेन निषेधाप्रवृत्त्या नलोपो दुर्वारः स्यात् । 'पञ्चगवधन'इत्यादौ 'पञ्चन् जस्, गो-जस्, धन-सु' एतद्वृत्त्यारम्भकसुब्निमित्तकपदसञ्ज्ञायाञ्चिकीर्षितायां तद्वृत्तिघटक–टजव्यवहितपूर्वत्वस्य सत्त्वेऽपि तस्यानर्थकत्वेन तद्धटकार्थवद्धनाव्यवहितपूर्वत्वस्य च गोशब्देऽभावात् गोपदं मध्यमत्वानाक्रान्तमेवेति न पूर्वरूपापत्तिः ।

नच 'परमदण्डिप्रिय' इत्यादौ दण्डिन्नित्यस्य निरुक्तमध्यमत्वानाक्रान्तत्वात्कथन्नलोप इति वाच्यं, परमदण्डिप्रकृतिकसुपः प्रत्ययलक्षणेन तत्सिद्धेः, परमदण्डिन्नित्यस्य मध्यमत्वानाक्रान्तत्वेऽपि उत्तरपदत्वस्याभावात् । नचैवमत्रर्यः भृगव इत्यादावुत्तरपदत्वाभावादुत्तरपदेतिनिषेधाप्रवृत्त्या प्रत्ययलक्षणेन पूर्वरूपापत्तिर्दुर्वारेति वाच्यं, वार्त्तिके उत्तरपदं वृत्तिचरमावयवपरमिति स्वीकारेणादोषादिति दिक् ।

❀ चिदस्थिमाला ❀

नैवञ्जातीयका अन्येऽपि ग्रन्थास्तथेति सूचितम् । किञ्चापदादिविधावितिपर्युदासेन पदान्तत्वनिमित्तकविधावेव

❀ सदाशिवभट्टीयम् ❀

अः, षष्ठीसमासे संयोगान्तलोपे अनः । तत आचारक्विप्लिट् आम्, अनाञ्चकारेति । अत्रहिङ्मन्तस्यपदत्वेप्यजादेः पदत्वाभावान्ङमुण्न युक्तः । **तत्रैवेति** । इदमुपलक्षणम् ।–अपदादिविधावितिपर्युदासेन पदान्तत्वनिमित्तके विधावेव तत्प्रवृत्तेरित्यस्य । तदसाधारणफलन्तु गणयतेर्विच् गण्, हिनस्तेः क्विप् हिन्–गण्णश्वः, हिन्नश्व इति समासे ङमुट्प्रवृतिः । अत एव तत्र नञ्घटितं वचनं नियमार्थमुक्त्वा नपदान्तविधावितिभाष्येउक्तम् । अत एव सावपि पदमित्यनेन न फलभेदः । अन्यथा वचनारम्भे गणश्वे न प्राप्नोति ङमुट्, प्रत्याख्याने तु स स्यादेव । अत एव 'तस्मान्नुड्ची'ति सूत्रे भाष्ये नुकि ङमुडापादितः । अन्यथा तदसङ्गतिः स्पष्टैव । यत्तु नलुमतेतिसूत्रे उद्योतेउक्तं–पदान्तस्यानिके विधावित्यर्थ इति, तच्चिन्त्यम् । परमबुधावित्याद्यसिद्ध्यापत्तेरिति केचित् । बुध् इति

❀ विषमपदविवृतिः ❀

मिति । पदत्वे इत्यस्य पदत्वप्रयुक्ते कार्ये इत्यर्थ इति भावः । इदमुपलक्षणम्—अपदादिविधाविति पर्युदासेन पदान्तविधावेवैतत्प्रवृत्तेः । ननु पूर्वदण्डिप्रिय इत्यादौ नलोपार्थमावश्यकेन मध्यमत्वानाक्रान्त इति विशेषणेनैव माषकुम्भवापेनेत्यत्र पदव्यपायेपीति निषेधःसिध्यतीति उत्तरपदस्य यत्र कार्यित्वमित्यर्थाश्रयणं व्यर्थमिति चेदत्राहुः,—'यणादिपर'मिति निर्देशेन मध्यमत्वानाका-

१ अत्रेरपत्यानीत्यर्थे 'इतश्चे'ति ढकोऽत्रिभृगिवति लुकि अत्रय इति रूपम् । एवं भृगव इत्यत्रापि बोध्यम् ।

स्त्वेकदेशिन इति दिक् । 'इको यणची'ति सौत्रो निर्देशः ।

❀ अभिनव-चन्द्रिका ❀

परे तु यद्वृत्त्यारम्भकसुब्निमित्तिका पदसञ्ज्ञा तद्वृत्तिविशिष्टत्वम्—वृत्तिचरमावयवत्वम् । वै० 'स्वघटकत्व', 'स्वघटकार्थवदव्यवहितपूर्वत्वाभाववत्वै'तदुभयसम्बन्धेन । अत्रयो भृगव इत्यादौ स्वघटकत्वं व्यपदेशिवद्भावेनेति तत्रापि लक्षणसमन्वयः । 'यद्वृत्त्यारम्भके'त्युक्त्या 'परमलोम्निचरः' 'परमलोम्निशय' इत्यादावर्थवन्ङीप्रत्ययाव्यहितपूर्वत्वस्य सत्त्वेऽपि 'परम सु लोमन् सु' इत्येतद्वृत्त्यारम्भकसुब्निमित्तकपदसञ्ज्ञायाः चिकीर्षितत्वेन ङौ तद्वृत्तिघटकत्वस्याभावेन न लोमन्नित्यस्य वृत्तिचरमावयवत्वरूपोत्तरपदत्वहानिः । द्वितीयसम्बन्धदानेन 'पूर्वदण्डिप्रिय' इत्यत्र दण्डिन्नित्यस्य नोत्तरपदत्वम् । 'अर्थव'दित्युक्त्या पञ्चगवधन इत्यादौ गो इत्यत्र नोत्तरपदत्वहानिः । पञ्चन् जस् गो जस् धन सु इत्येतद्वृत्त्यारम्भकसुब्निमित्तकपदसञ्ज्ञायाश्चिकीर्षितत्वेऽपि तद्वृत्तिघटके टचि अर्थवत्त्वाभावात् । तद्वृत्तिघटकार्थवद्धनाव्यवहितपूर्वत्वाभावस्य सत्त्वाच्च । अत एव 'बहुसेचा'-वित्यादौ बहुच्पूर्वकसेजित्यस्योत्तरपदत्वसिद्धिः । एवञ्च कार्यित्वनिवेशो विफल एव । 'माष-

❀ चिदस्थिमाला ❀

तत्प्रवृत्तिरिति 'न लुमताङ्गे'तिसूत्रे भाष्ये स्पष्टम् । एवञ्च तदेव शरणं तदाह—**दिगिति । सौत्र इति ।**

❀ ज्योत्स्ना ❀

एकदेशिन इतीति । सौत्रो निर्देश इति । यदा तु 'पदव्यवाये'पीति सूत्रे पदशब्देन पदत्वयोग्यः स्वातन्त्र्येण प्रयोगार्हो गृह्यते, यथोत्तरपदत्वे चेति निषेधप्रत्याख्यानाय 'सुप्तिङन्त'मिति

❀ सदाशिवभट्टीयम् ❀

समुदायस्यापि पदान्तत्वेन तस्य स्थाने मुध्विधानमिति न दोष इत्याशयकमित्यन्ये । **एकदेशिन इति ।** उक्तभाष्यविरोधात्, नलुमतेति सूत्रस्य न लोपादिविधौ प्लुत्यन्ते इति वार्तिकस्थभाष्यविरोधाच्चेति भावः । स्पष्टञ्चेदं प्रकृतसूत्रे नलुमतेति सूत्रे चोद्योते । अत्रेदञ्चिन्त्यतइति वार्तिकोक्तेः प्लुतेऽपरत्र वार्तिकाप्रवृत्तौ सुकरिणौ, सुसर्पिषावित्यादौ णत्वषत्वयोः प्रत्याख्याने न्यायप्राप्तयोः कथं सिद्धिरारम्भ इति । प्लुत्यन्तइतिवार्तिकदूषकभाष्यदूषणान्तरोपलक्षणमिति तु युक्तमुत्पश्यामः । **सौत्र इति ।** संहिताया अविवक्षयान्तु 'इको य'णित्यत्र हशिचे-

❀ विषमपदविवृतिः ❀

न्तेत्यस्य पूर्वपदाघटकत्वविशिष्टं यन्मध्यमत्वं तदनाक्रान्ते इत्यर्थः । तत्फलं तु प्रत्यङर्थकृतमित्यादौ न ङमुट् । एवञ्च माषकुम्भस्य वाप इति विग्रहे पूर्वपदाघटकत्वविशिष्टमध्यमत्वानाक्रान्तत्वस्य कुम्भपदे सत्त्वेन प्रत्ययलक्षणप्रतिषेधवारणायोत्तरपदस्य यत्र कार्यित्वमित्यर्थ आवश्यक इति । नचैवमुक्तवार्तिकप्रत्याख्यानेन फलभेद इति वाच्यम्, तत्पक्षेपि यणादिपरमितिनिर्देशेन प्रत्यङर्थकृतमित्यादौ ङमुडभावकल्पनात् । नचैवं कर्मधारयपूर्वपदके परमदण्डिप्रिय इत्यादिबहुव्रीहौ नलोपानापत्तिरिति वाच्यम्, परमदण्डीति समुदायगतपदत्वमादाय तत्सिद्धेः ।

न च पदव्यवायेऽपीत्यत्र पदपदं पदत्वयोग्यपरम्, 'न पदान्ते'त्यादौ तथैव स्वेन व्याख्यातत्वात्, तथा च कार्यित्वनिवेशो व्यर्थ इति वाच्यम्, पदत्वयोग्यत्वं यदि—प्रादिपदिकसञ्ज्ञकत्वन्तदा पिब भवेति यस्यां क्रियायां पिबभवा, सुन्दरा पिबभवा येषां सुन्दरपिबभवानामित्यादौ पिबेत्यादेः प्रातिपदिकत्वाभावेन पदव्यवायेपीति निषेधानापत्तेः । यदि च प्रातिपदिकत्वतिङन्तत्वैतदन्यतराश्रयत्वं—तदा गौरवम् । माषकुम्भवापेनेत्यत्र 'गतिकारकोपपदाना'मित्यस्यानित्यत्वेन सुबुत्पत्त्यनन्तरमेव समासाश्रयणेन पदपदस्य पदत्वयोग्यार्थकत्वाभावेपि न दोषः । स्पष्टीभविष्यति चैतत्सर्वं समासप्रकरणे शेखरे । **सौत्रो निर्देश इति ।** यत्तु 'तयोर्य्वावचि संहिताया'मिति संहिताधिकारस्य

रुप्रकरणे इति । अत एव 'समः सुटी'त्यादौ प्रश्लेषेण सविधानमिति

❀ अभिनव-चन्द्रिका ❀

कुम्भवापेने'त्यादौ यथा णत्वनिषेधस्स्यात्तथा पूर्वमेवोपपादितम् । अत एव प्रकृतसूत्रार्थप्रतिपादयिषया प्रवृत्तं प्रकृतसूत्रस्थं—परमदण्डिनावित्यादौ 'उत्तरपदत्वे'ति निषेधान्ङमुण्णेति—भाष्यं सङ्गच्छते। नच 'ङमि च पदे'इति सूत्रस्थभाष्यासङ्गतिरिति वाच्यं, तस्यैकदेश्युक्तित्वेनादोषात्, प्रकृतसूत्रभाष्यस्य एकदेश्युक्तित्वकल्पनापेक्षया तस्य तदुक्तित्वस्य न्याय्यत्वात् । नच परमाट्तिरित्यादौ

❀ चिदस्थिमाला ❀

तथाचान्यत्र भवत्येव । अत एव नित्यमित्युक्तम्, एतेनाणादीत्यत्राप्यण्णादीति पाठः सूचितः, असन्देहाय तत्र तथा पाठः । एतेन तन्निर्देशादयं क्वचिन्नेति, 'इकोचि य'णित्येव वक्तुं युक्तमिति चापास्तम्। अत एव= रुप्रकरणे ततः पूर्वस्य तस्येष्टत्वादेव । अन्यथा सादेशे तदभावापत्त्या तदसङ्गतिः स्पष्टैव । **उक्तमिति** । तेनैवेष्टसिद्धौ 'स'मिति वार्तिकं न कार्यमिति भावः । तदेवं न्यूनतां परिहरन्प्रतिपादयति—**रोः पूर्वेति** ।

❀ ज्योत्स्ना ❀

सूत्रात्—'यचिभ'मित्यत्र सुबन्तमित्यनुवर्त्य यजादावसर्वनामस्थाने परतो यस्माद्यजादिप्रत्ययविधिस्तदादिसमुदायस्य तदवयवसुबन्तस्य च भत्वविधानात्सुवाचेत्यादौ वागित्यादेः, सुवाचावित्यादौ तु 'स्वादि'ष्विति योगं विभज्य ततो'ऽसर्वनामस्थाने यची'ति पृथक् छित्त्वा यजादौ सर्वनामस्थाने पूर्वं पदं नेत्येवमुत्तरपदस्य पदत्वे वारिते । दधिसेचावित्यादौ षत्वनिषेधार्थं 'सात्पदाद्यो'रिति सूत्रे पदशब्देन पदादादिः—पदादिरिति—भाष्योक्तपञ्चमीसमासपक्षस्तूपलक्षणम्, पदादित्येव वक्तव्ये आदिग्रहणसामर्थ्यात् । अन्यथा 'बहुसेचा'वित्यत्र बहुच्पूर्वविषये षत्वाभावार्थे वचनान्तरकरणे गौरवापत्तेः । 'न पदान्त'सूत्रे पदेऽन्तः पदान्त इति सप्तमीसमासनिरूपणावसरे स्वयमप्युक्तार्थतयैव व्याख्यातत्वाच्च । यद्वा 'पूर्वदण्डिप्रिय' इत्यादौ नलोपाभाववारणार्थमुत्तरपदत्वे चेति वार्तिके मध्यमपदत्वानाक्रान्तोत्तरपदग्रहणस्यावश्यवक्तव्यत्वान्माषकुम्भवापेनेत्यादौ प्रत्ययलक्षणनिषेधाप्रवृत्तेः 'पदव्यवायेऽपी'तिनिषेधसिद्धिरित्युच्यते—तदोत्तरपदस्य कार्यित्वे एव वार्तिकप्रवृत्तिकल्पने मानाभावात्तन्मूलिका भाष्यग्रन्थे एकदेश्युक्तित्वकल्पनाप्यप्रामाणिकीत्याहुः ।

सौत्रो निर्देश इति । इदञ्चिन्त्यं—'तयोर्य्वावचि संहितायामि'ति संहिताधिकारस्थङमुटो वाक्ये संहि-

❀ सदाशिवभट्टीयम् ❀

त्युत्वमपि न स्यात् । पदभेदेन विवक्षाविवक्षे इति तु न युक्तम्, संहितया सूत्रकृदपाठीदिति सर्वसम्मतत्वात् । यदि सूत्रकृता ङमुट् कृतःस्यात्तदा पदकारेणानुपूर्वीसूत्रमध्ये न भग्ना स्यादित्याहुः । अत एवेको गुणेति सूत्रेउद्योतेउक्तम्—एकयोगत्वञ्च संहितापाठादेवेति । यद्वा यदा पदे व्यवाय इति सप्तमीसमासः, अतद्धित इत्यस्य प्रत्याख्यानायाश्रीयते, तदा वापेनेत्यादेर्मध्यमपदत्वानाक्रान्तस्य पदत्वमेष्टव्यन्तच्चान्यथा न सिद्ध्यतीत्यर्थं कार्यित्वेतिवक्तव्यम् । कृद्ग्रहणपरिभाषाया अनित्यत्वात्तल्लाभः । पदपदं पदत्वयोग्यपरमिति तु न युक्तम् । बहुलक्षणापत्तेः । इदञ्च न्यायसिद्धम् । पदादिविधेरुत्तरपदसम्बन्धित्वेन तद्भिन्नस्याप्युत्तरपदसम्बन्धिनो ग्रहणात् । वार्तिकार्थस्तु अपदादिविधाविति विषयसप्तमी । विषयता च कारके इतिवज्जनकतारूपा, एवञ्च पदादिविधिभिन्नजनकोत्तरपदत्वे प्रतिषेध इति । यदि तु स्वातन्त्र्यमवलम्ब्य 'ङमि च पदे' इत्यस्य प्रयोजनं संमृग्यते, तदा पदाधिकारस्य व्यधिकरणान्वयज्ञापनमेवान्तग्रहणस्यैवेति गृहाण । स्पष्टञ्चेदमुञि चपदे इति सूत्रे उद्योते । **अत्रानुना** । **अत्रेति** । सर्वनाम्ना प्रकरणपरामर्शे मानमाह—**अत एवेति** ।

❀ विषमपदविवृतिः ❀

प्रकान्तत्वेपि वाक्ये च संहिताया वैवक्षिकत्वेन ङमुटभावोपपत्तौ इदमसङ्गतमिति, तन्न । वाक्ये संहिताया वैवक्षिकत्वेपि संहिताधिकारस्थकार्याघटितनिर्देशस्य प्रायशोऽनुपलम्भेन संहितायां निर्देशप्रयोजनाभावेन च संहिताया अविवक्षाकल्पनायोगात् । नचैवमजादौ पदे ङमो

भाष्ये उक्तम्। 'रोः पूर्वस्ये'त्युपलक्षणं रुप्रकरणविधेयस्य। एवमुत्तरत्र रोः पूर्वस्मादित्यपि।

❀ अभिनव-चन्द्रिका ❀

कार्यित्वनिवेशाभावे ष्टुत्वनिषधो न स्यादिति वाच्यम्, अस्य लक्ष्यस्याप्रमितत्वेनेष्टापत्तेः कर्तुं शक्यत्वात्। लेढीति लिट्, परमश्चासौ लिट्च परमलिट्। तस्मादाचारक्विबन्ताद्वनिपि 'परमलिह्वा'इत्यादीनामिवास्यापि आरम्भप्रत्याख्यानयोः फलभेदवारणाय अनभिधानस्यैव न्याय्यत्वाच्च। अन्यथा उत्तरपदत्वे इत्यारम्भकल्पे परमलिह्वेति, प्रत्याख्याने च परमलिड्वेति फलभेदः स्यादिति दिगित्याहुः। **प्रकरणविधेयस्येति**। रुप्रकरणीयविधेयाव्यवहितपूर्वस्येत्यर्थः।

❀ चिदस्थिमाला ❀

इत्यत्र रोरितीत्यर्थः। प्रसङ्गादाह—**एवमिति**। इत्यपि=इत्यत्रापि। मनोरमादिसकलग्रन्थासङ्गतिं ध्वनयन्

❀ ज्योत्स्ना ❀

ताया अनित्यत्वादेवाप्रवृत्तेः-सौत्रत्वकल्पनाया निष्प्रमाणत्वात्। यद्वा सौत्रः=सूत्रसम्बन्धी निर्देशो= ङमचोर्नैरन्तर्येण, ज्ञापकः='इकोचि य'णिति कर्तव्ये 'इकोयणची'तिन्यास आगमशासनानित्यत्वस्य ज्ञापक इत्यर्थः। तत्फलन्तु-सागरं तर्तुकामस्य'-'अणादिसंज्ञार्थानि'। 'अप्लुतकार्यं यणादिकं करोति'। **उपलक्षणमिति**। आदिशब्दसामर्थ्यात् पदत्वयोग्यस्य स्वातन्त्र्येण प्रयोगार्हपदस्योपलक्षणमित्यर्थः।

❀ सदाशिवभट्टीयम् ❀

ऊक्तमिति। रुत्वपक्षे चानुनासिकाद्यापत्तिर्नोक्तेत्यपि बोध्यम्। रुत्वविधावित्यर्थे तु तदसङ्गतिः स्यादिति

❀ विषमपदविवृतिः ❀

ङमुडित्यर्थे भाष्यसम्मते 'प्रत्यङर्थ' इत्यत्र ङमुडापत्तिः। उत्तरपदस्य कार्यित्वाभावेन प्रत्ययलक्षणनिषेधादिति वाच्यम्, उणादयो बहुलमिति निर्देशेन ङमुटि उत्तरपदस्य कार्यित्वेऽपि प्रत्ययलक्षणनिषेधाश्रयणात्। अन्ये तू'णादयो बहुलं', 'यणादिपरं', 'सनाशंसभिक्ष उ'रित्यादिनिर्देशेन ङमुटोऽनित्यत्वं ज्ञाप्यते। तेनाणादिसञ्ज्ञार्थानि, अप्लुतकार्यं यणादिकं करोति, यङन्तप्रक्रियेत्यादिप्रयोगाणां सिद्धिः। 'न पदान्त', 'सोपदादौ', 'पदव्यवायेपी'त्यादौ पदपदं पदत्वयोग्यपरम्। यद्वा 'गतिरकोपपदाना'मित्यस्यानित्यत्वेन सुबन्तेनैव समासाङ्गीकारात् पदपदं यथाश्रुतार्थकमेव। उत्तरपदस्य कार्यित्वे एवेति निवेशस्तु प्रकृतसूत्रस्थभाष्यविरुद्ध इति माषकुम्भ इत्यादौ न दोष इत्याहुः।

ननु गणेशो वनेश इत्यादावसमासे ङमुट् दुर्वारः, परादिवद्भावेनैश इत्यस्याजादिपदत्वान्ङमः परत्वाच्च। न च पञ्चमीसमासाश्रयणेन वा स्थानिवद्भावः। 'पूर्वत्रासिद्धे न स्थानिव'दिति तन्निषेधात्। न च त्रिपाद्यां नान्तादिवद्भावः, क्षीरपेणेत्याद्यसिद्धेरिति चेन्न। पदाऽवयवङमोऽभावेनादोषात्। न च पूर्वान्तवद्भावेनैकारान्तस्य पदत्वम्, उभयत आश्रयणेनान्तादिवदिति निषेधात्। तस्य पौर्वापर्याश्रयणकत्वेऽपि पदेत्यस्यावृत्त्याऽजादौ परे यत्पदं तदवयवस्य ङमः पदे परतो ङमुडित्यर्थाश्रयणेनोक्तनिषेधप्रवृत्तेः सुलभत्वात्। 'पदावयवङमः परस्याजादेः पदे ङ'मिति व्याख्यानेपि यथाकथञ्चिदत्र ङम्विशेषणस्य पदस्य विशेष्यपदस्य विशेष्यपदभिन्नस्यैव ग्रहणेनादोषात्। एतेन 'ङमः पदस्येति विशेषणं व्यर्थ'मित्यपास्तम्। नचैकदेशविकृतन्यायेन नान्तस्य पदत्वम्, 'अनच्क इन्द्रः सम्पन्न' इत्यादिभाष्यप्रामाण्येन 'समासान्ते'इत्यादिनिर्देशेन चैकादेशरहिते एकदेशविकृतन्यायेन पदत्वाद्यप्रवृत्तेः। तेन 'वनान्तः' 'सान्त' इत्यादौ नलोपरुत्वादि न।

अत्रानुनासिक। अत एवेति। अत्रेत्यनेन रुप्रकरणस्यैव ग्रहणं न तु रोरेवेति हेतोरेवेत्यर्थः। न च 'समःसुटी'त्यादिना रोर्विधानेऽत्रेत्यनेन रोर्ग्रहणसंविधानेपि तस्यैवेति रुप्रकरणग्रहणेनेदं तत्साधकमिति वाच्यम्।'समःसुटी'त्यत्र सकारप्रश्लेषपक्षेपि 'दीर्घादटी'त्यनेन रोरेव विधेयत्वात्। अन्यथा

अयमधिकारः । तेनोत्तरसूत्रविषये एवास्य प्रवृत्तिर्न तु 'मतुवसो'रित्यत्र, तत्सूत्रस्थवार्त्तिकयोश्च । अत्रेति तु-रुप्रकरण एवास्य सम्बन्धो, न त्वग्रे–'ढो ढे लोप' इत्यादावित्यर्थसूचनार्थं–स्पष्टार्थमेव । तुशब्दः–परस्य नित्यं रुत्वं पूर्वस्य वाऽनुनासिक इति विशेषद्योतनार्थः । 'पूर्वस्ये'त्यस्य च–रुस्थानिनः पूर्वस्येत्यर्थो बोद्धयः ।

अनुनासिकात्पर इति । अत्र–'अनुनासिका'दिति ल्यब्लोपे पञ्चमी, व्याख्यानात् । अयमागमोऽनवयव एव, अवयवत्वे मानाभावात् ।

❀ अभिनव-चन्द्रिका ❀

वार्त्तिकयोश्चेति । अत एव 'हरिवो मेदिनं त्वा' 'भोः, भगोः, अघो'रित्यादौ नानुनासिक इति भावः । **रुस्थानिनः पूर्वस्येति** । अत एव 'समः सुटी'त्यनेन सकारादेशकल्पेऽनुनासिकसिद्धिरिति भावः । वस्तुतस्तु एतत्प्रकरणविधेयाव्यवहितपूर्वत्वविशिष्टस्येत्यर्थो बोध्यः । अत एव 'समो वा लोप' इति-कल्पेऽप्यनुनासिकः सिद्ध्यति, अन्यथा रुस्थान्यव्यवहितपूर्वत्वस्याभावात्स न स्यात् । **मानाभावादिति** ।

❀ चिदस्थिमाला ❀

सिद्धान्तमाह—**अयमिति** । **तेनोत्तरेति** । अन्यथा पूर्वमेव पठेत् । एवव्यवच्छेद्यमाह—**नत्विति** । तद्विषये इत्यर्थः । ननु तत्सूत्रस्योदाहरणस्य भाष्ये दत्तत्वेन तत्र प्रवृत्ताविष्टापत्तिरत आह—**तत्सूत्रस्थेति** । 'वन उपसङ्ख्यानं', 'विभाषा भव'दित्यनयोरित्यर्थः । तदुदाहरणे भाष्येऽनुनासिकाद्यनुच्चारणात् । **विधित्वे तु** एतद्प्रकरणे इत्यर्थकाऽत्रग्रहणात्प्रवृत्तिर्दुर्वारैवेति भावः । नन्वेवमत्रग्रहणानर्थक्यं सर्वैरुक्तमधिकारादेव तल्लाभादत आह—**अत्रेति त्विति** । पूर्वत्रापाप्तत्वादेवाह—**नत्वग्रे इति** । वाशब्दवत्तुशब्दोपि स्पष्टार्थ एवेत्याह—**तुशब्द इति** । **विशेषेति** । तस्य स्फुटतया द्योतनार्थं इत्यर्थः । अत एव **तुवाशब्दौ** मूले नोक्तौ । ननु लोपपक्षे रुप्रकरणविधेयतो न पूर्वत्वं, तस्याऽभावरूपत्वादत आह—**पूर्वेति** । एतेनात्रविधिरेव युक्त इत्यादि रत्नाकराद्युक्तमपास्तमिति स्पष्टं भावप्रकाशे । **ल्यबिति** । दिग्योगलक्षणा तु नात्र, 'अनुस्वारपरोऽनुनासिकः पूर्वस्य तु वे'ति न्यासेन सिद्धावनुनासिकात्पर इत्यस्य वैयर्थ्यापत्तेस्तदाह—**व्याख्येति** । सकलग्रन्थासङ्गत्यायाह—**अयमिति** ।

❀ ज्योत्स्ना ❀

'यङन्तप्रक्रिये'त्यादिप्रयोगाणां सिद्धिः । तथाच निर्देशाः–'आनङ् ऋतः', 'अनङ् सौ', 'उणादयो बहुलम्', 'यणादिपरं गुणः', 'सनाशंसभिक्ष उ'रित्यादयः। विस्तरस्तु परिभाषाप्रदीपार्चिषि प्रदर्शिष्यते । **रुस्थानिनः पूर्वस्येतीति** । लोपपक्षेऽनुनासिकसिद्ध्यर्थमिदम् । 'विसर्जनीयस्य स'इत्यत्र मण्डूका-

❀ सदाशिवभट्टीयम् ❀

भावः।अत्रपक्षे रुप्रकरणे वक्ष्यमाणार्थकमिदमधिक्रियते इतीत्यर्थो बोध्यः। **रोःपूर्वस्येतीति** । इत्यत्र रोरितीत्यर्थः । पूर्वत्वञ्चाव्यवधानगर्भं, व्याख्यानात् । तेन चक्रिंस्त्रायस्वेत्यत्र चकाराकारस्य न । एवं परत्र परमपि ।

इत्यपीति । इत्यत्रापीत्यर्थः । स्पष्टञ्चेदं सर्वं 'समःसुटी'त्यत्र प्रदीपोद्योतयोः । ननु तत्सूत्रोदाहरणस्य भाष्ये दत्तत्वेन तत्र तत्प्रवृत्ताविष्टापत्तिरत आह–**तत्सूत्रस्थेति** । ननु अधिकारपक्षे–तत्तत्सूत्रैकवाक्यतया समोन्त्यस्यालो रुस्स्यात्पूर्वस्य तु वानुनासिक इत्याद्यर्थात् रोः पूर्वस्येत्यसङ्गतं, तस्य विधेयत्वात्तत्रैवावधित्वेनोपादानासम्भवादत आह–**पूर्वस्येत्यस्य चेति** । 'लोपपक्षेऽनुनासिकसिद्ध्यर्थमाहे'त्यवतरणन्न युक्तम्, अभावस्यापि बुद्धिकृतं पौर्वापर्यं वर्णवदिति शेखरविरोधात् । **अयमागमेति** । प्रत्ययव्यावृत्तये

❀ विषमपदविवृतिः ❀

'महाँ इन्द्र' इत्यत्र सत्वस्यासिद्धत्वादप्रवृत्तौ रूपासिद्धेः । वस्तुतस्तु सकारप्रश्लेषपक्षे'ऽत्रे'त्यस्य

खरीति । विसर्गाक्षिप्तस्याप्यवसानस्य न सम्बन्धो, व्याख्यानात् ।

❀ अभिनव-चन्द्रिका ❀

चिन्त्यमिदं, सूत्रे परशब्दस्य अवयवत्वविशिष्टपरत्वावच्छिन्नवाचकत्वेन 'उरण्रपरः' 'न य्वाभ्या'मित्यत्रैवानुस्वारेऽवयवत्वावच्छिन्नविधेयताश्रयत्वरूपागमत्वस्वीकारे बाधकाभावात् । अत एव 'महाँ इन्द्र' इत्यादौ 'भोभगो'इति यत्वं सिद्ध्यति । अन्यथा अनुस्वारविशिष्टस्य अपदेन यदागम-

❀ चिदस्थिमाला ❀

कस्य चिदुपमर्देन अविधानात्तद्न्मध्ये जायमानत्वाच्च तत्सदृशत्वेनागमत्वेऽपि परशब्दस्य समीपपरदेशस्थ-वृत्तित्वेन प्रसिद्धत्वेन पञ्चम्यन्तसाहचर्येण च तस्यैवात्र ग्रहणेनावयववाचित्वाभावेन तद्वदत्र गमका-भावादित्यर्थः । अत एव प्रकारान्तरेण 'पूर्वस्मात्पर' इत्येव व्याख्यातम् , न त्वनुवृत्त्या 'पूर्वस्य पर' इति ।

एतेन 'अनुवृत्त्या विभक्तिविपरिणामेन स्वयं व्याख्याय–मनोरमोक्तं लौकिकन्यायापेक्ष-(तदनपेक्ष)मिति दण्डयु-क्तमपास्तम् । एवमैजागमेऽपि बोध्यम् । खरीत्यस्य मण्डूकप्लुत्येकदेशस्वरितत्वप्रतिज्ञाभ्यामनुवृत्तौ गौरवा-त्तस्यापि तत्रैव पर्यवसानाच्चाह—**विसर्गेति । व्याख्येति** । लक्ष्यानुरोधमूलकादित्यर्थः । अपूर्ववार्त्तिककरणे

❀ ज्योत्स्ना ❀

नुवृत्तिः, खर इवावसानस्यापि प्रसज्यते, तद्व्यावृत्तये व्याख्यानं यदि प्राचीनमतेऽवश्यमपेक्षितं तद्वरं मण्डूकानुवृत्तिक्लेशमन्तरेणैव विसर्गाक्षिप्तयोः खरवसानयोर्व्याख्यानादवसानस्य व्यावृत्ति-

❀ सदाशिवभट्टीयम् ❀

आगमत्वस्यावयवत्वघटितत्वेपि । ध्वनितञ्चेदं वृद्धिसञ्ज्ञासूत्रे उद्योते । इतरानुपमर्देन जायमानत्वादस्य तत्त्वेन-व्यवहारः । अवयवत्वे त्वमिमते पूर्वस्येत्यनुवर्त्य पूर्वस्यावयवः पर इत्येव व्याख्यत् ,न पञ्चम्या । तत्फलन्तु अनुस्वा-रस्य द्वित्वम् । अन्यथा 'यदागमे'तिन्यायेन विशिष्टेऽच्त्वादचः परत्वाभावेन तन्न स्यात् । यत्र त्वागमस्यापि द्वित्वं दृश्यतेऽनित्यत्वन्तत्र न्यायस्य । प्रकृते तु न्यायसिद्धत्वादस्यार्थस्यैवमेवोक्तम् । एवमैजागमेपि बोध्यमित्याहुः । किञ्चैचोरवयवत्वेऽभिमते 'नय्वाभ्यां पदान्ताभ्यान्तयोश्चैच्ङि'तिन्यासेन ङमिवैच्टं विदध्यात् । प्रकृते चानु-स्वारकर्म् । **क्षिप्तस्याप्यवसानस्य न सम्बन्ध इतीति** । विसर्गेणानुमितस्य प्रत्यय इत्यादिरूपा-व्याख्यानात्सकारेण सम्बन्धो नेत्यर्थः । स च स्वप्रयोज्यविसर्गस्थानिकत्वरूपः, खरस्तु नाक्षेपः,फलाभावात् । अत एव खरसम्बन्ध इति नोक्तम् । 'अवसाने न सत्व'मित्येव तु नोक्तं, सर्वत्राक्षेपं वदता इह क्लेशः किमर्थं सोढव्य इत्युपहसितुम् । किञ्चैङ्ह्रस्वात्,उरदित्यादौ शाब्दे भानमपेक्ष्यमिह तु नेति आक्षेपे न दोषः। अत एव प्रकृत-सूत्रे भाष्ये'सत्व एव कर्तव्ये विसर्गविधानान्नावसानखरोरुभयोरविसर्गः। अवसान एव कुतो नेति चेत् ,शर्पर इति ज्ञापकादिति गृहाणे'त्युक्तं, ततो 'हलीत्यनुवर्त्तते'इति पक्षान्तरमुक्तम् । ततः 'खरीत्यनुवर्तत'इति च पक्षान्तर-मुक्तम्। एषां पक्षाणां फलभेदभङ्गायावसाने विसर्गं सम्पाद्य पश्चादजादिपदसम्बन्धेऽकृतव्यूहपरिभाषामनङ्गी-कुर्वताऽनभिधानमेवाश्रयणीयम् । तदेतन्मनसिकृत्योक्तं शब्दरत्ने 'सत्यभिधाने हरिः–अयमिति सविसर्गमपि

❀ विषमपदविवृतिः ❀

सप्रकरणे इत्येवार्थो, न तु रुप्रकरणे इति । 'कानाम्रेडिते' इत्यत्र रुप्रकरणस्य विच्छिन्नत्वेन तद्वि-षयेऽनुनासिकानापत्तेः । अधिकारपक्षे रोः पूर्वस्येत्यर्थोऽसम्भवी, 'परस्य नित्यं रुत्वं पूर्वस्य तु वा-नुनासिक' इत्युक्तरीत्या रुणा सहैवानुनासिकविधानकाले रोरभावादत आह—**रोः पूर्वस्येत्यस्येति ।**

अनवयव एवेति। आगमत्वञ्च प्रत्ययादेशभिन्नत्वे सति साक्षाल्लक्ष्यसंस्कारकतया शास्त्रविहित-त्वम् । एवमेव 'न य्वाभ्या'मितिसूत्रविहितयोरप्यनवयवत्वम् । 'न य्वाभ्या'मिति पञ्चमीनिर्देशेन पूर्व-शब्दस्य तत्रावयववाचित्वाभावात् । तेन इश्च अच्–यजं, तस्यापत्यं–ऐयजिः, तस्यच्छात्रा इत्यर्थेऽणेव, न तु च्छ इति भावः । **विसर्गाक्षिप्तेति** । इदमयुक्तम्–आक्षिप्तस्य शाब्देऽनन्वयात् ।

१. अन्त्यावयवत्वाय कितमनुस्वारमित्यर्थः ।

सो वक्तव्य इति। 'समः सुटी'त्यादिसूत्रत्रये 'स' इत्युपसङ्ख्याय—'समः सुटी'त्यत्र सकारं प्रश्लिष्य वा—एतैः सकार एव विधेय इत्यर्थः। एवञ्चास्यासिद्धत्वाद्रुत्वाभावेन विसर्गाभावे तत्तद्विधीनामप्राप्तिरेवेति भावः। स्पष्टञ्चेदं भाष्ये। विसर्गस्यानेन सत्वविधाने तु गौरवं स्फुटम्। **लोपस्यापीति।** यत्तु—

'उपधारञ्जनं कुर्यान्नमो रुकरणे सति।
लोपे प्रकृतिभावे वा नोपधारञ्जनं मतम्॥'

उपधारञ्जनम्=अनुनासिकानुस्वारागमरूपम्। **नमोः**=नकार-मकारयोः। प्रकृतिभावोदाहरणं—नॄँपाहि—'इति। तत्तु प्रातिशाख्यत्वात्तच्छाखामात्रविषयमिति भावः। अत एव भाष्ये—'समादिषु सत्वं वक्तव्य'मित्युक्तम्। रुत्वपक्षे चानुनासिकाद्यापत्तिर्दोषत्वेन नोक्ता। ननु लोपपक्षे एव द्वित्वेन द्विसकारस्य सिद्धत्वात्

❁ **अभिनव-चन्द्रिका** ❁

न्यायेन ग्रहणाभावे यत्वं दुरुपपादं स्यादिति दिक्। **व्याख्यानादिति।** 'खरवसानयोस्स' इत्येव

❁ **चिदस्थिमाला** ❁

गौरवादाह—**सम इति।** 'सम इत्यस्याग्रेऽनुवृत्ति'रिति तु न, मध्ये सम्बन्धस्यानिष्टत्वादत आह—**इत्यादीति।** आदिना 'पुमः' 'कानाम्रे'इति सूत्रद्वयपरिग्रहः। ततोऽपि लाघवादाह—**सम इति।** 'काना'-मित्यत्र मण्डूकप्लुतिरिति भावः। एवेन रुत्वव्यवच्छेदः। नन्वेवमपि रुत्वादि कुतो नात आह—**एवञ्चेति।** एतैस्तद्विधाने चेत्यर्थः। **तत्तदिति।** सत्वादीनामित्यर्थः। **भाष्ये इति।** 'सम' इति सूत्रे इति भावः। ननु 'वार्तिकेन विसर्गस्य सत्व'मिति सर्वसम्मतं किमिति त्यक्तमत आह—**विसर्गेति।** ऋक्प्रातिशाख्यादि-विरोधं परिहरति—**यत्तु—उपेति।** रुकरणे=क्रियमाणे रौ। **वा**—चार्थे। प्रकृतिभावोऽत्र पाक्षिकी स्वाभाविक्यवस्थितिर्न तु शास्त्रीयस्तदाह—**प्रकृतीति। प्रातीति।** तत्समाख्याबलेनेति भावः। **तदिति।** ऋगित्यर्थः। इदं द्रढयति—**अत एवेति।** तस्य तच्छाखामात्रविषयत्वादेवेत्यर्थः। अस्योभयत्रान्वयः। अन्यथा रुसाध्यप्रयोगाणां सत्वेनासिद्ध्या तदसङ्गतिस्स्पष्टैव। ननु तयोरनिष्टत्वादेव सत्वमुक्तमत आह—**रुत्वेति।** चोन्ते योज्यः।

❁ **ज्योत्स्ना** ❁

कल्पनमित्याह—**विसर्गाक्षिप्तस्यापीति। अवसानस्य न सम्बन्ध इति।** अपिना समुचितस्य खरस्तु सम्बन्धो भवत्येवेत्यर्थादुक्तं भवति। अत्र हेतुमाह—**व्याख्यानादिति।** वस्तुतस्तु मण्डूका-

❁ **सदाशिवभट्टीयम्** ❁

साध्वेवे'ति। अपूर्वकरणे गौरवादाह—**समःसुटीति।** अत्र सपदस्यैवाग्रे सम्बन्धो,न मध्ये सम्बन्धाभावात्। अत आह—**इत्यादीति।** त्रिसूत्र्यां 'स' इति वक्तव्यमिति भावः। ततोऽपि लाघवादाह—**सम इति।** अत्र पक्षे मध्येऽसम्बन्धो व्याख्यानात्। **प्रकृतिभावे वेति।** वा शब्दश्चार्थे। प्रकृतिभावोऽत्र स्वाभाविक्यवस्थितिर्न तु शास्त्रीयस्तदाह—**प्रकृतीति। प्रतिशाख्यत्वादिति।** तत्समाख्यावत्त्वेनेति भावः। वस्तुतस्त्वत्रापि 'लोपे' इति पूर्वान्वयि, 'वा'शब्द एवार्थ इति न कश्चिद्दोष इत्याहुः। **असिद्धत्वादिति।**

❁ **विषमपदविवृतिः** ❁

किन्तु भाष्योक्तरीत्या निर्वाहो बोध्यः। केचित्त्ववसाने रेफस्य विसर्जनीयः, खरि तस्य सो विधेयः, 'शर्परे' इत्यादि विसर्गस्थानिकं कार्यं रेफस्यैव विधेयमित्याहुः। **अप्राप्तिरेवेति।** 'अत्र विसर्गे प्राप्ते' इति मूलं, 'पुमः खयी'ति सूत्रे 'पक्षभेदेन ≍क≍पयोः षत्वस्य च प्राप्ता'विति मूलं यदि सत्वं न विधीयते किन्तु रुत्वमेव तदेत्यर्थकमेवेति बोध्यम्। अतएव=रुप्रकरणस्य ग्रहणादेव। **दोषत्वेन नोक्तेति।** इदमुपलक्षणम्, 'समो वा लोपमेक' इत्यस्य। संस्कर्त्ता सँस्स्कर्तेत्यनुनासिकाऽ-

'समः सुटी'ति व्यर्थमित्यत आह—**त्रिसकारकमपीति** । 'स्को'रिति लोपस्तु न—अस्यासिद्धत्वात् । 'पुनर्द्वित्वेन त्रिसकारस्य सिद्धि'रिति तु न युक्तं, 'लक्ष्ये लक्षणस्ये'ति न्यायात् । एतेन—'समः सुटी'त्यत्र 'वे'ति पाठेनैव पक्षे मोऽनुस्वारेण सिद्धे 'अनुनासिकात्पर' इति व्यर्थम्—'इत्यपास्तम् ।

ननु व्यञ्जनात्परस्यैकस्यानेकस्य वोच्चारणे विशेषाभावोऽत आह—**अनुनासिकवतामिति** । तत्रोच्चारणे विशेषाभावकल्पने इदं वचनं व्यर्थमेव स्यादिति भावः ।

हयवरट्सूत्रभाष्योक्ते शर्षूपसङ्ख्याने फलमाह—**अनुस्वारवतामिति** । अपिना—कस्य सङ्ग्रहः । लक्ष्ये लक्षणस्य सकृदेव प्रवृत्तेराह—**वचनान्तरेणेति** । 'यणो मय' इत्यनेन । एकस्यैव शास्त्रस्य पुनः प्रवृत्तौ हि स न्याय इति भावः । पूर्वत्रासिद्धत्वेन

❀ चिदस्थिमाला ❀

वेदे क्वचिदनुनासिकाभावविशिष्टः प्रयोगो दृश्यते चेच्छान्दसत्वेन साध्यः । वस्तुतस्तु तत्रापि 'लोपे' इति पूर्वान्वय्येव, **वा** एवार्थे इति न कश्चिद्दोष इति बोध्यम् । **स्य**=तस्यापि । लोपेन तदसत्त्वं निराचष्टे—**स्कोरिति** । अस्य='सम' इत्यस्य । अत एव 'झलो झली'त्यपि न, सिच एव तेन लोपाच्च । झलादौ प्रत्यये इत्यर्थाच्च । ननु तदपि पुनर्द्वित्वेन सिद्धमिति तद्व्यर्थता तदवस्थैवात आह—**पुनरिति** । एतेन=त्रिसकारकरूपासाधनेन । नन्वनुनासिकपक्षे तत्सिद्धावप्यनुस्वारपक्षे तस्यानच्त्वात्तेन व्यवधानाच्च द्वित्वाप्राप्त्या कथं तत्सिद्धिरत आह—**मूलेऽनुस्वारेति** । प्रकृताभिप्रायेणाह—**ननु व्यञ्जनादिति** । बहुव्रीहिरप्यन्यत्र बोध्यः । **विशेषाभाव इति** । तेषामञ्व्यतिरेकेण फलान्तराभावादेव च सूत्रं व्यर्थमेवेति भावः । **इदमिति** । 'शरःखय' इतीत्यर्थः । तद्भाष्यन्तु दुर्लक्ष्यो विशेष इति तात्पर्यकं, न सर्वथा तदसत्त्वप्रतिपादकमिति न तद्विरोध इति भावः । **शर्षूपेति** । अकारोपरि तस्य फलन्तूक्तमेव, अत एव प्रागुभयोल्लेखः । मूले—**तकारेति** । 'अचोरे'तीति भावः । नन्वेवमपि—तन्न्याप्रवृत्तिः कुतो नात आह—**एकस्यैवेति** । हि=यतः ।

ननु वचनयोर्युगपत्क्रमेण वा प्रवृत्तौ एकस्यैव विधानापत्तिर्द्वे इत्यस्य सङ्ख्येयपरत्वेन शब्दद्वयस्योच्चारणसाध्यत्वेन तस्य बुद्ध्यारोहावश्यकत्वेन, 'पर' इत्यादिषष्ठ्या कारकविभक्तित्वस्य न्याय्यत्वेन चोच्चारणे इत्यध्याहारेणोच्चारणद्वयस्यैव विधेयत्वादत आह—**पूर्वत्रेति** । 'पूर्वत्रासिद्धीय'मिति तु न, फलाविशेषात् । एवञ्च

❀ ज्योत्स्ना ❀

नुवृत्तिक्लेशः स्वेन दूषयितुमयोग्यः, आक्षिप्तस्य शाब्दान्वयप्रतियोगितायाः स्वमते निराकृतत्वात् । परमनिष्कर्षे तु 'खरी'त्येतत्सम्बन्धस्यापि यथा न प्रयोजनं तथा संहितासूत्रे प्रागेवोपपादितम् ।

इति व्यर्थमितीति । संस्स्कर्तेति सानुस्वारत्रिसकारकस्य पुँस्कोकिल इत्यादेरुत्तरसूत्रे वाग्रहणानुवृत्त्या चान्यथासिद्धावपि—शार्ङ्गिंश्छिन्धि, नॄः पाहि, कांस्कानित्याद्यर्थं सूत्रस्य सार्थक्याच्चिन्त्यमेतत् । 'नन्वीरनि प्रकृते 'घसेः किच्चे'ति व्युत्पादिते क्षीरशब्दे—चर्त्वस्यासिद्धत्वात्खय्परत्वाभावेनैव

❀ सदाशिवभट्टीयम् ❀

झलादेः प्रत्ययत्वाभावाद्व्यर्थमेव स्यादिति । तद्भाष्यन्तु अदुर्लक्ष्यो विशेषोनास्तीत्यर्थकम् , न तु सर्वथा तदसत्त्वप्रतिपादकमिति न तद्विरोधः । नन्वेवं 'प्रार्षभीये'तिप्रतीके'ऽचोरहेत्यस्यानावश्यकता सूचिते'तिग्रन्थेन विरोधः, तत्रानावश्यकतेत्यस्य—मूलपठनकर्तुः सूक्ष्मोच्चारणे विशेषाऽविशेषज्ञानासम्भवेन प्रकृतमूलग्रन्थेऽनावश्यकतेत्यर्थकरणेनादोषात् । न तु सर्वथाऽनावश्यकता । नन्वनयोर्युगपत्प्रवृत्तावेकस्यैव द्विरुच्चारणस्योभाभ्यां साधुत्वं बोध्येतेतात आह—**पूर्वत्रासिद्धत्वेनेति** । 'पूर्वत्रासिद्धीयम-

पूर्वद्वित्वस्य पूर्वं प्रवृत्त्या तेन द्वितीयस्य साधुत्वे बोधिते तदनन्तरं परद्वित्वप्रवृत्त्या तयोर्मध्ये पुनरन्यस्य साधुत्वं बोध्यत इति-त्रितस्य निर्वाहो बोद्धव्यः। 'अनचि चे'त्यत्र 'यणो मय' इत्यस्योपसङ्ख्यानात् 'अचो रहाभ्या'मित्यतस्तस्य परत्वं बोद्धव्यम्।

पुमः ख । 'अम्परे'इति बहुव्रीहिः। ≍क≍**पयोरिति** । 'कुप्वो'रितिसूत्रविधेययो-रित्यर्थः। 'इदुदुपधस्ये'ति सूत्रे'ऽप्रत्ययस्ये'त्यस्य प्रत्ययावयवभिन्नस्येत्यर्थादिति भावः।

अव्युत्पत्तीति । तत्पक्षे प्रकृतिप्रत्ययविभागाभावादिति भावः। **षत्वेति** । इद-मनुनासिकपक्षे। अनुस्वारपक्षे तु–'कुप्वो'रित्यस्यैव प्राप्तिः। अनुस्वारव्यवधानेनो[दु]पध-त्वाभावात्। **पुंक्षीरमिति** । क्षरधातोरुपधाया ईत्वेऽच्प्रत्यये क्षीरमिति भावः।

नश्छवि । 'अप्रशा'निति षष्ठ्यर्थे प्रथमा।

नॄन्पे । 'नॄ'निति द्वितीयान्तानुकरणम्। षष्ठ्याः सौत्रो लुक्। नलोपस्तु सौत्रत्वान्न।

❀ **अभिनव-चन्द्रिका** ❀

सिद्धे 'विसर्जनीयस्य स'इत्यारम्भसामर्थ्यादिति भावः। **बहुव्रीहिरिति** । पञ्चम्यर्थ इति भावः।

❀ **चिदस्थिमाला** ❀

क्रमेणैव प्रवृत्तिरिति भावः। प्रयोगसमवाय्यन्यवर्णवदेकतकारस्य सिद्धत्वेनापरस्यैकस्यैवा**गन्तूनामन्ते** इतिन्या-येन विधितात्पर्यविषयत्वेन सिद्धशब्दत्वपक्षे आह—**द्वितीयस्येति** । सामर्थ्यादाह—**तयोर्मध्ये इति** ।

नन्वु तस्य वार्तिकत्वेन कथं पूर्वापरीभावोऽत आह—**अनचीति** । **बहुव्रीहिरिति** । परग्रहणसामर्थ्या-दिति भावः। विसर्गसङ्ग्रहायाह—**कुप्वोरिति** । मनोरमादिग्रन्थासङ्गतिं ध्वनयन् सिद्धान्तरीत्यैव मूलस्य युक्तत्वमाह–**इदुदुपधेति** । 'कविभिः कृत'मित्याद्यनुरोधेनास्यावश्यकत्वमिति भावः। **विभागेति**। तस्यैवाभावादित्यर्थः। यथाश्रुतमूलासङ्गतिं परिहरति—**इदमिति** । तथाच षत्वस्यापि प्राप्ताविति तदर्थो बोध्यः। ननु 'पुंक्षीर'मित्यत्र 'घसेः किच्चे'तीरनि कित्त्वादुपधालोपे 'खरी'तिचर्त्वस्यासिद्धत्वात्खय्परत्व-मेव न। नचाव्युत्पत्तिपक्षः, तथाऽपि पक्षान्तरे दोष एव। 'पुंक्षय' इत्यादिप्रत्युदाहरणसम्भवेऽपि मूला-

❀ **ज्योत्स्ना** ❀

नैतत्प्राप्तिरित्याशङ्क्य–'क्षरतेर्घसेर्वे'तिनिरुक्तप्रामाण्यात्क्षरतेरचि बाहुलकादीकारे प्रत्युदाहरणमेतदित्याह–

❀ **सदाशिवभट्टीयम्** ❀

द्वित्वे' इत्येतदभिप्रायकं 'परत्वान्तरङ्गत्वाभ्यां यणोमयइत्यस्यैव पूर्वप्रवृत्ति'रिति समाधानान्तरं बृहच्छेखरोक्तं-तु नोक्तम्। फले विशेषाभावेन तदप्रवृत्त्याऽस्यैव न्याय्यत्वात्। विसर्गसङ्ग्रहायाह—**कुप्वोरिति**। द्विवचनो-पपत्तिस्तु ककारे पकारे च द्वयोर्द्वयोरेव प्राप्त्या बोध्या। एवमेव भाष्येपि बोध्यम्। **इदमिति**। एवञ्च षत्व-स्यापि प्राप्ताविति तदर्थो बोध्यः। **नो[दु]पधेति**। अन्त्यादलोऽव्यवहितपूर्वस्यैव सा सञ्ज्ञेति भावः। **उपधत्वे**-

❀ **विषमपदविवृतिः** ❀

नुस्वारघटितरूपस्योदाहरणत्वेन प्रदर्शनादित्यपि बोध्यम्। **पूर्वं प्रवृत्त्येति** । इदमयुक्तम्—'पूर्वत्रासिद्धीयमद्विर्वचन' इति परिभाषया परद्वित्वस्यैव पूर्वं प्रवृत्तेर्युक्तत्वात्त्रितस्य निर्वाह इति।

केचित्तु 'एकस्यां व्यक्ता'विति न्यायेन न पुनर्द्वित्वम्, लक्षणपदस्य कार्यार्थकत्वात्। अत एव सोषुप्यतेः सनि सोषुपिषत इति। अत द्वित्वस्योक्तन्यायेनाप्रवृत्त्या भाष्यकारीयानभ्यासग्रहणप्रत्या-ख्यानस्य निर्वाह इत्याहुः। **सूत्रविधेययोरिति** । तयोर्विधायकस्य शास्त्रान्तरस्याभावादिदं व्यर्थम्।

ननु 'घसेः किच्चे'तीरनि कित्त्वादुपधालोपे जातस्य चर्त्वस्यासिद्धत्वात्खय्परत्वमेव नास्तीत्याशङ्क्याह–

एवं कानित्यत्रापि । **चाद्विसर्ग इति** । 'शर्परे' इति सूत्रात्तदनुकर्षश्चेनेति भावः । **येन नेति** । 'येन नाप्राप्ते यो विधिरारभ्यते स तस्य बाधक' इति न्यायेनेत्यर्थः ।

❀ अभिनव-चन्द्रिका ❀

प्रकृतिप्रत्ययविभागाभावादिति । प्रकृतिप्रत्ययविभागज्ञानप्रयोज्यकार्याभावादित्यर्थः । **अवश्यप्राप्ताविति** । अवश्यंशब्दपर्यायावश्यशब्देन प्राप्तिशब्दस्य समासः । अत एवा'वश्यकाधमर्ण्ययो'-रिति निर्देशः सङ्गच्छते, अन्यथा-अवश्यंशब्दस्य योपधत्वाभावाद्योपधादिति वुञ्जनापत्तेः ।

बाध्यत्वे बीजञ्च-बाधकत्वेन जिघृक्षितशास्त्रीयोद्देश्यदलीयविषयताविशिष्टान्यतमत्ववद्विषयता-प्रयोजकपदघटितत्वम् । वै० 'स्वव्यापकतावच्छेदकत्व', 'स्वव्यापकतावच्छेदकवैशिष्ट्याभाववत्त्वो' भयसम्बन्धेन । द्वितीयसम्बन्धे वै० 'स्वव्यापकत्व', स्वव्याप्यत्वाभाववत्त्व, 'स्वाश्रयव्यधिकरणविषयतावृत्तित्वै'तत्रितयसम्बन्धेन । मूलन्तु प्राचामनुसारेण । 'वासः क्षौम'मित्यादौ यथा जिह्वामूलीयो न भवति तथान्यत्र निरूपितम् । **तदप्राप्तियोग्येऽचारितार्थ्यमिति** । इदमुपलक्षणम् ।

❀ चिदस्थिमाला ❀

सङ्गतिरेवातः 'क्षीरं क्षरते'रिति निरुक्तानुरोधेनाह—**क्षरेति** । अन्वयायाह—**प्रेति** । तयोर्भेदविवक्षया, 'प्रकृतिव'दित्यस्यानित्यत्वेन चाह—**षष्ठ्या इति** । नन्वेवं नलोपापत्तिरत आह—**नलोप इति** । तुरप्यर्थे । 'खरवसानयो'रित्यस्य बहुदूरत्वादाह—**शर्परे इति** । एतेन स्थानिभूतविसर्गः पक्षेऽनेन स्थाप्यते इत्यपास्तं, तस्य समुच्चायकत्वात् । न्यायस्वरूपमाह—**येन नेति** । सन्दिग्धत्वात्क्तान्तार्थमाह—**येनेति** । कर्त्तरि

❀ ज्योत्स्ना ❀

क्षरधातोरित्यादि । [३८१पृष्ठे] **विषयभेदे कथं बाधकत्वमिति** । समानफलकत्वं वा विरोधो वा बाध्य-

❀ सदाशिवभट्टीयम् ❀

'त्वे चे'ति ह्रस्वः । यद्वा ऊपधेति च्छेदो बहुव्रीहिश्च । **सौत्रत्वान्नेति** । विभक्त्युत्पत्तये जातप्रातिपदिकत्व-मादाय प्राप्तनलोपस्य प्रकारान्तरेणाशक्यवारणात् । एतेन 'प्रकृतिव'दितिप्रत्ययान्तत्वेनाप्रातिपदिकत्वान्न लोप इत्यपास्तम् । 'क्षिय' इत्यतो वैलक्षण्यं स्पष्टमत्र सूक्ष्मदृशाम् । लुगर्थं सौत्रत्वस्यावश्यकत्वाच्च ।

[बृहच्छेखरे तु—"ननु वचनयोर्युगपत्प्रवृत्तौ क्रमेण वा प्रवृत्तावेकस्यैव विधानापत्तिः । 'द्वे'इत्यस्य सङ्ख्येय-परत्वेन शब्दद्वयस्योच्चारणसाध्यत्वेन तस्य बुद्ध्यारोहावश्यकत्वात्,यर इति षष्ठ्याः कारकविभक्तित्वस्य न्याय्य-त्वाच्च,उच्चारण इत्यध्याहारेणोच्चारणद्वयस्यैव विधेयत्वादिति चेन्न । पूर्वत्रासिद्धत्वात्परत्वाद्वा शास्त्रयोः क्रमेण प्रवृत्तिः । तत्र प्रयोगसमवाय्यन्यवर्णोच्चारणवदेकतकारोच्चारणस्य सिद्धत्वेनैकस्यैव विधितात्पर्यविषयता, तत्रैकस्य द्वितीयोच्चारणस्यैकेन साधुत्वबोधनेपि द्वितीयेन तयोर्मध्येऽपरस्य द्वितीयोच्चारणस्यासाधुत्वबोधने क्षत्यभावादिति दिक्—" इत्युक्तम् ।]

कुप्वोः । अत्र ≍क≍प इति विधेयं, ककारस्येत्त्वे लोपेन निवृत्तिः । अयमादेश एव, साहचर्यात् । उच्चारण-सामर्थ्यान्न गः । ककारोच्चारणं हि जिह्वामूलीयोच्चारणाय, न हि गकारे तत्सम्भवति । द्वितीयेऽकारस्यानुनासि-कत्वेन निवृत्तिः । परस्य पूर्ववत् । 'उच्चारणार्थवर्णरहिते लक्षणे'ति शब्दरत्नोक्तन्तु न युक्तम् । स्वमते विधेय-बोधके लक्षणानङ्गीकरात् । प्रसङ्गान्न्यायार्थमाह—**येन नेत्यादेरिति** । अस्य न्यायस्य सर्वथा निरवकाशत्व-

❀ विषमपदविवृतिः ❀

क्षरधातोरिति । 'क्षीरं क्षरतेर्वा घसेर्वे'ति निरुक्तप्रामाण्यादिति भावः । 'अवश्यं प्राप्ता'विति पाठः ।

१. उकारोपधत्वाभावादिति तदर्थः । एवञ्चोपसर्जनत्वाद्ध्रस्व इति तत्त्वम् । 'नोदुपधे'त्येव क्वचित्पाठः ।

२. [ ] एतच्चिह्नान्तःस्थः पाठः—३८१ पृष्ठीय—सदाशिवभट्टीयद्वितीयपङ्क्तौ '**न्याय्यत्वा**'दित्यनन्तर-मुचितः, **चिदस्थिमाला**यान्तथैवोपलब्धेः, औचित्याच्च ।

'येन ने'त्यादेर्यत्कर्तृकाऽवश्यप्राप्ताविन्यर्थः, नन्द्वयस्य प्रकृतार्थदार्ढ्यबोधकत्वात्। 'प्राप्त' इति भावे क्तः। तदप्राप्तियोग्यविषयेऽचारितार्थ्यं हि बाधकत्वे बीजम्। तदुक्तं 'शर्पूर्वाः' इति सूत्रे भाष्ये—''शर्पूर्वा इत्येतद्धलादिः शेषस्य बाधकम्। ननु विषयभेदे कथं बाधकत्वम्? इदं तावदयं प्रष्टव्यः—यदि तन्नोच्येत किमिह स्यात्? हलादिःशेषश्चेत्-नाप्राप्ते तस्मिन्नारम्भादिदं तद्बाधकं भविष्यति-''इति। 'अजादेर्द्वितीयस्ये'ति सूत्रे भाष्येऽपि स्फुटमेतत्।

ॐ अभिनव-चन्द्रिका ॐ

तदप्राप्तियोग्येऽचारितार्थ्यविशिष्ट—कृते चारितार्थ्यस्य, तदप्राप्तियोग्येऽचारितार्थ्यविशिष्टकृतेऽचारितार्थ्यस्य, तदप्राप्तियोग्येऽचारितार्थ्यविशिष्ट-कृतेऽचारितार्थ्यविशिष्टोत्सर्गशास्त्रप्रवृत्तिसम्भावना-प्रयोज्यापवादशास्त्रवैयर्थ्यसम्भावनायाः, तदप्राप्तियोग्येऽचारितार्थ्यविशिष्टोत्सर्गशास्त्रप्रवृत्त्यभाव-सम्भावनाप्रयोज्यापवादशास्त्रप्रवृत्तिसम्भावनायाश्च। तत्र प्रथमबीजेन स्वप्रवृत्तियोग्यातिरिक्तत्वेन, द्वितीयचतुर्थाभ्याम्—स्वप्रवृत्तियोग्यातिरिक्तत्वेन, स्वविधेयघटितातिरिक्तत्वेन च,

ॐ चिदस्थिमाला ॐ

तृतीया, सतिसप्तमी चेति भावः। अवश्यत्वलाभबीजमाह—**नन्द्वयेति**। अत एव 'येन प्राप्ते' इति नोक्तम्। उक्तार्थसाधनायाह—**प्राप्ते इति**। कर्माद्यर्थानुपयोगादन्वयायोग्यत्वाच्चेति भावः। एवञ्च विशेषशास्त्रोद्देश्य-विशेषधर्मावच्छिन्नवृत्तिसामान्यधर्मावच्छिन्नोद्देश्यकशास्त्रस्य विशेषशास्त्रेण बाध इति बोध्यम्।

अत्र हेतुमाह—**तदप्रेति**। सामान्यशास्त्राप्रेत्यर्थः। हि=यतः। न तु विरोधादिति भावः। सप्तम्यन्तेन सूचितं तत्रैव कालादिभेदेन चारितार्थ्ये एव बाध इति बोध्यम्। अन्यथा सर्वथानवकाशत्वेनैव बाधे सिद्धे एतत्कथनादिवैयर्थ्यापत्तिः। अस्ति चात्र सत्वप्रवृत्तेः पूर्वमस्य चारितार्थ्यं, सम्भवात्, ततो विसर्गस्य सत्त्वेऽपि जिह्वामूलीयादिस्थित्या तत्सम्भवात्। अत्र सम्मतिमाह—**तदुक्तमिति**। **इदमिति**। 'यत' इत्यादिः। तत्र हि प्रथमद्विर्वचनस्य तदुत्तरं सावकाशेनापि द्वितीय-

ॐ ज्योत्स्ना ॐ

बाधकभावे प्रयोजकः, यथा 'दधि ब्राह्मणेभ्यो दीयतां तक्रं कौण्डिन्याये'त्युक्तावोदनोपसेक-रूपस्य फलस्य तुल्यत्वाद्दध्नस्तक्रेण बाधः। यथा च वेदे 'नैवारश्चरुर्भवति, नैवारश्चरुर्नखावपूताना'-मित्युक्ते-तुषविमोकरूपस्य फलस्य तुल्यत्वाद्व्रीहीनवहन्तीति सामान्यतः प्राप्तस्यावहननस्य नखावपव-नेन बाधः। तथा विरोधमात्रात्क्वचिद्बाध्यबाधकभावः, यथा'ष्टाश्रिर्यूपो भवति वाजपेयस्य चतुरस्र'-इत्यष्टाश्रित्वस्य चतुरस्रत्वेन। प्रकृते च विषयभेदात्समानफलकत्वाभावः। नापि विरोधः, शास्त्रतात्पर्य-विषयभूतायामितरनिवृत्तौ परस्परविरोधसद्भावेऽपि शब्दजन्यप्रतीतिविषये आदिभूतहलः शर्पूर्व-खयश्च शेषे शास्त्रयोस्तदभावात्। सिद्धान्ते त्वभ्यासावयवसंस्कारकत्वमात्रेणोभयोः समानफलकत्वाद्बाध्य-

ॐ सदाशिवभट्टीयम् ॐ

रूपसिद्धबाधकत्वमात्रानुवादकत्वे वक्ष्यमाणभाष्यासङ्गतिरत'स्तक्रकौण्डिन्ये'ति न्यायसिद्धस्याऽप्यनुवाद इति वक्तव्यम्। एवञ्च तदुभयसाधारणं बीजमाह—**तदप्राप्तीति**। उक्तन्यायेन तदपवादो मा भूताम्, अनयोर-सिद्धत्वात्। तस्मिन् कृते तु स्यातामेवेति शङ्कते—**न चेति**। नन्वर्थाधिकारात्खरवसानयोरिति विहितस्यैव

ॐ विषमपदविवृतिः ॐ

'लुम्पेदवश्यमः कृत्ये' इति कृत्य एव लोपस्मरणादिति बोध्यम्। **भावे क्त इति**। 'नपुंसके भावे क्त'

न तु शर्परे इति । न चास्य विसर्गस्य≍क≍पौ दुर्वारौ, किञ्चास्यैव तौ स्यातां, 'खरवसानयोरि'ति विहितस्य तु एतयोरसिद्धत्वात्सत्वमेव स्यादिति वाच्यं, 'शर्परे' इति सूत्रं 'कुप्वो'रित्यत्रानुवर्त्य शर्परयोः कुप्वोः—≍क≍पयोरपवादो—विसर्गस्य विसर्ग इति वाक्यभेदेन व्याख्यानेनादोषात् । स्पष्टञ्चेदं भाष्ये ।

❀ अभिनव-चन्द्रिका ❀

तृतीयेन स्वप्रवृत्तियोग्यस्वीयोद्देश्यतावच्छेदकावच्छिन्नातिरिक्तत्वेन, पञ्चमेन भविष्यदपवाद-

❀ चिदस्थिमाला ❀

द्विर्वचनेन बाध उक्तः । अपिना मिदचोन्त्यादिति सूत्रभाष्यादिपरिग्रहः । अधिकं परिभाषेन्दुशखरे द्रष्टव्यम् । खण्डनकाराद्युक्तदोषमुद्धरति—**नचेत्यादिना** । 'वासः क्षौम'मित्यादौ शर्परे इति विहित-विसर्गस्यापीत्यर्थः । अपिना 'खरवे'तिविहिततत्समुच्चयः । एतदग्रे समागतेन विसर्जनीयस्येत्यनेन तस्यैव परामर्शे विनिगमकाभावादिति भावः । विनिगमका**नन्तरे**तिन्यायसत्त्वारे त्वाह—**किञ्चेति** । अस्यैव शब्दाधिकारेण परामर्श इति भावः । विहितस्येत्यस्य—सत्वमेवेत्यन्वयः ।

असिद्धत्वादिति । सत्वतद्दृष्ट्येति शेषः । तदाह—**सत्वमेवेति** । विसर्जनीयस्येतीति भावः । एक-वाक्यत्वासम्भवादाह—**वाक्येति** । एतेन 'शर्परे ने'त्येव सूत्रं कार्यमित्यपास्तम् । अधिकमग्रे द्रष्टव्यम् ।

❀ ज्योत्स्ना ❀

बाधकभावः । एवमन्यत्रापि यथायथमुपपादनीयं, विस्तरस्तु परिभाषाप्रदीपार्चिषि निरूपितो द्रष्टव्यः ।

❀ सदाशिवभट्टीयम् ❀

स्यातामित्यत आह—**किञ्चेति** । अयम्भावः—अर्थाधिकारे सत्वस्यासिद्धत्वस्य च बाधः कर्तव्य इति हेतोः शब्दाधिकार आश्रीयते । **अनुवर्त्येति** । 'ने'त्येव सिद्धे विसर्जनीयवचनाद्बाध्यसामान्यचिन्तेति तु न युक्तं, बाध्यसामान्यचिन्ताङ्गीकारेऽ'नचि चे'ति द्वित्वस्याप्यनापत्तेः । नचेष्टापत्तिः, मानाभावात् ।

न चानुवृत्त्या वाक्यभेदेन व्याचक्षाणस्य तवापि 'इदुदुपधस्ये'ति षत्वबाधाय तच्चिन्तावश्यकत्वेन द्वित्वबाधो दुर्वार इति वाच्यम्, अनुवर्त्य वाक्यभेदेन 'कुप्वो'रित्यस्य सम्बन्धेन कवर्गपवर्गयोर्बाधप्राप्तावपीतरत्र बाधकल्पने मानाभावात् । वस्तुतस्त्वर्थाधिकारपक्षैकवाक्यतया शब्दाधिकारपक्षेपि न बाध्यसामान्य-चिन्ताश्रयणं, द्वित्वबाधाबाधाभ्यां फलभेदात् । किन्तु 'कुप्वो'रित्यत्रेवोत्तरत्राप्यनुवर्त्य व्याख्येयम् । कुप्वो-रित्यतः परश्चार्थाधिकार एवेति स्पष्टमुद्योते । एत्येधतीति सूत्रस्थ—परेतु—मतरीत्यानभिधानमुक्तन्तन्न युक्तं पश्यामः, 'कुप्वो'रित्यत्र चाद्विसर्गलाभानापत्तेः। तथा वक्तुमशक्यत्वाच्च । **ननु** चेन पक्षे षत्वं निषिध्यता-मित्युक्तमेवेति चेन्न, तथा सति 'सोपदादौ' 'इणः षः' 'कस्कादिषु' 'इदुदुपधस्ये'त्यादीनां षत्वनिषेधपक्षे चरितार्थानां≍क≍पबाधकत्वानापत्तेः । चाद्विसर्गविधाने त्वर्थाधिकारात्**खरवेति** विहितविसर्गस्यैवादेश इति चारितार्थ्याभावाद्बाधकमेव । निषेधे तु स एवेति सार्थक्यं स्यादेव । उत्तरत्राधिकारे मानन्तु सर्पिष्कुण्डिका-शब्दपाठस्य ज्ञापकत्वप्रतिपादकपरं भाष्यम् । अन्यथा पक्षप्राप्त≍क≍पबाधनेन चारितार्थ्यात्तदस-ङ्गतिः स्यात् । **अदोषादिति** । एवञ्च शब्दाधिकारेपि बाधमन्तरा सार्थक्याभावादर्थाधिकार एवेति भावः । शर्परे विहितस्य षत्वमपि नेत्युद्योते स्पष्टम् । यद्यपि 'शर्परे' इति सूत्रे स्थानिबोधकस्य विसर्जनीयपदस्य 'खरवसानयो'रित्येतन्मात्रविहितबोधकत्वेनार्थाधिकारेणात्रापि तादृशविसर्गस्यैव ग्रहणेन 'शर्परे' इति विहिते

❀ विषमपदविवृतिः ❀

इति विहितः, 'गत्यर्थाकर्मके'ति विहितो वा सकर्मकेभ्योऽपि भवतीति भावः । अत्र यद्वक्तव्यं

· वार्त्तिके कान्ग्रहणं शक्यमकर्तुमित्याह—**यद्वेति** । एवं सम्ग्रहणमपि त्यक्तुं शक्यम् । पुम्ग्रहणं त्वावश्यकमेव । अनुनासिकपक्षे इणः परत्वेन षत्वापत्तेः । **एष्विण इति** । गणे कृतसत्वषत्वानामेव पाठादिति भावः । **≍क≍पयोरपवाद इति** । 'तद्विहितविसर्गस्यापी'त्यपि बोद्ध्यम् । 'काँ꞉का'निति वीप्सायां द्वित्वम् ।

❀ अभिनव-चन्द्रिका ❀

विषयातिरिक्तत्वेन चोत्सर्गे सङ्कोचो बोध्यः । विस्तरस्तु परिभाषेन्दुचन्द्रिकायां द्रष्टव्यः ।

❀ चिदस्थिमाला ❀

एवमिति । अनया रीत्येत्यर्थः । तस्याकृतिगणत्वादिति भावः । नन्वतः कृकमीत्यग्रे 'इणः षः' इत्यस्यात इति दर्शनान्निवृत्त्या कथमिदमत आह—**गणे** इति । तथा च यथापठितसाधुत्वबोधनमेवानेनेतिभावः । एतेनेणः इत्यनुवर्तते इति **दण्डिरत्नाकरा**द्युक्तं, संपुमोर्वार्तिकेनैव सत्वमिति त्रयाणां पाठेन सर्वमपि वार्तिकं सुत्यजमिति—पुंस्कोकिल इत्यादौ षत्वापत्तेः तन्ने'ति च दण्डयुक्तं चापास्तम् । ननु कुप्वोरिति विहितपाक्षिकविसर्गेऽस्य चारितार्थ्यात्कथं तदपवादत्वमिति चेन्न । अर्थाधिकारेण 'खरवे'तिसूत्रमात्रविहितविसर्गस्यैव सत्वाद्यङ्गीकारात् । एवं 'सोपदादा'वित्याद्यपि तयोरपवादः । एवञ्च मूलमुपलक्षणमवश्यं वाच्यं, तदाह—**तद्विहीति** । मूले—**कस्क इति** । 'कः कोऽत्रे'ति-

❀ ज्योत्स्ना ❀

पदान्तत्वमिति । एवञ्च 'झलाञ्जशोऽन्त' इत्यनेन विधीयमानं पदान्ते जश्त्वं नानुपपन्नमिति भावः । **भाष्ये ध्वनितमेतदिति** । तत्र हि 'वर्णैकदेशा वर्णग्रहणेन गृह्यन्त' इति पक्षे आलूयेत्यत्र 'ह्रस्वस्य-

❀ सदाशिवभट्टीयम् ❀

प्रसक्तिरेव न, तथापि पूर्वत्रासिद्ध इत्येतद्बाधकल्पनापेक्षयाऽर्थाधिकारत्याग एव युक्त इति भावः । एतेन 'कस्कादिषु चे'तिसूत्रेऽनुवृत्तविसर्जनीयपदस्यान्यानुज्जीवितविसर्गपरत्वमवश्यं वक्तव्यम्, अन्यथा तस्य ≍क≍पादेशबाधकत्वानुपपत्तिः । ≍क≍पादेशाप्राप्तियोग्ये तत्सूत्रविहित'चाद्विसर्ग' इत्युज्जीवितविसर्गेऽस्य चरितार्थस्य सत्वस्य जिह्वामूलीयबाधकत्वानापत्तेरित्यपास्तम् । तस्य निरुक्तरीत्याऽस्यापि दोषस्य शङ्काप्रवेशात् 'शर्परे ने'ति सूत्रणांये विसर्गग्रहणेन बाधकद्वितीयसूत्रसम्पादनद्वारा जिह्वामूलीयबाधस्य वक्तुं शक्यत्वेपि स्वदेशस्थेन द्वितीयवाक्यार्थेन जिह्वामूलीयस्य बाधकल्पने 'पूर्वत्रासिद्ध'मित्येतद्बाधकल्पनापत्त्यात्रैवानुवर्त्य वाक्यार्थकरणम् । एतेनानुवृत्त्यभावेपि बाधकताबीजसत्त्वेन किमर्थमुत्तरत्राऽनुवृत्तिरित्यपास्तम् । **षत्वापत्तेरिति** । 'पुंस्काम्यती'त्यादाविति भावः । इदन्तु बोध्यम्—कांस्कान्, संस्कृत इति गणे पाठ्यमिति । अत्र किं लाघवमिति तु चिन्त्यम् । नन्व'तः कृकमी'त्यत 'इण' इत्यस्य विच्छेदात्कथमिदमित्याह—**गणे इति** । नन्वेवं 'पुम्ग्रहणं त्वावश्यकमेवे'ति कथमुक्तं, तत्र यथापठितसाधुत्वस्य वक्तव्यत्वेन प्रकृते कृतषत्वपाठेपि दोषानवकाशादिति चेन्न । 'कांस्का'नित्यादेरनुस्वारानुनासिकोपेतयोः पाठेन 'संस्कृत' इति पाठेन च निखिलरूपसङ्ग्रहेपि पुंशब्दविषयेऽनन्तप्रयोगाणां पाठकल्पने गौरवापत्तेः । 'षत्वापत्ते'रितिपूर्वग्रन्थस्तु दोषोपलक्षणमित्याहुः । **केचित्तु** पुंस् इति पठित्वा 'कुप्वो'रिति सम्बन्धादतिप्रसङ्गं निराकृत्य—यद्वा 'पुमः सः' 'अपदादौ' 'इणः ष'इति संन्यस्य तस्याप्यनावश्यकतां ब्रुवते । वस्तुतः 'सम्पुका'निति पठित्वा एतेषां विसर्गस्येति व्याख्यानेन न कोप्यतिप्रसङ्ग एवेति बोध्यम् । वस्तुतस्तु 'यद्वे'तिवदतो मूलकारस्य कस्कादेराकृतिगणत्वात् सत्वमित्येव तात्पर्यं, न तु त्रयाणां पाठे, सूत्रत्रये सपदकर्तव्यतापेक्षया प्रत्युत गौरवेण पक्षान्तरानुत्थितिप्रसङ्गात् । तथा च पुंशब्दे षत्वापत्तिरिति सर्वमनाविलम् । विसर्गपक्षे सार्थक्यात्कथमिदमित्याह—**तद्विहितेति** । 'अर्थाधिकारा'दित्युक्तं प्राक् । यद्वा शब्दाधिकारे उत्तरविधीनां सर्वथा निरवकाशत्वेन

संहितायाम्। संहिता च—स्वारसिकार्धमात्राकालव्यवायेनोच्चारणम् । ततोऽधिकार्धमात्राकालेनोच्चारणे एतदधिकारोक्तकार्यव्यावृत्तये इदम् । तदधिककालव्यवाये तु न साधुत्वं, नापि बोध इष्यते इति—वृद्धा इति; तेषां शास्त्रविषयतैव नाति भावः ।

छे च। 'छे' इत्यकार उच्चारणार्थः, तेनाच्छिन्नमित्यत्र तुक् । 'ह्रस्वस्य पिती'त्यतो 'ह्रस्वस्ये'ति 'तु'गिति च वर्त्तते। **जश्त्वेनेति** । स्वशब्दे उपपदे छयतेः के स्वच्छशब्दो निर्मले रूढः, एवं नञ्पूर्वाच्छादयतेर्डे अच्छशब्द इति पदान्तत्वं बोध्यम् । स्पष्टञ्चेदममरटिप्पणे ।

❀ अभिनव-चन्द्रिका ❀

उच्चारणमिति । अर्द्धमात्राधिककालाव्यवायेनोच्चारणमित्यर्थः । **षष्ठ्यर्थे पञ्चमीति** । वस्तुतस्तु

❀ चिदस्थिमाला ❀

नाटकप्रयोगस्तु संहिताया अविवक्षया बोध्यः, अस्य तदधिकारे पाठात्। **संहितायामिति** । यद्यपीदमिकोयणचीत्यतः प्रागेव वक्तव्यं, तथापि सूत्रक्रमानुरोधेनात्रोक्तम् । ननु वर्णव्यवाये तस्मिन्निततीति सिद्धं, तच्छून्यकालव्यवाये तु तथानुष्ठितज्योतिष्टोमादेः फलाजनकत्ववत्तेषां तत्त्वेनासाधुत्वेन शास्त्राप्रवृत्त्याऽयं व्यर्थ इति चेन्न, सूत्रमते तद्व्यवेतस्यापि साधुत्वबोधनद्वारा तद्व्यावृत्त्याऽस्य साफल्यात् । अत एवावग्रहादौ संहिताधिकारबहिर्भूतानङादिसिद्धिस्तदाह—**संहिता चेति** । एतेन पूर्वविरुद्धमिदमित्यपास्तम् । उक्तहेतोराह—**एतदिति** । नन्वेवमतिप्रसङ्गापत्तिरत आह—**तदधिकेति** । मुहूर्तादीत्यर्थः । ननु स्वच्छशब्दस्य निर्मले रूढत्वात्तस्यापदान्तत्वेन कथ जश्त्वमत आह—**स्वेति** । **के इति** । 'सति निष्पन्न'इति शेषः । एवमग्रेऽपि । स्वच्छेति सुपूर्वकस्येति पक्षे आह—**एवमिति** । ननु माङ् माने इत्यस्य ग्रहणं कुतो न, माच्छन्दइत्यादि-

❀ ज्योत्स्ना ❀

पिती'ति तुक्प्राप्नोतीति दूषणमुक्तवोक्तं—नैष दोषः, आचार्यप्रवृत्तिर्ज्ञापयति, 'न दीर्घे ह्रस्वाश्रयो विधिर्भवती'ति—यदयं दीर्घाच्छे तुकं शास्ति, नैतदस्ति ज्ञापकमस्ति ह्यन्यदेतस्य वचने प्रयोजनं, किं ?'पदान्ताद्वे'तिवक्ष्यामीति, यत्तर्हि योगविभागं शास्ति, इतरथा हि 'दीर्घात्पदान्ताद्वे'त्येव ब्रूयादिति । छकारस्य तुग्विधाने लेतद्विरोधः स्पष्ट एव । नच दीघादव्यवहितपरश्छकारादव्यवहितपूर्वस्तुग्भवतीति सूत्रार्थे परिभाषयोर्विरोधाभावेन देशविशेषप्रक्लप्तिसिद्ध्या च ज्ञापकानुपयोगः । दीर्घाच्छस्य छे दीर्घस्येति षष्ठ्यंशप्रकल्पने तयोर्विरोधस्तु न । 'प्रत्ययस्था'दितिसूत्रस्थप्रकाशोक्तरीत्या 'क्ङिति चे'ति सूत्रस्थकौस्तुभोक्तरीत्या चानुवादे परिभाषाणामप्रवृत्त्या तदंशस्य तत्राप्रवृत्तेः । विधेयविशेषणे तु परिभाषयोरवकाशः—'इको यणचि' 'उदस्था'दित्यादाविति वाच्यं, विधेयविशेषणतापक्षस्य 'प्रत्ययस्था'दितिसूत्रे मनोरमाशब्दरत्नाभ्यां दूषितत्वेन सामर्थ्यादनुवादेऽपि तयोः परिभाषयोः प्रवृत्त्य-

❀ सदाशिवभट्टीयम् ❀

≍क≍पबाधकत्वम्। तक्रकौण्डिन्यन्यायेन तु तद्विहितविसर्गबाधकत्वं बोध्यम्। **संहितायाम्**। इको यणचीत्यतः प्रागेवेदं युक्तमुपन्यस्तुं यद्यपि, तथापि पाठक्रमादत्रोक्तमित्याहुः । **छयतेः क इति** । 'सति निष्पन्ने'

❀ विषमपदविवृतिः ❀

तत्रिपथगायामुक्तम् । **सवर्णकाल इति** । वर्णसहितकाल इत्यर्थः । **तदधिकेति** । स्वारसिकार्धमात्राकालाद्योधिकोऽर्धमात्राकालस्तदधिकेत्यर्थः ।

आङ्मा । आङ्साहचर्यान्माङ्व्ययमेव । **दीर्घस्यायमिति ।** वक्ष्यमाणज्ञापकाव्याख्यानाद्वा 'दीर्घा'दिति षष्ठ्यर्थे पञ्चमीति भावः । एओङ्सूत्रभाष्ये ध्वनितमेतत् ।

चेच्छिद्यते इति । तुको हलादिःशेषस्तु न । अभ्याससञ्ज्ञानिवृत्तिकाले स्थानिद्वारा साक्षाद्वा सन्निहितानां हलामेव तेन निवृत्तेः । अत एव 'नुगत' इत्यादि चरितार्थम् ।

दीर्घात्पदान्तादिति । पदान्तस्य दीर्घस्येत्यर्थः । योगविभागोऽनयोरेओङ् इति सूत्रे भाष्ये स्पष्टः । 'दीर्घान्तस्य पदस्ये'त्यर्थेन सिद्धेऽन्तग्रहणं पदान्तविधित्वमस्य,–

❀ अभिनव-चन्द्रिका ❀

षष्ठ्यंशविकल–तस्मादिति–परिभाषोपस्थित्या दीर्घाव्यवहितोत्तरत्वविशिष्टोयश्छकारः तदव्यवहितोत्तरत्वविशिष्टस्य तुगित्यर्थेन सामञ्जस्याचिन्त्यमेतत् । **निवृत्तेरिति ।** नच चेच्छिद्यत इत्यादौ स्थानिवत्सूत्रोक्तदिशा तुग्विशिष्टे द्विर्वचनीयविधेयताश्रयावधिकाव्यवहितपूर्वत्वस्य एकदेशविकृतन्यायेन द्विर्वचनीयोद्देश्यताश्रय–द्विर्वचनीयविधेयताश्रयै'तदुभयमात्रारब्धसमुदायघटकत्वस्य च सत्त्वेन पुनरभ्यससञ्ज्ञायाः सुलभत्वेन अभ्याससञ्ज्ञाप्रवृत्तिकाले सन्निहितत्वात्तुको हलादिः शेषो दुर्वार इति वाच्यम्, 'नुगतोऽनुनासिकान्तस्ये'तिशास्त्रारम्भसामर्थ्येन हलनुबन्धकागमानां हलादिः शेषो न भवतीति कल्पनेनादोषात् । 'हलनुबन्धके' इत्युक्त्या चकारेत्यादौ रेफागमस्य हलादिश्शेषो भवत्येवेति दिक् । **पदान्तस्य दीर्घस्येति ।** वस्तुतस्तु पदान्तदीर्घाव्यवहितोत्तरत्व-

❀ चिदस्थिमाला ❀

लक्ष्यसम्भवात् । तत्र माङः क्विप् । अत एव धातोर्ङित्वेऽपि टाबन्तस्याङित्वान्न तुगित्यपास्तम् । अत आह—**आङिति ।** तेन न तत्र नित्यस्तुक्, किन्तु 'पदान्ताद्वे'ति विकल्प एवेति भावः । ननु न तज्ज्ञापकम्, अस्यापदान्तविषयत्वात् , तद्विषयस्योत्तरसूत्रस्य वैकल्पिकत्वाच, तत्रादोषादत आह–**व्याख्यानादिति ।** एतेन तथा प्रतिपादनं, 'दीर्घमतती'त्यादिप्रतिपादनञ्च **रत्नाकरी**यमपास्तम् । व्याख्याने मूलं ध्वनयन्नाह—**ओदिति ।** तत्र हि 'वर्णैकदेशानां वर्णग्रहणेन ग्रहण'पक्षे आलूयेत्यादौ 'ह्रस्वस्य पिती'ति तुकमाशङ्क्य–'छे चे'त्येव सिद्धे 'दीर्घा'दिति तुग्विधानं ज्ञापकं–'न दीर्घावयवस्य ह्रस्वत्वप्रयुक्तस्तु'गिति समाहितम् । **सञ्ज्ञेति ।** यथोद्देशे, कार्यकाले वेति भावः ।

आरेत्याद्यर्थमाह—**स्थानीति ।** प्रयोगभेदेन विकल्पः । अत्र मानमाह—**अत एवेति ।** उक्तरीत्यैव क्रमेणाह—**पदान्तेति ।** ननु प्रकृतसूत्रे 'इको यणची'ति सूत्रभाष्यादेकसूत्रत्वमिति लभ्यत इति कथं मूले भेदेनोक्तिरत आह–**योगेति ।** तत्र हि प्रागुक्तज्ञापकवर्णनावसरे 'पदान्ताद्वे'ति विकल्पार्थं सार्थक्यमुक्त्वा,

❀ ज्योत्स्ना ❀

ङीकारेण दोषसद्भावाज्ज्ञापकस्यावश्यापेक्षणादिति दिक् । **स्थानिद्वारा साक्षाद्वेति ।** 'जहारे'त्यादौ हृ इति ऋकारस्थानिकरेफस्य स्थानिद्वारा, पपाचेत्यादौ चकारादेः साक्षात्; न त्वेवं पम्फुल्यत इत्यादौ नुगादेरिति भावः । **भाष्ये स्पष्ट इति ।** इदं भाष्यं समनन्तरमेव प्रदर्शितम् । **समर्थपरिभाषानु-**

❀ सदाशिवभट्टीयम् ❀

इति शेषः । ननु न तज्ज्ञापकं तस्यापदान्तविषयत्वात्तद्विषयस्योत्तरसूत्रस्य वैकल्पिकत्वाच्चेत्यत आह—

❀ विषमपदविवृतिः ❀

अव्ययमेवेति । न तु धातुरित्यर्थः । **ध्वनिमेतदिति ।** तत्र हि 'वर्णैकदेशा वर्णग्रहणेन गृह्यन्त' इति पक्षे आलूयेत्यत्र ह्रस्वस्येति तुकमाशङ्क्याचार्यप्रवृत्तिर्ज्ञापयति न दीर्घे ह्रस्वाश्रयो विधिर्भवति, यदयं

न पदविधित्वमितिबोधनद्वारा समर्थपरिभाषानुपस्थित्यर्थम् । तेनासामर्थ्येऽप्यस्य प्रवृत्तिरिति समर्थसूत्रे कैयटः । ॥ इति हल्सन्धिः ॥

❀ अभिनव-चन्द्रिका ❀

विशिष्टो यश्छकारस्तदव्यवहितपूर्वत्वविशिष्टस्य तुगित्यर्थो बोध्यः । **कैयट इति** । अनेन पदसञ्ज्ञाप्रयोजकप्रत्ययोत्पत्तिप्रयोजकसञ्ज्ञाशास्त्रीयोद्देश्यतावच्छेदकरूपावच्छिन्नसम्पादकत्वरूपपदविधित्वस्याभावात्समर्थपरिभाषानुपस्थित्या एकार्थीभावाभावेऽपि तुग्भवत्येवेति अन्तग्रहणं स्पष्टार्थमेवेत्ययं कैयटश्चिन्त्य एवेति बोधितमिति दिक् ॥ ❀ **इति हल्सन्धिप्रकरणम्** ❀

❀ चिदस्थिमाला ❀

'यत्तर्हि योगविभागं करोति,इतरथा दीर्घात्पदान्ताद्वेत्येव ब्रूया'दित्युक्तम् । **द्वारेति** । अत्रेति शेषः । **समर्थेति** । विसर्गप्राग्भागानुकरणम् । **तेनेति** । 'तिष्ठतु कुमारी छत्रं मैत्रस्ये'त्यादाविति भावः । एवं रीत्या 'न पदान्ता'दित्यत्र अन्तग्रहणं न सफलं, पदविधिरित्यनेन निषेधान्यविधेरेव ग्रहणेन तत्रादोषात् , तेन 'दुष्टाः षट्सन्तस्य' इत्यादावपि तत्सिद्धिः, अत एव तत्स्पष्टार्थमित्येव प्रागुक्तम् । एतेन पूर्वविरुद्धमिति केन चिदुक्तम् , 'अत्रैव तत्रापि तस्य फल'मिति दण्डयुक्तश्चापास्तम् । **कैयट इति** ।—सूचितारुचिबीजन्तु यावता चेदानीं पदगन्धोस्तीत्यादि तत्रोपपदमिति सूत्रस्थभाष्यविरोधरूपमिति बोध्यम् ।

❀ **इति हल्सन्धिप्रकरणम्** ❀

❀ ज्योत्स्ना ❀

पस्थित्यर्थमिति। 'समर्थसूत्रे एकार्थीभावलक्षणं व्यपेक्षालक्षणञ्चेत्युभयविधं सामर्थ्यं गृह्यते' इति मते, 'वाक्य इव वृत्तौ व्यपेक्षैव नत्वेकार्थीभावः सामर्थ्यं ग्राह्य'मिति मते च बोध्यम् । 'एकार्थीभावलक्षणमेव सामर्थ्यं तत्र गृह्यत' इति मते तु विनाप्यन्तग्रहणं वाक्ये संहिताविरहपक्षे भावफलकात्संहिताधिकारात्प्रागेतस्मिन्सूत्रे कर्तव्ये संहिताधिकारे करणात्समर्थपरिभाषोपस्थित्यभावात्कुमारीच्छादयतीत्यत्र व्यपेक्षायामिव—'तिष्ठतु कुमारी छादयति देवदत्त' इति व्यपेक्षाविरहेऽपि वैकल्पिकतुक्सिद्धेर्नार्थोऽन्तग्रहणेनेति स्वतन्त्राः । अन्ये तु—सूत्रेऽन्तग्रहणाभावे दीर्घरूपस्य पदस्य वैकल्पिकस्तुक् स्यात्—ईच्छादयतीत्यादौ । यद्वा एकपदावयवयोर्निमित्तनिमित्तिनोः सन्निपात एव स स्यात् । चेच्छिद्यत इत्यादौ दीर्घेण पदस्य विशेषणाद्दीर्घान्तस्य पदस्येत्यर्थस्तु दुर्लभः, 'नलोपः प्रातिपदिकान्तस्ये'त्यादावन्तग्रहणात्तदन्तविध्यभावज्ञापनद्वारा पदस्येत्यस्य प्रायेणावयवषष्ठीत्वज्ञापनाद्भाष्यकृदुपन्यस्तादित्याहुः । ❀ **इति हल्सन्धिप्रकरणम्** ❀

❀ सदाशिवभट्टीयम् ❀

व्याख्यानेति । अभ्यासप्रवृत्तिकाल इति । यद्यपि स्थानिवत्सूत्रोक्तरीत्या पुनस्तत्कालोऽस्त्येव, तथापि तत्सञ्ज्ञाप्रयोजकं द्वित्वमिह विवक्षितमिति बोध्यम् । ❀ **इति शेखरविवृतिसङ्ग्रहे हल्सन्धिप्रकरणम्** ❀

❀ विषमपदविवृतिः ❀

दीर्घादिति छे तुकं शास्तीत्युक्तम् । यदि च च्छस्यायं तुक् स्यात्तदा न पूर्वेण तुक्सिद्धिः, तेन ह्रस्वस्य तुग्विधानादिति बोध्यम् । **स्थानिद्वारेति** । इदमुरदित्येतदभिप्रायम् । ❀ **इति हल्सन्धिप्रकरणम्** ❀

॥ अथ विसर्गसन्धिः ॥

विसर्जनीयस्य सः । प्राग्व्याख्यातमपि विसर्जनीयपदानुवृत्तिप्रदर्शनाय स्मारितम् । 'शर्परे' इति बहुव्रीहिः । विशेष्यश्चावध्यवधिमतोः साजात्याद्विसर्जनीयाक्षिप्तः खरेव । विसर्गस्य विसर्गविधौ फलमाह—**न त्वन्यदिति** । अन्यदेव विवृणोति—**इहेति** । **त्रैरूप्यमिति** । विकल्पद्वयसामर्थ्यादिति भावः ।

सोप । **अपदाद्योरिति** । सूत्रे सौत्रत्वादेकवचनम् । **अनव्ययस्येति** । अत्राव्ययीभावातिरिक्ताव्ययस्यैव ग्रहणं, व्याख्यानात् । तेनोपपयस्काम्यतीत्यादौ सत्व-

---

❀ अभिनव-चन्द्रिका ❀

अथ विसर्गसन्धिः । **बहुव्रीहिरिति** । पञ्चम्यर्थ इति शेषः । **व्याख्यानादिति** । अव्ययी-

❀ चिदस्थिमाला ❀

विसर्जनी । पौनरुक्त्यं परिहरति—**प्रागिति** । एवमन्यत्रापि यथायथं बोध्यम् । **बहुव्रीहिरिति** । न तु कर्मधारयः,परग्रहणवैयर्थ्यापत्तेः। 'अनुवृत्त्या तस्य तत्त्व'मिति सर्वोक्तं प्रागुक्तरीत्या न युक्तमिति ध्वनयन्नाह—**विशेष्यमिति** । अवसानव्यावृत्त्यर्थमाह—**श्चावध्येति** । प्रागुक्तरीत्या विसर्जनीयग्रहणस्यावश्यकत्वेन 'तस्येदं फल'मिति सकलग्रन्थासङ्गतेराह—**विसर्गेति** । तस्य तद्विधौ फलाभावादितरव्यावृत्तिरेव फलमिति भावः । **द्वयेति** । 'वा शरि' 'खर्परे शरी'तीत्यर्थः । **सौत्रत्वादिति** । एवञ्च तत्रैव तथा प्रयोगो नान्यत्र । एतेन व्यत्ययेनैकवचनमिति,प्रत्येकसम्बन्धादेकवचनमिति, मण्डूकप्लुत्या खरीत्याद्यनुवर्त्य व्याख्यानेन तदिति, अन्यदपि दण्डिरत्नाकराद्युक्तञ्चापास्तम् । यथा चैतत्तथा स्पष्टं भावप्रकाशे । **स्येतीति** । नन्वेवमव्ययीभावस्थले सत्वं न स्यादत आह—**अत्रेति** । **व्याख्येति** । अव्ययीभावस्याव्ययत्वे लुङ्मुखस्वरोपचारा इति परिगणनमूलकादित्यर्थः । तत्र चोपचारशब्देनातः कृकमीति सत्वमेव गृह्यते, अत एव तत्रानुत्तरपदस्थस्येति

❀ ज्योत्स्ना ❀

विसर्जनीयाक्षिप्तः खरेवेति । अत्र यद्वक्तव्यं तत्प्रागुक्तम् । **अव्ययीभावश्चेत्यत्र भाष्य इति** । यद्यप्युपकुम्भंमन्य इत्यादावनव्ययस्येति मुम्प्रतिषेधादेरप्रवृत्तये तत्र सूत्रे लुङ्मुखस्वरो-

❀ सदाशिवभट्टीयम् ❀

सोपदादौ । ननु 'सः प्रत्यय' इत्येव सूत्र्यताम्, उरः केणेत्यादौ तु यथाश्रुतेऽपि नेष्टमिति चेन्न । तथा सति उरःकाम्यजस्तीत्यादौ प्रत्ययाऽनुकरणेऽतिदेशेन प्रत्ययत्ववत्यौपदेशिकपदत्ववति सत्वापत्तेः । न च तदादेरित्यस्योपस्थित्या विसर्गान्तस्य तदादेः सत्वं प्रत्यये इत्यर्थान्नोक्तदोष इति वाच्यम्, तथाप्युत्तरसूत्रे इणः परस्य विसर्गान्तस्य तदादेः ष इत्यर्थापत्त्या दधि सर्पिष्पाशमित्यत्रैव स्यात्, न सर्पिष्पाशमित्यत्रेति । पदस्येति तु सिद्धान्ते व्यधिकरणमेवेति न दोषः । श्रुतानुमितपरिभाषया

❀ विषमपदविवृतिः ❀

यद्यपि विसर्गस्यापि हल्त्वेन हल्सन्धावेवास्यान्तर्भावः, एवं स्वादिसन्धेरपि, तथापि ब्राह्मणवसिष्ठन्यायेन श्रोतॄणां प्रतिपत्तिसौकर्याय पृथक्कथनम् । श्रोतारो हि विसर्गस्थानिककार्यसन्देहे विसर्गसन्धिप्रकरणमवेक्ष्य निश्चिन्वन्ति । एवं स्वादिस्थानिककार्यसन्देहेऽपि । **अनुवृत्तिप्रदर्शनायेति** । वस्तुतस्तु विसर्गस्थानिकसन्धिकार्याणामुक्तरीत्यैव श्रोतृप्रतिपत्तिसौकर्याय तत्र क्रोडीकारस्यावश्यकतया पुनरुक्तिः । अत एव पूर्वमुक्तमपि 'झलां जशोऽन्ते' इति हल्सन्धौ पुनरुक्तम् । वक्ष्यति पूर्वमुक्तमपि—'कस्कादिषु चे'ति शास्त्रम् । यद्यपि 'झलाञ्जशोऽन्ते' इति शास्त्रं संहिताधिकारस्थं, तथापि वर्णान्तरेण संहितायां 'वावसान' इत्यस्याप्रवृत्त्या जश्त्वश्रवणं निर्बाधमित्येतावता सन्धिकार्यत्वमस्य । अत एव तादृगेव वागीशश्चिद्रूपमित्युदाहृतमित्यलं प्रसक्तानुप्रसक्त्या । **खरेवेति** । नावसानम् ।

सिद्धिरिति स्पष्टम्—'अव्ययीभावश्चे'त्यत्र भाष्ये । **गीःकाम्यतीति** । 'वाःकाम्यती'-त्यस्याप्युपलक्षणमिदम् ।

इणः षः । 'इदुदुपधस्ये'त्यस्यासिद्धत्वात्सर्पिष्पाशमित्यादौ सत्वनिवृत्त्यर्थं, गीष्पाशं दोष्कल्पमित्याद्यर्थञ्चेदम् । अत्रानव्ययस्येत्यपदादाविति काम्ये इति च सम्बद्ध्यते।

❀ अभिनव-चन्द्रिका ❀

भावस्याव्ययत्वे लुङ्मुखस्वरोपचारा इति भाष्यपरिगणनादिति भावः । **उपलक्षणमिदमिति** ।

❀ चिदस्थिमाला ❀

सम्बन्धेनोपचारग्रहणं भगवता प्रत्याख्यातं, तदाह—**स्पष्टमिति**। 'इणः ष' इत्यस्यैतदपवादत्वेन, गौरवेण च मूलस्य, सकलग्रन्थानाञ्चासङ्गतेराह—**वाः काम्येति**। गीःकाम्यतीत्यत्र विसर्जैति सत्वमपि न, विसर्गयुक्त-भाष्योदाहरणात् ।

ननु सर्पिष्पाशमित्यादाविदुदुपधस्येत्येव सिद्धे इदं व्यर्थमत आह—**इदुदुपेति** । सोपदादाविति दृष्टेति भावः । अत एवाह—**सत्वेति** । तदविषयमेवाह—**गीष्पाशमिति** । अन्यथा पूर्वेणात्र सत्वं स्यादिति भावः । क्रमेण व्यावर्त्यत्रयमाह—**तेनोच्चैरिति** । ननु तद्भेदेतत्रयार्थत्वमपि कुतो

❀ ज्योत्स्ना ❀

पचारा इति परिगणनमाश्रितं, तत्रोपचारशब्देन विसर्गस्थानिकः सकारो गृह्यते इत्य'तः कृक-मिकंसकुम्भपात्रकुशाकर्णीष्वनव्ययस्ये'त्यनेनोपपयःकार इत्यादावव्ययविसर्गस्य सत्वनिवृत्तिरिवोप-पयःकाम्यतीत्यत्रापि तन्निवृत्तिः फलमिति वक्तुं शक्यं, तथापि अव्ययीभावस्याव्ययत्वे प्रयो-जनसामान्याभावमङ्गीकृत्य परिगणनाव्ययसञ्ज्ञयोः प्रत्याख्यानपक्षे—उपपयःकार इत्यत्रानुत्तरपद-स्थस्येत्यनुवृत्तेः सत्वाभावोपपादनात्, उपपयःकाम्यतीत्यत्र सत्वाप्रवृत्तये यत्नान्तरस्याकथनाच्च तत्र सत्वाभ्युपगमात्परिगणनपक्षेऽप्युपचारशब्देना'तःकृकमी'ति सूत्रविहितोपचारस्यैव ग्रहण-सिद्धिरित्याशयः । अन्ये पुनः प्रत्याख्यानपक्षे मुखस्वरनिवृत्तये न व्ययमव्ययं भवतीत्यन्वर्थ-सञ्ज्ञाविज्ञानादव्ययीभावस्य क्वचिदव्ययसञ्ज्ञातिदेशस्यावश्यकत्वादुपपयःकाम्यतीत्यत्रापि सत्वा-प्रवृत्तेः परिगणनारम्भपक्षेण समानफलकतां ब्रुवते । **इत्यस्याप्युपलक्षणमिति** । एव-'ञ्चेणःष'इत्यनेनासङ्कीर्णोऽस्य विषयः प्रदर्शितः । 'अनव्ययस्येत्यादी'त्यादिपदात् 'काम्ये रोरेवे' त्यस्य ग्रहणम् ।

❀ सदाशिवभट्टीयम् ❀

श्रुतत्वादिण इति—विसर्गविशेषणमिति । इणः परविसर्गान्ततदादेरित्यर्थाङ्गीकारणोक्तदोषवारणे तु काम्यज-लौकिकप्रक्रियावाक्यीयप्रकृतिप्रत्यययोः प्रत्येकानुकरणे तत्त्वसत्त्वेन तत्र दोषाच्च । **इणः षः** । 'इच' इत्येव सूत्रयितुमुचितम् । **सस्येति** । अनुवृत्तस्य 'स' इत्यस्य षष्ठ्या विपरिणाम इति भावः । अत्र पक्षे षस-

❀ विषमपदविवृतिः ❀

तस्याभावरूपत्वेन वैजात्यादित्यर्थः । **अव्ययीभावश्चेत्यत्र भाष्ये इति** । तत्र हि 'अव्ययी-भावस्याव्ययत्वे 'उपपयःकार' इत्यादौ सत्वाभावः प्रयोजनमित्युक्त्वा—नैतदस्ति प्रयोजनम्, अनुत्तर-पदस्थस्येति प्रतिषेधो भविष्यती'त्युक्तम् । तेनानव्ययस्येति वार्तिकेन सत्वप्रतिषेधेऽव्ययत्वं नेति लक्ष्यत इति भावः । वस्तुतस्त्वव्ययीभावस्याव्ययत्वे प्रयोजनं—लुङ्मुखस्वरोपचारा इति परिगणनारम्भ-तत्प्रत्याख्यानयोः फलैक्यायैतस्याऽभिधानम् । वाःकाम्यतीत्येतस्याप्यनभिधानम् । 'सोपदादा'विति सूत्रे 'रोःकाम्ये' इति वाच्यं, किं प्रयोजनं ? नियमार्थं—'पयस्काम्यति', क्व माभूत् ? 'गीः कम्यती'-ति भाष्यात् । अन्यथा सङ्ग्राह्योदाहरणं सत्वस्य, व्यावर्त्यं तु षत्वस्यापीत्यर्धजरतीयापत्तिः ।

इणःषः । इदुदुपधस्येत्येव सिद्धे इदं व्यर्थमित्याशङ्क्याह—**इदुदुपधस्येति** । **इति च सम्बध्यत इति** ।

तेनोच्चैःकल्पं, दोः पश्य, गीः काम्यतीत्यादौ षत्वं न । अत एव–'अत्र प्रकरणे सर्वत्र सत्वमेव विधेयम्, इण उत्तरस्य विसर्गस्थानिकसस्यानेन षत्व'मिति भाष्योक्तपक्षान्तरं सङ्गच्छते । 'विसर्जनीयस्थानिके'त्युक्त्या पुँस्पुत्र इत्यादौ न दोषः, तत्र हि मस्थानिकः सः। अत्र विसर्जनीयस्येत्यनुवृत्त्यैतदर्थलाभः । 'अनव्ययस्ये'त्यादि त्वत्र पक्षेऽत्र न सम्बद्ध्यते, तेन द्विष्कृतं दुष्काम्यतीत्यादौ षत्वसिद्धिः । 'गीःकाम्यती'त्यादौ सकाराभावादेव न दोषः । अपदादाविति च न सम्बद्ध्यते । तेन दुष्करोतीति षत्वसिद्धिः । परन्त्वयं पक्षोऽसङ्गतः, उत्तरसत्वस्यासिद्धत्वेन 'निष्कृतमि'त्यादौ षत्वासिद्धेः ।

❀ **अभिनव-चन्द्रिका** ❀

वस्तुतस्तु 'सोऽपदादावित्यत्र काम्ये रोरेवेत्यस्य' इणः ष इत्यत्र काम्ये रोरेवेत्यस्य चैकमेव गीःकाम्यतीति फलम्, अन्यथा सोऽपदादावित्यत्र तदभावे सत्वम्, 'इणः ष' इत्यत्र च तदभावे षत्वं दुर्वारं स्यात् । एवञ्चोपलक्षणतया व्याख्यानं हेयमेवेति दिक् । **असङ्गत इति** । परे तु 'इडाया वे'-त्यतः प्रागिणः ष इति सूत्रङ्कर्त्तव्यम्, इण उत्तरस्य विसर्गस्थानिकसकारस्य षो भवतीति तदर्थः । 'विसर्गस्थानिके'त्युक्त्या पुंस्पुत्र इत्यादौ मकारस्थानिकविसर्गस्य न षः । 'समः सुटि' 'पुमः खय्यम्परे' 'कानाम्रेडित' इति सूत्रत्रयेण सकारस्यैव विधानेन तस्यासिद्धत्वाद्रुत्वाद्यभावे विसर्गस्थानिक-

❀ **चिदस्थिमाला** ❀

नात आह—**अत एवेति** । षत्वस्यैष्वनिष्टत्वादेवेत्यर्थः । 'आदा'विति शेषः । तदास्याप्राप्तेस्तदाह—**इण इति** । ततः परस्य त्विर्त्यर्थः । अन्यथा तत्पक्षे तेषु सत्वाभावेन षत्वाभावात्फलभेदापत्तिः स्पष्टैव । **स इति** । प्रतिपादितमिदमधस्तात् । ननूक्तार्थस्य साफल्येऽपि लाभः कथं, स इत्यनुवृत्तस्य षष्ठ्यन्ततास्वीकारेणार्थस्य वाच्यत्वादत आह—**अत्रेति** । अत एवाग्रे मण्डूकप्लुतिः कल्पसम्बन्धत्यागश्च न । चस्त्वर्थे । आदिना काम्ये इत्यस्य परिग्रहः। **अत्र पक्षेऽत्रेति** । भाष्योक्तपक्षान्तरे प्रकृतसूत्रे इत्यर्थः । **तेनेति** । अन्यथाद्ये 'द्विस्त्रिरिति'सत्वेऽन्ययोरि'दुदुपधे'ति षत्वेऽप्रत्ययत्वादन्त्ये दुरो रान्तत्वेन तदप्रकृतिकत्वाच्च तदनापत्त्या तदसङ्गतिः स्पष्टैव । प्रागुक्तातिप्रसङ्गोऽपि नेत्याह–**व्युत्क्रमेण-गीरिति** । आदिना पूर्वयोः परिग्रहः । एतेनोच्चैः कमित्यादौ षत्वं दुर्वारमित्यपास्तम् । द्विष्कृतमित्यादौ कृदन्तेन समासेऽपदादित्वस्य सत्वेन तस्य तदसम्बन्धासाधकत्वाद्भेदेनाह–**अपदेति** । **तीतीति** । इत्यादाविर्त्यर्थः । अयं पक्षान्तरभूतः । 'सोपदादा'विति तु दुर्वचं, पयस्पाशमित्यादौ दोषापत्तेः । एतेनासिद्धत्वे

❀ **ज्योत्स्ना** ❀

'द्विष्कृतं दुष्कृत'मिति पाठः । **उत्तरसत्वस्येति** । 'इदुदुपधस्य' 'द्विस्त्रि'रित्यादिना विहितस्येत्यर्थः ।

❀ **सदाशिवभट्टीयम्** ❀

पदयोरग्रे मण्डूकानुवृत्तिर्नेति बोध्यम् । पूर्वोक्तातिप्रसङ्गो नेति व्युत्क्रमेणाह–**गीःकाम्येति** । **करोतीति** । 'इत्यादा'विति शेषः । प्रकृतसूत्रे उद्योते तु एवं पाठ एव । **असिद्धेरिति** । यथाश्रुतेनैव सिद्धेर्विभक्तिविपरि-

❀ **विषमपदविवृतिः** ❀

अतएव 'रोःकाम्ये'इत्यस्य गीःकाम्यतीति विसर्गघटितं भाष्ये व्यावर्त्य प्रदर्शितम्। अन्यथा सत्वस्याप्रवृत्तावपि षत्वस्य प्रवृत्त्यापत्त्या तदसङ्गतिः । **अत एवेति** । अनव्ययस्येत्यादेरुत्तरसूत्रे सम्बन्धादेवेत्यर्थः । **सस्यानेन षत्वमिति** । 'कुप्वोः परयो'रिति शेषः । 'अपदादा'(विधा)विति चेत्यारभ्य 'षत्वसिद्धि'रित्यन्तो ग्रन्थः पूर्वेण गतार्थः । **असङ्गत इति** । षत्वप्रकरणान्ते 'इणः ष' इत्यस्य पाठे

'प्रकरणे प्रकरणमसिद्धं न योगे योग' इति पक्षस्तु नास्त्येव, ज्ञापकासम्भवादिति—'उपसर्गादसमासेऽपी'त्यत्र निरूपयिष्यामः। 'विसर्जनीयस्यैव षत्व'मिति मूलोक्तपक्षे तु सकारषकारयोः स्वरितत्वेऽपि यथायोगं सम्बन्धो मण्डूकप्लुत्येत्यन्यत्र विस्तरः।

❀ अभिनव-चन्द्रिका ❀

सकारस्याभावा'त्सोऽपदादावि'त्यारभ्य 'इणः ष' इत्यतः प्राक्तनैः सर्वैः सूत्रैः सकार एव विधेयः। तथा च कुत्रचित्स एव, कुत्रचित्ष एव, क्वचिदुभयमनुवर्त्तते इति कल्पना न कर्त्तव्या। किञ्च 'इणः ष' इत्यत्रानव्ययस्येति वाच्यं, 'काम्ये रोरेवे'तिवार्त्तिकद्वयसम्बन्धश्च न कर्तव्यो भवति, 'अपदादा'वित्यत्र स्वरितत्वञ्च कल्पनीयं भवतीति महालाघवम्। उच्चैः कल्पम्, दोःपश्य, गीः काम्यतीत्यादौ विसर्गस्थानिकसकारस्यैवाभावेन षत्वाप्राप्तेः। एतेन परन्त्वयं पक्षोऽसङ्गत इत्युक्तिरेवासङ्गतेतिप्राहुः।

नास्त्येवेति। भोश्छिन्धि, भगोश्छिन्धि, अघोश्छिन्धि, हरिवश्छिन्धीत्यादौ 'वन उपसङ्ख्यानं' 'विभाषाभव'दिति वार्त्तिकदृष्ट्या 'नश्छव्री'ति रुत्वस्यासिद्धत्वाभावातपरत्वात्तेन रुत्वेऽवस्यौकारादेशानापत्तेः, अनुस्वारानुनासिकयोरापत्तेश्च दुर्वारत्वेन 'प्रकरणे प्रकरण'मिति पक्ष आश्रयितुन्न शक्यत इति भावः। अन्यत्र विस्तर इति। वस्तुतस्तु प्रत्ययभिन्नविसर्गस्येदुदुपधस्य ष

❀ चिदस्थिमाला ❀

पूर्वविहितसत्वे एवैतत्प्रवृत्त्या तथैव सिद्धे स इत्यादिकल्पनावैयर्थ्यापत्तिरिति, तन्नेत्यपास्तम्। ननु प्रकरणे प्रकरणमसिद्धमिति पक्षाभिप्रायेण भाष्यमत आह—प्रकेति। ननूपसर्गादसेतिसूत्रे'ऽसमासेऽपी'ति तज्ज्ञापकं, तथाहि पूर्वपदात्सञ्ज्ञायामित्यतः 'पूर्वपदा'दित्यनुवृत्त्या तदाक्षिप्तसमासे एव माभूदिति हि तद्व्याख्यानतः तन्निवृत्तौ तु तद्व्यर्थम्। तत्रासञ्ज्ञायां पूर्वपदादिति नियमव्यावर्तितणत्वप्रतिप्रसवाय समासासमासयोर्विशिष्यविधानार्थं तत्, पूर्वपदादितिदृष्ट्यो'पसर्गादसमासे' इत्यस्यासिद्ध्या नियमेन व्यावृत्तेर्दुष्करत्वादेवञ्च तज्ज्ञापकमेवेति चेन्न। 'रषाभ्या'मित्यत्र 'समानपदे' इत्यस्याखण्डपदे इत्यर्थेन पूर्वपदादित्यस्य विध्यर्थत्वेन तस्य तत्त्वासम्भवात्। एवञ्च तत्स्पष्टार्थमेव तदाह—ज्ञापकेति।

यथेति। एतेनोभयं सर्वत्र स्यादित्यपास्तं, व्याख्यानतो निर्वाहात्। अत्र पूर्ववार्तिकानुवृत्तौ 'यथाज्ञायिनि'चेन्यत्र ग्रन्थविरोधो न तथा तत्रैव स्फुटीभविष्यति। तदाह—इत्यन्यत्रेति।

❀ ज्योत्स्ना ❀

निरूपयिष्याम इति। ज्ञापकं हि असमासेऽपि ग्रहणम्, अविशेषादुपसर्गाण्णत्वविधानेनैव समासे चासमासे च णत्वसिद्धौ तद्वैयर्थ्यं प्राप्तम्—'पूर्वपदात्सञ्ज्ञाया'मेवेतिनियमात्समासेऽप्राप्तेः परिहरणीयम्। नियमं प्रति उपसर्गादित्यस्यासिद्धत्वे पुनर्वैयर्थ्यात्प्रकरणे प्रकरणस्यासिद्धत्वं विना नोपपद्यत इति। तदेतद्यदि'रषाभ्या'मितिसूत्रे लाघवात्समानग्रहणमकृत्वा पदे इत्येतावतैव समासासमासपदयोः सर्वत्रैव णत्वप्राप्तौ 'पूर्वपदात्सञ्ज्ञाया'मित्यनेन नियमः क्रियते; यस्तु नियमाद्विधेर्बलीयस्त्वं मन्यमानः समानग्रहणात्समानमेव यन्निमित्तनिमित्तिनोर्भिन्नाधिकरणत्वाभाववत्पदं तत्रैव यथा स्यादित्याश्रयणाद्ग्रामनामेतिवाक्ये इव

❀ सदाशिवभट्टीयम् ❀

णामेन व्याख्यानसामर्थ्यात्परेषां नासिद्धत्वमिति षत्वं सिध्यतीति। अयमपि पक्षः प्रकृतसूत्रे उद्द्योते सिद्धान्तितः। 'इडाया वा' इत्युत्तरम्, 'इणः ष' इति पठित्वा इष्टसाधनपरो बृहच्छेखरस्तु प्रकारा(शा?)शयासमर्थक-

❀ विषमपदविवृतिः ❀

तु न कश्चिद्दोष इत्याहुः। प्रकरणेति। षत्वसत्वयोर्विधेययोर्भेदेऽपि कुप्वोरिति निमित्तैक्यात्प्रकणैक्यं बोध्यम्।

नमस्पु । इत उत्तरमपदादाविति न सम्बद्ध्यते, व्याख्यानात् । **साक्षात्प्रभृतित्वादिति ।** 'ऊर्यादित्वाद्गतित्वं, स्वरादिपठितस्य तु गतित्वाभावः। तेन साक्षात्प्रभृतिषु च्व्यर्थवचनेऽपि न क्षति'रित्यन्ये ।

इदुदु । 'अप्रत्ययस्ये'ति पर्युदासो, लाघवात् । तत्र प्रत्ययपदं तत्सम्बन्धिपरं, तेन प्रत्ययसम्बन्धिभिन्नस्येत्यर्थः । अत एव 'कविभिः कृत'मित्यादौ न षत्वम् । स्पष्टञ्चेदं

❀ अभिनव-चन्द्रिका ❀

इति सामानाधिकरण्येनान्वयेऽपि न क्षतिः। न च कविभिः कृतमित्यादौ षत्वं दुर्वारं स्यात्, विसर्गस्य प्रत्ययभिन्नत्वादिति वाच्यम्, 'प्रत्ययस्य लु'गिति सूत्रात्प्रत्ययस्येत्यनुवृत्त्यैव सिद्धे 'प्रत्ययलोप'इति सूत्रे प्रत्ययग्रहणसामर्थ्येन षष्ठीप्रकृतिप्रयोज्यप्रत्ययत्वावच्छिन्नविषयता प्रत्ययावयवेऽपि स्वीक्रियत इत्यर्थेन प्रत्ययावयवे विसर्गेऽपि तादृशविषयतायाः स्वीकरणीयतया प्रत्ययभिन्नविसर्गाभावेनादोषात् । 'प्रत्ययपदं तत्सम्बन्धिपर'मिति शेखरस्तु' यत्र पर्युदस्यमानो वर्णः,पर्युदाससमर्पकश्च यत्र समुदायबोधकं पदं तत्र तत्पदन्तदवयवे लाक्षणिकम्। यथा 'नश्छव्यप्रशान्','शेषो घ्यसखि','अत्वसन्तस्य चाधातो' रित्यादौ, एवं प्रकृतेऽपीत्याशयेन लापनीयः । **विस्तर इति** । मातुः कृपेत्यादौ विसर्गस्य अन्तादि-

❀ चिदस्थिमाला ❀

उद्योतादावित्यर्थः । **इत उत्तरमिति** । इत आरभ्येत्यर्थः । **व्याख्येति** । लक्ष्यमूलकादित्यर्थः । मूलादिसकलग्रन्थासङ्गतेः सिद्धान्तमाह—**ऊर्यादीति** । द्वितीयरूपसिद्ध्युपायमाह—**स्वरादीति** । आदौ दोषं सूचयन्नाह—**तेनेति** । **लाघवेति** । वाक्यभेदासमर्थसमासानङ्गीकारात् । सकलग्रन्थासङ्गतिध्वननाय सिद्धान्तमाह—**तत्रेति** । पर्युदासे इत्यर्थः । अग्निः करोतीत्यादौ व्यपदेशिवद्भावेन निर्वाहः । **स्पष्टमिति** । एतेनात्र हरदत्तमनोरमादण्डिरत्नाकरादिभिर्यदुक्तं तदपास्तम् । यथा चैतत्तथा स्पष्टं भाव-

❀ ज्योत्स्ना ❀

समासेऽपि णत्वाप्राप्तिं ब्रूते, तदा पूर्वपदादित्यस्य विध्यर्थत्वाज्ज्ञापकत्वासम्भवः। युक्तञ्चैतत्,-अन्यथा 'माषकुम्भवापेने'त्यादौ 'पदव्यवायेऽपी'त्यनेन वैकल्पिकणत्वप्रतिषेधेऽपि नित्यणत्वप्राप्तेर्वारणाय यत्नान्तरमाश्रयणीयं स्यात् । **उपाध्यायास्तु**—भाष्योक्तज्ञापकत्वस्योपलक्षणत्वेन न्यायात्प्रकरणस्यासिद्धत्वं व्यवस्थापयन्ति; प्रकरणस्यार्थवद्वाक्यत्वात्तदन्तर्गतानां योगानामानर्थक्याद्योगे योगस्यासिद्धत्वायोगात् ।

❀ सदाशिवभट्टीयम् ❀

त्वादनादेय एव । **इत उत्तरमिति** । इत आरभ्येत्यर्थः । **गतित्वाभाव इति** । इदञ्चिन्त्यं, तस्य कुतो न गतिसञ्ज्ञेति । एवं स्वरादिपाठवैयर्थ्यन्तु न, क्रिया(कृञो)योगेऽव्ययसञ्ज्ञार्थकत्वादस्य। एवञ्च नमः करोतीति विसर्गघटितप्रयोगसिद्ध्यर्थं विकल्पेन सञ्ज्ञा स्यादिति साक्षादादिषु पाठ एव युक्तः । उपलभ्यते च तथैव साम्प्रतम्। तस्माद्देवान्नमस्करोतीति भाष्यप्रयोगात्–च्व्यर्थवचनस्य प्रायिकत्वमेव युक्तम्, नमःशब्देऽसम्भवाद्वा। एवञ्च'ऊर्यादिगणे(स्वरादौ च?) पाठेऽपि विकल्पफलसिद्धि'रिति साक्षात्प्रभृतीति सूत्रस्थशेखरोऽपि चिन्त्य एवेत्याहुः । अन्ये तु '**स्वरादिपठितस्य** गतित्वाभाव' इत्यस्यायं भावः-'देवेभ्यो नमः' 'देवान्नमस्करोती'तिदर्शनाद्वाचको द्योतकश्चेति द्विविधो नमःशब्दः, ऊर्यादिषु द्योतकस्यैव ग्रहणं, क्रियायोगे इत्यर्थाधिकारानुगुण्यात् । यदा नमःशब्दः स्वार्थमभिधत्ते, करोतिरुत्पत्तिं—तदा नमःकरोतीति सविसर्गमितीत्याहुः ।

❀ विषमपदविवृतिः ❀

नमस्पुरसोर्गत्योः । गतित्वाभाव इति । 'कृञा योगाभावे' इति शेषः । कृञो योगे तु ऊर्यादित्वेन निपातत्वात्स्वरादिपाठं विनैवाव्ययत्वसिद्धिः । तथा च 'नमः करोती'ति

भाष्ये इत्यन्यत्र विस्तरः । **एकादेशशास्त्रेति** । एकादेशशास्त्रसम्पन्नरेफस्थानिकत्वेन विसर्जनीयस्यैकादेशशास्त्रनिमित्तकत्वं बोद्ध्यम् । स्पष्टञ्चेदमत्र सूत्रे, 'उरण्रपर' इति सूत्रे च भाष्ये इत्यन्यत्र विस्तरः । 'प्रत्ययभिन्नसम्बन्धिन' इति तु नार्थः, 'अग्निः करोती'-त्यादावपि प्रत्ययभिन्नसमुदायसम्बन्धित्वेन षत्वापत्तेः । तपरकरणं किम् ? गीः करोति। उपधाग्रहणं व्यर्थम्, 'उपधाग्रहणं न करिष्यते, इदुद्भ्यान्तु परं विसर्जनीयं विशेषयिष्याम' इति हयवरट्सूत्रभाष्योक्तेः ।

❀ अभिनव-चन्द्रिका ❀

वद्भावेन प्रत्ययसम्बन्धित्वेन षत्वाप्राप्त्या एतज्ज्ञापनस्य नोपयोग इति तत्त्वम् । **षत्वापत्तेरिति** । न च 'प्रत्ययभिन्नसम्बन्धिविसर्गस्य ष' इत्यर्थे सर्वत्र प्रत्ययभिन्नसम्बन्धित्वाद्विसर्गस्य सर्वत्रैव षत्वं स्यादित्यप्रत्ययस्येति व्यर्थं स्यात्तत्सार्थक्याय प्रत्ययभिन्नप्रातिपदिकावयवेदुपधस्य विसर्गस्य ष

❀ चिदस्थिमाला ❀

प्रकाशादौ । तदाह—**इत्यन्यत्रेति** । षष्ठ्यन्तपाठेन विसर्गविशेषणत्वलाभेनैकादेशे तत्त्वेऽपि तस्य साक्षाद-तत्त्वादाह—**एकादेशेति** । तन्निष्पन्नादेशघटकरेफेत्यर्थः । ननूक्तवचनार्थे एव न मानमत आह—**स्पष्टमिति** । तत्र हि 'इह कस्मान्न भवति ? पितुः करोति, 'अग्ने'ति षत्वं प्राप्नोति, अप्रत्ययविसर्जनीयस्येत्यु-च्यते–प्रत्ययविसर्जनीयश्चायं, लुप्यतेऽत्र प्रत्ययाविसर्जनीयो रात्सस्येती'त्युक्तम् । लुप्यते इत्यादेरयमर्थः–प्रत्यय-विसर्जनीयत्वेन यस्त्वामिमतः स लुप्यते=न दृश्यते, स्थानिनः प्रत्ययस्यैव लोपादिति । उक्तज्ञापनेन त्रिपाद्या-मप्यन्तवत्त्वप्रवृत्तिरेव ज्ञाप्यतेऽत एवामी क्षीरपेणेत्यादिसिद्धिः, तेन षत्वाभावः सिद्धः, एवञ्च मूलमार्थिका-र्थकथनपरमिति शब्दरत्नादौ स्पष्टं, तदाह—**इत्यन्यत्रेति** । ननु पर्युदासेप्येतदर्थमन्यार्थाङ्गीकारस्तस्येति न ज्ञापकोपयोगोऽत आह-**प्रत्ययेति** । आदिना 'कविभिः कृत'मित्यादेः परिग्रहः। **गीरिति** । पूः करोती-त्यपि बोध्यम्। एतेन मूले वृत्तौ तदनुक्तेर्न्यूनता ध्वनिता । **व्यर्थमिति** । 'इदुद्भ्यामप्रत्ये'त्येव कार्यं, तच्च पञ्च-म्यन्तं, ताभ्यां परस्य तस्येत्यर्थः। तदाह-**इदुदिति** । तृतीयान्तमिदं । तुर्यत इत्यर्थे—अकरणे हेतुत्वसूचकः। परं= परत्वेन । इदं चायोगवाहानामविशेषेण पाठपक्षे उपधासञ्ज्ञारूपोक्तप्रयोजनखण्डनाय भगवतोक्तम् । परा-

❀ ज्योत्स्ना ❀

इति तु नार्थ इति । तुनारुचिः सूचिता,—तद्बीजन्तु प्रत्ययसम्बन्धिभिन्ने लक्षणा-मपेक्ष्यात्र पक्षे लाघवम् । वैयधिकरण्यान्वयेन प्रत्ययभिन्नसम्बन्धिन इत्यर्थलाभात् । अप्रत्यय

❀ सदाशिवभट्टीयम् ❀

मूले-**पुरः प्रवेष्टव्या इति** । न चास्य लाक्षणिकत्वं, 'पूर्वाधरावराणामसिपुरधवश्चैषा'मितिव्युत्पादितस्यापि लाक्ष-णिकत्वात् । यदा तु नमःसाहचर्यात्पुरोऽव्ययं, पुरःसाहचर्यान्नमस् गतिरेवेत्युच्यते; तदा स्पष्टार्थङ्गतिग्रहण-मिति वदन्ति। **इदुदु** । **तत्सम्बन्धिपरमिति** । एतद्बीजं 'प्रत्ययलोप'इति सूत्रे वक्ष्यते। नन्व'ग्निः करो'ती-त्यत्र विसर्गे कथं प्रत्ययत्वं, सस्य षत्वेन रत्वेन वा स्थानित्वादिति चेन्न । 'तत्स्थानापन्ने'तिलौकिकन्यायेन तदतिदेशात् । प्रत्ययसञ्ज्ञाया यथोद्देशेपि अग्नी इत्यत्र प्रगृह्यत्ववत्पुनः प्रवृत्त्यङ्गीकारेण विसर्गे सुबद्यो-देशत्वेनैव प्रत्ययत्वाद्वा । तत्सम्बन्धित्वं वा विलक्षणं स्वीकार्यम् । **इत्यादाविति** । आदिना 'स्युःपा' डित्यमरप्रयोगः । मनोरमायां विसर्गपाठस्तु पूर्वापरविरुद्धः । **तुनार्थ इति** । विसर्गे वैयधिकरण्येनान्व-यादिति भावः । **षत्वापत्तेरिति** । ननु प्रत्ययभिन्नस्य प्रत्ययसदृशस्य ग्रहणे सादृश्यञ्चार्थवत्त्वे सति

❀ विषमपदविवृतिः ❀

विसर्गघटितमसाध्विति भावः । नमःशब्दांशे गतेरित्यस्य सम्बन्धफलन्तु क्रियायोगाभावे बोध्यम् ।

तिरसोऽन्य। अत्र गतिग्रहणं नानुवर्त्तते, पराभवे तिरस्कारशब्दप्रयोगात्। अन्तर्धावेव तिरसो गतित्वात्।

द्विस्त्रि। 'कृत्वोऽर्थे' इति न विसर्गविशेषणं, चतुःशब्देऽसम्भवात्; किन्तु द्विरादीनामित्याह—**वर्तमानानामेषामिति**। 'इसुसो'रितिसूत्रवक्ष्यमाणरीत्या 'सुच' इति सूत्रयितुमुचितम्; सुजन्तान्तस्य पदस्येत्यर्थात्।

चतुष्कपाल इति। 'इदुदुपधस्ये'ति नित्यं षः। चतुःशब्दोऽव्युत्पन्न इति—'अप्रत्ययस्ये'ति पर्युदासो न। अत एव 'चतुष्पाद्भ्यो ढ'ञित्यादिनिर्देशाः सङ्गच्छन्ते। 'चतुष्पञ्चाश'दित्यत्रापि षत्वं भवत्येव।

❀ अभिनव-चन्द्रिका ❀

इत्यर्थेनाग्निः करोति, कविभिः कृतमित्यादौ न दोषः। विसर्गस्य प्रत्ययभिन्नसमुदायसम्बन्धित्वेऽपि प्रातिपदिकावयवत्वाभावादिति वाच्यम्; 'ओजोभिः कृतम्' 'सख्युः पुत्र' इत्याद्यलुक्समासे प्रत्ययभिन्नसम्बन्धित्वात्प्रातिपदिकावयवत्वाच्च विसर्गस्य षत्वापत्तेः। **सुच इति सूत्रयितुमिति**।

❀ चिदस्थिमाला ❀

भवेपीति पाठः। एतेनान्तर्द्धिसमुच्चयः। एतेनानुवृत्तिपक्षो माधवकौस्तुभायुक्तः परास्तः। **विसर्गेति**। प्राधान्यादिति भावः। ननु सम्पूर्णसूत्रस्थाने 'सुच' इति न्यासे सुजन्तस्य पदस्येत्यर्थेन परमद्विष्करोतीत्यादौ 'प्रत्ययग्रहण' इतिपरिभाषया न स्यादत आह—**वक्ष्येति**। विशेष्यसत्त्वेपि शब्दस्वरूपं विशेष्यमादायादौ तदन्तविधौ पुनस्तेन तदन्तविधिरिति भावः। इदञ्च तत्रैव स्फुटीभविष्यति। तदाह—**सुजन्तान्तेति**।

अस्योभयत्र विभाषात्वन्ध्वनयन्नाह—**इदुदुपधेति**। ननु 'चतेरुर'निति व्युत्पत्त्या कथं तत्प्राप्तिरत आह—**चतुरिति**। सूत्रभाष्यसम्मतत्वात्तत्पक्षस्येति भावः। तत्र सम्मतिमाह—**अत एवेति**। आदिना 'चतुष्पादो गर्भिण्ये'त्यादिसमुच्चयः। यत्त्वे'वं सति मनोरमादिग्रन्था मूलीयस्वप्रयोगविरुद्धा अतो हरदत्तोक्तं वैयधिकरण्यमवश्यं स्वीकार्यम्, एवञ्च चतुष्कपाल इत्यत्र कस्कादेराकृतिगणत्वात्षत्व'मिति **दण्डी**, तत्खण्डयति—**चतुष्पञ्चेति**।

❀ ज्योत्स्ना ❀

इत्यस्य च पर्युदासत्वात्प्रत्ययभिन्नप्रत्ययसदृशाखण्डसमुदायबोधकत्वात्तदवयवविसर्गस्य षत्वविधानेन—'अग्निः करोती'त्यादौ च दोषाभावादित्याहुः। **सुच इति सूत्रयितुमुचितमिति**। इदं

❀ सदाशिवभट्टीयम् ❀

अर्थवदवयवकभिन्नत्वेन। 'कविभिः कृत'मित्यादौ तथाभूते भिसवयवत्वाद्दोषवारणाय सत्यन्तम्, एवञ्च न दोष इति चेन्न। तदपेक्षया सामानाधिकरण्यानुरोधेन लक्षणाया एवोचितत्वात्। **द्विस्त्रिश्चेति**। **असम्भवादिति**। पदविशेषणत्वात्तस्येत्यपि बोध्यम्। ननु प्रत्ययग्रहणे तदादिविधिनियमात्परमद्विष्करोतीत्यत्र न स्यादत आह—**वक्ष्यमाणरीत्येति**। 'वनो र चे'त्यत्रेव पदविशेषणत्वात्तदन्तविधिद्वयमिति भावः। **उचितमिति**। उभयत्र विभाषेयम्। पूर्वञ्चतुःकरोतीत्यत्र 'इदुदुपधे'ति प्राप्तन्निषिध्यते, तत ऐकरूप्यं प्रापितेषु द्विरादिषु—वा विधीयते, 'ह्रक्रोरन्यतरस्या'मितिवत्। अत्र मानम्—'तिरसःसुचोऽन्यतरस्या'मिति न्यासेपि यथायथं षत्वसत्वयोरन्यत्रेवात्रापि सम्बन्धेनोपपत्तौ योगविभाग एव। न च योभविभागा-

❀ विषमपदविवृतिः ❀

द्विस्त्रिश्चतुरिति। इति शब्द—एषामित्यर्थे। **वक्ष्यमाणरीत्येति**। शब्दस्वरूपं विशेष्यमादाय सुजन्तस्ये-

न चे'दुदुपधस्य सस्य यो विसर्ग'इति हयवरट्सूत्रभाष्योक्तेः कथमत्र षत्वमिति वाच्यम्।

ॐ अभिनव-चन्द्रिका ॐ

नच चतुष्करोति, चतुः करोतीत्यादौ 'द्विस्त्रिश्चतु'रिति षत्वस्यासिद्धत्वादिदुपधस्येति नित्यषत्वा-

ॐ चिदस्थिमाला ॐ

नचेद्विति । अयोगवाहानामविशेषेण पाठपक्षे उपधासञ्ज्ञारूपदत्तफलखण्डनायोपधाग्रहणमिति प्रागुक्तपक्षात्प्रथमपक्षत्वेन तत्रोक्तमिदम् । इदुदुपधस्य पदस्यावयवो यः सकारस्तस्येत्यर्थः । अस्यो-पपत्तिश्छायायां स्पष्टा । तत्र 'स'ग्रहणं विसर्गस्यान्युपलक्षणमित्याह—**विसर्गेति** । उपलक्षणत्वेन

ॐ ज्योत्स्ना ॐ

चिन्त्यम् , 'चतुः करोती'त्यत्र त्रिपाद्यां पूर्वं प्रति परस्यासिद्धत्वेन–इदुदुपधस्येति—नित्यषत्वापत्तेः ।

ॐ सदाशिवभट्टीयम् ॐ

त्रिषेधमुखेनैव प्रवृत्त्या चतुःशब्दमात्रविषयकत्वमेव किं न स्यादिति वाच्यं, योगविभागेन 'न भवती'-त्यर्थकल्पनेपि तिरसित्यत्र कल्पस्य 'वा भवती'त्यर्थस्य त्यागे मानाभावात्, योगविभागेनानिष्टापादनस्यानु-चितत्वाच्च । ननूक्तरीत्या 'कृत्वोर्थे' इति न्यासेपि दोषः सुवच इति चेन्न, तत्र न्यासे कृत्वोर्थांशे इदुदुप-धेतिविशेषणान्वयेन द्वन्द्वाप्राप्त्या 'तिरसोऽन्यतरस्यां कृत्वोर्थे' इति व्यस्तपाठे वाक्यार्थद्वयावश्यम्भावेनैक-योगे विभागे वा साम्येन सामर्थ्याभावात् । सामर्थ्यावलम्बनस्यावश्यकत्वे 'सुच'इत्यत्रैव लाघवाच्च । अप्राप्तविभाषात्वे तु चतुःकरोतीत्यत्रास्यासिद्धत्वान्नित्यं षत्वमिदुदुपधस्येति स्यात् । अन्ये तु कस्कादिषु भ्रातुष्पुत्रशब्दपाठेन लोपनिमित्तरेफस्थानिकविसर्गस्येदुदुपधेति षत्वं नेति ज्ञापनादित्याहुः ।

अपरे तु प्रत्ययावयवभिन्नस्येत्यर्थे विध्यर्थत्वात्पाठो न ज्ञापक इत्याहुः। अत्र न्यासे विसर्गान्ते सुजन्तत्वन्तु भूतपूर्वगत्या, सुच्त्वस्य स्थान्यल्वृत्तित्वात्सुजन्तत्वस्याशास्त्रीयत्वादतिदेशाभावेन साम्प्रतिकाभावात् ।

यत्तु इदुदुपधेतिसूत्रं कस्कादिषु चेत्यतः प्राक् पाठ्यमित्याशयः, अतः 'सुच'इत्यस्य नासिद्धत्वं, 'कृत्वोर्थे' इति त्वनुवृत्त्यनुरोधात्तदुत्तरमेवेत्यसिद्धिरेवेति, तन्न । विकल्पप्रवृत्त्यनन्तरं नित्यविधेरभावपक्षे दुर्वारत्वात् । 'नमस्पुर' 'समासेऽनुत्तरपदस्थस्य' 'अतः कृ' 'अधः शि' 'इसुसोःसामर्थ्येऽन्यतरस्यान्तिरसः' 'कृत्वोर्थे' 'इदुदुपधस्य नित्यमप्रत्ययस्य' 'कस्कादिषु'–(इति–) एवं तत्रापि शक्यत्वाच्च । **पदस्येत्यर्थादिति**। विस-र्गान्तस्येत्यपि पदविशेषणं बोध्यम् । जायमानं षत्वमलोन्त्यस्येत्यन्त्यस्य । 'पदस्य यो विसर्ग'इति वैयधिक-रण्ये तु 'ओजोभिः कृतं द्वि'रित्यादौ मध्यमस्य षत्वं स्यात् । 'ओजःसहोम्भसी'ति तृतीयाया अलुक् । वस्तुनो 'द्विवचनबहुवचनयोरलुक् न, अनभिधाना'दिति 'अलुगुत्तर' इति सूत्रभाष्योक्तेरीदृशः प्रयोगे एव नेति बोध्यम् । सूत्रे–इतिकरणं किं ? कृत्वोर्थे विद्यमानस्य विसर्गस्य द्विवारं त्रिवारं चतुर्वारं षो माभूत् । 'अपत्वं पशु'रिति वदर्थेऽसम्भवात्स्वरूपमित्यस्या(प्र)वृत्तिः स्यात् । 'द्विस्त्रिश्चतु'रिति न्यासे तु न लाघवमिति वदन्ति । **न चेदुदुपधस्येति** । अयोगवाहानामविशेषेण पाठपक्षे उपधासञ्ज्ञारूपदत्तफलखण्डनायोपधा-ग्रहणमिति प्रागुक्तपक्षात्प्रथमपक्षत्वेन तत्रोक्तमिदम् । इदुदुपधस्य पदस्यावयवो यः सकारस्तस्येत्याद्य-

ॐ विषमपदविवृतिः ॐ

ति पुनः पदस्येति विशेष्यमादाय सुजन्तान्तस्येति, तेन परमद्विष्करोतीत्यत्र षत्वसिद्धिः । **सुच इति सूत्रयितुमिति**। ननु 'चतुः करोती'त्यत्रैतस्यासिद्धत्वादि'दुदुपधस्ये'ति नित्यं षत्वापत्तिः, यथा-न्यासे तु विशिष्य 'चतुर्ग्रहणेन नित्यषत्वस्य बाधः। न च व्युत्पत्तिपक्षे प्रत्ययविसर्जनीयत्वात्तद-प्राप्तिः, 'चतुष्कपाल'मित्यादिसिद्ध्येऽव्युत्पत्तिपक्षस्यैवाश्रयणीयत्वात् । न च 'प्रकरणे प्रकरणमसिद्धं न तु योगे योग' इति पक्षाश्रयणेन निर्वाहः, तस्यैतद्ग्रन्थकृदनभिमतत्वात् । न च द्विःकरोति त्रिःकरोतीत्यनयोरिसुसोरित्येव सिद्धे चतुःकरोतीत्यत्र नाप्राप्तेऽस्यापवादत्वं, 'द्विःपाक' इत्यादौ समासे सामर्थ्यविरहात् इसुसोरित्यस्याप्राप्तौ अस्यावश्यकत्वादिति चेन्न । 'कृत्वोर्थे' इत्यस्य स्थाने 'सुच' इति सूत्रयितुमुचितमित्याशयात् । यद्वा 'सुच'इत्युत्तरं 'चतुर' इति न्यासः, सुजन्तस्य चतुरः

विसर्गस्य पाठाभावेनोपधात्वासम्भवात्, तत्स्थानिनिमित्तमुपधात्वं ग्राह्यमिति भाष्यतात्पर्यात्। अत एव 'समः सुटी'तिसूत्रभाष्ये 'संपुङ्कानां'मित्यनेन रुविधिरेवास्त्वित्याशङ्क्य–'पुंस्कामे'त्यत्र षत्वापादनं सङ्गच्छते।

न च 'कृत्वोऽर्थे विद्यमानस्य पदस्येदुदुपधस्य यो विसर्ग' इत्यर्थान्न 'पञ्चकृत्वः-करोती'त्यादौ दोषः, नापि 'चतुष्करोती'त्यादावव्याप्तिरिति–'द्विस्त्रिश्चतु'रिति व्यर्थमिति वाच्यं, 'कृत्वोऽर्थे' इत्यस्यासिद्धत्वेन चतुःशब्दे 'इदुदुपधस्ये'ति नित्यषत्वापत्तेः।

'प्रकरणे प्रकरणमसिद्ध'मिति पक्षस्तु–'उपसर्गादसमासेऽपी'ति सूत्रे कैयटे, 'पूर्वपदा'दिति

❀ अभिनव-चन्द्रिका ❀

पत्तिः, 'सुच' इति सूत्रस्य–विसर्गस्य प्रत्ययसम्बन्धित्वेन 'इदुदुपधस्ये'तिषत्वाप्राप्त्या द्विष्करोति, द्विःकरोतीत्यादौ चारितार्थ्येनापवादत्वाभावादिति वाच्यम्; 'द्वित्रिभ्यां सुचः', 'चतुरो लोपश्चे'ति न्यासेन चतुष्करोतीत्यादौ विसर्गस्य प्रत्ययसम्बन्धित्वेन नित्यषत्वाप्राप्त्याऽदोषादिति दिक्।

❀ चिदस्थिमाला ❀

व्याख्याने मानमाह—**अत एवेति**। **षत्वेति**। 'इदुदुपधे'ति भावः। अन्यथा तस्य सस्थानिकत्वात्तदसङ्गतिः स्पष्टैव। अत एव प्रागुक्तद्वितीयपक्षेणैक्यमित्यपि बोध्यम्। ननु 'कृत्वोर्थे' इत्येव सूत्रमस्तु, पदस्येत्यधिकारप्राप्तम्, इदुदुपधस्येत्यनुवर्तते, इत्याशयेन शङ्कते—**नचेति**। 'इदुदुपधस्ये'त्यस्य फलमाह–**न पञ्चेति**। दोषः=अतिव्याप्तिः। तस्य पदविशेषणत्वस्य फलमाह—**नापीति**। **अव्याप्तिरिति**। तदभावेऽन्यथागत्या विसर्गविशेषणतया प्राप्तेरित्यर्थः। तयोरप्रत्ययेति निषेधविषयत्वादाह—**चतुरिति**। ननूपसर्गादसमासेऽपी' त्यत्रासमासेपीति ज्ञापिते'प्रकरणे प्रकरणमसिद्ध'मिति पक्षे नायं दोषोऽत आह **प्रकेति**।

❀ ज्योत्स्ना ❀

नच 'द्विःकरोति' 'त्रिःकरोती'त्यत्रेव 'चतुः करोती'त्यत्रापि व्युत्पत्तिपक्षे प्रत्ययविसर्जनीयत्वात्तदप्राप्तिः, तस्य पक्षस्य ग्रन्थकृदनभिमतत्वात्। नापि 'प्रकरणे प्रकरणमसिद्धं न योगे योग' इति पक्षोऽपि ग्रन्थकृतोऽभिमतो येनासिद्धत्वं न स्यात्। नच 'द्विःकरोति', 'त्रिःकरोति'—इत्यनयोरिसुसोरित्येव सिद्धे 'चतुष्करोती'त्यत्र नाप्राप्तेरस्यापवादत्वमिति वाच्यम्; 'द्विःपाक' इत्यादौ समासे सामर्थ्यविरहादप्राप्तेरस्यावश्यकत्वान्नाप्राप्तेरभावात्। नच 'नित्यं समासे'इति तत्सिद्धिः, 'परमद्विः–पाक' इत्यादावुत्तरपदस्थे तदसम्भवात्। विस्तरस्तु परिभाषाप्रदीपार्चिषि द्रष्टव्यः। **नित्यषत्वापत्तेरिति**।

❀ सदाशिवभट्टीयम् ❀

र्थः। एतदुपपत्तिरिच्छायायां स्पष्टेत्याहुः। तत्र विसर्गग्रहणं विसर्गस्थान्युपलक्षकमित्याह—**विसर्गेति**। **संपुंकानामित्यनेनेति**।=एषां शब्दानाम्, इत्यनेन=समः सुटीत्यादिसूत्रत्रयेणेत्यर्थः। **इत्येवेति**। 'सूत्रमस्त्वि'ति शेषः। **नित्यं षत्वापत्तेरिति**। 'उकारानुवृत्तिसामर्थ्यात्तद्बाध' इति प्रकृतसूत्रस्थप्रदीपोक्तन्तु न युक्तम्, इकारानुवृत्त्या स्वरितत्वसार्थक्यात्, उकारे पृथक् स्वरितत्वे मानाभावात्।

❀ विषमपदविवृतिः ❀

पत्वमिति तदर्थ इति न कश्चिद्दोषः। **स्थानिनिमित्तमिति**। तथा च सत्वेति रेफस्याप्युपलक्षणभावः। **नित्यषत्वापत्तेरिति**। अन्ये तु लाघवाद्द्विस्त्रिरित्येव वक्तव्ये कृत्वोर्थप्रत्यायान्तसामान्ये प्रवृत्त्यर्थं कृत्वोर्थग्रहणाच्चतुःकरोतीत्यत्र नित्यषत्वं बाधित्वा विकल्पप्रवृत्तेरिति न कश्चिद्दोषः। स्पष्टं चेदं प्रकृतसूत्रे कैयटे। अथवा 'सुच' इत्येव वक्तव्ये कृत्वोर्थग्रहणाच्चतुःशब्देपि षत्वम्। 'सुच' इत्युक्तौ हि निर्दिश्यमानपरिभाषया सुचो विसर्गस्यैव षत्वं स्यात्, न चतुःशब्दविसर्गस्येति कृत्वोर्थ-

सूत्रे भाष्ये च दूषित एव । 'उपसर्गा'दिति सूत्रे चोपपादयिष्यते ।

किञ्च पूर्वत्रेति पूर्वशब्देन प्रकरणग्रहणेऽव्यवहितप्रकरणे एव त्रिपाद्यसिद्धत्वं स्यात्, न सम्पूर्णसपादसप्ताध्याय्याम् । किञ्चास्याधिकारत्वात्प्रतिसूत्रमुपस्थित्या प्रतियोगमसिद्धत्वं दुर्वारमित्यन्यत्र विस्तरः ।

❀ अभिनव-चन्द्रिका ❀

दूषित एवेति । 'भोश्छिन्धि'भगोश्छिन्धि, अघोश्छिन्धि' 'हरिवश्छिन्धी'त्यादौ अनुनासिकानुस्वारयोरापत्तेः, अवस्योकारादेशस्य चानापत्तेरिति भावः । नन्वव्यवहितप्रकरणस्यैव पूर्वदृष्ट्याऽसिद्धत्वे 'अ अ'इत्येतत्पर्यन्तानुवृत्तिप्रयोजकस्वरितत्वकरणं व्यर्थं स्यात्, किञ्च प्रतियोगासिद्धत्वकल्पेऽप्यर्थदोषस्तुल्य इत्यत आह—**किञ्चेति** । **दुर्वारमिति** । यथा 'प्राग्दी-

❀ चिदस्थिमाला ❀

दूषित एवेति । दूषितप्राय एवेत्यर्थः। 'पूर्वपदा'दित्यस्य—विध्यर्थत्वस्य तत्र सिद्धान्तत्वेन प्रतिपादनेन तत्पक्षे प्रागुक्तरीत्या ज्ञापकत्वासम्भवेन मूलशैथिल्यात्, प्रागुक्तसिद्धान्तमतेन 'निष्कृत'मित्यादौ षत्वसिध्या भाष्योक्तपक्षान्तरे तत्र षत्वसिद्धिरूपज्ञापकफलस्य तत्र कैयटेनैव निरस्तत्वाच, अत आह—**उपेति** । **चोन्ते** योज्यः। अत्रैव ग्रन्थे इति भावः। नन्वेवमपि न्यायात्तत्पक्षाङ्गीकारः कैयटेनोक्त एवात आह—**किञ्चेति** । प्रकरणानां भिन्नत्वेन विशेषसत्त्वादनन्तरेतिन्यायेनेति भावः । नन्विदं सिद्धान्तेऽपि तुल्यमत आह—**किञ्चास्येति** ।

विनिगमनाविरहादाह—**प्रतिसूत्रमिति** । अत एवा'धिकारः पुनः प्रतिसूत्रं तस्या निर्देशार्थ इति योगे योगे उपतिष्ठते' इति भाष्यं सङ्गच्छते । एतेन कैयटोक्तस्तद्बीजभूतो न्यायः प्रकरणस्यार्थवत्त्वात्तदन्तर्गतयोगानामानर्थक्यरूपो निरस्तः, तेषां प्रत्येकमानर्थक्ये मानाभावात् । स्वस्वसाध्यप्रयोगसाधनेन सार्थक्याच । यदि तु 'द्विस्त्रि'रित्येव साहचर्यात्सिद्धे गुरुभूत'कृत्वोर्थ'इत्युक्त्या तत्र विद्यमाने इदुदुपधीयविसर्गमात्रेऽस्य प्रवृत्तिबोधनेन तत्सामर्थ्याच्चतुःशब्दांशे नित्यषत्वापवादोऽयमिति 'इदुदुपधे'त्यनुवृत्तेरिदुपधांशे तदप्राप्तावप्युदुपधांशे नाप्राप्तिसत्त्वेन तदपवादत्वं सुवचमेवेति वा विज्ञायते,तदा द्विरादिग्रहणं शक्यमकर्तुं, तत्राप्यन्यथा विकल्पसिद्धेः । ध्वनितञ्चेदं भाष्यकैयटादौ । अत एव प्रागुक्त'सुच'इति न्यासे नायन्दोषः । एतेन 'इसुसो'रित्यादि–'विस्तर'इत्यन्तं चिन्त्यं, भाष्यकैयटयोरपि दूषितत्वात् । 'कृत्वोऽर्थे' इति न्यासोक्तदोषस्य 'सुच'इति न्यासेऽपि सत्त्वात्। तद्दूषणपूर्वकपरपक्षखण्डने एव दूषितशब्दप्रयोगात्। प्रथम'किञ्चे'ति दोषस्य भवन्मतेऽपि सत्त्वात् । प्रकरण एवोपस्थित्या 'प्रतियोगमनुपस्थितेश्च'—इति **मन्दोक्तमपास्तम्** । उक्तयुक्तिगणात् । तदाह—**इत्यन्यत्रेति** ।

❀ ज्योत्स्ना ❀

इदं चिन्त्यम् ,—लाघवाद्द्विस्त्रिरित्येव वक्तव्ये कृत्वोऽर्थप्रत्ययान्तसामान्ये प्रवृत्त्यर्थका-

❀ सदाशिवभट्टीयम् ❀

'द्विस्त्रिरित्येव वक्तव्ये कृत्वोर्थग्रहणसामर्थ्यात्तद्बाध' इत्यपि न, इतिशब्दोपादानफलस्य प्रागुक्तत्वात् । तत्करणे तु विपरीतगौरवापत्तेः क तत्सामर्थ्यमिति । **दूषित एवेति** । दूषितप्राय इत्यर्थः । **सूत्रे चेति** । चोऽन्ते योज्यः । **किञ्च पूर्वत्रेति** । सिद्धान्ते तु 'वृद्धिरादै'जित्यारभ्य स्वावधिकः स्वाव्यवहितश्च समूहः पूर्वशब्दार्थः । स्वव्यवहितपूर्वग्रहणे तु ततः परत्वस्य सपादसप्ताध्याय्यामपि सत्त्वेन तत्राप्यसिद्धत्वापत्तेः । स्वस्मात्परग्रहणे तु त्रिपाद्यामनन्तरं पूर्वं प्रति अन्तरं नासिद्धं स्यात् । समूहदृष्ट्याऽसिद्धत्वे फलाभावात् प्रतियोगं पर्यवस्यति तादिति भावः । इत एवारुचेराह—**किञ्चास्येति** । **सप्ताध्याय्यामिति** । 'सपादे'त्यादिः । **प्रतिसूत्रमिति** । अतएवाऽधिकारः पुनः प्रतिसूत्रं निर्देशार्थं

❀ विषमपदविवृतिः ❀

ग्रहणं कृतम् । एतेन 'सुच' इति सूत्रयितुमुचितमित्यपास्तम् । न च सुचतुष्पञ्चाशदिति सुजर्थ-

इसुसोः । अत्रेसुसोः प्रातिपदिकावयवयोर्ग्रहणं, तेन 'पेचुः काष्ठैः', 'सख्युः पाकः', 'कविभिः कृत'मित्यादौ षत्वं न । 'नित्यं समासे' इति सूत्रोदाहरणे समासविषये तयोरेव सम्भवेनार्थाधिकारानुरोधात्, साहचर्याच्च । इसुसन्तपदावयवविसर्गस्येत्यर्थः, पदस्येत्यधिकारात् ।

❀ अभिनव-चन्द्रिका ❀

व्यत' इत्यादौ अवधिसाजात्यादर्थपुरस्कारेण प्रत्ययविधायकेष्वेवाणादेरधिकारः । एवं 'प्रकरणे प्रकरणे एवानुवर्त्तेत' इत्येतज्ज्ञापकलिङ्गाभावात्स्त्रियामित्यादेरिव अस्यापि प्रतिसूत्रमनुवृत्ति-दुर्वारेति भावः । **प्रातिपदिकावयवयोरिति** । इस्साहचार्यदुस् तिङनवयवो गृह्यते । तादृशो स्साहचर्याच्चेस् सुबनवयवो गृह्यते । एतेन प्रातिपदिकावयवयोर्ग्रहणमित्यर्थाल्लब्धामिति

❀ चिदस्थिमाला ❀

अवयवयोः—तयोरेव । लक्ष्यानुरोधस्य मुख्यबोधकत्वं ध्वनयन्नादौ तस्य फलमाह—**तेनेति** । तत्र हेतुमाह—**नित्यमिति** । **समासेति** । तत्सञ्ज्ञाविषये तदुदाहरणे इत्यर्थः । **साहेति** । 'तत्सूत्रे'त्यादिः । मूलासाङ्गत्यायाह—**इसुसन्तेति** । अत्रे'सुसोः प्रत्यययोरर्थवतोश्च ग्रहण'मिति **कैयट-दीक्षितादयः,** अत एव पूर्वसूत्रस्योभयत्र विभाषात्वम् । सर्पिषेत्याद्यनुरोधेन 'इसुस्विषये व्युत्पत्तिपक्षस्यैवा-वश्यकत्व'मिति तेषामाकूतम्, अत एवेयमप्राप्तविभाषेति; तदनुरोधेनाह—**नचेति** । 'प्रत्यये'त्यर्थानुवादः।

❀ ज्योत्स्ना ❀

त्कृत्वोऽर्थग्रहणाच्चतुः करोतीत्यत्र नित्यषत्वं बाधित्वा विकल्पप्रवृत्तेः । स्पष्टश्चेदं प्रकृतसूत्रे भाष्यकैयटयोरिति परिभाषाप्रदीपार्चिषि विस्तरः । **साहचर्याच्चेति** । अलाक्षणिकात्तिङन्तेस्साहच-

❀ सदाशिवभट्टीयम् ❀

इति योगे योगे उपतिष्ठते' इति भाष्यम् । **इसुसोरिति** । **सख्युरिति** । लाक्षणिकत्वेनास्य व्यावृत्तिर्बोध्या । **कविभिरिति** । अव्युत्पत्तिपक्षेऽर्थवानिससम्भवीति भावः । **साहचर्यादिति** । उत्तरसूत्रविषये समास-रूपप्रातिपादिकावयवयोरेवेसुसोः सम्भवेनेहापि तथाभूतयोरेव ग्रहणं, तथाभूतयोः सुप्तिङ्भिन्नयोरेव सम्भव इत्येतत्साहचर्यादुत्तरसूत्रेपि सुप्तिङ्भिन्नयोरेव ग्रहणमिति—'ओजोभिः कृतं' 'सख्युः पाक' इत्या-दावलुकि, चक्रुः पेचुरिति सततं यत्राभिधीयते सा 'चक्रुःपेचु'रित्यादौ च नोत्तरसूत्रप्रवृत्तिरिति बोध्यम् । तिङ्भिन्नेसा साहचर्यादुस् तिङ्भिन्नः, सुबवयवभिन्नप्रतिपदोक्तोसा साहचर्यादिसपि तथैवेति भावः । **पदावय-वेति** ।—फलितार्थकथनमिदं, वाच्यार्थस्त्विसुसन्तविसर्गान्तं यत्पदन्तदन्तस्याल आदेश इति । तेनो'जोभिः

❀ विषमपदविवृतिः ❀

बहुव्रीहौ षत्वानापत्या 'सुच'इति सूत्रयितुमशक्यमेवेति 'कृत्वोर्थ' इत्यस्य न 'सुच' इत्यनेन समान-फलकत्वमिति वाच्यम्, 'कृत्वोर्थ' इत्युक्तावप्यस्यासिद्धत्वेने'दुदुपधस्ये'ति नित्यषत्वस्यैवोक्तस्थले प्रवृत्त्या फलभेदाभावात् । तदेतदभिप्रेत्य वार्तिककारभाष्यकाराभ्यां द्विस्त्रिश्चतुर्ग्रहणं प्रत्याख्यात-मित्याहुः । **इसुसोः साम । तयोरेव सम्भवेनेति** । अव्युत्पत्तिपक्षाश्रयणेनेदम् । इदमयुक्तम्—तदाश्रयणे हि जग्मुः पेचुरिति यस्यां क्रियायामित्या'ख्यातमाख्यातेने'ति समासे 'नित्यं समासे इति षत्वापत्तेः । एवं 'षष्ठ्या आक्रोशे' इत्यलुकि 'सख्युःपुत्र' इत्यत्रापि षत्वापत्तिः । 'सुपीः पचति' 'सुभूः पचती'त्यादौ प्रातिपदिकावयवयवयो'रिसुसोः सामर्थ्ये' इति षत्वापत्तिः । तस्मादिसुसोः सामर्थ्ये इत्येतद्विषये व्युत्पत्तिपक्ष एवाश्रयणीयः । तथा सति 'प्रत्ययाप्रत्यययोः प्रत्ययस्यैव ग्रहणम्' 'अर्थवद्ग्रहणे नानर्थकस्य' 'लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्ये'ति परिभाषाभिः, 'सख्युःपाक'

न च प्रत्ययग्रहणपरिभाषया परमसर्पिष्करोतीत्यादौ षत्वानापत्तिः, अवयवस्ये-सुसन्तत्वेऽपि 'उत्तरपदत्वे चे'ति निषेधेनापदत्वादिति वाच्यम्; 'अनुत्तरपदस्थस्ये'ति निषेधेन क्वचिदुपात्तविशेष्यसत्त्वेऽपि शब्दरूपं विशेष्यमादाय तदन्तविधिज्ञापनेन शब्दरूपं विशेष्यमादाय प्रत्ययग्रहणपरिभाषया लब्धतदन्तार्थकस्य पदविशेषणतया इसुसन्तान्तस्येत्यर्थेनादोषात् । अत एव 'वनो र चे' त्यादौ न दोषः । 'ब्राह्मणस्य

अभिनव-चन्द्रिका

भावः । **साहचर्यादिति** । निरुक्तसाहचर्यादिति भावः । **षत्वानापत्तिरिति** । इसन्ततदादे-रुसन्ततदादेर्विसर्गस्य ष इत्यर्थेन षत्वानापत्तिः । किञ्चाधिकृतपदस्येत्यनेन सामाना-धिकरण्येनान्वयेपि धर्मिणः सिद्धत्वेन तदादित्वधर्ममात्रोपस्थित्या 'इसन्तमुसन्तम्, इसुस् च यस्मा-द्विहितौ तदादित्वविशिष्टं पदं तत्सम्बन्धिविसर्गस्य ष' इत्यर्थेनादोषादिति भावः । ननु 'परम-सर्पिष्करोती'त्यादौ प्रत्ययलक्षणेन 'सर्पि'रितिपदम्, इस् यस्माद्विहितः तदादित्वविशिष्टञ्चेति षत्व-विकल्पो दुर्वार इत्यत आह—**उत्तरपदत्वे चेति** । **शब्दरूपं विशेष्यमिति** । तदादिरूपं शब्दमि-त्यर्थः । **शब्दरूपं विशेष्यमिति** । उक्त एवार्थः । **इसुसन्तान्तस्येति** । इसन्तमुसन्तं यत्तदादि तदन्तं यत्पदं तस्येत्यर्थः । **न दोष इति** । वन्नन्तं यत्तदादि तदन्तात्प्रातिपदिकादित्यर्थादिति-भावः । मूले-**व्यपेक्षेति** । तत्त्वञ्च यत्किञ्चित्पदविशिष्टत्वम्, वै० 'स्वघटितत्व' 'स्वप्रयोज्य-विषयतानिरूपितविषयताप्रयोजकपदघटितत्व' 'स्वप्रयोज्यविषयतानिरूपितत्वाभाववद्विषयता-

❀ चिदस्थिमाला ❀

नन्ववयवस्येसुसन्ततया निर्वाहोऽत आह—**अवयवेति** । निष्कृष्य व्यपेक्षायां मानाभावादेवाह—**उत्तरेति** । तस्य कार्यित्वस्य पदान्तविधित्वस्य च सत्त्वात् । **निषेधेनेति** । उत्तरसूत्रस्थेनेति भावः । उपात्तत्वञ्च तत्रोक्त्याऽनुवृत्त्यादिना वेत्यन्यदेतत् । आक्षिप्तस्य प्रायः शाब्देऽनन्वयादाह—**शब्दरूप-मिति** । आदायेति भावः । अर्थकस्य–इसुसोरित्यस्य । तस्यावश्यकतामाह—**अत एवेति** । ननु 'सापेक्ष-

❀ सदाशिवभट्टीयम् ❀

कृतं' 'सर्पिष्करोती'त्यत्र पूर्वस्य न । पूर्वोक्तरीत्या तस्यासत्त्वाच्च, तयोर्व्यपेक्षाविरहाच्च । अत्रेसुसोः प्रत्यययो-रर्थवतोश्च ग्रहणमिति कैयटदीक्षितौ । अत एव पूर्वसूत्रस्योभयत्र विभाषात्वं, सर्पिषा यजुषेत्यादौ षत्वा-येसुस्विषये व्युत्पत्तिपक्ष एवेति तदाकूतम् । अत एवेयमप्राप्तविभाषेति । तदनुरोधेनाह—**नचेति** ।

निष्कृष्य व्यपेक्षायां मानाभावादाह—**उत्तरपद इति** । तस्य कार्यित्वस्य वस्तुतः पदान्तविधित्वस्य च सत्त्वात् । उपात्तत्वञ्च तत्रोक्त्यानुवृत्त्या वेत्यभिप्रेत्याह—**उपात्तेति** । **ज्ञापनेनेति** । ननु 'पूर्वसर्पिःप्रिय' इत्यादौ मध्यमपदत्वाक्रान्ते उत्तरपदेति निषेधाप्राप्त्येसन्तस्य पदत्वेन निषेधश्चरितार्थ इति वाच्यं, समा-सेन पूर्वपदाध्याहारेणेसन्तस्य पूर्वपदत्वाभाव इति ज्ञापकपरभाष्याशयात् । अध्याहारफलन्तु परमसर्पिः प्रियं यस्येति त्रिपदेऽप्रवृत्तिः । अन्ये त्वर्थ चेत्कृदन्तमेतत्ततोऽधिकेनैवमेव भवेत्प्राप्तिरिति भाष्यस्य परम-

❀ विषमपदविवृतिः ❀

इत्यादौ न षत्वम् । **परस्परसाहचर्येण** कृतोरेवेसुसोर्ग्रहणात्–'पेचुः काष्ठै'रित्यादावपि न षत्व-मित्येव युक्तम् । व्युत्पत्तिपक्षमाश्रित्य शङ्कते—**नचेति** । **इसुसन्तान्तस्येत्यर्थेनेति** । 'अनुत्तर-पदस्थस्ये'त्यनेन । 'पदस्ये'त्यस्य—वैयधिकरण्येनान्वयकल्पनात्परमसर्पिष्करोतीत्यादौ षत्वमित्यपि बोध्यम् । **न कर्तव्यमेवेति** । अन्ये तु—'अयामन्ताल्वाय्येत्न्विष्णु'ष्विति 'तितुत्रतथसि' इति (वदतः) पाणिनेर्व्युत्पत्तिपक्षोपि सम्मतः, 'नित्यं समास' इतिसूत्रे नित्यग्रहणाच्च । अव्युत्पत्तिपक्षे हि

सर्पिष्करोती'त्यादौ सापेक्षत्वेनासामर्थ्यं नाशङ्क्यं, तस्यैकार्थीभावसामर्थ्यविषयत्वात् । 'अधात्वभिहितं समानाधिकरणमसमर्थव'दित्युक्तेः 'सर्पिः कालक'मित्यादौ न षत्वम् । 'अधात्वभिहित'मित्युक्तेः 'सर्पिष्पीयते' इत्यत्र षत्वसिद्धिः । धातुसहचरितप्रत्ययाभिहितार्थेन समानाधिकरणमसमर्थवन्नेति तदर्थः ।

ॐ अभिनव-चन्द्रिका ॐ

प्रयोजकपदाघटितत्व, 'स्वनिष्ठशक्तिग्रहप्रयोज्यशक्तिग्रहविषयीभूतशक्तिपर्याप्त्यनधिरणत्वै'तच्चतुष्टयसम्बन्धेन । प्रत्येकपदेऽतिव्याप्तिवारणाय आद्यसम्बन्धद्वयम् । 'तिष्ठतु सर्पिः पिब त्वमुदक' मित्यादावतिव्याप्तिवारणाय तृतीयसम्बन्धोपादानम् । समासेऽतिव्याप्तिवारणाय चतुर्थसम्बन्धोपादानमिति दिक् । **एकार्थीभावेति** । तत्त्वञ्च–यत्किञ्चिच्छक्तिविशिष्टत्वम् । वै० 'स्वपर्याप्त्यधिकरणघटितत्व' 'स्वनिरूपकेतरनिरूपितशक्तिपर्याप्त्यधिकरणघटितत्व' 'स्वग्रहप्रयोज्यग्रहविषयीभूतशक्तिपर्याप्त्यधिकरणत्वै'तत्त्रितयसम्बन्धेन । यथा 'राजपुरुष'इत्यादौ–राजत्वावच्छिन्ननिरूपितशक्तिपर्याप्त्यधिकरण—राजपद—घटितत्वम्, राजत्वावच्छिन्ननिरूपितशक्तिनिरूपकेतर–पुरुषत्वावच्छिन्ननिरूपितशक्तिपर्याप्त्यधिकरणघटितत्वं, राजत्वावच्छिन्ननिरूपितशक्तिग्रहप्रयोज्यशक्तिग्रहविषयीभूतराजसम्बन्धिपुरुषत्वावच्छिन्ननिरूपितशक्तिपर्याप्त्यधिकरणत्वञ्च वर्त्तते इति लक्षणसमन्वयः । आद्यसम्बन्धद्वयं स्वरूपकथनपरं नतु व्यावर्त्तकम् । तृतीयसम्बन्धोपादानं वाक्येतिव्याप्तिवारणायेति दिक् ।

अधात्वभिहितं समानाधिकरणमसमर्थवदिति। धातुप्रकृतिकप्रत्ययप्रयोज्यत्वाभाववती या विशेष्यताताद्दशविशेष्यतानिरूपिता या अभेदसम्बन्धावच्छिन्ना (सम्बन्धानवच्छिन्ना वा) प्रकारता, ताद्दशप्रकारताप्रयोजकं ताद्दशप्रकारतानिरूपितविशेष्यताप्रयोजकं वा व्यपेक्षारूपसामर्थ्याभाववदित्यर्थः । धातुप्रकृतिकप्रत्ययप्रयोज्यत्वाभाववत्त्वस्य विशेष्यतायां विशेषणदानेन—सर्पिष्पीयत इत्यादौ नासामर्थ्यं, तेपदप्रयोज्यविशेष्यतानिरूपिताभेदसम्बन्धावच्छिन्नप्रकारताप्रयोजकत्वस्य सर्पिःपदे सत्त्वेऽपि तेपदार्थकर्मत्वनिष्ठविशेष्यतायां धातुप्रकृतिकतिङ्प्रत्ययप्रयोज्यत्वाभावस्याभावात् । **धातुसहचरितेति** । धातुप्रकृतिकेत्यर्थः । **प्रत्ययाभिहितार्थेति** । तिङ्वाच्यार्थ इत्यर्थः । **समाना-**

ॐ चिदस्थिमाला ॐ

मसमर्थव'दिति वचनेन 'चैत्रस्य सर्पिष्करोती'त्यादाविष्टषत्वविकल्पो न स्यादत आह—**ब्राह्मेति** । नन्वेवं 'समानाधिकरणमसमर्थव'दित्यस्यापि तद्विषयत्वेन 'सर्पिःकालक'मित्यादावपि षत्वविकल्पापत्तिरत आह—**अधेति** । अस्योभयविषयत्वमिति भावः । नन्वत्र न धातुनाभिधानमत आह—**धातुसहेति** । **अर्थेन**=

ॐ सदाशिवभट्टीयम् ॐ

सर्पिःकुण्डिके'त्युपक्रम्य प्रवृत्तस्य, तथा 'वाक्येपि तर्हि न प्राप्नोति, परमसर्पिःकरोती'ति भाष्यस्य चेसन्ते एकार्थीभावव्यपेक्षयोरभाव इत्येवाशयो, न 'तूत्तरपदे' इति निषेधेनेसन्तस्य पदत्वाभाव इति—मध्यमपदत्वाक्रान्तत्वेन प्रुतात्परत्र सत्त्वेन च तन्निषेधाप्रवृत्तेरित्याहुः । **तदन्तार्थकस्येति** । इसुसित्यस्येत्यर्थः । **धातुसहचरितेति** । इदं समर्थसूत्रकैयटानुरोधेन, 'स्नुक्रमो'रितिसूत्रस्थभाष्यरीत्या

ॐ विषमपदविवृतिः ॐ

'नित्यं समास'इत्यस्य षत्वप्रतिषेधमात्रफलकत्वेन नित्यग्रहणवैयर्थ्यं स्पष्टमेव । किञ्चाव्युत्पत्तिपक्षस्यैवाश्रयणे 'जग्मुः पेचु'रिति यस्यां क्रियायामित्याद्युक्तदोषापत्तेः । तदेतदभिप्रेत्य 'नित्यं समासे'

यदा तु—सर्पिरादिकमव्युत्पन्नं प्रातिपदिकं, पाणिनेरुणादिष्वव्युत्पत्तिपक्ष एवेति 'आयनेयीनी'ति सूत्रे भाष्ये स्पष्टमुक्तेः, तत्र हि 'शङ्ख' इत्यादावादेशानाशङ्क्य—'उणादीनां प्रतिषेधो वक्तव्यः, प्रातिपदिकविज्ञानाच्च भगवतः पाणिनेः सिद्ध'मित्युक्तम्, 'अयामन्ताल्वाय्येत्न्विष्णुषु' इति सूत्रं व्याकरणान्तररीत्यैव, 'सर्वनामस्थान'-मितिमहासञ्ज्ञावत्। अत एव भाष्ये 'उणादयोऽव्युत्पन्नानी'त्येवोक्तम्, न तु 'अनेकार्था अपि धातव' इतिवदव्युत्पन्नान्यपीत्युक्तं, तदा—'इदुदुपधस्ये'ति नित्ये षत्वे प्राप्तेऽनेन विकल्प इति। प्रत्ययग्रहणाभावात्तत्परिभाषानुपस्थितेः—'परमसर्पिष्करोती'त्यादौ षत्व-विकल्पः सिद्धः। 'नित्यं समासे' इति सूत्रमनुत्तरपदस्थस्येतिप्रतिषेधार्थम्। नित्य-ग्रहणन्तु न कर्त्तव्यमेव; समासे नित्यषत्वस्य इदुदुपधस्येत्येव सिद्धेः। 'सर्पिषे'त्यादौ षत्वं त्वत्र पक्षे क्वचिदन्यदेवेत्यर्थकाद्बहुलग्रहणादिति स्पष्टं भाष्ये। **व्यपेक्षेति।**

❀ **अभिनव-चन्द्रिका** ❀

धिकरणमिति। तिङ्प्रयोज्यविशेष्यतानिरूपितसम्बन्धानवच्छिन्नप्रकारताप्रयोजकं, तादृशविशे-ष्यताप्रयोजकं वेत्यर्थः। **विकल्प एवेतीति।** अव्युत्पत्तिपक्षेऽपि 'इसुसो' रित्यस्य 'इदुदुपधे'ति-षत्वापवादत्वात्, इसुसोरित्येतद्दृष्ट्या 'कस्कादिषु चे'त्यस्यासिद्धत्वाच्च विकल्प एवेति भावः। एवञ्च

❀ **चिदस्थिमाला** ❀

कर्मादिना। तृतीयार्थे प्रथमा, प्रसज्यप्रतिषेधश्च। सिद्धान्तमाह—**यदा त्विति।** 'तदे'त्यनेना-न्वयः। तदेवाह—**तत्र हीति।** 'उक्त'मित्यत्रान्वयः। आदेशान्=ईनादीन्। **वक्तव्य इति।** ''न वक्तव्यः, 'ऋतेरीय' ङिति ज्ञापकान्न धातुप्रत्ययानामादेशा'' इति शेषः। अत एवाग्रे चः। नन्वेव-मयामन्तेत्यस्य का गतिरत आह—**अयेति।** अस्या रीतेरावश्यकतामाह—**सर्वेति।** **भाष्ये इति।** 'सिद्ध'मित्यग्रे तत्रैवेति भावः। एवव्यवच्छेद्यमेवाह—**न त्विति।** इतिर्हेतौ। अत्र पक्षे दोष एव नेति न ज्ञापकोपयोगो नापि तस्य तत्त्वसम्भव इत्याह—**प्रत्ययेति।** नन्वेवं समासे 'इदुदुपधे'ति सिद्धमिति 'नित्य'मितिसूत्रं व्यर्थमत आह—**नित्यमिति।** तेन प्राप्तेस्तथा च तत्र स प्रसज्यप्रतिषेध इति भावः। नन्वेवमपि नित्यग्रहणं व्यर्थमेवात आह—**नित्येति।** नन्वत्र पक्षे 'सर्पिषे'त्यादौ का गतिरत आह—**स्पष्टं भाष्य इति।** 'आदेशप्रत्यययो'रितिसूत्रे—अत्र पक्षे तत्र दोषमाशङ्क्य—एवं तर्हि

❀ **ज्योत्स्ना** ❀

र्यादित्यर्थः। **बहुलग्रहणादिति।** **स्पष्टं भाष्ये इति।** वस्तुतस्तु पाणिनेर्न केवलमव्युत्पत्तिपक्ष एव 'तितुत्रे'त्यादावुणादीनामपि केषाञ्चिन्निमित्तत्वेनोपादानात्। 'उणादयोऽव्युत्पन्नानी'त्यस्य लक्ष्या-

❀ **सदाशिवभट्टीयम्** ❀

तिङाङ्कर्मादिद्योतकत्वे तु यथाश्रुतमेव सम्यगिति तत्रैवोद्योते स्पष्टम्। **नेति।** इदं फलितार्थप्रदर्शनम्। पर्युदासस्य न्याय्यत्वेन धात्वभिहितभिन्नमसमर्थवदित्यर्थः। ननु समानाधिकरणं धात्वभिहितं समर्थवदित्येवास्तु 'समानाधिकरणं चेद्धात्वभिहितमेवे'ति नियमादिष्टसिद्धेरिति चेन्न। 'धात्वभिहितञ्चे-त्समानाधिकरणमेवे'ति विपरीतनियमापत्त्या 'सर्पिः पाठकः पिबती'त्यादौ षत्वापत्तेः। **वक्तव्य इति।** 'न वक्तव्यः, ऋतेरीयङिति ज्ञापकान्न धातुप्रत्ययानामादेशा'इति शेषः। अतएवाग्रे चः पठ्यते भाष्ये। **नित्यग्रहणन्त्विति।** समासग्रहणन्तूत्तरार्थमिति भावः। ननु व्युत्पत्तिपक्षे'ऽनुत्तरपद-

❀ **विषमपदविवृतिः** ❀

इति सूत्रे भगवता भाष्यकृतोक्तम्—'अथ चेत्कृदन्तमेत'दिति। 'अथ चेत्सविज्ञान'मित्यादिना

व्याख्यानात्। एकार्थीभावसामर्थ्यग्रहणे 'परमसर्पिःकुण्डिके'त्यादौ समासे विकल्पापत्तिः। 'अनुत्तरपदस्थस्ये'ति निषेधादुत्तरसूत्रस्य न प्रवृत्तिरिति भावः।

नन्वनेनैव सिद्धे कस्कादिषु सर्पिष्कुण्डिकाशब्दपाठो व्यर्थ इत्यत आह— **कस्कादिष्विति**। एतेन 'तत्सामर्थ्यादुत्तरपदस्थस्यापि षत्व'मित्यपास्तम्। **व्यपेक्षाविरहेऽपीति**। 'आनय सर्पिष्कुण्डिका तिष्ठती'त्यादौ। **व्यपेक्षायामिति**। 'इदं सर्पिष्कुण्डिकाया' इत्यत्र। प्रत्ययभिन्नविसर्गस्येत्यर्थम्—'इदुदुपधस्ये'त्यत्र व्याचक्षाणानां व्याख्यादशकृतां मतेऽव्यपेक्षायां तेन सिद्धेरिति भावः। एतेन 'कस्कादिपाठस्याव्य-

❀ अभिनव-चन्द्रिका ❀

'व्यपेक्षायां नित्यार्थश्चे'ति मूलग्रन्थोऽपि व्याख्यादर्शमत एव बोध्यः। अन्यथा कस्कादिषु तत्पाठस्य

❀ चिदस्थिमाला ❀

न हल्वचनात्सिद्ध'मित्युक्तम्, उणादय इति सूत्रे इति भावः। **व्याख्येति**। लक्ष्योत्तरसूत्रीयसमासग्रहण-मूलकादित्यर्थस्तदेवाह—**एकार्थीभावेति**। ननूत्तरसूत्रेण जायत एवात आह—**अनुत्तरेति**। **नन्वनेनैवेति**। 'नित्यं समास' इत्यनेनैवेत्यर्थः। एतेन=तत्र चारितार्थ्येन। **अपास्तमिति**। अत एवा'नुत्तरेति किं ? 'परमसर्पिःकुण्डिके'ति भाष्यं सङ्गच्छते। अन्यथा तद्विरोधोपि स्पष्ट एव। गणे समासैकदेशपाठे मानाभावाच्च। पूर्वफलस्यासम्भवाद्द्वितीयफलमुक्तं मूले, तदपि न सिद्धान्तकथनमित्याह—**प्रत्ययेति**। सामानाधिकरण्येनान्वय इति भावः। तेन=इदुदुपधेत्यनेन। खण्डनकारोक्तिं खण्डयति-**एतेनेति**। तत्रा-

❀ ज्योत्स्ना ❀

नुरोधात्—क्वचिद्व्युत्पत्तिकार्यं न लभन्त इत्येवार्थ इत्यादि परिभाषाप्रदीपार्चिषि विस्तरः।

❀ सदाशिवभट्टीयम् ❀

स्थस्ये'ति पर्युदासात्। समासे लब्धे किमर्थं समासग्रहणमिति चेच्छृणु, पर्युदासेन पदात्परपदस्थस्यैवेत्यादेरपि वक्तुं शक्यत्वेन—आनय सर्पिः पठत्ययं, परमसर्पिः कुण्डिकेत्यादावेव स्यादिति। **भाष्ये इति**। एवञ्च 'तिष्ठतु सर्पिष्पिब त्व'मित्यादौ 'सर्पिष्कालक'मित्यादौ च नित्यं षत्वं न्याय्यम्। भाष्ये सविसर्गपाठस्तु व्युत्पत्तिपक्षाभिप्रायेणेति बोध्यम्। **व्याख्यानादिति**। तच्च 'नित्यं समास' इति सूत्रे भाष्ये स्पष्टम्।

सिद्धेरिति। भाव इति। अयं भावः—असमासे व्यपेक्षाविरहेपि षत्वार्थ' इति वक्तुः प्रत्ययसम्बन्धिभिन्नाविसर्गस्य षत्वमित्येवार्थः सम्मतो व्युत्पत्तिपक्षश्च, अन्यथा व्यपेक्षाविरहेपि प्रत्ययाभिन्नविसर्गस्येत्यर्थे 'इदुदुपधेति' षत्वसिद्ध्या षत्वार्थ इत्यस्यासङ्गतेः। व्याख्यादर्शरीत्याह—**व्यपेक्षायामि**ति। एवञ्च षत्वार्थ इत्ययङ्ग्रन्थः सिद्धान्तभूतः, अयं त्वन्यदीयः। एवं नायं सर्वग्रन्थ एकमतानुसारीति भावः। तथा चाऽस्थितपरमतेपि गणे पाठो नित्यार्थ आवश्यक इति तत्सामर्थ्यादुत्तरपदस्थस्यापि षत्वमिति वक्तुरतिमन्दत्वसूचनाय अप्यर्थकश्चः पठितः। 'इदुदुपधे'तिसूत्रस्थमनोरमाग्रन्थस्तु व्याख्यादर्शानुसारेणेति न तद्विरोधः।

एकमतानुसारेण सर्वो ग्रन्थो योज्य इत्याग्रहे त्वित एवारुचेराह—**व्यपेक्षायामितीति**। योज्यमित्याह—

❀ विषमपदविवृतिः ❀

पक्षान्तरस्याप्यवलम्बनं तु प्रौढिवादमात्रं, तदेतदभिप्रेत्य 'अव्युत्पत्तिपक्षे त्वाश्रीयमाणे सर्पिषेत्यादि न सिद्ध्यतीति व्युत्पत्तिपक्ष एवेसुसन्तस्याश्रयणीय' इति 'नित्यं समासे' इति सूत्रे कैयटेनोक्तम्। आदिपदेन 'भिन्धुः पेचु'रित्यादिपूर्वोक्तदोषसङ्ग्रहः। किञ्चेसुसोर्विषयेऽव्युत्पत्तिपक्षाश्रयणे 'सर्पिःकालक'मित्यादावसामर्थ्यादनेन षत्वाप्रवृत्तावि'दुदुपधस्ये'ति नित्यं षत्वापत्तिः। एवं 'देवदत्तस्येदं सर्पिः फाण्टमिदं यज्ञदत्तस्ये'त्यत्रेदुदुपधस्येति षत्वापत्तिः। कस्कादिषु सर्पिष्कुण्डिकाशब्दपाठस्तु व्यपेक्षायां तदभावेऽसमासे च नित्यार्थः। असमासे व्यपेक्षाविरहे चेदुदुपधस्येति

पेक्षायां चारितार्थ्येन व्यपेक्षायां तस्यासिद्धत्वाद्विकल्प एवोचित' इत्यपास्तम् । प्रत्यय-सम्बन्धिभिन्नविसर्गस्येत्यर्थे तु तदप्राप्तिरेवेति—व्यपेक्षायां विकल्प एवेति बोद्धयम् ।

अतः कृ । कृशब्देन तदादिग्रहणं, समासाक्षिप्तोत्तरपदस्य विशेष्यत्वात् । 'विष्वग्देवयो'रिति सूत्रे वप्रत्ययग्रहणेन धातोर्विशेषणत्वे तदादिविधिज्ञापनात् ।

'अयस्कुम्भी'त्यादौ लिङ्गविशिष्टपरिभाषया सत्वं बोद्धयम् । **भास्कर इति** । तपरकरणात् 'अतः कृ'इत्यस्याप्राप्तिः । *** इति विसर्गसन्धिः ***

❀ अभिनव-चन्द्रिका ❀

व्यपेक्षाविरहेऽसमासे चारितार्थ्येनासिद्धत्वाद्व्यपेक्षायां विकल्पो दुर्वारः स्यात् । **तदादिग्रहणमिति** । सम्बन्धानवच्छिन्ना (अभेदसम्बन्धावच्छिन्ना वा) या प्रकारता तादृशप्रकारताप्रयोजकं धातुबोधकसप्तम्यन्तम्पदं स्वबोध्यार्थाद्यवयवकपरं बोध्यमित्यर्थिकया'धातुग्रहणे तदादिविधि'रिति परिभाषयेति भावः । **धातोरिति** । धातुबोधकसप्तम्यन्तस्येत्यर्थः । **विशेषणत्वे इति** । सम्बन्धानवच्छिन्नविशेष्यताप्रयोजकत्वे इत्यर्थः । **अधः शिरसी पदे** । अधस्पदं शिरस्पदञ्च पदशब्दे परे सत्वं लभते इति सूत्रार्थः । *** इति विसर्गसन्धिः ***

❀ चिदस्थिमाला ❀

चारितार्थ्येनेत्यर्थः । **तस्येति** । 'कस्कादी'त्यस्यासिद्धत्वादि'सुसो'रितिविकल्प इत्यर्थः । तंथाच व्याख्यादर्शानुसारेण मूलम् । एतेन रत्नाकरदण्ड्याद्युक्तमपास्तम् । अत एव सिद्धान्तमाह—**प्रत्ययेति** । उक्तरीत्येति भावः । ननु विशेष्याभावात्कथं तदन्तविधिरत आह—**समासेति** । नन्वेवमपि वचनाभावात्कथं तदत आह—**विष्वगिति** । नन्वत्र 'समासेनुत्तरे'त्यस्यानुवृत्त्या विसर्गान्तस्य पूर्वपदत्वबोधनेन तदाक्षिप्तोत्तरपदस्य प्रत्यासत्त्या कंसादिरूपस्यैव ग्रहणेनायस्कुम्भीत्यादौ सत्वं न स्यादत आह—**अयसिति** । पुनरुपन्यासे बीजं ध्वनयन्नाह—**तपरेति** । एतेन 'सौत्रक्रमानुरोधेन पुनरुपन्यास' इति रत्नाकरोक्तमपास्तम् ।

*** इति विसर्गसन्धिः ***

❀ ज्योत्स्ना ❀

इति बोध्यमिति । यदा तु 'प्रकरणे प्रकरणस्यासिद्धत्वं न योगे योगस्ये'ति पक्षस्तदा परत्वाद्विकल्पं बाधित्वा व्यपेक्षायान्नित्यार्थः पाठ इत्यपरो मूलकृदभिप्रायः । *** इति विसर्गसन्धिः ***

❀ सदाशिवभट्टीयम् ❀

विकल्पेति । तदभावे नित्यविधिस्तु न, विकल्पविधीनां सति सम्भवे नवेतीत्यारम्भेणोभयत्र विभाषात्वात् । न च सिद्धत्वम्,आश्रयात् । 'असिद्धत्वाद्विकल्प'इत्यापाद्यमानग्रन्थस्तु चिन्त्य एव । यद्वा साहचर्य्येण विकल्पविषयेऽप्राप्तत्वादिति तदर्थः । **आक्षिप्तेति** । लक्ष्यानुरोधादध्याहृतेत्यर्थः । पुनरुक्तौ बीजमाह—**तपरेति** ।

❀ इति शेखरविवृतिसङ्ग्रहे विसर्गसन्धिः ❀

❀ विषमपदविवृतिः ❀

षत्वासिद्धेरित्याहुः । **व्यपेक्षायां विकल्प एवेति बोध्यमिति** । इदमयुक्तम्—विकल्पेन मुक्ते कस्कादित्वान्नित्यषत्वप्रवृत्तेः सुलभत्वात् । किञ्चाव्युत्पत्तिपक्षस्यैव स्वेनाश्रयणेनाव्यपेक्षायामिदुदुपधस्येत्यनेनैव षत्वसिद्धया व्यपेक्षायां पाठसामर्थ्येनैव नित्यषत्वसिद्धिः । ननु 'परमसर्पिःकुण्डिके'त्यत्र कस्कादित्वात्षत्वं दुर्वारम् । नचानुत्तरपदस्थस्येति प्रसज्यप्रतिषेधाश्रयणेन 'कस्कादिषु' चेति विहितस्यापि षत्वस्य निषेध इति वाच्यं, निषेधदृष्ट्या तस्यासिद्धत्वेन तन्निषेधासम्भवादिति चेन्न । 'प्रकरणे प्रकरणमसिद्ध'मिति तत्पक्षाश्रयणेन प्रसज्यप्रतिषेधाश्रयणसामर्थ्येन वा षत्वमात्रस्य निषेधाङ्गीकारात् । अत्र चा'नुत्तरपदस्थस्येति किं ? 'परमसर्पिःकुण्डिके'ति भाष्यं मानम् । न चैवं 'परमसर्पिष्कल्प'मित्यत्रे'णः ष' इत्यस्यापि निषेधापत्तिः, कवर्गपवर्गघटिते एव समासे 'अनुत्तरपदस्ये'ति—निषेधप्रवृत्तेः । न च 'परमसर्पिष्कल्पपुत्र'मित्यत्र निषेधापत्तिः, प्रत्यासत्त्या कवर्गाद्युत्तरपदकसमास एवोक्तनिषेधप्रवृत्तेः । *** इति विसर्गसन्धिः ***

॥ अथ स्वादिसन्धिः ॥

यत्तु 'रुत्रौज'सित्यत्र रुरेव पाठ्यः, सर्वत्र सुग्रहणे रुग्रहणमेवास्त्विति, तन्न। यशोऽत्रे-त्यादौ रोरसिद्धत्वादुत्वानापत्तेः, 'अतो रो'रित्यस्य प्रथमैकवचने चारितार्थ्यात्। तद्ध्वनयन्नाह—**स्वौजसेति**। 'पदस्ये'त्यनुवृत्तं ससजूर्भ्यां विशेष्यते, तेन तदन्तविधिः। आदेशस्त्वलोऽन्त्यस्येत्यन्त्यस्य। तत्फलितमाह—**पदान्तस्येत्यादिना**। 'सजू'रित्यत्र व्यपदेशिवद्भावेन सिद्धिः। 'व्यपदेशिवद्भावोऽप्रातिपदिकेन' 'ग्रहणवता प्रातिपदिकेन तदन्तविधिर्ने'ति परिभाषाद्वयं प्रत्ययविधिविषयमिति—'असमासे निष्कादिभ्य' इत्यत्र भाष्ये स्पष्टम्। इदञ्जश्त्वापवादः। श्रेयानित्यादौ रुत्वस्यासिद्धत्वात्संयोगान्तलोप एवेति दिक्।

❀ अभिनव-चन्द्रिका ❀

उत्वानापत्तेरिति। न च 'वौंजसमौ'डिति न्यासे राम इत्यस्यां दशायां विसर्गस्यासिद्धत्वात् 'सुपि चे'ति दीर्घो दुर्वार इति स एव दोषो देय इति 'यशोत्रे'त्यादौ उत्वानापत्तिरूपदोषपर्यन्तानु-धावनं किमर्थमिति वाच्यं, 'सुपि चे'त्यादावपि चेतिन्यासेन तृतीयादावेव प्रवृत्त्या राम इत्यादौ दीर्घापत्तिरूपदोषवारणात्। **प्रत्ययविधिविषयमिति**। इदमुपलक्षणम्—सूत्रोपात्तमन्तपदम्, आदिपदं वा—प्रातिपदिकमात्रग्रहणञ्च यत्र तद्विषयत्वं-व्यपदेशिवद्भावोऽप्रातिपदिकेनेत्यस्येत्यस्य,

❀ चिदस्थिमाला ❀

प्राचोक्तं खण्डयति—**यत्त्विति**। **रुरेवेति**। तत्सूत्रस्यान्यार्थमावश्यकत्वेप्यत्र प्रक्रियालाघवायेति भावः। **प्रथमैकेति**। तत्रोकारानुबन्धस्तु यत्वविधावुभयग्रहणेन सफल इति भावः। मूलासङ्गतिं परिहरति—**पदेति**। नन्वेवं सजूरित्यत्र न स्यात्पदाधिकारे पदस्य विशेष्यत्वेन तदन्ते कार्यप्रवृत्तेरत आह—**सजूरिति**। 'स्वं रूप'मित्यस्य प्रत्याख्याने इदम्। एतेन 'सजू'रित्यस्य सिध्यर्थं सजुःशब्दो-यत्पदमित्येवान्वय इति **प्रकाश**कृदुक्तमपास्तं, तद्ध्वनयन्नाह—**द्वयेति**। **भाष्ये इति**। तत्र ह्यसमास-ग्रहणप्रयोजनकथनावसरे—'आर्हादगोपुच्छे'त्यत्र तदन्तविधौ 'परमगोपुच्छिक'मित्यत्र ठक्प्रतिषेधाठ्ञ्फलमित्यु-क्त्वा तत्खण्डनाय—विधौ प्रतिषेधः 'प्रतिषेधश्चाय'मित्युक्तम्। **जश्त्वेति**। एतद्विषये तस्य नाप्राप्तेः सत्त्वात्। एतेन मूलेऽस्याऽपाठः सूचितः। अत एवाह—**श्रेयानिति**। दिगर्थस्तु—शब्दरत्नभावप्रकाशयोः स्पष्टः। ननूत्व-

❀ ज्योत्स्ना ❀

कृतेत्वस्मिन्निति। सूत्रे इत्यर्थः। **व्याख्यानादिति**। [४०६ पृष्ठे] सप्तसु विभक्तिषु प्रथमे ये विभक्ती

❀ सदाशिवभट्टीयम् ❀

रुरेवेति। 'राम' इत्यादौ 'सुपि चे'ति दीर्घस्तु न, अनाप्यक इत्यत्रेवापि चेति न्यासात्। नन्वेवं 'ङ्याप: सो'रिति निष्कर्षे 'हे प्रियचत्व' इत्यत्र 'रात्सस्ये'तिनियमात्संयोगान्तलोपाप्राप्त्या 'रोरी'ति लोपे 'ढ्लोप' इति दीर्घापत्तिरिति चेन्न। तस्य निष्कर्षस्य दूषयिष्यमाणत्वात्। **चारितार्थ्यादिति**। 'अप्लुता'-दित्यस्य तु न सामर्थ्यं, 'वात्सीबन्धु'रिति भाष्योपष्टम्भेनाऽसन्बुद्धावपि प्लुतप्रवृत्तेरुक्तत्वेन 'आयातु भवान् देवदत्ताऽहं गच्छामी'त्यादौ चारितार्थ्यात्। 'हलोऽनन्तराःसंयोगान्तलोपो रोरुत्वे' इति ज्ञापकान्नासिद्धत्वमिति चेदापीति न्यासे न किञ्चिल्लाघवमिति बोध्यम्। 'ससजुषोरु'रित्यत्रोकाराऽ-नुबन्धस्तु यत्वविधावुभयग्रहणाभावार्थ इति तत्सामर्थ्यादसिद्धत्वं नेति न वक्तुं युक्तम्। **भाष्ये स्पष्टमिति**। अत्रत्यन्तत्त्वं परिभाषेन्दुशेखरविवृतिसङ्ग्रहे स्पष्टम्। **जश्त्वेति**। बाध्यविशेषचिन्तायां

❀ विषमपदविवृतिः ❀

कृतेत्वस्मिन्निति। सूत्र इत्यर्थः। **सुब्विभक्त्योर्ग्रहणमिति**। सप्तसु विभक्तिषु ये प्रथमे विभक्ती इत्यर्थः

यत्वस्यापवाद इति। 'यदीदं न स्यात्तर्हि यत्वं प्राप्नोती'त्येतावता। कृते त्वस्मिन् यत्वस्यासिद्धत्वादुत्वगुणयोर्यत्वाप्राप्तिरेवेति भावः।

प्रथमयोः। व्याख्यानात्प्रथमयोरित्यनेन प्रथमाद्वितीयारूपसुब्विभक्त्योर्ग्रहणम्,

❀ अभिनव-चन्द्रिका ❀

उगिद्भिन्नत्वे सति प्रत्ययभिन्नत्वे सति वर्णभिन्नत्वं ग्रहणवत्प्रातिपदिकत्वमित्येतद्विषया ग्रहणवत्परिभाषा-इत्यस्य च। अत एव 'रोणी' 'अग्रान्त' 'अनुदात्तादेर'ञित्यादिविषये आद्या, 'उगितश्च' 'अत इञ्' 'यञिञोश्चे'त्यादौ द्वितीया च न प्रवर्त्तते इति दिक्। 'यत्वस्यापवाद' इति कौमुदीपाठः प्रक्षिप्त इति बोध्यम्। **सुब्विभक्तेरिति।** इदमत्राकूतं-'प्रथमयो'रित्यस्य प्रथमत्वविशिष्टयोरित्यर्थः। प्रथमत्वविशिष्टप्रथमाद्वितीयागतं द्वित्वं द्विवचनार्थः। प्रथमत्वञ्च-यादृशसङ्ख्याविशिष्ट-

❀ चिदस्थिमाला ❀

दृष्ट्या यत्वस्यासिद्धत्वेनैतद्विषये तस्य नाप्राप्त्यभावेन कथं तत्त्वमत आह-**यदीदमिति**। सूत्रमित्यर्थः। एवमग्रेऽपि। एकशेषस्य द्वन्द्वापवादकत्वमिवेति भावः। **उत्वगुणयोरिति**। रोरुत्वादेशेऽव्यवहितक्षणे गुणप्रवृत्तिः, तथा चातिदेशस्य कार्यार्थत्वादुत्वे रुत्वं नातिदिष्टमिति तत्स्थानिकगुणे रुत्वं स्थानिवत्त्वेन नायास्यतीति भावः। कृते त्वस्मिन् यत्वस्यासिद्धत्वादुत्वगुणयोः कृतयोरुत्वाप्राप्तिरित्येतावतेति भावः। वक्ष्यमाणरीत्यालिविधित्वस्याभावादुत्वे कृते स्थानिवत्त्वेन स्यादतो 'गुणे'त्युक्तम्। एतेन "-ननूत्वे कृते तस्य स्थानिवत्त्वेन रुत्वाद्यत्वं स्यादत आह-**यत्वस्यापवाद इति**। विधानसामर्थ्यादुत्वं यत्वस्य बाधकमित्यर्थ-"इति दण्डयुक्तम्; "ननु परत्वाद्यत्वं स्यादत आह-**भोभगो इति**। येन नाप्राप्तिन्यायादिति भावः-"इति रत्नाकरोक्तञ्चापास्तम्। उक्तयुक्तेः। 'वा सुपी'त्यतः 'सुपी'त्यनुवृत्तेर्न तिङ्प्रत्ययस्य ग्रहणं, सुपामप्यादितः प्रत्यययोर्न ग्रहणं, 'तस्माच्छसो न' इति लिङ्गात्, 'इको य'णित्यतोऽचीत्यधिकाराच्च। यद्यपि शिवोर्च्यं इत्यादावुत्वे कृते प्रथमस्याप्यच्त्वमस्ति, तथापि नादिचीति निषेधः। हरिः करोतीत्यादौ तु विसर्गस्यासिद्धत्वान्नैव प्रवृत्तिरतः प्रथमा च प्रथमा चेत्येकशेषेणैकः स्वार्थपरो द्वितीयो लक्षणया द्वितीयापरस्तदाह-**व्याख्येति। दीर्घेति।** 'अकः सवर्णे'इत्यतो-

❀ सदाशिवभट्टीयम् ❀

'येन नाप्राप्ति'न्यायेनेति भावः। बाध्यसामान्यचिन्तायान्तु श्रेयानित्यादौ सुलोपं बाधित्वा रुत्वे यणः प्रतिषेधारम्भात्, झलो लोपाद्वा स न स्यादिति भावः। **दिगित्युक्त्या** बाध्यसामान्यचिन्तायां भाष्योक्तपक्षान्तराणां सङ्ग्रह इति बोध्यम्। **उत्वगुणयोरिति**। ननु कृतेप्युत्वे तस्य स्थानिवत्त्वेन रुत्वाद्यत्वं स्यादत आह—**गुणेति**। तत्र कृतेऽपूर्वत्वाभावात्तदप्राप्तिरिति भावः। **व्याख्यानेति**। तच्च प्रकृतसूत्रभाष्यादिषु **स्पष्टम्। स्पष्टार्थमिति**। रूढिप्रयोजनयोरभावेन लक्षणया प्रयोगस्यान्याय्यत्वादिति भावः। प्रकृतसूत्रे उद्द्योते स्पष्टमिदम्। **अदीर्घत्वादिति**। यद्यपि 'बहुश्रेयसी'नित्यादौ दीर्घोपि सम्भवति,

❀ वरवर्णिनी ❀

प्रथमयोरिति। इदमत्रावधेयम्—'एषु दश प्रथमान्भोजये'त्यादि सर्वानुभवसिद्धलोकव्यवहारेण 'स्वौज'सित्यादावपि प्रथमत्वं प्रथमायामिव प्रथमाद्वितीया-प्रथमाद्वितीयातृतीया-प्रथमाद्वितीयातृतीयाचतुर्थ्यादिसमुदायेऽप्यस्त्येव। परन्तु 'प्रथमयोः पूर्वसवर्ण' इत्यत्र-व्याख्यानाद्वितीयान्तसमुदायवृत्तिप्राथम्यमिह विवक्षितमिति प्रथमयोरित्यत्र नैकशेषावश्यकता।

तथा च यादृशसमुदायनिरूपितं प्राथम्यं विवक्षितं तादृशसमुदायविशिष्टत्वं प्रथमत्वमिति तत्त्वम्। वै० 'स्वघटकवृत्तित्व' 'स्वघटकवृत्तिसङ्ख्योत्पादकापेक्षाबुद्धीयधर्मितावच्छेदकत्व' 'स्वारम्भकविशिष्टभिन्नत्वै'-तत्त्रितयसम्बन्धेन। सम्बन्धघटकवै० 'स्वावृत्तित्व' 'स्वोत्तरवृत्तित्वो'भयसम्बन्धेन। प्रथमयोरिति द्विवचनार्थस्तु— स्वप्रकृत्यर्थतावच्छेदकीभूतसङ्ख्यायामभेदेनान्वेति, स्वाभिन्नसङ्ख्याश्रयत्वसम्बन्धेन प्रकृत्यर्थे वा।

तदाह—**प्रथमाद्वितीययोरिति** । पूर्वग्रहणं किम्? 'अग्नी' इत्यत्र पक्षे परसवर्णो मा भूदिति । दीर्घग्रहणन्तु त्रिमात्रस्य स्थानिनस्त्रिमात्रो मा भूदिति । सवर्णग्रहणन्तु स्पष्टार्थम् । पूर्वस्यादीर्घत्वात्पूर्वजातीय इत्यर्थेनेष्टसिद्धेरिति स्पष्टं भाष्ये । **आद्गुण इति** । 'तौ स'दिति निर्देशेन भ्रष्टावसरन्यायस्यात्र शास्त्रेऽनाश्रयणादिति भावः ।

❀ अभिनव-चन्द्रिका ❀

निरूपितं प्रथमत्वं वक्तव्यं—तत्सङ्ख्याविशिष्टत्वम् । वै० 'स्वजनकापेक्षाबुद्धीयैकत्वनिष्ठप्रकारतानिरूपितधर्मितानाश्रयत्व', 'स्वप्रयोजकापेक्षाबुद्धीयैकत्वनिष्ठप्रकारतानिरूपितधर्मितावच्छेदकताश्रयत्वे' तदुभयसम्बन्धेन । यथा प्रकृते–सप्तत्वविशिष्टविभक्तिसमुदायनिरूपितत्वं प्रथमत्वं वक्तव्यं, तज्जनिकापेक्षाबुद्धिः, 'इमाः षट् , एतद्विशिष्टेयमेके'ति, तदीयैकत्वनिष्ठप्रकारतानिरूपितधर्मिताश्रयत्वं–सप्तम्यां, तदनाश्रयत्वं-प्रथमाद्वितीयात्मकसमुदाये । एवं–स्वप्रयोजिका यापेक्षाबुद्धिः–'इमे द्वे, इमाश्चतस्रः, एतद्विशिष्टेऽयमेके'ति; तदीयैकत्वनिष्ठप्रकारतानिरूपितधर्मितावच्छेदताश्रयत्वमपि प्रथमाद्वितीयात्मकसमुदाये वर्त्तते–इति लक्षणसमन्वयः । सप्तम्यां प्रथमत्ववारणाय प्रथमसम्बन्धोपादानम् , अन्यथा 'षष्ठीसप्तम्यौ द्वे, प्रथमाद्वितीयातृतीयाचतुर्थ्यश्चतस्रः, एतद्विशिष्टेयं पञ्चम्येका' इत्याकारकापेक्षाबुद्धेरपि सप्तत्वसङ्ख्योत्पत्तिप्रयोजकतया तदीयैकत्वनिष्ठप्रकारतानिरूपितधर्मितावच्छेदकतायाः सप्तम्यां सत्त्वेन अतिव्याप्तिर्दुर्वारा स्यात् । प्रथमां विहाय मध्यसमुदायेऽतिप्रसङ्गवारणाय द्वितीयसम्बन्धोपादानम् । **अदीर्घत्वादिति** । 'गौरी'रित्यादौ पूर्वस्य दीर्घत्वेऽपि तद्व्यक्त्ये-

❀ चिदस्थिमाला ❀

नुवृत्तमिति भावः । नन्वेवं सवर्णग्रहणं व्यर्थ, पूर्व इत्येव दीर्घपदानुवृत्त्या, जातिपरत्वेन च सिद्धेरत आह–**सवर्णस्येति** । **पूर्वस्येति** । ननु दीर्घान्तशब्दे चारितार्थ्येन कथमिष्टसिद्धिरिति चेन्न, 'नादिचि' 'दीर्घाज्जसि चे'तिनिषेधस्य जागरूकत्वात्क्वचित्सवर्णदीर्घेनेष्टसिद्धेरल्पविषयतापातात् , 'रामा' इत्यादावतोगुण इत्यस्यापत्तेश्च । नन्वेवमपि गमॄनित्यादौ पूर्वलृकारजातीयदीर्घाभावात्स न स्यात्, सवर्णग्रहणे तु तत्सामर्थ्यादॄकारसिद्धिः, इदमेव सवर्णग्रहणं लृकारस्य दीर्घाभावे, ऋलृवर्णयोः सावर्ण्ये च ज्ञापकमिति चेन्न, तेन समानजातित्वातिदेशस्यैवोक्तत्वेनादोषात् । लेखने उपयोगमाह—**तौसदिति** । यत्तु 'देवदत्तन्यायानित्यत्वज्ञापनाय सन्निर्देश इत्यपवादे निषिद्धेऽप्यत्रोत्सर्गस्य स्थिति'रिति

❀ सदाशिवभट्टीयम् ❀

तथापि 'दीर्घाज्जसि'चेत्यत्र दीर्घग्रहणाददीर्घस्याऽपि ग्रह इष्ट इति भावः । **इष्टसिद्धेरिति** । गमॄनित्यादौ सत्यभिधाने साजात्यातिदेशादिष्टसिद्धिरिति भावः । 'तावितिनिर्देशाद्देवदत्तेतिन्यायाऽनित्यत्व'मिति कस्यचिदुक्तिङ्कटाक्षयति—**ताविति । तुनात्रेति** । तौवित्यत्रेत्यर्थः । सति तत्प्रवृत्तौ तेन तदनित्यत्वज्ञापनं

❀ वरवर्णिनी ❀

परे तु''—समुदायविशिष्टावच्छेदकताश्रयत्वं प्राथम्यम् । वै० 'स्वघटकवृत्तिसङ्ख्योत्पादकापेक्षाबुद्धीयधर्मितानिरूपितत्व' 'स्वविशिष्टक्रमावच्छेदकत्वो'भयसम्बन्धेन । स्ववैशिष्ट्यञ्च क्रमे—'स्वघटकवृत्तित्व' 'स्वादित्वविशिष्टत्वो'भयसम्बन्धेन । आदित्ववैशिष्ट्यञ्च–'स्वघटितत्व' 'स्वविशिष्टक्रमाघटितक्रमभिन्नत्वो'भयसम्बन्धेन । क्रमे वै०'स्वाश्रयोत्तरवृत्तित्व' 'स्वाश्रयोत्तरपूर्ववृत्तित्वो'भयसम्बन्धेन । अपेक्षाबुद्धिश्च—'इयमादिः प्रथमा एका, एतद्विशिष्टेयं द्वितीयारूपा द्वितीया—इतीमे द्वे' । 'इमे द्वे, एतद्विशिष्टेयमेका तृतीयारूपा तृतीये'त्याद्याकारिका ग्राह्या, तेन तादृशावच्छेदकतायां क्रमावच्छिन्नत्वं सूपपन्नम् । एतेन प्रथमातृतीयात्मकस्य, द्वितीयातृतीयात्मकस्य च समुदायस्य न प्रथमत्व''मिति **श्रीबालशास्त्रि**चरणा आहुः । इतोऽधिकमस्म**त्पितामहचरण**कृतशब्देन्दुशेखर**त्रिपुरसुन्दर्यान्द्रष्टव्यम्** ।

देवदत्तहन्तृहतन्यायस्य तु नात्र प्रवृत्तिः । देवदत्तहन्तृहनने हि नोज्जीवनं, देवदत्तहननप्रसक्तहनने त्वस्त्येव देवदत्तजीवनम् । प्रकृते तु न हननस्थानीया [गुण] वृद्धिहन्तुः पूर्वसवर्णदीर्घस्य लक्ष्ये प्रवृत्तिः, किन्तु हननोद्यमसजातीयं प्रसक्तिमात्रं, प्रसक्तस्य निषेधे बाध्योज्जीवने न बाधकमिति । स्पष्टश्चेदं 'स्वादिष्वि'ति सूत्रे कैयटे ।

सुस्रोत इति । सुस्रोतश्शब्दः कस्य चित्सञ्ज्ञा । सम्बुद्धौ 'दूराद्धूते चे'ति प्लुतः । **तत्सामर्थ्यादिति** । प्रतियोगित्वेन तदाश्रयणसामर्थ्यादित्यर्थः । 'आश्रयात्सिद्ध'

❀ **अभिनव-चन्द्रिका** ❀

विधातुमशक्यत्वाच्चेत्यपि बोध्यम् । **अनाश्रयणादिति** । वस्तुतस्तु 'भ्रष्टावसर'न्यायस्यास्मिञ्शास्त्रे विषय एव नेति वक्तव्यम् । तथाहि-शास्त्रस्यावसरो नाम-तदीयोद्देश्यतावच्छेदकाक्रान्तिः । तथा च 'शिव उ अर्च्य'-इति स्थिते पूर्वसवर्णस्य 'नादिची'तिनिषेधेन पूर्वसवर्णदीर्घीयोद्देश्यतावच्छेदकावच्छिन्नातिरिक्तत्वेनाद्गुण इत्यत्र सङ्कोचाभावेन गुणशास्त्रीयोद्देश्यतावच्छेदकाक्रान्तेः सत्त्वेनावसरस्याऽभ्रष्टत्वात् । एवं 'त-औ' इति स्थिते पूर्वोक्तदिशा वृद्धिशास्त्रीयोद्देश्यतावच्छेदकाक्रान्तेः सत्त्वेन 'तौ स'दित्यादिनिर्देशासङ्गतेरभावाच्च । **नात्र प्रवृत्तिरिति** । नात्र विषय इत्यर्थः । 'देवदत्त-

❀ **चिदस्थिमाला** ❀

दण्डी । तदसदित्याह—**देवेति** । अत्र हेतुमाह—**देवेति** । हि=यतः । नोज्जीवनं -देवदत्तस्येति शेषः । **जीवनमिति** । 'न्यायशरीर'मितिशेषः । तत्र द्वितीयमेव प्रकृते तावित्यत्र, नाद्यमित्याह—**प्रकृते इति** । तुरप्यर्थे । अत एवाह-**वृद्धिहन्तुरिति** । गुणहन्तुरितिपाठे शिवोऽर्च्यइत्याशयेन योज्यं, तत्र हेतुमाह-**प्रसक्तेति** । यतइत्यादिः । ते इति भिन्नं पदम् । इतिर्हेतौ । यौगिकेऽर्थबाधादकारान्तभ्रमनिरासायाह—**सुस्रोतसिति** । विशेषणसामर्थ्यादित्यर्थनिरासायाह—**प्रतीति** । ननु तथैवार्थः कुतो नात आह—**आश्रयादिति** । नन्वेवं पयोऽडित्यादौ वक्ष्य-

❀ **ज्योत्स्ना** ❀

इत्येवं रूपव्याख्यानादित्यर्थः । **वृद्धिहन्तुरिति** । प्रकृतलक्ष्ये 'गुणहन्तु'रिति वक्तव्ये 'वृद्धिहन्तु'रित्युक्ती-

❀ **सदाशिवभट्टीयम्** ❀

सम्भवेदपीति भावः । **देवदत्तजीवनमिति** । इति न्यायशरीरमित्यर्थः । **प्रकृत इति** । तावित्यत्रेत्यर्थः । **बाधकमितीति** । **इतिर्हेतौ** । एवं स्वस्वविषयज्ञानं शास्त्रद्वयसन्निधिविकापनोदेप्येकस्य प्रवृत्तेर्निर्बाधत्वात् भ्रष्टावसरन्यायस्याप्ययं न विषय इति तदनाश्रयणज्ञापकतापि कथमस्य निर्देशस्येति चिन्त्यमेतत् ।

यौगिकार्थबाधादाह—**कस्य चिदिति** । 'अत्वसन्तस्ये'ति दीर्घे तपरव्यावर्त्यत्वादाह—**सम्बुद्धाविति** । **तत्सामर्थ्यादितीति** । प्रतिषेधोपादानसामर्थ्यात्सिद्धः प्लुत इति **कैयटः** । 'विशेषणोपादानेन प्लुतविध्येकवाक्यतापन्नपूर्वत्रेति पूर्वशब्देनोत्वविध्यग्रहणमिति ज्ञाप्यते' इति तत्तात्पर्यम्, तच्चिन्त्यं, तथा सति तपरकरणेनैव व्यावृत्तिसिद्धौ प्रवर्तकतया निवर्तकतया वाऽचारितार्थ्यस्य दुर्वारत्वात् । अप्लुतादप्लुते

❀ **विषमपदविवृतिः** ❀

गुणवृद्धिहन्तुरिति । यद्यपि वृद्धिग्रहणं न प्रकृताभिप्रायेण, प्रकृते गुणस्यैव प्राप्तेः । नापि पूर्वसवर्णदीर्घबाध्यकार्यसामान्यप्रदर्शनाभिप्रायेण, यणपररूपयोरनुक्तेः, तथापि 'नादिची'त्येतद्विषये भ्रष्टावसरन्यायाप्रवृत्त्युपपादनाय तद्विषये प्रवर्त्तमानपूर्वसवर्णदीर्घबाध्यकार्यसामान्यप्रदर्शनमिति न कश्चिद्दोषः । **कस्य चित्सञ्ज्ञेति** । इदं हूयमानार्थकनाम्न एव प्लुत इति भ्रमेण । वस्तुतस्तु नाम्न एव ग्रहणे प्रमा-

इति भाष्योक्तेः । पयस्यटति, पयो ददातीत्यर्थे—'आगच्छ हे पयो३ट्' 'आगच्छ हे पयो३दे'त्यादावेकपदस्थवर्णद्वयसापेक्षमन्तरङ्गमुत्वं प्रति वाक्यसम्पादकपदान्तरसापेक्ष-

---

❁ अभिनव-चन्द्रिका ❁

हन्तृहत'न्यायविषयाभावमेवोपपादयति—**हननप्रसक्तेत्यादिना** । **आश्रयात्सिद्धमिति** । स्यादेतत्—'अप्लुते' इत्युक्त्या प्लुतस्यासिद्धत्वं न भवतीति कल्पने स्वांशे चारितार्थ्यं दुर्निरूपं, तपरकरणेनैव प्लुतव्यावृत्त्या 'अप्लुतात्' 'अप्लुते'इत्यस्य च व्यावर्त्त्यालाभादिति चेन्मैवम् , अप्लुतादितिपञ्चम्यन्त-प्रयोज्या या प्लुतभिन्नत्वावच्छिन्नविषयता,एवमप्लुते इति सप्तम्यन्तप्रयोज्या या प्लुतभिन्नत्वावच्छिन्न-विषयता तादृशविषयतासाधकमसिद्धत्वन्न भवतीति कल्पनेनादोषात् । तथाहि—'एहि सुश्रोता ३ अत्र स्नाहि' 'तिष्ठतु पय अ३ग्निदत्ते'त्यादौ निरुक्तविषयतासाधकासिद्धत्वस्याभावेऽपि 'अत' 'अती'त्येतत्पदप्रयोज्यैकमात्रिकत्वविशिष्टत्वावच्छिन्नविषयतासाधकासिद्धत्वस्य सत्त्वादुत्वं दुर्वारं

❁ चिदस्थिमाला ❁

माणरीत्या प्लुतो न स्यादत आह—**पयस्यटतीति** । अत्राद्ये क्विप् , अन्त्ये 'आतोऽनुपे'ति कः । **एकपदेति** । समस्तेत्यर्थः । अतएव वर्णद्वयं स्थानिभिन्नं ग्राह्यम् । हेतुगर्भमिदं विशेषणम् । एवमग्रेऽपि । **पदान्तरेति** । आगच्छेतीत्यर्थः । **स्यासिद्धत्वादिति** । असिद्धम्बहिरङ्गमितीत्यर्थः । अत एवाह—**उत्वे इति** । आदावित्यादिः । अन्यथा=असिद्धम्बहिरित्यस्याप्रवृत्तौ । **सिद्धत्वादिति** । उक्तरीत्येति भावः । एतेनासिद्धत्वाभावश्च तद्विशेषणम्प्रत्येव । एतेन ज्ञापितेऽपि तस्मिंस्तपरकरणेनैव व्यावृत्तिसिद्धेरस्य चारितार्थ्याभावात्कथं ज्ञापकत्वं, यस्मिञ्ज्ञापिते यस्य चारितार्थ्यं तत्तेन ज्ञाप्यमिति सिद्धान्तादिति परास्तम् । अप्लुतादप्लुते इति विशेषणद्वयं प्लुतासिद्धत्वाभावप्रतिपादनद्वारा तपरकरणकृतप्लुतव्यावृत्त्यनुवादकमिति न दोष इति तु **मान्याः** ।

❁ ज्योत्स्ना ❁

क्ती रामावित्यस्येदं व्याख्यानमिति भ्रमेण । **हे पयो३ट्**, हे **पयो३देति**—हे शब्दप्रयोगोऽशुद्धः । 'हैहेप्रयोगे' इतिनियमात्, अत एव भाष्ये स न पठित इत्याहुः । परिभाषादृष्ट्या=षाष्ठपरिभाषा-

❁ सदाशिवभट्टीयम् ❁

इत्यनयोरन्यतरस्य वैयर्थ्यापत्तेश्च । अत एव सः-उच्चारणं—रुच्चारणमिति—षष्ठीसमासे—सुस्रोतसः रुच्चारणमिति पुनस्तत्र सस्य रुत्वे रोरीति लोपे दीर्घत्वे 'सुश्रोता रुच्चारण'मिति भवति । अत्र 'हशि चे'त्युत्वं न, ङसन्तसकारस्थानिकरुत्वस्यासिद्धत्वेन हश्परत्वाभावात् । रुत्वविध्येकवाक्यतापन्नपूर्वत्रासिद्धमिति पूर्व-ग्रहणेनोत्वविध्यग्रहणमिति कल्पने तु—तदापत्तिर्दुर्वारा स्यात् । किञ्चैवमर्थाधिकारात्सर्वत्रेत्याग्रहे मनोरथोपि न स्यात् । अत्र च ज्ञापकन्तपरत्वे कृतेष्यप्लुत इति कृतं, तदाह—**प्रतियोगित्वेनेति** । एवञ्चाश्रयात्सिद्धत्वं वदतो ज्ञापकत्वमनङ्गीकुर्वतो मम—न पूर्वोक्तानुपपत्तिरिति भावः । ज्ञापकस्थले एव वक्तुं शक्यत्वात् । 'विशेषणद्वयं प्लुताऽसिद्धत्वाभावप्रतिपादनद्वारा तपरकरणकृतप्लुतव्यावृत्त्यनुवादकमिति न दोष' इति **मान्याः** । **हे पयोडिति**। केचित्तु मते 'हैहेप्रयोग'इति सूत्रस्य विध्यर्थतोक्तेस्तद्रीत्या हेशब्दप्रयोगः, अन्यथा 'हैहयोरेवे'ति नियमान्न स्यादिति । **एकपदे इति** । समस्तस्येत्यर्थः । वर्णद्वयं—स्थानिभिन्नं ग्राह्यम् ।

❁ विषमपदविवृतिः ❁

णाभावात् । तच्च रूढं लौकिकं वेति 'दूराद्धूते चे'तिसूत्रस्थस्त्वग्रन्थाद्यौगिकेपि प्लुतः प्रवर्त्तते । **आश्रयणसामर्थ्यादिति** । ननु त्रिपाद्यां 'रोः सुपी'त्यस्यानन्तरम् 'अत उरती'त्येव पाठ्यमिति चेन्न । उत्वस्यासिद्धत्वेन गुणानापत्तेः । मनोरथ इत्यत्रोत्वस्यासिद्धत्वेन 'रोरी'ति लोपापत्तेश्च ।

यद्यप्यप्लुतादिति विशेषणसामर्थ्येन प्लुतस्य सिद्धत्वेऽप्लुत इति व्यर्थं,तथापि तत्सामर्थ्येन दूराद्धूते-चेत्यस्य सिद्धत्वेपि गुरोरनृत इत्यस्य सिद्धत्वे मानाभाव इत्याशयेनाप्लुत इत्युक्तं सूत्रकृता ।

प्लुतस्यासिद्धत्वादुत्वे प्लुतसिद्धिः । अन्यथा प्लुतस्योत्वदृष्ट्या सिद्धत्वात्परत्वात्प्लुते आद्येऽप्लुतपरत्वाभावादन्त्येऽप्लुतात्परत्वाभावादुत्वं न स्यात् । परिभाषादृष्ट्या बहिरङ्गासिद्धत्वेऽपि न क्षतिः । स्वदृष्ट्याऽसिद्धस्यापि परं प्रत्यसिद्धत्वप्रतिपादनसम्भवात्, स्वदृष्ट्याऽविद्यमानस्य परं प्रत्यविद्यमानत्वप्रतिपादनवत् । अन्तरङ्गस्यासिद्धत्वे तु प्रतिपाद्याभावे इव कं प्रत्यसिद्धत्वं प्रतिपाद्येत ? । तत्राद्ये–'वाक्यस्य टे'रित्यट्शब्दाकारः प्लुतः,

❀ अभिनव-चन्द्रिका ❀

स्यादिति—अप्लुतादिति, अप्लुते इति च स्वांशे चरितार्थमिति दिक् । उत्वे **प्लुतसिद्धिरिति** । आश्रयात्प्लुतस्य 'पूर्वत्रे'त्यनेनासिद्धत्वस्याभावकल्पनेऽपि बहिरङ्गासिद्धत्वाभावकल्पने मानाभावादिति भावः । एतेन बहिरङ्गशास्त्रत्वमन्तरङ्गपरिभाषाप्रवृत्तौ लिङ्गमित्यपास्तम् । आगच्छ पयो३ट्, आगच्छ पयो३देत्यादावन्तरङ्गपरिभाषादृष्ट्या त्रैपादिकत्वेन प्लुतस्यासिद्धत्वाद्बहिरङ्गशास्त्रत्व-

❀ चिदस्थिमाला ❀

प्लुते इति । आद्ये 'दूराद्धूते चे'ति, अन्त्ये 'गुरोरनृत'इतीति–स्फुटमनुपदमेवाग्रे । **आद्येऽप्लुतेति** । बहुव्रीहिः । ननु त्रैपादिके बहिरङ्गपरिभाषाया अप्रवृत्तेः सिद्धान्तात्कथमेतदत आह—**परीति** । अर्थस्याबाधादिति भावः । तदाह—**स्वदृष्ट्येति** । तत्तात्पर्यमाह—**स्वदृष्ट्येति** । **परमिति** । परम्प्रत्यपीत्यर्थः । उक्तसिद्धान्तस्तु त्रैपादिकान्तरङ्गविषयो न बहिरङ्गविषय इत्याह—**अन्तरङ्गेति** । परिभाषादृष्ट्येति भावः । **प्रतिपाद्येति** । यत्र द्वयोरप्यन्तरङ्गत्वं बहिरङ्गत्वं वा तत्रेत्यर्थः । अत एव तत्र तत्र त्रैपादिकेऽन्तरङ्गे इत्येव भाष्यसिद्धमुक्तं, न तु बहिरङ्गे इतीति बोध्यम् । नन्वत्र केन प्लुतोऽत आह–**तत्राद्ये** इति । तयोर्मध्ये इत्यर्थः । दूराद्धूते चेती भावः। ननु प्रतियोगित्वेन प्लुतस्याश्रयणसाम-

❀ ज्योत्स्ना ❀

दृष्ट्या । **बहिरङ्गस्येति** । प्लुतस्येत्यर्थः । असिद्धत्वेऽपि—'पूर्वत्रासिद्ध'मित्यनेन । **परं** प्रति=उत्वं प्रति । अत्र लोकन्यायं प्रमाणयति–**स्वदृष्ट्येति** । अन्तरङ्गस्य=त्रिपादीस्थस्य । 'असिद्धत्वे तु'–सपाद-

❀ सदाशिवभट्टीयम् ❀

अन्यथा वर्णत्रयापेक्षित्वेन द्वयेत्यसङ्गतं स्यात्, स्थानिनो निमित्तत्वानाश्रयणाच्च । हेतुगर्भञ्चेदं विशेषणम् । **उत्वे इति** । 'आदा'वित्यादिः । **परत्वादिति** । इदञ्च कार्य्यकालतायां, यथोद्देशे तु त्रिपाद्या असिद्धत्वाद्विप्रतिषेधसूत्रस्य तत्राप्रवृत्तिः । तत्र सूत्रे 'यथोद्देश एवे'ति ग्रन्थस्तु फलाभावात् कार्यकालता नेत्येवं परः सिद्धान्ते । अयन्तु अन्यथाकोटिप्रविष्ट इति पूर्वपक्षग्रन्थाभिप्राय इति न विरोध इति बोध्यम् । यद्वा वक्ष्यमाणरीत्या स्वदृष्ट्याऽसिद्धस्यापि परस्य पूर्वं प्रति सिद्धस्य बलीयस्त्वबोधनेन प्रतिबन्धकमित्याहुः ।

ननु त्रैपादिकेऽन्तरङ्गपरिभाषा नेति सिद्धान्तितत्वात्कथमिदमित्याह—**परिभाषेति** । **न क्षतिरिति** । अयं भावः–अन्तरङ्गशास्त्रमस्या लिङ्गमित्युक्तत्वादियं परिभाषा 'बहिरङ्गं मा पश्ये'ति प्रतिपादयति अन्तरङ्गं प्रतीति–गृहीतोपदेशमुत्वम् प्लुतं कथं पश्येत् । यथा जाततत्त्वसाक्षात्कारेण मिथ्यात्वेन जगन्मिथ्येति गृह्णता शिष्यं प्रति 'जगन्मिथ्ये'त्युपदिश्यते तद्वदिति । परं प्रति=अन्यम्प्रति । नन्वेवं 'राज्ञ' इत्यादौ श्चुत्वानापत्तिरल्लोपस्यासिद्धत्वादत आह—**अन्तरङ्गस्येति** । **प्रतिपाद्येति** । यम्प्रतिपाद्यते=उपदिश्यते तद-

❀ विषमपदविवृतिः ❀

प्लुतस्याश्रयणसामर्थ्येन पूर्वत्रासिद्धमित्यसिद्धत्वं बाध्यते न तु 'सिद्धं बहिरङ्गमन्तरङ्गे' इतीत्यभिप्रेत्याह—**पयसीति** । अन्यथा=आश्रयणसामर्थ्येनास्यासिद्धत्वमात्रबाधने । नन्वन्तरङ्गस्यासिद्धत्व इव परिभाषादृष्ट्या बहिरङ्गस्यासिद्धत्वेपि परिभाषा न प्रवर्तेत इत्यशङ्क्याह—**परिभाषादृष्ट्येति** । स्वदृष्ट्याऽसिद्धस्य परम्प्रत्यसिद्धत्वप्रतिपादनसम्भवं लोकदृष्टान्तेनोपपादयति—**स्वदृष्ट्येति** । स्वदृष्ट्या विद्यमानस्य घटादेः परं प्रत्यविद्यमानत्वप्रतिपादनदर्शनादित्यर्थः । **प्रतिपाद्याभाव इति** ।

अन्त्ये रेफदकारसंयोगपरत्वेनाकारस्य गुरुत्वात् 'गुरो'रिति प्लुतः । आश्रयेण तु येन नाप्राप्तिन्यायेन, प्रत्यक्षत्वेन च पूर्वत्रासिद्धत्वमेव बाध्यते, न त्विदम्। 'सुस्रोत' इत्यादौ त्वेकवाक्यमात्रसापेक्षत्वात्प्लुतोऽन्तरङ्गो, भिन्नवाक्यस्थाकारसापेक्षत्वादुत्वं बहिरङ्गमिति स्पष्टं भाष्ये ।

उकारानुबन्धेति । उकारेत्सञ्ज्ञकरेफस्येत्यर्थ इति भावः । तेन देव रुहीत्यादौ न दोषः ।

❀ अभिनव-चन्द्रिका ❀

प्रकारकज्ञानाभावेनैतदप्रवृत्तौ उत्वदृष्ट्या प्लुतस्य सिद्धत्वेन परत्वात्प्लुते उत्वानापत्तेरिति दिक् ।

प्रत्यक्षत्वेनेति । लिङ्गापेक्षया श्रुतेः 'श्रुतिलिङ्गप्रकरणस्थानसमाख्यानां पारदौर्बल्यमर्थविप्रकर्षा' दिति जैमिनिसूत्रेण बलवत्त्वादिति भावः । **इति भाव इति** । वस्तुतस्तु 'अतो रो'रितिसूत्रे

❀ चिदस्थिमाला ❀

र्थ्यात्पूर्वत्रासिद्धमित्यसिद्धत्ववदसिद्धम्बहिरङ्गमित्यसिद्धत्वमपि कुतो न बाध्यते इत्यत आह—**आश्रयणे त्विति** ।

युक्त्यन्तरमाह—**प्रत्यक्षेति** । नन्वेवंरीत्योत्वापत्तिः 'सुस्रोता' इत्यादावपीति—तदानर्थक्यापत्तिरेवात आह—**सुस्रोता इति** । मात्रपदव्यावर्त्यं सूचयन्नाह—**भिन्नेति** । एवञ्चोक्तवैलक्षण्येन त्रैपादिकेऽन्तरङ्गे बहिरङ्गपरिभाषाया अप्रवृत्त्या न तदापत्तिरिति न दोषोऽत एव तुस्तदाह—**भाष्ये इति** । 'उकारनुबन्धे'ति बहुव्रीहिं सूचयन् तल्लाभोपायं कथयन्प्रातरत्रेत्यादावुकारविशिष्टग्रहणाद्वारणे तथोक्तिसाफल्यायाह—**उकारेत्सञ्ज्ञकेति** । 'रो'रित्यस्येति भावः । तत्फलमाह—**तेनेति** । आदिना 'तरुमूल'-

❀ ज्योत्स्ना ❀

सप्ताध्यायीस्थबहिरङ्गदृष्ट्या। **स्पष्टं भाष्ये इति**। 'अतो रोरप्लुतादप्लुते' इतिसूत्रे इत्यर्थः। एतेन ''प्लुत-

❀ सदाशिवभट्टीयम् ❀

भाव इत्यर्थः। इदञ्च यथोद्देशे त्रैपादिकेऽन्तरङ्गेऽसिद्धत्वे प्रतिबन्धकम् । कार्यकालतायान्तु पूर्वत्रासिद्धमित्यनेन विरोधादिकं ग्रन्थान्तरतोऽवसेयम् । **स्पष्टं भाष्ये इति** । नन्वेव'मेकादेशात् प्लुतो विप्रतिषेधेने'ति 'प्लुतप्रगृह्या' इति सूत्रभाष्योक्तविप्रतिषेधाऽनुपपत्तिरन्तरङ्गबहिरङ्गयोर्विप्रतिषेधायोगादिति चेन्न । 'देवदत्ता ३ असि गच्छामि ३ अह'मित्यादौ तयोः समत्वेन तद्योगात् । यत्र तु न तथा–'एहि कृष्णा ३ अत्र गौश्चरती'त्यादौ तत्रास्तामन्तरङ्गत्वात्प्लुत इति तत्रैवोद्घोते स्पष्टम् । 'अनन्त्यस्यापि प्रेति' पूर्वोदाहरणयोः प्लुतो बोध्यः । नन्वनुबध्यत इति व्युत्पत्त्योकारपररेफस्य ग्रहणेन प्रातरत्रेत्यादिव्यावृत्तावपि रुधातोरवारणमत आह—**उकारेत्सञ्ज्ञकेति** । अनुनासिकनिर्देशादीदृशार्थलाभः । तत्रैव किं मानमिति

❀ विषमपदविवृतिः ❀

प्रतिपत्तिक्रियायाः सकर्मकत्वेन प्रतिपाद्यरूपकर्मणोऽभावे यथाऽनिष्पत्तिर्भोज्याभावे भोजनस्येव तथान्तरङ्गं प्रत्यसिद्धत्वप्रतिपादिका परिभाषाऽन्तरङ्गादर्शने कम्प्रत्यसिद्धत्वं प्रतिपादयेत् ?। उत्वं प्रतीव तद्देशस्थपरिभाषां प्रत्यपि प्लुतासिद्धत्वमित्यन्ये । पूर्वत्रासिद्धमित्यसिद्धत्वस्येवाश्रयणसामर्थ्याद्बहिरङ्गासिद्धत्वस्यापि कुतो न बाध इत्याशङ्क्याह—**आश्रयेण त्विति** । **प्रत्यक्षत्वेन चेति** । पाणिनिना साक्षादुच्चारितत्वेनेत्यर्थः । तथा च प्रत्यक्षस्य प्रथमोपस्थितस्य बाधेनोपपत्तावानुमानिकस्य विलम्बोपस्थितिकस्य बाधकल्पना न युक्तेति भावः । **स्पष्टम्भाष्ये इति** । 'अतो रोरप्लुता'दिति सूत्रे इत्यर्थः । ननु 'प्लुतप्रगृह्या' इति सूत्रे प्लुतस्य सिद्धत्वज्ञापनद्वारा एकादेशात्प्लुते विप्रतिषेधेन कृते प्रकृतिभावः देवदत्त ३ अत्र त्वमसीति भाष्यस्य कैयटेन प्लुतस्यैकपदाश्र-

---

१ आनुमानिकस्मृतिरूपप्रमाणमपेक्ष्य प्रत्यक्षश्रुतेः प्रमाणस्य बलवत्त्वाच्चेत्यपि बोध्यम् ।

भोभगो । 'रोः सुपी'त्यतो 'रो'रिति वर्त्तते, न तु 'रो री'त्यतो 'र' इति, प्रातरत्रेत्यादावतिप्रसङ्गात् । अशब्दान्तद्वन्द्वेन पूर्वशब्दस्य बहुव्रीहिमभिप्रेत्याह—**एतत्पूर्वस्येति** । नन्वेवं पूर्वरूपापत्तिरत आह—**असन्धिरिति** । भगो—अघोशब्दौकारयोरकाराभ्यां प्राप्तपूर्वरूपात्मकसन्धिकार्याभाव इत्यर्थः ।

इदं प्राचामनुरोधेन । वस्तुतः सूत्रे रान्तानामेवानुकरणमसन्धिर्न्याय्य एवेति बोद्ध्यम् ।

❁ **अभिनव-चन्द्रिका** ❁

'रो'रित्यनुनासिकोकारविशिष्टमुच्चरितमिति—रोरित्यस्य रुत्वावच्छिन्नस्येत्यर्थेऽपि 'देव रुही'त्यादौ अनुनासिकविशिष्टरोरभावान्न दोष इति बोध्यम् । **रान्तानामनुकरणमिति** । 'विभाषा भव'दिति-वार्त्तिकनिष्पन्नानामपि ग्रहणार्थं रान्तानामनुकरणमित्युक्तमिति भावः ।

❁ **चिदस्थिमाला** ❁

मित्यादिपरिग्रहः । **द्वन्द्वेनेति** । पूर्वनिपातप्रकरणमनित्यमिति भावः । इदमोकारान्तानुकरणं सूत्रे इति पक्षे, तदाह—**नन्वेवमिति** । मूले—**सौत्र इति** । सूत्रे कृतः, 'कृतलब्धे'त्यण् । एतेनानुकरणं-चानितीतिनिपातसञ्ज्ञायामोदिति प्रगृह्यत्वेऽसन्धिर्न्याय्य एवेति **रत्नाकरोक्तमपास्तम्**, तस्य कृन्योगे एव प्रवृत्तेः । इदङ्खण्डयति—**इदमिति** । भाष्यस्वरसविरोधापत्तेरिति भावः । तत्सिद्धमेवाह—**वस्तुत इति** । लक्षणवशसम्पन्नरान्तावस्थानामेवेत्यर्थः । एवञ्च तन्त्रेण—लाक्षणिकत्वाविशेषादुभयेषां—वार्तिकनिष्पन्नानां निपातानाञ्च ग्रहणं, प्रभोरित्याद्येकदेशानान्तु नानर्थकत्वात् । एवेन—सान्तौकारान्तपक्षयोर्व्यावृत्ति, एतत्फलमानुषङ्गिकमाह—**असन्धिरिति** । 'एवञ्चे'त्यादिः । सूत्रे इत्यस्यानुषङ्गः **न्याय**

❁ **ज्योत्स्ना** ❁

प्रगृह्या'इति सूत्रे प्लुतस्य सिद्धत्वज्ञापनद्वारा एकादेशात्प्लुते विप्रतिषेधात्कृते प्रकृतिभावः 'देवदत्त ३ अत्र त्वमसी'तिभाष्योक्तिरुपाध्यायैः—प्लुतस्यैकपदाश्रयत्वादन्तरङ्गत्वादादेशस्य तु पदद्वयापेक्षत्वाद्बहिरङ्गत्वाच्चिन्त्यतोक्ता,—प्लुतस्यापि वाक्यत्वसम्पादकपदान्तरसापेक्षतयैकादेशसमत्वांच्चिन्त्यमेव चिन्त्यम्—''

❁ **सदाशिवभट्टीयम्** ❁

चेत्, व्याख्यानमेव गृहाण । 'इको गुणे'तिनिर्देशाद्धेतोरर्थवतो रोर्ग्रहणाद्यशोऽत्रेत्यत्रोत्वं न स्यादिति न वाच्यम् । **अशब्दान्तद्वन्द्वेनेति** । पूर्वनिपातप्रकरणमनित्यमिति भावः । **मूले-असन्धिः सौत्र इति** । सूत्रे कृतः सौत्रः, कृतलब्धेत्यण् । नचा'नुकरणञ्चानितिपर'मिति निपातत्वे 'ओ'दिति प्रगृह्यत्वेऽन्याय्यत्वमेव सन्धेरिति वाच्यं, तस्य कृञो योगे एव प्रवृत्तेः । न च 'प्राग्दीव्यतोऽणि'त्यत्रेवैकदेशविकृतन्यायेन निपातत्वातिदेशः,—उभयाऽनुकरणेऽप्यन्यतराऽनुकार्यनिष्ठधर्मातिदेशस्य 'भवतेर' इति सूत्रे शेखरे ध्वनितत्वादिति वाच्यं, निपातत्वस्याक्तपरिमाणनिष्ठत्वात्, भगोअघोशब्दयोर्निपातत्वानङ्गीकाराच्च । **वस्तुत इति** । अघोशब्दान्तद्वन्द्वे सूत्रतः षष्ठीलुक् । नन्वेवं सौत्रत्वस्यावश्यकत्वे कुतोऽस्यावास्तवत्वमिति चेन्न,

❁ **विषमपदविवृतिः** ❁

यत्वादन्तरङ्गत्वेनैकादेशस्य तु पदद्वयापेक्षत्वेन बहिरङ्गत्वेन चिन्त्यतोक्तौ—प्लुतस्यापि वाक्यत्वसम्पादकपदान्तरसापेक्षत्वादेकादेशस्य समत्वाच्चिन्त्यमेव चिन्त्यमिति—विवरणोक्तिर्निरुध्यते, वाक्यस्य टेः प्लुतार्थं देवदत्ता इत्यस्यादावेहीति शेषपूरणस्यावश्यकत्वात् । वाक्यद्वयसापेक्षैकादेशस्यैवमपि बहिरङ्गत्वादिति चेत्सत्यम् । भाष्यकारेण तु परत्वेनान्तरङ्गत्वेन वा पूर्वं प्लुतप्रवृत्तौ विशेषाभावादन्तरङ्गत्वं स्थितमप्युपेक्ष्य विप्रतिषेध उपन्यस्तः । **न दोष इति** । आदेः परस्येत्यादेः स्यादिति भावः । **भोभगो इति** । **दीर्घे इति** । तत्राचश्चेति परिभाषा नोपतिष्ठते, फलाभावा-

नह्ययमिति। इदमर्वाचामनुसारेण। भाष्ये तु'—रेफस्य विसर्गस्थानित्वेन तद्वृत्तिरुत्वाश्रयमपीदमल्विधिरेव, स्थान्यल्वृत्तिधर्माश्रयत्वात् । 'अग्रही'दित्यत्र च दीर्घे लोपे चेट्त्वेनैव निवेश इति विशेषः, अतः पयःस्वित्यादौ दोषः । तत्र हि

❀ अभिनव-चन्द्रिका ❀

अर्वाचामनुसारेणेति। वस्तुतस्त्वनल्विधावित्यस्यायार्थास्वीकारेण मूलं सम्यगेव, 'धिन्वन्ती'त्यादौ पञ्चमीसमासेन स्थानिवद्भावायणः परनिमित्तकत्वेन बहिरङ्गत्वाद्वा न दोषः। एः अजो यजः, तस्यापत्यमैयजिरित्येव भवति, न तु याजिरिति न तदर्थमप्यायार्थस्वीकारः, अल्त्वव्याप्येक्त्वावच्छिन्नस्थानितानिरूपितादेशताश्रययकारधर्मिकारोपप्रकारीभूतपदान्तत्वस्य ऐजागमीयोद्देश्यतायाः साक्षादनवच्छेदकत्वेनायार्थकानल्विधावित्यस्याप्रवृत्तेः । अत एव 'साम्नी' इत्यादौ स्थानिवद्भावेन द्विवचनत्वातिदेशाप्रगृह्यत्वं सिद्ध्यति, अन्यथा अल्त्वव्याप्यौकारविभक्तित्वावच्छिन्नस्थानिताश्रयैकारधर्मिकारोपप्रकारीभूतद्विवचनत्वस्य प्रगृह्यसञ्ज्ञीयोद्देश्यतायाः साक्षादवच्छेदकत्वेन स्थानिवत्त्वाप्राप्त्या द्विवचनत्वाभावेन प्रगृह्यत्वं दुर्लभं स्यात् । न चायार्थकानल्त्रिधावित्यस्यास्वीकारे प्रकृतसूत्रस्थभाष्यविरोध इति वाच्यं,'हल्ङ्या'बितिसूत्रवार्त्तिकभाष्यविरोधेन 'क्रन्मेजन्त'सूत्रस्थवार्त्तिकभाष्यविरोधेन 'ग्रहोलिटी'ति सूत्रस्थभाष्यविरोधेन एतस्यैकदेश्युक्तित्वेनादोषात्। न च स्थानितायामल्त्वव्याप्यधर्मावच्छिन्नत्वस्य, उद्देश्यतायां प्रकारीभूतधर्मेण साक्षादवच्छिन्नत्वस्य च निवेशान्नोक्तभाष्यविरोध इति वाच्यं, तदुभयन्निवेश्य निष्फलायार्थकानल्विधावितिस्वीकारापेक्षया तदुभयमनिवेश्य एतस्यैकदेश्युक्तित्वकल्पनाया एव ज्यायस्त्वादिति दिक्। **रेफस्येति।** रेफत्वस्येत्यर्थः। **विसर्गस्थानित्वेनेति।** विसर्गीयस्थानितावच्छेदकत्वेनेत्यर्थः। **तद्वृत्तिरुत्वाश्रयमपीति।** अल्त्वव्याप्यरत्वावच्छिन्नस्थानितानिरूपितादेशता-

❀ चिदस्थिमाला ❀

एवेतीति। ननु सौत्रः। अनेनौकारान्तानुकरणपक्षे शास्त्रबाधे मानाभावाल्लाघवाच्च सन्धिरेव न्याय्य इति सूचितम्। अत्र पक्षे कृतबहुव्रीह्यपूर्वशब्देन भोरादीनां द्वन्द्व इति केचित्। अगत्या वाक्यभेदस्य सौत्रषष्ठीलुकश्च स्वीकार इति तत्त्वम्। एतेनोक्तदोषद्वयभियौकारान्तानुकरणपक्ष एव युक्त इति **रत्नाकरोक्तमपास्तं**, भाष्यस्वरसविरोधापत्तेः। एवञ्च तथा रत्नाकरदण्ड्याद्युक्तमपास्तम्। सर्वथाऽप्रयोजकत्वादाह—**इदमर्वाचामिति**। भाष्यविरोधापत्तेरितिभावः। तदेव ध्वनयन्नाह—**भाष्ये त्विति**। **विसर्गेति।**—षष्ठीतत्पुरुषः। अपिना तद्वृत्तिधर्मान्तराश्रयकसमुच्चयः। आसाधारणत्वनिवेशो नेति तु प्राक्प्रतिपादितमेव, तदाह—**स्थान्यल्विति**। मनोरमाद्युक्तं दृष्टान्तवैषम्याद्विघटयति—**अग्रहीदिति**। चस्त्वर्थे। **अन्त्ये दोष इति।** अशुग्रहणाभावे इति भावः। तत्तुल्यकक्षत्वभ्रमं वारयंस्तत्र हेतुमाह—

❀ ज्योत्स्ना ❀

इति विवरणोक्तिः प्रत्युक्ता, वाक्यस्य टेः प्लुतार्थं देवदत्त ३ इत्यस्यादावेहीति शेषपूरणस्यावश्यकत्वाद्वाक्यद्वयसापेक्षैकादेशस्यैवमपि बहिरङ्गत्वात्। पश्चात्प्रवर्त्तमाने एकादेशेऽजानन्तर्याश्रयणात्तदन्तरङ्गाप्रवृत्तिरिति तु भगवतोऽभिप्रायः स्यादिति दिक्। **भाष्ये त्विति।** 'भोभगो' इति सूत्र-

❀ सदाशिवभट्टीयम् ❀

अत्र पक्षेऽर्थवत्परिभाषासञ्चारेण विभोरिदं सुप्रभगोरिदमघोरिदमित्यादेर्वारणात्। ओदन्ताऽनुकरणे त्वसम्भवात्तत्सञ्चारो न स्यात्। यद्वा सान्तरान्तोभयाऽनुकरणस्य मूलकृतोक्तत्वात् सान्तपक्षस्य भाष्यासम्मतत्वसूचनाय **वस्तुत** इत्युक्तम्। अत एव 'मतुवसो'रिति सूत्रे भोशब्दस्य विभक्तिप्रतिरूपकनिपातत्वमु-

❀ विषमपदविवृतिः ❀

दिति भावः। तथा च स्थानषष्ठ्यन्तपदजन्यप्राथमिकोपस्थितिविषय इडिति समुदाय एवेति न

'रोः सुपी'ति विसर्गः। नियमशास्त्राणि च विधायकान्येव वाच्यवृत्त्या, आर्थिकार्थमादाय तु निषेधकानीति। तत्रापि 'रो रेफस्य विसर्ग' इत्यर्थे त्वग्रहणं व्यर्थम्—' इत्युक्तम्। नन्वेवं 'हे रामे'त्यादौ सम्बुद्ध्यवयवस्य हलः सस्य लोपे तद्वृत्तिसुप्त्वस्यालधर्मत्वेन स्थानिवत्त्वाभावे पदत्वासिद्धिरिति चेन्न, आनुमानिकादेशस्य रामेत्यस्य स्थानिवद्भावेन सुबन्तत्वस्य, तत्प्रयुक्तकार्यस्य वा लाभेन तत्सिद्धेः। प्रत्ययलक्षणेनापि

❀ अभिनव-चन्द्रिका ❀

श्रयधर्मिकारोपप्रकारीभूतधर्मेण साक्षादवच्छिन्नोद्देश्यताकमपीत्यर्थः। **विधायकान्येवेति**।

❀ चिदस्थिमाला ❀

तत्र हीति। यत इत्यर्थः। अत्र हेतुमाह—**नियमेति**। चोऽप्यर्थे। नच वाच्यवृत्त्या तत्त्वे निषेधकत्वव्यवहारासङ्गतिरत आह—**अर्थिकार्थमिति**। इतिना फलोक्तिं समाप्य खण्डयति—**तत्रापीति**। 'रोः सुपी'त्यत्रापीत्यर्थः। 'रोरी'त्यतो' र इत्यनुवृत्तेः। **त्यर्थे त्विति**। तदङ्गीकारे त्वित्यर्थः। **व्यर्थमिति**। उत्तरार्थत्वस्याप्यभावादिति भावः। प्रतिपादितञ्चैतत्सर्वं सविशदं भावप्रकाशे नन्वेवमुक्तरीत्याऽल्विधित्वाङ्गीकारे 'रामाये'त्यादौ प्रागुक्तरीत्या दोषाभावादाह—**हे राम इत्यादाविति**। तथाच 'तिङ्ङतिङ' इति निघातासिद्धिरिति भावः। नन्वेवमपि विशेषणतयाऽलाश्रयणाद्दोष एवात आह—**तत्प्रयुक्तेति**। पदत्वादिरूपेत्यर्थः। तत्सिद्धेः=पदत्वादिसिद्धेः। नन्वेवमप्यत्र सस्यार्थवत्त्वेन न तत्कल्पनैवेति कथं निर्वाहोऽत आह—**प्रत्ययेति**। अप्यन्तस्य मध्यमणिन्यायेनान्वयः। तेनापि तत्सिद्धेरित्यर्थः। नियमशास्त्राणां विधिमुखेन प्रवृत्तेरिति भावः। नन्वेवं कथं तेनापि सिद्धिरल्धर्मत्वादत आह—

❀ ज्योत्स्ना ❀

इत्यर्थः। तुनाऽरुचिः सूचिता—तद्बीजन्तु 'वारिणी' इत्यादौ ईकारान्ते द्विवचनत्वानतिदेशा-

❀ सदाशिवभट्टीयम् ❀

क्तम्, विभक्त्यन्तञ्च वार्तिकनिष्पन्नं रान्तमेवेति तत्सदृशत्वेन रान्तस्यैव निपातत्वसिद्धिः। सान्तानिपातसत्त्वे तु मानाभावः। इदमेवाभिप्रेत्य शब्दरत्ने 'भाष्यस्वरसोऽप्येवमेवे'त्युक्तम्। 'सान्ताऽनुकरणे रान्तानां न स्या'दित्यपि शब्दरत्नोक्तमनुसन्धेयम्। **लोपे चेति**। एतेनासाधारणनिवेशस्य सम्मतिं सूचितवान्।

नियमशास्त्राणीति। नन्वग्रहणाभावे यत्वार्थं सूत्रस्यावश्यकत्वेन कथं नियमार्थकत्वमिति चेन्न, तावन्मात्रफलकत्वे प्रक्रियालाघवाय भोभगोइत्यनन्तरमिदं पठित्वाऽनेन यत्वमेव विदधीतेति। **निषेधकानीति**। इति=हेतोः—पयःस्वित्यादौ दोष इत्यन्वयः। **हे रामेत्यादाविति**। आदिना 'तेजस्विन्पाही'त्यादि पदत्वासिद्धिरिति, तथा च पदात्परत्वाभावे 'पाही'त्यस्य निघातो न स्यात्, तेजस्विन्नित्यस्याविद्यमानत्वात्। रामेत्यत्र 'नामन्त्रित'इति निषेधेन तत्त्वाभावात्–हेशब्दाश्रयोपि न सः। इयं शङ्का कार्यकालपक्षेपि स्फुटैव। यथोद्देशेपि नित्यत्वाल्लोपे तदसिद्धिरेवं। प्रकृते लोपेन तदनुत्पत्तेरेवान्वाख्यानाद्वा।

सुबन्तत्वेति। न च विशेषणतयाऽलाश्रयणम्। अल्मात्रवृत्तिधर्माघटितेत्युक्तत्वात्। इदञ्च निमित्तरूपकार्यातिदेशपक्षे। विधेयरूपकार्यातिदेशेप्याह—**तत्प्रयुक्तेति**। **प्रत्ययलक्षणेनापीति**।—पूर्वान्वयि।

❀ विषमपदविवृतिः ❀

तत्र स्थानिवत्त्वनिषेधः। **हे रोमति**। इदमुपलक्षणं, राम इत्यत्रापि पदत्वासिद्धेः, सुप्त्वस्य विसर्गस्य स्थान्यल्वृत्तित्वात्। **आनुमानिकेति**। राम इत्यत्रापि रेफान्तस्य स्थानिविसर्गान्ते आदेश इति भावः। नन्वेवं स्थानिवद्भावेन सुबन्तत्वलाभ इत्ययुक्तम्, नियमशास्त्राणां विधिमुखेन प्रवृत्तेस्त्वयैवाभ्यर्णमुक्तत्वेन प्रत्ययलक्षणेनैव सुबन्तत्वस्य वक्तुमुचितत्वादिति तटस्थशङ्कां परिहरति—**प्रत्ययलक्षणेनापीति**। अपिरुक्तशब्दार्थे। एवञ्च 'राजपुरुष' इत्यादावपि स्थानि-

न प्रत्ययवृत्तिधर्मलाभः । लक्षणपदोपादानेन प्रत्ययनिमित्तककार्यस्य तन्निमित्तक-व्यवहारस्य वाऽतिदेशात् ।

एवं 'दीर्घाहो निदाघ'इत्यादौ हल्ङ्यादिलोपे उक्तरीत्या स्थानिनि

❀ अभिनव-चन्द्रिका ❀

विधायकान्यपीत्यर्थः । नियमशास्त्राणां विधिमुखेन निषेधमुखेन च प्रवृत्तिर्भवति, यत्र विधिमुखेन प्रवृत्तिर्न सम्भवति तत्र निषेधमुखेनैव प्रवृत्तिः । यथा 'हन्तेरत्पूर्वस्ये'त्यत्रत्यात्पूर्वस्येतिशास्त्रस्य, यथा वा 'सकर्मणा'मिति प्रत्याख्यानाय कृतस्य–'तप'इतियोगविभागनियामकस्य 'तपः कर्मकस्यैवे'त्यस्य, यथा वा 'बहुव्रीहौ वे'ति प्रत्याख्यानाय कृतस्य–'अनो बहुव्रीहे'रित्यनुवृत्तिसहितस्य 'अन्यतरस्या'मिति विभक्तयोगस्य नियामकस्य 'उपधालोपिनोवे'तिन्यासस्य च निषेधमुखेनैव प्रवृत्तिः। तत्र विधिमुखेन प्रवृत्तिस्तु न सम्भवति, नियम्यनियामकयोरुभयोर्लक्ष्यासम्भवात्। निषेधमुखेन प्रवृत्तौ तु 'अत्पूर्वस्ये'त्यस्यात्पूर्वभिन्नहन्तेर्नस्य णत्वन्नेत्यर्थः । अत्पूर्वस्य तु 'हन्ते'रित्यनेन । 'तपःकर्मकस्यैवे'त्यस्य तपःकर्मकातिरिक्तपधातोः कर्मवद्भावो नेत्यर्थः । तपःकर्मकस्य तु 'तप' इत्यनेन भविष्यति । 'उपधालोपिनो वे'त्यस्य उपधालोपिभिन्नबहुव्रीहेर्ङीब्न भवतीत्यर्थः । उपधालोपिनि तु 'अन्यतरस्या'मित्यनेन भविष्यतीति 'बहुव्रीहौ वे'ति न कर्त्तव्यम्। यत्र तु उभयमुखेन प्रवृत्तिः सम्भवति तत्र विधिमुखेनैव प्रवृत्तिः, यथा प्रकृते—'रोः सुपी'त्यत्र रुभिन्नसप्तमीबहुवचनाव्यवहितपूर्वत्वविशिष्टरेफस्य विसर्गो न

❀ चिदस्थिमाला ❀

न प्रत्ययेति । तेनापि न प्रत्ययमात्रवृत्तिरित्यर्थः। **लक्षणेति**। अन्यथा 'प्रत्ययव'दित्येव वदेदितिभावः । **कार्येति** । पदत्वादिरूपस्येत्यर्थः । उक्तारुच्यैवाह—**तन्निमित्तकेति** । पदत्वादिव्यवहारस्येत्यर्थः । उक्तप्रकारद्वयमन्यत्राप्याह—**एवमिति** । **उक्तरीत्येति** । प्रथमप्रकारेणेत्यर्थः । प्रवृत्तावन्वयः ।

❀ ज्योत्स्ना ❀

गृह्यत्वानापत्तिः, तस्य स्थान्यलौकारवृत्तित्वेनाल्विधित्वात् । मूलोक्तानुसारेण भाष्याक्षरयोजना-प्रकारस्तु परिभाषाप्रदीपार्चिषि विस्तरेण निरूपितस्तत एव बोद्धव्यः । **लक्षणपदोपादानेनेति** । 'स्थानिव'दित्यनुवृत्त्या 'प्रत्ययलोपे प्रत्ययः स्थानिव'दित्येतावतैव 'प्रत्ययलोपे प्रत्ययव'दितिन्यासेन च तत्सिद्धेरिति भावः । **प्रत्ययनिमित्तककार्यस्येति** । प्रकृतिसम्बन्धिन इत्यर्थः । अत एव नखैर्भिन्नो नखभिन्न इत्यादौ नैस्। नचैवमपि स्थानिवद्भावोऽत्र कस्मान्न भवति ? 'स्थानिवदादेश' इति सूत्रेऽभावरूपादेशस्याग्रहणात्। प्रत्ययलक्षणसूत्रस्य नियमार्थत्वाद्वा । **तन्निमित्तकव्यवहारस्य वेति**। प्रत्ययपरत्वादेरित्यर्थः । **अतिदेशादिति**। एतेन राजपुरुष इत्यत्रापि स्थानिवद्भावेनैवोक्तरीत्या पदत्व-

❀ सदाशिवभट्टीयम् ❀

ननु तेन सुप्त्वमेव कुतो नातिदिश्यते, तत्राह–**न प्रत्ययेति** । **तन्निमित्तकव्यवहारस्य वेति** । स चाशास्त्रीयोपि, दोषाभावात्, सङ्कोचे मानाभावाच्च । **एवमिति**। यथाऽग्रहीदित्यत्रेट्त्वेन स्थानितेति

❀ विषमपदविवृतिः ❀

वत्त्वेनैव राजेत्यस्य पदत्वमित्याशयः । यद्वा वार्तिकमते प्रत्ययलक्षणसूत्रस्य विध्यर्थत्वेन 'वर्णाश्रय' इत्यस्य वर्णमात्रवृत्तिधर्माश्रय एव प्रवृत्त्या तन्मते प्रत्ययलक्षणसूत्रेण सिद्धिमाशङ्क्य निराकरोति–**प्रत्ययलक्षणेनापीति** । व्याख्या पूर्ववत् । वार्तिकमते लक्षणपदस्य वैयर्थ्यादिदमापाततः । **तन्निमित्तकार्यस्येति** । 'प्रकृतिसम्बन्धिन' इति शेषः । अत एव 'नखनिर्भिन्न' इत्यादावैस् न । तथा च पदसञ्ज्ञायाः प्रकृतिप्रत्ययोभयसम्बन्धित्वेन प्रत्ययलक्षणसाध्यत्वमित्यर्थः । प्रत्ययस्य कार्यकोटौ प्रवेशेन पदसञ्ज्ञानिमित्तत्वाभावात्। **उक्तरीत्येति** । आनुमानिकस्थान्यादेशभावाश्रय-

जायमानस्यासुपीति रुत्वनिषेधस्यादेशे दीर्घाहन्शब्देऽतिदेशेन प्रवृत्त्या न रेफ इति दिक् ।

ॐ अभिनव-चन्द्रिका ॐ

भवतीति निषेधमुखेन प्रवृत्तिः । सप्तमीबहुवचनाव्यवहितपूर्वत्वविशिष्टरेफातिरिक्तत्वेन 'खरवसानयो'रित्यत्र सङ्कोचं कृत्वा विधिमुखेन प्रवृत्तिरपि सम्भवतीति विधिमुखेनैव प्रवृत्तिः । अत्र चेदमेव भाष्यं मानमिति दिक् ।

तत्सिद्धेरिति । वस्तुतस्त्वल्व्याप्यहल्त्वावच्छिन्नस्थानितानिरूपितादेशताश्रयलोपधर्मिकारोपप्रकारीभूतसुप्त्वस्य पदसञ्ज्ञीयोद्देश्यतायाः साक्षादवच्छेदकत्वेन अनल्विधावित्यस्याप्राप्त्या श्रौतादेशे श्रौतस्थानिवृत्तिसुप्त्वस्य स्थानिवत्त्वेन सुलभतया आनुमानिकस्थान्यादेशभावकल्पनापर्यन्तमनुधावनं वृथेति बोध्यम् ।

दिगिति । दिगर्थस्तु-'रोःऽसुपी'त्यस्य सुबव्यवहितपूर्वत्वविशिष्टाहन्शब्दस्य रेफादेशो न भवतीत्यर्थेन 'दीर्घाहो निदाघ' इत्यादौ अल्त्वव्याप्यहल्त्वावच्छिन्नस्थानितानिरूपिता-

ॐ चिदस्थिमाला ॐ

इदञ्च प्रागुक्तद्वितीयमतेन । एवं द्वितीयप्रकारेणापि बोध्यम् । ज्ञानेत्यादावाद्यप्रकार एव बोध्यः । एवञ्च-मनोरमादिसकलग्रन्था अयुक्ता एव, तदाह—**दिगिति** । इतरसकलग्रन्थासङ्गतिं प्रतिपादयन् मूलं खण्डयति—**परेत्विति** । प्रागुक्तमिदम् । ननु अनुक्तत्वात्कथं तेन रुत्वमत आह—**एषानिति** । 'मतुवसो'रिति सूत्रस्थत्वात् । परिभाषालब्धमाह—**अन्त्येति** । 'नानर्थक' इत्यस्याः प्रत्याख्यानादाह—

ॐ ज्योत्स्ना ॐ

सिद्धिर्न प्रत्ययलक्षणेनेति भावो लभ्यते । **न रेफ इतीति** । प्रत्ययलक्षणस्य त्विह सम्भवेऽपि स्थानिवत्त्वेन सिद्ध्युक्तिः प्रत्ययलक्षणसूत्रस्य नियमार्थत्वसूचनार्था, पूर्वत्र तु स्थानिवत्त्वमेवेति विशेषः । वस्तुतस्त्वनपेक्षितार्थसन्निधानस्य तत्तन्निमित्तरूपकार्यव्यवहारस्यैव स्थानिवत्सूत्रेणातिदेशात्तथा-

ॐ सदाशिवभट्टीयम् ॐ

तद्वृत्तीट्त्वातिदेशात् सलोपस्तथेत्यर्थः । **उक्तरीत्येति** । अनल्निष्ठधर्मत्वेन सुप्त्वादिनेत्यर्थः । हलिति तु सुतिसीनां विशेषणमिति भावः । उक्तरीत्या यस्स्थानी तत्रेत्यन्वयः । स्थानिनि=सकारे जायमानस्य, 'सावपि पद'मिति पक्षे प्राप्तरुत्वाभावाय प्रवर्तमानस्यादेशे=लोपे परतो (नतूत्तरेण समानाधिकरणम्)तत्र परेऽतिदेशेन प्रवृत्त्या दीर्घाहन्शब्दे न दीर्घ इति योजना । **दिगिति** । दिगर्थस्तु—हल्ङ्याबितिसूत्रे सुत्वादिना स्थानितेति

ॐ विषमपदविवृतिः ॐ

णेनेत्यर्थः । तथा च दीर्घाहन् स् इत्यस्यां दशायां यथा 'ऽसुपी'ति रुत्वनिषेधस्तथादेशेप्यानुमानिकस्थान्यादेशभावस्य समुदायविश्रान्ततयाऽल्न स्थानीति नानल्विधाविति निषेधः प्रवर्तत इति भावः । यद्यपि राजेत्यादौ सुलोपे दीर्घो न स्यादित्यपि शङ्कितव्यं, तथापि परत्वाद्दीर्घस्य लोपात्पूर्वं प्रवृत्तिरिति समाधानसम्भवेनानुमानिकस्थान्यादेशभावाश्रयणेन समाधानक्लेशस्य नोपयोगः । दीर्घाहो निदाघ इत्यत्र तु रुत्वस्यासिद्धत्वापूर्वं लोप इति आनुमानिकस्थान्यादेशभावाश्रयणक्लेश आवश्यक इति विशेषः । नचैवं चित्रायां जातश्चित्र इत्यत्र ङीप्प्रसङ्गः । आनुमानिकस्थान्यादेशभावे आश्रीयमाणेऽलः स्थानिवत्त्वाभावात् । यदि च स्थान्यवयवाल्वृत्तिधर्माश्रयकत्वेना'नल्विधा' विति निषेध इत्युच्यते, तदा स प्रकृतेपि समान इति वाच्यम् , 'स्थान्यल्वृत्ती'त्येतदंशे मात्रपदानिवेशेपि स्थान्यवयवाल्वृत्तीत्येतदंशे तन्निवेशेनादोषात् । अन्ये तु—स्थानिवदादेश इत्यत्र स्थानिपदं निवर्त्यपरमेव, लोकत एतत्सिद्धं, तद्यथा–लोके यो यस्य प्रसङ्गे भवति लभतेऽसौ तत्कार्याणीति स्थानिवत्सूत्रस्थभाष्यस्वारस्येन प्रसङ्गिन एव स्थानिपदार्थत्वलाभात्, स्थानमस्यास्तीति स्थानीति व्युत्पत्तेश्च, उत्तरसूत्रानुरोधाच्च । तत्र हि णिलोपस्य स्थानिवद्भावाय स्थानिपदं

तेषां रोरिति । इदञ्च—निपातानाख्याय 'विभाषा भव'दिति वार्त्तिकं प्रत्याचक्षाणस्य वृत्तिकृतो मतेन । परे तु—तेषामपि रोरित्यर्थः । अपिना 'विभाषा भवद्भगवदघवतामोच्चावस्ये'तिवार्त्तिकनिष्पन्नसङ्ग्रहः । 'एषामन्त्यस्य रुः स्यादवस्य चौकारः

❀ अभिनव-चन्द्रिका ❀

देशताश्रयलोपधर्मिकारोपप्रकारीभूतसुप्त्वस्य रेफनिषेधशास्त्रीयोद्देश्यतायाः साक्षादनवच्छेदकत्वेन स्थानिवत्त्वेन, प्रत्ययलक्षणेन वा सुप्त्वातिदेशादसुपीतिनिषेधाद्रत्वाभावे रुत्वे च न दोष इति दिक् ।

❀ चिदस्थिमाला ❀

अवेति । नन्वन्यतरस्वीकारादेवेष्टसिद्धौ किमर्थमेवं व्याख्यानमुभयग्राहकमतः प्रकारान्तरेण मूलाद्यसङ्गतिं

❀ ज्योत्स्ना ❀

भूतस्य चात्र सुप्परत्वस्याशास्त्रीयत्वादतिदेशाभावाच्चिन्त्यमेतत् । **अन्यत्रेति** । मनोरमादिग्रन्थेषु ।

❀ सदाशिवभट्टीयम् ❀

श्रौतेपि तत्र न दोषः । अन्यथा प्रपञ्च्येत्यादावतिदेशत्वात्स्यादिति साम्नी लोम्नी रामायेत्यादिरनुसन्धेयः । एतेन सुप्परत्वस्याशास्त्रीयत्वात्कथमतिदेश इति, आनुमानिकेपि कथमत्विधीनामतिदेशः, अन्यथा चुकाम इत्यादौ वलि लोपः स्यादिति चापास्तम् । **मतेनेति** । अन्यथा वार्तिकसिद्धविभक्त्यन्तप्रतिरूपकत्वेन निपातत्वमिति भाष्योक्तमनायाससाध्यं मार्गमपहायाकृतिगणत्वेन चाद्यन्तर्भावनं न कुर्यादिति भावः ।

त्रयाणामिति । ननु निपातभोःशब्देनैव सर्वेषां फलानामन्यथासिद्धिं प्रदर्श्य द्वयोरेवावश्यकत्वमुक्तं शब्दरत्ने, तत्कथमुच्यते त्रयाणामावश्यकत्वमिति चेच्छृणु, वार्तिकविहितस्यौकारस्य सिद्धत्वेन रोस्त्वाश्रयात्सिद्धत्वेनातःपररोः सत्त्वेनोत्वे ओत्वस्यासिद्धत्वेनातः परत्वादाद्गुणे पूर्वरूपे भो अच्युतेत्यादेः

❀ विषमपदविवृतिः ❀

निवर्त्यपरमेव । 'अग्रहीत्—विशिष्टं ह्येषोऽनलमाश्रयते इटं नामे'ति स्थानिवत्सूत्रस्थभाष्ये 'एष' इत्यनेन लोपः परामृश्यते । भोभगो इति सूत्रस्थभाष्यं, तदनुसारी स्थानिवत्सूत्रस्थः 'ग्रहोऽलिटि दीर्घ' इत्यत्रेट एव स्थानित्वं नाच इति कैयटग्रन्थश्च–प्रौढिवादेनैव प्रवृत्ते, उक्तभाष्यादिविरोधात् , बहुलक्ष्यासिद्धेश्च । तथा हि वारिणी इत्यत्र द्विवचनत्वस्य स्थान्यल्वृत्तित्वेनातिदेशेनादेशे तदलाभे प्रगृह्यत्वानापत्तिः । ईकारग्रहणं तु हरी इत्यादौ चरितार्थम् । 'अन्तादिव' त्सूत्रस्याल्मात्रवृत्तिधर्माश्रयके विधावप्रवृत्तावप्यल्वृत्तिधर्माश्रयके विधौ प्रवृत्तेः । किञ्चैवं सति ईर्णमित्यत्र दीर्घः, वीगतीत्यत्र प्रश्लिष्टस्य गुणे उपेतीत्यत्रै 'ङि पररूप'मिति पररूपम् । 'आदीध्ये' इत्यत्र 'एरनेकाच' इति यण् , ऊवे इत्युत्तमपुरुषे उवङादेशश्च न स्यात् । धातुत्वप्रत्ययत्वादीनां स्थान्यल्वृत्तित्वात् । किञ्च राजेत्यादौ नित्यत्वाद्धल्ङ्यादिलोपे दीर्घानापत्तिः । एवं 'दीर्घाहो निदाघे'त्यत्र हल्ङ्यादिलोपे रत्वापत्तिः । न चानुमानिकस्थान्यादेशभावाश्रयणेना 'सुपी'ति निषेधः, अह्नोयमाह्न इत्यादौ रत्ववारणाय पदस्येत्यनुवृत्त्याऽहन्शब्दान्तस्य पदस्य रत्वमित्यर्थावश्यकत्वेन दीर्घाहन् सु इत्यस्यां दशायां रत्वस्याप्रसक्त्या तन्निषेधस्याप्यप्रवृत्त्या स्थानिवद्भावेन हल्ङ्यादिलोपे जाते निषेधस्यातिदेष्टुमशक्यत्वात् । सावपि पदं भवतीति पक्षेपि रत्वनिषेधयोः त्रैपादिकत्वेन लोपात्पूर्वमप्रवृत्तेः । किञ्चानुमानिकस्थान्यादेशभावाङ्गीकारेपि श्रौतस्थान्यादेशभावस्य त्यागाभावेन श्रौतस्थान्यल्वृत्तिसुप्त्वप्रयोज्यसुबन्तत्वरत्वनिषेधयोरत्विधित्वेन 'हे राम' 'हे दीर्घाहो निदाघे'त्यादावनापत्तिः । तदेतदभिप्रेत्य–'उच्चारणकाले यः श्रुतः स स्थानित्वेनाश्रीयते न तु प्रतिपत्तिकाले इति मन्यते' इति कैयटोनोक्तं, भोभगो इति सूत्रे प्रत्ययलक्षणेनापीत्युक्तमप्ययुक्तम् ,

सम्बुद्धा'विति तदर्थः। अवग्रहणसामर्थ्यात् 'अलोऽन्त्यस्ये'ति नेति बोद्धयम्। वार्त्तिकनिष्पन्नानां त्रयाणां भोश्शब्दनिपातस्य चावश्यकत्वमन्यत्र स्पष्टमित्याहुः।

व्योर्लघु। यद्यपि वर्णसमाम्नाये यस्य प्राथम्यात् 'य्वो'रित्युचितं, तथापि 'लोपो व्योरि'तिलोपवारणाय सौत्रत्वमाश्रयणीयं स्यात्, अतो 'व्यो'रित्युक्तम्। लघुतरः प्रयत्नो यस्योच्चारणे स लघुप्रयत्नतरः। अन्यपदार्थसम्बन्धोत्तरं वर्त्तिपदार्थप्रकर्षविवक्षया साधु। प्रयत्ने लघुतरत्वञ्चैषां शैथिल्यजनकत्वमेव। **लघूच्चारणाविति**। लघुतरोच्चारणा-

❀ अभिनव-चन्द्रिका ❀

सामर्थ्यादिति। 'नानर्थक'इतिपरिभाषायाः प्रत्याख्यानादेवमुक्तिः। **साधुरिति**। वस्तुतस्तु लघुः प्रयत्नो यस्य स लघुप्रयत्नः। लघुगतप्रकर्षप्रयोज्यलघुप्रयत्नवद्गतप्रकर्षविवक्षायां 'सूक्ष्मवस्त्रतर' इतिवद्विशिष्टात्तरपि लघुप्रयत्नतरशब्दः साधुरिति बोध्यम्। **शैथिल्यजनकत्वमेवेति**। वस्तुतस्तु अनेन शास्त्रेण पादमात्रिकयोरेव विधानादेतज्जनकप्रयत्ने एतद्गतशैथिल्यजनकत्वं बोध्यम्। कारणवैलक्षण्ये कार्यवैलक्षण्यस्यावश्यकत्वादिति केचित्। **लघुतरोच्चारणाविति**। एतद्विधेययोः

❀ चिदस्थिमाला ❀

प्रतिपादयन्नाह—**वार्तिकेति**। कोशानुक्तत्वात्तयोरप्रामाणिकत्वादाह—**भोःशब्देति**। अन्यत्र=शब्दरत्नादौ। सकलग्रन्थासङ्गतिप्रदर्शनायाह—**लघुतर इति**। स चान्तरतम्याद्वस्य वो यस्य य इत्येव, तदुक्तं-मूले-**वयाविति**। स्वल्पत्वनिरासायाह—**प्रयत्ने इति**। चैषां=जिह्वाग्रादीनाम्। **शैथिल्येति**। अपटुत्वेत्यर्थः। उक्तरीत्यैव न्यूनतां निराचष्टे—**लघुतराविति**।

❀ ज्योत्स्ना ❀

ननु वर्त्तिपदार्थस्य प्रकर्षान्यपदार्थाभ्यां युगपदन्वये 'विप्रतिषेधे पर'मिति परत्वात्तरपि, ततो बहुव्रीहौ लघुतरप्रयत्न इति स्यादत आह—**अन्यपदार्थसम्बन्धोत्तरमिति**। तथा च

❀ सदाशिवभट्टीयम् ❀

सिद्धिरिति फलसत्त्वादिति। इदन्तु चिन्त्यम्—'भोभगो'इति सूत्रे 'ओतो गार्ग्यस्ये'तिवत् 'ओत आद्योशी'त्येव सिद्धे पूर्वग्रहणं किमर्थम्। एवं हि पञ्चमीनिर्देशादव्यवधानांशस्यानायासेन लाभो यथान्यासे तु भगोअघोग्रहणेन ज्ञापकेन साध्यते इत्यपि गौरवमिति। **व्योर्लघु**। **सौत्रत्वादिति**। समाहारद्वन्द्वविषये एकशेषा-

❀ विषमपदविवृतिः ❀

पञ्च सप्त राजपुरुष इत्यादौ प्रत्ययलक्षणेन पदत्वमित्यस्य प्रत्ययलोपे प्रत्ययलक्षणमिति सूत्रस्थभाष्ये ग्रन्थसन्दर्भलब्धस्यानुपपत्तेः। उक्तभाष्यप्रामाण्येनास्मन्मते लक्षणपदेन हि प्रत्ययस्थानिकमैसादिकमेव वार्यते न तु पदत्वादिकमपि, तथा सति नखनिर्भिन्न इत्यादावैसादेरिव पञ्चेत्यादौ पदत्वस्याप्यनापत्तिः। प्रत्ययलोपे प्रत्ययनिमित्तकमेव कार्यं भवति न तु तदुद्देश्यकमिति भवन्मते नियमपर्यवसानादित्याहुः। ननु वर्तिपदार्थस्य तरबर्थप्रकर्षेणान्यपदार्थेन च युगपदन्वये परत्वात्तरपि ततो बहुव्रीहौ लघुतरप्रयत्न इति स्यादत आह—**अन्यपदार्थसम्बन्धोत्तरमिति**। तथा च वार्तिकम्—'पूर्वपदार्थातिशये आतिशायिके कृते बहुव्रीहिः, सूक्ष्मवस्त्रतरायर्थ'इति। पूर्वविप्रतिषेधेनेति तद्भावप्रदर्शनं कैयटेन कृतम्। पूर्वविप्रतिषेधे प्रमाणं तु लघुप्रयत्नतर इति निर्देश एव। एतन्मते तु अन्यपदार्थसम्बन्धोत्तरमेव वर्त्तिपदार्थातिशयविवक्षा, अभिधानस्वाभाव्यात्। तेन सूक्ष्मवस्त्रतरादिसिद्धिः। 'अत्रापि प्रमाणं लघुप्रयत्न इति निर्देशः। अत्र कैयटोक्तमेव युक्तम्। वृत्तपदार्थे विशेषणान्वयकल्पनाभावात्। **वर्त्तिपदार्थप्रकर्षविवक्षयेति**। शक्यतावच्छेदकगतस्यैव

वित्यर्थः । सूत्रे सौत्रत्वादेकवचनम् । वकारोदाहरणम्—'असावादित्य' इति वृत्तिः ।

ओतो । 'व्यो'रित्यत्र यकारसाहचर्याद्वकारोऽपि धात्वनवयव एव । अत्राप्यर्थाधिकारात्तथैव । तेन 'स्मृतोवच्युते'त्यादौ न दोषः—तदाह—**यस्येति** । तादृशवस्यासम्भवादिति भावः । 'भोभगो' इति तु नानुवर्त्तते विच्छेदात्,—तद्ध्वनयन्वक्ष्यति—'पदान्तस्य

❀ अभिनव-चन्द्रिका ❀

पादमात्रिकत्वादिति भावः। **यकारसाहचर्यादिति**। 'व्योर्लघुप्रयत्नतर'इतिसूत्रविषये धात्ववयवपदान्त-

❀ चिदस्थिमाला ❀

वृत्तिरिति । अत्रारुचिबीजं भाष्यानुक्तत्वमिति । मूलादिरीत्या व्याचष्ट-**व्योरिति** । व्योर्लघ्विवतिसूत्रे इत्यर्थः । **व एवेति** । 'गृह्यते' इति शेषः । **अत्रेति** । 'ओत' इत्यत्रापीत्यर्थः । अधिकारात्=तदनुरोधात् । तथैवेतिशेषः । **न दोष** इति । नातिप्रसङ्ग इत्यर्थः । स्मृतां वातीति स्मृतावास्तमाचक्षाणः स्मृतोवित्यादौ तदवयवत्वात् । आदिना'गोवच्युते'त्यादिपरिग्रहः । **तदाहेति** । तत्राप्रसङ्गं तदन्यासम्भवञ्चाभिप्रेत्याहेत्यर्थः । एवञ्च स्वरितत्वप्रतिज्ञासामर्थ्यादेकदेशस्यानुवृत्तिरिति भावः । **असम्भवादिति** । सामान्यतो **रत्नाकरा**द्युक्तिरसङ्गतेति ध्वनयन्नाह-**तादृशेति** । **विच्छेदादिति** । 'लोपः शाके'त्यनेनेति भावः । तयोः

❀ ज्योत्स्ना ❀

वार्तिकं-'पूर्वपदातिशये आतिशायनिकाद्बहुव्रीहिः—सूक्ष्मवस्त्रतराद्यर्थ' इति । 'पूर्वविप्रतिषेधेने'-ति—तद्भावप्रदर्शनञ्च प्रदीपकृतोक्तम् । पूर्वविप्रतिषेधे तात्पर्यग्राहकस्तु—'लघुप्रयत्नतर' इत्ययमेव निर्देश इति बोध्यम् । **स्मृतोवच्युतेत्यादाविति** । उः=शम्भुः—स्मृतो येन स—स्मृतोः ।

❀ सदाशिवभट्टीयम् ❀

प्रवृत्तेराद्गुण इत्यादाविवैकेनैवादेशेनोभयोर्निवृत्त्यापत्तिरन्यथा स्यादिति भावः । एवमेव 'जश् झशि''ससजुषो रुः''त्यदादीनामः' 'व्रीहिशाल्योर्ढ'गित्यादौ बोध्यः । तत्र कुतो न सौत्रत्वमुक्तमिति चिन्त्यम् । यद्वा भोभगो इतिसूत्राद्यग्रहणानुवृत्त्या यकारस्यैवादेशत्ववारणाय व्योरित्यावर्त्योभयोरादेशत्वमिति तद्वित्वेन तद्विशेषणस्यावश्यकत्वेन सौत्रत्वं विना गत्यन्तराभावादित्याशय इति । **वृत्तिरिति** । अत्रास्वरसबीजन्तु 'रो'रित्यनुवर्त्य रोः स्थाने यौ तयोरित्यर्थेनात्राप्राप्तिरेवेति । वग्रहणन्तु 'लोपः शाकल्यस्ये'त्युत्तरार्थमेवात एव हरयिह विष्णविहेत्यत्रैतत्सूत्रोल्लेखः । स्पष्टञ्चेदं भोभगोरिति शेषोद्द्योते ।

ओतो गार्ग्यस्य । **यकारसाहचर्यादिति** । अत्रेदं चिन्त्यम्-'त्वमचकायत्रे'त्यादौ दस्य रुत्वे यत्वे तथाभूतस्यापि यस्य सम्भवात्कथमेतदिति । एरर्थो यर्थः, तमिच्छति यर्थीयतीत्यादौ तत्सम्भवाच्च । **विच्छे-**

❀ विषमपदविवृतिः ❀

शक्यतावच्छेदकतावच्छेदकगतस्यापि प्रकर्षस्य तरबर्थत्वादिति भावः । **ओतोगा** । **साहचर्यादिति** । यद्यपि स्मृतावच्युतेत्यत्र 'व्यो'रिति लघुप्रयत्ने वकारे कर्तव्ये स्थानिवद्भावान्न वकारः पदान्तः, 'पूर्वत्रासिद्धे न स्थानिव'दित्यस्य पदचरमावयवातिरिक्तविषयकत्वस्योक्तत्वात् । तथा च साहचर्याश्रयणस्य 'स्मृतोवच्युते'त्यत्र नोपयोगः, तथापि जनानवतीति जनौस्तस्यापत्यं 'जनावपत्य'मित्यादौ धात्ववयववकारस्य ग्रहणवारणाय यकारसाहचर्यस्यावश्याश्रयणीयत्वमित्यभिप्रायेणेदम् । वस्तुतोऽयुक्तमेतम्—'स्मृतोवे'त्यत्रैव एतेर्विचि एरानयनमयनयनमित्यत्र धात्ववयवयकारस्य सम्भवात् । एवं नयतेर्विजन्तस्यानयनशब्देन समासे धात्ववयवयकारसम्भवो बोध्यः । **स्मृतोवच्युतेति** । स्मृतां वेतीति स्मृतोवीस्तमाचष्ट इत्यर्थे णिजन्ताद्विचि रूपम् । स्थानिवद्भावस्तु न, लोपस्य पदचरमावयवत्वेन पूर्वत्रासिद्धे नेत्यस्य प्रवृत्तेरिति भावः । वस्तुत ईदृशानामभिधाने दृढं मूलं न पश्यामः ।

किं ? तोयमिति। इदं लघुप्रयत्नयोर्न, गार्ग्यश्रुतेः,-तदाह—**अलघुप्रयत्नस्येति । पूजार्थमिति ।** व्याख्यानादिति भावः । तादृशश्च भोसादिपूर्वक एवेत्याशयेनाह—**भो अच्युतेति ।**

भाष्यानुसारिणस्तु—भो इत्याद्यनुवृत्तेः स्मृतोवित्यादौ न दोषः । तस्यानभि- नाच्च । अपूर्वस्येति तु ओत इत्यनेन विरोधान्न सम्बध्यते । 'लोपः शाकल्यस्ये' त्येव 'भोभगो' इत्याद्यनुवृत्त्या सिद्धे नित्यत्वार्थमिदमित्याहुः ।

उञि च । भोइत्यादिपूर्वस्य पूर्वेण सिद्धेराह– **अवर्णपूर्वयोरिति ।** एतदपि नित्यमेव । अत्रापि गार्ग्यग्रहणानुवृत्त्याऽलघुप्रयत्नस्यैव लोपः । एतेन–भोइत्यादिपूर्वे

❀ अभिनव-चन्द्रिका ❀

यकारस्यासम्भव इति भावः । **स्मृतोवच्युतेति ।** स्मृतां वातीति वेतीति वा स्मृतोवाः, स्मृतोवीः, ताभ्यां ण्यन्ताभ्यां क्विपि अच्युतशब्देन योग इति भावः । **गार्ग्यश्रुतेरिति ।** ऋषिविशेषघटितसूत्रस्य ऋषिविशेषघटितसूत्रबोधितसाधुत्वाज्ज्ञानादिति भावः । **अनभिधानाच्चेति ।** 'न पदान्ताः परेऽणः सन्ती'ति लण्सूत्रस्थभाष्यप्रामाण्यादिति भावः। **गार्ग्यग्रहणानुवृत्त्येति।** तथा

❀ चिदस्थिमाला ❀

सम्भवादाह–**यत्वयोरिति । गार्ग्येति ।** शाकटायनमते तत्सत्त्वेन गार्ग्यमते तदभावात् । एतेन 'विधानसामर्थ्यात्तस्य ने'ति **रत्नाकरदण्ड्याद्युक्तमपास्तम् ।** 'लोपः शाकल्ये'त्यनेनागतार्थत्वायाह—**नित्यमिति–मूले ।** अन्यथा तेनैव तदनुवृत्त्या सिद्धे एतद्वैयर्थ्यं स्पष्टमेव । एवमारम्भसामर्थ्यान्नित्यत्वे सिद्धे गार्ग्यग्रहणवैयर्थ्यं परिहरति–**गार्ग्येति ।** नच स्वमतप्रच्युतिदोषाभावार्थं तत् , द्वाभ्यां लोपस्यैव स्मृतत्वे तद्वाक्येऽन्यग्रहणेन तयोरन्यतराग्रहणात् । नच वैपरीत्यं कुतो न, 'निषदावौपम्ये'ति निर्देशेन तस्य तत्त्वानुमानात् । तदाह—**व्याख्येति ।** उक्तहेतोरेवाह—**तादृशश्चेति । चस्त्वर्थे ।** मूलादिसर्वग्रन्थान्दूषयति—**भाष्येति ।** तत्र रत्नाकराद्यनुरोधेन तत्त्वसत्त्वमभ्युपेत्याह—**स्मृतोविति ।** वस्तुतस्तत्सत्त्वमेव नेत्याह—**तस्येति ।** 'वृक्ष'वादितुल्यत्वात् । नन्वेवं गोत इति व्यर्थमत आह—**अपूर्वेति ।** एवञ्च तदवयवादोकारादित्यर्थः । भोराद्यनुवृत्तिः पूर्वसूत्रेऽपि बोध्येति ध्वनयन्नाह—**लोप इति ।** प्राग्वदुपपत्तिर्बोध्या । पूर्वेण=ओतो गार्ग्यस्येत्यनेन । ननु विकल्पार्थमत्रानुवृत्तिर्भोरादेरत आह—**एतदपीति ।** अपिना पूर्वसूत्रसमुच्चयः । तद्वदस्याप्यारम्भसामर्थ्यात्तत्त्वमिति भावः । नन्वेवमपि तेनालघुप्रयत्नलोपे सिद्धेऽपि लघुप्रयत्नलोपार्थमत्रापि भोरित्याद्यनुवृत्तिरपि स्यात्, अत एव हलि सर्वेषामित्यत्र मण्डूकानुवृत्तिरपि न, नच लघुप्रयत्नविधिर्व्यर्थः, उञ्भिन्नेऽशि चारितार्थ्यादत आह—**अत्रापीति ।** पूर्ववदाशयः । वृक्षवादेरन-

❀ ज्योत्स्ना ❀

स्मृतां वातीति—स्मृतोव् , वृक्षव्वद्रूपम् । **भोभगो इत्याद्यनुवृत्त्येति ।** 'लोपः शाकल्यस्ये'त्यत्र

❀ सदाशिवभट्टीयम् ❀

दादिति । 'लोपःशाकल्यस्ये'त्यत्रेति भावः । तत्र हि शाकल्यस्यैवेत्यर्थसत्त्वाद्भोसस्तु गार्ग्यादिमतेपि लोपसत्त्वेन वाच्यार्थविरोधान्न सम्बन्ध इति भावः । **भोसादिपूर्वक इति ।** उच्चारणार्थाकारेण निर्देशः, अतो न रुत्वादि । **भाष्यानुसेति ।** अत्र यद्वक्तव्यन्तल्लोपः शाकल्यस्येत्यत्रोक्तम् ।

❀ विषमपदविवृतिः ❀

गार्ग्यश्रुतेरिति । शाकटायनमते एव लघुप्रयत्नयोर्विधानाद्गार्ग्यमते तदभावात् । **इत्याद्यनुवृत्तेरिति ।** 'लोपः शाकल्यस्ये'त्यत्र । न च शाकल्यभिन्नमते लोपो नेति स्मृत्यन्तरानुसन्धाने गार्ग्य-

लघुप्रयत्नलोपार्थमत्रापि तदनुवृत्तिरित्यपास्तम् । वकारोदाहरणन्तु–'असा उ एकाग्नि' रिति वृत्तिः । **उत्तरार्थमिति** । ङमो 'ह्रस्वादची'त्यर्थमित्यर्थः । एतत्तत्रैव निरूपितम् । 'हलि सर्वेषा'मित्यादौ तु न सम्बद्ध्यते, व्यवहिते ङम इत्यत्रैव प्रयोजनकथन-परभाष्यप्रामाण्यात् । अत एव 'लिट्त्सु' इत्यादौ धुडादयः । अन्यथा सादौ पदे इत्यर्थान्न स्युः । अत एव 'माभ्या'मित्यादौ 'हलि सर्वेषा'मिति लोपसिद्धिरिति दिक् ।

हलि स । 'भोभगो' इत्याद्यनुवर्त्तते । तत्रौकारात्परस्य लघूच्चारणस्यैवानेन लोपः। अलघूच्चारणस्य तु 'ओत' इत्येव सिद्धम् । अपूर्वे तूभयोरपि । न चापूर्वालघुप्रयत्ने

❁ अभिनव-चन्द्रिका ❁

चैतत्सूत्रस्य ऋषिविशेषघटितत्वेन ऋषिविशेषघटित'व्योर्लघु'–इतिसूत्रबोधितसाधुत्वस्याज्ञानाल्लघु-प्रयत्नयोर्न भवतीति भावः । **उत्तरार्थमितीति** । स्वीयोद्देश्यतावच्छेदकसमर्पकज्ञानविषयीभूतानुपूर्वी-मत्पदघटितशास्त्रविधेयत्वरूपप्रतिपदोक्तत्वस्य वेञ्निष्पन्नोकारेऽभावादिति भावः । **ङमो ह्रस्वाद-चीत्यर्थमिति** । वस्तुतस्तु तत्रापि न प्रयोजनमिति तत्रैव निरूपितमिति तत एवावधार्यताम् । 'उञि च पदे'इत्यत्र पदेग्रहणन्तु अनेकान्तपक्षे 'उञी'त्यस्य 'इत्सञ्ज्ञकञकाराव्यवहितपूर्ववर्त्तिबोध्ये उशब्दे'

❁ चिदस्थिमाला ❁

भिधानात् । 'वृक्ष उ एकाग्नि'रिति **रत्नाकरो**क्तेरसाङ्गत्यादाह—**वकारोदेति** । प्राग्वदरुचिर्बोध्या । ह्रस्वा-त्परो यो ङम् तदन्तं यत्पदमित्यादिव्याख्यानात्तत्रापि नोपयोगोऽत आह—**एतदिति** । तथा व्याख्यानेना-निर्वाहस्य तत्र प्रतिपादितत्वात् । एतेन—'तेनैव सिद्धे मूलमत्रत्यं चिन्त्य'मिति **रत्नाकरदण्ड्या**द्युक्तमपा-स्तम् । ननूत्तरार्थत्वेऽव्यवहिते 'हलि सर्वेषा'मित्यत्रापि सम्बन्धः स्यादत आह—**हलीति** । अत एव=तत्प्रामाण्यादादिशब्दग्राह्येषु 'डः सी'त्यादावसम्बन्धादेव । सादौ पदे=सादेः पदस्य । **अत एवेति** । अन्यथा हलादौ पदे इत्यर्थापत्तौ तत्र तदभावान्न स्यात् । नच तत्र विकल्प एव, तत्प्रामाण्येन तत्र नित्य-लोपस्यैवेष्टानुमानात् । एतेन—'ङम' इत्यत्रोक्तरीत्या फलाभावेऽपि 'हलि सर्वेषा'मित्यत्रैव फलं वृक्षभ्या-मित्यादौ नित्यलोपवारणरूपमुक्तरीत्या । नच तत्र कार्ये टिलोपस्य स्थानिवत्त्वं, पूर्वत्रासिद्धे तन्निषेधा'दिति **रत्नाकरो**क्तमपास्तम् । उक्तहेतोः, वकारस्य तत्राननुवृत्तेश्च, तेषामनभिधानाच्च । नचैवमपि वेञः क्विपि सम्प्रसारणादौ तुकि च उदितिरूपं, 'षत्वतुको'रित्यसिद्धत्वन्तु न, 'पदान्तपदाद्यो'रिति वचनात् । एवं 'तन्त्रयु'दित्यत्र पदसञ्ज्ञकस्याप्युञः सत्त्वादिहार्थमेव पदाग्रहणमस्तु, प्रतिपदोक्तपरिभाषाप्यत एव न प्रवर्तते, एवञ्च मूलोक्तमयुक्तमिति वाच्यम् , तत्प्रामाण्येन तत्रापि लोपस्य नेष्टत्वादिति दिक् । तदाह—**दिगिति** । **भोभगो इति** । मण्डूकप्लुत्येति भावः । **तत्राविति** । तेषां मध्ये इत्यर्थ । तुर्यत इत्यर्थः । परिशेषादाह—**लघ्विति** । अपूर्वस्येति भावः । 'लोप' इति पाठः । तस्याऽसत्त्वादाह—**करणेनेति** ।

❁ ज्योत्स्ना ❁

तथानुवृत्त्येत्यर्थः । सिद्धान्ते त्वोकारान्ते नित्येनानेन लोपेन बाधादवर्णमात्रविषयं 'लोपः

❁ सदाशिवभट्टीयम् ❁

हलिस । **उभयोरपीति** । अन्यमते चरितार्थस्यासिद्धत्वादादेशे तदुत्तरं लोप इत्याशयः । सर्वेषां

❁ विषमपदविवृतिः ❁

मते लोपाभावापत्त्या गार्ग्यः स्वस्मान्मतात्प्रच्युतः स्यादिति वाच्यम् , शाकल्यभिन्नो यो गार्ग्य-भिन्नस्तन्मते लोपो नेति स्मृत्यन्तरानुसन्धानकल्पनोपपत्तेरित्याशयात् । **तदनुवृत्तिरिति**। भो इत्या-द्यनुवृत्तिरित्यर्थः । **हलि सर्वेषाम्** । **अपूर्वालघुप्रयत्न इति** । शाकटायनमते एव लघूप्रयत्न-

अस्यासिद्धत्वात् 'लोपः शाकल्यस्ये'ति प्राप्नोतीति वाच्यं, लघुप्रयत्नस्यैवानेन लोपे 'व्यो'रिति सूत्रेऽचीति करणेन हलि विधानाभावेनैव सिद्धावस्य सूत्रस्य वैयर्थ्यापत्त्या तद्बाधात् । न चालघुप्रयत्नयोरेव लोपः स्याद्योरित्यर्थाधिकारादिति वाच्यम्, ऋषिमात्रग्रहणार्थस्य 'सर्वेषा'मित्यस्य वैयर्थ्यापत्तेः, विकल्पस्य विच्छिन्नत्वेन नित्यत्वसिद्धेः । अत्र च यकार एवानुवर्त्तते, न वकारः; वृत्तौ तथैवोक्तेः, फलाभावात्, 'अव्यपरे' इत्यादिनिर्देशाच्च । अन्यथा तत्र सौत्रत्वाद्याश्रयणीयं स्यात्तदाह—**लघ्वलघूच्चारणस्य यस्येति** ।

❀ अभिनव-चन्द्रिका ❀

इत्यर्थेन वेञ्धातुनिष्पन्नोकारस्येत्सञ्ज्ञकञकाराव्यवहितपूर्ववर्त्तिवेशब्दबोध्यत्वेन तत्रातिव्याप्तिवारणायेति

❀ चिदस्थिमाला ❀

नचेति । 'एव'मिति शेषः । अपूर्वे सम्भवादाह—**प्रयत्नयोरेवेति** । एवेन—तन्निरासः । ननु न तदृषिमात्रग्रहणार्थमपि तु विकल्पाननुवृत्तिद्वारा नित्यार्थमत आह—**विकल्पेति** । शाकल्यपदप्रतिपाद्यस्येत्यर्थः । सूत्रद्वयेनेति भावः । चो वाक्यालङ्कारे । ननु निर्मूलत्वेनायुक्तमत आह—**फलेति** । वृक्षवादेरनभिधानादितिभावः । सूत्रसम्मतिमप्याह—**अव्यपरे इति** । आदिना निपातनादिपरिग्रहः । **तदाहेति** । तदेतत्सर्वं हृदि निधायाहेत्यर्थः । एतेन—"मूलं हरदत्तानुरोधेन, वस्तुतो वकारस्याप्यनुवृत्तिः, 'वृक्षव् हसती'त्यत्र लोपे इष्टापत्तेरनभिधाने मानाभावात् । अत एव 'वृक्षव्करोती'त्यत्रातिप्रसङ्गवारणाय अशि हलीति व्याख्यानं भगवतः सङ्गच्छते"—इति **रत्नाकरोक्त**मपास्तम् । हलीति तु देवा इहेत्यादौ नित्यलोपाभावार्थमुत्तरार्थञ्च । देवा नम्या इत्यादौ 'लोपो व्यो'रिति न, तं प्रति यत्वस्यासिद्धत्वात् ।

❀ ज्योत्स्ना ❀

शाकल्यस्ये'तीति भावः । **तद्बाधादिति** । 'प्रकरणे प्रकरणमसिद्धं न योग योग' इति पक्षे

❀ सदाशिवभट्टीयम् ❀

ग्रहणबोधितशाकटायनमतविहितनिरवकाशलोपेन बाधादादेशाप्रवृत्तौ स्थानिनो लोपेनोभयोरदर्शनमिति 'वा'इति प्राप्नोतीति यवयोः शाकल्यस्यैव मते लोपः,यवयोर्हलि सर्वेषां मते लोप इत्यनयोर्विरोधेन रत्नमुट्स्वित्यादौ जश्त्वचर्त्वयोरिव सिद्धशास्त्रेण व्यवस्थापत्तौ मतान्तरे तदभावापत्त्या विकल्पापत्तिरिति भावः । एतेन तदभावे नित्यविधिर्दुर्वारतया शङ्का निर्दलेत्यपास्तम् । **अचीतिकरणेति** । 'मोऽनुस्वार' इत्यत्र हलीति कर्त्तव्यं, सर्वेषांग्रहणं योगविभागश्च मास्त्वित्याशयः । यथान्यासे एव सर्वेषांग्रहणवैयर्थ्यं स्यादिति कुतो नोक्तमिति चेच्छृणु, गार्ग्यस्येत्यस्यासम्बन्धाय तदावश्यकत्वादिति । एवं सति सर्वेषामिति वाक्यार्थविरोधः स्यादिति चेन्न, तस्योपायान्तरत्वात् । **वैयर्थ्यापत्तेरिति** । पूर्वोक्तोऽचीतिन्यास एवास्तु, सर्वेषामिति मास्त्विति चेत्, इष्टापत्तेः । अन्येतु 'उञि च पद' इत्यत्रानुवृत्तगार्ग्यपदं न पूजार्थं, मानाभावात्, उत्तरसूत्रेपि नित्यत्वार्थकसर्वेषांग्रहणाच्च, किन्तु विकल्पार्थं,तेनालघुप्रयत्नेपि विकल्प इति सूत्रकाराशयं वर्णयन्ति । पूर्वोक्तरीत्या फलसत्त्वादाह—**अव्यपरेति** । ननु शब्दत्वेन साद्दश्यग्रहेपि न दोषः, येन विधिरित्यत्र

❀ विषमपदविवृतिः ❀

विधानेन शाकल्यमते तदभावदिति भावः । 'प्रकरण प्रकरणमसिद्धं न योगे योग' इति पक्षे तु नायं दोषः । **तद्बाधादिति** । वस्तुतस्तु 'लोपः शाकल्यस्ये'त्यस्याभावे 'हलि सर्वेषा'मित्यस्य प्रवृत्त्या दोषाभावादयं प्रयासो व्यर्थ एव । **फलाभावाच्चेति** । 'वृक्षव् करोती'त्यादावशीत्यनुवृत्त्या-

न तु सुपीति । पर्युदासे हि सुप्सदृशे प्रत्यय एव स्यात् , एवञ्चाहर्भातीत्यत्र न स्यात् । यदि तु सुब्भिन्ने शब्दे स्यात्–'दीर्घाहो निदाघे'त्यत्रापि स्यात् । सुबन्ते-त्यर्थस्तु न । 'उत्तमैकाभ्या'मित्यादिनिर्देशैः सप्तमीनिर्दिष्टे प्रत्यये तदन्तविध्यभाव-ज्ञापनात् । लक्ष्यानुरोधेन क्वचित्प्रत्ययग्रहणे शब्दस्वरूपस्य विशेषणताया एवाश्र-यणाच्च । अत एव 'रदाभ्यां निष्ठे'त्यादौ न दोषः । **अहरहरिति** । 'नित्यवीप्सयोः'

❁ अभिनव-चन्द्रिका ❁

दिक् । **ज्ञापनादिति** । अवध्यंशे नित्यसाकाङ्क्षं यद्रूपं तद्रूपावच्छिन्नप्रत्ययमात्रवृत्तिविषयता-प्रयोजकं तदादिविशेष्यकतदन्तविधिप्रयोजकत्वेनेत्यर्थकं 'प्रत्ययग्रहणञ्चापञ्चम्या' इतिनिषेधादिति भावः । **शब्दस्वरूपस्येति** । तदादिरूपस्येत्यर्थः । **विशेषणताया इति** । तदादेः परो यस्सुप् तदव्यवहित-पूर्वत्वविशिष्टाहन्शब्दस्य रो न भवतीत्यर्थादिति भावः । **अत एवेति** । रेफान्तो दान्तश्च यः तदादिस्तदव्यवहितोत्तरत्वविशिष्टा या निष्ठा तदवयवो यो निर्दिश्यमानः तदादेस्तकारस्य नकारादेशो भवतीत्यर्थस्वीकारादेवेत्यर्थः । **न दोष इति** । अनुनासिकादशब्दादाचारक्विबन्तात् 'क्विच्क्तौचे'ति

❁ चिदस्थिमाला ❁

देवा यान्तीत्यादौ वल्परत्वाभावेन तदर्थमस्यावश्यकत्वाच्च । अत एव द्वितीयं तन्मूले उक्तम् । पदान्तस्य किं ? गव्यम् । गव्यूति' रित्यत्र यथा न तथोक्तम् । प्रत्ययत्वेन सादृश्ये आह–**प्रत्यये एवेति** । शब्दत्वेन सादृश्ये आह—**यदि त्विति** । **स्यादिति** । 'तर्हि'तिशेषः । **ननु** प्रत्ययग्रहणे तदन्तग्रहणात्सुबन्तभिन्ने तत्सदृशे इत्यर्थस्य दुर्वारत्वेन नाव्याप्त्यतिव्याप्ती । यद्यपि—तथाप्यदोभ्यामित्यादौ ससहायत्वेन 'व्यपे' त्यस्याप्रवृत्त्या दोष एवेति ध्वनयन्–सिद्धान्ते प्रसज्यप्रतिषेधेन तथार्थाभावे निमित्तमाह—**सुबन्ते इति** । **उत्तमैकेति** । अन्यथोक्तरीत्या 'सुपि चे'त्यत्रापि यञादिसुबन्ते इत्यर्थापत्त्या दीर्घो न स्यादिति भावः ।

नन्वेवं ज्ञापनेऽपि रदाभ्यामित्यादौ दोष एव, किञ्च 'येन विधि'रित्यत्र पठितप्रत्ययग्रहणे इत्ये-तद्घटकतदन्तांशापवादभूतया 'प्रत्ययग्रहणे चापञ्चम्या' इत्यनया विशेषणविशेष्यभावव्यत्यासतात्प-र्यकया निर्वाहे किमपूर्वज्ञापनेनात आह—**लक्ष्येति** । अनेन 'ङ्याब्भ्य' इत्यादौ न दोष सूचितम् । **क्वचिदिति** । यत्र पञ्चम्यन्तात्परः प्रत्ययः कार्यान्तरविधनाय परिगृह्यते तत्रेत्यर्थः । आदिना स्य-तेत्यादिपरिग्रहः ? । **न दोष** इति । दृषत्तीर्णेत्यादौ धातुतकारादेर्न नत्वापत्तिरित्यर्थः । प्रकृते च

❁ ज्योत्स्ना ❁

सिद्धत्वं नैव प्राप्तमिति बोध्यम् । **इत्यादिनिर्देशैरिति** । तदन्तविधिना 'सुपि चे'त्यत्र सुबन्त इत्य-र्थादुत्तमैकाभ्यामिति दीर्घप्राप्तौ निर्देशानुपपत्तिरिति भावः । **इत्यादौ न दोष इति** ।

❁ सदाशिवभट्टीयम् ❁

'स्वस्य चे'ति पाठेन सुब्भिन्ने शब्दे सुबन्ते इत्यर्थेनाहोभ्यां दीर्घाहोनिदाघेत्यादिसिद्धेरत आह—**सुबन्त इति** । वस्तुतः 'स्वस्य चे'त्यस्य वाचनिकत्वेप्यसहायस्यैव स्वस्य रूपस्य सञ्ज्ञा, 'मन्त्रेषु' 'सर्वेषा'मित्यादि-लिङ्गादिति अहोभ्यामित्यत्र दोष एवेति बोध्यम् ।

❁ विषमपदविवृतिः ❁

ऽस्याप्रवृत्तिः, वृक्षव् हसतीत्यादेस्त्वनभिधानम , द्वयोरपि वाऽनभिधानमिति भावः । **निर्देशैरिति** । 'सुपि चे'त्यत्र तदन्तविधौ दीर्घानापत्तेरिति भावः । **निष्ठेत्यादाविति** । रदाभ्यां परस्य निष्ठान्तस्य यस्तकार इत्यर्थे दृषत्तीर्णेत्यादौ धातुतकारस्य ततः पूर्वतकारस्य च नत्वापत्तिरिति भावः । वर्त्ति-

रिति द्वित्वम् । 'न लुमते'ति निषेधात्सुप्परत्वाभावः ।

गतमहो रात्रिरिति । केचित्तु भाष्ये आतिदेशिकस्याहोरात्रस्यैवोदाहरणात्, 'न लोपः प्रातिपदिकान्तस्ये'ति सूत्रे 'न हि रूपरात्ररथन्तरेषु रौ रे वा विशेषोऽस्ती'त्यत्र प्रायेण रात्रेति पाठाच्चेदृशानामनभिधानमेवेत्याहुः । **अनन्यत्वादिति** । रात्रिशब्दत्वाक्षतेरिति भावः । अनुवादे रेफविशिष्टस्योपादानाद्रेफस्य रेफविधानं व्यर्थमत आह—**विसर्गापवाद इति** ।

ढ्रलोपे । नायं तत्पुरुषोऽनीयरि चचारेत्यादौ च दोषापत्तेः । नापि बहुव्रीहि-

❀ **अभिनव चन्द्रिका** ❀

क्तप्रत्यये 'एकाच'इतीडभावे अतो लोपे दृषच्छब्देन योगे 'दृषत्त'इत्यादाविति भावः। **सुप्परत्वाभाव इति**। असुपीतिप्रसज्यप्रतिषेधस्वीकारेण लुप्तप्रत्ययाव्यवहितपूर्वत्वेन साक्षादवच्छिन्ना लुप्तप्रत्ययनिरूपिताङ्गसञ्ज्ञावत्पर्याप्तधर्मेण साक्षात्परम्परया वा अवच्छिन्ना च या उद्देश्यता तादृशोद्देश्यताकत्वस्यासुपीतिनिषेधे सत्त्वादिति भावः । **रात्रिशब्दत्वाक्षतेरिति** । वस्तुतस्तु अक्तपरिमाणे एकदेशविकृतन्यायाप्रवृत्त्या स्थानिवद्भावेन रात्रिशब्दत्वमत्र बोध्यम् । **ढ्रलोपे** । केचित्तु लुप्यतेऽसाविति बाहुलकात्कर्मणि घञ् । ढश्च रश्चानयोः समाहारः ढ्र्, सचासौ लोपश्चेतिविग्रहः। निपातनाड्ढ्रशब्दस्य पूर्वनिपातः । तथाच लुप्यमानढ्राव्यवहितपूर्वत्वविशिष्टाणो दीर्घ इति सूत्रार्थः । पूर्वग्रहणन्तु स्पष्टार्थमेव। न च पूर्वत्वविशिष्टस्याणो दीर्घ इति वाक्यार्थबोधः स्यादिति वाच्यं, लुप्यमानढ्राद्युत्तरपदाव्यवहितपूर्वत्वविशिष्टाणोऽसम्भवात् । किञ्च'ढ्रलोप'इतिदृष्ट्या'रोरि' 'ढोढे लोप' इत्यनयोरसिद्धत्वस्य

❀ **चिदस्थिमाला** ❀

तस्मिन्निपिपरिभाषया सुपि परे इत्यर्थे तस्य नियमेनावधिसाकाङ्क्षत्वेनाऽह्न इत्यादेरेव चोपस्थितत्वेनावधित्वेनान्वयात्पञ्चम्यन्तस्य तद्विशेषणत्वं स्पष्टमेव । एवं 'सुपि च'त्यादावुपस्थिताङ्गादेरेव तत्त्वं बोध्यम् । अधिकं परिभाषेन्दुशेखरादौ सुव्यक्तन्तत एव बोध्यम् । **त्वाभाव इति** । इदमग्रेऽपि बोध्यम् ।

मूलं दूषयति—**केचित्त्विति** । **आतीति** । एकदेशेतिन्यायप्रवृत्तेरिति भावः । ननु 'न चोदाहरणमादरणीय'मित्युक्तेरिदमयुक्तमत आह—**नलोप इति** । **प्रायेणेति** । अनेन पाठान्तरसत्तापि सूचिता । इयमेवात्रारुचिः । ननु समासान्तस्याविकारत्वेन कथं तन्न्यायसञ्चरोऽत आह—**रात्रीति** । समाहारद्वन्द्वादित्यर्थः । **रात्रीति** । हलन्ते इति भावः। ढ्रत्यत्राकार उच्चारणार्थ इत्याशयेनाह—**नायमिति** । वर्तिपदार्थप्रधानत्वेनान्तरङ्गत्वात् षष्ठीतत्पुरुष इत्यर्थः । **नीयरीति** । 'पचनीय' मित्यादाविति भावः । ननु नायं प्रतिपदोक्तो रलोपः,किञ्च तथैव पठेदत आह—**चचारेत्यादाविति** । अत्र लक्ष्यसंस्कारकवाक्योपप्लवेन

❀ **ज्योत्स्ना** ❀

'रदाभ्या'मित्यत्र हि निष्ठान्तस्य यस्तकार इत्यर्थे दृषत्तीर्ण इत्यादौ दोषः स्यात् । **अनीयरीति** ।

❀ **सदाशिवभट्टीयम्** ❀

ढ्रलोपे । ननु रित्सु न दोषस्तत्र रेफं परित्यज्य पकारादेरप्यनबन्धुं शक्यत्वात्,'उपोत्तमं रिती'त्यत्रोपोत्तमं तितीति वाच्यमित्यत आह—**चचारेति** । **दोषापत्तेरिति** । न च लक्षणप्रतिपदोक्तपरिभाषया निस्तारः,

❀ **विषमपदविवृतिः** ❀

पदार्थस्य वृत्त्यघटकविशेष्यान्वयायोगान्न तदन्तविधिरिति केचित् । 'सप्तमीस्थ' इत्यादाविव तदन्तविधिप्राप्तिरित्यन्ये । **न लुमतेति निषेधादिति** । तत्राङ्गपदम्पूर्वोपलक्षणं, रेफविधानसामर्थ्यात्रिपाद्यामपि प्रवृत्तिरिति भावः । ननु 'अहन्' 'सुपि र' इतीत्येव न्यासोऽस्तु लाघवादिति चेन्न, गुरुन्यासेन क्वचिदसुप्यपि रुत्वकल्पनात् । तदेतत्पठ्यते— **रूपरात्रिरथन्तरेष्विति** । अकारान्ते

व्यधिकरणत्वात् । अतो णिजन्तात्कर्मण्यण्युपपदसमास इत्याह—**ढरेफावित्यादि** ।
भाष्ये तु व्यधिकरणबहुव्रीहिरेव दर्शितः। न च 'अजर्घा' इत्यादौ 'सिपि धातो'रिति रुत्वस्य, 'लीढ' इत्यादौ ढत्वादीनां, 'पितू राज्य'मित्यादौ संयोगान्तलोपस्यासिद्धत्वात्कथं दीर्घ इति वाच्यम्, ढग्रहणेन लण्सूत्रे 'अजर्घा' इति भाष्योदाहरणेन च तत्तच्छास्त्रैक-वाक्यतापन्नपूर्वत्रासिद्धमितिसूत्रस्थपूर्वग्रहणेनैतत्सूत्राग्रहणबोधनात् । **अणः किमिति** । अच इत्येव सिद्धमिति प्रश्नः । तृंह्व इति पाठे 'नकारजावनुस्वारपञ्चमा'विति वृद्धोक्तेः 'अनिदिता'मिति नलोपे 'तृढ' इति रूपम् । अत्राणपूर्वेणैव व्याख्यानात् ।

विप्रतिषेधे । विप्रतिपूर्वात्कर्मव्यतिहारे वर्त्तमानात्सेधतेर्घञि परस्परविरोधार्थो विप्रतिषेधशब्दस्तत्र नित्यस्यावश्यकतयाऽन्तरङ्गस्य ज्ञापकादिनाऽपवादस्य वचनप्रामाण्या-

---

❀ **अभिनव-चन्द्रिका** ❀

बाधो न वक्तव्यो भवतीत्यपरमनुकूलम्भवति, लोपात्प्रागेव दीर्घप्रवृत्तेरित्याहुः । **नलोपे इति** । 'तृन्हूँ'इत्येवोपदेशः,'त्रेस्त्रय'इत्यत्र, 'घोर्ङिती'ति गुणादिवदनुस्वारादिना 'तृंह्व' इति रूपस्य सम्पन्नत्वेन नकारघटिते एव धातुत्वाङ्गत्वादेः सत्त्वादिति भावः । **व्याख्यानादिति** । लण्सूत्रस्थभाष्यरूपा-व्याख्यानादिति भावः । **विप्रतिषेधे परम्** । विप्रतिषेधे किम् ? पराऽनित्यापेक्षया पूर्वस्य नित्यस्य,

❀ **चिदस्थिमाला** ❀

तस्य तत्त्वमस्ति । नचाभ्यासह्रस्वेन निर्वाहः, अभ्यासविकारेषु बाध्यबाधकभावाभावेन युगपत्प्रवृत्तेराङ्गत्वा-त्वाद्वा पर्जन्यन्यायेन ह्रस्वे ततो दीर्घे विकारान्यानुपूर्व्यैक्येन 'लक्ष्ये लक्षण'मितिन्यायेन पुनस्तदप्राप्तेः। आदि-ग्राह्ये पपार तितीरेत्यादौ दोषाच्चेति भावः। **लोपस्येति** । लोपस्य चासिद्धत्वादित्यर्थः । तथा च ढूलोप एव नेति एतदप्राप्तिरिति भावः । पुना रमत इत्यादौ रग्रहणस्य साफल्यादाह—**ढेति** । अत एवास्य विशेषा-पेक्षत्वे तदंशे युक्त्यन्तरमाह—**तत्तदिति** । सिपिधातो रुर्वेत्यादीत्यर्थः । 'अच' इ तिपरिभाषोपस्थि-त्यैतल्लाभः । हल्षु फलाभावात् । अत एवाह—**व्याख्येति** । एतेन कृतेऽपि तत्र दोषतादवस्थ्यमित्यपा-स्तम् । 'सेधतेः=षिध गत्या'मित्यतः । 'भावे' इति शेषः । **परस्येति** । विविधं प्रतिकूलं गमनमि-

❀ **ज्योत्स्ना** ❀

'तव्यत्तव्यानीयर' इत्यनेन विहित इत्यर्थः । **ज्ञापकादिनेति** । ज्ञापकञ्च—ओमाङिति

❀ **सदाशिवभट्टीयम्** ❀

प्रत्यक्षसिद्धपूर्वत्रासिद्धमित्यस्य बाधापेक्षया लक्षणप्रतिपदोक्तपरिभाषाबाधस्यैवोचितत्वादिति भावः । **भाष्ये त्विति** । अयं भावः—कर्मण्यणि 'अदर्शनं लोप' इत्यनेन सङ्केतितस्य ग्रहणमित्यस्य वक्तुं शक्यत्वेन प्रसक्ताप्रसक्तसाधारणदर्शनाभावस्य लुब्धात्वर्थत्वेन ग्रहणापत्तौ शिव इहेत्यादौ भावरूपातिदेशेपि स्थान्य-दर्शनसत्त्वेन तज्जनके ईतिशब्दे पूर्वस्य दीर्घापत्तिः । नच यलोपासिद्धत्वेन न तत्परत्वं, पूर्वपदे-नैतत्सूत्राग्रहस्येष्टत्वात् । मम **तु** प्रसक्तादर्शनस्यैव शास्त्रे लोपपदार्थत्वेन भावरूपेण चादेशेन स्थानिप्रसङ्ग-स्यैव बाधेन प्रसक्तदर्शनविरहेण सञ्ज्ञैव नेति न दोष इति। स्पष्टं चेदं लोपसञ्ज्ञासूत्रे भाष्ये। **सिपिधातो-रिति** । इत्यनुवर्तमाने 'दश्चे'त्यर्थः । **विप्रतिषेधे** । **परस्परेति** । अन्यथा सर्वथा विरोधाभावे सन्देहाभावेन

❀ **विषमपदविवृतिः** ❀

रान्ते परत्वादतो लोपस्येकारोकारान्ते च गुणस्य प्रवृत्त्या न दोषः। **चचारेत्यादौ चेति** । नन्वन्तरङ्ग-त्वाद्दीर्घेऽभ्यासह्रस्वत्वेन सिद्धमिति चेन्न । ऊखतुरित्यादावपि सवर्णदीर्घे ह्रस्वापत्तेः । यदि च तत्र वार्णादाङ्गमिति पूर्वं ह्रस्वस्ततो दीर्घस्तर्हि प्रकृतेपि समः समाधिः । **विप्रतिषेधे परङ्कार्यम्** । **आव-श्यकतयेति** । अक्लृप्ताभावकस्याभावकल्पनायोगादिति भावः। **तद्भिन्नोस्य विषय इति**। ननु नित्या-

द्बाधकत्वे स्थिते तद्भिन्नोऽस्य विषय इत्याह—**तुल्यबलेति** । द्वयोः शास्त्रयोः क्वचिल्लब्धावकाशयोरेकत्र प्रयोगे युगपदसम्भवि स्वकार्यसमर्पणञ्च सः । तत्र प्रायेणैकस्य कार्यद्वययोगकृतेऽसम्भवे एतस्य प्रवृत्तिः । यथा 'वृक्षेभ्य' इति । तत्र हि दीर्घैत्वयोर्युगपत्प्रवृत्तौ स्वस्वनिमित्तानन्तर्यासम्भवः । क्व चित्केवलासम्भवेऽपि, यथा 'शिष्टा' दित्यादौ । अत्र हि तातङ्शाभावयोर्युगपत्प्रवृत्तौ स्वस्वनिमित्तानन्तर्यासम्भवः ।

❀ **अभिनव-चन्द्रिका** ❀

परबहिरङ्गापेक्षया पूर्वान्तिरङ्गस्य च बलवत्त्वं यथा स्यात्। अन्यथा लौकिकन्यायमूलक'परान्नित्यं बलव'दिति न्यायापेक्षया, 'ओमाङोश्चे'त्याङ्ग्रहणलिङ्गकासिद्धपरिभाषापेक्षया च (लिङ्गापेक्षया) श्रुतस्य 'परं कार्य'मितिवचनस्य प्राबल्येन 'तुदति''सुलुनी'इत्यादौ परत्वाद्गुणनुमोरापत्तिः । विप्रतिषेधपदसत्त्वे तु निरुक्तविषये तुल्यबलविरोधाभावादेतदप्रवृत्त्या न दोष इति दिक् । **युगपदसम्भवीति** । सर्वशास्त्रेण स्वविधेयघटिते साधुत्वस्यान्यत्र चासाधुत्वस्य बोधनात्पूर्वपरशास्त्राभ्यां परस्परेण परस्परविधेयघटितयोरसाधुत्वबोधनेनासम्भव इति भावः । **स्वस्वनिमित्तानन्तर्यासम्भव इति** । वस्तुतस्तु चिन्त्यमिदम्—तत्तन्निमित्तानामावृत्त्या उद्देश्यविधेयोभयविशेषणत्वकल्पने मानाभावात्फलाभावाच्च । न च तत्तन्निमित्तस्यावृत्त्या उद्देश्यविधेयोभयविशेषणत्वाकल्पने आनुमानिकस्थान्यादेशभावकल्पे 'इको यणची'त्यादेरजव्यवहितपूर्वत्वविशिष्टेग्घटितस्थाने यण्घटितं भवतीत्यादिक्रमेणार्थेन 'सुधी उपास्य'इत्यस्य स्थाने 'सुध्य्' इति यान्तादेशापत्तिरिति वाच्यं, तत्तन्निमित्तस्याऽऽवृत्त्या 'इको यणची'त्यादेः 'अजव्यवहितपूर्वत्वविशिष्टेग्घटितस्य स्थाने अजव्यवहितपूर्वत्वविशिष्टयण्घटितं भवती'त्यादिक्रमेणार्थस्वीकारेऽपि 'सुधी उपास्ये'त्यस्य स्थाने उदासीन-'दध्यानये'त्यादेरादेशापत्तेर्दुर्वारत्वात् । स्थानेन्तरतमपरिभाषया एतद्वारणन्त्वस्माकमपि तुल्यमिति आवृत्त्या तत्तन्निमित्तस्य उभयत्रान्वयो विफल इति दिक् । **स्वस्वनिमित्तानन्तर्यासम्भव इति** ।

❀ **चिदस्थिमाला** ❀

त्यर्थकतयेति भावः । तत्र=मिथोविरोधविषये । अपिना लोकन्यायपरिग्रहः । तुल्यबलविरोधशब्दार्थमाह—**द्वयोरिति** । शेषत्वविवक्षया षष्ठी, कार्येऽन्वयो वा । असम्भवित्वमपि तस्यैव विशेषणम् । चस्त्वर्थे । तत्र=तस्मिन्सति । **युगपदिति** । 'आ–ए' इति, 'ए–आ' इति चेत्यर्थः । 'प्रायेणे'त्यस्य फलमाह—**क्वचिदिति** । एकस्य कार्यद्वययोगशून्ये इत्यर्थः । आदिना शा-परिग्रहः । 'वत्वेने'तिपाठः ।

❀ **ज्योत्स्ना** ❀

सूत्रे आङ्ग्रहणं, 'वाह ऊ'डित्यत्रोड्ग्रहणञ्च । आदिपदात्—, 'अचः परस्मि'न्निति सूत्रोक्तौ

❀ **विषमपदविवृतिः** ❀

न्तरङ्गादीनां ज्ञापकन्यायाभ्यां बाधकत्वं, परस्य तु विप्रतिषेधे परमिति प्रत्यक्षवचनकृतं तदिति प्रत्यक्षवचनस्य ज्ञापकन्यायादितः प्राबल्यादिदमयुक्तमिति चेत्सत्यम् । तुल्यबलविरोधस्य विप्रतिषेधशब्दार्थत्वाङ्गीकारेणादोषात् । तदेतदभिप्रेत्यात्र सूत्रे भगवता भाष्यकृतोक्तम्–'द्वौ प्रसङ्गौ यदान्यार्थौ भवत एकस्मिंश्च युगपत्प्राप्नुतः स विप्रतिषेध' इति । तत्रान्यार्थावित्यनेनापवादव्यावृत्तिः । 'युगपत्प्राप्नुत' इत्यनेनान्तरङ्गव्यावृत्तिः । तद्धि परस्मात्पूर्वमेव प्राप्नुते, न तेन युगपत् । इदं नित्यव्यावर्तकस्योपलक्षणं विशेषणम् । कैयटस्तु अत्र सूत्रे कार्यमित्यर्हार्थे कृत्यः, करणार्हं कार्यं, तुल्यबलञ्च करणार्हमिति नित्यानित्योत्सर्गापवादान्तरङ्गबहिरङ्गेषु अस्य सूत्रस्याव्यापार इत्याह—**स्वस्वनिमित्तानन्तर्यासम्भव इति** । निमित्तं विधेयविशेषणमिति भावः । **सकृद्गताविति** ।

यद्यपि तातङादेः स्थानिवत्त्वेनास्त्येव तत् , तथापि अतिदेश आदेशप्रवृत्त्युत्तरमेव, न तु तत्प्रवृत्तिकाले इति युगपदसम्भवोऽस्त्येवेति परत्वात्तातङि सकृद्गतिन्यायेन न शादेशः। स्पष्टञ्चेदं सर्वं प्रकृतसूत्रे 'इको गुणवृद्धी' 'अदसो मा'दित्यादावाकरे । तत्र युगपदुभयोः कार्ययोरसम्भवात्पर्यायेण तृजादिवच्छास्त्रद्वयप्रसङ्गे नियमार्थमिदम्—परमेवेति। तेन 'तिसृणा'मित्यत्र यौगपद्यासम्भवेन परत्वात्तिस्रादेशे पुनः स्थानिवत्त्वेन त्रयादेशो न।

❀ अभिनव-चन्द्रिका ❀

यत्किञ्चिदङ्गाव्यवहितोत्तरत्वविशिष्टयोस्तुह्योः स्थाने यत्किञ्चिदङ्गाव्यवहितोत्तरत्वविशिष्टस्तातङ् भवतीति **'तुह्यो'रित्यस्य,** ह्यव्यवहितपूर्वत्वविशिष्टशासः स्थाने ह्यव्यवहितपूर्वत्वविशिष्टः शो भवतीति 'शा हौ'वित्यस्यार्थेन च **'शिष्टा'**दित्यादौ प्रकृतिप्रत्यययोर्युगपत् शातातङोः प्रवृत्तौ–शादेशे ह्यव्यवहितपूर्वत्वस्य, तातङि–यत्किञ्चिदङ्गाव्यवहितोत्तरत्वस्य चाभावात्केवलनिमित्तानन्तर्यासम्भवः। 'वृक्षेभ्य' इत्यादौ तु **'सुपि'** चेत्यस्य यञादिसुबव्यवहितपूर्वत्वविशिष्टादन्ताङ्गस्य यञादिसुबव्यवहितपूर्वत्वविशिष्टो दीर्घो भवतीति, 'बहुवचने झल्ये'त्यस्य च झलादिबहुवचनसुबव्यवहितपूर्वत्वविशिष्टादन्ताङ्गस्य झलादिबहुवचनसुबव्यवहितपूर्वत्वविशिष्ट एकारो भवतीत्यर्थेन च दीर्घैत्वयोर्युगपत्प्रवृत्तौ केवलाऽसम्भवः, स्वस्वनिमित्तान्तर्यासम्भवश्चेति भावः।

ननु शिष्टादित्यादौ स्थानिवद्भावेन ह्यव्यवहितपूर्वत्वस्य, शादेशे यत्किञ्चिदङ्गाव्यवहितोत्तरत्वस्य च तातङि सत्त्वेन कथं स्वस्वनिमित्तान तर्यासम्भव इत्यभिप्रेत्याशङ्कते—**यद्यपीत्यादिना।** **न तु तत्प्रवृत्तिकाले इति।** तथा च अतिदेशप्रवृत्तिकालिकं तत्प्राक्कालिकञ्च स्वस्वनिमित्तानन्तर्यासम्भवमादाय विप्रतिषेधसूत्रं प्रवर्त्तते इति भावः। **न शादेश इति।** तातङ्विधायकशास्त्रेण

❀ चिदस्थिमाला ❀

वत्वे इति पाठे सतिसप्तमी। तत्=स्वस्वनिमित्तानन्तर्यम्। **मेवेति।** प्रवर्तते इतिशेषः। **युगपदिति।** उक्तरीत्येति भावः। कैयटादिसंग्रहायाह—**आकरे इति।** तत्र हि अवतरणोक्त आद्ये उक्तस्ततो द्वितीये यद्यपीत्यतः प्राक्तनो नावश्यं द्विकार्ययोग एव विप्रतिषेधः, किन्तर्ह्यसम्भवोपीत्यादिनोक्तः, यद्यपीत्याद्युक्तस्तृतीये उक्त इति बोध्यम्। यत्तु कैयटादिसकलग्रन्थकाराः व्यक्तिपक्षे नियमार्थमिदमिति सकृद्गतिन्यायसिद्धिर्जातिपक्षे विध्यर्थमिदमिति पुनः प्रसङ्गविज्ञानसिद्धिरिति तदन्यत्र सम्यग्दूषितं, ततः एवावधार्यम्। तस्माल्लक्ष्यानुसारात् क्वचिच्छास्त्रीयदृष्टान्ताश्रयणं क्वचिल्लौकिकदृष्टान्ताश्रयणमिति भाष्यसम्मतमार्ग एव युक्तः। अत एव कुरुतात्त्वमिति कैयटोक्तसकृद्गतिन्यायोदाहरणसङ्गतिरन्यथा कुरुशब्दाद्धेर्लुगिति वचनस्य तातङ्भावपक्षे चारितार्थ्येऽपि कुरुशब्दाद्धेस्तातङिति वचनस्यानवकाशत्वेन विप्रतिषेधाप्रसक्त्या तदङ्गतिः स्पष्टैव। तदेतद्ध्वनयन्नाह—**तत्रेति।** तुल्यबलविरोधविषये इत्यर्थः। अन्यतराविषये। चरितार्थयोरेकत्र लक्ष्ये इति शेषः। असम्भवप्रसङ्गयोरविरोधाय कार्यशास्त्रयोर्निवेशः। **असम्भवादिति।** विरोधादिति भावः। बाधकाभावेनेतिशेषः। तथा चोत्सर्गापवादवैधर्म्यम्। अयञ्च पर्यायप्रसङ्गे हेतुर्वचनद्वयप्रामाण्यादिति भावः। ननु शास्त्रप्रसङ्गोऽपि कार्यार्थ एवेति कार्ययोर्युगपदसम्भवे कथं शास्त्रयोः प्रसङ्गोऽत आह—**तृजादीति।** एवञ्च युगपदसम्भवः, पर्यायेणोभयप्रसङ्ग इति तात्पर्यं। तथा च पक्षे प्राप्ततन्त्रान्तरप्रसिद्धनियमविधिरेवायमित्यप्राप्तांशपरिपूरकत्वमेतस्येतरनिवृत्तिस्त्वार्थीति। तद्द्योतक एवकार इति

❀ सदाशिवभट्टीयम् ❀

षष्ठीस्थाने इत्यस्येवास्यापि प्रवृत्त्यभावे सिद्धे विप्रतिषेधपदवैयर्थ्यापत्तिस्तेनासिद्धत्वविषयेऽन्यतरविरोधेपि परस्परविरोधभावेन नास्य प्रवृत्तिः। **प्रवृत्तिकाल इति।** तदवच्छिन्ने काले इत्यर्थः। तत्प्राक्काले उत्तर-

तत्पठ्यते-'सकृद्गतौ विप्रतिषेध यद्बाधितं तद्बाधितमेवे'ति।

यद्वा-यथा तुल्यबलयोरेकः प्रेष्यो भवति स तयोः पर्यायेण कार्यं करोति, यदा

❀ अभिनव-चन्द्रिका ❀

स्वप्रवृत्तियोग्यातिरिक्तत्वेन स्वविधेयघटितातिरिक्तत्वेन च 'शा हा'वित्यत्र सङ्कोचादिति भावः। **आकर इति।** कैयट इत्यर्थः। **पर्यायेणेति।** अयम्भावः-'असति बाधके उद्देश्यतावच्छेदकावच्छेदेन विधेयान्वय इति सिद्धान्तः। अवच्छेदकावच्छेदेन विधेयान्वय इत्यस्य-उद्देश्यतावच्छेदकव्यापकत्वं विधेयेविधेयसंसर्गे वा नियमतो भासते इत्यर्थः। तथा च 'ण्वुल्तृचा'वित्यादौ धातुत्वव्यापकत्वस्य ण्वुल्त्वादिना ण्वुलादौ बाधाण्ण्वुलादीनामन्यतमत्वेन व्यापकत्वं वक्तव्यम्। न च तद्भिन्नभिन्नरूपान्यतमत्वस्य विशेष्यविशेषणभावे विनिगमनाविरहेण नानाविधत्वात्तेषु सर्वेषु तेनैव हेतुना व्यापकतावच्छेदकत्वं स्यादिति वाच्यं, 'यादृशसङ्ख्याविशिष्टानामन्यतमत्वं वक्तव्यन्तत्सङ्ख्याका ये तद्भेदा तादृशभेदात्यन्ताभाववत्त्वं तदन्यतमत्व'मितिपरिष्कारेणादोषात्। यादृशविधेयेतरो यस्तादृशोद्देश्यतावच्छेदकावच्छिन्नोद्देश्यतानिरूपितविधेयताश्रयः तदनधिकरणं तत्तदुद्देश्यतावच्छेदकाधिकरणं तद्वृत्त्यत्यन्ताभावाप्रतियोगित्वं तदुद्देश्यतावच्छेदकव्यापकत्वं तस्मिन्विधेये। यथा 'ण्वुल्तृचा'वित्यादौ ण्वुल्त्वावच्छिन्ने धातुत्वव्यापकत्वं वक्तव्यं, तत्र ण्वुल्त्वावच्छिन्नातिरिक्तः धातुत्वावच्छिन्नोद्देश्यतानिरूपितविधेयताश्रयो यस्तृजादिस्तदनधिकरणं यद्धातुत्वाधिकरणं 'कारक' इति, तद्वृत्त्यत्यन्ताभावाप्रतियोगित्वं ण्वुलीति लक्षणसमन्वयः। स्यादेतत्—विकल्पशास्त्रे इव 'ण्वुल्तृचा'वित्यादावपि उद्देश्यतावच्छेदकसामानाधिकरण्येनैवान्वयः स्वीक्रियतां, किमुद्देश्यतावच्छेदकावच्छेदेन विधेयान्वयेन ? न च 'ण्वुलतृचा'वित्यादावुद्देश्यतावच्छेदकसामानाधिकरण्येनान्वयस्वीकारे केवलधातुमात्रस्य 'पच्'मुच्'इत्यादिप्रयोगापत्तिरितिवाच्यं, 'वर्तमाने ल'ड्ित्यस्य वर्तमानकालेतरकालाविवक्षायां लट्प्रत्ययो भवतीत्यर्थेन तादृशापत्तेरसम्भवात्। नचैवमपि 'स्वौजसमौ'ड्ित्यादौ उद्देश्यतावच्छेदकप्रातिपदिकत्वसामानाधिकरण्येन स्वादिविधानेन च निर्विभक्तिकप्रातिपदिकप्रयोगापत्तिरितिवाच्यम्, 'एकत्वे एकवचन'मित्यस्यैकत्वेतरसङ्ख्याया अविवक्षायामेकवचनमित्यर्थेनैकवचनस्य दुर्वारत्वेन तादृशप्रयोगाऽसम्भवात्। अत एव 'सुन्दरं पचती'त्यादौ निरर्थकैवचनोपपत्तिरितिचेन्नैवं, 'रीगृदुपधस्ये'त्यनुवर्त्तमाने'रुग्रिकौ'इत्यत्र उद्देश्यतावच्छेदकयङ्लुगन्तसम्बन्ध्यभ्याससम्बन्धिऋदुपधत्वसामानाधिकरण्येन विधेयान्वये रुक्रिक्रीक् एतदघटितलक्ष्यस्यापि साधुत्वापत्तेरिति दिक्। **यौगद्यागसम्भवेनेति।** तिस्रादेशघटिते त्रयादेशघटिते च पूर्वपराभ्यां परस्परेण साधुत्वाऽसाधुत्वयोर्विधानादिति भावः। **त्रयादेशो नेति।** 'त्रेस्त्रय्'इत्यत्र तिस्रादेशप्रवृत्तियोग्यातिरिक्तत्वेन, तिस्रादेशघटितातिरिक्त-

❀ चिदस्थिमाला ❀

बोध्यम्। **सकृदिति।** गतौ=गत्यभिन्ने-तादृशप्राप्त्यभिन्ने-विप्रतिषेधे सति, सकृदेकवारं=यद्बाधितं तद्बाधितमेवेत्यर्थः। यथेत्यस्य न करोतीत्यत्रान्वयः। ननु तदङ्गोल्लङ्घनेन तावचरितार्थावत आह—**तुल्येत्यादि-करोती**त्यन्तेन। तथाच तुल्यबलत्वादेव पर्यायेणैव प्रेरणया प्रेष्यस्य मिथोऽविरुद्धकार्यकरणेन स्वामिनौ

❀ सदाशिवभट्टीयम् ❀

काले च तत्सत्त्वेपि तत्काले तदसम्भवरूपविरोधस्यैतत्प्रवृत्तौ नियामकत्वं भाष्यात्स्वीक्रियते इति भावः।

❀ विषमपदविवृतिः ❀

यद्बाधितमित्यनान्वेति। गतौ=युगपत्प्राप्तौ। पुनः प्रसङ्गविज्ञानबीजमाह-**यद्वेत्यादिना। लक्ष्यप्रेष्ययोरिति।** वस्तुतस्तु भृत्यसदृशं लक्ष्यं, प्रेषणक्रियासदृशी संस्कारक्रिया, पर्यायेण कार्यकरणस्थानापन्नञ्च शास्त्रविहितकार्यस्वीकारः। तथा च यथा तुल्यबलयोरेको भृत्यो युगपत्प्रेषितो पूर्वं नानादिग-

तमुभौ युगपत्प्रेषयतो नानादिक्षु च कार्ये भवतस्तदोभयोर्न करोति, यौगपद्यासम्भवात्, तथा शास्त्रयोर्लक्ष्यप्रेष्ययोः क्वचिल्लक्ष्ये यौगपद्यासम्भवादप्रतिपत्तौ प्राप्तायामिदं 'परं भवती'ति विद्ध्यर्थम्। तत्र कृते यदि पूर्वस्यापि निमित्तमस्ति तदा तदपि भवत्येव। तत्पठ्यते–'पुनः प्रसङ्गविज्ञानात्सिद्ध'मिति। यथा 'भिन्धी'त्यत्र परत्वात्तातङि पुनर्धिर्भवति। अत्र तातङ्धिभावयोर्युगपदेकस्थानिसम्बन्धस्याङ्गरूपनिमित्तानन्तर्यस्य वा न

❀ अभिनव-चन्द्रिका ❀

त्वेन सङ्कोचादिति भावः। **उभयोर्न करोतीति**। 'यद्यविरोधार्थौ'ति शेषः। अत एव 'यद्यविरोधार्थौ तदोभयोर्न करोती'ति भाष्ये दृश्यते। **यौगपद्यासम्भवादिति**। उक्त एवार्थः। **तदपि भवत्येवेति**। तिसृणामित्यादौ नुड्विधायकशास्त्रे तिस्रादेशप्रवृत्तियोग्यातिरिक्तत्वेन सङ्कोचादिति भावः।

पुनर्धिर्भवतीति। चिन्त्यमिदम्। 'भिन्ता'दितिरूपासिद्धेः। नच 'भिन्धी'त्येकमेव रूपं भवति, ननु 'भिन्ता'दिति वाच्यं, 'भिन्ता'दित्यादिसिद्धये परत्वात्तातङि धिभावमाशङ्क्य सकृद्गतिन्यायेन समाधानपरस्थानिवत्सूत्रभाष्यवार्तिकविरोधात्। न च तुह्योरितिशास्त्रस्य वैकल्पिकत्वेन भावाभावोभयविधायकत्वात्तद्विधेयाभावेन धेर्बाधो माभूदित्येवं परतया

❀ चिदस्थिमाला ❀

चरितार्थौ यथा तद्वदितिभावः। एकत्र तत्सम्भवादाह–**नानेति**। तत्रापि प्रदेशे सम्भवादाह– **दिक्ष्विति**। **यौगेति**। यौगपद्येनासम्भवादित्यर्थः। **लक्ष्यप्रेष्येति**।–बहुव्रीहिः। अन्यत्र प्रेष्यस्थानीयलक्ष्ये चरितार्थयोरित्यर्थः। तत्र=परस्मिन्। यथा चात्र 'अचश्चे'ति सूत्र-भाष्यकैयटादिविरोधो न तथा प्रतिपादितं **गदायाम्**। ननु बुद्धिविपरिणामस्य सिद्धान्तत्वेन वास्तवस्थानिसम्बन्धः क्वापि न, प्रकृते उभयबुद्धिप्राप्तावपि वाचः क्रमवृत्तित्वादैच्छिकक्रमेण स्थितिः सम्भवतीति प्राचामनुरोधेनोक्तमिदमयुक्तमत आह–**स्वाङ्गरूपेति**। ननु कार्यस्य प्रयोगरूपैकदेशस्थत्वेन कथं

❀ ज्योत्स्ना ❀

लोकन्यायः। **परत्वात्तातङि पुनर्धिर्भवतीति**। इदं स्थानिवत्सूत्रस्थभाष्यविरुद्धम्। तत्रहि लोडादेशे–'शाभाव-जभाव-धित्व-हिलोपैत्वप्रतिषेध' इति वार्तिकेन–शिष्टात्–हतात्'-भिन्तात्–कुरुतात्–स्तादित्युदाहरणेषु तातङि परत्वाल्लोडादेशे कृते–प्राप्तानां शाभावादीनां प्रतिषेधं विधाय–सकृद्गतिन्यायेन वार्तिकं–प्रत्याख्यातम्। किञ्चैवमादौ यदि पुनःप्रसङ्गविज्ञानं स्यात्प्रथमप्रवृत्तापरशास्त्रप्रवृत्तिर्लक्ष्ये बाधिता स्यात्, तस्मात्सकृद्गतिन्याय एव व्यवस्थापक इति–'अचश्चे'त्यत्र प्रदीपे स्पष्टम्। भिन्धीति तु तातङभावपक्षे बोध्यम्।

पुनः प्रसङ्गविज्ञानोदाहरणं तु–खट्वायामित्यत्र परत्वाण्ङेरामि कृते निमित्तसद्भावाद्याडित्यधिकों

❀ सदाशिवभट्टीयम् ❀

पुनर्द्धिर्भवतीति। तदभावपक्ष इति भावः।

❀ विषमपदविवृतिः ❀

ाधिकरणत्वेन युगपदसम्भवि कार्यद्वयं न करोति, तथा तुल्यबलयोः शास्त्रयोः संस्कार्यं लक्ष्यं युगपदसम्भवि तद्विहितकार्यद्वयं न भजतीत्यर्थः। 'स तयोः पर्यायेण कार्यं करोति' इत्यन्तो भाष्यग्रन्थस्तु विभिन्नकालिकाविरोधि कार्यद्वयं तु लक्ष्यं भजत्येवेति प्रसङ्गाद्वक्तुं तत्र दृष्टान्तप्रदर्शनपरम्। युगपदसम्भवस्य तत्राभावेन दृष्टान्तासङ्गतेः। 'इह भवता द्वौ हेतू व्यपदिष्टौ तृजादिभिस्तुल्यं पर्यायः प्राप्नोतीति अप्रतिपत्तिर्वोभयोस्तुल्यबलत्वात्। तद्यथा द्वयोस्तुल्यबलयोरेकः प्रेष्यो भवति स तयोः पर्यायेण कार्यं करोति, यदा तमुभौ युगपत्प्रेषयत' इत्यग्रिमभाष्यग्रन्थासगतेश्च। **पुनर्धिर्भव-**

सम्भव इति भाष्ये स्पष्टम् । कार्ये परत्वञ्च—परशास्त्रविहितत्वम् । कार्यकालपक्षेऽप्यष्टाध्यायीपाठपरत्वमेव नियामकम् । अत एव 'ङमो ह्रस्वा'दित्यादौ त्रिपादीस्थे कार्यकालपक्षे एव परिभाषयोः प्रवृत्त्या एकदेशस्थत्वेऽपि परत्वात् 'तस्मादित्युत्तरस्ये'त्यनेनैव व्यवस्थेति सङ्गच्छते । त्रिपादीस्थेन शास्त्रेण विरुद्धपरिभाषाद्वयमध्ये परैव काल्यते=

❀ अभिनव-चन्द्रिका ❀

अयङ्ग्रन्थो योजनीय इति वाच्यम् ,तुह्योरितिशास्त्रस्याप्राप्तविभाषात्वेनाभावस्य सिद्धत्वात्तद्विधानासम्भवेन भावस्यैव विधयकत्वात् । अन्यथा 'मुचोऽकर्मकस्ये'त्यस्यापि भावाभावोभयविधायकत्वे मुमुक्षते वत्सइत्यादौ 'अत्रलोप'इत्यभ्यासलोपापत्तिः। यत्तु भिन्धीति भिन्धकीत्यस्योपलक्षणम् ,तत्र परत्वाद्ध्यादेशेऽकज्नस्यादिति तन्न, 'भिन्धकी'त्यादौ अन्तरङ्गत्वादकचि धित्वन्न स्या'दितिभाष्यविरोधात् ।

❀ चिदस्थिमाला ❀

परत्वमत आह—**कार्ये इति** । नच **विप्रे**तिसूत्रं प्रति त्रिपाद्या असिद्धत्वेन कथमत्र प्रवृत्तिरितिवाच्यम्, अस्याः परिभाषात्वेन कार्यकालपक्षेऽदोषात् । न चैवमपि कार्यकालपक्षे ङम इत्यादावुपस्थित्या द्वयोरेकदेशस्थत्वेन कथं तत्र परत्वमिति वाच्यम् , अष्टाध्यायीपाठकृतपरत्वाश्रयणेनादोषात् । नहि कार्यकालपक्ष इत्येतावता तदपैति,अन्यथा सर्वेषां शास्त्राणां प्रयोगार्थत्वेन तद्रूपैकदेशस्थत्वात् क्वापि परत्वं न स्यात् । तदेतदप्रेत्याह—**कार्यकालेति** । अपिना यथोद्देशसमुच्चयः । एवेन तत्रत्यव्यवच्छेदः । अत्र मानमाह—**अत एवेति** । आदिना ङःसीत्यादिपरिग्रहः । **परीति** । तस्मिन्निति तस्मादित्यनयोः । अन्यथा द्वयोरेक-

❀ ज्योत्स्ना ❀

विस्तरः परिभाषाप्रदीपार्चिषि द्रष्टव्यः। 'यथोद्देशपक्षे च परिभाषयोः पौर्वापर्यन्न कार्यकालताया'मिति प्रदीपग्रन्थं दूषयितुमुपक्रमते—**कार्यकाल पक्षेऽपीति** । अष्टाध्यायीपाठकृतपरत्वमेव नियामकमिति, नतु तत्पक्षे प्रदेश एव परिभाषाणां वाक्यार्थबोधात्सञ्ज्ञानामिव स्वदेशत्यागादुभयोरेकदेशस्थत्वेन परत्वाभाव इति भावः । तत्रोपष्टम्भकमाह—**अत एवेति** । **इति सङ्गच्छत इति** । यथा-

❀ विषमपदविवृतिः ❀

तीति । इदमयुक्तम् , स्थानिवत्सूत्रस्थभाष्यविरोधात् । तत्र हि **भिन्तादित्यत्र** परत्वात्तातङि धिभावमाशङ्क्य सकृद्गतिन्यायेन समाहितम् । किञ्चैवं भिन्तादिति रूपस्य विलयापत्तिः ।

अत्र कश्चिद्विकल्पशास्त्राणामभावेपि तात्पर्यं स्वीकृत्य तातङि पुनर्द्धिर्भवतीत्यस्य तातङभावे पुनर्द्धिर्भवत्यर्थमुक्त्वा'ऽत्र तातङ्धिभावयो'रित्याद्यग्रिमग्रन्थस्तु विकल्पघटकतातङ्विधिना धिभावस्य विरोधोपपादनायेत्याह,—तत्तुच्छम् । विकल्पशास्त्राणामभावे तात्पर्ये हि 'यस्येति सङ्घातग्रहणं चेत् क्यस्य विभाषायां दोषो भवति, यदा लोपस्तदा सर्वस्य लोपः, यदाऽलोपस्तदा सर्वस्यालोप' इति 'यस्य हल' इति सूत्रस्थभाष्यानुरोधात्कल्प्यम् । तच्च भाष्यं सूत्रान्तरस्थानेकभाष्यविरोधादेकदेश्युक्तिरिति 'यस्य हल'इति सूत्रे विवरणे नव्यैरुक्तम् । तथा च तत्र तथा वदन् शून्यहृदय इव तद्विरुद्धं कथमत्र वदेत् । पुनःप्रसङ्गोदाहरणन्तु 'ईजतु'रिति । तत्र हि परत्वात्सम्प्रसारणम् । यत्तु–'एतदुदाहरणं खट्वायामिति, अत्र हि परत्वादामि कृते पुनः प्रसङ्गविज्ञानाद्याट्–'इति **पाठकेनोक्तं**, तत्तुच्छम् । निरवकाशत्वेनैवाम्प्रवृत्तेः, निरवकाशत्वेन बाधे पश्चादुत्सर्गप्रवृत्तेर्याडिति न कश्चिद्दोषः । स्पष्टं चेदं नव्यग्रन्थेषु । ननु कार्यकालपक्षे तस्मिन्निति परिभाषाया 'ङमो ह्रस्वादची'त्यत्र तत्संस्कारार्थमुपस्थिताया निरवकाशत्वेन कथं तस्मादित्युत्तरस्येत्येतद्बाध्यत्वम् ?, न हि तत्रोपस्थितया विध्यन्तरं संस्कि-

आकृष्यते न पूर्वेति तत्त्वम् ।

सञ्ज्ञानां तु कार्यकालपक्षे प्रदेशे एव वाक्यार्थेन तद्बोधोत्तरमेव विरोध-प्रतिसन्धानं, कार्यज्ञानञ्चेति तत्रत्यपरत्वमेवैतत्सूत्रप्रवृत्तौ बीजम् । अत एव 'कार्यकालपक्षेऽयादिभ्यः परैव प्रगृह्यसञ्ज्ञा' इति 'अदसो मा'दिति सूत्रे भाष्ये उक्तम् । परिभाषाणान्तु तत्पक्षे तद्देशस्थत्वेऽपि स्वस्वदेशेऽर्थबोधोऽस्त्येवेति तासां पाठ-कृतमेव तत्—एतत्सूत्रप्रवृत्तौ नियामकमिति बोद्ध्यम् ।

यद्यपीयं परिभाषा तथापि कार्यग्रहणेन कार्यमात्रग्रहणा'त्तस्मि'न्निति 'तस्मा'दितिपरि-भाषयोरपि व्यवस्थापिका । कार्यकालपक्षेऽपि नैषा इक्परिभाषादिवद्विद्ध्येकवाक्यतयाऽ-ङ्गत्वात्स्वकार्यनिष्पादिका, किन्तु वाक्यभेदेनैव कार्यं व्यवस्थापयति । यथा—'वृक्षेभ्य'

❀ अभिनव-चन्द्रिका ❀

तस्मात्तिसृणामित्यादौ रत्वात्तिस्रादेशे नुट्न स्यादित्यस्योपलक्षणं बोध्यम् । **प्रदेशे एवेति** । विधिप्रदेश एवेत्यर्थः । **वाक्यार्थेनेति**–साक्षात्परम्परया वा अनाहार्याप्रामाण्यज्ञानानास्कन्दितलक्ष्यधर्मिकसाधु-त्वप्रकारकज्ञानोपयोगिवाक्यार्थबोधेनेत्यर्थः । **अत एवेति** । यत्र निरुक्तवाक्यार्थबोधो जायते स एव शास्त्रस्य स्वीयो देश इति स्वीकारादेवेत्यर्थः । **अर्थबोध इति** । निरुक्तवाक्यार्थबोध इत्यर्थः ।

ननु 'गुणानाञ्च परार्थत्वादसम्बन्धः समत्वा'दितिन्यायेन 'विप्रतिषेधे पर'मितिपरिभाषया 'तस्मिन्निति''तस्मा'दितिपरिभाषयोर्व्यवस्था नोचितेत्यभिप्रेत्याशङ्कते—**यद्यपीत्यादिना** । समाधत्ते-**तथापीति** । **कार्यग्रहणेनेति** । 'विप्रतिषेधे पर'मित्येतावतैव सिद्धे कार्यग्रहणसामर्थ्यादित्यर्थः । **व्यवस्थापयतीति** । बाधबीजप्रकरणशेषत्वादिति भावः । **अप्रवृत्तेरिति** । परशास्त्रमेतत्परिभाषा-

❀ चिदस्थिमाला ❀

देशस्थत्वेन तस्य त्रिपादीस्थत्वेन च तदसङ्गतिः स्पष्टैव । तत्तात्पर्यमाह—**त्रिपेति** । नन्वेवं सञ्ज्ञास्थले-ऽपि तथा स्यादत आह—**सञ्ज्ञयान्त्विति** । **तत्रत्येति** । प्रदेशस्थ इत्यर्थः । अत्र मानमाह—**अत एवेति** । **परैवेति** । पूर्वं पाठेऽपि तत्र वाक्यार्थबोधाभावादिति भावः । एवेन सञ्ज्ञास्थले क्वचित्पाठकृतं पूर्वत्वं विद्यमानमपि एतत्सूत्रप्रवृत्तौ न नियामकमिति सूचितम् । नन्वेवं परिभाषास्थलेऽपि कुतो नात आह—**परीति** । **तदिति** । कार्यकालेत्यर्थः । अपिना यथोद्देशसमुच्चयः । **यद्यपीति** । तथाच 'गुणाना'मिति न्यायेन विध्यङ्गत्वौचित्येन कथं तन्नियामकत्वमिति भावः । **कार्येति** । कार्यमात्रे प्रवृत्ति-बोधनार्थं हि तत्, अन्यथा 'विप्रतिषेधे पर'मित्येव वदेदित्यति भावः । विशेषमाह—**कार्येति** । आदिनाचश्चेत्यादिपरिग्रहः । **नैवेति** । प्रागुक्तरीत्या कार्यविरोधज्ञानोत्तरमेवास्या प्रवृत्त्या तद्बोधादेः

❀ ज्योत्स्ना ❀

चैतद्भाष्यस्यैकदेश्युक्तित्वेन प्रदीपकृन्मतोज्जीवनं, तथा परिभाषाप्रदीपार्चिर्द्रष्टव्यः । **सञ्ज्ञानान्त्विति** । **अत्रापि** यद्वक्तव्यं तत्परिभाषाप्रदीपार्चिष्युक्तम् । स्थान्यलसाधारणधर्माश्रयण एव स्थानिवद्भाव-

❀ विषमपदविवृतिः ❀

यते, येन सावकाशत्वं स्यादित्याशङ्क्याह—**त्रिपादीस्थेनेति** । तथा च तस्या बाधो नाम विधि-शास्त्रेणानाकर्षणमेवेति भावः । **प्रदेश एवेति** । विधिदेश एवेत्यर्थः । अत्र प्रमाणं तु सञ्ज्ञाशास्त्रा-नुसन्धानं विना विधिवाक्यार्थबोधानिष्पत्तिः । 'अयादिभ्यः परैव प्रगृह्यसञ्ज्ञे'ति भाष्यञ्च । **यद्यपीयम्परिभाषेति** । न कार्यमिति शेषः । **एवञ्चेति** । प्रतिद्वन्द्विभावापन्नकार्यद्वयनिमित्तकत्वे-

इत्यत्रैत्वदीर्घत्वयोः प्राप्तयोः परमेत्वं प्रवर्तयति ।

एवम्—'असिद्धम्बहिरङ्ग'मित्यादयोऽपीति 'खरवसानयो'रित्यत्र कैयटे स्पष्टम् । एवञ्च 'विप्रतिषेधे' इत्येषा यथोद्देशैवेति स्थितम् । त्रिपाद्यां कार्यकालपक्षेऽप्यप्रवृत्तेः । पूर्वदृष्ट्या परावस्थानाभावादित्यन्यत्र विस्तरः ।

इति लोपे इति । 'उत्वं नित्य'मिति तु न, 'भोभगो' इतिसूत्रोक्तरीत्या लोपस्याल्विधित्वात्, स्थानिवत्त्वेन तद्धर्मातिदेशेऽपि उच्चारणप्रसङ्गरूपस्थानषष्ठ्यर्थाभावेन लोपे तदप्राप्तेश्च ।

एतत्तदोः । अनुकार्यस्वरूपभङ्गभिया कोशे इवैकशेषाभावः । 'एतत्तदोरनन्तर'

❀ अभिनव-चन्द्रिका ❀

प्रवृत्तौ लिङ्गमिति स्वीकारेण परशास्त्रत्वप्रकारकज्ञानाभावादिति भावः । **अल्विधित्वादिति ।** अल्त्वव्याप्यरत्वावच्छिन्नस्थानितानिरूपितादेशताश्रयधर्मिकारोपप्रकारीभूतरुत्वेन साक्षादवच्छिन्नोद्देश्यताकत्वादुत्वविधायकस्येत्यर्थः । **उच्चारणप्रसङ्गरूपेति ।** चिन्त्यमिदम्, वृत्तिविशेष्यतावच्छेदकतावच्छेदकताकेष्टसाधनत्वप्रकारकभ्रमविषयत्वप्रकारकज्ञानीयविशेष्यतावच्छेदकावच्छिन्नविशेष्यताकेष्टसाधनत्वप्रकारकप्रमाविषयकत्वप्रकारकज्ञानीयविशेष्यतावच्छेदकतावच्छेदकतारूपे स्थानपदार्थे उच्चारणस्याप्रविष्टत्वात् । किञ्च स्थानपदार्थस्योच्चारणघटितत्वे 'दर्भाणां स्थाने शरैः प्रस्तरितव्य'मित्यादौ स्थानपदार्थस्यानुपपत्तिरिति दिक् । **एकशेषाभाव इति ।** चिन्त्यमिदम्—एतत्तदोरित्यनयोः त्यदादिघटकैतत्तच्छब्दबोधकत्वेऽपि त्यदाद्यर्थाबोधकत्वेन 'त्यदादीनां मिथः सहोक्ता'

❀ चिदस्थिमाला ❀

प्रागावश्यकत्वात् । एतदर्थमपि कार्यग्रहणम् । इति=इत्यत्र । प्रसङ्गादाह—**एवमिति ।** एतद्वाक्यभेदेनैव व्यवस्थापकास्ते न्याया इत्यर्थः । तत्राप्यन्तरङ्गत्वादिज्ञानार्थं विरोधज्ञानार्थञ्च प्राक् तदावश्यकत्वात् । एवं सति फलितमाह—**एवञ्चेति ।** तथैव=कार्यव्यवस्थापकत्वे चेत्यर्थः । अत्र हेतुमाह—**त्रिपाद्यामिति ।** अपिः प्राग्वत् । तत्र हेतुमाह—**पूर्वेति ।** शास्त्रान्तरे इत्यर्थः । वस्तुतस्तु 'आकडारा'धिकारस्थपदसञ्ज्ञाविषये यथोद्देशपक्ष एवेति तत्रत्यपरत्वेनैव बाध्यबाधकभावः । पदादिपदानां तत्र जातशक्तिग्रहेणैव त्रिपाद्यामपि व्यवहारः । किञ्च सर्वत्र पाठकृतपरत्वमेवैतन्नियामकं, 'परैव प्रगृह्ये'त्यत्र सञ्ज्ञापदेन तत्कार्यं प्रकृतिभाव उच्यते । आशयानभिज्ञस्याग्रे प्रश्नः—'कथ'मिति । एकदेशिन एवोत्तरं 'कार्यकाल'मित्यादीति । तदाह—**इत्यत्रेति ।** ननु नित्यत्वादुत्वमत आह—**उत्वमिति ।** **लोपस्याप्यल्विधीति ।** अपिनोत्वपरिग्रहः । अभ्युपेत्याह—**स्थानीति ।** ननु सूत्रे एकशेषः कुतो न, प्रकृतिवदित्यस्य प्राप्तेः । नच तस्यानित्यत्वं तावताप्यत्राप्रवृत्तौ मानाभावात् । नच सौत्रत्वादप्रवृत्तिस्तथा सति वृत्तौ तथा प्रयोगासङ्गत्यापत्तेरत आह—**अनुकार्येति ।** अस्यावश्यकतां ध्वनयन्नाह—**कोशे इति ।** पञ्चम्यभावेन पर

❀ ज्योत्स्ना ❀

निषेधोऽन्यथा 'अग्नी' इत्यादौ प्रागुक्तदोष इत्यस्वरसात्समाधान्तरमाह—**स्थानिवत्त्वेनेति ।**

❀ सदाशिवभट्टीयम् ❀

एतत्तदोरनन्तर इति । **सु इति ।** प्रत्ययग्रहणात्तदन्तग्रहणसत्त्वेन तदादीस्त्यस्योपस्थित्यै-

❀ विषमपदविवृतिः ❀

चेत्यर्थः । **यथोद्देशैवेति ।** 'परोक्षा क्रिये'त्यादिवदर्शे आद्यजन्तमेतत् । नन्वसति ङमो ह्रस्वादचीत्यत्रैतत्प्रवृत्त्यनापत्तिः, तथा चोभयनिर्देशे पञ्चमीनिर्देशो बलवानिति भाष्यासङ्गतिरिति चेन्न । त्रिपादीस्थेन तयोराकर्षणेपि उक्तरीत्या त्रिपादीस्थत्वाभावेन विप्रतिषेधशास्त्रदृष्ट्या तयोरसिद्धत्वस्य 'पूर्वत्रासिद्ध'मित्यनेन बोधनासम्भवेन तयोर्विषये विप्रतिषेधेत्यस्य प्रवृत्तेर्निर्बाधत्वादित्याशयात् ।

इत्यर्थः। तेन 'परमस ददाती'त्यादौ न दोषः। गौणे तु न दोषः, तत्र त्यदाद्यत्वाभावेन हल्ङ्यादिलोपस्य दुर्वारत्वात्। 'सु'इति प्रथमैकवचनमेव, व्याख्यानात्।

अनञ्समासे किमिति। तस्य पूर्वपदार्थप्रधानत्वादुपसर्जनत्वात्त्यदाद्यत्वाभावेन हल्ङ्यादिलोपो दुर्वार इति प्रश्नः। उत्तरपदार्थप्रधानः स इत्युत्तरम्।

सोऽचि। 'स'सिति प्रथमान्तस्य लुप्तषष्ठीकमनुकरणम्। **सेमामविड्ढीति।** द्वादशाक्षरपादा जगती च्छन्दः। **स एवमुक्त्वेति।** लोपेऽत्र पादापूर्तेर्न लोप इति भावः। **अवधारणन्त्विति।** वृद्धैर्व्याख्यातमवधारणन्त्वित्यर्थः। **बहुलेत्यादि।** गमकान्तरा-

❀ अभिनव-चन्द्रिका ❀

विति शास्त्रस्याप्राप्तेः। प्राधान्येन प्रसिद्धस्वीयसर्वार्थवाचकानामेव त्यदादीनां तत्र ग्रहणात्।

किञ्च'कोश इवे'ति दृष्टान्तोऽप्यसङ्गतः,'विष्णुर्नारायण'इत्यादिकोशे एकरूपावच्छिन्नस्यैकरूपावच्छिन्न-संसर्गेण एकरूपावच्छिन्नेऽन्वयबोधेच्छारूपसहविवक्षाया अभावेन 'विरूपाणा'मिति शास्त्राप्राप्तेः।

अनन्तर इति। न च 'परमः स ददाती'त्यादौ परसोत्तरसोरपि तत्पदानन्तरत्वेन लोपापत्तिरिति वाच्यम्, एतच्छब्दसाहचर्येण तच्छब्दानन्तरस्यापि परस्य ग्रहणेनादोषात्। यत्तु एतत्तदर्थगतसङ्ख्याभिधायिनः सोर्लोप इति, तन्न, 'परमः स ददाति' 'तत्कल्प'मित्यादौ परमपदोत्तरसोः कल्पबुत्तर-सोश्च तदर्थगतसङ्ख्याभिधायित्वेन लोपापत्तेः। न च 'स्वाव्यवहितोत्तरत्व' 'स्वार्थगतसङ्ख्याभिधा-यित्वो'भयसम्बन्धेन एतत्तद्विशिष्टसोर्लोप इत्यर्थ इति न दोष इति वाच्यं,'स्वार्थगतसङ्ख्याभिधा-

❀ चिदस्थिमाला ❀

इति, विहिते इति वा व्याख्यानं दुर्वचम्,अवयवत्वन्त्वसम्भावितमेव,सोःप्रत्ययत्वात्। नचार्थद्वारकसम्बन्धे-नान्वयो, गौरवादत आह-**एतत्तदोरनन्तर इति।** पश्चादव्यवहितसमीप इत्यर्थः। अन्यथा समीप इत्येव वदेत्। अत एव रामः स इत्यादौ नातिप्रसङ्गः, एतच्छब्दसाहचर्याच्च, अनञ् समासे इति लिङ्गाच्च। अनन्तर इति चाध्याहारलभ्यम्। विहितविशेषणत्वपक्षे कैश्चिदुक्ते प्राप्तं दोषमुद्धरति—**तेनेति।** उक्त-व्याख्यानेनेत्यर्थः। नन्वेवं गौणेऽपि स्यादत आह—**गौणे त्विति।** एवञ्च तत्रेष्टापत्तिरिति भावः।

सु इतीति। अनेन पृथक्पदत्वं सूचितम्। **व्याख्येति।** उत्तरत्र तस्यैव सम्भवेनानुनासिकोकार-विशिष्टत्वानुमानादित्यर्थः। **उपेति।** उत्तरस्येत्यादिः। तथा च तद्व्यर्थमेवेति भावः। **उत्तरेति।** तथाचागौणत्वेनात्वे तदप्राप्त्यैतद्वारणाय तदिति भावः। **लुप्तेति।** सौत्रत्वादितः। एतेन 'षष्ठीस्थाने प्रथमे'ति रत्नाकरोक्तमपास्तम्, अतिप्रसङ्गापत्तेश्च। एतेन सूत्रे तद एव ग्रहणं, न कंसादेः सस्य, एतत्तदोरिति पूर्वसूत्रसाहचर्यादनर्थकत्वाच्चेत्यपि तदुक्तमपास्तं, गौरवाच्च। 'प्रभृति'मित्यन्त एव पाद इति भ्रमनिरासा-याह—**द्वादशेति।** 'ईशिषे' इति तच्छेषो बोध्यः। **लोप इति।** षाष्ठेनानेनेत्यादिः। सन्धेः प्रसङ्गा-दिति भावः। तथा यस्य तेन लोपान्न स्वरसन्धिरिति तात्पर्यम्। मूलं परमताभिप्रायं न सिद्धान्त इति सूच-यन्नाह—**वृद्धैरिति।** **गमकान्तरेपि**=अनुवृत्तिवैयर्थ्यादिरूपेत्यर्थः। एतेन तत एव लाभे तावत्पर्यन्त-धावनं व्यर्थमित्यपास्तम्। अस्य युक्तत्वात्तात्पर्यमाह—**एवञ्चेति।** अन्यथानुपपत्त्या तदनुवृत्त्यावश्यकत्वे चेत्यर्थः। क्वचित्=सास्मा अरं बाहुभ्यां यत्पिताकृणोत्, सोहमाजन्म इत्यादौ। मूलाभिमतत्वमप्यस्येत्याह-**सर्वमिति।** एतेन सोऽहमित्याद्यर्थं तथा व्याख्याने सास्मा इत्यादौ सुलोपानापत्तिर्बहुलग्रहणानुवृत्त्या-तदुपपादने तु सोऽहमित्यादेरपि तत एव सिद्ध्या किमवधारणेनेति **खण्डनकृदा**द्युक्तमपास्तम्। नच सास्मा

भावादिति भावः । एवञ्च तदनुवृत्त्यैव क्वचिदप्रवृत्तौ सिद्धायामवधारणपरतया व्याख्यानं व्यर्थमिति भावः । सर्वमेतदवधारणन्त्विति–तुना सूचितमित्यलम् ।।

।। इति स्वादिसन्धिः ।।

[।। इति पञ्चसन्धिप्रकरणम् ।।]

❀ अभिनव-चन्द्रिका ❀

यिल'सम्बन्धस्य वैयर्थ्यापत्तेः । व्याख्यानादिति । 'सु'इत्यत्रानुनासिकोच्चारणादिति भावः । लुप्तषष्ठीकमिति । अन्यथा 'ससोची'ति स्यादिति भावः ।

इति स्वादिसन्धिः ।

❀ चिदस्थिमाला ❀

इत्यत्र प्रकृत्यान्त इति पूर्वरूपाभावेन न पादपूर्त्तिः । 'सोयमागा'दित्यादाविवात्रापि प्रातिशाख्येन सिद्धेः । यथाचैतत्तथा प्रतिपादितं भावप्रकाशे । तदाह—इत्यलमिति ।

❀ इति स्वादिसन्धिः ❀ ❀ पञ्चसन्धिप्रकरणम् ❀

❀ ज्योत्स्ना ❀

अनन्तरमित्यर्थ इति । एवञ्चात्रत्यैतद्ग्रहणस्यार्थवत्परिभाषाज्ञापकत्वं बुधमनोहराकारोक्तं नानुपपन्नं भवति । ❀ इति स्वादिसन्धिः । ❀

❀ सदाशिवभट्टीयम् ❀

तदन्ततदादेरनन्तरस्य लोप इत्यर्थेन 'रामः स ददाती' त्यादौ न दोष इति बोध्यम् ।

❀ इति शेखरविवृतिसङ्ग्रहे स्वादिसन्धिः ❀

❀ विषमपदविवृतिः ❀

'इति लोपे प्राप्त'इति निर्मूलम्, पूर्वत्रासिद्धमित्यस्यापर्यालोचनदशायां बोध्यम् । एतत्तदोः । प्रकृतिवदनुकरणमित्यतिदेशेनैकशेषमाशङ्क्याह—अनुकार्येति ।

❀ इति स्वादिसन्धिः ❀

इति पण्डितराजश्री १०८ श्रीस्नेहिरामशास्त्रिणां पौत्रेण, प्रतिवादिभयङ्कर–न्यायाचार्य–
श्री १०८ श्रीशिवनारायणशास्त्रिणां पुत्रेण, सतीसार्वभौम–राजलक्ष्मी–गर्भसम्भूतेन,
साकेतपुरनित्यविहारि–श्रेष्ठिवरराधाकृष्णजीपोद्दारलब्धर्ज.विकेन,
श्रीगुरुप्रसादशास्त्रिणाऽऽकलितायां शब्देन्दुशेखरवरवर्णिन्यां
पञ्चसन्धिप्रकरणम् ।